तर्कामृतम्

चषकव्याख्या एवं चषकतात्पर्यटीकाव्याख्यासमेतम्

प्रो० पीयूषकान्तदीक्षितः

NAG PUBLISHERS

नाग पब्लिशर्स

तर्कामृतम्

तरङ्गिणी-चषकव्याख्या एवं
चषकतात्पर्यटीकाव्याख्यासमेतम्

प्रो० पीयूषकान्तदीक्षितः
न्यायवैशेषिकविभागाध्यक्षः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-११००१६

NAG PUBLISHERS

नाग पब्लिशर्स

११ ए/ यू० ए०, जवाहरनगरम्, दिल्ली-११०००७
(भारतम्)

राष्ट्रियसंस्कृतसंस्थानस्य, नवदेहलीस्थितस्य वित्तसाहाय्येन प्रकाशित:

नाग पब्लिशर्स
(१) ११ए/यू. ए. जवाहरनगरम्, दिल्ली-११०००७
(२) जलालपुरम् माफी (चुनार-मिर्जापुरम्) उ० प्र०

© **लेखकाधीनम्:**

ISBN :81-7081-557-6

प्रथमं संस्करणम् : 2003

मूल्यम् रूप्यकाणि :

मुद्रक:
श्री सुरेन्द्र प्रताप: द्वारा नागप्रकाशक: ११ ए०/यू० ए०, जवाहरनगरम्, दिल्ली ११०००७ द्वारा प्रकाशित: तथा जी. प्रिंट. प्रोसेस, ३०८/२ शहजादा बाग, दयाबस्ती दिल्ली ११००३५ द्वारा मुद्रित:। अक्षरयोजक: ए० आर० मुद्रक:, डी-१०२ न्यू सीलमपुरम्, दिल्ली-११००५३

TARKĀMṚTAM

TARAṄGIṆĪ - CAṢAKAVYĀKHYĀ AVAM TATPARYA ṬĪKĀ VYĀKHYĀ SAMETAM

PROF. PIYUSHKANT DIXIT

Head of Nyāya Vaiśeṣika Department
Shri Lalbahadur Shastri Rashtriya Sanskrit Vidyapeetha
(Deemed University)
New-Delhi - 110016

NAG PUBLISHERS

NAG PUBLISHERS

11A, U. A. JAWAHAR NAGAR
DELHI - 110007
(INDIA)

This publication has been brought out with the financial assistance from the Rashtriya Sanskrit Sansthan, New Delhi

Nag Publishers:

(i) 11A/U.A., Jawahar Nagar, Delhi-110007
(ii) Jalalpur Mafi (Chunar, Mirzapur) U.P.

© Reserved by Author

ISBN : 81-7081-557-6

First Edition: 2003

Price Rs.

NAG PUBLISHERS
Rs. 129.00
DELHI

Published by Sh. Surendra Pratap for Nag Publishers 11A/U.A., Jawahar Nagar, Delhi-110007 and printed at G.Print Process 308/2, Shahazada Bag Daya Basti, Delhi-110035

Laser type setting

A.R. Printers, D-102 New Seelampur, Delhi-53

वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः।
करणं परोपकरणं येषां केषां न ते वन्द्याः॥

एवंविधानां पितामहचरणानां तपःपूतात्मनां वैद्यशिरोमणीनां श्रीवायुनन्दनदीक्षितानां पुण्यस्मृतौ ग्रन्थोऽयं सश्रद्धं समर्प्यते

पस्पशामृतम्

सर्वेषु शास्त्रेषु न्याय-वैशेषिकशास्त्रस्य सर्वशास्त्रोपकारकत्वात् श्रेष्ठत्वं विज्ञैस्स्वीकृतमिति नाविदितं विदितवेदितव्यानाम्। भारतीयराजनीतिविशारदेन कौटिल्येन अर्थशास्त्रस्य विद्योद्देशप्रकरणे न्यायशास्त्रस्य अनितरसाधारणं माहात्म्यम् एवं न्यरूपि–

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।

आश्रयः सर्वधर्माणां सेयमान्वीक्षिकी मता।। इति।

प्रमाणादिभिः पदार्थैः प्रविभज्यमानेयमान्वीक्षिकी – न्यायविद्या सर्वविद्यानां प्रदीपवत् प्रकाशकत्वात् प्रदीपः भवति। यद्यपि अन्यासु विद्यास्वपि प्रमाणादीनां तत्त्वानां प्रदीपवत् प्रकाशकराणां चर्चा प्राप्यते परमेतासां विद्यानां प्रमाणादिप्रतिपादनं मुख्यो विषयो नास्ति। वस्तुत इतरा विद्या न्यायशास्त्रविवेचितप्रमाणैरेव प्रकाशितेऽर्थे तावत् प्रवर्त्तन्ते। यतः प्रमाणप्रकाशितमर्थमेवेतरा विद्याः प्रतिपादयन्ति अतः न्यायविद्या सर्वविद्यानामुपायः अर्थात् करणमुच्यते। न्यायविद्येयं समस्तानां विद्यानां तावदुपकारं करोति, उपकारित्वाच्चेयं सर्वविद्यानां आश्रय इत्यपि मुक्तकण्ठेनोदीर्यते। एतावता न्यायशास्त्रस्य सर्वशास्त्रेषु प्रामुख्यं व्यवस्थितमेवेति स्पष्टम्।

एतादृशस्य नव्य-न्यायशास्त्रस्य अध्ययनमन्तरा शास्त्रान्तराणामपि वास्तविकं रहस्यं नैवावगन्तुं शक्यम्। यदि हि व्याकरण-साहित्य-मीमांसादिशास्त्राणां रसास्वादः समीहितस्तर्हि सादरं प्रथमं नव्य-न्यायशास्त्रमध्येयमेव।

ज्ञानगुरोः भारतस्य सततं संसरणशीला संसारतापसंहारिणी परमपुरुषार्थदायिनी सर्वमङ्गला सनातनी संस्कृतिः संस्कृतशास्त्राणां सिद्धान्तसारसरोवगाहनेनैव अनवद्यमधिगन्तुमर्हा। फलतः संस्कृतभाषोप-निबद्धानां शास्त्राणां पारमार्थिकं स्वरूपं सम्यगधिगन्तुं न्यायशास्त्रविचार-सरणिः नूनमनुसर्त्तव्येति वस्तुस्थितिं समीक्ष्य, अस्यां दिशि विधीयमानः स्वल्पोऽप्यायासः श्रेयस्कर इति अतिरोहितमेव विपश्चिताम्। प्रेष्ठस्य डॉ० पीयूषकान्तदीक्षितस्य अस्यामेव दिशि श्लाघ्योऽयमायासः।

बालव्युत्पादकाः सन्ति बहवो लघुग्रन्थाः तर्कसङ्ग्रहप्रमुखाः परं तर्कामृतं किमपि विशिष्टं स्थानं भजते। यथोपयोगितामाविष्करोति न यतस्तर्कामृतेऽस्मिन् सरलया वाक्यरचनया न केवलं पदार्थनिरूपणादिकं लभ्यते प्रत्युत शाब्दबोध-प्रक्रियापि बालानां विशेषतोऽवबोधाय सङ्क्षिप्य प्रस्तूयते। फलतः तर्कामृतस्य अनुपमोपादेयता स्फीता भवति।

प्रो० पीयूषकान्तदीक्षितः परम्पराप्राप्तविद्यावतां कुलशीलसम्पन्नानां यूनां श्रेण्याम् अग्रगण्यो विद्यते। अयं परम्परया शास्त्राध्ययनाध्यापननिरतानां कुले लब्धजन्मा विद्याराजधान्यां वाराणस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालये श्रम-क्रमाभ्यां विशिष्टानां विदुषां सान्निध्ये यथाविधि नव्य-न्यायशास्त्रीयां दीक्षामासादितवान्। अस्य पितामहाः श्रीयदुनन्दनदीक्षिताः ज्यौतिषशास्त्रस्य मर्मज्ञा मनीषिणः आसन् स्वनामधान्यानां तपःपूतात्मनां करपात्रस्वामिचरणानां स्नेहच्छायायां सम्वर्धिता एतस्य पितृचरणा नैयायिकशिरोमणयः श्रीसुधाकरदीक्षिता न्यायवैशेषिकदर्शनयोः प्रामाणिका विद्वांसः। पूर्वम् इमे पूनाविश्वविद्यालयस्य तत्त्वज्ञानविभागे न्यायाध्यायकपदं समलङ्कृतवन्तः। तदनु वाराणसीस्थ सम्पूर्णानन्दसंस्कृत विश्वविद्यालयेऽध्यापनकर्मणि व्यापृताः साम्प्रतं ततोऽपि निवृत्ताः स्वाध्यायपरायणा वाराणसीमेव आश्रयन्ते।

एवम्विधस्य विद्वत्कुलसम्बद्धस्य श्रीदीक्षितस्य भारतराजधान्यां विद्यापीठेऽस्मिन् नियोगः नूनं सौभाग्याधायकः। अयं विद्यापीठेऽस्मिन् नव्य-न्यायस्य प्राध्यापकत्वेन प्रवाचकरूपेण च सेवां विधाय सम्प्रति

आचार्य (प्रोफेसर) पदमलङ्कुर्वन् एकतः नवदेहल्यां विज्ञानभवने समायोजिते विश्वसंस्कृतसम्मेलने समायोजितासु सङ्गोष्ठीषु न्यायशास्त्रपरिचर्चया श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य मानं सम्वर्धयन्, अन्यतश्चविद्यापीठस्य कुलानुशासक-न्यायवैशेषिक-विभागाध्यक्षएन०सी०सी०अधिकारिपदञ्च स्वीकुर्वन्: साम्प्रतं शास्त्रीयविषयस्योत्कृष्टविद्वद्रूपेण स्वात्मानं प्रतिष्ठापयतीति मम सन्तोषस्य विषयः।

तथ्यमिदं यद्ययं ग्रन्थः विश्वविद्यालयैः शास्त्राध्ययनोद्यतानां विद्यार्थिनां कृते, विभिन्नेषु पाठ्यक्रमेषु अध्ययनार्थं अनिवार्यत्वेन निर्धार्यते तर्हि सर्वशास्त्रोपकारकस्य न्यायशास्त्रस्य परिचितिः अध्येतॄणां सुकरा स्यात्।

यथा श्रीदीक्षितेनास्य ग्रन्थस्य समुद्धरणे प्रशस्ता रीतिः समाश्रिता तथा पाठ्यक्रमे निर्धारितान् नव्य-न्यायग्रन्थान् समुद्धर्त्तुम् अन्ये न्यायशास्त्रमर्मज्ञा विद्वांसः प्रयतेयुश्चेत् संस्कृतशास्त्राणाम् अनितरसाधारणं माहात्म्यं तद्गतं रहस्यञ्च विभिन्नासु अमूल्यासु पाण्डुलिपिषु सङ्गोपितं प्रकाशितं सत् बहुतरजनसम्बद्धं स्यात्।

एवमेवानुदिनं श्रीदीक्षितः सिद्धान्तलक्षण-पक्षता-व्यधिकरणादीनां सर्वेषामपि न्यायप्रकरणग्रन्थानां सङ्क्षिप्य प्रामाणिकं सरलं स्वतन्त्रं विवरणात्मकं प्रबन्धमपि सोत्साहं रचयेत् परमेशश्च अस्मै एतदनुकूलं बुद्धिवैभवं दद्यादिति साशीर्वादमहं कामये।

विद्याविनयसम्पन्नेन श्रीदीक्षितेन परिष्कृतम्, तर्कामृतम्; चषकसम्बद्धं विलोक्य नूनं प्रसीदति मे चेतः। पयोदधिमन्थनसमुद्धृतममृतं यथा चषकसम्प्राप्तं पानयोग्यम् अमृतत्वसाधकञ्च भवति तथा तर्कार्णवमन्थनोत्थं तर्कामृतं चषकेन सह प्रस्तुतं सुधियां न्यायामृतरसास्वादेऽमृतत्वसाधने चाऽलमिति मम दृढमभिमतम्। यत्तावद्रहस्यं तर्कामृतस्य चषकेऽपि न स्फुटति तस्यावगमः चषकतात्पर्यटीकाया निरीक्षणे सति आञ्जस्येन भवत्येवेति विशिष्टेषु स्थलेषु मयाऽनुभूतम्।

चषक-चषकतात्पर्यटीकोपेतस्य तर्कामृतस्य तरङ्गिण्याश्च पाण्डुलिपिं समासाद्य महता परिश्रमेण तर्कामृतं संशोध्य टिप्पण्यादिभिश्च सम्भूष्य आयुष्मता डॉ० दीक्षितेन विहिमिदं सम्पादनं सर्वथा स्तुत्यं विद्यते।

रमणीयमिदं प्रकाशनं निभाल्य नागप्रकाशनसंस्थानस्य संस्थापकान् यशःशरीरान् श्रीनागशरणसिंहमहाशयान् संस्मरन् तेभ्यः श्रद्धासुमनाञ्जलिमर्पयामि। संस्थापितकुलपरम्परासम्वर्धनरतौ तेषां तनूजन्मानौ श्रीसुरेन्द्रनरेन्द्रमहोदयौ मम वर्धापनार्हौ स्तः। प्रकाशनमिदं संस्कृतसुधियामाह्लादकरं भवेदिति मे विश्वासः।

प्रो० वाचस्पति उपाध्यायः

कुलपतिः

ऋषिपञ्चमी

११सितम्बर, २००२

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

मानितविश्वविद्यालयः

नवदेहली - ११००१६

कृतवेदितावेदनम्

नमामि जननीं देवीं शारदामिष्टसिद्धये।
यस्याः स्नेहसुधावृष्टिः, पीयूषस्यावलम्बनम्॥

शास्त्राध्ययनेऽभिरुचिः प्रवृत्तिश्च महतां गुरूणां कृपाकटाक्षमन्तरा न सम्भवति। ग्रन्थरचनापाटवमधिगन्तुमपि गुरूणामाशीर्वादो नितरामुपयोगित्वमावहत्येवेति स्पष्टम्। मम कुलपरम्परायां शास्त्राध्ययनपरिपाटी प्राचीनतमाऽस्ते। अस्माकं पितामहचरणाः शिवसायुज्यमवाप्ताः पं० श्रीयदुनन्दनदीक्षिताः ज्योतिषशास्त्रस्य मर्मवेत्तारः काश्यां शास्त्रसेवयाध्ययनाध्यापनेन च तपः पूतं जीवनमुज्जीवितवन्तः। श्रीमतां पितामहचरणानामशीर्वादेन अक्षय्यतपःप्रभावेणैव च वयं सफलं निर्विघ्नं च जीवनं निर्वहाम इति मे दृढा मतिः। एतेषां यशःशरीराणां चरणयोः नमोवाक्प्रशासनं विना किमप्यन्यदुचितं न पश्यामि। सर्वदा भवामि एतेषां विषये कृतज्ञः।

मम जन्मप्रभृति आकिशोरावस्थाम् अनितरसाधारणेन स्नेहातिशयेन मां लालयतां प्रारम्भिकसर्वविधशिक्षाप्रदातॄणां ज्येष्ठपितामहानां वैद्यसम्राजां सनातनधर्मस्वरूपाणां शिवसायुज्यमवाप्तानां महनीयचरितानां पं० श्री वायुनन्दनदीक्षितानामवसरेऽस्मिन् पुण्यस्मरणं भविष्यति मम महते श्रेयस इति धिया एतानपि नितरां द्रुतेन चेतसा स्मरामि, एतेषां पुण्यस्मृतौ च ग्रन्थमिमं समर्पयामि।

बाल्ये न्यायशास्त्राध्ययनं प्रति ममाभिरुचिः नैवासीत्। परमश्रद्धेयानां नव्यन्यायशास्त्रमर्मज्ञानाम् अन्येष्वपि विविधशास्त्रेषु कृताधिकाराणां

मत्पितृचरणानां पं० श्रीसुधाकरदीक्षितानां दृढायासानुशासनप्रभावादेव नव्य-न्यायशास्त्रस्याध्ययने प्रवृतिरभिरुचिश्च मम समजनि अनन्तरं काश्यां विविधासु पण्डितसभासु शास्त्रार्थोपस्थापनकलाऽपि पितृचरणैरेव मयि विकासमानीता। प्रबन्धरचनायाः सरणिरपि श्रीमद्भिः पितृचरणैरेव प्रादर्शि। ग्रन्थस्यास्य पाण्डुलिपिरूपेण सम्प्राप्त्यनन्तरम् अस्याः संशोधनार्थं प्रकाशनयोग्यां लिखितां प्रतिं निर्मातुं नितरां दुरूहं श्रमसाध्यं सम्पादनकर्म चानुष्ठातुं श्रीमद्भिः पितृचरणैः समादिष्टोऽहं एतेषाम् अशेषाशीर्वादप्रभावादेव किमपि कर्तुं प्राभवम्। समये-समये श्रीचरणैः प्रतिपदं यन्मम साहाय्यमनुष्ठितं तदर्थमहमेतेषामाशीर्वादं कामयमानो हृदयेन कृतवेदितामावेदयामि।

आबाल्यादेव मम प्रेरणास्त्रोतसां प्रातः स्मरणीयानां पण्डितराजश्रीराजेश्वरशास्त्रिविड़महोदयानां राष्ट्रपतिसम्मानितानां पं० प्र० श्रीबदरीनाथशुक्लमहाश्यानाम्, पं० प्र० श्रीहरिरामशुक्लमहोदयानाञ्च चरणयोः कार्तज्ञ्यसमन्वितानि श्रद्धासुमनानि समर्पयामि।

आत्मा वै जायते पुत्रः इति श्रूयते। पण्डितराजश्रीराजेश्वरशास्त्रिद्रविड़महोदयानां सूनवः पं० श्री विश्वेश्वर-शास्त्रिद्रविड़महोदयाः वाराणस्यां रामघट्टस्थश्रीवल्लभरामशालिग्राम-साङ्गवेदमहाविद्यालयाध्यक्षाः विद्यया वपुषा क्रियया च स्वपितृनिभाः नूनमस्माकं वन्दनीयाः सन्ति। साङ्गवेदविद्यालयस्य पुस्तकालये विद्यामाना एका स्वीया च तर्कामृतस्य अपरा पाण्डुलिपिः, सुसम्पाद्य प्रकाशयितुं श्रीविश्वेश्वरमहोदयैरेव मम पितृचरणानाम् नाम् अनुरोधेन तेषां सविधे प्रेषिता। एवमस्य तर्कामृतस्य सम्पादने तदनु प्रकाशने च मूलतः प्रेरकाणां श्रीमतां द्रविड़महोदयानां मौलिकं योगदानं स्मारं-स्मारं तान् प्रति विनतोऽहम् आभारविशेषंप्रकाशयामि।

पद्मभूषणविभूषितान् ब्रह्मलीनान् पण्डितराजश्रीपट्टाभिरामशास्त्रिवर्यान् प्रत्यप्यहं हार्दिकीं कार्तज्ञ्यभावनां प्रतिवेदयामि। एभिरधिगतम् स्वाभाविकम् स्नेहम् न कदाप्यहं विस्मर्त्तुं प्रभवामि।

ममाध्ययनकाले सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य न्याय-वैशेषिकविभागे विभागाध्यक्षपदमलङ्कुर्वाणानां राष्ट्रपति-पुरस्कृतानां पं० प्र० श्रीश्रीरामपाण्डेयमहोदयानां मां प्रति सहजः स्नेहो नोपवर्णयितुं शक्यते। अखिलभारतीयासु विविधासु संस्कृतभाषणप्रतियोगितासु सम्मिलितोऽहमेतेषां गुरुवर्याणां निर्देशने साफल्यमध्यगच्छम्। एभिर्यत्साहाय्यमाचरितं तदर्थमहं तेषां हृदयेन कार्तज्ञ्यमनुभवामि।

मुक्तात्मनां राष्ट्रपतिसम्मानितानां पण्डितप्रवराणां श्रीमतां रामचन्द्रशास्त्रिहोसमनेमहोदयानां पितृतुल्यः सहजः स्नेहातिशयो मयाधिगत इति गर्वमनुभवामि। एतेषामहमाजीवनं कृतज्ञोऽस्मि। एवं त्यागमूर्त्तीनां ब्रह्मीभूतानां श्रीमतां हेब्बारशास्त्रिमहोदयानाम् (श्रीकृष्णाश्रम-स्वामिवर्याणाम्) अपि अहं मनसा कृतज्ञतां स्वीकरोमि।

प्राचीनाध्ययनाध्यापनपरिपाटीसंरक्षणे साम्प्रतमपि बद्धपरिकराणां पं० प्र०महामहोपाध्यायश्रीविश्वनाथशास्त्रिदातारमहोदयानां सन्निधावप्यहमाशैशवादासम् नितरां स्नेहेन एभिर्यदहमध्यापितो न्यायशास्त्रे व्युत्पादितश्च तदुपकारभरं कदाचिदपि नाहं विस्मर्तुं शक्नोमि।

पद्मविभूषणानां साहित्यजगति लब्धप्रतिष्ठानां कामेश्वरसिंहदरभङ्गा-संस्कृतविश्वविद्यालयस्य कुलपतिचराणां यशःशरीराणां श्रीमतां वि० वेङ्कटाचलम्महाशयानां विविधासु सङ्गोष्ठीषु अध्ययनदिशि उत्साहवर्धकं यन्निर्देशनं अध्ययनकाले मयाऽवापि तदर्थं स्वान्तेनाहमेतेषामाभारमावहामि।

श्रमक्रमाभ्यामध्ययनस्य परमं फलमध्यापनमेव। मम अध्यापनकर्मणि नियोजनं संस्कृतजगतः पितामहानाम् श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठस्य संस्थापककुलपतीनां शिवसायुज्यमवाप्तानाम् श्रद्धेयानां डॉ० मण्डनमिश्रमहोदयानां निदेशकत्वे राष्ट्रियसंस्कृतसंस्थानान्तर्गते जम्मूनगरस्थिते श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठे इदम्प्रथमतया सञ्जातमिति गौरवमनुभवामि। मानितविश्वविद्यालयत्वेन परिणते श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठे मम सङ्ग्रहः डॉ० मिश्रमहोदयानां कुलपतित्व एव जात इत्यपि मम जीनने एकः सुयोग एवेत्यहं मन्ये।

बहूनामपि शत्रूणां यदीच्छेत् कर्त्तुमप्रियम्।
आत्मा तेन गुणैर्योज्यः तत्तेषाम्महदप्रियम्॥

इत्येवं विधाभिः सूक्तिभिः मयि गुणदृष्टिमुन्मीलयतां तत्र भवतां स्नेहश्च यन्मयावापि तदर्थमहं कीर्तिशेषाणां तेषां श्रीचरणयोः हार्दिकीं कृतवेदितां सश्रद्धं समर्पयामि।

मीमांसाशास्त्रविशारदानाम् स्नेहमूर्त्तीनाम्, प्रतिभावतां यूनां विशेषतोन्नयने सर्वथा निरतानाम् निरुपमवाग्वैभवविभूषितानां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिपदं विभूषयतां प्रो० वाचस्पति उपाध्यायमहोदयानां स्नेहोपकारसन्ततीः नाऽहं परिगणयितुं प्रभुः। तत्र भवतां श्रीमतां स्नेहोपकारधारा अस्मान् सततं सन्तर्पयेदिति हृदयेन कामयमानोऽहं स्वीयां कृतज्ञतां तेषु निवेद्य विरमामिति शम्।

पीयूषकान्तदीक्षितः

वि० सं० २०५९
ज्येष्ठशुक्ल-द्वितीया

भूमिका

कस्यापि ग्रन्थस्य भूमिका, केवलमाप्तपरम्पराया अनुपालनमिति वक्तुमशक्यम्, सम्बद्धग्रन्थे प्रवेशार्थमस्या नितरामुपयोगित्वात्। अल्पा भूमिः भूमिकाशब्देनाभिधीयते। भूमिशब्दव्यवहारस्तावत् क्षेत्रमधिकृत्य प्रसिद्धः। उन्नतां प्रशस्तां च भूमिमधिरोढुं स्वल्पभूमिस्वरूपस्य सोपानस्य पादपीठस्य वा महदुपयोगित्वम्। विविधविस्तृतप्रमेयपरिवेष्टितस्य ग्रन्थस्य आसमाप्तिमध्ययने प्रवृत्तिमुत्पादयितुं सामान्यतो विषयप्रयोजन-सम्बन्धाधिकारिणाम् अवगमप्रयोजिका भूमिका एव सोपानस्थानमावहति।

विस्तीर्णे क्षेत्रे सस्योत्पिपादयिषायां सत्याम् लघु भूमिखण्डे प्रथमं बीजानि उप्यन्ते। अनन्तरं तत्राङ्कुरितानां तेषाम् अभीष्टायां विस्तृतभूमौ पुनः आरोपणे सति विपुलं सस्यं प्राप्यते। कस्यापि ग्रन्थस्य दुरूहतत्त्वबहुलस्य अध्ययनादर्वाग्तद्ग्रन्थस्य भूमिकायाः समीक्षणेन आसमाप्ति ग्रन्थाध्ययने अभिरुचिः; ग्रन्थे निरूपितानां विषयाणां सम्यग्बोधानुगुणा शक्तिश्चोपजायते। दृष्ट्यानया भूमिकापदं अल्पभूमेः वाचकमिति नितरां स्फीतम्।

'भूमिरेव भूमिका' इति व्युत्पत्या भूमिकापदं क्षेत्रं भूमिं वा बोधयति। अङ्कुरमारभ्य फलपर्यन्तं बीजानां विकासस्य योग्यं स्थानमेव भूमिः। सस्यादीनाम् उत्पत्तये क्षेत्रपरिष्कार आवश्यकः। वनस्य परिष्कारो भूमिकर्षणेन सेचनक्रियया च भवति। गम्भीरविचारसङ्कुलस्य ग्रन्थस्यापि समाप्तिपर्यन्तम् अध्ययने प्रवृत्तये, ग्रन्थाशयं सम्यगाकलयितुं च भूमिका अनितरसाधारणं महत्त्वमादधाति। ग्रन्थेऽस्मिन् निबद्धं विषयं परिचाययितुं भूमिकेयमारभ्यते। ग्रन्थाध्ययने प्रेक्षावतां प्रवृत्तये

तद्धर्मिकबलवदनिष्टाजनकत्वस्य इष्टसाधनत्वस्य च ज्ञानमावश्यकम्। भूमिकया ग्रन्थाध्ययने बलवदनिष्टाजनकत्वम् इष्टसाधनता च ज्ञाप्यते।

सर्वशास्त्रोपकारकतया आन्वीक्षिकीत्यपराभिधं न्यायशास्त्रं सुविख्यातम्। शास्त्रस्यास्य महत्त्वं ख्यापयता महर्षिणा कौटिल्येनापि अर्थशास्त्रे एवम् उपवर्णितम्-

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता।।

कौ० अ० १/२/१

इदन्न्यायशास्त्रं स्मृतिपुराणादिषु चतुर्दशविद्यास्थानान्यतमत्वेन परिगण्यते।[१] संसारान्धकूपप्रतिघातमसहमानान् असुभृतः समुद्दीधिर्षुणा करुणावरुणालयेन भगवताक्षपादेन न्यायदर्शनं व्यरचि। प्रमाणप्रमेयादिषोडशपदार्थानां प्रमात्मकं ज्ञानं निश्रेयसाधिगमसाधनमित्यपि तत्र न्यरूपि। वैशेषिकदर्शनस्य प्रवर्तको महर्षिः कणादः मोक्षोपयोगितया 'अथातोधर्मं व्याख्यास्यामः' इत्यादीनि वैशेषिकसूत्राणि निरमात्। एतदुभयमपि दर्शनं यथापेक्षं नास्तिककुतर्कनिरासार्थं, मर्मज्ञैः व्याख्यातृभिः भाष्यवार्तिकटीकाभिः प्रपञ्चितं रहस्यमयं विस्तृतं च समजनि। न्यायशास्त्रीयसिद्धान्तानां तदाश्रितविचारपरम्पराणाञ्च परिवर्धनमपि शनैः शनैर्न्यायनये लब्धास्पदमदृश्यत। गोतमीयप्रमाणप्रमेयादि-षोडशपदार्थानामनुशीलनमपेक्ष्य उत्तरकालीनन्यायशास्त्रपरिशीलयितृणां गङ्गेशोपाध्यायादीनां प्रत्यक्षानुमानोपमानशब्दात्मना प्रमाणचतुष्टयस्य विचार एव समधिकावधानभाजनं समपद्यत। वैशेषिकदर्शनं द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायरूपेण विभक्तस्य पदार्थषट्कस्य, अभावाभिध-

---

१. पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।। -याज्ञवल्क्यस्मृतिः आचाराध्यायः, ३

२. तर्कोऽपि द्विविधो वैशेषिकनैयायिकभेदेन। सर्वदर्शनकौमुदी, पृ० ४

सप्तमपदार्थसमन्वितस्य सूक्ष्मतमं विवेचनमादधत् भारतीयदार्शनिकानां विचारपरिपाटीं सपरिष्कारं विस्तारयामास।

अनयोः द्वयोः तर्कशास्त्रयोः वैशेषिकशास्त्रं प्रमेयप्रधानम्, न्यायशास्त्रञ्च प्रमाणप्रधानमिति विदुषामतिरोहितम्। न्याय-वैशेषिकशास्त्रयोः परस्परमुपकारकयोः सम्मेलनेन मिश्रितं परिष्कृतं च भव्यं शास्त्रं नव्यन्यायशास्त्रमिति वस्तुस्थितिः। नव्य-न्यायस्याधारभूमिः, प्रमाणादिषोडशपदार्थनिरूपणपरस्य पञ्चाध्यायसमन्वितस्य न्यायशास्त्रस्य प्रमाणप्रकरणमेव। यद्यपि आत्मशरीरेन्द्रियादिद्वादशप्रमेयाणां प्रामुख्यं सर्वापरोक्षम्, तथापि सर्वेषां प्रमेयाणां प्रतिपत्तिः प्रमाणमन्तरा न सम्भवतीति अशेषाणां प्रमेयाणां यथार्थप्रतिपत्तये प्रमाणतत्त्वावधारणार्थम् एव नव्य-न्यायप्रजापतिना गङ्गेशोपाध्यायेन तत्त्वचिन्तामणिर्नाममहानिबन्धो निरमायि। तत्त्वचिन्तामणेरिदमादिमं वाक्यम्–

"अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय, तत्र प्रेक्षावत्प्रवृत्त्यर्थं प्रमाणादितत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादावसूत्रयत्। तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते" इति।

न्यायदर्शनस्थं "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति सूत्रमेकमाधारीकृत्य श्रीमता गङ्गेशेन स्वमतिप्रागल्भ्येन चिन्तामणिर्महानिबन्धो व्यधायीति नाविदितं नव्यन्यायपयोनिधिपरिशीलनमतीनां तर्करसिकानाम्। नव्यन्यायशास्त्रस्य गम्भीरता, अवर्णनीया। अनुमानचिन्तामणौ तार्किकशिरोमणिः रघुनाथः अपि एवं गृणाति–

न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र।
अस्य तु किमपि रहस्यं केचन विज्ञातुमीशते सुधियः॥ इति

न्यायशास्त्रस्य नव्य-प्राच्यविमर्शः

अधुनाऽपि न्यायदर्शनस्य भागविशेषः नव्यः भागविशेषश्च प्राचीन इति व्यवह्रियते। व्यवहारोऽयम् आप्तानां किं मूलक, इति. प्रश्नः **प्रथमं** तावदवतरति। केचित् अवच्छेदकावच्छिन्नशब्दादिभिः **व्याख्यातत्वेन**

भागविशेषस्य नव्यत्वमित्यमभिलषन्ति। परमेतत् शास्त्रतात्पर्यस्यानवबोधामूलकत्वान्न रमणीयम्। अन्यथा पातञ्जलदर्शनीयसमाधिपादस्थिते "पूर्वेषामपि गुरुः कालेनानवच्छेदात्" इति सूत्रे व्यासभाष्यादौ च अवच्छेदकादि- पारिभाषिकपदानां व्यवहारात् तेषामपि नव्यत्वमापद्येत।

यद्यपि न्यायशास्त्रीयप्रमाणभागनिरूपणपरत्वात् गङ्गेशोपाध्यायप्रवर्तिशैलीसमन्वितानां ग्रन्थानां प्राचीनेष्वेवान्तर्भावो युक्तः, एवं चिन्तामणिमहानिबन्धादारभ्य गादाधर्यादितद्विवेचनपरेषु ग्रन्थेषु आसमाप्ति कुत्रापि नव्य-न्यायशास्त्रं प्राच्यन्यायशास्त्रञ्चेत्युल्लेखो नावाप्यते, अतः सम्पूर्णोऽपि न्यायवाङ्मय एकविध एव, इति प्रतिभाति, तथापि वाचस्पतिमिश्रादयः आचार्या एव भारद्वाजकृतेः न्यायवार्तिकस्य "अतिजरतीनामि"[1] त्यादिवाग्व्यवहारेण प्राच्यत्वं व्यवस्थापयन्त; न्यायदर्शनमधिकृत्य नव्यप्राच्यव्यवहारं सम्पोषयन्ति।

साम्प्रतं विवेचकैः क्रियमाण एतादृशो विभागः प्रविभागश्चोपलभ्यतेः—



परमे एतावता तत्त्वचिन्तामण्यादिनिबन्धानां नव्यत्वं न सिद्ध्यति तथापि न्यायसारमारभ्य प्राप्तेषु न्यायशास्त्रप्रबन्धेषु "इति प्राच्याः, इति

---

१. न्यायवार्तिकतात्पर्यटीका।

नव्या:" एतादृशस्य व्यवहारस्य विदुषां निवहे प्रसिद्धत्वात् नव्यत्वव्यवहारो नापलपितुं योग्य:।

निरात्मवादिनां चार्वाकाणाम्, विज्ञानात्मवादिनां बौद्धानाञ्च मतं विखण्डयितुम् आत्मादिप्रमेयजातानां यथार्थज्ञानान्निश्रेयसं स्वीकुर्वद्भिः गोतमादिमहर्षिभिस्तावत् आत्मनोऽनुमानप्रमाणेन सिद्धिः प्रादर्शि। परार्थानुमानाभिधस्य न्यायस्य पूर्वाङ्गोत्तराङ्गसाहित्येनैव पदार्थसाधन-सामर्थ्यमिति तदनुसारिणां सूत्रग्रन्थानां शास्त्रीयाशेषपदार्थप्रतिपादनपराणां भाष्यवार्तिकतात्पर्यटीकादिव्याख्याग्रन्थानां प्राचीनत्वम्, व्याख्यासहितानां चिन्तामण्यादिप्रबन्धानां प्रामुख्येन प्रमाणविवेचनपराणां नव्यत्वमिति केचन समालोचकाः प्रत्यवतिष्ठन्ते। इयं कल्पनापि तर्कपदवीमधिरोढुमक्षमा, एवं सति जैनबौद्धादिग्रन्थानां प्राचीनानामपि प्रमाणमात्रव्याख्यानपराणां नव्यत्वं व्यपदिश्येत।

अन्ये समालोचकास्तु, नास्तिकत्वेन लब्धप्रतिष्ठानां चार्वाक-बौद्धादीनामेव प्राचीनेषु सूत्रभाष्यादिग्रन्थेषु खण्डनदर्शनात् एतेषां प्राच्यत्वव्यवहारः, आस्तिकत्वेन विख्यातानां साङ्ख्यमीमांसादिशास्त्राणामपि तत्त्वचिन्तामण्यादिषु महाप्रबन्धेषु निराकरणोपलम्भात् तत्त्वचिन्तामण्यादि-ग्रन्थानाम् नव्यत्वव्यवहार इति अभ्युपयन्ति।

वस्तुतस्तु निखिलतन्त्रविशारदेन गङ्गेशोपाध्यायेन प्राचीनानां भाष्यादिग्रन्थानां सम्यगालोडनपुरस्सरं प्राचीनसिद्धान्तसारभूतोऽयं तत्त्वचिन्तामणिः नूतन एव निरमायि, कालादस्मादारभ्य निर्मितस्य न्यायशास्त्रनिकरस्य नव्यत्वकीर्तनं ततः पूर्वं रचितानां भाष्यादिग्रन्थानाञ्च प्राचीनत्वस्वीकरणमेव सर्वथा युक्तियुक्तमिति निर्धारणीयम्।

आत्मज्ञानार्थं मननस्यानितरसाधारणं महत्त्वं श्रुतिसिद्धिमेव। तर्कस्यैव उपनिषत्सु मननपदेन[१] व्यपदेशः प्रसिद्धः। तर्कापरपर्यायं मननं

---

१. आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। बृ. आ. उ. ४/५

(क) युक्त्या सम्भाविततत्त्वानुसन्धानं मननं तु तत्। पञ्चदशी १/५३

(ख) अत्र श्रुतितः कृतात्मश्रवणस्य मननेऽधिकारः,

मननञ्च आत्मन इतरभिन्नत्वेनानुमानम्। तर्कामृतम्, पृ० २

नव्यन्यायशास्त्रं विशेषरूपेण विशदयतीति विद्यते अस्य शास्त्रस्य सर्वशास्त्रमूर्धन्यत्वम्।

यदातिप्राचीनकाले धरामण्डलेऽन्यदेशाः प्रायोऽज्ञानतिमिरावृता बभूवुः तदास्मिन्भारतवर्षे बहवो महर्षयः श्रीवाग्देवतामुपास्य विविधपदार्थस्वरूपाणि विविच्य तत्त्वनिर्णयेन लोकाज्ञाननिरसने निरता आसन्। तदानीं परमेश्वराराधनाल्लब्धप्रतिभैस्तैरास्तिकजनानुग्रहाय न्यायवैशेषिक-साङ्ख्ययोग-मीमांसा-वेदान्ताख्यानि सूत्राणि ग्रथितानि षड्दर्शनानि च आत्मानात्मविवेकेन मोक्षप्राप्त्यर्थं प्रणीतानि। तत्र न्यायसूत्रं श्रीगोतममहर्षिणा, वैशेषिकसूत्रं श्रीकणादमुनिना, साङ्ख्यशास्त्रं सूत्रात्मकं श्रीकपिलमहर्षिणा, योगसूत्रं श्रीपतञ्जलिमहर्षिणा, मीमांसासूत्रं श्रीजैमिनिमहर्षिणा, वेदान्तापरनामकं ब्रह्मसूत्रं च श्रीबादरायणमहर्षिणा प्रणीतानि। इमानि सूत्रात्मकानि शास्त्राणि परमगभीरार्थपूर्णानि-तत्त्वज्ञानबीजभूतानि अद्यापि लोके विराजन्ते। ततस्तेषां गूढार्थप्रकाशनार्थं विविधैराचार्यैर्भाष्याणि वार्तिकानि च विरचितानि। इत्थं तत्त्वज्ञानपरसूत्रसङ्ग्रहो महार्णव इवागाधतां प्राप।

ततः कैश्चिदर्वाचीनैरलौकिकबुद्धिशालिभिराचार्यैरध्येतृजनक्लेशहानाय प्राचीनसूत्रभाष्यादिग्रन्थनिधिमालोड्य तत्तच्छास्त्रेषु स्वतन्त्राः प्रबन्धाः प्रणीताः। तत्र न्यायशास्त्रे श्रीमदुदयनाचार्यैर्न्यायकुसुमाञ्जल्यात्मतत्त्वविवेक-प्रमुखाः, श्रीमद्गङ्गेशोपाध्यायैस्तत्त्वचिन्तामणिप्रभृतयश्च प्राचीनाचार्यसिद्धान्त-परिष्कारसमेताः प्रौढकल्पनालङ्कृता ग्रन्था निबद्धाः। एतेषामुपरि श्रीजयदेव मिश्र-रघुनाथशिरोमणि-मथुरानाथतर्कवागीश-जगदीशतर्कालङ्कार-गदाधरभट्टाचार्यादिभिरनेकैर्नैयायिकप्रकाण्डैर्नूतनपरिष्कारयुतटीकाविवृति-व्याख्यात्मकमहाप्रबन्धनिचयं विरच्य पुनरप्यपरिमितोल्लासं गमितो न्यायमहार्णवः।

एवं दुरूहकल्पनाविवृद्धगाम्भीर्ये न्यायशास्त्रे प्रविविक्षूणां छात्राणा-मुपकाराय महामहोपाध्यायश्रीमदन्नम्भट्टकेशवमिश्रादिभिर्न्यायशास्त्रप्रवीणैः प्रायो न्यायवैशेषिकोभयशास्त्रपरिभाषामिश्रास्तर्कसङ्ग्रहतर्कभाषाप्रभृतयो

बहवो लघुग्रन्था निर्मिता येषा संप्रति छात्रवर्गेषु पठनपाठनं प्रचलति। एषु विशिष्टोऽयं श्रीजगदीशतर्कालङ्कारचितस्तर्कामृतग्रन्थो गण्यते। अयमल्पोऽपि ग्रन्थो विद्यार्थिनामनायासेन तर्कशास्त्रोदधिपारं जिगमिषूणां पोत इव परमोपकारको वर्तते। अस्मिन् ग्रन्थेऽतिसरलया वाक्यरचनया न केवलं पदार्थनिरूपणादिकं कृतं, किन्तु शाब्दबोधप्रक्रियापि बालानां सुखबोधाय सङ्क्षेपेण सम्यग्वर्णितास्ति। फलतः स्फुटैवास्य तर्कामृतग्रन्थस्योपादेयता।

इतरेषां प्राचीनग्रन्थकारणामिव तर्कामृतकर्तुर्जगदीशतर्कालङ्कारस्यापि जीवितवृत्तं विस्तरशो नोपलभ्यते। तथापि कोलकातानगर्यां १९०७ खीष्टाब्दे श्रीअतुलदेवशर्मणा प्रकाशितस्य जगदीशकृतशब्दशक्तिप्रकाशिका-पुस्तकस्योपोद्घातात्तस्याल्पचरितमुद्धृत्यात्र समासेनोपन्यस्यते।

श्रीजगदीशतर्कालङ्कारः प्राय इतस्त्रिशद्वर्षेभ्यः पूर्वं वङ्गदेशे वर्तमानसमये नदियानाम्ना प्रसिद्धायां नवद्वीपनगर्यां मैथिलवंशे यादवचन्द्रविद्यावागीशाज्जन्म लेभे। यादवचन्द्रविद्यावागीशस्य पञ्च पुत्रा आसन्। तेषु जगदीशस्तृतीयः। यदा जगदीशः पञ्चवर्षदेशीयोऽभवत्तदास्य पिता दिवं जगाम। ततो जगदीशस्य लालनपालनमग्रजः षष्ठीदासश्चैतन्यविग्रहसेवयोपार्जितेनाल्पवित्तेन यथाकथञ्चिद्विदधे। जगदीशो बाल्येऽतिमात्रं दुर्ललित आसीत्। ज्येष्ठभ्रात्रा तिरस्कृतोऽपि नासौ दुराचरणमजहात्। इत्थमष्टादशवर्षदेशीयो जगदीश एकदा पक्षिशावकानाहर्तुं दुरारूढं तालतरुमारूरुहत्। दैवात्तदा पक्षिडिम्भानत्तुं भीषणो भुजङ्गोऽप्येकस्तं तालमध्यस्थात्। जगदीशस्तु यावन्नीडे हस्तं प्रसारयति तावत्करालः कृष्णसर्पः फणामातत्य जगदीशं दष्टुमुपचक्रमे। तत्क्षणमेव प्रत्युत्पन्नमतिर्निर्भयो जगदीशो झटिति दृढमुष्ट्या सर्पग्रीवां धृत्वा तालदण्डधारायां निघृष्य छित्त्वा च सर्पं सुदूरे न्यक्षिपत्। ततस्तदानीं निकटवर्ती कश्चित्सन्यासी जगदीशस्य निर्भीकत्वं प्रत्युत्पन्नमतित्वं च समीक्ष्य तमाहूय सदुपदेशेन तादृशदुराचरणान्न्यवर्तयत्प्रावर्तयच्चाध्ययने इति।

यदा जगदीशो तस्मात्संन्यासिनोऽध्येतुं प्रावर्तत तदा सततं विद्याभ्यासे एव तत्परो बभूव। किमधिकं, रात्रौ निद्रां विद्रावयितुं कुटीरस्तम्भे शिखां

बद्ध्वा तारस्वरेण पठितपाठमावर्तयत्। निर्धनतया दीपार्थं तैलं क्रेतुमसमर्थो दिवसे पुञ्जीकृतैः शुष्कवंशपत्रैः प्रदीपितस्याग्नेः प्रकाशेन रात्रौ ग्रन्थवाचनं चकार। इत्थं द्वित्रैरेव वत्सरैर्व्याकरणं काव्यं कोषं च समभ्यस्तवान् जगदीशः दुर्वृत्तदशायां सर्वैरेव नवद्वीपवासिभिर्जगदीशस्तिरस्कारसूचकेनाप-भ्रष्टनाम्ना 'जगा, जगा' इत्येवमाक्रुश्यत। यदा त्वपगतचापलो विद्याव्यस-नितया प्रथितस्तदा प्रेम्णा सादरसंभाषणेन 'जगु, जगु' इत्यैवमभाष्यत।

अथ न्यायशास्त्रमध्येतुं जगदीशस्तदानीं विख्यातस्य विद्वत्तिलकायमानस्य भवानन्दसिद्धान्तवागीशस्य चतुष्पाठीमाविशत्। तत्र तु विद्यार्थिबाहुल्यात्सर्वान्स्वयमध्यापयितुमशक्नुवानो भवानन्दोऽधस्तनपाठान् शिष्यान्समुच्चतरपाठैः शिष्यैरध्यापयांचक्रे। तेन हि स जगदीशं न पर्यचिनोत्, किन्त्वल्पैरेवाहोभिः स्वकीया तर्कशक्तिरेव जगदीशं तं पर्यचाययत्।

एकदा अन्तर्वाटिकायामलिन्दे सन्ध्यावन्दनादौ समासीनः सिद्धान्तवागीशो मठे विद्यार्थिनां मिथः प्रवृत्तं शास्त्रार्थभाषितमशृणोत्। तत्र जगदीशः पूर्वपक्षवादी अपरे चोत्तरपक्षवादिनः संलपन्ति स्म। ततो भवानन्दः पत्नीमपृच्छत् "कस्याय कलगम्भीरः कण्ठरवः श्रूयते" इति। तयोक्तं "यस्तु वैदिकपोतकः पूर्वं जगा इति संप्रति जगाजगुः इति चाभिहितस्तस्य" इति। तदाकर्ण्य भवानन्द आनन्दनिर्भरेण गद्गदस्वरेणावोचत् "अहो धन्योऽहं यस्य ममान्तेवासी–

आदौ जगा जगुः पश्चाज्जगाजगुरतः परम्।
अधुना ज्ञानसम्पत्त्या जगदीशायते जगा॥" इति।

एवं जगदीशस्तत्राल्पेनैव कालेनाध्ययनं समाप्य गुरोर्लब्धतर्कालङ्कारोपाधिकश्छात्रान्पाठयितुमारब्धवान्। ततोऽसौ ग्रन्थरचने प्रवृत्तः। परन्तु गार्हस्थ्यवृत्तेरसम्यक्तया निराकुलेन चेतसा न तन्निष्पादयितुं शशाक। तदानन्यगत्या विद्याव्यसनेन चाभिभूयमानो जगदीशो धनिकान् शूद्राँस्तान्त्रिकीं दीक्षां प्रदाय शिष्यान्कर्तुमारब्धवान्। तदाकर्ण्यानेके शूद्रकुलीनाः सद्गुरुलाभाशया तं गुरुत्वेन वरित्वा दत्वा च बहूनि द्रव्याणि

कृतकृत्यमात्मानममन्यन्त। जगदीशोऽपि शिष्यदत्तवृत्त्या गार्हस्थ्यमनाकुलं साधयन्नपेतान्तरायो निरन्तरं ग्रन्थानरचयदिति।

जगदीशस्य जन्मनिधनसमयौ निश्चयेन वक्तुं न शक्यते। परं स शालिवाहनशकस्य पञ्चदशशतकस्य प्रथमार्धे बभूवेति ज्ञायते। अर्थात् १६००-१६५० खिस्तवर्षेषु जगदीशस्थितिरासीदिति वक्तुं पार्यते। जगदीशतर्कालङ्कारविरचिता ग्रन्था अद्ययावज्ज्ञाता एते–

१. अनुमानचिन्तामणिटीकादीधितिव्याख्याप्रकाशिका

२. गङ्गेशोपाध्यायकृतानुमानमयूखस्य भाष्यम्।

३. प्रशस्तपादकृतद्रव्यभाष्यटीका सूक्तिनाम्नी।

४. न्यायलीलावतीदीधितिटीका।

५. शब्दशक्तिप्रकाशिका।

६. तर्कामृतम्।

७. हास्यार्णवनामकं प्रहसनम्।

एतेषु शब्दशक्तिप्रकाशिकाग्रन्थो जगदीशस्य परं बुद्धिवैभवं ख्यापयति। अत एव पण्डितैरुच्यते **"जगदीशस्य सर्वस्वं शब्दशक्तिप्रकाशिका"** इति। जगदीशस्य द्वौ पुत्रौ रघुनाथो रुद्रेश्वरश्च परमपण्डितौ बभूवतुः। रघुनाथस्तु श्रीमद्वाचस्पतिमिश्रविरचितसाङ्ख्य-तत्त्वकौमुदीमालम्ब्य साङ्ख्यतत्त्वविलासनामकं ग्रन्थं रचयामास। इयदेव जगदीशतर्कालङ्कारवृत्तं यत्नादुपलब्धमत्र विदुषां प्रीत्यै समुपन्यस्तमिति।

तर्कामृतस्योपरि तिस्रष्टीका वर्तन्ते। एका गङ्गारामजडीविरचिता। अपरा तर्कामृततरङ्गिणी श्रीमुकुन्दभट्टकृता। अन्या तर्कामृतदर्पणनाम्नी अज्ञातकर्त्रभिधाना। तासु तर्कामृततरङ्गिण्या एका पाण्डुलिपिः दरभङ्गास्थ-मिथिलाशोधसंस्थानात् समासादिता। श्रीगङ्गारामजडीविरचितया चषक-चषकतात्पर्यटीकयोपेतं तर्कामृतं तु पाण्डुलिपिरूपेण स्वनामधन्यानां मुक्तवपुषां परमश्रद्धेयानां पण्डितराजराजेश्वरशास्त्रिद्रविड़महोदयानां गेहात् एतेषां तनुजानां श्रीविश्वेश्वरशास्त्रिद्रविड़महोदयानां स्तुत्येन साहाय्येन

समासादिता। एतेषामेव साहाय्येन अस्यास्तर्कामृतपाण्डुलिपेः द्वितीया प्रतिः वाराणसेयात् साङ्गवेदविद्यालयादासादिता। तत्र गृहात् प्राप्तां पाण्डुलिपिं पुरः संस्थाप्य नैकबारं स्वशिष्यान् श्रीमन्तः पण्डितराजराजेश्वर-शास्त्रिद्राविड़महाशयाः अध्यापितवन्त इति लोमहर्षकं तथ्यं एतेषां तनूजन्मानः संसूचितवन्तः। एतावता ग्रन्थेऽस्मिन् प्रयुक्तायाः पाण्डुलिपेः प्रामाण्यं विज्ञातं भवति।

तर्कामृततरङ्गिणीकर्तुः श्रीमुकुन्दभट्टस्य समयवृत्तादिकं किमपि न प्रसिद्धम्। अयं तरङ्गिणीप्रारम्भे "अनन्तभट्टं मीमांसापारगं तातमाश्रये" इति स्वपितुर्नामोल्लेखं करोति। आसीत् मीमांसापारगोऽनन्तदेवो नाम मीमांसकधुरीणस्यापदेवस्य पुत्रो यः स्वपितृप्रणीतमीमांसान्याय-प्रकाशग्रन्थस्योपरि भाट्टालङ्कारनाम्नीं टीकां सिद्धान्ततत्त्वनामकं वेदान्त-प्रकरणं च निर्मितवान्। अस्यैवानन्तदेवस्य नामान्तरमनन्तभट्ट इति भाति। एवं यदि अनन्तदेव एवानन्तभट्ट इति स्वीक्रियते तर्हि श्रीमुकुन्दभट्टः श्रीमदापदेवस्य पौत्रोऽनन्तदेवस्य च पुत्र इति सम्भवदुक्तिकम्। अनन्तदेवश्च कूर्माचलाधिपतेर्बाजबहादुरनृपालस्याश्रितोऽवर्ततेति स्वकृते स्मृतिकौस्तुभ-ग्रन्थे सङ्गिरति। बाजबहादुरनृपतिश्च १६४४-१६६४ क्रिस्तवर्षेषु बभूवेतीतिहासादवगम्यते। अतोऽनन्तदेवापरनाम्नोऽनन्तभट्टस्यापि स एव समय इति निश्चीयते। तत्सूनुर्मुकुन्दभट्टश्च स्वभावगत्या स्वपितृतः पञ्चविंशतिवर्षैः कनीयानासीदिति यदि विभाव्यते तदा श्रीमुकुन्दभट्टः ख्रिस्तवर्षीयसप्तदशशतकस्यान्ते बभूवेति सुवचम्। नातोऽधिकमस्य कालनिर्णये प्रमाणं सम्प्रति समुपलभ्यते।

श्रीमुकुन्दभट्टः तर्कामृततरङ्गिण्यां नैयायिकश्रेष्ठस्य शङ्करमिश्रस्य नाम्नोल्लेखं करोति। अनेन मुकुन्दभट्टेन तत्त्वचिन्तामणेरुपरि काचिट्टिप्पणी विरचितासीदिति अस्यां तरङ्गिण्यां "यथा चैतत्तथा प्रपञ्चितमस्माभिस्तत्त्वचिन्तामणिटिप्पण्यां" तथा "अधिकमस्मत्कृतमणि-टिप्पण्याम्" इति लेखदर्शनात्स्फुटं भवति। चषक-चषकतात्पर्यटीकयोः प्रणेतुः गङ्गारामजडीमहोदयस्य गुरुः नीलकण्ठशर्मानामधेयः पिता च नारायणाभिधः, मुक्तावलीप्रकाशनामकस्य ग्रन्थस्य प्रणेता चास्य मातामहः आसीदिति मङ्गलश्लोकेन अधो दर्शितेन विज्ञायते–

आत्मरूपगुणनृत्यकारिणे लोचनाकलिततत्त्वसाक्षिणे।
नूतनोद्भवसमाधिहेतवे नीलकण्ठगुरवे नमो नमः॥१॥
गुरुगणना यत्पूर्वं यस्याग्रे सग्रहाग्रणीतनयः।
कविमिव तं कवयन्तं तातं नारायणं वन्दे॥२॥ इति॥

तात्पर्यटीकायां जडीमहोदयः निर्दिशति – मुक्तावलीप्रकाशात्तन्नामकास्मन्मातामहग्रन्थात्स्फुरिते इति। एतावता टीकाकर्त्तुः विद्वत्कुलसम्बद्धत्वं प्रामाण्यञ्च स्पष्टं भवति।

यद्यपि तर्कामृतं विद्यते प्रकाशितं परं गङ्गारामजडीति नामकेन विदुषा रचितयोः चषक-चषकतात्पर्यटीकयोः निरुपमयोः प्रकाशनम् इदानीं यावत् न जातम्। यथा अन्नम्भट्टविरचितः तर्कसङ्ग्रहः बालानामुपकारकः अत्यन्तं लघुकलेवरो ग्रन्थः अन्नम्भट्टेनैव विरचितया दीपिकया समेतः गभीराणां तर्कसङ्ग्रहसिद्धान्तरहस्यानां विस्तरेणावबोधकः विदुषां परमोपकारकः तथा इदं जगदीशतर्कालङ्कारवि॰चितं निरुपमं तर्कामृतं स्वल्पायासेन न्यायनये प्रविविक्षूणां बालानां महदुपकारकं लघुकायं ग्रन्थरत्नं चषक-चषकतात्पर्यटीकाभ्यां विभूषितं तर्कामृतनिगूढानां सिद्धान्तमुक्तारहस्यानां स्फोरणेन सुधियां नितरामुपकारकरं सम्प्रति भविष्यतीति प्रसन्नतास्थानम्। आभ्यां टीकाभ्यां सह मुकुन्दभट्टकृतायाः तर्कामृततरङ्गिण्याः सङ्गमोऽत्र नूनं ज्ञानपीयूषधारां तरङ्गयत्येव।

न्यायशास्त्राधीतिन विजानन्ति - आद्ये वयसि जगदीशतर्कालङ्कारविरचितस्य निरुपमस्य तर्कामृतस्याध्ययनं बालानां बुद्धिवैभववर्धने किपदुपयोगीति। सहजतया नानाविषयावबोधसमुत्सुकमतयः शिशवः तर्कामृतं बाल्य एव समवगच्छन्ति चेत् न्यायवैशेषिकदर्शनयोः एतेषां प्रवेशः अनायासं भवत्येव। अनयोः दर्शनयोः समानतन्त्रयोः ये दुरूहाः सिद्धान्ताः, आधारभूताः पदार्थाश्च सन्ति तेषां समीचीनः परिचयः ग्रन्थस्यास्य अध्ययनेन सुशकः।

तर्कामृतविस्तारस्य विचारः कैशोर एव मयि अङ्कुरितः। न्यायवैशेषिकसिद्धान्तसारः तावन्न निर्णेतुं शक्यः यावत्तर्कामृतस्य आप्तगुरुपरम्परयाऽनुशीलनमध्ययनभावनाभ्यां न स्यादिति दृढमतिरहं

वाराणस्यां स्वपितृचरणेभ्य: पं० प्र० श्रीसुधाकरदीक्षितेभ्य एव तर्कामृतं साधु अधीतवान्। अध्ययनावसरे स्वपितृचरणानां प्रेरणया जगदीशतर्कालङ्कारप्रणीतस्य तर्कामृतस्य व्युत्पत्तिनिकषरूपेण काश्यां विद्वन्निवहे सुप्रतिष्ठितस्य कण्ठस्थत्वपुरस्सरं मननपि मयाऽकारि। एवं गुरुकृपया तर्कामृतं यथामति हृदिस्थं विदधतोमम, उत्कटेयं एतदनुशीलनप्रवृत्तिरपि पद-वाक्य-प्रमाण-पारावारीणानां करालेऽस्मिन् कलिकाले लोकोपकारकाणां शास्त्राणां विशेषत: सर्वविद्याप्रकाशकस्यविद्या मूलस्तम्भभूतस्य नव्यन्यायशास्त्रस्य तद्विदाञ्च संरक्षणे सर्वथा तत्पराणाम् अनन्तश्रीविभूषितानां तुङ्गाभद्रातटवासिनां दक्षिणाम्नायश्रीशारदापीठाधीश्वराणां जगद्गुरुशङ्कराचार्याणां श्रीभारतीतीर्थमहास्वामिनां सदसस्पतित्वे शृङ्गगिरौ समायोजितायां वाक्यार्थसदसि नव्य-न्यायशास्त्रे ग्रन्थोद्धारणनिबन्धनोपदेशेन समुदिता। अत्र श्रीचरणानामनुग्रहविशेषं विनतोऽहं सततं स्मरामि।

ग्रन्थस्यास्य प्रकाशनकार्ये राष्ट्रियसंस्कृतसंस्थानस्य तदधिकारिणाञ्च अमूल्यं साहाय्यं नाहं विस्मर्तुं प्रभवामि। एतदर्थम् अहमेतेषां हृदयेनाभारमावहामि। संस्कृतग्रन्थानां प्रकाशने कुशलानां प्रथितयशस्कानां 'नागप्रकाशकानां', तावद् ग्रन्थस्यास्य मुद्रणे समुत्साहं रुचिविशेषं च प्रदर्शयतां कृतज्ञतां विज्ञापयामि। समेषां सुहृदां यन्मयाऽत्र साहाय्यं प्राप्तं तदर्थमहं तान् प्रति हार्दिकीं कृतज्ञतां सधन्यवादं प्रव्यामि।

लेखनकर्मणि सन्दर्भग्रन्थसूचीनिर्माणादिकार्ये संशोधनकर्मणि च स्वपत्न्या: श्रीमत्या: प्रीतिदीक्षितनामधेयाया: मया यत्: साहाय्यं: समावाप्तं: तत्स नितरां प्रशंसनीयम् आस्ते। मम शिष्याभ्यां श्रीप्रदीपकुमारझा-श्रीमनोजकुमारसैनी नामधेयाभ्यां सोत्साहं ग्रन्थसंशोधनादिकर्मणि विहित: सहयोगो नितरां श्लाघनीय:, एतदर्थमहम् इमौ स्नेहसिक्तेनाशिषा संयोजयामि। पर्यवसाने सुधिय: सज्जनान् स्मरामि पद्येनानेन-

स्यादेव मेऽलसतया मतिमान्द्यतो वा
दोषः क्वचित्क्वचिदथापि न कापि शङ्का।
नैसर्गिकी खलु गुणीकरणप्रवीणा
शक्तिः सदा विजयते भुवि सज्जनानाम्॥ इति॥ शम्॥

विषयानुक्रमणिका

विषयः	पृष्ठम्
पस्पशामृतम्	VII
कृतवेदितावेदनम्	XI
भूमिका	XV
मङ्गलाचरणम्	१
पदार्थनिरूपणप्रयोजनम्	११
पदार्थविभागः	१५
द्रव्यविभागः	१७
विभिन्नेषु द्रव्येषु विद्यमाना गुणाः	१८
द्रव्यनिरूपणम्	
पृथिवीजलतेजोवायूनां शरीरेन्द्रियविषयप्रकारनिरूपणम्	२०
प्रत्यक्षाप्रत्यक्षद्रव्याणि	२८
द्रव्योत्पत्तिप्रक्रिया	३०
कारणनिरूपणम्	३०
द्रव्ये प्रमाणम्	४५
आकाशवाय्वोरनुमेयत्वम्	४९
काले प्रमाणम्	५२
दिशि प्रमाणम्	५४
आत्मनि प्रमाणम्	५८

मनसि प्रमाणम् ६१
द्रव्यनाशप्रक्रिया ६३
द्रव्यसाधर्म्यनिरूपणम् ६५

गुणनिरूपणम्

पृथिव्यादिद्रव्यवृत्तिरूपादिगुणाः ६७
विशेषसामान्यगुणाः ७१
नित्यगुणाः ७३
अप्रत्यक्षगुणाः ७३
गुणप्रत्यक्षे प्रयोजकम् ७३
गुणोत्पत्तिप्रक्रिया ७७
पृथक्त्वम् ९३
संयोगः ९५
विभागः ९५
बुद्धिः १०१
स्मरणम् १०१
अनुभवः १०१
अयथार्थज्ञानविभागः १०१
संशयः १०२
विपर्ययः १०६
स्वप्नः १०९
अनध्यवसायः १०९
तर्कः १०९
सुखम् ११३
दुःखम् ११३
इच्छा ११३
द्वेषः ११३

कृतिः (प्रयत्नः) ११३
धर्मः ११३
अधर्मः ११३
संस्कारः ११६
वेगः ११६
भावना ११६
स्थितिस्थापकः ११८
गुरुत्वम् ११८
नैमित्तिकद्रवत्वम् ११८
शब्दः १२०
कर्मनिरूपणम्
उत्क्षेपणादिपञ्चविधकर्मनिरूपणम् १२३
कर्मप्रक्रिया १२३
सामान्यनिरूपणम्
सामान्यम् १२५
जातिबाधकानि १२५
विशेषनिरूपणम्
विशेषः १३०
समवायनिरूपणम्
समवायः १३२
द्रव्यान्तरशङ्का तत्खण्डनं च १३४
अभावनिरूपणम्
अभावः १३७
प्रमानिरूपणम्
प्रमाभेदाः १४४
सविकल्पकप्रत्यक्षम् १४४

निर्विकल्पकप्रत्यक्षम् १४४
संनिकर्षः १४८
षड्विधलौकिकसंनिकर्षः १४८
अलौकिकसंनिकर्षः १५२
ज्ञानलक्षणा १५२
सामान्यलक्षणा १५४
योगजधर्मः १५४
प्रामाण्यग्रहविमर्शः १५७

अनुमाननिरूपणम्

अनुमानम् २०६
अनुमितिकरणम् २०८
परामर्शः २२०
व्याप्तिः २२१
पक्षता २५४
स्वार्थानुमानम् २६४
परार्थानुमानम् २६४
अवयवनिरूपणम् २६५
केवलान्वयिहेतुः २९०
केवलव्यतिरेकिहेतुः २९६
अन्वयव्यतिरेकिहेतुः ३०५
हेतोः पञ्चरूपाणि ३०५
पक्षः ३०५
सपक्षः ३०५
विपक्षः ३०५
बाधः ३०५
सत्प्रतिपक्षः ३०५

उपाधिनिरूपणम्

सोपाधिर्हेतुः ३०८
उपाधिभेदाः ३०८

हेत्वाभासनिरूपणम्

सव्यभिचारभेदाः ३५२
साधारणः ३५२
असाधारणः ३५२
अनुपसंहारी ३५२
विरुद्धः ३५७
सत्प्रतिपक्षः ३५९
असिद्धः ३६४
आश्रयासिद्धः ३६४
स्वरूपासिद्धः ३६४
विशेषणासिद्धः ३६६
विशेष्यासिद्धः ३६६
भागासिद्धः ३६६
व्याप्यत्वासिद्धः ३६६
बाधः ३७६

शब्दनिरूपणम्

पदार्थोपस्थितिः ३९०
आकाङ्क्षा ३९०
योग्यता ३९३
आसत्तिः ३९५
तात्पर्यम् ३९७
वृत्तिः ४११
शक्तिः ४१२

शक्तिग्रहोपाया:	४१३
लक्षणा	४१३
गौणीवृत्ति:	४१५
पदभेदा:	४१८
यौगिकं पदं	४१८
रूढं	४१९
योगरूढं	४१९
यौगिकरूढं	४१९
जहत्स्वार्था लक्षणा	४१९
अजहत्स्वार्था लक्षणा	४१९
शाब्दबोधप्रक्रिया	४२५
लडादिलकारार्था:	४८०
सनाद्यर्था:	५१०
क्त्वार्थ:	५१९
तूमुनोऽर्थ:	५२७
शतृशानजर्थ:	५३०
विशेषणविभक्ति: साधुत्वार्था	५४४
विशेषणविभक्ति अभेदार्था	५४५
बुहुव्रीहावन्यपदार्थे लक्षणा	५५१
नञर्थ:	५६१
एवकारार्थ:	५६९
उपसंहार:	५७९

श्री:

श्रीजगदीशतर्कालङ्कारप्रणीतम्

तर्कामृतम्

ब्रह्माद्या निखिलार्चितास्त्रिदशसन्दोहाः सदाभीष्टदा
अज्ञानप्रशमाय यत्र मनसो वृत्तिं समस्तां दधुः।
श्रीविष्णोश्चरणाम्बुजं भवभयध्वंसैकबीजं परम्
हृत्पद्मे विनिधाय तन्निरुपमं तर्कामृतं तन्यते॥१॥

तरङ्गिणी

लम्बोदरपदद्वन्द्वचिन्तनाप्तमनोरथम्।
अनन्तभट्टं मीमांसापारगं तातमाश्रये॥१॥
शरणीकृत्य विश्वेशचरणौ तन्यतेतराम्।
बालानामवगाहाय तर्कामृततरङ्गिणी॥२॥

ब्रह्माद्या इति। तत् श्रीविष्णोश्चरणाम्बुजमित्यन्वयः। त्रिदशानां सन्दोहाः समूहाः। त्रिदशश्रेष्ठा इति वा। सदा निखिलैरर्चिताः सन्तोऽभीष्टदाः। तत् किं यत्रेत्यन्वयः। समस्ताः। चाक्षुषस्पार्शनानुमित्याद्या मनसोऽन्तःकरणस्य वृत्तीः। चरणाम्बुजमित्यत्र हृत्पद्म इत्यत्र च उत्तरपदार्थप्रधानो न मयूरव्यंसकादिसमासः, अपि तु पूर्वपदार्थप्रधान उपमितसमासः। तेनाज्ञाननाशकत्वस्य पद्मेऽप्रसिद्धत्वेऽपि न क्षतिः। पद्मे पद्मनिधानेनामृतविस्तारानुगुण्यम्। तर्कामृतं तर्का अमृतमिव।

चषकम्

चषकसनाभिर्लिखिता लिखिता तात्पर्यटीकासौ।
गङ्गारामेण मया विदुषो मनसोऽस्तु तोषाय।।

श्रीगणेशाय नमः।। श्रीसरस्वत्यै नमः।। श्रीगुरुभ्यो नमः।।

आत्मरूपगुणनृत्यकारिणे लोचनाकलिततत्त्वसाक्षिणे।
नूतनोद्भवसमाधिहेतवे नीलकण्ठगुरवे नमो नमः।।१।।

गुरुगणना यत्पूर्वं यस्याग्रे सग्रहाग्रणीतनयः।
कविमिव तं कवयन्तं तातं नारायणं वन्दे।।२।।

मुक्तावलीप्रकाशात् स्फुरिते चषके समर्पितं सुधिया।
गङ्गारामेण मया पिवन्तु तर्कामृतं सुधियः।।३।।

यद्यप्यविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे विशेषतः फलजिज्ञासायां दृष्टसम्भवे विश्वजिन्यायावताराद्रात्रिसत्रन्यायेन फलकल्पनाध्रौव्ये परिशेषानुमानप्रवृत्तस्य पुंसः प्रारब्धं कर्म निर्विघ्नं समाप्यतामिति मङ्गलप्रवृत्तपुरुषकामनाविषयत्वेन समाप्तिरप्युपस्थिता तथापि नास्तिकग्रन्थसमाप्ताववश्यक्लृप्तनियतपूर्ववृत्तिताकेन स्वतः सिद्धविघ्नात्यन्ताभावेनैव विघ्नस्थलीयसमाप्तिनिर्वाहेन तत्र मङ्गलस्य हेतुत्वमन्यथासिद्धत्वात् किन्तु विघ्नध्वंसे क्वचित् तथात्वं परिशेषानुमानगोचरी भवति।

इत्थं च समाप्तिकामस्य मङ्गले प्रवृत्तिस्तु मङ्गलेन विघ्नध्वंसे जनिते तदविनाभूततदत्यन्ताभावरूपसमाप्तिसाधनस्य स्वस्मिन्ननुवृत्तिरित्यनुसन्धायैवेति स्थिते सत्येकस्मिन्नपि बाधके साधकसहस्रस्याप्यकिञ्चित्करतयावश्यमपेक्षितायै प्रारिप्सितविघ्नोपशान्तये कृतं मङ्गलं शिष्यशिक्षायै निबध्नन् श्रोत्रवधानाय चिकीर्षितं प्रतिजानीते। **ब्रह्माद्या इति।**

मया तर्कामृतं तर्का द्रव्यादयः पदार्थास्त एवामृतं मुक्त्युपायत्वात्तन्यते लक्षणप्रतिपादनेन बुद्ध्युपारूढं क्रियते। किं कृत्वा तद्यतो ब्रह्माद्यैर्ध्येयमत

एव निरुपमं तत एव चरणाम्बुजमिति नोपमितसमासो निर्वह्निर्वह्निमानयमितिवदनन्वयापत्तेरपुष्टार्थतापत्तेश्च। न च तर्कामृतविशेषणमेव तदिति वाच्यम्। तथा सति स्वोत्प्रेक्षामूलकत्वशङ्कयानादरणीयताप्रसङ्गात्। निरुपमत्वप्रयोजकासाधारणधर्मसमर्पकतत्पदासन्नत्वाच्च।

श्रीविष्णोर्लक्ष्मीनारायणस्य चरणाम्बुजं चरण एवाम्बुजं जलजं हृत्पद्मे हृदेव पद्मं स्थलजं तस्मिन्नेतेन स्थलपद्मे जलजनिधाननिश्च्युतामृतस्य विचित्ररसतया परमास्वाद्यत्वं निश्वसितवदनायास- निष्पन्नत्वञ्चावेदितम्। चरणात्मतापत्त्या तु तस्याज्ञानप्रशमार्थता विनिधाय स्थापयित्वा स्मृत्वेति यावत्। तत् किं यत्र निखिलैः सकामैरकामैश्चार्चिता अभीष्टदा अभीष्टं सालोक्यादि ददति तादृशा अपि ब्रह्माद्याः ब्रह्माद्यो मुख्यो येषां तादृशास्तृदशानां देवानां सन्दोहाः समूहा धौरेया इति यावत्।

एतेन प्रकृत्यर्थतावच्छेदकानां बहूनामवान्तरसमुदायत्वानां विवक्षाया अवश्यं भावे मानाभावेन तदन्वितस्वार्थबोधकस्य बहुवचनस्यानुपपत्तिरिति निरस्तम्। यद्वा बहुषु बहुवचनमित्यस्य द्वित्वैकत्वयोरविवक्षायां बहुवचनमित्यत्र तात्पर्यं कथमन्यथा द्वित्रा इति बहुवचनम्। अत एव कर्त्रभिप्राये किं परगामिनि मा भूदिति परिसङ्ख्यैवोक्ता अत एव च नाथ ते कुचयुगं पत्रावृतं मा कृथा इत्यत्र नाथतेर्याञ्चायामात्मनेपदप्रयोगे साधुतामुदाहृत्य दृशां पानकर्म कुरुते कामं कुरङ्गेक्षणेत्यत्र द्वयोर्बहुवचनप्रयोगे निरर्थकमुक्तमालङ्कारिकैः।

स्वाज्ञानप्रशमाय। यद्यपि सायुज्यमुक्तये इत्येव वक्तुमुचितं तथापि ज्ञानेनाज्ञानानिवृत्तौ साधितायां न मुक्तौ किञ्चित्साध्यान्तरमवशिष्यते। तदुक्तम्। अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इति। अस्यार्थः। ज्ञानविरोध्यज्ञानप्रभवमोहवशाज्जायन्तेऽत एव जन्तुपदवाच्याः सर्व एव दुःखभाजनानि भवन्तीति। मोहः कथं जन्महेतुरिति चेद्रागद्वेषाधीनधर्माधर्मद्वारा तन्निवृत्तौ सर्वदुःखनिवृत्ति सम्पद्यते तच्चोक्तम्। तेषां मोहः पापीयान् नामूढस्येतरोत्पत्तेरिति। अस्यार्थोऽमूढस्य मोहरहितस्य नेतरोत्पत्ते

रागद्वेषानुदयादिति। सैवापवर्ग इत्युच्यते। तथा च सूत्रम्। "दु:खजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग[१]" इति। पठितेषूत्तरोत्तरस्याभावे सति तदनन्तरस्य पूर्वपूर्वस्याभावादपवर्गो मोक्ष इति तस्यार्थस्तत्तथैवोक्तम्। समस्ता लौकिकीरलौकिकीश्च मनसोऽन्त: करणस्य वृत्तीर्ज्ञानानि सदा दधुर्धृतवन्तस्तेनावहितमनोवेद्यत्वमावेदितम्।

अत एव परमात्मनो योगस्यापि श्रवणादिमहिम्नाऽपरोक्षकारणतावच्छेदकवैजात्यमभ्युपेत्य परमात्मनोप्यपरोक्षं केचिदभ्युपगच्छन्ति। अपरे तु तेनैव महिम्ना जायमानं परोक्षमपि मुक्त्युपायतया स्वीकुर्वन्ति। ननु ज्ञानसामान्यस्यैवाज्ञाननिवर्त्तकतया तत्र को विशेषस्तत्राह। **भवभयेति।** भव: संसारोऽविद्येति यावत्। तस्माद्भयं दु:खाद्यनुभवस्तस्य ध्वंस आत्यन्तिकोच्छेदस्तस्मिन्नेकं मुख्यं साक्षादेव बीजमुपायस्तदुक्तम्–

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवेष्यति सत्यं ते प्रतिजाने प्रियोसि मे।। इति।।

इदमेवोपदेशजन्यं शवलितात्मज्ञानमाद्यतत्त्वज्ञानमित्युच्यते। मननं च युञ्जानयोगिनां जगद्भेदविषयं परिष्कृतात्मज्ञानम्। तदेवाभ्यस्यमानं निदिध्यासनं तज्जन्यमात्ममात्रविषयमत एव निर्विकल्पकपदाभिधेयं युक्तयोगिनां ज्ञानं चरमतत्त्वज्ञानमित्युच्यत इति सिद्धान्तरहस्यम्।

एतेन योग्यात्मविशेषगुणरूपस्य दु:खस्य स्वोत्तरगुणनाश्यत्वेऽपि भवपदाल्लब्धस्य स्वसमानाधिकरणदु:खासमानकालीनत्वरूपस्य दु:खध्वंस-विशेषणस्यात्यन्तिकत्वस्य तत्त्वज्ञानसाध्यत्वमेव न ज्ञानान्तरसाध्यत्वमेवं काशीमरणादेस्तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमेव न तु ज्ञानघटितप्रत्यासत्य-नवच्छिन्नकारणताकत्वरूपं साक्षाद्धेतुत्वं **'तमेव विदित्वातिमृत्युमेति नान्य: पन्था विद्यतेऽयनाये'ति** श्रुतिविरोधादिति सूचितम्। अत एव परमुपायान्तरापेक्षयोत्कृष्टम्। अत्र कविगतभगवद्रत्यङ्गतयैव ब्रह्मादिगतभगवद्रतिरवगम्यत इति प्रेयोऽलङ्कारो बोध्य:।

---

१. तदनन्तरापायादपवर्ग इति पाठान्तरम्।

तात्पर्यटीका

श्रीगणेशाय नमः।। श्रीसरस्वत्यै नमः।। श्रीगुरुभ्यो नमः।।

व्याख्यातुः सुखहेतुर्यथार्थगुरुगम्यवचनतात्पर्यम्।
साभिप्रायपदानां चषके तात्पर्यटीकेयम्।।१।।

नत्त्वा राधादेवीं गङ्गारामो जडीति यः ख्यातः।
समकारि तेन विदुषा विदुषां मनसो विनोदाय।।२।।

आत्मरूपेति। आत्मरूपाः स्वस्वरूपाः किम्वात्मानं रूपयन्ति व्यावर्त्तयन्ति ते तथा तथा चात्मपक्षकभेदानुमितिलिङ्गतावच्छेदकावच्छिन्ना गुणाः सत्यसङ्कल्पादयो यस्य स चासौ नृत्यकारी च तस्मै।

लोचनेति। लोचनेन माया स्वरूपेण प्रमाणेन वा कलितानां भासमानानां तत्त्वानां **पदार्थानां** साक्षी द्रष्टा तस्मै।

नूतनेति। नूतनस्य जगत उद्भवसमाध्योर्हेतु**र्विवर्तकारणं**[१] किं वा नूतनस्य प्रागभावप्रतियोगिन उद्भवसमाध्योरुद्भवस्थितिलयानामिति यावत्तन्मध्यपतित इति न्यायात्। हेतुर्निमित्तं तस्मै।

नीलकण्ठेति। नीलः कण्ठो यस्य स एव गुरुर्ज्ञानप्रदस्तस्मै।

पक्षान्तरे, आत्मरूपः कुलक्रमागतो गुणोऽध्ययनसम्पन्नं ज्ञानं तेन नृत्यकारी सन्तुष्टः परिपूर्ण इति यावत्तस्मै। **एतेना**ध्ययनसम्पन्निरुक्ता।

लोचनाभ्यामाकलितस्य पुस्तकस्य तत्त्वसाक्षी यथार्थद्रष्टा तस्मै। **एतेन** भावनोक्ता।

नूतनेभ्य उद्भवो येषां तेषां दूषणानां समाधौ समाधाने हेतुः प्रथमवक्ता तस्मै। **एतेन** वक्तृनैपुण्यं दर्शितम्।

---

१. समसत्ताकोऽन्यथाभावः परिणामः। विषमसत्ताकोऽन्यथाभावो विवर्तः। जगदेतद्विवर्तते। दुग्धं दध्यात्मना परिणमते। सत्ता त्रिधा पारमार्थिकी व्यावहारिकी प्रातिभासिकी प्रथव ..... द्वितीया जगति तृतीया स ...... (प्रथमा ब्रह्मणि द्वितीया जगति तृतीया सर्पे।)

नीलकण्ठस्तच्छर्मा गुरुरुपदेष्टा तस्मै। **नमो** नम इत्यादरे वीप्सा तथा च गुर्ववधिको यो मदीयापकर्षस्तद्बोधनानुकूलो मदीय आदरपूर्वको व्यापार इत्यर्थः।

प्रकृतश्लेषोऽत्रालङ्कारः। **"नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयास्पद"** इति तल्लक्षणात्।।१।।

गुरुगणनेति। गुरोः पितुरपि गणना यत्पूर्वं यः पूर्वं यस्मिन् कर्मणि यथा भवति तथा यं गणयित्वैव गुरुगणना लोकैः क्रियत इत्यर्थः।

किञ्च सग्रहश्चन्द्रचूडो योऽग्रणीः सर्वश्रेष्ठस्तस्य तनयो गणेशो यस्याग्रे तिष्ठति यदाराध्यो भवतीति यावत् तं नारायणाभिधं तातं वन्दे नौमि स्तौमि च।

कथं भूतं तातं तम्, कविमिव कवयन्तं कवनं कवस्तं करोतीति कवयन् तं कवयन्तम्। तं कम्। गुरोर्वासरस्य गणना यत्पूर्वं यस्मात्पूर्वम्। किं च यस्याग्रे स प्रसिद्धो ग्रहाणामग्रणीः सूर्यस्तस्य तनयः शनिर्लोकैर्गण्यत इत्यर्थः।

पूर्णोपमा स्तुतिरूपवाक्यार्थोपस्कारिकात्रालङ्कारः, **'साधर्म्यमुपमाभेद'** इति तल्लक्षणात्। उपमानोपमेयोपमावाचकसाधारणधर्माणां चतुर्णामप्युपादानाच्च।

मुक्तावलीप्रकाशादिति। सुधियः प्रतिभाजुषो गङ्गारामेण मया मुक्तावलीप्रकाशा**त्तन्नामकास्मन्मातामहग्रन्था**त्स्फुरिते निष्पन्ने चषके **पानपात्रे** श्रोतरि गूढार्थ**ग्रहण**प्रभवमदवशाद्ग्रन्थे मादकत्व**रूपं चषकविशेष**साधर्म्यं चषकपदप्रवृत्तिनिमित्ततयाभिप्रेतमित्यपि मन्तव्यम्। सुधिया दत्तावधानया बुद्ध्या समर्पितं व्याख्यातमिति यावत्। तर्कामृतं पिवन्तु सादरं श्रृण्वन्त्वित्यर्थः।

अत्र यथा चषकखचितमुक्तावलीप्रकाशग्राह्ये चषके पानपात्रे स्थापितं पानीयं पिपासाकुलाः पिवन्तीत्यर्थान्तरस्फूर्तेः समासोक्तिरत्रालङ्कारः। **'समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेदि'**ति तल्लक्षणात्।।३।।

इति श्रीजड्युपनामगङ्गारामविरचितायां चषकतात्पर्यटीकायां श्लोकव्याख्या।

श्रीमन्महागणपतये नमः

अविगीतेत्यादि। अविगीतत्वं बलवदनिष्टाननुबन्धित्वं तेन श्येने प्रवृत्युपयुक्तबलवदनिष्टाननुबन्धिफलोपधायकत्वाभावेऽपि न व्यभिचारः। न च व्युत्क्रमेण दर्शकर्त्तुरपि यदा कदाचित्तादृशभ्रान्तिरहितत्वानपायादुक्तव्यभिचारतादवस्थ्यमेवेति वाच्यम् आचारे शिष्टपदोपसन्दानेन यथोक्तभ्रान्त्यप्रयोज्यत्वस्य लाभात्। शिष्टत्वं फलोपधानांशे भ्रान्तिरहितत्वं तेन व्युत्क्रमकृतदर्शादौ न व्यभिचारः। न च निष्फलमिदं निषिद्धमेवेति शक्यं वदितुम्, प्रवृत्युद्देश्यफलस्वरूपायोग्यस्य तत्र श्रुतौ निष्फलपदेनोक्तत्वात् अन्यथा विष्णुस्मरणादिनापि तत्र फलोपधानं न स्यात्।

यत एवाविगीतत्वमीदृशं व्युत्क्रमकृतदर्शाचारसाधारणमत एव **शिष्टेति**। अत्राचारो न क्रियापितु विषयत्वपदसमभिव्याहारात् कृतिरेव तद्विषयत्वं चोद्देश्यतया मुख्यफले व्यभिचरतीति साध्यतया तथात्वं विवक्षितम्, तच्च करशिरः संयोगादौ स च स्वानुकूलकृतिमत्त्वसम्बन्धेनात्मनीति दिक्।

इच्छारूपयागस्येव ज्ञानरूपमङ्गलस्य वृत्तिविषयत्वमप्युपपादनीयमित्यप्याहुः। दृष्टसम्भवे उपस्थितिफलसम्भवे। विश्वजिन्न्यायानवतारादनुपस्थितफलकल्पनाया असम्भवात्। अत्र स स्वर्गःस्यादित्यस्य नेदं विषयवाक्यम्, यः सत्रायागवरेत् स विश्वजिता यजेतेति साधिकारवाक्यत्वात् किन्तु निरधिकारं पिण्डपितृयज्ञनामककर्मान्तरविधायकं वाक्यं तथेत्यन्यत्र स्थितम्। कृत्वा (स इत्यन्तवाक्यस्यासत्त्वं मनसि कृत्वेत्यर्थः।) चिन्तयाधिकरणरचनापि सम्भवतीति सर्वसम्मतमिदमेवोपन्यस्तमिति तु युक्तम्। (रात्रीत्यादि। ज्योतिर्गौरित्यादिवाक्योत्पन्नकर्मणां फलजिज्ञासा परमार्थः *स्वर्गादिकफलकल्पनावता*) नास्तिकग्रन्थसमाप्तौ जन्मान्तरीयमङ्गलजन्यविघ्नध्वंसकल्पने गौरवं दर्शयति **अवश्यक्लृप्तेति। विघ्नस्थलीयेति।** ध्वंसकालावच्छेदेनात्यन्ताभावस्यापि सत्त्वादिति भावः। क्वचिन्मङ्गलनाश्यतावच्छेदकजात्यवच्छिन्नस्य विघ्नस्य ध्वंसे विघ्नध्वंसान्याफलकत्वविशिष्टसफलत्वलिङ्गिका मङ्गलं विघ्नध्वंसफलकमित्यनुमितिर्भवतीत्याह। **परिशेषेति।**

ननु मङ्गलस्य समाप्तिं प्रत्यहेतुत्वे समाप्तिकामस्य मङ्गले प्रवृत्तिर्न स्यात् तत्कामनावांस्तदुपाये प्रवर्त्तते, न च मङ्गलं समाप्त्युपाय इति कथं तस्य तत्र प्रवृत्तिरिष्टसाधनताज्ञानरूपकारणाभावादत आह। **इत्थञ्चेति।** मङ्गलस्य विघ्नध्वंसमूलकत्वे चेत्यर्थः। **विघ्नध्वंसे,** स्वसमानाधिकरणविघ्नासमानकालीने विघ्नध्वंसे। तेन प्रचुरविघ्नवति कतिपयविघ्नध्वंससत्त्वेऽपि न विघ्नात्यन्ताभावानुवृत्तिः।

तदविनाभूतेति। स ध्वंसोऽविनाभूतो व्याप्यो यस्येत्यर्थः। वाक्यार्थज्ञानरूपकारणसम्पत्त्यैव वचनसन्दर्भरूपग्रन्थनिर्वाहे किमत्यन्ताभावेना-पीत्यतः **सत्येकस्मिन्नपीति**। **अवश्यमपीति**। स्वतः सिद्धविघ्नात्यन्ताभावरूपस्य साधनस्य स्वस्मिन्ननुवृत्तय इत्यादिः। अथ विघ्नध्वंसतैव कथं निश्चिता येन तच्छान्तये मङ्गलाचरणमिति चेत् किं निश्चयेन प्रवर्तन्त एव जयपराजयसंशयेऽपि युद्धादौ पुमांसः किं पुनरल्पायासे मङ्गलाचरण इत्याशयः।

शिष्यशिक्षायै निबध्नन्निति। गुरोर्मङ्गलाचारदर्शनाच्छिष्येणापि मङ्गलकरणादिति भावः। **श्रोत्रवधानायेति।** जिज्ञासितार्थविषयकवाक्यशुश्रूषा-वशाद्विषयान्तरविषयकज्ञानीयसप्रतिबन्धकसामग्रीघटनायेत्यर्थः।

मुक्त्युपायत्वादिति। देहलीदीपकन्यायेनान्वेति। यद्यप्यमृतत्वमेतीति श्रुतावमृतत्वपदेन मुक्तिरुच्यत इत्यमृतपदेन तत्कारणाभिधानं न युक्तं तथापि धर्ममात्रस्य मुक्तिपदार्थत्वे धर्मिणो मिथ्याज्ञानवासनाध्वंसोपायस्यात्मनो निरुक्तश्रुतिबलेनैवामृतपदार्थत्वे स्थिते गौण्या वृत्या तदेकज्ञानविषयाणामन्येषामपि तदुपायत्वाविशेषात् तथात्वमविशिष्टमित्याशयः। सर्वोत्कर्षप्रयोजक-ब्रह्मादिध्येयत्वावच्छिन्नं तत्पदार्थो निरुपमत्वे हेतुतया विवक्षित इति सूचयितुं पूरयति। **तद्यत इति**। तदिति हेतुगर्भविशेषणेन ब्रह्मादिध्येयत्वप्रयोज्याया एवोपमाया निषेधावगतिर्न धर्मान्तरप्रयोज्याम्बुजोपमाप्रमितिबाधिका। न च तथोपमाप्रसिद्धिरुपमायां ब्रह्मादिध्येयत्वप्रयोज्यत्वाभावस्यैव निरुपमपदार्थत्वा-दित्यत **आहापुष्टार्थतापत्तेरिति**। मयूरव्यंसकादिसमासे तूत्तरपदार्थताद्रूप्यारोपस्य विचित्ररसताप्रयोजकस्य पुष्टार्थत्वमेवेति बोध्यम्। तथा सति अन्यप्रतिपादिततर्काप्रतिपादकत्वे बोधिते सति। स्वोत्प्रेक्षा स्वीयकल्पना।

ननु सङ्क्षिप्तबंह्वर्थत्वादिनैव निरुपमत्वं वाच्यमतो **निरुपमत्वेति। तत्पदासन्नत्वाच्चेति।** तथा चासतिसाम्येऽपि तत्पदोत्थितचरणाम्बुजाकाङ्क्षा निरुपमत्वपर्यवसिताऽधिकेत्याशयः। एतेन क्रियाविशेषणं निरुपममिति परास्तम्। ग्रन्थस्य युक्त्याद्यप्रतिपादकत्वेनायोग्यार्थकतापत्तेश्चेत्यस्तु।

परमास्वाद्यत्वमावेदितमिति योजना। **निःश्वसितवदिति।** यथा निःश्वसितं वेदा इत्यनेन निःश्वसिताभेदप्रतिपादनेन वेदेष्वनायासनिष्पन्नत्वरूपतद्धर्मारोपो भवति तथा तथाविधकार्यकर्त्तृसाहाय्यान्मम ग्रन्थेऽपीति भावः। **चरणात्मतापत्त्या त्विति।** तथा च चरणस्य स्वनिष्ठताद्रूप्य-प्रतियोगितायाम्बुजेऽन्वयादम्बुजताद्रूप्यरूपकमित्युपगीयतामेतद्यथा मुखेन्दुरित्यत्र मुखस्य स्वनिष्ठाभेदप्रतियोगितयेन्दावन्वयेनेन्द्वभेदरूपकव्यवहारस्ताद्रूप्यम-प्यम्बुजकार्यनिरतिशयानन्दकारितैवेत्यग्रे व्यक्तम्। उपसर्गार्था विशेषधर्मप्रकारकत्वं नैरन्तर्यं च स्मृतावन्वयिनस्थापने तस्याविवक्षितत्वादित्याह। **स्थापियित्वा स्मृत्वेति यावदिति।** सालोक्यादित्।दिना सामीप्यसादृश्य प्रत्यवायानुत्पादपरिग्रहः। त्रिदशानां जननयौवनमरणावस्थात्रयशालिनाम् त्रिदशसन्दोहपदस्य समुदितत्रिदशार्थकत्वं कृदभिहित इत्यनुशासनविरुद्धम् कथञ्चित्तात्पर्यार्थेऽत्र बहुत्वान्वयाभ्युपगमेऽपि बहुवचनेन सन्दोहपदं गतार्थमतो लाक्षणिकतां दर्शयति। **धौरेया इति यावदिति।** तर्हि तथैव कुतो नोक्तमिति चेच्छृणु यति भङ्गात्। न चात्राप्यसौ भिन्नपदत्वात्। श्रृङ्गारभङ्ग्या महाकाव्ये चारुणीतिवत्।

एतेन प्रकृतिलाक्षणिकार्थगतबहुत्वस्यैव बोधकत्वेन। **अवश्यम्भाव इति।** यथा जातास्तस्य दशाननस्य समरप्रारम्भदम्भस्फुरत्केयूरक्वणितानुमेय-विशिखत्यागाः करश्रेणय इत्यत्र सोऽस्ति। अत एव च करश्रेणय इति बहुवचनं त्वेकैकविशिखत्यागव्यासक्तकरयुग्मबहुत्वाभिप्रायतया नौकाया-मस्माभिः समर्थितम्। प्रकृते तु नैवमित्याशयः। **बहुवचनस्यानुपपत्तिरिति।** सति कुड्ये चित्रमिति न्यायेन तत्रैव तात्पर्याभावे तदन्वितार्थतात्पर्यं सुतरामसम्भवीत्याशयः।

बहुवचनार्थान्वयानुपपत्या हि सन्दोहपदलक्षणा धौरेये स्वीकार्या ततो वरं बहुवचनस्यैवार्थाविवक्षेति मनसि कृत्याह **यद्वेति। कथमन्यथेति।** तत्र

त्रित्वाद्यनिर्णयेन तद्विवक्षाया असम्भवादित्याशय:। अत एव कर्त्रभिप्रायाभावेऽप्यात्मनेपदसाधुत्वाभिप्रायादेव। **अत एव च** द्वयोर्बहुवचनस्य साधुत्वादेव च। **पानकर्मेति**। लेपनतापनसेचनानां पूर्वापरीभूतानां क्रियाणां कलाप इत्यर्थ:। **निरर्थकमिति**। सङ्ख्यामात्रस्याविवक्षायां त्रयाणामपि वचनानां साधुत्वे प्रथमातिक्रमे कारणाभावात्तत्र बहुवचनानुधावनं निरर्थकं भवति। प्रकृते त्ववान्तरसमुदायत्वविवक्षायामर्थसाधुतापि भवतीत्यर्थध्वननार्थं तन्न निरर्थकं स्यादिति भाव:।

व्यक्तीभविष्यति चैतदुपरिष्टात् **'मोक्ष इतीति'** नन्वेवमानन्दीभवतीति श्रुतिविरोध इति चेदानन्दोऽयं दु:खध्वंसे उपचर्यते, तदुक्तम्-

'यच्च कामसुखं लोके यच्च दिव्यं महत् सुखम्।
तृष्णाक्षयसुखस्यैते नार्हत: षोडशीं कलामिति॥

प्रतियन्ति च भाराद्यपगमे सुखी सम्वृत्तोऽहमिति। तस्मान्मुक्तौ साध्यान्तराभावाद्धेतो: **तथैव** स्वाज्ञानप्रशमायेत्येव। **लौकिकीरलौकिकीश्चे**ति वक्ष्यमाणमतभेदेन। न च **'यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह'**ति श्रुतिविरोध इत्या**हावहितेति**। यथा च समस्ता इत्यनेनावहितत्वोक्त्या मनसैवानुद्रष्टव्य इति श्रुतेरुक्तश्रुतिविरोधेनावश्यं विषयभेदेकल्पनीयेऽवहितान-वहितभेदभिन्नमनोविषयतया तयोर्विरोधपरिहारो दर्शित इति भाव:।

वैजात्यमभ्युपेत्येति। इदमुपलक्षणम्। तादृशविजातीयसंयोगजनक-तावच्छेदकतावच्छेदकवैजात्यं भूमात्मयोगिमनसो द्वित्वसाधारण्यमभ्युपेयत इति नाननुगमोपीत्यपि बोध्यम्। अन्यात्मनो विषयस्य परोक्षत्वे ज्ञानस्यापरोक्षत्वासम्भवादाहाभ्युपगच्छन्तीति। अत एवास्वरसान्मतान्तरं दर्शयति। **अपरेत्विति। तेनैव महिम्नेति**। अत एवानुद्रष्टव्य इति श्रुतानन्वित्युक्तम्। **मुक्त्युपायतयेति**। तथा च तमेव विदित्वेति श्रुतौ श्रवणादिसम्पन्नं ज्ञानं विवक्षितमित्याशय:। **आत्यन्तिकोच्छेद** इति। तथा चेतरज्ञानस्य न वक्ष्यमाणात्यन्तिकाज्ञाननिवर्त्तकत्वमिति ततो विशेष इत्यादर्शितम्। शास्त्रे आद्यत्वज्ञानमिति चरमतत्त्वज्ञानमिति च व्यवहारदर्शनात् तद्विवेचयति, **इदमेवेति**।

एतेन भवदेनैकपदेन च। **दुःखस्येति।** नव्यास्तु दुःखपदं दुःखसाधनदुरितपरतया व्याख्येयम्। दुरितस्य च योग्यविशेषगुणत्वाभावान्न स्वोत्तरगुणनाश्यतेति तन्नाशरूपमुक्तेस्तत्त्वज्ञानसाध्यत्वमेवेत्याहुः। अत्र च प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशं प्रति स्वसामानाधिकरण्य-स्वाव्यवहितपूर्ववृत्तित्वोभयसम्बन्धेन योग्यविभुविशेषगुणः कारणमपेक्षाबुद्धि-जन्यद्वित्वोत्पत्यनन्तरभाविद्वित्वनिर्विकल्पकेन तन्नाशे इष्टापत्तावप्यपेक्षाबुद्धि-जन्यसंस्कारेणापेक्षाबुद्धिनाशापत्तिवारणाय कारणतावच्छेदककोटौ योग्यत्वमत्य-न्ताजन्यव्यावृत्तये शेषमिति बोध्यमित्यन्यत्र विस्तरः।

भवपदसूचितमर्थं प्रदर्श्यैकपदसूचितमर्थं दर्शयति। **एवमिति। श्रुतिविरोधादिति।** अत एव काशीमरणान्मुक्तिरिति श्रुत्यन्तर्गतपञ्चम्याः प्रयोजकत्वपरतयोपवर्णनं ग्रन्थकृतां सङ्गच्छत इति भावः। **प्रेयोऽलङ्कार** इति। **देवादिविषयाया रतेर्भावस्यापराङ्गत्वे प्रेयोऽलङ्कार** इति तल्लक्षणात्।

तर्कामृतम्

अथ श्रुतिः श्रूयते–"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति। अस्यार्थः मुमुक्षुणा आत्मा द्रष्टव्यः, मुमुक्षोरात्मदर्शनमिष्टसाधनमिति यावत्। आत्मदर्शनोपायः कः इत्यत्राह–'श्रोतव्यः' इत्यादि, तेन आर्थक्रमेण शाब्दक्रमस्त्यक्तो भवति, 'अग्निहोत्रं जुहोति', 'यवागूं पचति' इत्यादिवत्। तथा च श्रवणमनननिदिध्यासनानि तत्त्वज्ञानजनकानीत्युक्तं भवति। अत्र श्रुतितः कृतात्मश्रवणस्य मननेऽधिकारः।

तरङ्गिणी

अथ पदार्थनिरूपणं सङ्क्षेपतः इत्यध्याहृत्यान्वयः। किमिति पदार्थनिरूपणमित्याकाङ्क्षायां श्रुतिरित्यादि इत्येतदर्थमित्यन्तम्। **आत्मा वा अरे द्रष्टव्य इति।** इदं च बृहदारण्यके चतुर्थाध्याये याज्ञवल्क्यस्य मैत्रेयीं

स्त्रियं प्रति वचः। आत्मा वा आत्मैवेत्यर्थः। अरे नीचसम्बोधने। द्रष्टव्य इत्यादयो विधौ तव्यप्रत्ययाः। तदर्थश्चेष्टसाधनत्वमित्यभिप्रेत्याह-**मुमुक्षोरिति।** तच्चेष्टप्रकरणान्मुक्तिरेवेति सूचयितुं मुमुक्षोरित्युक्तम्। एवं चास्यैवात्राधिकार इत्यपि कटाक्षितम्। भावनाया अंशत्रयनियतत्वादात्मदर्शनभावनायामात्मदर्शनस्य कारणत्वेन मुक्तेः कर्मत्वेनावगमेऽपि इतिकर्तव्यतानवगमात्तदाकाङ्क्षायां सान्निध्याच्छ्रवणादेरुपकाङ्क्षया च श्रवणादेरेवेतिकर्तव्यातात्वमित्यभिप्रेत्याह**आत्मदर्शनोपायः क इत्याहे**ति। इति एवमाकाङ्क्षायाम्। आह उपायमाह। श्रवणादौ तु गुरुकुलवासादेरितिकर्तव्यतात्वं स्पष्टमेव। तेन परस्पराकाङ्क्षादिवशेन। आर्थः अर्थात् वस्तुस्वभावादायातः। कार्यस्य कारणोत्तरभावित्वात्। शाब्दः शब्दतः पाठा लक्ष्यः। नन्विदं श्रुतौ क्व दृष्टमित्यत आह-**अग्निहोत्रमिति**। होमस्य द्रव्याकाङ्क्षायां यवागूपाकस्य प्रयोजनाकाङ्क्षायां दृष्टे संभवत्यदृष्टस्यान्याय्यत्वाद्यवागूपाकस्याग्निहोत्रार्थत्वावगतिवदित्यर्थः। एवं च श्रोतव्य इत्यादौ विधिप्रत्ययेनेष्टसाधनत्वेऽवगम्यमाने उपस्थितात्मतत्त्वज्ञान- मेवेष्टत्वेनावगम्यत इत्याह-**तथा चेति**। अत्र वाक्ये। **श्रुतितः कृतात्मश्रवणस्येति**। "श्रोतव्यः श्रुतिवाक्येभ्यः" इति स्मरणात्। श्रुतितः कृतात्मश्रवणेति श्रवणानन्तरं मननबोधनादुक्तम्। **अधिकार इति**। प्रतीयत इति शेषः।

चषकम्

अथ मङ्गलानन्तरं पदार्थनिरूपणममिधेय- लक्षणादिकथनम्। सङ्क्षेपतः शब्दसङ्क्षेपेण। यद्वा प्रतियोगितावच्छेदक- प्रकारकयत्किञ्चित्प्रतियोगिज्ञानस्यैवाभावधीहेतुत्वेन तावतैव तत्त्वज्ञानोपयोग- सिद्धेः केषाञ्चिदनिरूपणेऽपि न क्षतिरित्याशयेन सङ्क्षेपत इत्युक्तमित्यग्रिमेण सह क्रियत इत्यध्याहृत्य योज्यम्। वस्तुतस्तु सूत्रपठितपदार्थानां तावतामेव साक्षात्परम्परया वोपयोगस्य प्रदर्शितत्वात्तादृशप्रक्रियायां नान्येषां घटकतेति हृदयम्। कस्मै प्रयोजनायेत्यत आह। **श्रुतिरित्यादि।** तदर्थमित्यन्तम्। तेन तथाचेत्यादिना वक्ष्यमाणहेतुहेतुमद्भावेऽप्रामाण्यशङ्का परिहृता। **आत्मेति। अरे मूढे।** विविदिषायाः पुंवत्प्रगल्भाश्रितत्वं द्योतयितुं पुंस्त्वेन निर्देशः। **वा इति।** कर्मापरितोषे मास्तु तदिदं तु स्यादित्याह।

प्रकृतोपयोगं प्रदर्शयितुं श्रुतिं व्याचष्टे। **अस्या अर्थ** इति।

अधिकारिणं दर्शयति। **मुमुक्षुणेति।** नायं श्रौत इति चेत् किञ्चात आर्थः स इत्याह। **मुमुक्षोरिति।** तव्यप्रत्ययार्थं स्पष्टयति। **इष्टेति। तेन** श्रवणादेर्दर्शनोपायतयाभिप्रेतत्वेन। **त्यक्तो** बाधितो न विवक्षित इति यावत्। ननु श्रवणादिचतुष्टयमेव मुक्त्युपायतया श्रुतौ विवक्षितं तत्र श्रवणाद्यदृष्टद्वारा **दर्शनं** च साक्षादित्यस्त्वत आहा**ग्निहोत्रमिति।** तथा च दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वाद्दर्शनद्वारकत्वमेव श्रवणादेरुचितमिति भावः। अन्यथा दर्शनस्योपकारकाकाङ्क्षाया अनिवृत्यापत्तेः। श्रुत्यर्थमुपसंहरति। **तथा चेति।** न च श्रवणं विना कार्तार्थ्यमित्याह। **अत्रेति** श्रुतावित्यर्थः। प्रतिपाद्यत्वं सप्तम्यर्थः। श्रुतितो यतो वा उत्पादितः। **अधिकार** इति। क्रमादिति शेषः।

तात्पर्यटीका

.... प्रत्यप्याह यद्वेति सूत्रपठितानामेव निरुक्तप्रक्रियया तत्त्वज्ञानोपयोगित्वादितरेषां कथैवाप्रसक्तेति युक्तमुक्तं शब्दसङ्क्षेपेणेतीत्याह। **वस्तुतस्त्विति।** मैत्रेयी सम्बोध्येति स्पष्टयत्य**रे मूढे इति।** पुंवदिति वत्यन्तार्थस्य पुन्निष्ठधर्मस्य प्रगल्भपदार्थैकदेशे प्रागल्भ्येऽभेदेनान्वयः। चैत्रस्य गुरुकुलमितिवत् प्रगल्भाश्रितेति समास इत्याशयः। **द्योतयितुमिति।** वस्तुतोऽनादेर्वेदस्य न वास्तविको वक्तृश्रोतृभावोऽनादित्वव्याघातात् किन्तु काल्पनिक एव, वाको वाक्यस्य विद्यासारिष्ठतायेति भाष्ये स्थितम्। एतेन विद्यानधिकारिण्यै स्त्रियै किमर्थं प्रोवाचेति शङ्का परास्ता। लोकेऽपि कव्युम्भित-वक्तृश्रोतृभावो मां विद्धि शाखोटकमित्यादौ दृश्यते। रेशब्दस्य द्वयोः प्रसिद्धत्वेऽप्यरेशब्दस्य पुंस्येव प्रसिद्धिरित्यभिप्रेत्याह **पुंस्त्वेनेति।** यद्यप्यरेशब्दो न पुंस्त्वविशिष्टप्रतिपादकस्तथाप्यरे रे सद्यः समुत्पाटित-कुशग्रन्थिमयाक्षमालापरिवृत्तिवशंवदितवालविधवान्तःकरणा ब्राह्मणा इत्यादौ बहुष्वरेशब्दस्य पुंस्त्वविशिष्टप्रतिपादकनिर्देशैर्भूयः साहचर्यात्तदुपलक्षित-पदेनेत्यर्थः। **वा इतीति।** वैशम्य इत्यर्थे वा इत्याहेति योजना।

अन्तःकरणशुद्ध्युपयोगितयैव तथैव ज्ञानकर्मभ्यामित्यत्रकर्मोपादानमित्यभिप्रेत्याह **मास्तु तदिति।**

न च श्रवणं विनेति। अत एव श्रुतिबलसिद्ध-हेतुहेतुमद्भावाद्वामदेवादीनां गर्भस्थज्ञानिनां जन्मान्तरीणश्रवणकल्पना ग्रन्थकृता सङ्गच्छते। **कार्तार्थ्यमिति।** पुस्तकपाठादिनार्थावगमे सत्यपीत्यादिः। अन्यथाप्रामाण्यशङ्काकालुष्येणार्थनिश्चयासम्भवादित्याशयः। ननु क्रमादित्युक्त-मयुक्तं पाठक्रमे आर्थक्रमो न नियामको व्यभिचारस्य मूल एवोक्तत्वादुक्तंत्वदीधितिकृता। क्वचित् कार्यं निरूप्यापि कारणनिरूपणादिति।

तर्कामृतम्

मननं च आत्मन इतरभिन्नत्वेनानुमानम्, तच्च भेदप्रतियोगीतरज्ञानसाध्यं, तथाचेतरदेव कियत्? –इत्येतदर्थं पदार्थनिरूपणम्।

तरङ्गिणी

भेदप्रतियोगीतरज्ञानसाध्यमिति। अभावज्ञाने प्रतियोगिज्ञानस्य हेतुत्वादितिभावः।

चषकम्

यद्वा श्रवणमनननिदिध्यासनेषु मध्ये। **अधिकार** इति श्रवणविधेरपि च श्रवणं विना जन्माद्यस्य यत इति जन्मिनः सकर्तृकत्वेन मननासम्भवादिति भावः। नन्वेतावता प्रकृते किमायातमत आह। **मननं चेति।** तथा च श्रुतार्थे यथा-यथा सन्देहस्तथा-तथा युक्तिरचनेत्याशयः। **अनुमानम्**नुमितिः। इतर एव के इति जिज्ञासोदयादित्यध्याहृत्य योज्यम्। **तदर्थम**िति। तादृशजिज्ञासावारकेतरपदार्थज्ञानार्थमित्यर्थः। एतावता परम्परया निःश्रेयसं फलमादर्शितम्।

तात्पर्यटीका

न चेदं क्रमप्रमाणमित्यपि वक्तुं युक्तं भिन्नवाक्यगतानां समसम्बन्धिनामन्वये हि तदेकवाक्ये हि परस्परं सम्बन्धस्य क्लृप्तस्य क्रमिकाणां समुच्चितान्वयासम्भवे क्रमेणान्वय इति योग्यताबललभ्येन क्रमादित्यादिवाक्यशेषेण पदार्थमर्यादयावगमाद्यथा धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितं। श्रावणं कर्म कुर्वीरनृग्यजुःसामपाठका इत्यत्रात एवानारभ्याधीतानां मन्त्राणां प्रकरणान्तरपठितानां यागानां च परस्परमनन्वितानां प्रत्येकं क्रमिकाकाङ्क्षया क्रमप्रमाणकोऽन्वय उदाहृतो नचाप्यसौ सिद्धसाध्यसमभिव्याहारः सिद्धताद्युपस्थापकपदाभावादित्यत आह। **यद्वेति। श्रवणविधेरिति।** श्रोतव्यः श्रुतिवाक्येभ्य इति श्रवणविधेरित्याशयः। न खलु श्रवणविधिना मननोपयोगित्वं गृह्यते इत्यनुशयानो यथा श्रुत्या प्रतिपाद्यते तथैवोपपन्नोर्थो निरस्तपुंदूषणाशङ्कं ज्ञानम्। यत्र भवतीत्याशयेनाहा**पि चेति। सकर्तृकत्वेनेति।** ननु यदुक्तं सकर्त्तृकत्वेन मननं तन्मूलविरुद्धमितरभिन्नत्वेन मननस्य मूलोक्तत्वादत आह **तथा चे**ति। तथा च कर्त्तृपार्थक्यवादे मूलोक्तं मननं सकर्त्तृकताविवादेऽपरमिदमुक्तमिति भावः। इतरभिन्नत्वेनेत्यस्यान्वय-योग्यत्वायानुमानमिति व्याचष्टे। **अनुमितिरिति।** तथा च प्रत्ययस्यार्थो न विवक्षितो भावप्रत्ययेनाप्यनुमानपदनिष्पत्तेरुक्तत्वादिति भावः। न च ग्रन्थान्तरत्वेन फलान्तरमावश्यकमित्याह। **एतावतेति।** तथा चास्य शास्त्रप्रकरणत्वेन शास्त्रफलेन फलवत्तेति भावः।

तर्कामृतम्

सामान्यतः पदार्थो द्विविधः, भावोऽभावश्च। भावः षड्विधः, द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात्। तत्र द्रव्यत्वगुणत्वकर्मत्वानि जातयः, सामान्यत्वादीनि उपाधायः।

तरङ्गिणी

सामान्यत: पदार्थत्वेन। द्विविध: पदार्थत्वावान्तरविभाजकोपाधिद्वयविशिष्ट:। उपाधिद्वयमाह-**भावोऽभावश्चेति**। एवं षड्विध इत्यादावपि। **समवायभेदादिति**। द्रव्यादिसमवायानां भेदो वैलक्षण्यं द्रव्यत्वादिषड्रूपं तस्मादित्यर्थ:। तत्र तेषु षट्सु। **जातय इति**। द्रव्यत्वं संयोगविभागसमवायिकारणतावच्छेदकतया, गुणत्वं गुणपदशक्यतावच्छेदकतया कार्यतावच्छेदकघटकतया वा, जन्यगुणत्वावच्छिन्नं प्रति द्रव्यत्वेन कार्यकारणभावात्। कर्मत्वं चलतीति अनुगतप्रत्यक्षसिद्धम्, विजातीयसंयोगविभागासमवायिकारणतावच्छेदकतया वा सिद्धम्। उपाधय: अखण्डोपाधय:। ते च भिन्नरूपेण वक्ष्यन्ते। जातीनां बहुत्वात्तदुपादाने गौरवमित्युपाधीनेव विशिष्योपादाय तदन्यत्वेन जातीराह **अन्यानीति**।

चषकम्

पदार्थविभाजकव्याप्यं विभाजकं सर्वं दुर्वचमेवानन्त्यादतथाविधं तु तन्न द्रव्यत्वादिभावत्वस्यैव तथाविधस्य व्याप्यतया वक्ष्यमाणत्वादित्यभिप्रेत्याह। **सामान्यत इति**। तथा च पदार्थविभाजकोपाध्यन्तराव्याप्यं तथाविधमुक्तोपाधिद्वममेव तदन्यतरवान् पदार्थ इत्यर्थ:। एवं सर्वत्र विभागे रीतिरनुसर्तव्येति सम्प्रदाय:। **भाव इति**। यद्यपि तत्तदितरत्वादिकं यत्किञ्चिदेव सुग्रहं पदार्थविभाजकव्याप्यमप्युपादाय विभाग: सुवच: सम्भवति तथाप्येतदेतदितरत्वादिना विनिगमनाविरहवारणाय सर्वानुमतं भावत्वमुपात्तम्। यद्यपि सप्तमस्याभावत्वकथनादेव षण्णां भावत्वमर्थसिद्धं तथापि स्पष्टप्रतिपत्तये वाक्यप्रपञ्च: अभावो न भाव इति तु नोक्तम्। अभावनिरूपणस्य प्रतियोगिनिरूपणाधीनत्वेन भावत्वस्य प्रतियोगिन्यवगमे सम्मुखोक्तेर्न्यायत्वात्।

कथं तर्हि नामूढस्येत्यादि। विभक्तिप्रातिपदिकार्थयोरन्तराले नञर्थभानासम्भवादिति चेत्। श्रृणु। मूढस्यैवेतरोत्पत्तेरित्यन्ययोगव्यवच्छेदस्याधिकस्य बोधायानमूढस्येत्यर्थिका नामूढस्येत्युक्तिरिति तु वयं ब्रूम:। **भेदादिति**। भेदो वैलक्षण्यं द्रव्यत्वादिषड्रूपं तस्मादित्यर्थ:।

इत्थं पदार्थविभागस्य वैशेषिकप्रसिद्धत्वेऽपि निर्विवादानां पदार्थानां कथञ्चिदपि विभागस्य नैयायिकानामप्यनुमतत्वान्न वक्ष्यमाणप्रमाणविभाग-विरोधशङ्काकालुष्यमावहेथाः। कथमन्यथोपमानमणौ सादृश्यस्य सप्तपदार्थ भिन्नतयाधिक्यमाशङ्कितम्। **तत्र** षट्सु मध्ये। विभाजकधर्मस्यैव षड्त्वेनोपस्थितेः। **जातय** इति। अखण्डा एकैकस्वरूपा अत एव निर्वचनानपेक्षाः। उपाधयः सखण्डाः क्लृप्तानेकपदार्थघटितस्वरूपा वक्ष्यमाणनित्यानेकसमवेतत्वादिनिर्वचनाः।

तात्पर्यटीका

दुर्वचमिति। उपस्थितस्य कस्यचित्तस्याभिधाने तु विभागो न्यूनः स्यादिति भावः। स्वतो दक्षे श्रोतरि प्रतिपाद्यं त्वार्थिकार्थस्य पृथगप्रतिपादनेऽपि न क्षतिरित्याह। **सम्प्रदाय इति**। समाधानव्याजेन भावत्वानुसरणे बीजान्तरमभिधातुमुक्तां विभागन्यूनतामाक्षिपति **यद्यपीति**। अप्युपादायोपादायापि। **सुवचो**ऽन्यूनः सुवचः। ननु नामूढस्येतरोत्पत्तेरित्यस्य मोहरहितस्येत-रानुत्पत्तेरित्यर्थप्रदर्शनमयुक्तं प्रत्ययानामिति व्युत्पत्तेः। किन्तु नामूढस्येत्येकं पदं न शब्दसमासरूपं वाच्यं तत्र च जायमानां किमर्थं वक्रोक्तिरिति शङ्कां प्रकारान्तरेण परिहर्तुकामः प्रकृताशङ्कासमाधानव्याजेनोत्थापयितुं शङ्कते। **अभाव** इति। एतेनाभावत्वस्याखण्डोपाधित्वे **समाधाना**सङ्गतिः। सखण्डोपाधित्वे शिरो वेष्टनेन नासास्पर्शतुल्यतया प्रकृताशङ्कैव नोदेतीति कथमेतद्ग्रन्थोत्थानमिति शङ्का परास्ता।

समवेतत्वादीति। यद्यप्यभावत्वाद्यखण्डोपाधेः स्वरूपसम्बन्धावच्छिन्न-वृत्तित्वस्य सङ्ग्रहायानेकवृत्तित्वेत्येव वक्तुं युक्तं तथापि नानासम्बन्धावच्छिन्नवृत्तित्वस्यैकस्याभावेन विशिष्य निवेशावश्यकत्वे स्थिते समवेतत्वेत्यत्र च समवायो नित्यसम्बन्धत्वेनैव प्रविष्टो न तु स्वसम्बन्धिभिन्नत्वमपि तद्घटकमित्येव तत्सङ्ग्रह इत्यत्र तात्पर्यम्, अन्यथा केषां पदार्थानां कथं विशेषणविशेष्यभावोऽत्र घटक इति जिज्ञासासम्भवादिति भावः। नन्वन्या जातय इति वक्तव्ये किमर्थं विरुद्धलिङ्गादर इत्यतस्त्वा**न्तेति**।

तलन्तनिर्देशे जनतेत्यादाविव पृथिव्येतेत्यर्थान्तरपरतायाश्च भ्रमः प्रसज्येत प्रक्रमश्च भज्येतेत्याशयः। एतेन त्वान्तनिर्देशेऽपि त्वं पृथिवीति भ्रमो दुर्वार इत्यपास्तम्।

तर्कामृतम्

द्रव्याणि नव, पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि। आकाशत्व-कालत्वदिक्त्वानि उपाधयः, अन्यानि जातयः।

तत्र रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्व-द्रवत्वसंस्काराश्चतुर्दश गुणाः पृथिव्याम्[1]। तत्रैव गन्धं विहाय स्नेहं विनियोज्य चतुर्दश गुणाः जलस्य। रूपस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा-परत्वद्रवत्वसंस्कारा एकादशगुणाः तेजसः। स्पर्शसङ्ख्यापरिमाणपृथक्त्व संयोगविभागपरत्वापरत्वसंस्कारा नव गुणाः वायोः। शब्दसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः षड् गुणाः आकाशस्य। सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः पञ्च गुणाः कालदिशोः। सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः चतुर्दश गुणा आत्मनः। सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारा अष्टौ गुणाः मनसः। ज्ञानेच्छाकृतिसङ्ख्यादिपञ्चकमष्टौ गुणाः ईश्वरस्य तथा[2] च–

वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश।
दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च॥

तरङ्गिणी

तत्रेत्यादि स्पष्टम्। **आत्मन इति**। सुखादिसमवायिकारणतावच्छेदकतया

१. पृथिव्याः इति पाठान्तरम्।
२. तथा चोक्तम् इति पाठान्तरम्।

द्रव्यलौकिकमानसजनकतावच्छेदकतया वा सिद्धस्यात्मत्वस्येश्वरेऽसत्त्वमिति द्योतयितुं केवलमात्मन इत्युक्तम्। परन्तु श्रौतात्मव्यवहारस्येश्वरेऽपि तुल्यत्वात्तस्येश्वरसम्बन्धमभिप्रेत्य 'अन्यानि जातय' इति पूर्वग्रन्थो 'जीवात्मा परमात्मा च' इत्युत्तरग्रन्थः सङ्गमनीयः।

चषकम्

अस्मिन्नखण्डोपाधौ मानाभावादित्याशयः। द्रव्यत्वादिजातिप्रणाणं तु प्रपञ्चितं **मुक्तावलीप्रकाशेऽस्मन्मातामहचरणैः**। प्रत्येकं जातिसङ्ख्याने गौरवमभिप्रेत्याहा**काशत्वेति**। त्वान्तक्लीबनिर्देशयोग्यपृथवीत्वादिपरामर्शाया-न्यानीति क्लीबतया निर्देशः।

तत्रेति निर्धारणसप्तमी सर्वत्रानुवर्तते। **तत्रैव** पृथिवीगुणेष्वेव **गन्धं विहाय स्नेहं विनियोज्येति**। सम्पन्ना इति शेषः। अन्यथोत्तरक्रियासापेक्षस्य विनियोज्येति क्त्वाप्रत्ययस्यान्यस्य वाऽसङ्गतेः।

चतुर्दश गुणा आत्मन इति। गोबलीवर्दन्यायेनाग्रे ईश्वरस्य पृथक्कथनात्। न च सुखोत्पत्यनधिकरणे तत्रात्मत्वानङ्गीकारेण यथाश्रुतेऽपि नानुपपत्तिरिति वाच्यम्, तस्माद्वा एतस्मादात्मन इत्यादिश्रुतीनां तत्राप्यात्मत्वग्राहकत्वात्। अन्यथा तस्यैवाधिक्येन द्रव्यविभागासङ्गतेः। आत्मा द्विविधो जीवात्मा परमात्मा चेत्युत्तरग्रन्थासङ्गतेश्च।

तात्पर्यटीका

स्नेहं विनियोज्य गन्धं विहायेति विपरीतयोजनाभिप्रायेणा**न्यस्य वेति। गोबलीवर्दन्यायेनेति**। यदि च स्त्र्येव गोशब्देनोच्यते न तु गां न हन्यादिति निषेधविधिविषयबलीवर्दसाधारणगोत्वजात्यवच्छिन्ना बलीवर्देनापि गोसहस्रादि-सङ्ख्यापूरणप्रसङ्गात्, तत्साधारणव्यवहाराभावाच्च तस्माद्धेनुशब्दवत्गोशब्दोऽपि स्त्रीमात्रपर इत्युच्यते तदा ब्राह्मणवशिष्ठन्यायेनेति तत्र वक्तव्यमिति महाभाष्ये स्थितम्। **आत्मन** इत्येतस्मादित्यस्यैव विशेष्यं न तस्मादित्यस्यापीत्युक्ते

त्वाहान्यथेति। तत्रास्तामात्मपदं ज्ञानवत्परमित्युक्तौ त्वाहात्मा द्विविध इति। तथा भूरि प्रयोगेण तत्राप्यात्मत्वकल्पनैवोचितेति भावः।

तर्कामृतम्

तत्र पृथिवीजलतेजोवायवो द्विविधाः, परमाणवः सावयवाश्च। आकाशकालात्मदिशो विभुरूपाः। मनः परमाणुरूपं। तत्र सावयवा अनित्याः, इतराणि नित्यानि। सावयवा अपि त्रिविधाः शरीरेन्द्रियविषयभेदान्। मानुषं[1] शरीरं पार्थिवं, जलीयं शरीरं वरुणलोके प्रसिद्धम्, तैजसं शरीरमादित्यलोके, वायवीयं शरीरं वायुलोके।

तरङ्गिणी

सावयवाः अवयवसमेताः। **विभुरूपा इति**। कालिकदैशिकपरत्वापरत्वयोः सर्वत्र मूर्ते उत्पत्त्यनुरोधेन कालदिशोः, सर्वत्र शब्दोत्पत्त्याकाशस्य, आत्मनोऽमूर्तत्वेन क्रियासम्भवेन सर्वत्र ज्ञानाद्युत्पत्त्यात्मनश्च विभुत्वमावश्यकम्। **मनः परमाणुरूपमिति**। विभुत्वे क्रियानुत्पत्त्यात्ममनःसंयोगासम्भवेन घटादिवन्मध्यमपरिमाणं वाच्यम्। तथा सति युगपदेव चक्षुर्घ्राणादिसंयोगापत्त्या युगपदेव चाक्षुषघ्राणजादिज्ञानोत्पत्त्यापत्तेः अणुरूपत्वं वाच्यम्। मानुषाणां मानुषादीनाम्। पार्थिवं पृथिवीसमवायिकारणकम्। स्नेहसांसिद्धिकद्रवत्वशीतस्पर्शोष्णस्पर्शाभावात्प्रत्यक्षत्वाद्गन्धवत्त्वाच्च न जलादित्वम्। परन्तु जलतेजोवायूनामुपष्टम्भकाख्यसंयोगादेवोपभोगसमर्थत्वम्। एवमेव जलादिशरीराणां शीतोष्णस्पर्शप्रत्यक्षत्वादिभिस्तत्तद्द्रूपत्वम्। ननु जलादिशरीरं नोपलभ्यत इत्यत आह–जलीयेति। तथा च दूरत्वान्नोपलभ्यते। तत्सत्त्वे प्रमाणमागमादि। जलत्वं शरीरवृत्ति सावयववृत्तित्वे सति द्रव्यविभाजकोपाधित्वात् पृथिवीत्ववदित्यनुमानं च।

---

१. मानुषादीनाम् इति पाठान्तरम्।

चषकम्

सावयावाः साहित्यं हेतुहेतुमद्भावः। **आत्मदिश** इति व्यत्यासोऽक्षरलाघवायाकाशशब्दपूर्वनिपातवन्नानुशासनविरोधः। **विभुरूपा** इति। शब्दसुखयोः स्थूलावच्छेदेन परत्वापरत्वयोः स्वप्रयोजकसंयोगक्रियाश्रयव्यवहित-मूर्तजन्ययोश्चोपलम्भान्यथानुपपत्या तथा कल्पनादित्याशयः। **परमाणुरूपमिति।** विभुत्वे निष्क्रियत्वापत्तेर्मध्यमपरिमाणत्वेऽनित्यत्वापत्तेर्युगपन्नानेन्द्रियसम्बन्ध-सम्भवाज्ज्ञानयौगपद्यापत्तेश्चेति भावः। **तत्रेति** न विभक्तमात्रार्थकम्। तथा सति परमाणुमात्रपरामर्शकस्येतरपदस्य पुल्लिङ्गतापत्तेः। इतरपदञ्च न मनो मात्रार्थकमेकवचनान्ततापत्तेरित्याहेतराणीति।

निरवयवस्यापीन्द्रियत्वविषयत्वाद्योः सम्भवेऽपि भेदो न भवतीति **सावयवा** इत्युक्तम्। **पार्थिवं** पृथिवीसमवायिकारणकम्। न तु जलीयं गन्धोपलम्भात्। क्लेदोपलम्भस्तूपष्टम्भाख्यजलसंयोगाच्छुष्के तदनुपलब्धेः। एवमेव जलीयादीनां पार्थिवभागोपष्टम्भादुपभोगक्षमतावसेया। **प्रसिद्धमित्युत्तर-**त्राप्यनुवर्त्तते। अत्र च सर्वत्र शरीरत्वं चेष्टाश्रयत्वं चेष्टात्वञ्च हिताहितप्राप्तिपरिहारार्थक्रियावृत्तिर्जातिविशेषः। **यत्तु** द्रुततरसमाच्छिन्नपल्ली-पुच्छादावतिव्याप्तिवारणाय द्रव्यान्तरानुपधायकत्वं विशेषणं देयमिति। तत्र अन्त्यावयविशरीरारम्भकचरमावयवसंयोगध्वंसजन्ये तत्रैव खण्डशरीरेऽव्याप्तेः। तत्रत्य तादृशावयवविनाकृताखण्ड चरमावयवरूपशरीरध्वंसस्य तादृशध्वंस-सहकृतसामग्रीसमारब्धखण्डशरीरान्तरोत्पादस्य वाभ्युपगमे पुनरतीव गौरवमुक्तातिव्याप्तितादवस्थ्यञ्च तस्माल्लक्ष्यमेव तदिति मन्तव्यम्।

तात्पर्यटीका

नानुशासनेति। बहुष्वनियमस्योक्तत्वादित्यर्थः। **स्थूलावच्छेदेनेति।** काश्यां द्विपदेवस्थितेऽपि चैत्रेन्तगृहे गङ्गातीरे चैत्र इतिवदात्माणुत्वेऽपि स्थूलदेहादेर्ज्ञानाद्यवच्छेदकत्वसम्भवाद्रूपं विनेव महत्त्वं विनापि ज्ञानाध्यक्षस्योपपादयितुं शक्यत्वेऽपि देहादिकं व्याप्य सुखाद्युपलब्धिर्नोपपादयितुं शक्यत इत्याशयः। **स्वप्रयोजकेति।** परत्वापरत्वजनिकाया

बहूल्पसंयोगरविक्रियाविशिष्टबुद्धेर्विषये परम्परासम्बन्धे घटकेन स्वाश्रयेण व्यवहितयोर्दैशिककालिकपरत्वापरत्वाश्रययोर्मूर्तजन्ययो: पदार्थयोरित्यर्थ: मध्यमपरिमाणं द्व्यणुकादिमितं हस्तादिमितं वेति विकल्प्योभय-साधारणीमनित्यत्वापत्तिं दर्शयित्वा हस्तामितत्वेऽसाधारणं दोषान्तरमाह। **युगपदिति**। अत एव **सम्भवादित्युक्तम्**। **इतराणीतीति**। तथा च तत्रेत्यस्य परमाण्वादिमन: पर्यन्तोक्तद्रव्येषु मध्य इत्यर्थ:।

इन्द्रियत्वविषयत्वाद्योरित्यादिनाचार्यमतसिद्धशरीरत्वपरिग्रह:। जलीयादिश-रीरसाधारण्याय **सर्वत्रेति**। तेन साङ्कर्यान्न सा जातिरिति सूचितम्। ईश्वरभोगानवच्छेदकरामकृष्णादिशरीरसङ्ग्रहायान्यथा तन्निर्वक्ति। **शरीरत्वमिति**। **देयमिति**। पुच्छस्य च महाशरीरारम्भकत्वाद्वारणमिति भाव:। **तत्रैव** पुच्छान्यचरमावयवरूप एव। **ननु** पुच्छसञ्चारिणोऽवयवा: केचित्तादृशचरमावयवप्रविष्टा इति तादृशाखण्डान्त्यावयवादिदं खण्डशरीरं भिन्नमेवेति नाव्याप्तिरत आह **तत्रत्येति**। इदानीन्तनखण्डशरीरप्रविष्टेत्यर्थ:। **तादृशावयवविना कृतेति**। महाशरीरारम्भकपुच्छस्यावयवैर्विना कृतेत्यर्थ:। चरमावयवरूपशरीरध्वंसस्येति। महाशरीरारम्भकपुच्छान्यचरमावयवरूपशरीर-ध्वंसस्येत्यर्थ:। **खण्डशरीरान्तरोत्पादस्य चेति**। महाशरीरध्वंसाद्यत् खण्डशरीरं तस्य महाशरीरारम्भकचरमावयवभिन्नस्यैवोत्पादस्य चेत्यर्थ:। **तादवस्थ्यञ्चेति**। त्वदुक्तदिशैव पुच्छस्याप्यन्त्यावयवित्वादवयवोपचयादिवावयवापचयादपि महाशरीरारम्भकान्त्यावयवयोर्नाशादित्याशय:।

तर्कामृतम्

घ्राणेन्द्रियं पार्थिवम्, रसनेन्द्रियं जलीयम्, चक्षुरिन्द्रियं तैजसम्, त्वगिन्द्रियं वायवीयम्, श्रोत्रेन्द्रियं कर्णशष्कुल्यवच्छिन्ननभ:प्रदेश:, एतानि पञ्च बहिरिन्द्रियाणि। मनोऽन्तरिन्द्रियम्, तेन षडिन्द्रियाणि।

तरङ्गिणी

पार्थिवमिति। गन्धमात्रग्राहकद्रव्यत्वात् वायूपनीतचम्पकभागवदिति शेष:।

गन्धेतरगुणाग्राहकत्वे सति गन्धग्राहकत्वं तदर्थः। गुणपदेन गन्धेतरगन्धत्वादिग्राहकत्वेऽपि न स्वरूपासिद्धिः। सत्यन्तेन मृद्गन्धग्राहकजले न व्यभिचारः। तस्य गन्धेतरस्वीयरूपग्राहकत्वात्। विशेष्यदलेन परमाण्वादौ न व्यभिचारः। द्रव्यत्वेन सन्निकर्षे न व्यभिचारः। **जलीयमिति**। गन्धाग्राहकत्वे सति रसग्राहकद्रव्यत्वात्। जलादिवदिति शेषः। सत्यन्तेन शर्करादौ न व्यभिचारः। शेषं पूर्ववत्। **तैजसमिति**। स्पर्शाव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रभावदिति जलेऽम्लद्रव्ये च व्यभिचारवारणाय सत्यन्तम्। त्रसरेणौ व्यभिचारवारणाय विशेष्ये **परकीयेति**। **वायवीयमिति**। स्पर्शमात्रग्राहकद्रव्यत्वादिति शेषः। **श्रोत्रेन्द्रियमिति**। तद्गुणग्राहकेन्द्रियस्य तद्वत्त्वनियमात् शब्दग्राहकस्य शब्दवत्त्वे तस्याकाशत्वम्। तथा चाकाशस्यैव कर्णशष्कुल्यवच्छिन्नस्य श्रोत्रत्वम्, तदवच्छेदेनैव शब्दग्रहस्यानुभवसिद्धत्वात्। **बहिरिन्द्रियाणीति**। आत्मतन्मात्रवृत्तिजातिबुद्ध्यादिषट्कतन्मात्रवृत्तिजातिभिन्न-पदार्थलौकिकप्रत्यक्षजनकानि। **अन्तरिन्द्रियेति**। पूर्वोक्तभेदप्रतियोगिलौकिक-प्रत्यक्षजनकम्।

चषकम्

अत एव यदि हस्तादौ शरीरव्यवहारो न भवतीत्यत्र **यदि** चेत्युक्तम्। परमाणूनां शरीरत्वाभ्युपगमोऽप्येतदभिप्रायक एव। यद्यपि शरीरस्य सावयवत्वं निरवयवत्वञ्चाचार्यैरनुमन्यते। तथाप्यभ्युपगमवादोऽयमिति मत्वा नासौ भेदः प्रदर्शित इति बोध्यम्। **पार्थिवमिति**। गन्धमात्रगुणग्राहकत्वात्। **जलीयमिति**। रसनामात्रगुणग्राहकत्वात्। **तैजसमिति**। रूपमात्रगुणग्राहकत्वात्। न च पार्थिवत्रसरेणौ व्यभिचारस्तस्य रूपेतरगुणग्राहकत्वे सति स्वीयरूपग्राहकत्वादिति वाच्यम्, तस्य परकीयरूपाग्राहकत्वात्। विम्बाभिमुखदर्पणावष्टब्धतेजो भागारब्धं चक्षुरेव स्थिरगम्भीरजलप्रतिहतमिव विम्बं ग्राहयतीत्यभ्युपगमेन प्रदीपस्य दृष्टान्ततोपपत्तये सत्यन्तेऽपि परकीयत्वावश्यकतया यो दर्पणे व्यभिचारः स न भवति। तदुक्तं शालिकाचार्यैः। चक्षुर्बाह्यालोकाभ्यामारब्धेन चक्षुषा युगपच्छाखाचन्द्रमसोर्ग्रहणमिति। कथमन्यथा मुद्राखचितकाचव्यवहितमूर्तिग्रहणम्।

छाययानुमानेनेति तु न साम्प्रतम्। पश्यामीत्यनुव्यवसायानुपपत्तेरित्यपि केचित्। **वायवीयमिति**। स्पर्शमात्रगुणग्राहकत्वात्। **श्रोत्रेन्द्रियमिति**। रूपादिषु तद्गुणग्राहकस्य तद्वत्त्वेऽऽकाशत्वसिद्धौ दूरशब्दसाक्षात्कारभिया श्रोत्रस्य कर्णशष्कुल्यवच्छेदिका कल्प्यत इति भावः। **बहिरिन्द्रियाणीति**। बुद्ध्यादि लौकिकसाक्षात्काराजनकानीन्द्रियाणीत्यर्थः। **अन्तरिति**। तज्जनकमित्यर्थः। **षडिन्द्रियाणीति**। तत्त्वञ्च ज्ञानकारणमनःसंयोगाश्रयत्वम्। वक्ष्यमाणरीत्येन्द्रियमनो-योगस्य ज्ञानकारणत्वात् सर्वत्र लक्षणसमन्वयः। मनःसंयोगाश्रयदिगादिव्यावृत्तये **ज्ञानकारणेति**। दिक्कालचक्षुर्योगस्य सन्निकर्षघटकतया दिक्कालो वा न रूपवानिति प्रत्यक्षकारणस्याश्रयौ तौ वारयितुं मनः पदम्। न चात्मन्यतिव्याप्तिरात्ममनो योगस्य वक्ष्यमाणरीत्या ज्ञानकारणत्वादिति वाच्यम्, तद्भिन्नत्वे सतीति विशेषणात्। आत्मत्वजात्यनङ्गीकारे तु ज्ञानानाश्रयत्वमेवोच्यताम्।

तात्पर्यटीका

एतदभिप्रायक एव शरीरलक्षणेऽन्त्यावयवित्वाप्रवेशाभिप्रायक एव। **अभ्युपगमवादोऽयमिति।** तथा च कार्यत्वावच्छिन्नं प्रति क्रियात्वेनैव हेतुत्वमभ्युपेयते न तु चेष्टात्वेना पीतीश्वरस्य शरीराभ्युपगमो व्यर्थ इत्याशयः। यद्यपि काचाभिहतसौरालोकवच्चक्षुर्मात्रस्य परावृत्तिर्वक्तुं शक्या तथापि प्रसरणशीलयोः सजातीयद्रव्ययोर्गाङ्गयामुनजलयोरिव बलवत्ता दुर्बलस्य परावृत्तिर्दृष्टेति तथा सामग्रीसम्भृतये मतान्तरसिद्धार्थानुवादाय चक्षुर्विशिनष्टि। बिम्बा भिमुखेत्यादि। जलान्तर्गतवस्तु ग्रहणे तु न चक्षुरन्तरापेक्षा। जलं निर्भिद्यास्यैव चक्षुषस्तद्वस्तुसंयोगसम्भवान्मुखग्राहकाभिमुख्यं तु स्वच्छे जलेऽभिघातादेवोपपन्नमिति मतान्तरदोषेणेदमपि दुष्टमिति दर्शयितुं स्थिरगम्भीरेति दृष्टान्तोपादानम्। **इत्यभ्युपगमेनेति** स न भवतीत्यत्र हेतुः। **दर्पणे व्यभिचार** इति। न च विम्बसङ्ख्याग्राहकतयैव न व्यभिचार इति वाच्यम्, गुणपदेन बाह्यैकैकेन्द्रियग्राह्यगुणविवक्षणादन्यथा स्वरूपासिद्धेर्दुर्वारत्वात्।

इत्यपि केचिदित्यनेनास्वरसो दर्शितः। स च चक्षुरन्तरारम्भे मानाभावः। युगपच्छाखाचन्द्रमसोर्ग्रहणं चासिद्धम्। मूर्तिं पश्यामीत्यनुव्यवसायस्तु

दोषमाहात्म्यादप्युपपन्न इत्यादिः। घटो ज्ञात इत्युपनायकज्ञानद्वारा मनः सन्निकर्षस्यापि घटीयलौकिकविषयताप्रयोजकत्वमविकलं बहिरर्थलौकिक-विषयतामात्रप्रयोजकत्वोक्तौ मात्रार्थघटकविशेष्यभागवैयर्थ्यादाह। **बुद्ध्यादीति।** न च सूक्ष्मालोकवारणाय विशेष्यदलमर्थवदिति वाच्यम्, आवश्यकेन्द्रियत्वनिवेशेनैव सर्वसामञ्जस्यादित्याह**इन्द्रियाणीत्यर्थ इति।** **वक्ष्यमाणरीत्येति।** ज्ञानयौगपद्यवारणार्थमुक्तया रीत्येत्यर्थः। घटकतया स्वाविषयकप्रतीत्यविषयतत्कतया वक्ष्यमाणरीत्येन्द्रियार्थसन्निकर्षविधया। आत्मत्वजात्यनङ्गीकारे त्विति। इदञ्च ज्ञानस्पर्शसाधारणतया गुणत्वस्य वक्ष्यमाणे निवेशे सङ्ग्राहकलाघवस्योत्थापकतयोक्तम्। तुना त्वनात्मत्वे उद्भूतस्पर्शानाश्रयत्वं च सतीत्यादिकं लक्षणान्तरमविकलमिति सूचितम्।

तर्कामृतम्

विषयाश्च शब्दादिरूपेण प्रसिद्धाः। आत्मा द्विविधः, जीवात्मा परमात्मा च। तत्र जीवात्मानः प्रतिशरीरं भिन्नाः बन्धमोक्षयोग्याः। परमात्मा ईश्वरः।

तरङ्गिणी

प्रतिशरीरमिति। तत्तच्छरीरावच्छेदेन सुखदुःखाद्युपभोगिनः। **बन्धमोक्षयोग्या इति।** बन्धोऽविद्या, मोक्षस्तन्नाशः। जीवानामभेदे एककालावच्छेदेनैकत्र प्रतियोगितन्नाशयोरसम्भवात्। अत एव ईश्वरादपि भेद इति।

चषकम्

न चैवमपि मनः क्रियाजन्यात्ममनो योगाभिन्नदिङ्मनोयोगा-श्रयदिगाद्यतिव्याप्तितादवस्थ्यमिति वाच्यम्, परात्मन इव दिगादिभ्योऽपि व्यावृत्तस्यैव मनोयोगस्य तथात्वात्। चर्ममनोयोगत्वादिना ज्ञानसामान्यहेतुत्वे तु चर्मादौ स्वप्नकारणस्वप्नवहनाडीमनोयोगाश्रयनाडीविशेषे चातिव्याप्तिरिति

स्पर्शानाश्रयत्वमपि। एवञ्च त्वगादिसङ्ग्रहायोद्भूतत्वमावश्यकम्। तत्र स्पर्शत्वस्थाने लाघवेन गुणत्वनिवेशे प्रत्यक्षानुत्पत्तिप्रयोजक-नीलपीतत्वादिव्याप्यनानानुद्भूतत्वाभावकूटरूपप्रत्यक्षोपयोग्यनुगतोद्भूतत्वाश्रयसं-योगवत्तयासम्भववारणाय **विशेषेति**। इत्थञ्च श्रोत्रसङ्ग्रहाय **शब्देतरेति**। तदिदमुक्तं शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सतीति। **विषयाश्चेति**। तत्त्वञ्चोपभोगसाधनत्वम्। यच्च कार्यजातं यददृष्टाधीनं तत्तदुपभोगं साक्षात् परम्परया वा जनयत्येवेति न क्वाप्यव्याप्तिः। तदात्मीयोपभोगं प्रति तददृष्टस्य द्व्यणुकादिकार्यपरम्परायाः प्रत्यासत्तितया तथा तद्धेतुत्वस्य तस्यामविशेषात्।

अत एव प्रसिद्धा इत्युक्तम्। आकाशकालदिशां विभागाभावादात्मानं विभजते। **आत्मेति**। ननु जीवात्मापरमात्मा चेति विभागोऽसङ्गतस्तत्त्वमसीति श्रुत्यात्मैक्यस्यैव प्रतिपादनादित्यत आह। **प्रतिशरीरं भिन्ना** इति। शरीरपरिचितभेदवन्त इत्यर्थः। शरीरं प्रति भिन्ना इति योजनया शरीरान्विताधेयत्वरूपद्वितीयार्थस्य कर्मप्रवचनीयार्थे परिचायकत्वेऽन्वय-बलादेतच्छरीरावच्छिन्नभोगव्यधिकरणतच्छरीरावच्छिन्नभोगका इत्यर्थः पर्यवस्यत्येतेन भेदस्यौपाधिकत्वशङ्काऽपाकृता। न त्वव्ययीभाव-समासाश्रयणेनैतच्छरीरावच्छिन्नभोगव्यधिकरणैतद्भिन्नयावच्छरीरावच्छिन्न-भोगका इत्यर्थः। तेन पर पुरप्रवेशे द्वयोरेकत्र भोगेऽपि कायव्यूहे चैकस्यानेकत्र भोगेऽपि च न क्षतिः एतेनाप्यात्मनः परिच्छिन्नत्वशङ्का निराकृता। शरीरपरिच्छन्ने तस्मिन्ननेकशरीरावच्छिन्नभोगानुपपत्तेरवच्छेद्याधिकरणसम्बद्धस्यैवावच्छेदकत्वनियमात्।

तत्र हेतुगर्भं विशेषणमाह। **बन्धमोक्षयोग्याः। बन्धमोक्षेति**। योग्याज्ञानाज्ञानादिविरुद्धधर्मधर्मिण इति यावदन्यथा वैषयिकसुखदुःख-योरवच्छेदकभेदेनैकत्रसम्भवेप्यविद्यातद्ध्वंसयोर्युगपदवस्थानासम्भवेन कश्चिद्बद्धः कश्चिन्मुक्त इति व्यवस्थाया असङ्गतेः। इत्थञ्चेश्वरादपि जीवानां भेदः सिद्ध्यतीश्वरेऽविद्याद्यसंस्पर्शादित्याह। **परमात्मेश्वरः। परमात्मेति**। ईश्वरो नित्यज्ञानवान्। तथा च तत्त्वमसीति श्रुतिस्तु सर्व एवात्मानः समर्पिता इति श्रुत्यनुरोधेनाप्यभेदभावनाविधिपरेत्याशयः।

तात्पर्यटीका

आत्मन इवेति दृष्टान्तोपन्यासेनैकोपायेनोभयोर्वारणमिति ध्वनितम्। तथा त्वुपधायकतया विजातीयात्ममनो योगं प्रति स्वपूर्वक्षणोत्पन्नैतदात्ममनोभिन्नावृत्तितत्तद्द्वित्वावच्छिन्नतदपुलक्षितमेव वा तादात्म्येन हेतुरिति नातिप्रसङ्ग इति। **लाघवेन** सत्यन्तद्वयाप्रवेशे लाघवेन। इत्थञ्च विशेषगुणत्वप्रवेशे च **न क्वापीति।** नचोत्पन्नविनष्टघटेऽव्याप्तिस्तस्यापि स्वारम्भकसंयोगतन्नाशसाध्ययोः कपालद्वयान्तरालिकसूक्ष्मकीटमरणदुःखजीवनसुखयोः सम्पादनद्वारा कीटभोगसम्पादकत्वात्तादृशे घटे मानाभावाच्च। जातपदार्थं स्पष्टयति **तदात्मीयोपभोगं प्रतीति। परम्परायाः** परम्पराघटककार्याभिमुख्यसम्पादकप्रयत्नपर्यन्तस्य। तथा तद्धेतुत्वस्य तया प्रत्यासत्याऽदृष्टहेतुत्वस्य। **तस्यां** परम्परायाम् अविशेषादिति। अन्यथा प्रत्यक्षे इन्द्रियसन्निकर्षहेतुतापि न स्यादित्यन्यत्र विस्तरः।

अत एव द्व्यणुकाद्युपभोगसाधनतायाः शय्याद्युपभोगसाधनताग्रहाधीनग्रहकत्वादेव। प्रसिद्धा इत्युक्तमिति। शय्यायामुपभोगसाधनत्वस्य सुग्रहत्वेन तद्वारकतदारम्भकद्व्यणुकादिकार्यपरम्परायामपि तस्य सुग्रहत्वमिति भावः। एतच्छरीरावच्छिन्नेत्यादि। एतन्मुखमालिन्यव्यधिकरणतन्मुखप्रसादहेत्वविघातध्वंसरूपविरुद्धहेत्वोः पक्षधर्मताबुद्ध्यनुगुणतयेष्टं साध्यं निर्दिष्टम् **एतेन** तच्छरीरावच्छिन्नभोगे एतच्छरीरावच्छिन्नभोगवैयधिकरण्यपर्यन्तसाधनेन। एतन्निष्ठभोगावच्छेदकमेतद्भिन्ननिष्ठभोगानवच्छेदकमिति नियमं दूषयति। **परपुरप्रवेश** इति। एतन्निष्ठभोगे विभिन्नशरीरावच्छिन्नत्वनियमं दूषयति। **कायव्यूहे** चेति। **एतेन** विभिन्नशरीरे एककालीनत्वविशेषणघटितोऽपि प्रत्युक्तः। एतेनापि वक्ष्यमाणदोषेणापि। अपिनानित्यत्वापत्यापीत्युक्तं भवति।

योग्यतां दर्शयति। **ज्ञानाज्ञानेति।** हेतुरस्तु साध्यं मास्त्वित्युक्ते त्वाहान्**यथेति। युगपदिति।** एकत्रेत्युनवर्तते। मास्तु हेतुरपीत्युक्तावुक्तं **कश्चिदबद्ध** इति। **इत्थञ्च** जीवानां परस्परं भेदसिद्धौ च। **अविद्यादीति।** विरुद्धकालानवच्छिन्नव्याप्तिकेन लिङ्गेन स्वसमानकालिकं साध्यं सिद्ध्यतीत्यविद्यासमानकालिको भेदो न तद्ध्वंसकालिक इति ब्रह्मविद्ब्रह्मैव

भवतीति श्रुतिसिद्धमतपरिग्रहेऽप्यपरितुष्यन्ध्वंसेनापि समानकालिकं साध्यं सिद्ध्यत्सार्वदिकं सिद्ध्यतीत्याशये**नादीति**। परमपदप्रतिपाद्यं जीवव्यावृत्तमुत्कर्षं दर्शयितुमीश्वरपदं व्याचष्टे। **नित्यज्ञानवानिति। श्रुत्यनुरोधेनापीति। अपि**नाविरुद्धधर्माध्यासपरिग्रहः। प्रबलोक्तश्रुत्यास्यापि प्राबल्यादिति भावः।

तर्कामृतम्

अथ प्रत्यक्षाप्रत्यक्षद्रव्याणि। परमाणुद्व्यणुके अप्रत्यक्षे। महदुद्भूतरूपवत्त्वं[1] यत्र, तानि पृथिवीजलतेजांसि प्रत्यक्षाणि, आत्मा च प्रत्यक्षः। वाय्वाकाशकालदिङ्मनांसि तु अप्रत्यक्षाणि।

तरङ्गिणी

प्रत्यक्षाणीति। बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयाणि। **आत्मा च प्रत्यक्ष इति**। मानसप्रत्यक्षनिरूपितलौकिकविषयाताश्रय इत्यर्थः।

चषकम्

परमाणवः सावयवाश्चेति प्रक्रमात् प्रावृत्तिकं क्रममनुसृत्याह। **अथाप्रत्यक्षेत्यादि**। उच्यन्त इति शेषः। **अप्रत्यक्ष इति**। महत्वाभावादिति भावः। नन्वेवं महतो वायोरपि चाक्षुषप्रत्यक्षापत्तिरत आह। **उद्भूतेति**।

नन्वेवमात्मप्रत्यक्षानुपपत्तिरित्याशङ्क्य बहिर्द्रव्यप्रत्यक्षे ह्येतदपेक्षा यदुक्तवान् पृथवीजलतेजांसीति। आत्मप्रत्यक्षे त्वन्यैव परात्मव्यावृत्तविजातीयमनःसंयोगरूपा सामग्री तन्त्रमित्यभिप्रेत्याह। **आत्मा चेति**। ननु बहिर्द्रव्यप्रत्यक्षसामान्ये रूपस्य कारणत्वे वायोः किमपि प्रत्यक्षं

---

१. महदिति पाठः नास्ति।

न स्यादिति तत्रेष्टापत्तिं दर्शयति। **वाय्वाकाशेति**। न चैवं वायुं स्पृशामीति प्रत्ययानुपपत्तिः पुष्पं जिघ्रामीत्यत्रेव गुणोपादानस्यैव तद्गोचरत्वात्। न चैवं धात्वर्थैकदेशे गुणेऽन्वितमाधेयत्वं द्वितीयार्थो वाच्यस्तथा च सविषयार्थबोधक धातुसमभिव्याहृतकर्मप्रत्यये विषयत्वार्थकत्वनियमभङ्गप्रसङ्ग इति वाच्यम्। गुणनिरूपितलौकिकविषयिताशालिप्रत्यक्षात्मकस्य धात्वर्थस्यैकदेशे विषयितायां निरूपितत्वसम्बन्धेन प्रकृत्यर्थान्वितस्याधेयत्वीयसासंर्गिकविषयितानिरूपित-प्रकारित्वस्य द्वितीयार्थस्य निरूपितत्वसम्बन्धेनान्वयोपगमेन सर्वसामञ्जस्यात्।

तात्पर्यटीका

एवं परमाणुद्व्यणुकयोः प्रत्यक्षवारणाय प्रत्यक्षसामान्ये महत्त्वस्य प्रयोजकत्वाभ्युपगमे। अपिर्भिन्नक्रमः। प्रत्यक्षसामान्यापत्ताविषटापत्तिरपि केषाञ्चित्सम्भवतीत्यतश्चाक्षुषेत्युक्तं महत्त्वावच्छिन्नचक्षुः संयोगस्य जन्यतावच्छेदककोटौ चाक्षुषत्वस्य घटनादिति भावः।

एवं प्रत्यक्षसामान्ये उद्भूतरूपस्य प्रयोजकत्वाङ्गीकारे। **एवं** वायोरतीन्द्रियत्वे। **गुणोपादानस्यैवेति**। विषयानुपहितमुपादानमात्रं नार्थः। किन्तु तत्र गन्धेनेवात्र स्पर्शेनोपहितं तत्तथेति विवेकः। एवं गुणस्य धात्वर्थतावच्छेदककोटौ निवेशे। **आधेयत्वमिति**। धात्वर्थप्रत्यक्षान्वितविषयत्वस्य द्वितीयार्थत्वे तु समवायादिविषयकत्वस्य तत्र सत्वात् समवायं जिघ्रामीति प्रयोगापत्तेरिति भावः।

पुष्पे गन्ध इति गन्धांशेप्यलौकिकप्रत्यक्षोत्तरं तथा प्रयोगवारणाय **लौकिकेति** . . . यस्यस्वयोग्यमुख्यविशेष्यकप्रतीतिजनकत्वमभिप्रेत्याह। **आधेयत्वीयेति**। समवायसम्बन्धावच्छिन्नाधेयत्वनिरूपितेत्यर्थः। तेनेदानीं गन्ध इति प्रत्यक्षोत्तरं कालं जिघ्रतीति प्रयोगवारणम्। **सर्वसामञ्जस्यादिति**। तथा च पुष्पं जिघ्रामीत्यतः पुष्पनिरूपिताधेयत्वीयसांसर्गिक-विषयतानिरूपितप्रकारिता तन्निरूपिता या गन्धनिरूपितलौकिकविषयिता तच्छालिप्रत्यक्षाश्रयोहमिति शाब्दबोध इत्याशयः।

तर्कामृतम्

बहिर्द्रव्यप्रत्यक्षं प्रति महत्त्वे सत्युद्भूतरूपवत्त्वं प्रयोजकम्।

अथ द्रव्योत्पत्तिप्रक्रिया–तत्रोत्पत्तिः कारणवतः[१], अनन्यथासिद्धनियत-पूर्ववर्त्ति कारणम्।

तरङ्गिणी

बहिरिति। बहिष्ट्वमात्मभिन्नत्वम्। **महत्त्वे सतीति**। महत्त्वं परमाणुद्व्यणुकवारणाय। उद्भूतत्वं घ्राणादिवारणाय। रूपवत्त्वं वायुवारणाय। कार्यतावच्छेदकसम्बन्धो लौकिकविषयता कारणतावच्छेदकः समवायः। **अनन्यथासिद्धेति**। स्वतन्त्रान्वयव्यतिरेकशालियद्घटितरूपेण यस्य यत्कार्यनियतपूर्ववर्त्तित्वं तत्कार्ये तेन तस्यान्यथासिद्धत्वमेकम्। यथा स्वतन्त्रान्वयव्यतिरेकवता दण्डेन कुलालेन घटितं दण्डरूपत्वं दण्डत्वत्वं कुलालपितृत्वं चेति तेन रूपेण तेषां तत्कार्ये दण्डादिनान्यथासिद्धत्वम्। कपालघटितरूपेण कपालरूपस्य चक्षुर्घटितेन चक्षुःसंयोगत्वादिनान्यथासिद्धिवारणाय स्वतन्त्रान्वयव्यतिरेकशालीति यत्पदार्थ-विशेषणम्। तदर्थश्च यस्यान्यथासिद्धत्वमभिमतं तद्वद्वारकान्वयादिमत्त्वम्। कपालचक्षुरादेस्तु रूपसंयोगघटितावेवान्वयव्यतिरेकाविति तद्व्युदासः। अन्यत्पूर्ववर्तित्वघटितरूपेण यस्य यत्कार्यं प्रति नियतपूर्ववर्त्तित्वं गृह्यते तत्कार्ये तद्रूपेण तदन्यथासिद्धं च द्वितीयम्। यथा घटादौ शब्दसमवायिकारणं गगनम्। अवश्यक्लृप्तभिन्नेन येन रूपेण यं प्रतीत्यादि तृतीयम्। तेन कपालस्य द्रव्यत्वादिना रूपत्वादिना च रूपादेः शब्दाश्रयत्वादिना चाकाशादेरन्यथासिद्धिः। अवश्यक्लृप्तत्वं च लाधवादिना। तच्चानेकविधम्। द्रव्यत्वादिना तत्त्वेऽनेकेषु कारणत्वसम्बन्धकल्पनागौरवम्। एवं चाक्षुषेऽनेकद्रव्यत्वेऽनेकपदार्थघटितत्वेनान्यथासिद्धत्वम्। महत्त्वे तदभावः।

---

१. कारणवताम् इति पाठान्तरम्।

एवं गन्धं प्रति रसप्रागभावः। गन्धरूपप्रतियोगिन उपस्थितत्वाद्र-सप्रागभावोऽन्यथासिद्ध इत्यादि बहुतरं स्वयमूह्यम्।

चषकम्

अन्यथा राजाघ्रातगन्धस्याननवृत्तित्वबाधा**त्तदाननं मृत्सुरभिक्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययावि**ति प्रयोगासङ्गतेः। इत्थञ्च चम्पकगन्धस्य गन्धवहवृत्तित्वेन ग्रहे चम्पकं जिघ्रतीति प्रयोगो नेष्यत एव। अत एवाघ्रायिवान् गन्धवहः सुगन्ध इति सङ्गच्छते। **एतेन** विषयानुपहितसविषयार्थकधातुयोग एव विषयत्वार्थकत्वं द्वितीयाया उपेयते इत्युक्तावपि न निस्तारः स्यादित्यभिप्रेत्योपसंहरिति। **बहिरिति**। आत्मभिन्नेत्यर्थः। पिशाचशरीरावष्टम्भकपार्थिवादिभागप्रत्यक्षवारणायोद्भूतेति। अत्र लौकिकविषयता सम्बन्धः कार्यतावच्छेदकः। कारणतावच्छेदकस्तु समवायः स्फुट एव। **प्रयोजक**मित्युक्तिस्त्वनयोः सन्निकर्षघटकतामात्रं न स्वतन्त्र-हेतुतेत्यर्थस्फोरणायेत्यग्रे व्यक्तम्। **इत्थञ्चोन्मी**लितनयनस्याधिकरणतयेह पक्षीति। चाक्षुपीयलौकिकविषयतापि प्रभायाः सङ्गच्छत इति बोध्यम्।

उत्पत्तिराद्यक्षणसम्बन्धः। **तदुक्तम्**। अध्वस्तक्षणयोगस्य क्षणयोगो जनिर्मतेति। **कारणवतामिति**। अयं भावः। अपूर्वसम्बन्धस्यापूर्वत्वरक्षायै पूर्वपूर्वासम्बद्धं किञ्चिन्नियामकं वाच्यम्। तस्य देशान्तरसाधारण्ये कार्यस्य क्वाचित्कत्वानुपपत्तिरिति सम्बन्धविशेषेण तदन्वयव्यतिरेकाभ्यां तस्य हेतुत्वं कल्प्यम् तत्र कार्यान्वये यावतां व्यतिरेको दृष्टस्तावदन्यथासिद्धं यद्व्यतिरेके कदापि कार्यं नैव पश्यति तदावश्यकमिति गृह्णातीति। **अनन्यथासिद्धेति।** अन्यथासिद्धव्यवहाराविषयेत्यर्थः। तथा व्यवहारविषयो द्वेधा नियतोऽनियतश्च तयोरनियतानां बहूनां नियतपदेनैकेनैव वारणं सम्भवति न तावतां भेदा निवेशनीयाः किन्तु नियतानामेव ते चान्यत्र प्रपञ्चिता दण्डत्वादयश्चत्वार एवेति तद्भेदचतुष्टयवाननन्यथासिद्धपदार्थोऽनियतो रासभोऽपीति तद्वारणाय नियतेति।

तात्पर्यटीका

अन्यथाऽऽधेयत्वस्य द्वितीयार्थत्वे। नेष्यत एवेति। तत्र गन्धविशेष्यितायां चम्पकीयप्रकारतानिरूपितत्वस्य बाधितत्वादिति भावः **अत** एव तादृश प्रत्यक्षीयलौकिकविशेष्यितानिरूपकगन्धाश्रयश्चम्पक इति बोधस्य तत्रानभिप्रेतत्वादेव गन्धवह इति। अन्यथा चम्पक इत्येवावक्ष्यत्। सङ्गच्छत इति। अत्र चोक्तविशेषिताशालिप्रत्यक्षस्य धात्वर्थस्य निरूपितत्वेनाख्यातार्थे आधेयतासम्बन्धावच्छिन्नप्रकारत्वेऽन्वयस्तस्याश्रयतया गन्धवह इति निरुक्त प्रत्यक्षनिरूपितोक्त प्रकारताश्रयो गन्धवह इत्येव बोध इति भावः। एतेन विषयोपहितसविषयकार्थकधातुसमभिव्याहृतकर्मप्रत्ययस्यापि विषयत्वार्थकत्वस्योक्तत्वेन। गोलकातिरिक्तचक्षुरभावेऽप्युद्भूतपदप्रयोजनं दर्शयति। **पिशाचेति** आस्तां महत्त्वोद्भूतरूपयोः स्वतन्त्रहेतुतैव कुतः सन्निकर्षघटकतोपेयत इत्यत आहाग्रे व्यक्तमिति। तथा च तयोः सन्निकर्षघटकत्वानङ्गीकारे परमाण्वादौ पृथ्वीत्वादेः प्रत्यक्षत्वापत्तिवारणं न स्यादित्यस्य वक्ष्यमाणत्वादिति भावः। उद्भूतस्पर्श एव बहिर्द्रव्यप्रत्यक्षसामान्ये हेतुः प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरित्येव किं न स्यादत आहेत्थञ्चेति। उन्मीलितनयनस्येत्यनेन प्रभोपनामकविशिष्टज्ञानाभावो ज्ञाने निर्विकल्पकपूर्वकविशिष्टचाक्षुषत्वञ्च सूचितम्।

तदुक्तमिति। ननु स्थूलकालसाधारणस्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धस्यैवोत्पत्तित्वसम्भवे क्षणपदद्वयमप्यनुपादेयमिति चेन्नोभयत्र कालिकसम्बन्धलाभायैव तदुपादनात्। अन्यथाद्यक्षणात्मकज्ञाननिष्ठविषयिता सम्बन्धेऽतिव्याप्त्यापत्तेर्घटविषयकज्ञानध्वंसानधिकरणसमयाप्रसिद्ध्यासम्भवापत्तेर्वा कपालद्वयसंयोगसमकालोत्पन्नकालकपालसंयोगव्यवच्छेदायाह। तस्य देशान्तरसाधरण्य इति। कपालद्वयसंयोगस्यापि सम्बन्धान्तरेणातिप्रसक्तत्वादाह **सम्बन्धविशेषेणेति।** दण्डत्वादेरन्यथासिद्धस्य प्रातिस्विकरूपेण भेदनिवंशेऽध्यक्षेऽपि तद्धेतुता न स्यादत आहान्यथा सिद्धव्यवहारेति नियतपदप्रयोजनं वक्तुं भूमिकामारचयति। **तथा व्यवहार विषय इति। नियतानामेवेति। एतेन** यद्घटनियतपूर्ववर्ती रासभस्तत्कारणतायां तद्भेदोऽपि प्रवेशनीय इति सूचितम्।

तर्कामृतम्

तत्त्वं कारणत्वम्। त्रिविधानि कारणानि- समवायिकारणासमवायिकारणनिमित्तकारणानि। यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्, यथा परमाणुः द्व्यणुकस्य, कपालं घटस्य।

तरङ्गिणी

घटत्वावच्छिन्ने तत्तद्दण्डत्वादिना संयोगत्वाद्यवच्छिन्नं प्रति घटत्वादिना कारणत्ववारणाय **नियतपूर्ववर्ति इति**। तथा च अन्यथासिद्धिघटकीभूततत्तद्धर्मभिन्नतत्कार्यतावच्छेदकावच्छिन्ननियतपूर्ववर्तितावच्छेदकधर्म एव तत्कारणतेति पर्यवसितम्। नियतपूर्ववर्तितावच्छेदकत्वं च तत्कार्यतावच्छेदकसम्बन्धेन तत्कार्यतावच्छेदकावच्छिन्नाऽधिकरणे तत्कार्याव्यवहितपूर्वकालावच्छेदेन तत्कारणतावच्छेदकसम्बधेन प्रतियोगिव्यधिकरणो दैशिकविशेषणतया वर्तमानो योऽभावस्तत्प्रतियोगितानवच्छेदकत्वम्। एवं च स्मृत्यव्यवहितपूर्वक्षणे स्मृत्यधिकरणे ज्ञानाभावसत्त्वेऽपि संस्कारसम्बन्धेन प्रतियोगिसामानाधिकरण्यान्न स्मरणादौ ज्ञानादेः कारणत्वक्षतिः। कार्यकालवर्तितया कारणतास्थले तु कार्यकाले तत्पूर्वकाले चेति वाच्यमिति सङ्क्षेपः।

चषकम्

ननु नियतत्वं तत्समानाधिकरणाभावाप्रतियोगित्वं न दण्डादौ भ्रम्यादिरूपव्यापारासत्त्वदशायां कपालादौ तदभावसत्त्वाद्यत्किञ्चित्सम्बन्धेन प्रतियोगिवैयधिकरण्यविशेषणेऽपि यथाश्रुतस्य विशिष्य सम्बन्धनिवेशे च यथाश्रुते स्वरूपसम्बन्धेन रासभादेरवृत्तितया तेन तदभावस्य प्रतियोगिवैयधिकरण्याप्रसिद्धेस्तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावान्तराप्रतियोगित्वस्य दण्ड इव रासभेऽपि प्रसक्त्या परिष्कृतस्य तेन सम्बन्धेन स्वप्रतियोगिसमानाधिकरणं यद्यत्तद्भिन्नत्वरूपस्य च रासभाभाव इव दण्डाभावेऽपि सत्त्वेन तद्वारणसम्भवादित्याशङ्क्य पूर्ववृत्तितानियामकसम्बन्धेन प्रतियोगिवैयधिकरण्यं

वाच्यमिति न कोऽपि दोष इत्याशयेनोक्तं **पूर्ववृत्तीति**। अव्यवहितेत्यादिः। व्यवहितस्य स्वयमनुपादेयस्यापि सम्भवेनेदानीन्तनधूमार्थिनो वह्नाविदानीन्तन-प्रवृत्तेरन्यथानुपपत्या कारणत्वस्य तद्व्यावृत्तत्वावश्यम्भावादत एव बलवता प्रमाणेनागमेन बोधिताया यागस्य व्यवहितस्वर्गकारणताया उपपत्तयेऽपूर्वकल्पना-प्रयासोऽपि ग्रन्थकृतां साधु सङ्गच्छते। यदुक्तम्-चिरध्वस्तं फलायालं न कर्मातिशयं विनेति। वक्ष्यते चाधिकमुपरिष्टात्।

यत्तु कार्यान्वयव्यतिरेकपूर्वकालीनान्वयव्यतिरेकशालिकारणमिति। **तन्न।** घटपूर्वं दण्डसत्त्वेऽपि घटाभावपूर्वं दण्डाभावानुपलम्भाद्घटध्वंसोत्तरमपि। दण्डोपलम्भात्। नच घटप्रागभावकालपूर्वं दण्डप्रागभावोऽपि कथमन्यथा दण्डाद्घट इतिवद्दण्डाभावाद्घटाभाव इति प्रत्यय इति वाच्यम्। तथा सति प्रागभावासिद्ध्या नित्यानामतत्त्वापत्तेः। कारणस्वरूपं निरुच्य तल्लक्षयति। **तत्त्वमिति**। **ननु** कारणत्वस्य पूर्ववृत्तित्वरूपत्वे प्रतिबन्धकाभावनिष्ठ-पूर्ववृत्तित्व- सामान्यावच्छेदकतायास्तद्व्यक्तित्वेऽपि सम्भवात्तस्य तेन रूपेण हेतुतापत्तिः। न चेष्टापत्तिराकाशाभावाधिकरणकप्रतिबन्धकाभावस्य तद्रूपस्य प्रतिबन्धकसत्त्वेऽपि सत्वेन कार्यापत्तेरिति **चेन्नात** एवान्यथासिद्धि-निरूपकतानवच्छेदकधर्मस्यैव यथोक्तस्य कारणतावच्छेदकत्वाङ्गीकारात्। लक्षणस्याव्याप्त्यतिव्याप्तिशङ्कावारणाय तद्विभजते। **त्रिविधानीति**। तत्राद्ययोरव्यवहितपूर्ववृत्तित्वं स्वत एवान्त्यस्य तु स्वतो व्यापारतो वेति विशेषः। इतिशब्दः प्रकारे एवमग्रेऽपि। **यत्समवेतमिति**। यस्मिन् समवेतमित्यर्थः। तथा च समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्य-सम्बन्धावच्छिन्न- कारणत्वं समवायिकारणत्वमित्युक्तं भवति। परमाणुद्व्यणुकयोर्विवादादुक्तम्। **कपालं घटस्येति**। एवमग्रेऽपि।

तात्पर्यटीका

यथाश्रुतस्येति रासभाभाव इव दण्डाभावेऽपि सत्त्वेनेत्यग्रिमेणान्वेति। तथा च प्रतियोगिवैयधिकरण्यमनर्थकमिति भावः। विशिष्य सम्बन्धनिवेशे श्रृङ्गग्राहिकया कस्यचिदेव सम्बन्धस्य निवेशे यथाश्रुतेऽनुयोगिनि स्वत्वप्रवेशे

स्वरूप सम्बन्धेनेति। इदमुपलक्षणम्। येन सम्बन्धेन यो न वर्तते तेन तदभावस्य प्रतियोगिवैयधिकरण्याप्रसिद्धेस्तत्तत्कार्यं प्रति तेषां नियतत्वं स्यादित्यपि बोध्यम्। अत एव विशिष्य सम्बन्धनिवेश इति सामान्यत एवोक्तम्। तृतीयान्तं प्रसक्त्येति तद्वारणासम्भवादित्यनेनान्वयि। तथा च नियतपदमनर्थकमिति भावः। यद्वा परिष्कारान्वय्येव तत्। **पूर्ववृत्तितानियामकेति**। तथा च कार्याधिकरणे तत्कपाले मृत्तिकाहरणद्वारापि न रासभोऽस्ति दण्डस्तु भ्रमिद्वारास्त्येव सर्वत्र कपाल इत्याशयः। नन्वतिशयाङ्गीकारेऽपि चिरध्वस्तस्य कथं कार्याव्यवहितपूर्ववृत्तित्वं किमर्थं वा तत्राव्यवहितत्वांशप्रवेश इत्यत आह। **वक्ष्यते चेति**। तथा च कार्याव्यवहितपूर्ववृत्ति स्वस्वव्यापारान्यतरकत्वमेवात्र कारणत्वमन्यथा कीर्तितयागादपि फलप्रसङ्गादित्याशयः।

दण्डाभावादिति। अत्र तत्सत्तानियतसत्ताकत्वनियतः कश्चित्पञ्चम्यर्थतया विवक्षितः स च नाभावसामान्यस्यापितु प्रागभावस्येत्याशयः। **कारणत्वस्येति**। तस्याखण्डोपाधित्वे तु मण्यभावाद्दाहोत्पत्तिरिति प्रतीत्या मण्यभावत्वस्यावच्छेदकत्वं गृह्यत इति नोक्तशङ्कावतार इत्यत उक्तम्। **पूर्ववृत्तित्वरूपत्व** इति। **अत एव** तद्व्यक्तिसत्वेऽपि कार्यानुदयादेव। **अन्यथासिद्धीति**। कार्यगतान्यथासिद्धीत्यर्थः। अन्यथासिद्ध्यनवच्छेदक- धर्मस्यैवेत्येव वा तत्र पाठः। **अव्याप्त्यतिव्याप्तिशङ्केति**। यागेऽव्यवहितपूर्ववृत्तित्वाभावेना-व्याप्तेस्तृतीयविधाक्रान्तस्यालक्ष्यत्वोक्तौ च चक्रेऽतिव्याप्तेश्च शङ्केत्यर्थः।

तर्कामृतम्

समवायिकारणे सम्बद्धं कारणं असमवायिकारणम्, यथा परमाणुद्वयसंयोगो द्व्यणुकस्य, कपालरूपं घटरूपस्य।

तरङ्गिणी

समवायिकारणे सम्बद्धमिति। स्वसमवायस्वसमवायिसमवायान्यतर-

सम्बन्धेन सम्बद्धमित्यर्थः। क्रमेणोदाहरण- द्वयमाह- **यथेत्यादि**। कपालरूपस्य घटरूपस्य समवायिकारणे घटे स्वसमवायिकपालसमवेतत्वसम्बन्धेन सत्त्वात्। न च कापालचक्रसंयोगस्य घटं प्रत्यसमवायित्वापत्तिः। समवायिकारणमात्रसम्बद्धत्वाभिधाने च आत्ममनः संयोगादौ ज्ञानाद्यसमवायिकारणेऽव्याप्तेः। न चेष्टापत्तिः। तन्नाशे घटनाशापत्तेरसमवायिकारणनाशस्य द्रव्यनाशहेतुत्वादिति वाच्यम्। घटासमवायिकारणलक्षणे तद्भिन्नत्वस्य तत्समवायिकारणमात्रसम्बद्धत्वस्य वा निवेश्यत्वात्। कपालचक्रसंयोगस्य घटचक्रसंयोगासमवायिकारणत्वात् सामान्यलक्षणेन तु सङ्ग्राह्यमेव। आत्मविशेषगुणानां तु क्वाप्यसमवायिकारणत्व- विरहात्तद्भिन्नत्वं सामान्यलक्षणे विशेषलक्षणे च देयम्। इष्टापत्तौ त्वाकरविरोधः। एवं संयोगस्य विभागासमवायित्वस्य वारणीयत्वे तु तद्भिन्नत्वं तल्लक्षणे देयम्। वेगस्पर्शयोरभिघातासमवायिकारणकारणत्वं पूर्ववदेव वारणीयम्।

चषकम्

समवायिकारण इति। ननु घटस्य रूपेऽसमवायिकारणत्वं स्याद्रूपसमवायिकारणे घटे तादात्म्येन सम्बद्धत्वात्। न च वाच्यं समवायेन सम्बद्धत्वं विवक्षितमिति। घटरूपं प्रति कपालरूपस्यासमवायिकारणत्वानापत्तेः। **न च** स्वसमवायिसमवेतत्वप्रत्यासत्यापि। भवति हि कपालरूपसमवायिनि कपाले समवेतो घटोऽत एव प्रत्यासत्तिभेदादुदाहरणभेदानुसरणमिति युज्यत इति **वाच्यम्**। तथा सति घटस्यापि स्वसमवायिकपालसमवेतत्वेन रूपसमवायिकारणे घटे सम्बद्धत्वादुक्तापत्यवारणादिति चेन्मैवम्। प्रायः सर्वेषां समवायिकारणनिष्ठप्रत्यासत्या कारणत्वम्।

तत्र लाघवात् समवायिकारणस्य तादात्म्यमेवासमवायिकारणस्योक्तान्यतरन्निमित्तकारणस्योक्तत्रितयान्यदेव प्रत्यासत्तिरिति तदन्यतरप्रत्यासत्या यत्कारणं तदसमवायिकारणमिति विवक्षितत्वात्। नन्वेवमपि ज्ञानादीनामिच्छाद्यसमवायिकारणत्वापत्तिर्न चेष्टापत्तिरुक्तप्रत्यासत्याऽसमवायिकारणस्य सत्त्वे कार्यविलम्बासम्भवाद्घटे ज्ञाते स्वेष्टसाधनत्वग्रहं

विनैवेच्छाप्रसङ्गात्। मनः संयोगस्य चास्माकं फलबलकल्प्यवात्।। **न च** ज्ञानेच्छाकृतीनां क्रमानुपपत्या तादृशनियमासिद्धेर्नायं प्रसङ्ग इति वाच्यम्। तथापि घटज्ञानात् पटेच्छाप्रसङ्गाद्विषयनिष्ठप्रत्यासत्या हेतुत्वाभ्युपगमेनेच्छासमवायिकारणत्वस्य ज्ञानव्यावृत्ततयैवेष्टापत्तेरसम्भवात्।

तुल्ययुक्त्या चैत्रज्ञानान्मैत्रेच्छाप्रसक्त्या समवायेनापि हेतुत्वादिति चेदत एव नासमवायिकारणत्वं तेषां व्यवहरन्ति। न हि द्विनिष्ठप्रत्यासत्यापि कारणमसमवायिकारणमिति वक्तुं युज्यते। कार्यसमवाय्यघटितप्रत्यासत्यवच्छिन्नकारणताशून्यत्वस्ये नञर्थसादृश्यस्य व्यवहार्यतावच्छेदकस्य बाधात्। व्यवहरन्ति च शब्दस्य शब्दासमवायिकारणत्वम्। न चात्रावच्छेदकत्वं प्रत्यासत्तिरिति साम्प्रतम्। अन्यावच्छिन्नशब्दादेव कर्णावच्छिन्नशब्दोत्पत्तेरिति हृदयमिति चेत्तर्हि ज्ञानादिभिन्नत्वेनापि कारणस्य विशेषणीयत्वात्।

पटं प्रति तुरीतन्तुसंयोगो न निमित्तकारणमपितु तुर्येव संयोगेन तन्तुनिष्ठा सतीति न कोऽपि दोष इति दिक्। **अत्रास्मन्मातामहचरणाः**। पटासमवायिकारणलक्षणे तन्तुभिन्नसमवेतत्वावच्छिन्नभेद एव निवेशनीयो हस्ततन्तुसंयोगभेदानां पृथगनिवेशेन लाघवादेवमिच्छासमवायिकारणलक्षणेप्यात्ममात्रसमवेतत्वावच्छिन्नभेद इति **प्राहुः**।

तात्पर्यटीका

स्वसमवायिसमवेतत्वप्रत्यासत्यापीति। सम्बद्धत्वं विवक्षितमित्यनुषज्यते। अत एव प्रत्यासत्तिभेदादितिपदद्वयं समानाधिकरणमिति बोध्यम्। **युज्यत** इति। एवमग्रेऽपीत्यनेनात्रापि सूचितस्य परमाणुद्व्यणुकयोर्विवादस्योदाहरणान्तरानुसरणबीजस्यापेक्षयेदं युक्तम्। तयोः सत्त्वेऽपि सम्भवात्। प्रत्यासत्तिभेदोदाहरणत्वस्यैव घटासमवायिकारणकपालद्वयसंयोगोपेक्षायामपि बीजत्वाच्चेति भावः। **घटे सम्बद्धत्वादिति**। न च स्वप्रतियोगिकसम्बन्धस्य स्वस्मिन्नसत्त्वात् कथमेतदिति **वाच्यम्**। स्वप्रतियोगिकसम्बन्धस्य स्वस्मिन् स्वविशिष्टबुद्ध्यनियामकत्वेऽपि राहोः शिर इति प्रतीत्युपपादकतादात्म्यादिवत् स्वसम्बन्धत्वप्रकारकप्रतीतिसिद्धस्वसम्बन्धत्वस्यानपोद्यत्वेन स्वानुयोगिक-

निरुक्तसम्बन्धप्रतियोगित्वस्य स्वस्मिन्ननपायात्। अन्यथा तादात्म्यघटिता समवायिकारणप्रत्यासत्तिरपि विलीयेत दृष्टञ्च राहो राहुः शिरसः शिर इति प्रत्ययवारणं घटो घट इत्यभेदप्रत्ययवारणवर्त्मनैव तत्सम्बन्धविशिष्ट-बुद्धेस्तद्विशिष्टबुद्धित्वनियमेन व्यापकसामग्रीविरहात्तच्चाग्रे व्यक्तमित्याशयः। यद्यपि शब्दं प्रत्यदृष्टस्य कारणतायां साक्षात् सम्बन्धघटिता प्रत्यासत्तिर्न सम्भवत्येव स्वाश्रयसंयुक्तसंयोगरूपपरम्परा तु समवायिकारणनिष्ठापि सम्भवति **तथापि** दिक्कालयोः कार्यसामान्याश्रययोः स्वनिष्ठप्रत्यासत्या निमित्तकारणत्वे लाघवान्न समवायिकारणनिष्ठा प्रत्यासत्तिरेवं ध्वंसस्य समवाय्यप्रसिद्ध्यैव न सा प्रत्यासत्तिरतः प्रायः **पदम्। सर्वेषामिति** कारणानामित्यार्थिकम्।

कार्यविलम्बासम्भवात् कार्यविलम्बस्यान्यत्रादृष्टत्वात्। कारणविलम्बा-सहिष्णोर्द्रव्यासमवायिकारणस्य कार्यविलम्बासहिष्णुत्वं दृष्टम्, प्रकृते तु नैवमिति शङ्कते। **न चेति। ज्ञानेच्छा**कृतीनामिति। अविनश्यदवस्थस्यैव पूर्वसंयोगस्योत्तर संयोगप्रतिबन्धकत्वाभ्युपगमे विनश्यदवस्थान्मनः-संयोगाज्ज्ञानोत्पत्तिकाले तन्नाशोत्तरमनःसंयोगयोः सम्भवेन ज्ञानेच्छयोर्द्वयोः कथञ्चित्क्रमोपपत्तावपि ज्ञानोत्पत्तिकालोत्पत्तिकेन तेन मनःसयोगेनाविनश्यदवस्थेनेच्छाकाले कृत्यापत्तेः सम्भवादिति भावः। तथाप्युक्तप्रसङ्गाभावेऽपि। पटेच्छाप्रसङात् पटेच्छाप्रसङ्गं मनसि कृत्य। **विषयनिष्ठेति**। नन्विदं द्रव्यमिति ज्ञानाद्घटो मे भवत्वितीच्छापत्तिः। न च घटत्वप्रकारतानिरूपितविशेष्यतायाः प्रत्यासत्तितया नोक्तापत्तिरिति वाच्यम्। तेन रूपेण सम्बन्धताया अनभ्युपगमादिति **चेन्न**। घटत्वप्रकारकेच्छां प्रति घटत्वप्रकारकज्ञानस्य शुद्धविशेष्यताप्रत्यासत्या हेतुत्वात्। अत्र चैत्र-ज्ञानान्मैत्रेच्छाप्रसङ्गस्तु चैत्रादीनां कार्यकारणतावच्छेदककोट्यन्तर्भावेणैव वारणीयो नात्मनोऽपि विषयत्वेनात्मनां स्वल्पत्वादिति निगर्वः।

अतिव्याप्तिं सङ्गमयितुं पुरुषादिभेदभिन्नकार्यकारणभावासहिष्णुः शङ्कते। **तुल्ययुक्त्येति**। **सम**वायेनापीत्यपिना विशेष्यतापरिग्रहः। **हेतुत्वादिति**। इच्छाद्यसमवायिकारणत्वापत्तिरित्यनुषज्यते। ननु चैत्रस्य घटज्ञानात् पटेच्छा मैत्रस्य पटज्ञानाद्घटेच्छा च कथं न युगपदिति चेदेककार्यं प्रत्येककारणस्य द्विनिष्ठप्रत्यासत्या कार्यकारणभावद्वयस्थले विलक्षणाया एव

सामग्रीव्याप्तेरभ्युपगमात्तथा ह्येकप्रत्यासत्या यदधिकरणसम्बद्धतत्कारणस्यापरप्रत्यासत्याधिकरणं यत्तदेकप्रत्यासत्या तदधिकरणसम्बद्धतत्कार्यस्यापरप्रत्यासत्याधिकरणमित्येवं रूपाया इति घटविषयकज्ञानसमवायी चैत्रो घटविषयकेच्छासमवाय्येव नान्यथेति दिक्। अत एव द्विनिष्ठप्रत्यासत्या ज्ञानेच्छयोर्हेतुहेतुमद्भावादेव। **व्यवहरन्तीति**। इदमुपलक्षणम्। अवच्छेदकतया सुखदुःखे प्रति जन्यता सम्बन्धेन पुण्यपापयोर्हेतुत्वान्तरं शरीरनिष्ठप्रत्यासत्या वाच्यमिति क्वचिद्दुःखं क्वचिन्नेति नियमनिर्वाह इति तयोरपि न तथा व्यवहार इत्यपि **बोध्यम्। कार्यसमवायीति**। न च दण्डादौ लक्ष्यतावच्छेदकातिप्रसङ्गस्तस्याप्युपधायकत्वजन्यत्वोभयसम्बन्धघटितभ्रमिनिष्ठप्रत्यासत्या हेतुत्वमित्याशयात्। कथं तर्हि शब्दं प्रति शब्दस्य हेतुतेत्यत आह। **हृदयमिति**। तदवच्छिन्नशब्दं प्रति समवायेन तद्व्याप्य यत्किञ्चिद्देशावच्छिन्नः शब्दो वायुविशेषसहकृतो व्योमनिष्ठ एव कारणमत एव क्वचिदेव व्यापके देशे शब्दः क्वचिन्नेति नियमः सूपपद इति हृदयार्थः। नन्वेवमपीत्याक्षेपे समाधत्ते **तर्हीति**।

कालादिव्यावृत्तये **संयोगेन तन्तुनिष्ठा सतीति**। तथा च तन्त्वनुयोगिकत्वविशिष्टसंयोगघटितया समवायिकारणनिष्ठया पूर्वोक्तया प्रत्यासत्या हेतुत्वान्नोक्तातिप्रसङ्ग इति भावः। **दिगिति**। दिगर्थस्त्वतिप्रसक्तस्यापि समवायस्य किञ्चिद्विशिष्टस्यैव सम्बन्धतया क्लृप्तस्य कारणतावच्छेदकत्व- सम्भवात् तुरीतन्तुसंयोगत्वेनैव हेतुत्वं नतु तुरीत्वेन संयोगेन कालतुरीसंयोगमात्रादेव कार्यापत्तेर्दुर्वारत्वादथ सम्बन्धातिप्रसङ्गेऽपि न कार्यापत्तिः सामग्र्यभावात्तर्हि तुरीपिहिततन्तुभ्यः पटोत्पत्तिवारणाय विलक्षण[1]-तुरीतन्तुसंयोगद्वारा तस्या हेतुत्वे त्वया वाच्ये ममापि तादृशतुरीतन्तुसंयोगहेतुतानपायिनीति मते तु पटासमवायिकारणलक्षणे तद्भिन्नत्वं देयमिति तदभिप्रेत्यैवाहाऽ**त्रास्मन्मातामहचरणा इति**।

---

१. आरम्भकतन्तुसंयोगफलोपधायक

तर्कामृतम्

एतदुभयभिन्नं यत्[१] कारणं तन्निमित्तकारणम्, यथा द्व्यणुके ईश्वरः, घटे दण्डः। एतत्कारणत्रयं भावकार्यमात्रस्य।

तरङ्गिणी

एतदुभयभिन्नमिति। न च दण्डादेःरूपादिसमवायिकारणत्वात् कपालचक्रसंयोगस्य घटचक्रसंयोगासमवायिकारणत्वात् तद्भिन्नत्वाभावेन घटं प्रति निमित्तकारणताविरहापत्तेरिति वाच्यम्। तदुभयकारणताभिन्नकारणतैव निमित्तकारणतेति विवक्षितत्वात्। **भावकार्यमात्रस्येति**। भावकार्यस्यैवेत्यर्थः। तेन ध्वंसव्युदासः। सर्वत्र भावकार्येऽसमवायिकारणानियमेऽपि च न क्षतिः। भावकार्यभिन्नस्य त्रितयनियमव्यवच्छेदे तात्पर्यात्।

चषकम्

एतदुभयभिन्नमिति। न च दण्डस्य रूपसमवायिकारणस्य तद्भिन्नत्वाभावेन घटे निमित्तकारणतानापत्तिरिति वाच्यम्।, उक्तकारणताभिन्नकारणता निमित्तकारणतेत्यत्र तात्पर्येण तद्वन्निमित्त-कारणमित्यस्य विवक्षितत्वात्। कालदिशोस्तादात्म्येन कारणत्वेऽपि कार्यतावच्छेदककालिकदैशिकसम्बन्धभेदात् कारणताभेदो द्रष्टव्यः। उत्पत्तेः कारणवत्त्वेनैव नियमो न तु त्रिविधकारणत्वेनापि ध्वंसे व्यभिचारादित्याह। **एतदिति**।

इत्थं च मात्रपदमवधारणे न तु कात्स्न्र्ये तेन शब्दादृष्टादावसमवायिकारणानभ्युपगमेऽपि न क्षतिः। **केचित्तु** भावकार्यमात्रस्य

१. 'यत्' इति नास्ति पुस्तकान्तरे।

भावकार्यसामान्यस्यैव। अत एव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया दिक्कालयो: सिद्धिरित्याहु:।

तात्पर्यटीका

समवायिकारणत्वासमवायिकारणत्वे एतच्छब्दार्थस्तदुभयभेदौ हि कारणपदार्थैकदेशे कारणत्वेऽन्वित इत्यभिप्रेत्याहो**क्तकारणताभिन्नकारणतेति। कारणत्वे**ऽपीति। अपिना समवायेन कार्यसामान्यं प्रति कालिकादिसम्बन्धावच्छिन्नाधेयतयापि कालदिशोर्हेतुतासम्भवतीति दर्शितम्। परन्त्वदृष्टवदुक्तपरम्परया हेतुत्वापेक्षया लाघवेन तयो: स्वनिष्ठप्रत्यासत्यैव हेतुत्वमुचितमित्याशय:।

अत्र कालदिशो: प्रकारान्तरेणापि सिद्धेरुक्तत्वात्तयो: पिण्डस्य च संयोगानां तद्धेतुत्वे मानाभाव इत्यस्वरस आहुरि यनेन सूचित:।

तर्कामृतम्

तत्र समवायिकारणं सर्वत्र द्रव्यमेव। असमवायिकारणं द्रव्ये गुण:, गुणे गुण: कर्म च। कार्यमात्रं प्रति साधारणकारणानि, ईश्वर:, तज्ज्ञानेच्छाकृतय:, प्रागभावकालदिगदृष्टानि।

तरङ्गिणी

सर्वत्र भावकार्यमात्रे। **द्रव्ये गुण** इति। अवयवसंयोग इत्यर्थ:। गुणे गुण:। यथा कारणादिगुणेन कार्यादौ गुण:। **कर्म चेति**। यथा संयोगविभागादौ क्रिया। चकारेण कर्मणि गुण: कर्म चेति समुच्चीयते। **ईश्वर इति**। नित्यत्वविशिष्टविषयतासम्बन्धेन कार्यमात्रे समवेतत्वसम्बन्धेनेश्वर: कारणम्। ज्ञानेच्छाकृतीनां विषयतासम्बन्धेन कार्यमात्रे तादात्म्येन। अत एव त्रयाणां समासेन निर्देश:। यद्वा समवायदैशिकविशेषणतान्यतरसम्बन्धेन कार्यमात्रे स्ववृत्तिज्ञानविषयत्वसम्बन्धेनेश्वर:। विषयतासम्बन्धेन ज्ञानेच्छाकृतीनाम्। प्रागभावो

विशेषणतया। कालदिशोस्तु कालिकविशेषणतया दैशिकविशेषणतया कार्यमात्रे तादात्म्येन। अदृष्टस्य तु कालिकाविशेषणतैव कार्यकारणभावघटकः सम्बन्ध इति ध्येयम्।

चषकम्

तत्र त्रिविधकारणानां मध्ये सर्वत्र कार्यसामान्ये। द्रव्यमेव नान्यत् समवायिकारणमिति योजना। विशेष्यसङ्गतैवकारेण द्रव्यवैधर्म्यतायाः स्फुटमवगतेः द्रव्यसाधर्म्यपरतायां तु यत्रैकस्मिन् कपाले द्रव्यारम्भकसंयोगानुगुणक्रिया ततो विभागस्ततोऽन्यस्मिन् कपाले तत्संयोगनाशानुगुणक्रिया पूर्वक्रियाजन्यविभागनाश्यपूर्वसंयोगस्य नाशश्चेत्येकः कालस्तत आरम्भकसंयोगतन्नाशानुगुणविभागौ ततो घटोत्पत्यारम्भकसंयोगनाशावथ घटनाशस्तत्रोत्पन्नविनष्टघटेऽव्याप्त्यापत्ति-रेवमग्रेऽपि। आत्मविशेषगुणानां कुत्राप्यसमवायिकारणत्वाभावादिति। गुणोऽवयवसंयोगः। गुणे रूपे संयोगविभागयोश्च। इदमुपलक्षणम्। कर्मणि गुण इत्यपि बोध्यम्। वेगस्य द्वितीयादिकर्मण्याद्ये संयोगस्य गुरुत्वस्याप्यसमवायिकारणत्वादित्यस्य मूल एव व्यक्तत्वात्।

तज्ज्ञानेच्छाकृतय इति। आश्रयघटितान्वयव्यतिरेकाभ्यामाश्रये गृह्यमाणं कार्यसामान्यहेतुत्वं लाघवेन ज्ञानेच्छाकृतिषु सिद्ध्यतीति सूचयितुं द्वन्द्वबहिर्भावेणेश्वरो निर्दिष्टः। **प्राङ्निर्देशस्तु** तच्छब्देन परामर्शार्थोऽपि। तच्छब्दस्त्वाश्रयाश्रयिभावोक्तिद्वारा विशेषतः प्राथमिकाश्रयगर्भान्यव्यतिरेकाभ्यां व्युत्पत्तेः सूचनाय। प्रागभावस्य स्वतन्त्रनिर्देशस्तु विवादभूयस्त्वं वक्तुम्। **अबा**धितयावत्संसर्गकप्रत्यक्षस्यैकसंसर्गकप्रत्यक्षकाले उत्पत्तिवारणाय तदेकसंसर्गतत्सन्निकर्षतद्विशेषणधीघटितसामग्र्यास्तदेकसंसर्गकप्रत्यक्ष-विशेषोपधाने नियामकतास्वीकारेऽपि धारावाहनस्थले मूर्तयौगपद्ये च व्यक्तिस्थानीयापत्तिवारणाय कालदिशोर्दृष्टनियामकाभावे दृष्टस्यापि मेघसञ्चारादिरूपसामग्रीघटनादौ नियामकता स्वीकार्येति भावः।

तात्पर्यटीका

ननु शङ्खः पाण्डुर एवेत्यादाविव समवायिकारणे द्रव्यायोगव्यवच्छेदोऽप्यबाधितः सुबोध एवेति कुतो योजनाक्लेश इत्यत आह। **विशेष्येति।** यथा च द्रव्ये गुण इत्याद्यग्रिमसन्दर्भे गुणस्य विशेष्यत्वे गुण एव द्रव्यासमवायिकारणं नान्यदिति लाभे गुणभिन्नस्य द्रव्यासमवायिकारणत्वं वैधर्म्यमिति लभ्यते तथैव प्रकृते द्रव्यविशेष्यत्वाभिप्रायेण योजनादरोऽ**न्यथा** गुणे यदसमवायिकारणं स गुण एव कर्मे वेत्याद्युक्तावसङ्गतेरिति भावः। कुतो वैधर्म्यपरतोपवर्ण्यते इत्याशङ्क्याह। **द्रव्यसाधर्म्यपरतायान्त्विति**। एवं गुण एव द्रव्ये गुणकर्मणी एव गुणेऽसमवायिकारणमिति योजनया समवायिकारणत्वमपि गुणादीतरेषां वैधर्म्यमित्यत्र तात्पर्यं न तु गुणादेः साधर्म्यमित्यत्र कुत एवं **तत्राहात्मविशेषगुणानामिति**। आत्ममनोयोगस्य ज्ञानादावसमवायिकारणत्वमस्तीति **विशेषेति**। व्याख्याततत्त्वमेतत्।

कार्यसामान्यहेतुत्वमिति। घटकुलालयोः पटादिकुविन्दाद्योर्विशेषतोऽन्वयव्यतिरेकाभ्यां घटत्वावच्छिन्नं प्रति कुलालत्वेन कारणत्वे गृहीते यद्विशेषयोरिति व्याप्त्या कार्यसामान्यं प्रति कर्त्तुः कारणत्वावधारणादिति भावः। **परा**मर्शार्थोऽपीत्यपिनोपजीव्यत्वेनापीति सूचितम्। ननु विशेषसामग्रीहेतुतयैव निर्वाहे कालादेर्हेतुत्वे मानाभाव एकसंसर्गकप्रत्यक्षे तत्पूर्वतनविशेषणधियः प्रातिस्विकरूपेण तत्रैव हेतुताया अभ्युपगमादत आहा**बाधितेति**। **धारावाहनेति**। नानावर्णघटितं पदमिवेदमपि प्रत्यक्षसिद्धमित्याशयः। **व्यक्तिस्थानीयापत्तिरिति**। व्यक्तीनां स्थानगोचरापत्तिरेतद्व्यक्तेस्तत्स्थानीयत्वापत्तिरित्यर्थः।

तर्कामृतम्

तत्र परमाणुद्वयसंयोगात् द्व्यणुकमुत्पद्यते, संयुक्तद्व्यणुकत्रयात् त्रसरेणुः। एवं चतुरणुकादि कपालान्तम्, कपालद्वयसंयोगेन घटो जायते, घटस्त्वन्त्यावयवी।

तरङ्गिणी

संयुक्तद्व्यणुकत्रयादिति। न च परमाणुद्वयसंयोगात् द्व्यणुकमिव द्व्यणुकद्वयसंयोगात्त्रसरेणुरुत्पद्यतामिति वाच्यम्। तथा सति त्रसरेणौ महत्त्वानुत्पत्त्यापत्तेः। कारणगतबहुत्वाभावात्। न च तथापि संयुक्तपरमाणुत्रयादेव त्रसरेणुरुत्पद्यतामिति वाच्यम्। तत्र सावयवद्रव्यारब्धत्वस्यैव साध्यत्वात्। **अन्त्यावयवीति**। अन्त्यः द्रव्यानारम्भकः।

चषकम्

संयुक्तेति। फलबलेन युगपदेव द्व्यणुकत्रयस्यारम्भकं संयोगं वक्तुमुक्तिवैचित्र्यम्। **न चो**भाभ्यामेव द्व्यणुकाभ्यां किन्न त्रसरेणुरङ्गीक्रियते इति वाच्यम्। महतस्त्रसरेणोःकार्यस्य वैचित्र्येण विचित्रस्य कारणबाहुल्यस्यावश्यं वाच्यत्वात्।

त्रसरेणुरिति। त्रिसरेणुरित्यर्थः रेणुभ्यां सहिता जाता इति यावत्त्रयः सरेणवो यत्रेति व्युत्पत्तेः। **कथं** तर्हि त्रसरेणुरिति। पृषोदरादित्वात्। **अत्रेदं** चिन्त्यम्। द्वाभ्यां परमाणुम्यामारब्धेन द्व्यणुकेन परमाण्वन्तरस्य संयोगादेव त्र्यणुकमस्त्वस्तु च तत्परमाणुत्रित्वमेव तन्महत्त्वे हेतुरित्थं च बहिरिन्द्रियवेद्यद्रव्यत्वप्रयोजकं सावयवद्रव्यारब्धत्वमप्यबाधितमेवेति विदुषां परामर्शः। **वयं** तु ब्रूमः। द्वाभ्यां परमाणुभ्यां यदा संयोगस्तदैव किं न तृतीयस्यापि सिसृक्षायास्तद्धेतोरविशिष्टत्वा**दथ** भवत्येव कथं तर्हि सावयवद्रव्यारब्धता मास्त्वसाविति चेद्बहिरिन्द्रियवेद्यद्रव्यत्वानुपपत्तिरिति यथा स्थितमेव ज्यायः। द्वाभ्यामेव परमाणुभ्यां त्र्यणुकमस्तु त्र्यणुकमिति समाख्या तु तृतीयमण्विवेत्यर्थिकेति **त्वस्मन्मातामहचरणाः**। **एवं** त्र्यणुकद्वयेनैव लाघवात्। **अन्त्यावयवीति**। द्रव्यान्तरानारम्भकोऽवयवीत्यर्थः। **ननु** द्रव्यान्तरसहायैरिष्टकादिभिर्गृहादिकमिव घटैरपि नौकादिकमारभ्यत एवेति। **चेन्न**। सेनावनादिवत् समुदायपरा एव ते शब्दा नैकमवयविनमभिदधति। अन्यथा राशिपदार्थोऽप्यवयवी भवेत्।

कुतो न भवेदिति चेत्। श्रृणु लक्षालेपसंहितखण्डाखण्डघटयोरवयवानां संयोगयोरस्ति कश्चन विशेषः सर्वजनानुभवसिद्धः। काष्ठकीलयोरिवाद्यो योऽवष्टम्भ इत्युच्यते। द्रुतसुवर्ण शकलयोरिवान्यः स एवारम्भक इत्युच्यते। न च नौकादेर्गृहादेर्वावयवानां तादृशः संयोग इत्यनायत्या नौकादिशब्दानां समुदायार्थो घटावयवानां तु संयोग उपलभ्यते इति लाघवादेकैवार्थको घटशब्द इति किमनुपपन्नम्।

तात्पर्यटीका

अविशिष्टत्वादिति। अस्माकं तु द्व्यणुकरूपविषयोपहितेच्छा वशाद्द्व्यणुकानि यावदपेक्षितानि भवन्ति ततस्त्र्यणुकरूपविषयोपहितेच्छावशात् त्र्युणुकानीति भावः। न च विषयोपधानस्य प्रागसत्वात् कथमेतदिति **वाच्यम्**। विषयोपधायकसामग्र्युपहितत्वस्य विवक्षितत्वात्। लाघवादाह। **द्वाभ्यामेवेति**। **इत्यर्थिकेति**। इति एवं विधः फलितोऽर्थो यस्याः सा त्रयोणुका यत्र समुदाये इति विग्रहिका त्र्यणुकमिति समासरूपेत्यर्थः सादृश्यस्य कन्प्रत्ययार्थत्वादिति भावः। तथा च त्र्यणुकशब्दो योगरूढ इत्याशयः।

स एवारम्भक इत्युच्यत इति। अत एव द्रव्यारम्भकतावच्छेदकसंयोगगतजात्यवच्छिन्ननिष्ठसमवायसम्बन्धावच्छिन्न-प्रतिबध्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नप्रतिबन्धकतावच्छेदकजातिमत्त्व-मन्त्यावयवित्वमिति वदन्ति। **किमनुपपन्नमिति**। अवयवसंयोगविशेषा एव महत्त्वमिति वदतामेको घटो महानित्यत एकत्वविशिष्टे महत्त्वप्रत्यये उद्देश्यतावच्छेदकैकत्वस्य महत्त्वे प्रत्ययस्य यानुपपत्तिः साप्यस्माकं न भवतीति भावः।

तर्कामृतम्

अथ द्रव्ये[१] प्रमाणं कथ्यते–प्रत्यक्षद्रव्ये प्रत्यक्षमेव प्रमाणं, अतीन्द्रियेऽनुमानं। तत् पक्षहेतुसाध्यदृष्टान्तज्ञानसाध्यम्। विशेषो वक्ष्यते।

---

१. द्रव्यप्रमाणम् इति पाठान्तरम्।

तरङ्गिणी

प्रत्यक्षद्रव्ये महदुद्भूतरूपवद्द्रव्ये। अतीन्द्रिये तादृशरूपशून्ये। तत् अनुमानं व्याप्तिज्ञानम्। ननु व्यतिरेकिणि पक्षज्ञानाभावे साध्यज्ञानाभावेऽपि व्याप्तिग्रहाद्विना सहचारज्ञानं व्याप्तिप्रत्यक्षानुत्पादाच्चाह **विशेष इति**। तथा चान्वयिनि तदपेक्षणीयमित्यादि वक्ष्यतेऽनुमानखण्डे।

चषकम्

प्रत्यक्षमेवाहमेव ब्राह्मण इत्यत्रेव सौलभ्यार्थक एवकारस्तेन प्रत्यक्षेऽप्यात्मनि विप्रतिपन्नं प्रत्यनुमानप्रतिपादनेऽपि न क्षतिः। **दृष्टान्तज्ञानेति**। द्वन्द्वान्ते श्रूयमाणस्य ज्ञानपदस्य प्रत्येकं सम्बन्ध इति बोध्यम्। ननु साध्याभाववति हेत्वभावग्रहं विना सम्भावितेन तत्र हेतुग्रहरूपेण व्यभिचारग्रहेण प्रतिबन्धान्नान्वयव्याप्तिग्रह इति तद्ग्राहकं व्यतिरेकसहचारज्ञानं कुतो नोक्तम्। न च दृष्टान्तज्ञानान्तर्गतमेव तदिति वाच्यम्। साध्यहेत्वोः पृथगुपादानवैयर्थ्या दस्माकमन्वयदृष्टान्ततात्पर्यग्रहोपक्षीणत्वादत आह। **विशेष इति**।

वक्ष्यत इति। तद्यथान्वयव्याप्तिग्रहे न व्यतिरेकसहचारज्ञानं कारणम्, मानाभावात् क्वचिद्व्यतिरेकसहचारग्रहेऽप्यधिकरणान्तरे व्यभिचारशङ्कातादवस्थ्या**दन्यथा** यावदाशङ्कं विपक्षबाधकतर्कानुसरणस्योपवर्णनं ग्रन्थकृतामपार्थकं स्याद्व्यापकग्रहेणैव तत्र शङ्कानिवृत्तौ सहचारपर्यन्तानपेक्षणात् क्वचित् व्यतिरेकसहचार भ्रमेण व्यापकताभ्रमदर्शनं तु सामग्रीक्रमाधीनं नान्वयव्यतिरेको**त्था**पनायालम्। व्यतिरेकयोर्व्याप्यव्यापकभावग्रहे व्यतिरेकयोः सहचारोऽपेक्षित इति विशेषोपक्षीणतद्धेतुतायाश्च व्याप्तिमप्रतिपाद्य प्रतिपादयितुमशक्यत्वादित्यादि।

तात्पर्यटीका

व्यतिरेकसहचारधियोऽन्वयव्याप्तिग्राहकत्वं साक्षाद्व्यभिचारशङ्कानिवर्तकत्वेन वेति विकल्प्य दूषयति। **मानाभावादिति**। **क्वचिदिति** च।

अन्यथाधिकरणान्तरेऽपि व्यभिचारशङ्कानुदये तदधिकरणीयव्यभिचार-शङ्कानिवर्तकत्वेनैव व्यतिरेकसहचारस्योपयोग इत्यत आह। **व्यापकग्रहेणैवेति। तत्र** व्यापकवत्तया निश्चितेऽधिकरणे। ननु गोत्वाश्वत्वयोर्विरोधज्ञानेऽश्वे गोत्वाभावग्रहप्रतिबन्धकदोषाभावेनाश्वत्व- सामानाधिकरण्यस्य गोत्वाभावे सुग्रहतया व्यभिचारग्रहसम्भवेन व्यतिरेकसाहचर्यस्य ग्रहाभावेऽन्वय-व्याप्तेरप्यग्रहाद्व्यतिरेकसहचारभ्रमे तूक्तदोषवशादेव गोत्वा-भावेऽश्वत्वसहचारग्रहासम्भवेनाश्वत्वसहचरिताभावान्तराप्रतियोगित्वरूप-व्यापकताभ्रमस्यापि सम्भवाच्चान्वय- व्यतिरेकाभ्यां व्यतिरेकसहचारग्रहोऽत्र हेतुः स्यादित्याशङ्क्य निराचष्टे। **क्वचिदिति। व्यतिरेकसहचारेति।** नियतव्यतिरेकसहचारेत्यर्थोऽत एवाह **भ्रमेणेति। सामग्रीक्रमाधीनमिति।** सामग्र्योरश्वे गोत्वाभावग्रहप्रतिबन्धकदोष- घटिता व्यतिरेकसहचारग्रहसामग्री गोत्वाभावाश्वत्योर्दोषमूलकविरोधस्फुरणघटिता गोत्वेऽश्वत्वव्यापकताग्रहसामग्री च तयोः क्रमाधीनमित्यर्थः। **नान्वयव्यतिरेकोत्थापनायेति।** न नियतान्वयव्यतिरेकोत्थापनायेत्यर्थः। अयं भावः। सामग्रीपौर्वापर्यात् कार्यपौर्वापर्य मात्रं न भ्रमयोर्मिथो हेतुहेतुमद्भाव इति। **व्याप्तिमप्रतिपाद्येति।** विशेषतो व्याप्त्युपस्थितौ तथा हेतुताप्रतिपादयितुं शक्यते नान्यथेति भावः।

तर्कामृतम्

परमाणुद्व्यणुकानुमानं यथा, त्रसरेणुः सावयवद्रव्यारब्धः बहिरिन्द्रियवेद्यद्रव्यत्वात्, बहिरिन्द्रियवेद्यद्रव्यं यत् तत् सावयवद्रव्यारब्धम्, यथा घटः। अत्र त्रसरेणुः पक्षः, सावयवद्रव्यारब्धत्वं साध्यम्, बहिरिन्द्रियवेद्यद्रव्यत्वादिति हेतुः, घटो दृष्टान्तः। अनेन द्व्यणुकं परमाणुश्च सिद्ध्यति।

तरङ्गिणी

सावयवेति। यद्यप्यत्र सावयवारब्धत्वं द्रव्यारब्धत्वमात्रं वा व्यभिचारि तथापि व्यापके व्यर्थविशेषणताविरहान्न दोषः। **बहिरिन्द्रियवेद्यद्रव्यत्वादिति।**

मनोवेद्यात्मनि व्यभिचारवारणाय बहि:पदम्। रूपादौ व्यभिचारवारणाय द्रव्यपदम्। न च तथापि बहिरिन्द्रियजन्योपनीतभानविषये गगनादौ व्यभिचार इति वाच्यम्। बहिरिन्द्रियजन्यप्रत्यक्षीयलौकिकविषयतासमानाधिकरणद्रव्यत्वस्य विवक्षितत्वात्। अनेन अनुमानेन। सिद्ध्यति। सिद्धिरनुमिति:। तद्विषय इत्यर्थ:।

चषकम्

परमाणुद्व्यणुकयोरनुमानमनुमितिहेतु:। **सावयवद्रव्यावयवी**त्यर्थस्तेन न दिगुपाधिविधया देशविशेषारब्धत्वेनार्थान्तरम्। **अत** एव हेतौ द्रव्यपदमर्थवद्भवति। **यद्यपि** द्रव्यसमवेतद्रव्यत्वरूपस्य द्रव्यारब्धत्वस्यैव द्व्यणुकरूपेष्टसिद्ध्युपयुक्ता निरुक्तहेतुव्यापकता सम्भवति। **तथापि** परमाणुरूपेष्टसिद्ध्यौपयिकविशेषणत्वान्न सावयवेत्यस्य वैयर्थ्यमिति बोध्यम्। **अतएव वक्ष्यत्यनेनेति।** तत्र च परमाणु द्व्यणुकयोर्व्यत्यासेनोद्देशश्चैतत्सूचनायैव। **एवमेव** व्याप्तिग्रहौपयिकं व्याप्यविशेषणमप्यर्थवद्यथात्मनि व्यभिचारवारणाय **बहिरिति।** वेद्यं लौकिकप्रत्यक्षविषय:। **न च** तथापि शब्दो गगनवृत्तिरिति प्रत्यक्षविषये गगने व्यभिचारो दुर्वार इति **वाच्यम्।** तादृशप्रत्यक्षीयलौकिकविषयताश्रय इत्यर्थात्। जन्ये रूपादौ व्यभिचारवारणाय द्रव्यपदमाव**श्यकम्** सिद्ध्यनुमितिविषयो भवति। **केचित्तु** चाक्षुषस्पार्शनप्रत्यक्षयो रूपस्पर्शौ यथार्हं हेतू बहिर्द्रव्यप्रत्यक्षसामान्ये त्वात्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं प्रयोजक**मत** एव प्रभां पश्यामीतिवद्वायुं स्पृशामीति तुल्यवत्प्रत्यय इत्या**हुस्त**न्मते वायो: प्रत्यक्षत्वादाकाशप्रमाणे उल्वणजिज्ञासाविषयतां द्योतयितुं प्रथममाकाशमुपन्यस्याह।

तात्पर्यटीका

परमाणुरूपेष्टेति। मेरुसर्षपयो: साम्यापत्तिभियावयवधाराया अत्रैव विश्रामादणुपरिमाणातिशयस्याप्यत्र सिद्ध्यर्हतयास्य परमाणुपदार्थतेत्यर्थ:। प्रत्यक्षविषये शब्दांशे लौकिकश्रावणप्रत्यक्षीया लौकिकविषयताशालिनि।

जन्यत्वनिवेशेन नित्यव्यावर्तनसम्भवेऽपि जन्यरूपव्यावर्तनं न भवतीत्यावश्यकमिति। वादकथायां समयबन्धाभावत् त्र्यवयवा एव समादृता इति दर्शयति। **सिद्ध्यतीति**। कार्याभावे कारणाभावस्य प्रयोजकत्वान्यथानुपपत्या सामान्यतो हेतुहेतुमद्भाव आवश्यक इति सूचनाय प्रयोजकमित्यु**क्तम्**। **तुल्य**वदित्यर्हे वति:। **वस्तु**तस्तु वायुं स्पृशामीति नानुभव: प्रामाणिक: प्रभां पश्यामीत्यनुभवानङ्गीकारे त्विह पक्षीति प्रत्यक्षानुपपत्तिरित्युक्तमधस्तादित्यस्वरसादा**हुरिति**।

तर्कामृतम्

आकाशवायू शब्देन स्पर्शेन चानुमीयेते–शब्दो द्रव्याश्रितो गुणत्वात् यथा घटरूपम्। अनेन द्रव्यान्तरबाधात् शब्दाश्रयत्वेनाकाशं सिद्ध्यति। पृथिव्यादित्रयावृत्तिरयं स्पर्शो द्रव्याश्रितो गुणत्वादित्यनुमानेन द्रव्यान्तरबाधात् स्पर्शाश्रयत्वेन वायु: सिद्ध्यति।

तरङ्गिणी

शब्देन शब्दपक्षकानुमानेन। **स्पर्शेन** स्पर्शपक्षकानुमानेन। **द्रव्यान्तरबाधादिति**। शब्दो न स्पर्शवदाश्रित: स्वाश्रयनाशजन्यनाशप्रतियोगियद्यत्तद्भिन्नगुणत्वात् ज्ञानवत्। न आत्माश्रित: श्रोत्रग्राह्यत्वात् शब्दवत्। न दिक्कालमनआश्रित: विशेषगुणत्वाद्रूपवदिति रीत्येत्यर्थ:। **द्रव्यान्तरेति**। पृथिव्यादित्रयावृत्तित्वस्य प्रत्यक्षेऽनुष्णाशीतस्पर्शे प्रत्यक्षसिद्धत्वात्। अन्येषां नि:स्पर्शत्वादित्यर्थ:।

चषकम्

आकाशवायू इति। शब्देन तत्प्रयक्षकानुमानेन। एवमग्रेऽपि। **शब्द इति। न च** स्वरूपासिद्धिरिति **वाच्यम्**। शब्दो गुणश्चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवदित्यनुमानेन तन्निरासादेवमग्रेऽपि। **यद्यपि**

चक्षुरग्राह्येत्येव सुवचं **तथापि** वायोः प्रत्यक्षत्वं यथोक्तवायुत्वजातिमति वायौ व्यभिचारवारणायेत्थमभिहितम्। तत्त्वं च चाक्षुषप्रतिबन्धकताननतिरिक्तवृत्तित्वं न वायुत्वजातौ रूपाभावेनैवाचाक्षुषत्वोपपत्तौ वायोस्तदप्रतिबन्धकत्वेनातिरिक्तवृत्तित्वात्। **तावन्मात्र**ञ्च चक्षुषाप्यग्राह्यपित्तदोषस्य जातावपीति तद्वारणाय **बहिरि**त्यादि। **यद्वा**योग्येत्यस्याविषयेत्येवार्थः। इत्थञ्च पित्तदोषचाक्षुषत्वेनैव तज्जातिवारणेऽप्यात्मत्ववारणाय **बहिरिति**। **अनेन** विशेष्यासिद्धिनिवारकेणानुमानेन। **द्रव्या**न्तरबाधात्तद्वशात्। शब्दाश्रयत्वेन तुल्यवित्तिवेद्यतया तत्प्रकारकेण। सिद्ध्यति परिशेषानुमानगोचरीभवति।

तथाहि शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितोऽष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादित्यनुमानेन शब्देऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं ज्ञाते तथाविधद्रव्ये शब्दाश्रयत्वं तुल्यवित्तिवेद्यत्वाज्ज्ञायते। **विशेष**णासिद्धिः कथं वारणीयेति **चेच्छब्दो** न स्पर्शवदाश्रितः पाककारणगुणजन्यप्रत्यक्ष-विशेषगुणत्वाज्ज्ञानवदेतेनाष्टद्रव्यानाश्रितत्वग्रहोपयोगितया स्पर्शवदनाश्रितत्व-मेवाकाङ्क्षितमिति स्पर्शवद्विशेषगुणत्वाभावे साध्येऽर्थान्तरमिति दूषणं **निरस्तम्।** नाप्यात्माश्रितः श्रावणत्वात् सुखादिसकलात्मगुणग्राहकतया लाघवेनैकस्य मनस सिद्धः। न दिक्कालमन आश्रितो विशेषगुणत्वादित्यनेन। **नन्वे**तच्छब्दस्य विशेषगुणत्व एवोपपद्यते तत्रैव तु मानं न जानीम इति **चेच्छब्दो** विशेषगुणो लौकिकप्रत्यासत्त्या द्वीन्द्रियाग्राह्येन्द्रियग्राह्यगुणत्वव्याप्य**जाती**यत्वादित्यवेहि। **सङ्ख्यादिरपरत्वान्तो द्रवत्वस्नेहवेगका** इत्युक्ता दश द्वीन्द्रियग्राह्यास्त्रसरेणुपरिमाणगतापकृष्टत्वाख्यजातिव्यावृत्तये गुणविभाजकार्थकं गुणत्वव्याप्ये**ति। न च** कारणगुणप्रक्रमेण वायोर्विशेषगुण एवासाविति **वाच्यम्।** अयावद्द्रव्यभावित्वात्। **अयं** कदाचिदनुभूयमानः। तेन बिम्बाश्रितत्वस्य मन आश्रितत्वस्य च बाधोऽवगतः। इतरत् स्पष्टम्। अनुमानेनेत्यादि प्राग्वत्।

तात्पर्यटीका

तावन्मात्रञ्च, चाक्षुषप्रतिबन्धकताननतिरिक्तवृत्तित्वमात्रं च। चक्षुषाप्यग्राह्येति। तेन तस्य चाक्षुषप्रतिबन्धकत्वमावश्यकमन्यथा

परेषामनुभूयमानारोपहेतूद्भूतरूपवतश्चाक्षुषस्य वारयितुमशक्यत्वादिति **सूचितम्**। बहिः पदं सार्थकयितुं पक्षान्तरमाह यद्वेति। **पूर्व**कल्पे तु त्वगग्राह्येत्यादिहेत्वन्तरविकासकं तदन्यथानिरुक्तयोग्यताघटिते क्वापि हेतौ न बहिः पदमर्थवत्**तथा** हि चक्षुर्ग्रहणायोग्यत्वघटनया वायुत्ववदात्मत्वस्यापि वारणेऽपि न दोष जोतेश्चेन्द्रियग्राह्यत्वमात्रेण वारणे किं च त्वग्ग्रहणायोग्यत्वघटनया निःस्पर्शात्मत्वस्य वारणे वायोरतीन्द्रियत्वेऽपि स्पर्शवद्वायुत्वजातेस्त्वाचप्रतिबन्धकतानतिरिक्तवृत्तित्वाभ्युपगमेऽपीन्द्रियग्राह्यत्वमात्रेणैव वारणे क्वान्यत्र प्रसङ्गो येन बहिःपदमर्थवद्भवेदिति बोध्यम्। **पित्तदोषचाक्षुषत्वेनैवेति। पित्त**दोषस्य चाक्षुषत्वाङ्गीकारे बाधकाभावेनैवेत्यर्थः। **एतेन** तस्याचाक्षुषत्वे चाक्षुषप्रतिबन्धकत्वाङ्गीकारश्चक्षुर्ग्रहणोग्येत्यस्य तत्प्रतिबन्धकतानतिरिक्तवृत्तित्वार्थकत्वकल्पनं बहिःपदानर्थक्यञ्चेति दूषणान्यलग्नकानि बोध्यानि। **तज्जा**तिवारणेऽपीति। तथा च तद्वारणायोपात्तं बहिरित्याद्यनर्थकमिति भावः।

तुल्यवित्तिवेद्यत्वात्तदुत्तरमानसविषयत्वाद्वा शब्दान्यसकलात्मगुणग्राहकतैव मनसोऽङ्गीक्रियतेऽनुभवानुरोधादित्युक्तावाह **वक्ष्यते**[१] **चेति**। जीवानां प्रत्येकं तथात्त्वे विनिगमनाविरहादतिरिक्ताकाश आवश्यक इति वक्ष्यत इति भावः। **अयावदद्रव्यभावित्वादिति**। स्वाश्रयनाशजन्यनाशप्रतियोगि यद्यत्तद्भिन्नत्वादित्यर्थः। अन्यथा वायौ विदूरलम्बिन्येकस्मिन् सति दूरसमीपस्थयोः पुरुषयोस्तारमन्द्रशब्दभेदप्रत्ययो न स्यात्। इतरत् पृथिव्यादित्रयानाश्रितत्वम्। **स्पष्टमिति**। तत् त्रयाश्रितस्पर्शस्य पक्षबहिःकरणादित्याशयः। **प्राग्वदिति**। अनुमानेनेत्यस्य पूर्वोक्तमेवार्थं स्पर्शाश्रयत्वेनेत्यस्य तुल्यवित्तिवेद्यत्वादितितदुत्तरमानसविषयत्वादिति वा शेषं च कृत्वा व्याख्येयमित्यर्थः।

---

१. वक्ष्यतं चाधिकमुपरिष्टात्।

तर्कामृतम्

काले प्रमाणं यथा–परत्वापरत्वे द्विविधे कालिके दैशिके च[१], परत्वोत्पत्तिश्च बहुतररविक्रियाविशिष्टशरीरज्ञानात्[२]। अपरत्वोत्पत्तिश्च स्वल्पतररविक्रिया- विशिष्टशरीरज्ञानात्। तत् परत्वं ज्येष्ठत्वम्, अपरत्वं कनिष्ठत्वम्। तदनुमानं यथा–परत्वजनकं, बहुतररविक्रियाविशिष्टशरीरज्ञानमिदं परम्परासम्बन्धघटक- सापेक्षं साक्षात्सम्बन्धाभावे सति विशिष्टज्ञानत्वात्, लोहित: स्फटिक इति प्रत्ययवत्।

परम्परासम्बन्धश्च[३] स्वसमवायिसंयुक्तसंयोग:। तेन सम्बन्धघटक: काल: सिध्यति। ननु कालस्य भूतभविष्यद्वर्त्तमानभेदेन बहुत्वात् कुत एकत्वमिति चेन्न। उपाधिभेदेन भेदप्रत्ययात्[४] कालोपाधयो रविक्रियादिरूपा भिन्ना एव।

तरङ्गिणी

तदनुमानम्। काले प्रमाणभूतं परत्वेत्यादि। इदमन्तं पक्षनिर्देश:। रविविशेष्यकर- विक्रियाविशिष्टज्ञाने साक्षात्सम्बन्धाभावघटितहेतो: स्वरूपासिद्धिर्बाधश्चेत्यत: **परत्वजनकमिति**। तथा च शरीरविशेष्यकं दिनादिरूपरविक्रियाविशिष्टज्ञानं पक्ष:। इदमुभयमपीदं पदार्थपरिचायकम्। नातस्तद्वैयर्थ्यम्। विशिष्टज्ञानत्वमात्रं गौरित्यादिविशिष्टज्ञाने **व्यभिचारीति**। **साक्षात्सम्बन्धाभावे सतीति**। अखण्डपदार्थनिष्ठसांसर्गिकविषयताऽनिरूपकत्वं तदर्थ:। तावन्मात्रं च निर्विकल्पके व्यभिचारिति विशेष्यम्। **स्वसमवायिसंयुक्तेति**। स्वं रविक्रिया तत्समवायी रवि:। तत्संयुक्तत्वेन काल: सिद्ध्यति।

---

१. 'चेति' पुस्तकान्तरं पाठ:।

२. 'तत्परत्वं ज्येष्ठत्वमपरत्वोत्पत्तिश्च स्वल्पतररविक्रियाविशिष्टशरीरज्ञानात्तदपरत्वं कनिष्ठ-त्व'मिति पुस्तकान्तरपाठ:।

३. 'रविक्रियाया: इत्यधिक: पाठ: अन्यत्र।

४. 'तदभेदप्रत्ययात्' इति पाठान्तरम्।

चषकम्

काले प्रमाणं यथा तदुच्यत इति शेष:। दिक्कालानुमानहेतुपक्षद्वयज्ञानाय तद्घटकपरत्वापरत्वे विभजते। **परत्वापरत्वे इति**। पक्षासिद्धिं परिहर्तुं पक्षे विशेषणं घटयति। **परत्वोत्पत्तिश्चेति**। **रविक्रिया** दिनादिरूपा। **ज्ञानादिति**। द्वित्वोत्पत्तिरिवापेक्षाबुद्धेर्निमित्तकारणात् कालपिण्डसंयोगोऽसमवायिकारणमित्यादिसर्वमत्रानुसन्धेयम्। ज्येष्ठत्व-बुद्धेरनेकक्रियाविषयत्वे गौरवादतिरिक्तपरत्वसिद्धिरेवमग्रेऽपीत्याह। **तत्परत्व**मित्यादिना कनिष्ठत्वमित्यन्तेन। **बहुतरेति। इदमु**पलक्षणम् स्वल्पतरेत्यपि **बोध्यम्।** तेनापरत्वजनकं स्वल्पतरेत्यादिपक्षकमप्यनुमानं तथेत्युक्तप्रायम्, इदमित्यस्य पक्षनिर्देशता विशेषद्वयस्येदम्पदार्थपरिचायकतां च द्योतयितुं प्राग्भाव:। अन्यथोक्तज्ञानसामान्यस्य पक्षत्वे बाधकाभावेनेदमिति विशेषणस्याव्यावर्त्तकतापत्ते:। न हि श्रृङ्गग्राहिकयोपादानेऽपि गां कपिलात्वेन कश्चिद्विशिनष्टि।

साक्षात्सम्बन्धाभावे सत्यखण्डपदार्थनिष्ठसांसर्गिकविषयत्वानिरूपकत्वे सति। **न च** दृष्टान्तस्य साधनवैक**ल्यम्**।। साक्षात् सम्बन्धेन तदभावग्रहेऽपि तथाग्रहात्। न च दोषविशेषजन्यत्वान्नायं दोष इति **वाच्यम्।** अन्वयव्यतिरेकाभ्यां सान्निध्यात्मकस्यैव दोषस्यापेक्षायां लाघवात्तस्य विषयत्वस्यैवौचित्यादिष्टं च दोषाजन्यत्वात् प्रमात्वं त्वस्येष्टमेवेति बोध्यम्। ।**स्वं** रविक्रिया तत्समवायी रविस्तत् संयुक्त: काल: सिद्ध्यति। **यद्यपि** प्रभावाय्वादिसंयोगपरम्पराया अपि घटकत्वं सम्भवति **तथापि** कल्पनालाघवं यत्र तं पक्षं रोचयामहे इति लाघवस्यानुकूलतर्कत्वप्रतिपादनाल्लाघवादेक: काल: सिद्ध्यतीत्याशयेनेदमत एव शङ्कतं। **नन्विति**। अत्रैव समाधत्ते **न च वाच्यमिति**। तत्र हेतुमाह। **तद्भेदप्रत्ययादिति**। तथा च न वस्तुबाहुल्यं प्रतीतिवैचित्र्यं तूपाधिवैचित्र्यादिति भाव:।

भिन्ना एवेति। उदयमारभ्यास्तपर्यन्तास्ता दिनस्यास्तमारभ्योदयपर्यन्ताश्च रात्रेर्व्यवहारस्य विपयं तं परिछिन्दन्तीत्याशय:।

तात्पर्यटीका

रविक्रियायाः प्रत्येकं परिच्छेदाशक्यत्वाद्व्याचष्टे। **दिनादिरूपेति। द्वित्वोत्पत्तिरिवेति।** तेन तन्नाशनाश्यत्वादिकं द्वित्वप्रकरणोक्तं सर्वं दर्शितम्। सर्वमित्यनेन तु परत्वापरत्वयोर्ज्येष्ठत्वकनिष्ठत्वाभ्यां दूरत्वसमीपत्वाभ्याञ्च गतार्थत्वं गुणप्रकरणोक्तं तद्दूषणञ्च दर्शितम्। परत्वादिशब्दोल्लेखिनी प्रतीतिर्नास्त्येव वा कालिकदैशिकपरत्वादिसाधारणी वा नास्तीत्यभिप्रेत्य ज्येष्ठत्वबुद्धे**रित्युक्तम्।**

तर्कामृतम्

एवं दैशिकपरत्वापरत्वाभ्यां दिशः सिद्धिः। ते च दूरत्वसमीपत्वे। अवधिसापेक्षबहुतरसंयोगविशिष्टशरीरज्ञानमिदं परत्वजनकं परम्परासम्बन्ध-घटकसापेक्षमित्यादि पूर्ववत्। तेन च दिशः सिद्धिः।

तरङ्गिणी

अवधिसापेक्षेति। यथा प्रयागात् काशीतो गया परा, गयातः काश्यपरेति। अत्राद्येऽवधिःकाशी। तदपेक्षयाप्रयागावधिकबहुतरसंयोगवत्त्वं गयायाम्। द्वितीयेऽवधिर्गया। तदपेक्षया प्रयागाधिकाल्पतरसंयोगवत्त्वं काश्याम्। न च प्रयागप्रतियोगिकबहुतरसंयोगा गयायाम्। न वा प्रयागसंयुक्तदेशीयाः, किन्तु प्रयागावधिकाः काश्यपेक्षया बहुतरा ये मध्यवर्तिदेशसंयोगास्तद्वत्त्वम्। तच्च न साक्षात्किन्तु तावत्समवायिसंयुक्तत्वरूपपरम्परयेति तावत्समवायिदिक्सिद्धिः। न च प्रयागसमीपवर्तिन्यपि तादृशयावत्संयोगाश्रयदिक्संयुक्तत्वात्परत्वापत्तिः। प्रयागावधिका ये काश्यपेक्षया बहुतराः संयोगास्तदन्तःपाती तद्देशप्रतियोगिकसंयोगोऽपीति तत्प्रतियोगिकसंयोगस्य तस्मिन्साक्षात्परम्परया वानङ्गीकारात्।

चषकम्

उक्तां युक्तिं वक्तुमाह। **ते चेति**। चैत्रमैत्रयोः पूर्वापरीभूतयोरितरनिरपेक्षस्य रविक्रियान्यूनाधिकभावस्येव काशीगययोरान्तरालिकमूर्तसंयोगानां परस्परं तौल्येन तद्बहिर्भूतसाधारणमूर्तसंयोगानां न्यूनाधिकभावस्य अवधारणत्वेन च तस्य सावधिकत्वात् पक्षमधिकं विशिनष्टि।

अवधिसापेक्षमिति। बहुतरसंयोगेति मूर्तमध्यम्। बहुतरेति व्याख्यातप्रायार्थम्। **अत** एव दैशिकपरत्वापरत्वाभ्यामित्युक्तम्। अस्यैव समुच्चयाय **तेन चेति वक्ष्यतीति** बोध्यम्। **इदं** परत्वजनकमिति व्यत्यासस्तु परिचायके पूर्वंनिर्देशरूपस्योद्देश्यविशेषणनियमस्य व्यत्यासस्फोरणाय। **यद्यपि** हेतुदृष्टान्तश्च पूर्व एव **तथापि** शङ्कोत्तरयोर्भेदं सूचयितुं पूर्ववदित्यु**क्तम्।**

तथा हि। तत्र तथा दिनरात्र्यादिव्यवहारभेदास्तथात्र पूर्वापरादिव्यवहारभेदाः। **एवं** तत्र यथा रविक्रिया तथात्र मूर्तमुपाधिस्तथा च प्रयागात् काशीतो गया परेत्यत्र व्यवहारे हेतुः काशीप्रयागान्तरालमूर्त्तदेशसंयोगाधिक-देशसंयोगवन्मूर्त्तवृत्तिर्गयेति प्रयागाद्गयातः काश्यपरेत्यत्र गयाप्रयागान्तराल-मूर्त्तदेशसंयोगन्यूनदेशसंयोगवन्मूर्त्तवृत्तिः काशीति च बोधः। **न चैक**स्मिन् मूर्ते स्वल्पा बहवो वा संयोगाः साक्षात् सम्भवन्ति द्वयोर्द्वयोरेकैकसंयोगा**दिति** तादृशयावन्मूर्त्तसंयुक्तदिक्संयोगवन्मूर्त्तं तां परिच्छिनत्ति। पूर्वोत्तरादिव्यवहाराणां तूदयमेर्वोः सन्निहितमसन्निहितञ्च मूर्त्तम्। **यदुक्तम्। 'सर्वेषामेव वर्षाणामेरुरुत्तरतः स्थित**' इति। **न च** मेरोर्दक्षिणोत्तरव्यवस्थोदयात् पूर्वपश्चिमव्यवस्था च भवतु नाम तयोस्तु कथं परस्परं दिग्व्यवस्थेति **वाच्यम्**। अस्याः कर्मभूमिबहिर्भूतभूतलकथाया मूर्खविचारणापर्यवसितत्वा**दपि** चासर्वदर्शिनामत्र तर्काप्रतिष्ठानाज्**ज्यो**षमध्याध्वम्। **तदप्युक्तमचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदिति।**

तात्पर्यटीका

साक्षात् सम्बन्धाभावे सतीति। सप्तम्या विशिष्टबुद्धित्वे सामानाधिकरण्यं बोध्यते तच्च तन्निष्ठसांसर्गिकविषयतानिरूपकत्वाभावे एव पर्यवस्यतीत्याह-

खण्डपदार्थनिष्ठेति। **इष्ट**मेवेत्येवकारेणारोप्यमाणधर्मधर्मिसान्निध्ये दोषनिरपेक्षे (दोषे सान्निध्यानपेक्षे) धियां परम्परासम्बन्धावगाहिता**न्यथा** त्वन्यथाख्यातिरेवेति सूच्यते। **अत** एवासां बाधादिबुद्ध्यविरोधित्वमौपाधिकत्वञ्च निर्वहति। वायौ प्रभान्तर्वर्तिनि न प्रभा खंडापर्णादौ च वाय्वन्तर्वर्तिनि न वायोरखण्डतेति संयोगपरम्पराया इत्यु**क्तम्। अत** एव पशुनेतिवत् काल इत्येकवचनार्थैकत्वविवक्षावशादे**वान्यथा** कुत एकत्वमित्यनुक्तोपालम्भापत्तेः।

उक्तां युक्तिमिति। दूरत्वसमीपत्वबुद्धिविषयता यद्यनेकमूर्तसंयोगानां तदा गौरवमेकैकपरत्वापरत्वविषयत्वे लाघवमित्युक्तां युक्तिमित्यर्थः। **तस्य** न्यूनाधिकभावस्य। **व्याख्यातप्रायेति**। बहुतरेत्यस्य स्वल्पतरोपलक्षणपरतया व्याख्यानस्य प्रदर्शितत्वादिति भावः। रविक्रियाबाहुल्यस्योपलक्षणतया रविक्रिया-स्वल्पतायाः प्रतिपादनेऽपि मूर्तसंयोगस्वल्पता न प्रतिपादितैवेत्यतः **प्राय**पदम्।

काशीप्रयागान्तरालेति। **यद्यपि** प्रयागावधिककाशीप्रतियोगिकपरत्ववती गयेत्येतद्वाक्याधीनो बोधो न तु निरुक्तः परत्वाविषयकत्वाद् व्यवहारे च व्यवहर्त्तव्यस्यैव ज्ञानं हेतुर्व्यवहर्तव्यं परत्वं **तथापि** व्यवहर्त्तव्यज्ञानोपजीव्यत्वादिदमपि ज्ञानं व्यवहारेहेतुरिति तथोक्तम्। प्रयागपूर्वत्वं काशीपश्चिमत्वञ्च पञ्चम्योरर्थः मूर्त्तदेशसंयोगाधिकदेशसंयोगवन्मूर्त्तवृत्तिः परार्थः। **न चैकस्मिन्निति कण्टको**द्धारवाक्यम्। **तादृशेति**। आन्तरालिकमूर्त्तदेशसंयोगाधिकरणेत्यर्थः। भ्रान्तः शङ्कते **न चेति**। अभ्युपेत्य समाधत्ते। **अस्या इति**।

तर्कामृतम्

न चाकाशमेव सम्बन्धघटकमास्तामिति वाच्यम्, तस्य शब्दाश्रयत्वेनैव धर्मिग्राहकप्रमाणसिद्धत्वात् न रविक्रियाद्युपनायकत्वसम्भवः।

तरङ्गिणी

उभयत्राशङ्कते-**नचेति**। आकाशमित्युपलक्षणम्। आत्मा (?)। रविक्रियाविशिष्टबुद्धौ दिक्, अवधिसापेक्षतादृशसंयोगविशिष्टबुद्धौ काल

इत्यपि बोध्यम्। धर्मिग्राहकप्रमासिद्धत्वादिति। धर्मिण आकाशस्य ग्राहिका या प्रमा पूर्वोक्तशब्दपक्षकानुमितिः। शब्दाश्रयत्वेन तुल्यवित्तिवेद्यतया तद्विषयत्वादित्यर्थः। तेषां सम्बन्धघटकत्वे हिमवत्यपि विन्ध्यवत्त्वप्रतीत्यापत्तिः, कालदिशोस्तु यत्सम्बन्धघटकत्वेन सिद्धिस्तद्विशिष्टबुद्धिमात्रनियामकत्वेनानति-प्रसङ्गात्। रविक्रियाद्युपनायकत्वं रविक्रियोपनीतभाननियामकत्वम्।

चषकम्

वस्तुतस्तु न हि कश्चिदुदयाचल इत्यखण्डोऽस्ति येनोक्ताऽव्यवस्था स्यात् **परन्तु** यद्द्वीपस्थितस्य पुंसो यद्देशे विद्यमानः सूर्यः प्राथमिकखण्डमण्डलदर्शनयोग्यस्तस्य सा प्राची। **एवं** प्रथमपदस्थाने चरमपदं प्रक्षिप्य पराच्यपि निर्वक्तव्येति **दिक्**। **आका**शमेवेत्येवकारेण दिक्कालयोर्व्यवच्छेदः। **आस्तामिति** तथाचातिलाघवमिति भावः। **तस्येति** यत इत्यादिः। तुल्यवित्तिवेद्यतया शब्दाश्रयत्वप्रकारेण धर्मिग्राहकप्रमाणेन पूर्वोक्तपरिशेषानुमानेन सिद्धत्वादनुमितत्वादेव रविक्रियादेरादिना मूर्त्तसंयोगस्य परिग्रहः। उपनायकत्वस्य संसर्गघटकतया तदुपनीतविशिष्टबुद्धिविषयत्वस्य सम्भवो नेत्यर्थः। **अयं** भावः। आकाशस्य क्लृप्तस्य सम्बन्धघटकत्वे तथाविधैर्जीवैः प्रत्येकं विनिगमनाविरहः। अस्माकं त्वक्लृप्तस्य सम्बन्धघटकतया कल्प्यमानस्य क्लृप्तैर्न तत्प्रसक्तिरिति।

तात्पर्यटीका

भ्रान्तिमुद्घाटयति। **वस्तुतस्त्विति**। पराच्याः प्राचीत्वस्य प्राच्याः पराचीत्वस्य च व्यावृत्तये प्राथमिकेत्यादिविशेषणमित्याह **दिगिति**। **अतिलाघवमिति**। एककालकल्पनया यल्लाघवमुपन्यस्तं ततोऽपि तदकल्पनेऽस्ति लाघवमित्यर्थः। **धर्मि**ग्राहकप्रमाणसिद्धत्वादिति तूपनायकत्वासम्भवे हेतुरतोसम्भवस्य न च वाच्यमित्यत्र हेतुत्वप्रापणाय पूरयति। **यत इति**।

तर्कामृतम्

अहं सुखीत्यादिप्रत्यक्षमात्मनि प्रमाणम्। ईश्वरे चानुमानं-यथा क्षितिः सकर्तृका कार्यत्वात् घटवत्[१]। तेनेश्वरस्य तद्वृत्तिनित्यज्ञानेच्छाकृतीनां तत्सार्वज्ञ्यस्य च सिद्धिः।

तरङ्गिणी

क्षितिः। द्व्यणुकमित्यर्थः। तेन क्षितित्वसामानाधिकरण्येन सकर्तृकत्वसाधने सिद्धसाधनम्, अवच्छेदकावच्छेदेन तत्साधने बाधः, पटादौ कुविन्दादिकर्तृकत्वसिद्धेः, नित्ये परमाण्वादौ सकर्तृत्वस्याभावादिति प्रत्युक्तम्। यद्वा समवायकालिकविशेषणतोभयसम्बन्धेन क्षितित्वस्य पक्षत्वावच्छेदकत्वान्न नित्यसाधारण्यम्। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वाच्च नांशतः सिद्धसाधनं दोष इति। सकर्तृकत्वं चोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम्। कार्यत्वं च प्रागभावप्रतियोगित्वे सति ध्वंसप्रतियोगित्वम्। तेन ध्वंसे न व्यभिचारः। **तेनेश्वरस्येति**। तादृशज्ञानचिकीर्षाकृतिमत्त्वमस्मदादेरसम्भवि। तदुपादानस्य परमाणोरतीन्द्रियत्वात्। योगिनामपि परमाणोरपरोक्षज्ञानासम्भवात्, सर्गाद्यकालीनद्व्यणुकादौ तदसम्भवाच्च तादृशज्ञानचिकीर्षाकृतिमत्त्वमस्मदादेरसम्भवि। लाघवाच्च तादृशज्ञानचिकीर्षाकृतीनां नित्यत्वम्, तस्य चैकत्वम्। तत्सार्वज्ञ्यस्य। ईश्वरे सर्वज्ञत्वस्य। विनिगमनाविरहेण नियामकाभावेनेश्वरज्ञानादौ सर्वविषयकत्वसिद्धेरिति भावः।

चषकम्

अहं सुखीत्यादि। न चाहमित्यादीत्येव वक्तुमुचितं किं सुखान्तर्भावेणेति **वाच्यम्**। योग्यविशेषगुणपुरस्कारेणैवात्मनः प्रत्यक्षं भवति न तद्विनिर्मोकेणेति तथोक्तेः। न चात्मा तावन्न प्रत्यक्ष इति सूत्रभाष्यविरोध इति **वाच्यम्**।

---

१. 'घटवदिति' पाठान्तरम्।

आत्मतत्त्वविवेके परमात्माभिप्रायेण भाष्यव्याख्यानस्य प्रदर्शितत्वात्। **अत एव** तमभिप्रेत्यैवोक्तम्, [1]**प्रवृत्याद्यनुमेयोऽयं रथगत्येव सारथिरि**ति। अनुमानप्रयोगस्तु, परदेहः, प्रयत्नवदात्माधिष्ठितश्चेष्टाश्रयत्वाद्रथवदिति। यो यज्जातीय क्रियावान् स तज्जातीयक्रियाप्रयोजकप्रयत्नवदात्माधिष्ठित इति सामान्यमुखव्याप्तेः। **न च** तथाप्यहं गौर इतिवदेतत्प्रतीतेः शरीरमेव विषयस्त्विति **वाच्यम्।** इन्द्रियाद्यधिष्ठातृतयेन्द्रियशरीराद्यतिरिक्तात्मसिद्धेः। अचेतनं कुठारादिचेतनाधिष्ठितया चेतनव्यापार्यं सच्छिदादि करोतीति व्याप्तेः। व्यापारश्चात्मा मनसा मन इन्द्रियेणेन्द्रियमर्थेनेति। तथा चेन्द्रियादि चेतनव्यापार्यं करणत्वादित्यनुमानेनातिरिक्तात्मसिद्धौ कृतिसमानाधिकरणसुखादीनामपि तद्धर्मत्वेन शरीरविषयत्वस्योक्तप्रतीतावसम्भवात्। **किञ्च** शरीरादेः कर्त्तृत्वे कर्त्तृभोक्तृभेदप्रसङ्गेन कृतहानाकृताभ्यागमप्रसङ्गात्।। **क्षितिरिति** कार्यमित्यर्थः। **यदुक्तम्–**

[2]**कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।**
वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः।। इति।।

अस्यार्थः। कार्यात् कार्यपक्षकानुमानाद्यथोक्तादेवा**योजनादा**-युज्यतेऽनेनेत्यायोजनं कर्म तत्पक्षकानुमाना**द्यथा** परमाणुकर्म, प्रयत्नजन्यं तत्त्वाद् ब्रह्माण्डधृतिनाशपक्षकमप्**येवमेव। पदा**द्व्यवहारपक्षकानुमाना**द्यथा** गवादिव्यवहारः, स्वतन्त्रपुरुषप्रयोज्यस्तत्त्वाल्लिपिवत्। **प्रत्ययतः** सामान्यतो दृष्टात् पक्षधर्मताबला**देवम**न्यत्रापि। **यथा** वेदजन्यप्रमा, वक्तृयथार्थज्ञानजन्या शाब्दप्रमात्वात्। **श्रुते**स्तत्पक्षकाद्व्यतिरेकिणो **यथा** वेदोऽसंसारिपुरुषप्रणीतस्तत्त्वाद्। **वाक्याद्** वेदवाक्याद् **यथा** वेदः पौरुषेयो वाक्यत्वात्। **सङ्ख्या**विशेषाद् **यथा** त्र्यणुकपरिमाणजनिका सङ्ख्यापेक्षाबुद्धिजन्यैकत्वान्य- सङ्ख्यात्वादित्यनुमानादिभ्योऽव्ययो विश्ववित् साध्यः साक्षात् परम्परया वानुमेय इति। **एतेन** यथाश्रुते परमाणौ बाधो

---

१. कारिकावली
२. न्यायकुसुमाञ्जलिकारिका

घटादौ सिद्धसाधनं वेति **परास्तम्।** कार्यसामान्य एव साध्यसिद्धेरुद्देश्यत्वादत एव पक्षतावच्छेदकस्य हेतुत्वेऽपि न सिद्धसाधनमिति बोध्यम्।

सकर्तृकेति। तत्त्वञ्च स्वोपादानगोचरज्ञानचिकीर्षाकृतिमज्जन्यत्वम्। तत्तत्कार्यं प्रति तत्तदुपादानप्रत्यक्षविधयोपादानप्रत्यक्षस्य प्रवृत्तिद्वारा हेतुत्वे यद्विशेषयोरिति व्याप्त्या कार्यसामान्येऽपि तस्य तेन रूपेण हेतुत्वं स्वतन्त्रान्वयव्यतिरेकाभ्यां च कर्त्तुरपीति सूचयितुमुपादानगोचरत्वोल्लेखः। तेन ध्वंससाधारण्येन कृतिजन्यत्वप्रवादोप्युपपन्नः। **कार्यत्वादिति।** प्रागभावप्रतियोगित्वादित्यर्थः। एतादृशानुमितौ लाघवज्ञानसहकारेण ज्ञानेच्छाकृतिष्वपि नित्यत्वमेकत्वञ्च भासत इति नित्यैकैकतत्सिद्धिरित्याह। **तेनेति। न च** गुणे गुणानङ्गीकारात् **कीदृशमेकत्वं ज्ञानादौ** भासतामिति **वाच्यम्।** स्वाश्रयावृत्ति स्वभिन्नतत्कत्वस्यैव तत्र भानाङ्गीकारात्। न चानुकूलतर्काभावेनेदमनुमानमप्रयोजकमिति **वाच्यम्।** कर्तृत्वेन कार्यत्वेन कार्यकारणभावस्यैवानुकूलतर्कत्वात्। **एतेन** साध्यव्याप्यत्वस्य हेतौ निश्चये हेत्वव्यापके शरीरजन्यत्वे साध्यव्यापकत्वसन्देहस्याप्यसम्भवेन तस्योपाधित्वशङ्काप्यपाकृतेति वेदितव्**यम्। तत् सार्वज्ञ्यस्य** चेति। **कथमन्य**थोपादानगोचरत्वस्येश्वरज्ञानाद्यवृत्तेः कारणतावच्छेदकत्वं **कथं** वा परमाणुपर्यन्तापरोक्षसाक्षात्कार इति भावः।

तात्पर्यटीका

अहमित्यादीत्यादिना वयमित्स्य परिग्रहः। दृष्टान्तस्य साधनवैकल्यं परिहर्त्तुं सामान्यमुखीं व्याप्तिं दर्शयति। **यो यज्जातीयक्रियावानिति। ननु** चेतनव्यापार्यत्वं साधितेऽपि शरीरस्यैव चैतन्यमस्तु किमतिरिक्तेनात्मना मृतशरीरे चैतन्याभावस्तु शरीरप्राणसंयोगरूपसहकार्यभावेन तव मुक्तात्मनीवोपपत्स्यत इत्यतो दोषान्तरमाह **किञ्चेति।**

सामान्यतो दृष्टात् पक्षधर्मताबलादिति। तथा च प्रकृतेऽन्वयव्याप्तिग्रहसम्भवेऽपि पक्षविशेषे साध्यविशेषस्य सिद्धौ पक्षधर्मताहेतोः सहकारिणीत्यर्थस्तेन वेदजन्यप्रमायां वक्तृयथार्थज्ञानजन्यत्वानुमितिरी

श्वरस्यैवोक्तज्ञानजन्यत्वमादाय पर्यवस्यतीति भावः। **एवमन्यत्रापीति**। अनुक्तविशेषे सर्वत्राप्यनुमाने इत्यर्थः। **व्यतिरे**किणो यदसंसारिपुरुषप्रणीतं न तद् वेदो न यथास्मदादिवाक्यमिति व्यतिरेकसहचारमात्रगृहीतात्। **असंसारीति**। मिथ्याज्ञानवासनावान् यः संसारी तदन्य इत्यर्थः। **यथा**श्रुते क्षितित्वस्य पक्षातावच्छेदकत्वे **बाधः** पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे **सिद्ध**साधनं पक्षातावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे।

कार्यसामान्येऽपीति। अन्यथा कार्यसामान्याभावे तत्तत्कारणाभावकूटस्य प्रयोजकत्वकल्पने गौरवादिति **भावः। अत** एवानुमितिं भावयतोपीश्वरज्ञानस्येत्युक्तमनुमानदीधितौ **भावयत** उपादानप्रत्यक्षविधया जनयत इति च तद्व्याख्यातम्। ईश्वरप्रत्यक्षस्यैकत्वेन विशेषकारणतयां गृहीतावच्छेदकभावस्य तस्यैव सामान्यकारणतायां तथात्वेऽप्यविरोध इति तेषामाशयः। तत्र ज्ञानादौ। **इद**मुपलक्षणम्। कर्त्रनुमानस्य कृत्युमानपूर्वकत्वात् सर्वकार्यकारणकृतिमन्निष्ठभेदप्रतियोगितानवच्छेदकैकत्वं कर्त्तुर्भासते न त्वेकत्वमात्रं तस्याव्यावर्त्तकत्वादित्यपि द्रष्टव्यम्। अनुकूलतर्कार्थकमेतेनेति निश्चयान्वयि। असम्भवेनेत्यपाकरणान्वयि। **अन्यथेति**। तत्सार्वज्ञानङ्गीकार इत्यर्थः। **निर्विष**यकत्वे ज्ञानवृत्तित्वासम्भवो यत्किञ्चिद्विषयकत्वे विनिगमनाविरह इत्यभिप्रेत्योक्त**मीश्वरज्ञानाद्यवृत्तेरिति**। लौकिकाध्यक्ष-सामग्रीसमवहितविषयकत्वे त्वाह **कथम्वेति।** तथा **चेत्थ**मपि तस्य कारणतावच्छेदकत्वकथन्ताऽविशिष्टैव न्यूनवृत्तित्वाविशेषादिति भावः।

तर्कामृतम्

मनसि प्रमाणं यथा[१], सुखादिप्रत्यक्षमिन्द्रियजन्यं जन्यप्रत्यक्षत्वात् घटप्रत्यक्षवत्। तथा चेन्द्रियान्तरबाधे मनसः सिद्धिः।

---

१. 'तद्यथा' इति पाठान्तरम्।

तरङ्गिणी

प्रत्यक्षत्वमात्रमीश्वरप्रत्यक्षे व्यभिचारि। **जन्येति**। इन्द्रियान्तरबाधे इन्द्रियान्तरजन्यत्वबाधे, सुखादीनां चक्षुराद्ययोग्यत्वादिति भावः।

चषकम्

तद्यथानुमानं यथा। **सुखादीत्यादिना** दुःखादियोग्यसकलात्मगुणपरिग्रहः। तदुक्तम्-[1]**मनो ग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिरिति**। **जन्यप्रत्यक्षत्वादिति**। ईश्वरप्रत्यक्षे व्यभिचारवारणाय **जन्येति**। **इन्द्रियान्तरबाध इति**। विशीर्णशष्कुलीकादीनामपि सुखोपलब्धेर्ज्ञानादीनां चक्षुराद्ययोग्यत्वादिति भावः। **सिद्धिरिति**। **ननु** भौतिकाः परमाणव एव मनांसि भवन्तु किमतिरिक्तकल्पनयेति **चेन्न**। सुषुप्तौ तद्व्यतिरेकासम्भवेन ज्ञानाद्यनुत्पत्यनिर्वाहात्। **तद्विशेषा** एव भवन्त्वित्यपि न। पार्थिवत्वादिनियमे मानाभावादनियमे जातिसङ्करप्रसङ्गात्। **तेषां** पृथिव्यादित्वे मानाभावाच्च। मनसोऽतिरिक्तत्वे च पुरीततिवर्तमानेनानेन सह त्वगिन्द्रियस्य संयोगाभावाज्ज्ञानसामान्यकारणाभावेनैव ज्ञानानुत्पत्तिरुपपद्यते। **न चैवं** चाक्षुषकालेऽनावश्यकरसनमनोयोगाभावादेव रासनस्य वारणसम्भवेऽपि स्पार्शनस्य वारणं न सम्भवति चाक्षुषान्यथानुपपत्या चक्षुर्मनोयोगस्य त्वङ्मनोयोगस्य चावश्यकत्वादिति **वाच्यम्**। अनायत्यानुभवसिद्धचाक्षुषसामग्र्याः स्पार्शनप्रतिबन्धकत्वाभ्युपगमात्।

मनःक्रियाजन्यपुरीतति संयोगात् पूर्वं विजातीयात्ममनोयोगाभावेनैव सुषुप्तिकाले ज्ञानानुत्पादसम्भवे तत्र त्वङ्मनोयोगहेतुत्वस्यैवाकल्पनाद्वा तदभिप्रेत्यैव [2]यदसम्बन्धात् परैस्त्वगादिभिरित्युक्तं पञ्चाननैः।

---

१. कारिकावली

२. विश्वनाथपञ्चाननभट्टाचार्यः

तात्पर्यटीका

सङ्कोचविकासशालिनोऽपि नीरूपस्य मनसो नाध्यक्षं किन्त्वनुमानमेवेति दर्शयितुं तद्यथेत्यत्र तदित्युक्तमित्यभिप्रायवानाहा**नुमानं यथेति**। **यद्य**प्यात्मगुणग्रहणे चक्षुरादेर्न रूपं सहकारीति चक्षुर्ग्राह्यतापि सुखदु:खादे: सम्भवन्त्यप्यन्धस्य सुखानुपलब्धिप्रसक्त्या बाध्यते **तथापि** भवतां मनोवच्छ्रोत्रेन्द्रियस्यापि नित्यत्वाद्बाधासम्भवमाशङ्क्य तमुपपादयति। **विशीर्णेति**। तथा च दूरशब्दसाक्षात्कारवारकविभुसन्निकर्षोपपाद-काखण्डकर्णशष्कुलीनाशे कथं तदध्यक्षमिति भाव:। तद्व्यतिरेकासम्भवेन ज्ञानसामान्यकारणत्वङ्मनोयोगव्यतिरेकासम्भवेन। साङ्कर्यस्यादूषकत्वं त्वाह **तेषामिति**। **एवं** त्वङ्मनोयोगस्य ज्ञानसामान्यकारणत्वे।

केचित्तु यत्रात्मसंयुक्त एव मनसि पुरीततिक्रियाजन्या पुरीततिमन:संयोगरूपा सुषुप्तिस्तत्र तत्पूर्वकालोत्पन्नज्ञानव्यक्ते: प्रत्यक्षापत्तिवारणाय त्वङ्मनोयोगहेतुत्वमावशयकमिति **वदन्ति** तन्मतं दूषयितुं मन:क्रियाजन्ये**त्युक्तम्। अत** एव यदा त्वचं त्यक्त्वा मन: पुरीततिमनुविशतीति ग्रन्थकृतां लेख: सङ्ग**च्छते। युज्यते** चैत**दन्यथा** शरावपिहिताग्नि-काष्ठसंयोगवशाद्दाहोत्पत्तिवत् सत्यपि पुरीततिसंयोगे विजातीयात्ममनोयोग-वशाज्ज्ञानोत्पत्यवश्यम्भावे सुषुप्तिरेव न स्यात् त्वङ्मनोयोगस्य ज्ञानसामान्यकारणत्वकल्पने त्वाचप्रत्यक्षे चाक्षुषादिसामग्रीप्रतिबन्धकताकल्पनेन गौरवं वा स्यात् **तस्मा**त्तन्नाशाय मन:क्रियाविभागयोरावश्यकतेति युक्तमुक्तम्। **विजातीयात्ममनोयोगाभावेनैवेति**

तर्कामृतम्

अथ द्रव्यनाशप्रक्रिया। द्रव्यनाशो द्विविध:–क्वचिदसमवायिकारणनाशात्, क्वचित् समवायिकारणनाशाच्च। तत्राद्यो यथा परमाणुद्वयसंयोगनाशाद्द्व्यणुकनाश:। द्वितीयो यथा कपालनाशाद्घटनाश:, घटनाश: उभयत: सम्भवति।

तरङ्गिणी

उभयत:। समवायिकारणनाशात् असमवायिकारणनाशाच्च। द्व्यणुकनाशस्तु नोभयत:। तत्समवायिकारणस्य परमाणोर्नित्यत्वादिति भाव:।

चषकम्

असमवायिकारणनाशादिति। अत एव कार्यकालतत्पूर्वकालान्यतरावच्छेदेन कार्यसमानाधिकरणाभावाप्रतियोगित्वरूपमसवायिकारण- स्यापि कार्यसहभावेन हेतुत्वमामनन्ति। अन्यथोक्तरीत्या विनश्यदवस्थासमवायिकारणजन्यकार्यस्य क्षणिकत्वापत्या स्वसिद्धान्तभङ्गापत्ते:।

उभयत इति। नाशप्रतियोगिनि घटे स्वप्रतियोगिनिष्ठासमवायिकारणतादिनिरूपितफलोपहितजन्यत्वसम्बन्धेनोक्तकरणद्वयस्यापि सम्भवात्। फलोपहितजन्यत्वं नाम तद्व्यक्तित्वावच्छिन्नं जन्यत्वमिति भाव:। **न चैवं** समवायिकारणनाशस्य तत्र हेतुत्वे मानाभाव इति वाच्यम्। समवायिकारणनाशोत्तरभावि संयोगनाशक्षणेऽप्यनाश्रितकार्यसत्त्वापत्तेरत एवोक्तं **सम्भवतीति**। **न च** समवायिकारणनाशजनकनाशप्रतियोगिन: **संयोग**स्यापि कार्यासमवायिकारणत्वमेवेति **वाच्यम्।** तन्तौ पटव्यवहाराभावेन तन्त्वारम्भकसंयोगस्य पटानारम्भकत्वादेकतन्तुकपटानभ्युपगमात्। अभ्युपगमे वा तत्तन्तुप्रान्तसंयोग एव तत्रासमवायिकारणं न तु तत्तन्त्वारम्भकसंयोग इत्यव**धेयम्**

तात्पर्यटीका

असमवायिकारणस्यापीति। **अपिना**समवायिकारणस्य त्वसमवेतकार्योत्पत्तिभिया तथा हेतुत्वं ध्रुवमित्यर्थ: सूच्यते। **क्षणिकत्वापत्येति।** अत्रेष्टापत्तावाह स्वसिद्धान्त इति **चेन्न।** निर्युक्तिकानन्तक्षणिकद्रव्याणां तत्प्रागभावध्वंसयोश्चाकल्पनया लाघवेन क्षणिकद्रव्यानङ्गीकारस्य न्याय्यत्वात्।

असमवायिकारणतादीति। समवायिकारणतादिपदार्थः। तत्कपालद्वय-संयोगनाशेनैतद्घटनाशापत्तिवारणाय **फलोपहितेति**। **उक्त**कारणद्वयस्यापि समवायिकारणनाशस्यासमवायिकारणनाशस्यच स्वपदार्थस्यापि। **एवं** घटनाशस्योभयतः सम्भवे **तत्सिद्धे**रिति। अत्रैवकारोपसन्दानेन प्रत्यक्षे संयोगस्य सम्बन्धे वृत्तिनियामकत्वसिद्धावतीन्द्रियसंयोगस्यापि तस्मिंस्तथात्वं सिद्ध्यतीति सूचितम्।

तर्कामृतम्

आकाशकालदिगात्मपरमाणवोऽवृत्तयः, समवायश्च। पृथिव्यादिपञ्चानां भूतत्वम्, पृथिवीजलतेजोवायुमनसां क्रियावत्त्वमूर्त्तत्वे[1]। पृथिव्यप्तेजोवायवो द्रव्यसमवायिकारणानि। कालस्य कालिकसम्बन्धेन सर्वाधिकरणत्वम्। दिशो दैशिकसम्बन्धेन सर्वाधिकरणत्वम्।

इति द्रव्यनिरूपणम्

तरङ्गिणी

समवायश्चेति। अवृत्तिरितिवचनविपरिणामेनान्वयः। भूतत्वं बहिरिन्द्रिय-ग्राह्यविशेषगुणवत्त्वम्। मूर्तत्वं क्रियासमवायिकारणतावच्छेदकतया सिद्धो जातिविशेषः।

चषकम्

अवृत्तय इति। सर्वाधारतानियामकसम्बन्धातिरिक्तवृत्ति-नियामकसम्बन्धेन न वर्त्तन्तइत्यर्थः। **समवायश्चेति**। गुणक्रियादि-विशिष्टबुद्धिविषयतयैव तत्सिद्धेरतीन्द्रियतद्विशिष्टबुद्धेरसिद्धेरित्याशयः। **भूतत्वं** बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्। **मूर्त्तत्वमिति**। मूर्त्तविभ्वादिपदेभ्यः

---

१. 'क्रियावत्त्वं मूर्तत्वम्' इति पाठान्तरम्।

परिमाणसंयोगादिप्रकारेणोपस्थितेर्विभ्ववृत्तिपरिमाणवत्त्वं चेत्यर्थः। अपकृष्ट-परिमाणवत्त्वमित्यपि **केचित्तत्र**। विश्रान्ताणुपरिमाणतारतम्यस्य परिमाणस्याश्रये परमाणावव्याप्तेः।

क्रियाजनकतावच्छेदिका जातिरित्यन्ये **परिष्कुर्वन्ति** क्रियावत्त्वमेव मूर्त्तत्वमस्त्विवति तु यथाश्रुतग्रन्थानुरोधिनः। **द्रव्यसमवायिकारणानीति**। **न च** मानाभावेन जलान्त्यावयव्यनुपगमेऽपि घटपटादिविलक्षणप्रतीति-सिद्धपार्थिवान्त्यावयविन्यव्याप्तिरिति वाच्यम्। तद्वृत्तिद्रव्यविभाजकधर्मवत्त्वस्यैव विवक्षितत्वात्। **कालस्येति**। इदानीं सर्वमितिप्रत्ययाभावेऽपि जायमानादिदानीं घटो न तदानीमिति खण्डकालविशेषणत्वावगाहिप्रत्ययतो विलक्षणान्महाकाल-मात्रवृत्तिविशेषणत्वावगाहिनः कालः सर्ववानिति प्रत्ययादिति भावः।। **दिश इति**। **न च** संयोगादिशून्येष्विहेतिप्रत्ययाभावेऽपि कालकपालभूतलेषु सम्बन्धांशेऽनुगतेन तथा प्रत्ययेन सिद्ध्यन्नपि दैशिकः सम्बन्धः कस्यचित् क्वचिदेव तथेति कथं सर्वाधिकरणत्वमिति **वाच्यम्**। व्यधिकरणयोरपि यत्र शुक्तयस्तत्र मौक्तिकानीति प्रत्ययात् सर्वं देशे प्रतिष्ठितमिति तुल्यवदनुभवाच्च तत् सिद्धेरप्रत्यूहत्वादिति भावः।

इति द्रव्यनिरूपणम्

तात्पर्यटीका

क्रियावत्त्वसमुच्चायकं चकार पूरयति **चेत्यर्थ इति**। **उक्त**परिमाणस्यैव क्रियाजनकतावच्छेदकत्वसम्भवान्न तादृशजाति- सिद्धिर्लाघवमात्रेण जातिसिद्धेः प्रतिबन्दिसहस्रकवलितत्वादित्यस्वरसमन्ये परिष्कुर्वन्तीत्यनेन विभावयन् ग्रन्थस्वरससिद्धं मतं दर्शयति। **क्रियावत्त्वमेवेति**। चकाराश्रवणादे-कलक्षणतासूचक **एवकारः**। **धर्मवत्त्वस्यैवेति**। समवायेन धर्मवत्त्वस्यैवेत्यर्थः। तेन कालिकसम्बन्धेन सर्वाधारे काले नातिव्याप्तिः। जायमानादित्यादिपञ्चम्यन्तानि कालः सर्ववानिति प्रत्ययविशेषणानि। **महाकालमात्रवृत्तीति**। खण्डकालविशेषणता तु क्रियावच्छिन्नः कालो वा कालावच्छेदिका क्रिया वेदानीमिति प्रत्ययविषयेत्यत्र

विनिगमनाविरहादुभयसाधारणीत्यशयः। **सिद्ध्यन्**नपीत्यपिना सम्बन्धभाने सम्बन्धतावच्छेदकभानानङ्गीकारेण सम्बन्धांशेऽनुगतत्वोक्तेः सम्भव एव नास्ति सम्बन्धांशानुल्लेखादिति सूचितम्। **केचित्तु** यद्धर्मावच्छिन्न-सम्बन्धासंसर्गाग्रहस्तद्धर्मेणासौ तत्र विषय इति सम्बन्धांशेऽप्यनुगतैव प्रतीतिर्वाच्येत्याहुः

इति द्रव्यनिरूपणम्

तर्कामृतम्

अथ गुणाः कथ्यन्ते—रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्व-संयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेह-संस्कारधर्माधर्मशब्दाश्चतुर्विंशतिर्गुणाः। अत्र रूपत्वादीनि सर्वाण्येव जातयः। रूपं पृथिवीजलतेजोवृत्ति, तच्च शुक्लकृष्णरक्तपीतचित्रादिभेदेन बहुविधं पृथिवीवृत्ति[१]। अभास्वरशुक्लरूपं जलवृत्ति[२]। शुक्लभास्वरं तेजोवृत्ति[३]। रसः पृथिवीजलवृत्तिः। तत्र मधुरलवणकटुतिक्ताम्लकषायभेदात् षड्विधः रसः पृथिव्याम्। जले मधुर एव रसः। गन्धो द्विविधः—सुरभिरसुरभिश्च, पृथिवीमात्रवृत्तिः। स्पर्शः पृथिव्यादिचतुष्टयवृत्तिः। स च त्रिविधः, शीतः उष्णः अनुष्णाशीतश्च। अनुष्णाशीतस्पर्शो[४] वायुपृथिव्योः, जले शीतः, तेजसि उष्णः।

तरङ्गिणी

अत्र **रूपत्वादीनि सर्वाण्येव जातय इति**। न चानुगतप्रतीत्या शक्यातावच्छेदकतया वा जातिसिद्धौ अदृष्टपदशक्यतावच्छेदकतयापि तत्सिद्धौ

---

१. पृथिव्याम् इति पाठान्तरम्।
२. जले इति पाठान्तरम्।
३. तेजसि इति पाठान्तरम्।

चतुर्विंशतित्वानुपपत्तिः। यत्पदाद्येन रूपेण बोधोऽनुभवसिद्धस्तदवच्छिन्ने तत्पदशक्त्युपगमात् हर्यादिपदादिवादृष्टपदादपि धर्माधर्मत्वाभ्यामिव बोधात्।

चषकम्

चतुर्विंशतिरिति। **यद्यपि** कालिकदैशिकपरत्वाद्युभयानुगतजातौ न प्रमाणमत एव गुणाः षड्विंशतिरेव कैश्चिद्व्यवहृता**स्तथापि** कथञ्चित्परत्वादिपदप्रवृत्तिनिमित्तत्वेनानुगतं जातिद्वयमेव गुणविभाजकतयात्राभिधित्सितमिति मन्तव्यम्। **रूपत्वादीनीति।** **नीलो** वर्णः पीतो वर्ण इति प्रत्ययादीति भावः। **ननु** प्रत्यक्षेण शाब्दबोधेन वा तादृशजातिसिद्धौ संस्कारत्ववद्धर्माधर्मसाधारण्याऽदृष्टत्वाख्या जातिः सिद्ध्येत्। **न चेष्टापत्तिः।** चतुर्विंशतित्वादेर्व्याघातादिति **चेन्न।** यतः शक्यतावच्छेदकतया जातेः सिद्धौ येन रूपेण शाब्दबोधस्तेन रूपेण शक्तिग्रहस्यावश्यं वाच्यतया नानार्थादृष्टपदाद्धर्मत्वादिनैव यथातात्पर्यं बोधाज्जातिद्वयसिद्धिर्निराबाधैव। संस्कारपदं तु न नानार्थकम्। **यदुक्तम्** उत्पादकसजातीयोत्पादकत्वं त्रितयानुगतं संस्कारत्वजातिव्यञ्जकमिति। ज्ञानजन्यायास्तज्जनकत्वात् क्रियाजन्ययोस्तज्जनकत्वाच्चेति तदर्थः।

न चैवं वेगस्थितिस्थापकयोरन्यतरदेव वर्त्ततामिति **वाच्यम्।** उत्तरदेशसंयोगानुकूलक्रिया वेगस्य कार्यं पूर्वदेशसंयोगानुकूलक्रिया स्थितिस्थापकस्या**त एव** स्थितिस्थापकेति नामास्येति कार्यवैचित्र्या **तदुक्तम्।** क्वचित् स्पन्देऽपि कारण**मिति।** अत्रापिर्भिन्नक्रमः। **क्वचि**दाकृष्टशाखादौ। **अपिना** स्पन्दजन्यता दर्शिता तेन च स्वजन्यक्रियानाश्यत्वमपि। **क्वचित्तु** कटादौ कारणगुणप्रक्रमजन्य इति **वक्ष्यति।** विभ्वादिपदानि तु व्यापकत्वादिप्रकारेणैवार्थबोधकानि। सर्वसाधारणं गुणत्वं तु नास्त्येव। गुणपदं प्रातिस्विकरूपेण द्रव्यकर्मान्यसत्त्वेन वार्थबोधकमिति **हृदयम्। तत्र** पृथिव्यादिषु मध्ये। जलादावतिव्याप्तिवारणाय **सप्तविधमिति।** पृथिवीत्वव्याप्यतावच्छेदकसप्तजातीयमित्यर्थः। **शुक्लमिति।** रूपमिति शेषः। **मधुर एवेति।** तत्र च प्रत्यक्षमेव प्रमाणमित्याशयः। तदेतदुक्तम**स्मन्मातामह**चरणैः।

निदाघपीतनिर्मलगङ्गाजलमाधुर्यस्यानुभवसिद्धत्वेनापह्नोतुमशक्यत्वा**दिति**। तच्च व्यञ्जकसापेक्षं तन्निरपेक्षं वेत्यन्यदेतत्। रसान्तरं रूपान्तरवदौपाधिकम्। **पृथिवीमात्रवृत्तिरिति**। पृथिवीत्वस्य गन्धसमवायि- कारणतावच्छेदकतया सिद्धेः। गन्धत्वस्य कार्यमात्रवृत्तितया कार्यतावच्छेदकत्वावश्यम्भावा**दन्यथा** तदवच्छिन्नस्याकस्मिकत्वापत्तेः। **जले शीत इति**। **न च** शीतत्वस्य नित्यानित्यवृत्तेः कार्यतानवच्छेदकतया कथं जलत्वं जातिः सिद्ध्येदिति वाच्यम्। जन्यशीतस्पर्शजनकतावच्छेदकतया तत्सिद्धेः। **अथ** परमाणौ जलत्वं न स्यादिति **चेन्न**। जन्यशीतस्पर्शजनकतावच्छेदकजन्यजल-मात्रवृत्तिजात्यवच्छिन्नजनकतावच्छेदकतया परमाणुसाधारणजलत्वस्यापि सिद्धेस्तुल्यवृत्तित्वभ्रमाधीनश्चैतयोर्भेदाग्रह **एवमन्यत्रापि बोध्यम्**।

तात्पर्यटीका

रूपशब्दोल्लेखिप्रत्ययत आकृत्यादिकमेव प्रतीयते न वर्णगतजातौ प्रमाणमतो वर्णशब्दोल्लेखिनं प्रत्ययं तथाभूतं तत्र प्रमाणयति। **नीलो** वर्ण इति निरुपपदवर्णव्यवहारस्य शब्दसाधारण्यात्तत्रापि नील इत्युक्तम् कालिकदैशिकपरत्वयोस्तथाविधापरत्वयोश्चैकैकजातौ मानाभावेन प्रत्येकजातिद्वयसिद्धौ गुणानां षड्विंशतिरितिमतसङ्ग्रहाय चतुर्विंशतित्वा-देरित्यत्रा**दिपदम्**।

आकृष्टशाखादाविति। अत एव स्पन्द इत्यस्य तादवस्थ्यापादकस्पन्दइत्यर्थस्तेनोपष्टम्भसङ्गतिरिति **बोध्यम्। वक्ष्यतीति** तथा च तत्सङ्ग्राहको यथास्थितएवापिरिति सूचितम्। **गुणत्वं तु नास्त्येवेति। कथं** तर्हि शक्यतावच्छेदकतया जातेः सिद्धावित्युक्तम्। **मैवम्**। अनुभवसिद्धाया जातेः शक्यतावच्छेदकतया ग्रहणे आवश्यके सतीत्यस्य तदर्थत्वात्। **यदुक्तवान्** विभ्वादिपदानित्वित्यादि। यत्तु शक्यतावच्छेदकतया गुणत्वं जातिः सिद्ध्यति। **तदुक्तम्**। गौः स्वरूपेण न **गौर्नाप्य**गौर्गोत्वाभिसम्बन्धात्तु गौरिति विवेचयिष्यते

चैतदुपरिष्टादिति **तन्न।** नानार्थत्वोच्छेदापत्तेरित्यादिबहुव्याकोपापत्तेरुक्तं **हृदयमिति। सप्तविधमितीति।** **ननु** सप्तविधं रूपं न **क्व**चिदपि पृथिव्यामित्यसम्भवः परमाणावपि चित्ररूपासम्भवा**न्नाना**विधमित्युक्तावपि न यत्र नाना रूपं तत्राव्याप्तिरिति **चेन्न।** रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यपृथिवीत्वजातेः सर्वत्र पृथिव्यां सत्त्वा**देव**मग्रेऽपि। **ननु** गुणे शुक्लादयः पुंसीत्यनुशासनात् कथं शुक्ल**मिति।** गुणे इत्यस्य प्राधान्येन विवक्षिते इति शेषपूरणेन व्याख्यानात्। तद्वतीत्यस्य गुणोपसर्जनकपदान्तरार्थविवक्षायामित्यर्थमभिप्रेत्योक्तं **रूपमिति शेष इति।**

अत्र मूले प्राचीनपुस्तके स्वच्छं शुक्लं जले इति पाङ्क्त पाठो दृश्यते स युक्त एव स्वच्छमित्यस्यैकजातीयं पृथिवीशौक्ल्यान्नानाजातीयाद्व्यावृत्तमित्यर्थकत्वादेवमेवाग्रे मधुर एवेत्येवकारोऽपि पुष्टार्थो भवति। **व्यञ्जकसापेक्षमिति। अत** एव हरीतकीभक्षणोत्तरं जलपाने सर्वेषामेव माधुर्योपलब्धिः। **न च** हरीतक्यामेव जलोष्मसंयोगेन माधुर्यमुत्पद्यत इति **वाच्यम्।** क्लिष्टकल्पनापत्तेरित्यास्तां **तावत्। रसान्तरं** जम्बीरादिजलेऽम्लादिकम्। **रूपान्तर**वत् कालिन्दीजले नीलादिवत्। **औपा**धिकमुपाधिनिष्ठमेवारोविषयोऽत एव वियति विक्षेपे धवलिमोपलब्धिः।

तर्कामृतम्

सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागा नव द्रव्यवृत्तयः। परत्वापरत्वे पृथिवीजलतेजोवायुमनोवृत्तिनी। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नभावनाधर्माधार्मा आत्मवृत्तयः। गुरुत्वं पृथिवीजलवृत्ति। द्रवत्वं पृथिवीजलतेजोवृत्ति। तद् द्विविधम्, नैमित्तिकं सांसिद्धिकं च। आद्यं पृथिवीतेजसोः, द्वितीयं जले। स्नेहो जलमात्रवृत्तिः। संस्कारः पृथिवीजलतेजोवाय्वात्ममनोवृत्तिः। स त्रिविधः, वेगो भावना स्थितिस्थापकश्च। तत्र वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः। द्वितीय आत्मवृत्तिः। तृतीयः पृथिव्यादिचतुष्टयवृत्तिः। शब्दो द्विविधः, ध्वन्यात्मकः वर्णात्मकश्च, आकाशमात्रवृत्तिः।

रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना विशेषगुणाः। सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागगुरुत्व[1] परत्वापरत्वनैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः।

तरङ्गिणी

संस्कारपदात्संस्कारत्वप्रकारकबोधस्यानुभवसिद्धिः। उक्तं च शङ्करमिश्रैः **"उत्पादकसजातीयोत्पादकत्वं त्रयाणामनुगतं रूपं संस्कारत्वजात्यभिव्यञ्जकमि"**ति।

चषकम्

नवद्रव्यवृत्तय इति। मूर्तगुणामूर्तगुणवृत्तिसंस्कारत्वान्यगुणत्वन्यूनवृत्तिजातिमन्त इत्यर्थः। **यत्तु** द्रव्यमात्रस्य व्याप्यव्यापकभूता इत्या**चार्यग्रन्थ**स्य द्रव्यनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वमवृत्यात्मत्वेऽपीति द्रव्यव्याप्यतावच्छेदकत्वमावश्यकम्, **तच्च** यद्यपि गुणत्वादिसाधारणं **तथापि** गुणविभाजकधर्मरूपव्याप्यतावच्छेदकविशेषे पर्यवस्येन्नचैतावता व्याप्यत्वदलवैयर्थ्यमुक्तार्थप्रापकत्वादिति मत्वा द्रव्यत्वावच्छिन्नव्याप्यताप्रतियोगिकव्यापकतावच्छेदकगुणत्वव्याप्यजातिमत्त्वमित्याशयस्योपवर्णनमुपायकृतां तत्र जातित्वोत्कीर्त्तनं तु समवायेन हेतुताप्रापणायेति यथाश्रुताचार्यग्रन्थानुरोधेन द्रव्यत्वसमव्याप्तिपर्यन्तमुत्कीर्त्तितमस्म**न्मातामहचरणैः।** **नैमित्तिक**मग्निसंयोगासमवायिकारणकमिति **वक्ष्यति।**

सांसिद्धिकं स्वतःसिद्धम्। स्वाश्रयस्य स्वासमवायिकारणकारणगुणसमवधानस्योत्तरभाविकारणानपेक्षमिति यावत्तच्च नित्यं कारणगुणप्रक्रमजन्यं वेति द्विविधम्। **चतुष्टयवृत्तिरिति।** अन्यथा दीपावरणे प्रभासङ्कोचानुपपत्तेरेवमन्यत्रापि। अत एव स सामान्यगुणो **न तु** विशेषगुण

---

१. परत्वापरत्वगुरुत्व इति पाठान्तरम्।

इत्याशय:। **विशेषगुणा इति।** विशेषाणां गुणा इति व्युत्पत्या द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकजातिमन्त इत्यर्थ:। वायवीय-स्पर्शादिगतवैजात्यान्यादाय सर्वत्र लक्षणसमन्वय:। दधिदुग्धजन्यजल-मात्रवृत्यवान्तरजातिव्युदासाय गुणवृत्तित्वेन जातिर्विशेषणीया। **सामन्यगुणा इति**। सामान्यानां गुणा इति व्युत्पत्या तादृशजातिशून्या गुणा इत्यर्थ:।

कठिनत्वादिकं न साक्षात् संयोगगतो जातिविशेष:। चक्षुर्ग्राह्यतापत्तेरपितु स्पर्शविशेषस्यैवेति तस्य पृथिवीत्वव्याप्यतावच्छेदकत्वेऽपि नोक्तलक्षणयोरति-व्याप्त्यव्याप्ती। **न चैवं** करकायां **काठिन्य**प्रत्यायानुपपत्तिरिति **वाच्यम्।** अदृष्टविशेषेण द्रवत्वतिरोधानौपाधिकत्वात्कथमन्यथा विलीनायां तस्यां जलत्वाभिव्यक्ति:। **न च** द्रव्यान्तरमेव तदिति **वाच्यम्।** यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्ते:। घटध्वंसजन्यतत्प्रत्यक्ष-मिथ्याज्ञानवासनाध्वंसजन्यकायव्यूहयोर्व्यभिचारवारणाय द्रव्यपदे। ध्वंसपदं ध्वंसमात्रवृत्तिजनकतालाभाय। तेन क्वचिन्मणिध्वंसजन्ये वह्नौ न व्यभिचार:। शालिग्रामशिलाध्वंसजन्यनारकीयशरीरे व्यभिचारवारणायादृष्टाद्वाराजन्यत्वं विवक्षणीयमितिदिक्।

तात्पर्यटीका

अवृत्यात्मत्वेपीति। अवृत्तेरात्मनोऽभावेऽपीत्यर्थ:। सर्वस्यैवाभावस्य यत्किञ्चिद्व्यतिरेकिधर्मरूपप्रतियोगिसमानाधिकरणत्वात् स्वप्रतियोगीति **वाच्यम्।** तथा चात्माधिकरणाप्रसिद्ध्या नात्माभाव: प्रतियोगिव्यधिकरण इत्यभावान्तरप्रतियोगितानवच्छेदंकत्वमात्मत्वेऽविकलमिति भाव:। **आवश्यकमिति**। यथाश्रुतग्रन्थानुरोधादिति भाव:। **इति मत्वा** व्याप्यत्वघटनाया ईदृशार्थविशेषपरत्वं मत्वा। **एतेन** प्रकारान्तरेणात्माभावसाधारण-प्रतियोगिवैयधिकरण्यनिर्वचनसम्भवेऽपि न क्षति:। **हेतुताप्रापणायेति**। अन्यथा जातित्वघटकनित्यत्वादेर्वैयर्थ्येन व्याप्यत्वासिद्ध्यादिना लक्षणस्य व्यावर्त्तकत्वानुपपत्तेरिति भाव:। **उत्कीर्तितमिति**। तेनोपायप्रदर्शितरीत्यास्यापि परिष्कार: कर्त्तव्य इति तेषामाशय:। निमित्तकारणजन्यत्वमन्यत्रातिप्रसक्तमतो व्याचष्टेऽग्नीति। वक्ष्यतीत्यनेनात्रोक्ताशङ्कावारणाय स्मारितमित्युक्तं **भवति।**

ननु स्वत: सिद्धत्वं कारणानपेक्षसत्ताकत्वं तच्च जन्ये सांसिद्धिकद्रव्यत्वे न सम्भवतीत्यत आह। **स्वाश्रयस्येति**। **स्वासमवायिकारणेति**। स्वासमवायिकारणभूतो य: कारणगुणस्तत्समवधानात्मकस्येत्यर्थ: तथा चानुदरा कन्येतिवदल्पार्थकेन नञेदृशकारणानपेक्षत्वं विवक्षितमिति भाव:। **वायवीय**स्पर्शादीत्यादिना जलतेजसो रूपरसयो: परिग्रह:। **मात्र**पदं व्याप्यतावच्छेदकत्वमाविष्कर्त्तुम्। **तादृशजातीति**। द्रव्यविभाजकोपाधि-व्याप्यतावच्छेदकाजातीत्यर्थ:।

ननु संयोगे विशेषगुणलक्षणातिव्याप्ति: पृथिवीत्वव्याप्यतावच्छेदक-का**ठिन्य**जातिमत्वादे**वं** सामान्यगुणलक्षणाव्याप्तिश्च तच्छून्यत्वाभावादत आह **कठिनत्वादिकमिति**। **न साक्षादिति**। किन्तु स्वाश्रयसमवायि-समवेतत्वसम्बन्धेन पृथिव्या: **कठिन**: संयोग इति प्रमाविषय इति भाव:। **अतिव्याप्त्यव्याप्ती इति** संयंगे **काठिन्यस्य** समवायेनासत्त्वाज्जातित्वोपादानमप्येतदर्थमेवेति भाव:। **एवं** काठिन्यस्य पृथिवीत्वव्याप्यतावच्छेदकत्वे। **कथमन्यथेति**। का**ठिन्यस्य** प्रत्यये प्रामाण्योपपत्तये करकाया: पृथिवीत्वाङ्गीकारे इत्यर्थ:। द्रव्यान्तरमेव करकाभिन्नमेव। **तदिति**। तथा च करकाया: पृथिवीत्वेऽपि तन्नाशोत्तरभाविनि द्रव्ये जलत्वमविरुद्धमित्यर्थ: कृतप्रायश्चित्तस्य भुक्तभोगस्य वा नरकनिवृत्तये तद्ध्वंसेऽप्यदृष्टस्य द्वारत्वावश्यम्भावात् **किञ्च** नारकीयशरीरारम्भ-कावयवद्वारकत्वस्यापि तत्र सम्भवान्नञ्द्वयगर्भतेत्याह **दिगिति**।

तर्कामृतम्

अथ नित्यगुणा:–जलतेजोवायुपरमाणूनां विशेषगुणा:, परमाणुवृत्तिगुरुत्वं स्थितिस्थापकश्च, विभूनां परमाणूनां च एकत्वपरिमाणैकपृथक्त्वानि, ईश्वरेच्छाज्ञानकृतयश्च नित्यगुणा:।

अथाप्रत्यक्षगुणा:–गुरुत्वधर्माधर्मभावनास्थितिस्थापका:, परमाणुद्व्यणुक-वृत्तिगुणा:, अतीन्द्रियवृत्तिसामान्यगुणा:, त्रसरेणो: रूपं विहाय अन्ये गुणा: अतीन्द्रिया:।

रूपरसगन्धस्पर्शस्नेहप्रत्यक्षे महद्वृत्तित्वे सति उद्भूतत्वं प्रयोजकम्, सामान्यगुणप्रत्यक्षे तु आश्रयप्रत्यक्षम्, बुद्धिप्रत्यक्षे स्ववृत्तिविशिष्टज्ञानत्वम्, सुखादिप्रत्यक्षे स्ववृत्तिसुखत्वादिकमेव। अन्त्याद्यशब्दौ विहाय सर्वः शब्दः प्रत्यक्षः।

तरङ्गिणी

विभुपदादपि सर्वमूर्तसंयोगित्वरूपव्यापकत्वप्रकारक- बोधस्यैवानुभव- सिद्धत्वात् न विभुत्वसिद्धिरिति प्राचीनपथपरिष्कारकोविदा एव विदाङ्कुर्वन्तु। चित्रादीत्यादिना नीलकपिशयोः सङ्ग्रहः। **अतीन्द्रियवृत्तिसामान्यगुणा इति।** सामान्येत्यनेन वाय्वाकाशवृत्तिविशेषगुणस्पर्शशब्दयोः प्रत्यक्षत्वेऽपि न क्षतिः। महद्वृत्तित्वे सतीत्यनेन परमाणुवृत्तिरूपादीनाम्, उद्भूतत्वेन घ्राणादिरूपादीनां वारणम्। स्ववृत्तिविशिष्टज्ञानत्वमित्यनेन निर्विकल्पकस्य न प्रत्यक्षम्। **अन्त्याद्यशब्दाविति।** तयोरतीन्द्रियत्वादिति भावः।

चषकम्

न च पाषाणध्वंसजन्ये वह्नौ व्यभिचारः। पृथिव्यवष्टब्धतेजोवयवसंयोगप्रतिबन्धकावष्टम्भध्वंसेनान्यथासिद्धत्वात्। **किं** वा पटनिष्पीडनेन जलावयवसंयोगस्येव नान्तरीयकोक्तावष्टम्भध्वंसक- दृढतराभिघातेनैव तेजोवयवसंयोगस्य निष्पत्तेः। खण्डपटहेतुर्महा- पटध्वंसस्त्वावश्यक एव। न हि महापटस्यात्यन्ताभावप्रागभावाभ्यां खण्डपटो जन्यते ययोरनुगमाय तद्ध्वंसस्य संसर्गाभावत्वेन हेतुत्वं भवेदिति नासिद्धिः। **न चैवं** दुग्धध्वंसजन्ये दध्नि दुग्धत्वापत्तिरिति वाच्यम्। तस्य दुग्धद्व्यणुकध्वंसजन्यत्वनियमेन तदवयवपरमाणौ दुग्धत्वस्यानङ्गीकारात्। तस्य द्रव्यत्वव्याप्यपृथिवीत्वव्याप्यजातित्वादन्यथा **घटशरावस्येव** कदाचित्केवलपरमाणुभ्यो भुक्तपाकेक्ष्वादिविकारनिरपेक्षेभ्य एव दुग्धशर्करा-

देर्निष्पत्तिप्रसङ्गात्। परमाणुसंयोगादीनामनित्यत्वा**द्विशेषेति।** परमाणुवृत्तिरिति लिङ्गविपरिणमेन स्थितिस्थापकेप्यन्वेति।

अतीन्द्रियवाय्वाकाशवृत्तिस्पर्शशब्दयोः प्रत्यक्षत्वात्**सामान्येति। रूपं विहायान्ये गुणा इति।** रूपभिन्ना रूपसदृशा इत्यर्थः। नञिव युक्तमन्यसदृशार्थ इतिन्यायादिति भावः। तेन त्रसरेण्वेकत्वादीनां प्रत्यक्षत्वेऽपि न क्षतिः। न चैवं **महद्वृत्तित्व**स्यापि प्रत्यक्षप्रयोजकस्य रूपान्यरसस्पर्शादौ सत्त्वात्तदतीन्द्रियत्वे नियामकाभाव इति **वाच्यम्।** रूपप्रत्यक्षे सामान्यतो महद्वृत्तित्वस्य प्रयोजकत्वेऽपि स्पर्शादिविशेषगुणप्रत्यक्षे प्रकृष्टमहद्वृत्तित्वस्य तत्त्वाभ्युपगमादित्याशयः। **एव**मन्यत्रापि यथानुभवमूह्यम्। **अतीन्द्रिया इति।** इन्द्रियग्रहणस्वरूपायोग्या इत्यर्थः। गुरुत्वादाववश्याभ्युपेयायाः प्रत्यक्षप्रतिबन्धकतावच्छेदकजातेरन्यत्र प्रसरस्यावर्जनीयत्वात् प्रत्यक्षकारणता-वच्छेदकविषयताशून्यत्वाद्वेति भावः।

ननु त्रसरेणुरूपस्य प्रत्यक्षत्वं न परमाणुरूपस्येति कुत इत्याशङ्क्य तन्नियामकमाह। **रूपेति।** महद्वृत्तित्वे सतीति व्याख्यातार्थम्। घ्राणादिरूपादीनामिन्द्रियग्राह्यत्ववारणायोद्भूतत्व**मुक्तम्। आश्रयप्रत्यक्षमिति।** यावदाश्रयप्रत्यक्षमित्यर्थः। **अत** एव घटाकाशसंयोगस्य न प्रत्यक्षं भवति तु त्रसरेणुपरिमाणादेः। **प्रयो**जममित्यनुवर्त्तते। **निर्विकल्पकव्यावृत्तये विशिष्टेति। यथा च निर्विकल्पकस्य न प्रत्यक्षं** तथा वक्ष्यते। एवकारेण विशेषणान्तरव्यवच्छेदः। अत एवाज्ञातं सुखं दुःखं वा नाभ्युपगच्छन्ति। **टीका**कृतस्त्वात्मैकत्वमहत्त्वयोः प्रत्यक्षत्वम्। **अन्त्याद्य शब्दाविति।** अन्त्यशब्दस्य द्वितीयक्षणे नाशादाद्यशब्दस्य स्वोत्पादकसंयोगविभाग-समानदेशावच्छिन्नत्वनियमेन श्रोत्रानवच्छिन्नत्वान्न प्रत्यक्षमित्याशयः।

तात्पर्यटीका

अन्यथासिद्धत्वान्नान्तरीयकत्वात्। अवष्टम्भध्वंसयोर्नान्तरीयकत्वा-याभिघातावश्यकत्वं दृढयितुं दृष्टान्तो**पन्यासः। नान्तरीयकोक्ता-**

वष्टम्भध्वंसकेति। नन्तरीयकावुक्तयोरवष्टम्भयोर्ध्वंसौ यस्मात् स तथेत्यर्थः। **आवश्यक एव** ताद्रूप्येणावश्यक एव। **ननु** महापटध्वंसः प्रतिबन्धकाभावमुद्रया हेतुस्तत्कथं ध्वंसमात्रवृत्तिरसौ जनकतेत्याशङ्क्याह। **नहीति**। नासिद्धिर्नदृष्टान्तासिद्धिः। **एवं** दध्नो दुग्धावयवारब्धत्वाङ्गीकारे। **अन्यथा** द्रव्यत्वव्याप्यव्याप्यजातेः परमाणौ स्वीकारे। भुक्तपाकश्चेक्ष्वादि-विकारश्चेतिविग्रहकः समासः।

त्रसरेण्वेकत्वादीत्यादिना परिमाणादिनिखिलसामान्यगुणपरिग्रहः। **एवं** त्रसरेणुरूपस्य प्रत्यक्षत्वे। **अन्यत्रापि** गन्धरसप्रत्यक्षेऽपि **एवं** गन्धप्रत्यक्षे सामान्यतो महद्वृत्तित्वस्यैव रसप्रत्यक्षे तु प्रकृष्टतर**महद्**वृत्तित्वस्य प्रयोजकत्वम्। **यथानुभवमिति**। यस्य यावता महत्त्वेन समानाधिकरणस्य प्रत्यक्षं तत्र तावतो महत्त्वस्य प्रयोजकत्वमिति भावः। **अवर्जनीयत्वादिति**। तथा च तादृशजातिमत्त्वमेव स्वरूपयोग्यत्वमित्याशयः। ननु रूपत्वादिना साङ्कर्यान्न गुणेष्वपि तादृशी जातिः स्वसामानाधिकरण्य-स्वाभावसामानाधिकरण्योभयसम्बन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगित्वाभावनियमानङ्गीकारेण साङ्कर्यस्य जातिबाधकत्वानङ्गीकारे गुणजातिसाङ्कर्यस्यादूषकत्वे वा तल्लौकिकप्रत्यक्षस्याप्रसिद्धेरेवापत्तिवारणे कुतस्तथा जातिर्येनोक्तं स्वरूपयोग्यत्वमेषां स्यादित्युक्ते त्वाह। **प्रत्यक्षेति**।

व्याख्यातार्थमिति। यथानुभवमित्यनेन व्याख्यातार्थमित्यर्थः। **तथा वक्ष्यत इति**। तत् प्रकारकज्ञानाभावेन तद्विष्टवैशिष्ट्यप्रत्यक्षासम्भवादिति वक्ष्यत इत्यर्थः। **प्रत्यक्षत्वमिति**। **नाभ्यु**पगच्छन्तीत्यनुषज्यते। **श्रोत्रान-वच्छिन्नत्वादिति**। **न च** कर्णप्रविष्टकीटक्वारणस्याद्यस्यापि श्रोत्रावच्छिन्नत्वमेवेति **वाच्यम्**। साक्षाच्छोत्रावच्छिन्नशब्दहेतोस्तद-वच्छिन्नाभिघातादेस्तद्व्याप्यदेशावच्छिन्नशब्दस्याभावेन तस्यापि तदनवच्छिन्नत्वा**त्किन्**तु कीटावच्छिन्नाभिघातादेस्तथै- वाद्यशब्दोत्पत्तौ द्वितीयाद्युत्पत्तिः श्रोत्रवच्छिन्नेत्याशयः।

तर्कामृतम्

अथ गुणोत्पत्तिप्रक्रिया–अवयववृत्तिविशेषगुणाः अवयविनि[१] स्वसमानजातीयगुणान् आरभन्ते।

तरङ्गिणी

अवयववृत्तिविशेषगुणाः रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वानि। स्वसमानजातीयाः। स्ववृत्तिरूपत्वव्याप्यजातिमन्तः।

चषकम्

अवयवेति। स्वाश्रयसमवायि- वृत्तिविशेषगुणा इत्यर्थः। **स्वसमानजातीयेति।** स्वं लक्ष्यत्वेनाभिमतम्। न चाग्निघटसंयोगारम्भकेऽग्निकपालसंयोगेऽतिव्याप्तिरिति वाच्यम्। **स**जातीयमात्रा-रम्भकत्वस्य तदर्थत्वात्। **न चैवं** सङ्ग्रहपाकजयोर्निमित्तयोः स्नेहोष्णस्पर्शयोरव्याप्तिरिति **वाच्यम्।** विजातीयासमवायिकारणत्वाभावे सति विजातीयानपेक्षस्य सजातीयारम्भकत्वस्य मात्रार्थत्वादत एव चित्ररूपाद्यसमवायिकारणरूपस्पर्शयोर्नाव्याप्तिः।

तथा चैकैकपृथक्त्वयोः सत्यन्ताभावेन शब्दे शब्दजनने वायोः परिमाणे परिमाणातिशयजनने सङ्ख्याया अपेक्षणाद्विशेषणाभावेनाणुपरिमाणे विशेष्याभावेन चाव्याप्तिभिया तेषां भाष्यपरिगणितानामप्याचार्यदिशा लक्ष्यबहिर्भावाया-वयववृत्तिविशेषगुणा **इत्युक्तम्।** इत्थञ्च लक्षणे साजात्यक्रोडीकृतस्य विशेषगुणस्य कीर्त्तनं स्वरूपकीर्त्तनमेवेत्यन्यत्र विस्तरः। साजात्यमिह स्ववृत्तिसामान्यविभाजकोपाधिमदपरजात्यात **एवा**वयवनीलतारतम्येऽवय-

---

१. अवयविवृत्ति स्वसमानजातीयविशेषगुणानारभन्ते इति पाठान्तरम्।

विनीलतारतम्यमुपपद्यतेऽत **एव** च स्नेहत्वावान्तरजातौ मानाभावेऽपि च न क्षतिः। **विशेषगुणानिति**। रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वानीत्यर्थः।

तात्पर्यटीका

फलोपधायकतानियामकप्रत्यासत्तिविशेषलाभेन शब्दालक्ष्यत्वस्फोरणाया-वयवत्वमुपात्तमित्याह **स्वाश्रयेति**। **अग्निकपालसंयोगेऽतिव्याप्तिरिति**। न च विशेषणपदेन वारणमिति वाच्यम्। तथापि भाष्यपरिगणितैकत्वाद्य-व्याप्त्यवारणात्। **निमित्तयोरिति**। तथा च न सजातीयमात्रारम्भकत्व-मित्यव्याप्तिरिति भावः। **विजातीयानपेक्षस्येति**। **देहलीदीपकन्यायेना**न्वेति। अन्यथा विजातीयानपेक्षस्य यद्विजातीयासमवायिकारणत्वं तदभावे सतीत्येव ब्रूयात् अत एव सत्यन्तार्थाभावप्रतियोग्यसमवायिकारणत्वे विजातीयानपेक्षत्वविशेषणादेव। **नाव्याप्तिरिति**। विजातीयानपेक्षत्वविशिष्टं विजातीयासमवायिकारणत्वं यदेकत्वादौ प्रसिद्धं तन्न तत्रेति विशिष्टाभावरूपसत्यन्तस्याविकलत्वादिति भावः। चित्ररूपमात्रोपधायके रूपे विशेष्यसत्त्वस्य तु सजातीयारम्भकतावच्छेदकतज्जातिमत्त्वेन परिष्करणीयत्वेनो-पपादनीयत्वा**दन्यथा**न्त्यावयविरूपेऽव्याप्तेरवारणात्। **न च** कपालत्रय-परिमाणस्य सङ्ख्यासापेक्षत्वेऽपि विजातीयानपेक्षे घटपरिमाणारम्भककपाल-द्वयपरिमाणेऽतिव्याप्तिरिति वाच्यम्। तादृशजातिपर्याप्तावच्छेदकताक-कार्यताप्रतियोगित्वेनारम्भकताया विशेषणीयत्वात्। परिमाणकार्यतावच्छेदक-कोटावुत्कर्षस्याधिकस्य प्रवेशादिति।

तथा चेति। उक्तपरिष्कारावश्कत्वे चेत्यर्थः। **सत्यन्ताभावेनेति**। तयोर्विजातीयानपेक्षयोरेव विजातीयद्वित्वाद्यसमवायिकारणत्वादित्यर्थः। **वायोरिति**। अवच्छेदकतासम्बन्धेन शब्दं प्रति समानावच्छेदकतासम्बन्धेन वायोः कारणत्वादिति भावः। **विशेषणाभावेनेति**। सजातीयारम्भकत्वरूपमुख्यविशेष्यस्य विशेषणाभावाद्विशेष्याभावाच्च सत्यन्तवतः शब्दाद्व्यावर्त्तकं यद्विशेषणं विजातीयानपेक्षत्वं तदभावेनेत्यर्थः।

नन्वारम्भकत्वस्यापि विजातीयानपेक्षत्वं विशेषणं कृत्वा कुतः शब्दो वार्यत इति चेदाचार्यैर्लक्ष्येष्वपरिगणनात्तद्वक्ष्यत्याचार्यदिशेति। विशेष्याभावेन सजातीयारम्भकत्वस्यैवाभावेन। इत्थञ्च विशेषगुणानां लक्ष्यत्वेऽपि च सजात्येति वक्ष्यमाणसाजात्यस्य विशेषगुणाघटितस्य सामान्यगुणेऽसत्त्वेनैव वारणादित्याशयः। **अन्यत्र** किरणावल्यादौ। **विस्तरो** लक्ष्यालक्ष्यप्रपञ्चः। गुणत्वव्याप्यव्याप्यजात्या साजात्यविवक्षायां दोषमादर्शयति। **अत एव चेति**। **मानाभावेऽपीति**। अस्माकं तु स्नेहत्वजातिमादामैव लक्षणगमनादिति भावः।

तर्कामृतम्

पृथिवीविशेषगुणाः पाकजाः। ते द्विविधाः, पाकप्रयोज्याः पाकजन्याश्च, कारणगुणप्रक्रमजन्याः पाकप्रयोज्याः, अग्निसंयोगजन्याः द्वितीयाः। श्यामघटे[१] अग्निसंयोगेन श्यामरूपनाशानन्तरं घटे रक्तं रूपमुत्पद्यते इति नैयायिकमतम्।

तरङ्गिणी

कारणगुणप्रक्रमजन्याः। परमाणुषु पाके सति पक्वपरमाणुभिद्व्र्यणुकादिक्रमेण घटोत्पत्तौ न्यायनयेऽपि कारणप्रक्रमेण पाकजरूपोत्पत्तिः। वैशेषिकमते तु परमाणौ। अग्निसंयोगजाः। अवयविनि पाकप्रयोज्या एव। अत्रायं विवेकः। घटस्य सच्छिद्रत्वात्तदन्तरग्निप्रवेशेन परमाणुमारभ्यावयविपर्यन्तं युगपदेव पाकेन पूर्वरूपनाशे रूपान्तरोत्पाद इति नैयायिकमतम्।

चषकम्

पाको रूपादिपरावृत्तिफलकस्तेजःसंयोगो न च शतधापि ध्मायमाने जलादौ रूपादीनां परावृत्तिर्दृष्यते। **कथं** तर्ह्युष्णत्वम्। अग्न्यातपसम्प्रयोगादिति।

---

१. घटस्य इति पाठान्तरम्।

अन्यथाग्निनाशेऽपि स उष्णस्पर्शो यावद्द्रव्यं भवेन्न चैवम्। **यदुक्तम्।** शैत्यं हि यत् सा प्रकृतिर्जलस्येति तत उक्तं पृथिवीति।

तान् विभजते। **ते द्विविधा इति।** पाकप्रयोज्यानां बुद्ध्युपारोहाय शास्त्रभेदं दर्शयति। **नैयायिकमतमिति।** तेषामयमाशयः। परमाणुस्तावन्न चतुरस्त्रः कोण[१]निष्पत्तेरवयवभेदसाध्यत्वान्निरवयवे तदसम्भवात्तस्माद्वर्त्तुलः। अत एवास्य परिमाणं पारिमाण्डल्यमिति **व्यवजह्रुः।** दृश्यते च वर्त्तुलयोः संयोगेऽवकाश इति द्व्यणुकद्वययोगे एव छिद्रेण भाव्यं तत्प्रविष्टेन तेजसा चतुर्णामपि पाकसम्भवात् सर्वत्र रक्तोपलब्ध्युपपत्तिः।

तात्पर्यटीका

जलादावित्यादिना सुवर्णस्य **रूपा**दीत्यादिना रसस्पर्शयोः परिग्रहः। ननु तदारम्भकसंयोगावच्छेदकावच्छेदेनाग्निसंयोगे तन्नाशापत्तिः **किञ्च** समपरिमाणचतुष्टययोगे तच्छिद्रान्तस्तावत्परिमाणस्य प्रवेशासम्भवात् कथं तत्प्रविष्टेनेत्यादीत्याशङ्क्याह। **तेषामयमाशय** इति। **अवयवभेदसाध्यत्वादिति।** मूर्तसंयोगान्तरायं विना कोणविदूरताया अनुपपत्तेः। विलीनकोणता तु वर्तुलतायामेव पर्यवस्यतीत्युपसंहरति **तस्मादिति। पारिमाण्डल्यमितीति।** न चैवं पारिमाण्डल्यमणुपरिमाणमिति व्याख्यानविरोध इति वाच्यम्। परममहत्त्वादेरिव द्व्यणुकपरिमाणस्योपलक्षकत्वाभिप्रायेण तथा व्याख्यानादन्यथा तेष्वकारणलक्षणातिव्याप्तेः। न च विशेषलिङ्गकानुमितौ विशेषस्य गुरुत्वत्वसामान्यलक्षणाजन्यप्रत्यक्षे गुरुत्त्वत्वस्य योगिप्रत्यक्षे व्योमादिमहत्त्वादेः कारणतया नेयमतिव्याप्तिरिति वाच्यम्। तथा सति पारिमाण्डल्यस्यापि भेदनिवेशानर्थक्यापत्तेरिति दिक्। ततः किं तदाह। **तत्प्रविष्टेन तेजसेति।** तथा च साक्षात् परम्परासाधारणसर्वावयवावच्छेदेन तेजःसंयोगस्य रूपनाशे हेतुत्वेऽपि द्रव्यारम्भकसंयोगविरोधिविभागहेतुक्रिया-जनकत्वे मानाभाव एव शरासनाभ्यासे लक्ष्यव्यत्यासदर्शनाच्च विभागं प्रति

---

१. जातो निरग्रहः परमाणुरेषः - ज्योतिषे कमलाकरः

क्रियायास्तत्तद्व्यक्तित्वेनैव हेतुतया तत्तत्क्रियाधीनतादृशविभागं प्रति तत्तत्पूर्वदेशस्य विशिष्य हेतुतया च तत्तंज:संयोगजन्यक्रियायास्तादृशविभागं प्रत्यपि हेतुत्वासिद्धेरिति भाव:। **चतुर्णामपीति**। तथा च चतुर्णामपि परमाणूनां दशदिगवच्छिन्ना अग्निसंयोगा नापेक्षिता एव यत्किञ्चिदवच्छिन्नास्तु ते चतुर्णां परमाणूनामुपरि स्थितेऽप्यस्मिन् सम्भवन्ति। छिद्रोपपादनप्रयासस्तु श्यामनाशरक्तरक्ततररक्ततमोत्पत्तिपर्यन्तं तत्संयोगस्य स्थैर्याय वस्तुगतिमनुरुध्य किं वा किञ्चित्तद्दिगवच्छिन्नविभागसत्त्वेऽप्यन्य तद्दिगवच्छिन्नारम्भक-संयोगस्य नाशो न भवतीति परस्परमारम्भकसंयोगानाश्रया अपि केचनावयवा अवयविनि घटका अन्यथा प्रस्त्रवणानुपपत्तेरिति च सूचनायेति हृदयम्।

तर्कामृतम्

अग्निसंयोगेन परमाणौ पाके सति परमाणुषु[१] रक्तरूपमुत्पद्यते पुनर्घटोत्पत्तौ सत्यां कारणगुणप्रक्रमेण घटे रक्तं रूपमुत्पद्यते इति वैशेषिकमतम्।

तरङ्गिणी

अग्निसंयोगेन नोदनाख्येन परमाणुषु क्रियाविभागादिक्रमेण द्व्यणुकमारभ्य घटपर्यन्तं विनाशे स्वतन्त्रेषु परमाणुषु पूर्वरूपनाशे रूपान्तरोत्पत्तौ पुनर्भोजकादृष्टवशेन द्व्यणुकमारभ्य पूर्ववद्रेखोपरेखासहितान्यावयविन उत्पत्ति:, कारणप्रक्रमेण रूपोत्पत्तिरिति वैशेषिकमतम्।

चषकम्

परन्तु यत्र कस्यचित् पूर्वसंस्थानस्य भेदोऽध्यक्षस्तत्रावयविनि संस्थानभङ्गोऽप्यस्तु **न तु** द्व्यणुकपर्यन्तानां नाश आवश्यक:। **न** **चावयविरूपतन्नाशौ** प्रत्यवयवरूपाश्रयनाशयोर्हेतुतायां व्यभिचार इति **वाच्यम्**।

---

१. परमाणौ इति पाठान्तरम्।

कार्यतावच्छेदककोटौ वैजात्यस्य घटनादिति। **अग्निसंयोगेन** द्व्यणुकनाशकाग्निसंयोगेन। **परमाणुपाके** सति परमाणुश्यामरूप-परावृत्तिफलकतेजःसंयोगान्तरे सति। **अत** एव परमाणुश्यामनाशे सतीति **नोक्तम्। तथा** हि भाष्यम्। पुनरग्न्यन्तरसंयोगा**दिति। अयं भावः।** यदाग्निसंयोगात् परमाणौ कर्म तदाग्निकर्मनाशः कर्मणः स्वजन्यसंयोगनाश्यत्वादथ वेगाभिघातादिवशात् पुनरग्नौ कर्म परमाण्वोर्विभागश्च ततोऽग्निपरमाणुविभागः परमाण्वोः संयोगनाशश्च ततो द्व्यणुकनाशकाल एव तस्याग्निपरमाणुसंयोगस्य नाशादग्निसंयोगान्तरस्यावश्यकत्वमिति। **रक्त**सारतायां तु रक्तध्वंसपूर्वकत्वस्य नियामकतयैवोपपत्तौ नाशकोत्पादकयोर्भेदाभेदौ न नियताविति दिक्।

प्रक्रमेण पाकोत्पादितकारणगुणद्वारकस्य स्वस्याश्रयारब्धेऽवयविनि स्वसजातीयगुणजननद्वारा। **वैशेषिकमतमिति**। तेषामयमाशयः। सच्छिद्रावयव्यन्तः प्रविष्टेन बलवद्वेगेन तेजसा परमाणुसंयोगे सत्यवश्यं तेषु क्रिया ततो विभागस्तत आरम्भकसंयोगस्यापि नाशे सत्यवश्यं यावदवयविनाशे जाते स्वतन्त्रेषु परमाणुषु पाको भवति पुनरदृष्टघटितसामग्रीव-शाद्यथास्थितमहावयविपर्यन्तं पक्वपरमाणवो घटयन्तीति। **इत्थ**ञ्च नैयायिकमते यत्रावयवपरम्पराघटकावयविन्यपि प्रत्यभिज्ञया पाकानुभवस्तत्र पाकजन्या अन्यत्रावयविनि पाकप्रयोज्याः **वैशे**षिकमते तु परमाणुष्वेव पाकजन्या अवयविषु पाकप्रयोज्या एवेति सिद्धं मतद्वयेऽपि द्वैविध्यम्।

तात्पर्यटीका

अग्निसंयोगेनेति। तृतीयाप्रतिपाद्यमग्न्यन्तरसंयोगनिष्ठं प्रयोज्यत्वं व्युत्पादयति। **अयं भाव इति**। तथा चाग्निसंयोगेन स्वजनकाग्निकर्मनाशस्तेन चाग्निकर्मप्रतिबध्यं कर्मान्तरं तेनाग्निसंयोगान्तरमित्युक्तं भवति। मतान्तरं कटाक्षयन्नाह। **भेदाभेदावित्यादि**। **भेदे** उत्पादकतावच्छेदकं नाशकतावच्छेदकव्याप्यमित्यङ्गीकारे। येन रूपोत्पत्तिस्तस्यैव नाशकतया रूपं विनाश्याग्निसंयोगनाशे नीरूपमेव चिरं परमाण्वादि **भवेदभेदे** यदेव

नाशकतावच्छेदकं तदेवोत्पादकतावच्छेदकमित्यङ्गीकारे। तस्य च कार्यतावच्छेदकं पृथिवीरूपत्वं त्वया वाच्यमिति कारणवैचित्र्याभावात् कार्यवैचित्र्यं न स्यादित्यर्थः।

नन्वेवं रक्तध्वंसानन्तरं रक्ततरध्वंसमनपेक्ष्य रक्ततमं रूपं स्यादत उक्तं **दिगिति**। तथा च रक्ततरध्वंसपूर्वकत्वस्य रक्ततमतायां नियामकत्वं बोध्यमिति भावः। **स्वस्य** द्व्यणुकरूपस्य। **क्रियारम्भक**-संयोगविरोधिविभागहेतुक्रिया। **तत** आरम्भकसंयोगस्यापि नाश इति। एतत् तत्त्वं प्रपञ्चितमधस्तात्। स्वतन्त्रेष्ववयविनानवष्टब्धेषु **प्रत्य**भिज्ञयास्य घटस्यैतावानवयवो यथास्थितएवास्तीत्याकारकपूर्वापराकाराभेदावगाहिन्या। अन्यत्र प्रत्यभिज्ञाया अविषये नायमित्थं मया कृत इति भेदाध्यासे वा। **मतद्वयेऽपि** नैयायिकमते वैशेषिकमते च। **द्वैविध्यं** पाकप्रयोज्यत्वं पाकजन्यत्वं च।

तर्कामृतम्

कपालं नीलमेकम्, एकं च पीतं यदि, तदा घटे चित्ररूपमुत्पद्यते। रसादावेवं सति अवयविनि रसो न जायते, चित्ररसाद्यस्वीकारात्।

तरङ्गिणी

चित्रं रूपमिति। रूपस्य दैशिकाव्याप्यवृत्तित्वविरहान्नील-पीतकपालारब्धघटे नीलपीतरूपयोरसम्भवादिति भावः। एवं सति। कटुतिक्ताभ्यामवयवाभ्यामवयविन आरम्भे सति। **चित्ररसाद्यस्वीकारादिति**। प्रमाणाभावादिति भावः। रसोपलम्भश्चावयवरसमादायोपपादनीयः। न च रूपेऽपि तथा। द्रव्यप्रत्यक्षे रूपस्य हेतुत्वेनावयविनि रूपाभावे तत्प्रत्यक्षानुपपत्तेः। न च परम्परया रूपस्य प्रत्यक्षहेतुत्वमङ्गीकरणीयम्। गौरवात्, अतिप्रसङ्गाच्च। नीलपीतद्व्यणुकारब्धत्रसरेणुरूपस्य प्रत्यक्षानुपपत्तिः। मधुराम्ललवण-कटुत्रसरेणुभिरारब्धे चतुरणुके रसप्रत्यक्षानुपपत्तिः। त्रसरेणौ रूपं विहायान्येषामप्रत्यक्षत्वात्। अवयविनि रसानुत्पाददिति चित्ररसादिरप्यङ्गीकार्य इति।

चषकम्

पृथिवीशिषगुणस्य कारणान्तरमपि दर्शयति। **कपालमिति। एकं** चेत्यन्यच्चेत्यर्थः **चित्रं रूपमिति**। व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे विरोधेन रूपस्य दैशिकाव्याप्यवृत्तित्वविरहान्नीलपीतकपालारब्धघटे नील-पीतरूपयोरसम्भवेन परस्परं तत्सामग्र्योः प्रतिबन्धकत्वस्यावश्यं वाच्यत्वादित्याशयः। **इदमुपलक्षणम्**। एकं कपालं कठिनमेकञ्च कोमलं यदि तदा घटे चित्रस्पर्श उत्पद्यते तुल्यन्यायाद**न्यथा** घटस्पार्शनानापत्तेरित्यपि बोध्य**म्**। प्रसङ्गादाह। **रसादाविति। चित्ररसादीति। आदि**ना गन्धपरिग्रहः। विभिन्नजातीयरसादिमदवयवारब्धोऽवयवी नीरसादिरेवोपलम्भस्त्वावयवरसादेरेव। **न च** रूपेऽप्येवमस्त्विति **वाच्यम्**। रूपोपलम्भस्यावयवरूपविषयत्वसम्भवेऽपि नीरूपस्य घटस्य प्रत्यक्षान्यथानुपपत्या तत्र चित्ररूपाङ्गीकाराल्लाघवात् समवायेनैव रूपस्य प्रत्यक्षे हेतुत्वात्। **न चैवं** मधुराम्ललवणकटुत्रसरेणुभिरारब्धे चतुरणुके रसप्रत्यक्षानुपपत्तिस्तत्र रसाभावात्त्रसरेणुरसस्यातीन्द्रियत्वादिति **वाच्यम्**। सर्वेषां तेषां त्रसरेणूनामेकजातीयस्यैव रसस्याभ्युपगमाद्रसभेदे मानाभावा**त्तदिद**मुक्तमारोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप **इति**।

तात्पर्यटीका

असम्भवेनेति। नीलकपालाद्यवच्छेदेन घटे पीताद्युपलब्ध्यापत्तेरिति भावः। **परस्परं** तत्सामग्र्योः प्रतिबन्धकत्वस्य। नीलघटितसामग्र्याः पीतप्रतिबन्धकत्वस्य पीतघटितसामग्र्याश्च नीलप्रतिबन्धकत्वस्य। मूलस्य न्यूनतां परिहरति। **इदमुपलक्षणमिति। अन्यथा** कठिनकोमलस्पर्शवदवयवारम्भघटे चित्रस्पर्शानभ्युपगमेऽस्पार्शनानापत्तेरिति। स्पार्शनं प्रति स्पर्शस्य विषयनिष्ठप्रत्यासत्या हेतुत्वादिति भावः। **ननु** स्वाश्रयसमवेतत्वप्रत्यासत्या तदप्यत्रास्तीति नोक्तानुपपत्तिरत आह। **लाघवादिति। एवं** चित्ररसानङ्गीकारे।

तर्कामृतम्

गुरुत्वस्थितिस्थापकयोश्च कारणगुणप्रक्रमजन्यता। द्वित्वादयोऽपेक्षाबुद्धिजन्याः।

तरङ्गिणी

अपेक्षाबुद्धिः। नानैकत्वावगाहिबुद्धिः।

चषकम्

नन्वेवं यत्रावयवे रसोऽध्यक्षस्तदा रब्धोवयवी नीरसादिरेव स्यादिति **चेत्स्या**देव यदि सामग्रीप्रतिबन्धकाभावेऽपि **कुण्ठी**भावं भजेदेवमन्यत्रापीति निर्व्यलीकः पन्थाः। **ननु** गुरुत्वस्थितिस्थापकयोः पाकप्रयोज्यता दृश्यते कथमन्यथा पक्वापक्वयोरनयोस्तरतमभावः पतनतारतम्यानुमेयस्तथा च पृथिवीविशेषगुणाः पाकजा इति विशेषानुधावनमसङ्गतमिति लीलावतीकारमताच्छङ्कां वारयन्नाह। **गुरुत्वस्थितितिस्थापकयोरिति**। चस्त्वर्थः। कारणगुणप्रक्रमजन्यतेति सावधारणम्। **तेना**वयविगुरुत्वादीनां कार्यस्यावयवगुरुत्वादिनैवान्यथासिद्धत्वेऽपि सामग्रीबलार्जितं कार्यमनपवार्यमन्यथागुरुत्वबुद्धेरनेकगुरुत्वस्यातिपरम्परायाश्च विषयत्वोक्तौ गौरवमित्युक्तं भवति। तथा च गुरुत्वस्य तारतम्यमवयवापचयादवयवसंयोगवैचित्र्यात्तु स्थितिस्थापकस्येति **भावः**।

अपेक्षाबुद्धीति। एकत्वांशे सधर्मितावच्छेदकनानैकत्वबुद्धीत्यर्थः। **एक**त्वेयत्तावगाहिबुद्धीत्यर्थ इत्यपि **केचित्**। **न चैवं** नियतैकत्वज्ञानाभावे क्वापि द्वित्वादिसङ्ख्या न स्याद् दृश्यते चासौ सेनावनादाविति **वाच्यम्**। त्रित्वत्वाद्यवच्छिन्नप्रत्यक्षफलोपहितत्रित्वादिकं प्रत्येव तस्य हेतुत्वात्तादृशं त्रित्वत्वादिसकलजातिव्यापकबहुत्वत्वाद्यवच्छिन्नं प्रति त्वनियतैकत्वज्ञानमपि तन्त्रम्। **अत** एव तेन विना न तत्र त्रित्वत्वादिप्रत्यक्षम्। **बहुत्वस्य**

सङ्ख्यान्तरत्ववादिनां कन्दलीकाराणां मते त्वितो बहुतरेयं सेनेति तारम्यप्रतीतेरनुपपत्तिः। शतत्वसहस्रत्वाद्युत्कर्षाप्रतीतेरुभयत्राप्यपेक्षाबुद्धेरेकरूपत्वेन बहुत्वस्याप्येकरूपत्वात्।

इमौ द्वावयं चैक इति बुद्ध्या यत्र त्रित्वोत्पत्तिस्तत्र द्वित्वबुद्धौ संस्कारवशादेकत्वस्यापि लिङ्गोपहितलैङ्गिकभानवादिनामनुमितौ लिङ्गस्येव विषयत्वसम्भवाद् द्वित्वसमानाधिकरणैकत्वद्वयवन्ताविमावित्येवबुद्धिरिमौ द्वाविति शब्देनाभिलप्यत इति **बोध्यम्। स्व**समाननियतत्वावच्छेदके सङ्ख्यावृत्तियत्किञ्चिदन्यतरत्वे घटकस्य प्रत्येकभेदस्य प्रतियोगितावच्छेदकं यावत् प्रत्येकं तावदवच्छिन्नसङ्ख्याप्रकारकबुद्धिरेव तत्तत्सङ्ख्या-हेतुरित्ययमास्माकीनः **पन्थाः। अत एव** द्वित्वादेः पुरुषविशेष-नियतापेक्षाबुद्धिजन्यत्वादेव हेतोस्तत्पुरुषीयबुद्धिजन्यं द्वित्वं तस्य योग्यं नान्यस्येति कल्प्यते।

न चैवं तद्बुद्धिं प्रत्येव तस्या हेतुत्वमुचितमिति **वाच्यम्।** लाघवाद्द्वित्वं प्रति हेतुत्वा**दन्य**था सुखादिसामग्र्या अपि सुखादिव्यञ्जकत्वापत्या सत्कार्यवादापत्तेः। **इदमुप**लक्षणम्। तन्नाशनाश्याः **किञ्च** क्वचिदाश्रयनाशनाश्या इत्यपि बोध्यम्। जन्यभावस्य विनाशित्वनियमा-दश्रयनाशस्यासार्वत्रिकत्वात्तद्विलम्बेन विलम्बासम्भवात् कालान्तरे द्वित्वोपलम्भाभावाच्चा**स्मद**नध्यक्षेष्वपि ब्रह्माण्डान्तर्वर्तियोगिनामपेक्षाबुद्धयः सर्वमुपपादयितुमीशत इत्यलं क्लिष्टकल्पनया। **इत्थ**ञ्च सम्बद्धं वर्तमानञ्च गृह्यते चक्षुरादिनेत्यनुरोधात् सप्रकारकज्ञानस्यैवोपनायकतया विशेष्येविशेषणमिति रीत्या द्वे द्रव्य इत्यलौकिकप्रत्यक्षस्याप्यनिर्वाहाच्चापेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं कल्प्यत इति सिद्धान्त**सरणिः। नव्या**स्तूत्पस्यमानद्वित्वस्य मनसा द्वित्वत्वसामान्यलक्षणासहकारिवशात् पूर्वमनुभवेन द्वित्वोत्पत्तिसमय एव द्वित्वत्वप्रकारकमुत्पद्यमानद्वित्वस्मरणं तेन तदुत्तरक्षणे द्वे द्रव्य इति विशिष्टवैशिष्ट्यप्रत्यक्षसम्भवादलमपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वेन। **अन्यथा** स्वजन्यनिर्विकल्पकेन स्वनाशात् सुखशब्दादेरपि प्रत्यक्षान्यथानुपपत्या त्रिक्षणावस्थानप्रसङ्गादिति **प्राहुः।**

समवायैकत्ववादिनां मते पुनर्द्वित्वादीनां द्वयादौ विशिष्टबुद्धिनियामकः कश्चित्समवायातिरिक्तः सम्बन्धोऽभ्युपेयोऽ**न्यथा** घटावितिवदाकाशाविति प्रयोगप्रामण्यनिराकरणस्याशक्यत्वापत्तेः। **न चैव**मपि कथं तद्वारणं घटकाशयोर्द्वित्वपर्याप्तेः सत्त्वे आकाशेऽपि तत्सत्त्वावश्यम्भावादिति **वाच्यम्।** उद्देश्यतावच्छेदकव्याप्यपर्याप्तेस्तत्संसर्गत्वाभ्युपगमात्। **नचैवं** घटपटावित्यत्र घटपटयोर्द्वयं द्वयं प्रतीयेतेति **वाच्यम्।** एकधर्मोद्देश्यतावच्छेदककबुद्धावेव तत्पर्याप्तेः संसर्गत्वात्। धर्मद्वयस्योद्दश्यतावच्छेदकत्वे शुद्धपर्याप्तेर्द्वित्व-संसर्गत्वा**देवं** धर्मत्रयस्योद्देश्यतावच्छेदकत्वेपरं त्रित्वस्य शुद्धपर्याप्तिः संसर्ग इति न घटाकाशस्तम्भपर्याप्तत्रित्वाभिप्रायेण घटाकाशा इति प्रयोगप्रामाण्यं तत्र धर्मत्रयस्योद्देश्यतानवच्छेदकतयोद्देश्यतावच्छेदकव्याप्यपर्याप्तिरेव त्रित्व-संसर्गत्वाभ्युपगमा**देव**मुत्तरत्रापि। **नचै**वमेकमात्रवृत्तिधर्मस्य द्वित्वानवच्छेद-कतयावच्छेदकत्वांशेऽप्रामाण्यं सुलभमेवेति **वाच्यम्।** तत्सम्बन्धितावच्छेदकस्य तदवच्छेदकत्वनियमेनैकमात्रवृत्तिधर्मस्य द्वित्वावच्छेदकताया दुर्वारत्वात्। अन्यथाकाशं द्वित्ववदिति प्रतीत्यनापत्तेरिति दिक्।

तात्पर्यटीका

एवमुपलम्भस्यावयवरसविषयकत्वेनोपपत्तौ। **पक्वापक्वयो**रनयोरिति न समानाधिकरणम्। **पतनेति।** अत्र पतनमधःसंयोगावच्छिन्ना क्रिया स्थितिस्थापकसाध्यक्रियासाधारणी न तु गुरुत्वजन्यैवोभयतार-तम्यानुमापकत्वासम्भवादिति बोध्यम्। **लीलावती**कारमताल्ली-लावतीकारमतमालम्ब्य। **ननु** द्व्यणुकत्र्यणुकयो रसाद्यवश्यम्भावार्थमवश्य-कल्प्यायाः सामग्र्या बलादस्तूत्तरत्रापि रसादि प्रकृते तु परमाणुगुरुत्वेनैव सर्वत्र गुरुत्ववत्ताप्रतीत्युपपत्तौ गुरुत्वघटिता सामग्र्येव न कल्प्येत्युक्ते त्वाहा**न्यथे**ति। अवयवापचयादन्तःसञ्चारिणो जलावयवयोः कतिपययोर्ना**शात्।**

यद्धर्मावच्छिन्ने एकत्वावगाहिन्यपेक्षाबुद्धिस्तद्धर्मावच्छिन्न एव द्वित्वोपलब्धिरित्यनुभवान्निर्धर्मितावच्छेदकैकत्वावगाहिबुद्धेर्द्वित्वोत्पादे मानाभाव इत्याशयेना**हैकत्वांश इति।** **इयत्ता**नवगाहिबुद्धेर्बुहुत्वोत्पत्तिर्नस्यादित्यस्वरसः

केचिदित्यनने सूचितः। **कार्यतावच्छेदकं** व्यवस्थापयितुं शङ्कते **न चैवमिति। एवं** सर्वत्र नियतैकत्वावगाहिधियो हेतुत्वे **क्वापि** बहव इति प्रत्यक्षफलोपहितबहुत्वत्वावच्छिन्नापि बहुत्वत्वव्याप्यत्रित्वत्वाद्यवच्छिन्नस्य तत्रोत्पत्तावपि न त्रित्वत्वेन त्रित्वप्रत्यक्षं दोषादित्याशयः। **तस्य** नियतैकत्वज्ञानस्य **तादृशं** बहव इति प्रत्यक्षफलोपहितम्। **अनियतैकत्वज्ञानमपीति।** अनेकैकत्ववन्त एत इति ज्ञानमपीत्यर्थः। **अत** एवेत्थं हेतुहेतुमद्भावव्यवस्थितेरेव। **तेन** विना नियतैकत्वज्ञानेन विना। **तत्रा**नियतैकत्वज्ञानेन त्रित्वोत्पत्तिस्थले।

द्वित्वसमानाधिकरणेति विशिष्यैकत्वप्रापणाय। **एकत्वद्वयवन्ताविति।** तथा च साप्यनेकैकत्वावगाहिनी बुद्धिरिति भावः। **नन्वने**कैकत्वानां तत्तत्कार्यपूर्ववृत्तितत्तत्कारणीभूतज्ञानव्यक्तौ विषयताकल्पने गौरवं मानाभावश्च लिङ्गोपधानेऽपि न हि बाधकमन्यत्साधकाभावादित्युक्तमेवातः कल्पान्तरमाह। **स्व**समनियतत्वावच्छेदक इति। स्वं कार्यीभूतं त्रित्वादि तस्य समनियतत्वावच्छेदकं तदेकत्वत्रयान्यतमत्वं तद्द्वित्वतदेकत्वान्यतरत्वं च तत्र घटको भेद एकत्वभेदत्रयं द्वित्वैकत्वयोर्भेदद्वयं च तत्प्रतियोगितावच्छेदकं यावत्तत्तदेकत्वत्वत्रयं तत्तद्द्वित्वत्वैकत्वत्वे च प्रत्येकं तावदवच्छिन्ना सङ्ख्यैकत्वत्रयमात्रं द्वित्वैकत्वद्वयमात्रञ्च तत्प्रकारिकाबुद्धिरयमेकोयमेकोयमेक इतीमौ द्वावयं चैक इति च बुद्धित्रयमपीति तादृशबुद्धि चतुष्टयमेव त्रित्वसङ्ख्याहेतुरित्यर्थः। अत्र यावदिति गणकशास्त्रप्रसिद्धगुणभाजनरीत्युपग्रहः। उक्तलाघवयुक्तेः सकलानुभवसम्वादाच्चास्माकीन **इत्युक्तम्।** प्रक्रान्तस्य सर्वनाम्ना परामर्शसम्भवेऽपि परामर्शनीयस्य व्यवधानेन व्यामोहो मा भूदित्यत एवेति स्वयमेव व्याचष्टे। **द्वित्वादेरिति।**

एवं द्वित्वयोग्यताया बुद्धिविशेषनियन्त्रितत्वे। **लाघवाद्**द्वित्व-प्रत्यक्षत्वापेक्षया लघुनो द्वित्वत्वस्य कार्यतावच्छेदकत्वे लाघवात्। असार्वत्रिकत्वमप्यभिप्रेत्याह **तद्विलम्बेनेति। अलं क्लिष्टकल्पनयेति।** ईश्वरीयापेक्षाबुद्धेर्नित्यत्वेन निष्प्रमाणकानन्तद्वित्वोत्पत्तिवारणाय तत्सहकारितया कल्प्यमानतत्तत्क्षणविशेषनाशनाश्यत्वकल्पनयेत्यर्थः।

पृथिव्यां गन्धसमवायो न जले इति प्रतीत्या समवायस्य नानात्वे तु तेनैव पर्याप्तेर्गतार्थता स्यादतः **समवायैकत्ववादिनामिति।** द्वित्वस्य सम्बन्धत्वेऽप्युक्तप्रयोगप्रामाण्यनिराकरणसम्भवेन न पर्याप्तिः पदार्थान्तरमित्यभिप्रेत्याह। **समवायातिरिक्त इति।** अन्यथोक्तपर्याप्तिसम्बन्धानभ्युपगमे। त्रित्वसंसर्गत्वाभ्युपगमादिति। अथ घटद्वयाभिप्रायेण घटाकाशा इति प्रयोगो न स्यादिति चेत्। न स्यादेव। यदि तत्र द्वित्वधर्मितावच्छेकघटत्वावच्छिन्नपरतया घटपदं नावगम्येत। तथा सत्येव घटद्वयसंशयोच्छित्तिरपि द्वेकयोरिति निर्देशस्तु धर्मपरतयोपपादितोऽन्यत्रेति दिक्। एवं दिगाकाशा इति वा दिक्कालाकाशा इति वा चतुष्ट्वाभिप्रायेण प्रयोगप्रामाण्यवारणम्। अत्र धर्मचतुष्टयस्योद्देश्यतानवच्छेदकतयोद्देश्यतावच्छेदकव्याप्यपर्याप्तेरेव संसर्गत्वात्।

मास्तु तर्ह्यसौ तत्सम्बन्धितावच्छेदकोऽपीत्युक्ते त्वाह **न्यथेति। अनापत्तेरिति।** मतुपा सम्बन्ध्युल्लेखादिति भावः। ननु स्वव्यापकोद्देश्यतावच्छेदकवत्त्वसम्बन्धेन प्रकृत्यर्थे द्वित्वान्वयो वक्तुमुचितो व्याप्तिघटकसामानाधिकरण्यानिवेशेन लाघवादत उक्तम् **दिगिति** दिगर्थस्तु घटो न द्वाविति वाक्यार्थबोधोत्तरमपि घटौ द्वाविति वाक्याच्छाब्दबोधापत्ति**स्तथा** हि घटो न द्वावितिवाक्यात्स्वव्यापकघटत्ववत्त्वसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताको भेदो न बोधयितुं शक्यो घटत्वस्य द्विवचनार्थद्वित्वसामान्याव्यापकतया तेन सम्बन्धेन द्वित्ववतो प्रसिद्धेर्घटत्वव्याप्यपर्याप्तिसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदबोधस्तु स्वव्यापकोद्देश्यतावच्छेदकत्वसम्बन्धेन द्वित्वबोधे न प्रतिबन्धक **इति। अवयवसंयोगेति।** अत्र दीर्घत्वह्रस्वत्वयोः संयोगरूपत्वेऽस्मादयं दीर्घो ह्रस्व इति सावधिकत्वप्रतीत्यनुपत्तिरेवमनेकसंयोगानां परम्परयातद्विषयत्वमपेक्ष्यैकपरिमाणस्य सक्षात्तथात्वे लाघवम्। महत्त्वेन वर्त्तुलत्वादीनां क्रोडीकरणं तु महर्षेः स्वतन्त्रेच्छतयेत्यस्वरसः केचिदित्यनेन सूचितः।

तर्कामृतम्

परिमाणं चतुर्विधम्–अणु, महत्, ह्रस्वं, दीर्घं[१] च। कारणगुणप्रक्रमजन्यं स्वावयवबहुत्वं[२] महत्त्वजनकम्, यथा त्रसरेणूनाम्। अवयवानां शिथिलः संयोगः प्रचयोऽपि तज्जनकः। यथा तूलस्य परिमाणम्।[३]

तरङ्गिणी

परिमाणविशेषकारणविशेषमाह–**स्वावयवेति**। **बहुत्वं चेति**। चकारात्कारणगुण- सङ्ग्रहः। अवयवानां शिथिलः संयोगः प्रचयोऽपीति। संयोगान्तं प्रचयपदार्थविवरणम्। प्रशिथिलत्वं च किञ्चिदवयावानवच्छिन्नत्वम्।

चषकम्

दीर्घं ह्रस्वं चेति। नन्वणुत्वमेव ह्रस्वत्वमस्तु महत्त्वमेव दीर्घत्वमिति चेन्न। रशनापेक्षयाणुन्यपि सूत्रे ह्रस्वत्वाप्रत्ययात् सूत्रापेक्षया महत्तमायामपि रशनायां दीर्घत्वाव्यवहाराच्च। अवयवसंयोगविशेषावेव दीर्घत्वह्रस्वत्वे अन्यथा वर्तुलत्वचतुरस्रत्वा- दीनामाधिक्येन चातुर्विध्यानुपपत्तितादवस्थ्यादित्यपि **केचित्। कारणगुणेति**। अवयवद्वित्वसङ्ख्याया अवयविमहत्त्वं प्रति सामान्यतो हेतुत्वे द्व्यणुके महत्त्वापत्तिर्विशेषतो हेतुत्वेप्यवयवमहत्त्वो- त्कर्षेणावयविमहत्त्वोत्कर्षो न स्यादिति परिमाणजन्यं परिमाणं वाच्यं तच्च महत्त्वोत्कर्षे पर्यवस्यतीति हृदयम्।

---

१. दीर्घं ह्रस्वञ्च इति पाठान्तरम्।

२. बहुत्वञ्च इति पाठान्तरम्।

३. परिणामम् इति पाठो नास्ति।

अपकृष्टमहत्त्वं प्रति तु क्वचित् त्रित्वसङ्ख्यैव हेतुरित्याह। **स्वावयवबहुत्वञ्चेति।** चोवधारणे। द्व्यणुकपरिमाणस्य त्र्यणुकमहत्त्वे हेतुत्वं न सम्भवति। सजातीयत्वाभावान्नवापरमाणुपरिमाणस्य द्व्यणुकपरिमाणेऽस्य ततोऽनुत्कृष्टत्वात् परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणस्यैवारम्भकवात्। परन्तु यथा यावदवयवगुरुत्वानुमापकलिङ्गानुमेयगुरुत्वारम्भकत्वमवयवगुरुत्वस्य तथा यावदवयवपरिमाणपरिच्छेदकपरिच्छेद्यपरिमाणारम्भकत्वमप्यवयवपरिमाणस्येति नानियतोत्कर्षप्रसङ्गः। न चावयवगुरुत्वस्य स्वव्यधिकरणावयविगुरुत्वारम्भकत्वेऽर्धमाषकगुरुत्वाभ्यां कपालाभ्यामारब्धस्य घटस्य माषतुलारूढस्यापि पतनापत्तिरिति वाच्यम्। जन्यगुरुत्वस्य जनकगुरुत्वसमुदायसहितस्यापि जनकगुरुत्वसमुदायारब्धमाषकप्रतिबध्यपतनारम्भकत्वस्यैव फलबलकल्प्यत्वात्। यद्गुरुत्वं यद्गुरुत्वव्यधिकरणं तत्सहितं तत् तत्प्रत्येकाप्रतिबध्यपतनारम्भकमेव। यथा माषतुलारूढं माषद्वयगतं मिलितं गुरुत्वद्वयं नह्यवयवगतमाषगुरुत्वव्यधिकरणमपि माषद्वयारब्धमुद्रिकादिगुरुत्वं मुद्रिकाद्यप्रतिबध्यपतनारम्भकमिति व्यभिचार इति **चेन्न** तादृशनियमासिद्धेस्तत्प्रत्येकाजन्यत्वस्योपाधित्वात्। दृष्टान्ते साध्यव्यापकस्य तस्य पक्षे साधनाव्यापकत्वात् **वस्तुतस्त्व**वयवं विनावयविनोऽनवस्थानान्मुद्रिकामात्रप्रतिबध्यपतनाप्रसिद्ध्या तद्घटितसाध्याप्रसिद्धिरेवेति सूक्ष्मदृशां परामर्शः।

त्रसरेणूनामिति। महत्त्वजनकमित्यन्वयः। अवयवानां महतामवयवानां शिथिलः किञ्चिदवयवानवच्छिन्नः। तज्जनको महत्त्वजनकः। महदल्पद्वित्रिकपालारब्धघटपरिमाणाभ्यां महाकपालत्रयारब्धघटपरिमाणस्यातिशयितत्वात् सङ्ख्यापरिमाणोभयजन्यतेत्याद्यधिकमुक्तं मुक्तावलीप्रकाशेऽ**स्मन्मातामहचरणैः॥ इदं तु** बोध्यम् परिमाणसामान्यमेवाश्रयनाशनाश्यमिति। एतेनावयवोपचयापचयाभ्यां परिमाणस्यैव नाशो न शरीरस्येति मीमांसयतमनादेयम्। समवायिकारणनाशेनाश्रयनाशावश्यम्भावे तस्यैव तद्धेतुत्वात्।

तात्पर्यटीका

ननु महदल्पपरिमाणरब्धघटयोस्तुल्यपरिमाणापत्तिस्तथात्वेऽप्य-

वयवपरिमाणादुत्कर्षस्यावश्यकत्वाद्वैषम्ये बीजाभावादत आह **परन्त्विति।** निरूपाधिसहचार एव तादृशनियमसाधक इत्युक्तं त्वाह **तत्प्रत्येकेति। उपाधित्वादिति।** कपालगुरुत्वसहितं घटगुरुत्वं घटाप्रतिबध्यपतनारम्भकं कपालगुरुत्वव्यधिकरणत्वादेकमाषतुलारूढमाषद्वयगुरुववदित्यनुमाने उपाधित्वादित्यर्थः। उभयप्रतिबध्यस्यापि प्रत्येकप्रतिबध्यत्वाद् दृष्टान्ते साध्यसत्त्वाय प्रत्येकमात्राप्रतिबध्यत्वं वाच्यम्, तथा सत्याह **वस्तुतस्त्विति।** घटगुरुत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतानवच्छेदकधर्मावच्छिन्न-पतनारम्भकमिति यदि साध्यं निर्दिश्यते तदा न साध्याप्रसिद्धिरिति तु मम मतिः।

त्रसरेणूनामितीत्यत्र बहुवचनं सर्वेषां त्रसरेणूनामेवेत्यर्थ...भाय। महतोरपि द्वयोस्त्रसरेण्वो न प्रचयकार्यवैचित्र्यानुपलम्भात् का कथाणूनामिति वक्तुं महतामित्यवयवानामिति बहुवचनं च। **किञ्चिदिति।** न च संयोगसामान्यस्यैववाव्याप्यवृत्तितया किञ्चिदवयवानवच्छिन्नत्वमतिप्रसक्तमिति **वाच्यम्।** अभिमुखकिञ्चिद्दिगनवच्छिन्नत्वस्य तदर्थत्वाद्। महदल्पेति, महद्भ्यां द्वाभ्यामल्पैस्त्रिभिः कपालैरारब्धयोर्घटयोः परिमाणाभ्यामित्यर्थः। **सङ्ख्यापरिमाणोभयजन्यतेत्यादीति।** अप्रचितमहात्रिकपालारब्धघटपरिमाणात् प्रचितमहात्रिकपालारब्धघटपरिमाणस्यातिशयितत्वात्सङ्ख्यापरिमाण-प्रचयत्रयजन्यतेत्यादिपदार्थः। समवायिकारणनाशेन शरीरावयव-ह्रासवशाद्धस्ताद्यारम्भकसंयोगनाशे सति हस्तनाशावश्यम्भावेन अवयविपाके तु नावयवापचय इति नावयविनाशावश्यम्भाव इति विशेषः। **आश्रय**नाशावश्यम्भावे परिमाणाश्रयशरीरनाशावश्यम्भावे।

तर्कामृतम्

पृथक्त्वं कारणगुणप्रक्रमजन्यम्। ननु तत्र किं प्रमाणम्। घटात्पटः पृथगिति प्रत्यक्षम्[1]। तस्याऽन्योन्याभावविषयकत्वमिति चेन्न। अन्योन्याभावप्रत्यये

---

१. 'प्रत्यय इति' पाठान्तरम्।

प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वनियमात्, यथा घटो न पट इति। अन्योन्याभावस्य पृथक्त्वरूपत्वे घटात् पटो नेत्यपि प्रयोगापत्तेः। न चैवं घटादन्यः पट इत्यत्र कथमन्योन्याभावप्रतीतिरिति वाच्यम्, अन्यत्वस्यापि पृथक्त्वरूपत्वात्।

तरङ्गिणी

अन्योन्याभावप्रतीतेरित्यादि। न च घटस्य भेदो घटाद्भेद इत्यादिप्रत्ययान्नायं नियम इति वाच्यम्। तत्रापि भेदस्य पृथक्त्वरूपत्वात्। यथा चैतत्तथा प्रपञ्चितमस्माभिस्तत्त्वचिन्तामणिटिप्पण्याम्। परन्त्वन्योन्याभावपदस्य पृथक्त्ववाचित्वस्य केनाप्यननुमतत्वात्। घटस्य अन्योन्याभाव इत्यादौ प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वव्यभिचारः। तथापि प्रतियोगिप्रकारता-निरूपितप्रतियोगित्वत्वानवच्छिन्नविषयतानिरूपितान्योन्याभावप्रत्यये इत्यर्थः। पञ्चमीतृतीययोः प्रतियोगित्वेनैव शक्तेः, षष्ठयास्तु सम्बन्धत्वेनैव शक्तेर्न दोषः।

चषकम्

पृथक्त्वमेकसमवेतपृथक्त्वम्। द्विसमवेतपृथक्त्वं तु द्वित्ववदेकपृथक्त्वासमवायिकारणकमिदमेकं पृथगिदमेकं पृथगित्यपेक्षा-बुद्धिनिमित्तकारणकं तन्नाशनाश्यं वेत्यन्यत्र विस्तरः। शङ्कते। **नन्विति**। उत्तरयति। **घटादिति**। पुनः शङ्कते। **तस्येति**। **अन्योन्याभावविषयकत्वमिति**। तथा चान्यागोचरस्यान्यव्यवस्थापकत्वायोगादिदं न तत्र प्रमाणमिति भावः। समाधत्ते। **अन्योन्याभावप्रत्यये इति**। **ननु** प्रत्ययवैचित्र्यमेव न प्रत्येयस्यापीत्याशङ्क्य प्रकृते प्रत्येयवैचित्र्याभावे प्रत्ययवैचित्र्यानुपपत्तिरेवेत्याह **अन्योन्याभावस्येति**। पृथक्त्वरूपत्वे पृथक्पदार्थत्वे। नञः पृथगर्थकत्वाविशेषेण पञ्चमीप्रसङ्गस्य दुर्वारत्वादित्याह **घटादिति**। तदुक्तम्। **प्रतीतिर्हि** विलक्षणेति।

नेत्यपीति। अपिनात्रान्धकारो न प्रकाश इतिवद् नञुल्लिखितप्रतीतिविषयत्वात् पृथक्त्वं भेदभिन्नं गुणान्तरं स्यादेव। **अथ** नञर्थोऽपि पृथक्त्वमनुमन्यते। तदा घटात् पटो नेति प्रयोगापत्तिः सुदृढैवेति सूचित**मित्यन्यै**रपरिशीलिता सरणिः। **प्रयोगापत्तेरिति**। अन्यपदसमानार्थकपदयोगस्य पञ्चमीप्रयोजकस्य तत्र सत्त्वा**दन्यथा** घटाद्भेद इत्यत्र पञ्चम्यनुपपत्तेरिति भावः। **एव**मुक्तनियमाङ्गीकारे।

पृथक्त्वरूपत्वादिति। इदमुपलक्षणम्। घटाद्भेद इत्यत्र भेदोऽपि पृथक्त्वमेवेत्यपि **बोध्यम्। नव्यास्त्वन्योन्याभाव एव पृथक्त्वं** न तु गुणान्तरं रूपं घटात् पृथगिति प्रतीत्यनापत्तेः नीलो घटो पटात् पृथगिति प्रतीत्यापत्तेश्च न च घटो नेत्यत्र पञ्चम्यापत्तिः सूत्रेऽन्यपदस्यान्योन्याभावर्थकपदपरत्वेऽपीतरपदग्रहणेन विसदृशस्य निपातमात्रस्य पर्युदासात्। भूवादय इत्यत्र वाग्रहणेनाक्रियावाचिन इवेत्थञ्च घटादिवेति प्रयोगवारणायाव्ययातिरिक्तत्वध्रौव्ये घटात् पृथगित्यत्र पञ्चम्युपपत्तिः पृथग्विनानानाभिरिति सूत्रान्तरे पृथग्ग्रहणादिति **वदन्ति वस्तु**तस्त्वन्योन्याभावीयप्रतियोगित्वरूपार्थविवक्षायां पञ्चमीतिसूत्रार्थोऽन्येतराद्यर्थे प्रतियोगिनो भेदसम्बन्धेनान्वयासम्भवात्तद्योगेऽवश्यं प्रतियोगित्वरूपार्थ विवक्षेति तत्र पञ्चम्यनुशिष्टा **एतद**भिप्रेत्यैवेतरग्रहणं प्रपञ्चार्थमित्युक्तं युज्यते। नञर्थे तु प्रकृत्यर्थस्य संसर्गतयैवभानसम्भवान्न तदर्थविवक्षेति न तद्योगे पञ्चमीप्रसक्तिरित्येव युक्तम्।

तात्पर्यटीका

द्वित्वावच्छिन्नं पृथक्त्वमेव द्विपृथक्त्वमस्त्वित्याशङ्क्याहान्यत्रेति द्विपृथक्त्वावच्छिन्नमेकत्वमेव द्वित्वमस्त्विति। विनिगमनाविरहा-दुभयमप्यतिरिक्तमिति विस्तरार्थः।

ननु नञो नान्यपदसमानार्थकत्वमिति कथं तद्योगे पञ्चमीति यथाश्रुतग्रन्थार्थमाक्षिप्य नञोऽन्यपदसमानार्थकत्वं नास्ति वास्ति वेति

विकल्पपुरस्सरं तमाक्षेपं दूषयितुमाद्ये दूषणान्तरपूरयन्नन्त्याभिप्रायेण ग्रन्थार्थं वर्णयति। **अपिनेति**। **इतिवदिति** व्यतिरेके दृष्टान्तः। **अन्य**था पदजन्यप्रतीतिविशेष्यमुख्यविशेष्यकप्रतीतिजनकत्वरूपेऽन्यपदसमानार्थकत्वे विवक्षिते।

प्रतीत्यनापत्तेरिति। गुणे गुणानङ्गीकाराद्घटसामान्यावधिकपृथक्त्वस्य घटेऽभावेन सामानाधिकरण्येनापि रूपे तत्प्रतीतेरसम्भवाच्चेत्याशयः। ननु यत्किञ्चिद्घटपृथक्त्वमेव तत्र घटे वर्तमानं सामानाधिकरण्येन रूपे भासतां सङ्ख्यावदत आह **नीलो घट इति**। **ननु** यत्किञ्चिद्घटावधिकमपि पृथक्त्वं न घटत्वावच्छेदेनाभेदस्येव पृथक्त्वस्याप्यन्वयितावच्छेद-कावच्छेदेनैवान्वयादतस्तत्रापि **नील** इति। **इत्थ**ञ्च घटान्नेति प्रयोगवारणायेतरपदेन निपातभिन्नेत्यर्थविवक्षणावश्यकत्वे च। **पृथग्**विनेति सूत्रेण तृतीयाया एव विधानं न पञ्चम्या इत्यस्वरसं वदन्तीत्यनेन सूचयन्नामार्थयोरितिव्युत्पत्तावपि पृथक्पदभिन्नत्वं न नाम्नोर्विशेषणं पृथगर्थश्चपृथक्त्वविशिष्टं तथा चान्यपदसमानार्थकं यन्निपातपदभिन्नं सदिवपदभिन्नं पदं तद्योगे पञ्चमीत्यर्थं कृत्वा पूर्वसूत्रेणैव पञ्चम्युपपत्तिरित्यभिप्रायकं पक्षान्तरमाह **वस्तुतस्त्विति**। **अन्ये**तरादीत्यादिना पृथक्पदभेदपदयोः परिग्रहः।

तर्कामृतम्

संयोगस्त्रिविधः अन्यतरकर्मजः, उभयकर्मजः, संयोगजश्च। आद्यो यथा, मनःकर्मणा आत्ममनसोः संयोगः। द्वितीयो यथा, मेषयोः कर्मणा तयोः संयोगः। तृतीयो यथा, कारणाकारणसंयोगात् कार्याकार्यसंयोगः। यथा, हस्ततरुसंयोगात् कायतरुसंयोगः।

विभागोऽपि[1] त्रिविधः—अन्यतरकर्मजः, उभयकर्मजः, विभागजश्च। आद्यो यथा, मनःकर्मणा आत्ममनसोर्विभागः। द्वितीयो यथा, मेषयोः कर्मणा

१. विभागस्त्रिविधः इति पाठान्तरम्।

तयोर्विभाग:। विभागजविभागो द्विविध:, कारणमात्रविभागज: कारणाकारणविभागजश्च। आद्यो यथा, कपालकर्मणा कपालद्वयविभाग:, तत: कपालद्वयसंयोगनाश:, ततो घटनाश:, तत: कपालस्याकाशादिदेशाद्विभागजो[1] विभाग:। न च विभाग: स्वोत्पत्त्यनन्तरमेव विभागजविभागं जनयत्विति वाच्यम्। द्रव्यनाशसहकृतस्यैव तस्य तज्जनकत्वात्। तत्र[2] द्रव्यस्य प्रतिबन्धकत्वेन सति द्रव्ये तदसम्भवात्।

तरङ्गिणी

मन: कर्मणेति। आत्मनोऽमूर्तत्वेन क्रियाविरहादिति भाव:। **द्रव्यनाशसहकृतस्यैवेति**। निरपेक्षस्य तत्त्वे विभागस्य कर्मत्वापत्ते:।

चषकम्

अन्यतरकर्मज इति। न च संयोगाधिकरणात्मनि क्रियाभावाद्व्यभिचार इति **वाच्यम्।** तत्तत्कार्यव्यक्त्यधिकरणयावद्व्यक्तिषु कारणाभावस्यैव व्यभिचारपदार्थत्वात्। **तृतीयो यथेति**। ननु संयोगजसंयोगे मानाभाव: कपालद्वयसंयोगजनकक्रियाया एवाकाशकपालान्तरसंयोगजनकत्वे विरोधाभावस्य वक्ष्यमाणत्वादत आह। **कारणाकारणेति**। **यथेति**। नन्वयमपि नातिरिच्यते हस्ततरुसंयोगजनक- हस्तक्रियाया एव कायनिष्ठप्रत्यासत्या कायतरुसंयोगजनकत्वसम्भवादिति **चेन्न**। कायारम्भकावयवान्तरसंयोगजनिकया हस्तक्रियया जन्येन हस्ततरुसंयोगेन कायोत्पत्तिकाले तत्क्रियानाशकेन जनिते कायतरुसंयोगे हस्तक्रियाजन्यत्वासम्भवात्। न च शरीरक्रियापूर्वकालीनया हस्तक्रियया जन्येन हस्ततरुसंयोगेन शरीरक्रियया च जनिते शरीरतरुसंयोगे साङ्कर्यान्न तत्र कार्यतावच्छेदकवैजात्यसम्भव इति **वाच्यम्।** तत्र संयोगद्वयाभ्युपगमादित्येके। चित्र एक एव संयोग इति सर्वसामञ्जस्यमित्यपरे।

---

१. 'देशविभाग:।' इति पाठान्तरम्।

२. 'तत्र' इति पाठ: नास्ति।

द्रव्यनाशसहकृतस्यैवेति। निरपेक्षस्य तत्त्वे कर्मलक्षणातिव्याप्तेः। संयोगविभागयोरनपेक्षं कारणं कर्मेति तल्लक्षणात्। **पूर्व**संयोगनाशस्य सहकारितावादिनां कन्दलीकारणां मतं व्यवच्छेत्तुमेवकार**स्तथा** सति यथा श्रुते प्रथमलक्षणस्यासम्भवस्याव्याप्तेर्वापत्तेः। उत्तरसंयोगजनने पूर्वसंयोगनाशस्य सहकारितायाः प्रायेण कर्मण्यप्यावश्यकत्वात्। तद्व्यतिरिक्तानपेक्षत्वस्य विवक्षणे तु द्वितीयलक्षणस्योक्तातिव्याप्तितादवस्थ्यापत्तेः। **अस्माकं** तु तद्व्यतिरिक्तस्य द्रव्यनाशस्यैवापेक्षणान्नातिव्याप्तिरिति भावः। **तस्य** कारणमात्रविभागस्य **प्रति**बन्धकत्वेनावश्यक्लृप्तनियतपूर्वभावस्य नाशस्य प्रतियोगित्वेन। तदसम्भवाद्विभागजविभागासम्भवात्।

तात्पर्यटीका

संयोगद्वयप्रतीत्यापत्तिमेक इत्यनेनास्वरसं सूचयन्मतान्तरमाह। **चित्र एक एवेति**। देवदत्तप्रभवशब्दान्तरे गृहीतव्याप्तिकायाः कत्वादिसङ्कीर्णाया देवदत्तप्रभवत्वजातेर्देवदत्तप्रभवेऽत्र शब्दे परामर्शाद्देवदत्तीयत्वानुमितेरनुपपत्त्या गुणजातिसाङ्कर्यस्यादोषत्वात् प्रत्येकजन्यतावच्छेदकजातिद्वयाक्रान्तेनैकेनैव सामञ्जस्ये तादृशजातिद्वयविरुद्धतृतीयजात्याक्रान्तसंयोगे मानाभावस्तस्मिन् प्रत्येकजन्यतावच्छेदकजातिद्वयसमावेशप्रसङ्गव्यावृत्तये ह्येकैकजन्यतावच्छेदकजात्यवच्छिन्नं प्रत्यन्यान्यजनकस्य प्रतिबन्धकत्वे च गौरवमित्यस्वरसोऽपरे इत्यनेन सूचितः।

यथाश्रुते स्वोत्तरभाविकारणानपेक्षं संयोगविभागयोः कारणं कर्मेत्यर्थे। प्रथमलक्षणस्य यथोक्तं संयोगकारणमित्यस्य। **ननु** यत्रोत्पन्नद्रव्येऽसंयुक्त एव वेगजन्या क्रिया तया पूर्वसंयोगनाशमनपेक्ष्यैवोत्तरसंयोगजननात्तस्यां लक्षणगमनान्नासम्भव इत्यत आहा**व्याप्तिर्वेति**। तदेवोपपादयति। **उत्तरसंयोगजनन इति**। उक्तास्वरसादाह। **प्रायेणेति**। तद्व्यतिरिक्तानपेक्षत्वस्य स्वोत्तरभाविभावानपेक्षत्वस्य। **उक्तातिव्याप्तिरिति**। तद्ध्वंसविशिष्टक्षणापेक्षणादेव नातिव्याप्तिरिति चेदुक्ताव्याप्तिर्दुर्वारेत्यलं शाखाचङ्क्रमणेन। प्राचां मतेऽत्यन्ताभावप्रतियोगित्वासम्भवाद्व्याचष्टेऽवश्यक्लृप्तेति।

तर्कामृतम्

न च कर्मैव एकदा कपालद्वयविभागमाकाशकपालविभागं च जनयत्विति वाच्यम्। यद् द्रव्यानारम्भकसंयोगविरोधिनं विभागमारभते, न तत् द्रव्यारम्भकसंयोगविरोधिनम्। अन्यथा[1] विकसत्कमलकुड्मलदल-कर्मण्यतिव्याप्तिः। न च संयोगेऽप्येवमस्तु, तत्र अविरोधात्। द्वितीयस्तु कारणाकारणविभागात् कार्याकार्यविभागः, यथा, करतरुविभागात् कायतरुविभागः। परत्वापरत्वोत्पत्तिः कालप्रकरणे उक्ता।

तरङ्गिणी

"**संयोगविभागयोरनपेक्षकारणं कर्म**" इति सूत्रात्। एवकारेण संयोगनाशसहकृतस्य विभागस्य विभागजनकत्वमिति **कन्दलीकारमत**व्यवच्छेदः। तथाहि-कर्मणापि उत्तरसंयोगजनने पूर्वसंयोगनाशापेक्षणात्। पूर्वसंयोगनाशातिरिक्तस्यानपेक्षणे विभागस्यापि कर्मत्वापत्तेस्तदवस्थत्वादिति। **यदिति**। कर्मेत्यर्थः। तथा च कर्मत्वाघटितैव व्याप्तिः। अन्यथा द्रव्ये व्यभिचारापत्तेः। **व्याप्तेरिति**। विकसत्कुड्मलभङ्ग एव विपक्षबाधकस्तर्कः। इदं च वैशेषिकमतम्। नैयायिकनये तु कर्मणो वैलक्ष्यण्येन दलकर्मणोऽतथात्वेऽपि कपालकर्मणस्तथात्वे बाधका-भावात्कारणमात्रविभागजविभागास्वीकारः। कपाल कर्म द्रव्यानारम्भक-संयोगविरोधिविभागाजनकं द्रव्यारम्भकसंयोगविरोधि- विभागजनकत्वादिति व्यतिरेक्यनुमाने च वैजात्यमुपाधिरिति रहस्यम्। **न च संयोगेऽपीति**। एवं कारणमात्रसंयोगजत्वं कारणाकारणसंयोगजत्वम्। तत्र क्रिययैव कारणयोः कारणाकारणयोः संयोगजननेऽविरोधात् विरोधाभावात्।

---

१. 'यथा विकसत्कुड्मलदलकर्मेतिव्याप्तेः इति पाठान्तरम्।

चषकम्

कर्मैवेत्येवकारेण विभागेन विभागान्तरजनने कस्यचिदनपेक्षायां योऽतिप्रसङ्गः सोऽत्र न भवतीति सूचितम्। अत एवो**क्तमेकदेति। जनयत्विति** देहलीदीपकन्यायादुभयान्वयि। **यदिति** कर्मेति शेषः। अन्यथा द्रव्ये व्यभिचारपत्तेः। विभागमारभत इति काकाक्षिन्यायादुभ्यान्वयि। **इति व्याप्तेरिति**। अत्र विकसत्कुड्मलभङ्गप्रसङ्ग एव विपक्षबाधकस्तर्को बोध्यः। नव्यास्तु क्रियाया अव्याप्यवृत्तित्वेन यदवच्छेदेन क्रिया तदवच्छेदेनैव विभागान्न विकसत्कुड्मलभङ्ग इति मास्तु विभागजविभाग इति **प्राहुः। संयोगेऽपि** संयोगजसंयोगेऽपि। **एवं द्वैविध्यं अस्त्विति**। आरम्भकसंयोगस्यानारम्भक-संयोगजनककर्माजन्यत्वादित्याशयः। **यद्वा** संयोगेऽप्यारम्भकसंयोगेऽपि। एवमनारम्भकसंयोगजनककर्माजन्यत्वमित्येवार्थः। **तत्र कपाल**द्वयसंयोगजनक-क्रियायाः कपालाकाशसंयोगजनकत्वे। अविरोधाद्विरोधे साधकाभावात्। **यद्वा**ऽविरोधादविरोधे बाधकाभावादित्येवार्थः। तथा च कारणमात्र-संयोगजन्यसंयोगासिद्ध्या न संयोगजसंयोगद्वैविध्यमिति प्रघट्टकार्थः।

द्वितीयस्तु विभागजविभागस्य द्वितीयो भेदस्तु। **कायतरुविभाग इति। अयं** भावः। यत्र हस्तक्रियया हस्ततरुविभागस्तत्र कायेऽपि विभक्तप्रत्ययः सर्वसाक्षिक इति कायेऽपि विभागोऽङ्गीकरणीयः स च न हस्तक्रियाजन्यो व्यधिकरणत्वात् काये तु क्रिया नास्त्येव क्रियायाव्याप्यवृत्तितयावयविक्रियाया यावदवयवक्रियानियमादतोऽन्यतरकर्मणेव हस्ततरुविभागेन कायतरुविभागो जन्यते तेन च कायतरुसंयोगनाश इत्युपेयमिति। न च हस्ततरुविभागादेव कायतरुसंयोगनाशोऽस्तु किं विभागजविभागेनेति **वाच्यम्।** तथा सति विभागस्यैव निष्प्रमाणतापत्तेः। हस्तक्रियाजन्येन हस्ततरुसंयोगनाशेनैव हस्ततरुविभाग-स्यान्यथासिद्धिसम्भवात्। यथा चाश्रयनाशाजन्यगुणनाशस्य विरोधिगुण-जन्यत्वनियमेन हस्ततरुविभागस्य **सिद्धिरेवं** गुणानां कारणीभूतगुणस्यैव नाशनाश्यत्वदर्शनाद्यत्र कर्मजन्यः शरीरतरुसंयोगस्तं प्रति हस्ततरुसंयोगस्याकारणत्वेन तत्र तन्नाशनाश्यत्वासम्भवात्। **किञ्च** हस्ततरुसंयोगनाशेन कुड्यतरुसंयोगानाशाय प्रतियोग्युपधायकत्वनिवेशापेक्षया

प्रतियोगिसमानावच्छेदकगुणजन्यत्वे लाघवात् कायतरुविभागस्यापि हस्ततरुविभागजन्यस्य सिद्धिर्निराबाधैव**वात एव** तरोर्विभक्तमिति प्रत्ययोऽप्युपपद्यतेऽन्यथा नाशस्य सावधिकत्वाभावेन पञ्चमीप्रयोगासङ्गतेः। कर्ममात्रजन्यशरीरतरुसंयोगेऽपि हस्ततरुसंयोगस्य स्वरूपयोग्यतास्त्येव संयोगत्वावच्छिन्नस्य तस्य स्वाश्रयसमवेतत्वप्रयासत्या तरौ सत्त्वादित्यतः **किञ्चेति।** अनाशायानाशमुपपादयितुं प्रतियोग्युपधायकत्वं प्रतियोगिनिष्ठ-तद्व्यक्तित्वावच्छिन्नकारणत्वम्।

अधिकं मुक्तावलीप्रकाशेऽनुसन्धेयम्। परत्वापरत्वयोरवसराद्-बुद्धिनिरूपणमप्राप्तकालमित्याशङ्क्य परिहरिति। **परत्वापरत्वोत्पत्तिरिति।** अत्रोत्पत्तिपर्यन्तेन प्रसङ्गसङ्गतिसूचनात्प्रागेव ते प्रसङ्गान्निरूपिते इत्युक्तं भवति। इदमुपलक्षणम्। उक्तापेक्षाबुद्धिनाशेन परत्वापरत्वानां नाश इत्यपि बोध्यम्। नव्यास्तु तद्धेतोरेवास्तु किं तेनेति न्यायाज्ज्येष्ठत्वकनिष्ठत्वाभ्यामेव कालिकपरत्वापरत्वयोर्विप्रकृष्टत्वसन्निकृष्टत्वाभ्यामेव च दैशिकपरत्वा-परत्वयोश्च बुद्धेरुपपत्तेर्न परत्वापरत्वे गुणान्तरे। अधिकजीविनि कनिष्ठे परत्वबुद्धिस्तु न्यूनाधिकभावावधेर्जन्मप्रभृतिकनिष्ठत्वव्यवहारपरिच्छेद-ककालाद्वारणीयेति द्वयोरेव समानमिति **प्राहुः।**

तात्पर्यटीका

अनुकूलतर्कं विना व्याप्तेर्दुर्ग्रहत्वं मन्वान आहा**त्रेति।** व्यभिचारास्फूर्तौ तर्कं विनैव व्याप्तिग्रहसम्भवाद्विपक्षबाधक**इत्युक्तम्।** निरुक्ताशय-पूरणक्लेशासहिष्णुः पक्षान्तरमाह। **यद्वेति। इत्येवार्थ इति।** तथा च नोक्ताशयपूरणमिति भावः। एवमग्रेऽपि। तेन तत्रेत्थं शङ्कापरिहारौ परिहृतावित्येवकारार्थः। **तथा हि। ननु** विरोधे साधकाभावादित्युक्तमयुक्तं प्राग्वदविरोधे यद्बाधकं तदेव विरोधे साधकं भविष्यतीत्याशङ्क्यमाने तत्रैव बाधकं नास्तीति वक्तव्येऽविरोधादित्यस्यापि स एवार्थोऽस्त्वित्यभिप्रायेण पक्षान्तरमाह **यद्वेति।**

व्यधिकरणत्वादिति। नच स्वाश्रयसमवेतत्वघटितकायनिष्ठप्रत्यासत्या हस्तक्रियाजन्यत्वमेवास्त्विति **वाच्यम्**। कल्पनागौरवप्रसङ्गात्। कायतरुसंयोगनाशोऽस्त्विति। सा एव च शरीरे विभक्तमिति प्रत्ययविषय इति भावः। तथा सति संयोगनाशस्य विभक्तमितिप्रतीतिविषयत्वे सति। **अन्यथा**सिद्धिः कृतकर्त्तव्यता पाकनष्टरूपस्थले तथा दर्शनमभिप्रेत्याह **यथा चेति**। तन्नाशनाश्यत्वासम्भवात् कायतरुविभागस्यापीत्यादियोजना।

तरोर्विभक्तं न संयुक्तमिति प्रतीत्या संयोगनाश एव विभाग इति मत्वाहा**धिकमिति**। अयमाशयः। तरोर्विभक्तं न तु संयुक्तमितिवदिदं तरुसंयुक्तं न तु विभक्तमिति तुल्यवत् प्रत्ययबलात् संयोगनाशेन विभागस्यान्यथासिद्धौ विभागनाशेन संयोगस्याप्यन्थासिद्धिरजातविभागयोरपि संयोगः प्रतीयते न चासौ विभागनाश इति **चेद**स्तु विभागसामान्याभाव एव तथा तत्तत्प्रतियोगिविशेषितानां बहूनां ध्वंसानां प्रतीतिविषयत्वकल्पनापेक्षया संयोगविभागानां सामान्यधर्मावच्छिन्नाभावस्य तथात्वे लाघवान्माभूत्स विनिगमनाविरहस्तथाप्युक्तविनिगमनाविरहादुभयमप्यतिरिक्तमित्यादिः। **अत्र** गुणोत्पत्तिप्रसङ्गे। प्रसङ्गसङ्गतिसूचनात् स्मृतत्वमात्रावगतेः प्रसङ्गादुपेक्षानर्हत्वस्यापि ग्रहात्। **जन्मप्रभृतीति**। ज्येष्ठजन्मप्रभृतीत्यर्थः। **काला**ज्ज्येष्ठमरणपर्यन्तकालात्। **अयं** भावः। द्वयोः सतोर्ज्येष्ठकनिष्ठभावो गृह्यते तत्रोक्तकालान्तरोत्पन्नविनष्टयोः सूर्यपरिस्पन्दन्यूनाधिकत्वं सुनिश्चेयं न तु कनिष्ठजन्मनः पूर्वं ज्येष्ठजन्मेव ज्येष्ठमरणोत्तरं कनिष्ठजीवनं **भावि**नि मानाभावात् तत्कथं वस्तुतोऽधिकजीविन्यपि सापादनीयेति।

तर्कामृतम्

बुद्धिर्ज्ञानम्। तद्द्विविधम्—स्मरणमनुभवश्च। स्मरणमपि द्विविधं यथार्थम-यथार्थञ्च। तद्वति तत्प्रकारकत्वं यथार्थत्वम्, तदभाववति तत्प्रकारकत्वमयथार्थत्वम्। पूर्वानुभवः संस्कारद्वारा स्मरणं जनयति। तत्र पूर्वानुभवस्य यथार्थत्वायथार्थत्वाभ्यां स्मरणमपि उभयरूपं भवति। अनुभवो द्विविधः, प्रमा अयथार्थश्च। तत्र प्रमा चतुर्विधा, सा वक्ष्यते। अयथार्थज्ञानं

चतुर्विधम्–संशयो विपर्ययः स्वप्नोऽनध्यवसायश्चेति। संशयो यथा, समानधर्मवद्धर्मिज्ञानविशेषादर्शनकोटिद्वयस्मरणैरयं स्थाणुर्वा पुरुषो वेति ज्ञानं जन्यते, स[1] एव संशयः।

तरङ्गिणी

तद्वति तत्प्रकारकत्वमिति। विशेष्यत्वं सप्तम्यर्थः। तस्य च निरूपितत्वसंसर्गेण तत्प्रकारकत्वेऽन्वयः। तथा च तद्वद्विशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपकत्वं ज्ञानेच्छाकृतिनिष्ठं यथार्थत्वम्। पूर्वानुभव इति। पूर्वपदेनान्यत्राज्ञानयोः कार्यकारणभावाऽवच्छेदकैक्यस्य तन्त्रत्वेऽपि प्रकृते जातमात्रस्य स्तनपाने प्रवृत्तिदर्शनेनेष्ट-साधनतास्मरणावश्यकत्वेन प्राग्भवीयानुभवादेव जीवनादृष्ट-रूपोद्बोधकसहकृतसंस्कारात्तस्य वाच्यतयाऽनुभवावच्छेदकस्मृत्यवच्छेदक-शरीरयोर्भेदस्यावश्यकत्वेनावच्छेदकैक्यस्यातन्त्रत्वमिति सूच्यते। चरमस्मृतिनिष्ठवैजात्यमेव संस्कारनाशकतावच्छेदकम्। तेनानुभवजन्यसंस्कारस्य प्रथमादिस्मरणेनानाशात् नोत्तरस्मरणानुपपत्तिरिति सूचयितुं ज्ञानत्वस्य व्यापकधर्मतयान्यथासिद्धिनिरूपकत्वं चेत्यभिप्रेत्याह–**अनुभव इति**। समानः कोटिद्वयसहचरितः। विशेषादर्शनं संशयधर्मितावच्छेदकावच्छेदेन कोटिद्वयान्यतरस्य तद्व्याप्यस्य तदवच्छेदकस्य तदसमानाधिकरणस्य वाऽनिश्चयः। **विशेषादर्शनेति**। यदिन्द्रियजो यो भ्रमस्तदिन्द्रियजन्य-विशेषदर्शनस्याभावः। तेन शङ्खः श्वेत इत्याद्यानुमानिकादिविशेषादर्शनसत्त्वेऽपि न भ्रमानुपपत्तिः।

चषकम्

बुद्धेः परिणितिर्ज्ञानमिति साङ्ख्यमतं तद्व्यवच्छेत्तुं **बुद्धिर्ज्ञानामि**त्युक्तम्। **तद्वतीति**। विशेष्यकत्वं सप्तम्यर्थः प्रकारकत्वान्वयि।

---

१. 'स एव संशयः' नास्ति।

अवच्छेद्यावच्छेदकभावश्चाकाङ्क्षानिरूपक: सम्बन्ध एवमग्रेऽपि। ज्ञानाविषययोरप्यनयोरवच्छेद्यावच्छेदकभाव: समूहालम्बनव्यावृत्तोऽवश्याभ्युपेय:। अत एव वह्नेर्लोहिताभेदप्रकारकज्ञानविशेष्यत्वेऽपि जपा लोहिता वह्नि: शुक्ल इति ज्ञानानन्तरं लोहितो वह्निर्ज्ञायते इति न प्रयोग:। यतस्तत्र लोहितस्य व्युत्पत्तिवैचित्र्याद्धात्वर्थज्ञाने प्रकारिता तद्विशिष्टज्ञानस्य निरूपकत्वं चाख्यातार्थे संसर्गविधया भासत इत्यभ्युपगमात् तस्य च तत्र बाधितत्वात्तदविशिष्टनिरूपितत्वस्य तदवच्छिन्नत्वव्याप्यत्वादित्यग्रे व्यक्तीभविष्यति।

पूर्वानुभव इति। यद्यपि कारणस्य पूर्वत्वमर्थसिद्धमिति तदुपन्यासोऽनर्थक**स्त**थापि स्मरणान्तरितो जन्मान्तरीणोऽप्यनुभव: स्मरणं जनयति **नत्व**नुमितिपरामर्शयोरिव समानावच्छेदकत्वमत्र विवक्षितमिति सूचयितुं तदुपन्यास:। अत एवाह **संस्कारद्वारेति**। तथा च कार्याव्यवहितपूर्ववृत्ति स्वस्वव्यापारान्यतरकत्वमेव तत्कारणताघटकमित्युक्तप्रायम्। व्याप्यधर्मे कारणतावच्छेदके सम्भवति व्यापकधर्मेणान्यथासिद्धिं सूचयितुमनुभव इत्युक्त**म्**। **नन्वे**वं स्मरणोत्तरमस्मरणप्रसङ्ग: संस्कारस्य फलनाश्यत्वात्। **न च** ज्ञानत्वेन हेतुत्वेऽपि समूहालम्बनादित एकैकगोचरक्रमिकस्मरणानुपपत्तिरिति वाच्य**म्**। समानाकारस्यैव फलस्य नाशकत्वसम्भवादत आह **स्मरणमिति** स्मरणसामान्यमित्यार्थिकम्। तथा च चरमस्मृतेरेव संस्कारनाशकत्वावश्यकतया न काप्यनुपपत्ति:।

न चानुभवत्वस्य सन्दिग्धव्यभिचारकतेति **वाच्यम्**। उपेक्षास्मृतीनां तत्तद्व्यक्तित्वेन हेतुताया उपेक्षास्मृतीनां प्रत्येकं भेदकूटस्य तदवच्छेदकताया वाऽकल्पनया लाघवज्ञानस्योत्तेजकस्य स्वत्वेन तच्छङ्कायास्तेन रूपेण कारणत्वकल्पनाविघटकत्वाभावादिति भाव:। **तत्र** तस्य स्मरणसामन्ये हेतुत्वे सिद्धे। **उभयरूपमिति**। तथा च गृहीतग्राहितया न स्वतन्त्रप्रामाण्यं तस्येत्याशय:। एतदभिप्रेत्यैव प्रमेति वक्ष्यति। अन्यथा यथार्थोऽयथार्थश्चेत्येव प्राग्वदवक्ष्यद्य**दुक्तम्**। यथार्थनुभवो मानं निरपेक्षतयेष्यत इति निरपेक्षतयेत्यस्येतरप्रामाण्यानधीनप्रमाण्यकतयेत्यर्थकत्वात्। **वक्ष्यत इति**।

सूचीकटाहन्यायान्निरसनीयबहुवादिविप्रतिपत्तिकतयातिदुरूहत्वाच्चेति **भवस्तच्चाग्रे** वितायते। **समानधर्मेति**। कोटिद्वयसहचरितांच्चैस्तरत्वादीत्यर्थ:। यत्तु समानो व्यावृत्तो वानुवृत्तो वेति व्याचक्षते। **तन्न**। सन्दर्भविरोधापत्ते:।

न हि तद्व्यावृत्तधर्मवद्धर्मिज्ञानं तद्विपर्ययहेतुरन्यकोटिव्याप्यस्येव तत्कोटिमद्व्यावृत्तस्यापि धर्मस्य बुद्धेर्विशेषदर्शनतया तद्बुद्धिविरोधित्वाच्च। **न च** संशयविभाजकोऽयं ग्रन्थो येन न्यूनतामावहेत् **किन्तू**दाहरणपरो यदाह **यथेति। विशेषादर्शनेति**। विशेषस्यान्यतरकोटेस्तद्व्याप्यस्य तदवच्छेदकस्य तदसमानाधिकरणस्य वाऽ**दर्शनं** संशयधर्मिण्यनिश्चय:। **यद्य**प्यवच्छेदकस्य व्याप्यत्वेनैव क्रोडीकार**स्तथा**पि पुरुषत्वाभावव्याप्यवानयमिति व्याप्यदर्शनं स्थाणुर्न पुरुष इति स्थाणुत्वावच्छेदेन पुरुषत्वाभावज्ञानकालीनमिदन्त्वावच्छेदेन स्थाणुत्वज्ञानं चावच्छेदकदर्शनमिति भेद:। **अद**र्शनपदेन च यदिन्द्रियजन्यो भ्रमस्तदिन्द्रियजन्यविशेषदर्शनाभावोऽत्र विवक्षितस्तेन शङ्ख: श्वेत इत्यानुमानिके विशेषदर्शनेऽपि न पीत: शङ्ख इति भ्रमानुपपत्ति:। **कोटिद्वयस्मरणैरिति**। **एतेन** विपर्ययसामग्री वैचित्र्यं दर्शितम्।

तात्पर्यटीका

ननु ज्ञानस्य विषयीभूतयोरवच्छेद्यावच्छेदकभावो दृश्यते। यथा धूमो वह्निव्याप्य इत्यादौ व्याप्तिधूमत्वयोरन्यथा वह्निर्धूमव्याप्य इति प्रयोगस्याप्यापत्तेस्तत् कथं ज्ञानाविषययोर्विशेष्यताप्रकारतयोर-वच्छेद्यावच्छेदकभावोऽभ्युपेयत इत्यत आह। **ज्ञानाविषययोरपीति**। **अत एव** समूहालम्बनव्यावृत्तस्यावश्याभ्युपेयत्वादेव। **व्युत्पत्तिवैचित्र्यादिति**। कर्मान्तरगुणीभावापन्नक्रियायामपरकर्मण: कर्मतासम्बन्धेनान्वयस्य वक्ष्यमाणत्वादिति भाव:। प्रकारितेत्यस्य संसर्गविधया भासत इत्यनेनान्वय:। **इत्यग्र इत्यादि**। लोहितस्य ज्ञाने ज्ञानस्य विशेष्यितायामबाधितत्वेऽपि यदभावान्न तथा प्रयोगप्रामाण्यं सोऽवश्याभ्युपेय इत्यग्रे व्यक्तीभविष्यतीत्यर्थ:। विशिष्टस्य वैशिष्ट्यमिति ज्ञाननियतस्येत्यादिग्रन्थेनेत्यर्थ:।

यागस्य कारणतायां घटकत्वमस्य प्रागुक्तं न त्वनुभवस्येति प्रायः**पदम्**। यस्य च नानुगतरूपेण हेतुतासम्भवस्तस्य क्षणादेः प्रातिस्विकरूपेणैव तथात्वमस्तु न प्रकृते इत्युक्तं **सम्भवादिति**। **आर्थिकमिति**। कालोपाधिविधया तन्तोर्घटजनकत्वेऽपि तन्तुर्घटं जनयतीत्यप्रयोगात्तद्धर्मावच्छिन्न-कार्यकारणभावस्यैव वाक्यार्थत्वादिति भावः। **ननु** यादृशसमूहालम्बनोत्तरं समानाकारं स्मरणं न जातं तज्जन्यसंस्कारस्य कथं नाशः स्यादत आह। **तथा चेति**। **आवश्यकतयेति**। जन्यभावस्य विनाशित्वनियमेन निरुक्तसंस्कारनाशार्थं समानासमानाकारस्मरणसाधारणीं जातिमेकामभ्युपेत्य विजातीयस्मृतित्वेन नाशकताया आवश्यकत्वादिति भावः।

सन्दिग्धव्यभिचारकतेति। संस्कारस्य फलनाश्यत्वसम्भवेन व्यभिचारसंशयस्यौचित्यावर्जितत्वादिति भावः। अपेक्षानुभवादीनां तथात्वमुभयोरावश्यकमित्यभिप्रायेण स्मृतीना**मित्युक्तम्**। उत्कटशिष्यजिज्ञासाव-शात् कदाचिद्दुरूहे विवक्षा भवति सैव तु नास्तीत्याह। **निरसनीयेति**। **वितायते** प्रामाचातुर्विध्यव्यवस्थापनावसरे। असाधारणधर्मदर्शनजन्यसंशय-सङ्ग्रहाय समानपदं व्याचक्षाणस्य मतं दर्शयति। **यत्त्विति**। **सन्दर्भविरोधापत्तेरिति**। अग्रिमसमानपदस्याप्येवमुभयार्थपरत्वेऽनन्वयापत्ते-स्तदेवाह **नहीति**।

समानपदस्य निरुक्तार्थकत्वे वक्ष्यमाणग्रन्थप्रतिपाद्यहेतुत्वासत्त्वेन सन्दर्भविरोधं नहीत्यादिना प्रदर्श्य तद्विरुद्धविरोधित्वसत्वेनापि तं प्रदर्शयति। **अन्यकोटिव्याप्यस्येवेति**। **तद्बुद्धिविरोधित्वादिति**। **अत** एवैतेनैव दोषेण साध्यतदभाववद्व्यावृत्तत्वस्य संशायकत्वं प्राचीनाभिमतं खण्डितं दीधितिकृद्भिरिति भावः। **एक**मेवसमानपदमग्रे साधारणधर्ममात्रपरमत्र चासाधारणधर्मपरमपीत्यपि सन्दर्भविरोध एवेत्यपि **बोध्यम्**। **ज्ञानकालीनमिति**। ज्ञाननाशकालीन तदुद्बुद्धसंस्कारकालीनमित्यपि बोध्यम्। **आनुमानिक इति**। भिन्नेन्द्रियजन्यपरामर्शजन्यानुमितिरूप इत्यर्थः। तेन भ्रमानुत्पत्तौ तवापीष्टापत्तिरिति परास्तम्। **कोटिद्वयस्मरणैरितीति**। **यद्य**प्यबाधितकोट्यंशे लौकिकसन्निकर्षोऽपि सम्भवति। **तथापि** तत्कोटिलौकिकसामग्र्यास्तद्विरोधि-

कोटिभानप्रतिबन्धकत्वापत्या न संशयस्य लौकिकत्वमिति सूचयितुं कोटिद्वयस्मरणपर्यन्तानुधावनम्। **एतेन** द्वयोपादानेन।

तर्कामृतम्

विपर्ययस्तु समानधर्मवद्धर्मिज्ञानविशेषादर्शनैककोटिस्मरणैः शुक्ताविदं रजतमिति ज्ञानं जन्यते। तत्र गुरुमते इदमित्यनुभवात्मकं ज्ञानम्, रजतमिति स्मरणात्मकम्, तेन ग्रहणस्मरणात्मकं ज्ञानद्वयं न तु रजतत्वविशिष्टज्ञानमिदम् अन्यस्यान्यथाभानसामग्र्यभावात्। प्रवृत्तिश्च स्वतन्त्रोपस्थितेष्टभेदाग्रहात्। नैयायिकमते प्रवर्त्तकं विशिष्टज्ञानम्, तेन भ्रमः सिद्ध्यति।

तरङ्गिणी

अन्यस्यान्यथेति। ज्ञानलक्षणाप्रत्यासत्तेरनभ्युपगमादितिभावः। ननु पुरोवर्तिनि इष्टतावच्छेदकरजतत्वाद्यज्ञाने कथं प्रवृत्तिरत आह-**प्रवृत्तिश्चेति। स्वतन्त्रोपस्थितेष्टभेदेति।** इतराविशेषणत्वेनोपस्थितं यदिष्टं तस्य पुरोवर्तिनि भेदाग्रहादित्यर्थः। तेनेदं द्रव्यं तत्र रजतमिति ज्ञाने न प्रवृत्तिः, इष्टस्य भेदविशेषणत्वेनोपस्थितत्वात्। तथा च स्वतन्त्रतदुपस्थितिविशिष्ट-तद्भेदाग्रहविशिष्टपुरोवर्त्युपस्थितित्वेन कारणतेति पर्यवसन्नम्। तदपेक्षया लाघवात् पुरोवर्तिविशेष्यकेष्टतावच्छेदकाप्रकारकज्ञानत्वेन प्रवर्तकतेति नैयायिक-मतमाह-**नैयायिकमत** इति।

चषकम्

एककोटीति। एककोटिमात्रेत्यर्थः। तेन संशयसामग्रीवैचित्र्यं दर्शितम्। **शुक्ताविति**। तेन विशेष्यावृत्तिप्रकारकत्वं सूचितम्। **तत्र** भ्रमस्थले। **नन्वेवमिदं** रजतमितिज्ञानस्यैकत्वानुपपत्तिरनुभवत्वस्य स्मृतित्वेन सह विरोधादित्यत आह। **तेनेति। तेनोभयरूपत्वेन। ज्ञानद्वयमिति** सावधारणं तद्व्यवच्छेद्यं दर्शयति। **नत्विति। विशिष्टेति।** तथा च वैशिष्ट्यावगाहित्वमात्रं व्यवच्छेद्यमिति

भाव:। तेनाप्रतिषिद्धमनुमतं भवतीति न्यायात् परेषामनुभूयमानारोपस्थले ग्रहणात्मकयथोक्तैकज्ञानसम्भवेऽपि न क्षतिः। तत्र हेतुमाह। **अन्यस्येति। सामग्र्यभावादिति**। तैर्ज्ञानलक्षणानङ्गीकारादिदमन्तर्भावेणेन्द्रियसंयुक्तसमवायाभावाच्चेति भाव:।

ननु पुरोवर्तिनीष्टतावच्छेदकाग्रहे कथं प्रवृत्तिरत आह। **प्रवृत्तिश्चेति। स्वतन्त्रे**त्यादि। इतराविशेषणतयोपस्थितं यदिष्टं तस्य पुरोवर्तिनि भेदाग्रहादित्यर्थ: तेनेदं द्रव्यं तन्न रजतमिति ग्रहेऽपि न प्रवृत्ति:। **वस्तु**तस्तु तद्रजतमिदमपि रजतमेवेत्यत: परतन्त्रोपस्थितेष्टभेदाग्रहे सत्यपि प्रवृत्युपपत्तये पारतन्त्र्यस्याविघातकतया स्वातन्त्र्यस्याप्यप्रयोजकत्वे स्थिते रङ्गद्वयगोचरविधिनिषेधसमशीलतया जीवात्विष्टभेदाग्रहे सत्यत्र प्रवृत्तिरिष्टैव। **अत्रै**व द्रव्ये रजतभेदाग्रहाधीनविशिष्टज्ञानावश्यम्भावे क्षणविलम्बेन प्रवृत्तेर्नैयायिकानामप्यनुमतत्वा**दन्यथा** नैयायिकानां मते स्वातन्त्र्यस्य सर्वथैवाप्रयोजकत्वेन तत्र तद्विशिष्टज्ञानरूपकारणसम्पत्या यत्र क्षणविलम्बेन प्रवृत्तिर्मीमांसकमते तत्र पूर्वमेव सेति न्यायोपवर्णनस्यासङ्गत्यापत्तेः। **न चो**क्तस्थले विशेषदर्शनं येन भेदग्रहप्रतिबन्धको दोषो न स्यात्तत्सुलभस्तत्र भेदाग्रहः। **न चैवं** शुक्तिरजते इति ज्ञानादपि प्रवृत्यापत्तिरिति वाच्यम्। अत्र विशेषदर्शनेन भेदग्रहप्रतिबन्धकविशेषादर्शनसहचरितदोषाभावादिति स्वतन्त्रेति नैयायिकाक्षेपपरं प्रवृत्तिविशेष्याविशेषणतयापीत्यर्थकम्।

किम्वा स्वतन्त्रोपस्थिते धर्मिण्युपस्थितेष्टभेदाग्रहः कारणमभिमतमित्यन्यैरपरिशीलिता **सरणि:। इष्टभेदाग्रहादिति**। न्यायनयेऽपीदं रजतमिति भ्रमहेतुतया रजतभेदाग्रहस्य तत्रावश्यकतया तस्यैव प्रवृत्तिहेतुत्वं युक्तं तद्धेतोरेवास्तु किं तेनेति न्यायादिति भाव:। **ननु** स्वतन्त्रतदुपस्थितिविशिष्टतद्भेदाग्रहविशिष्टपुरोवर्त्युपस्थितिकारणत्वापेक्षया लाघवात् पुरोवर्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानत्वेन कारणत्वमुचितमित्यत आह। **नैयायिकमत** इति। **प्रव**र्तकं सम्वादिप्रवृत्तिहेतुतया क्लृप्तम्। तथा च रङ्गे रजततार्थिप्रवृत्तिरिष्टप्रवृत्तिविषयविशिष्टज्ञानसाध्याप्रवृत्तित्वाद्रजते रजतप्रकारकप्रवृत्तिवदिति लाघवतर्कोपगृहीतानुमानेन भ्रम: सिद्ध इत्याह। **तेनेति**। तेषां ज्ञानलक्षणासन्निकर्षकल्पनागौरवं तु फलमुखतया न दोष इति

भाव:। **सिद्ध्यतीति**। **इदमु**पलक्षणम्। यत्र रङ्गरजातयो रङ्गे इति रजते इति वा ज्ञानं तत्र रजतादिघटितसन्निकर्षेण रङ्गाद्यंशे रजतत्वादिभ्रम: सम्भवतीदमन्तर्भावेणेन्द्रियसन्निकर्षहेतुतायां मानाभावादत एव यत्र यदवगतं तत्रैव तदुपनीयत इति नियमानभ्युपगमे त्विति वक्ष्यति।

एवं विशिष्टानुमितौ व्याप्यवद्भेदाग्रहहेतुत्वेऽन्यथाख्यातिरूपानुमिति-रशक्यवारणा **विशिष्टज्ञानहेतुत्वे**ऽयोगोलके धूमपरामर्शाज्जाताया अनुमितेरनुरोधादन्यथाख्यातिरूप: परामर्श आपतित इति सङ्क्षेप:।

तात्पर्यटीका

एककोटीति बाधितैककोटीत्यर्थ:। अत एवाह। **शुक्तावितीति**। **ज्ञानद्वयमितीति**। **नचैवं** तदभाववति तत्प्रकारकत्वाभावात्कथं भ्रमत्वमिति वाच्य**म्**। तदभाववद्धर्मिसाकाङ्क्षतज्ज्ञानं तद्भ्रम इति तेषां सिद्धान्तस्य वक्ष्यमाणत्वात्। **परेषां** नैयायिकानाम्। **तैरिति**। तथा चान्यस्य शुक्त्यादेरन्यथा रजतत्वादिना भाने या सामग्री ज्ञानलक्षणाघटिता पराभिमता तस्यास्तैरनभ्युगमादिति भाव:। **ननु** फलाभावात् सन्निकर्षमुद्रया हेतुहेतुमद्भावस्य तेषामनभिप्रेतत्वेऽपि वास्तविकतद्घटितसामग्र्यभावस्तत्रा-नुभूयमानारोपस्थले दुर्निरूपण एवेत्याशयेन तमुपपादयितुमाह। **इदमन्तर्भावेणेति।**

तन्न रजतमित्युक्त्येदं न रजतमिति भेदग्रहाभावरूपकारणसत्त्वं दर्शितम्। **अत्रैव** रजतभेदग्रहाविषय एव। **अन्यथा** तत्र मीमांसकानां प्रवृत्तेरननुमतत्वे। **सर्वथैवेति**। नैयायिकानां प्रवृत्तिविशेष्यविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानस्य प्रवर्त्तकत्वेनावश्यं प्रवृत्तिविशेष्यविशेषणतयैवेष्टोपस्थितेरिति भाव:। **तत्र** भ्रमविशेष्ये। **उक्त**स्थले इदं द्रव्यं तन्न रजतमित्यत्र। **तत्त**स्माद्दोषवशात्। **दोषाभावादिति**। तेन नि:परिपन्थिभेदग्रहेण कारणाभावादेव न प्रवृत्तिरिति भाव:।

नैयायिकानामिव मीमांसकानामपि प्रवृत्तिविशेष्यमुख्यविशेष्यकोपस्थिति: प्रवर्तिकेत्यमिप्रेत्याह। **किम्वेति**। **स्वतन्त्रेति**। इतराविशेषणतयेत्यर्थ:। **लाघ**वादावश्यकत्वात्। **इत्यत आहेति**। **इत्यत** इत्थमाशङ्कामपाकर्त्तुम्।

आहनैयायिकमतमाह। यदुक्तमन्यस्यान्यथा भानसामग्र्या भावादिति तद्दूषयति। **इदमुपलक्षणमिति**। **वक्ष्यतीति**। अवयवविचेचनप्रस्तावे उपनयग्रन्थ इत्यादि:।

ज्ञानस्य प्रवृत्तिहेतुतयान्यथाख्यातिं व्यवस्थाप्यानुमितिहेतुतयापि तां व्यवस्थापयिष्यन् व्याप्यवद्भेदाग्रह एवानुमितिहेतुरित्युक्तावपि सा दुर्वारैवेति दर्शयति। **एवमिति**। **अशक्यवारणेति**। वह्निव्याप्यधूमवान् जलह्रद इति भ्रमस्थानाभिषिक्ताया: स्वतन्त्रवह्निव्याप्यधूमवदुपस्थितिविशिष्टवह्निव्याप्यधूमवद्भेदाग्रहविशिष्टह्रदोपस्थितिरूपायास्तत्कार्यतावच्छेदकावच्छिन्नविशिष्टानुमिते: सामग्र्या: सम्पत्तेरिति भाव:। **विशिष्टज्ञानहेतुत्वे इति**। तथा चोक्तस्थले विशिष्टज्ञानाभावान्नानुमितिरिति भाव:। **अयो**गोलक इत्यादेर्वह्निमत्ययोगोलकेऽसतो धूमस्य परामर्शाद्व्याप्यत्वावच्छिन्नविषयकज्ञानाज्जाताया अनुमितेरित्याद्यर्थ:। **अनुरोधादिति**। अर्थाबाधेऽपि तस्याभेदाग्रहरूपत्वे विशिष्टानुमितिमात्रमुच्छिद्यत विशिष्टानुमितौ विशिष्टपरामर्शो भेदाग्रहेभेदाग्रह इति कार्यकारणभावो वा भिद्यतेत्याशय:। **एतेन** विशिष्टपरामर्शहेतुत्वे व्याप्त्यवच्छिन्नप्रकारकत्वपक्षधर्मताविषयकत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण गौरवोद्भावनं प्रत्यु**क्तम्**। विशिष्टपरामर्शहेतुतायास्त्वयापि स्वहस्तितत्वात्। **अन्यथाख्यातिरूप इति** विशिष्टानुमितिकारणरूपविशिष्टपरामर्शस्य प्रकृतेऽन्यथाख्यातिरूपत्वादिति भाव:। **ताव**तापि च न निस्तार:। यत्र रङ्गरजतयो रजतरङ्ग इति भ्रमस्तत्र रङ्गे रङ्गभेदग्रहेऽन्यथाख्यातिर्माप्रसांक्षीदिति तदग्रहे रजतभेदाग्रहाधीनो प्रवृत्तिरिव रङ्गभेदाग्रहाधीना निवृत्तिश्च स्यादित्यभिप्रेत्योक्तं **सङ्क्षेप इति**।

तर्कामृतम्

स्वप्नस्तु अनुभूतपदार्थस्मरणैरदृष्टेन धातुदोषेण च जन्यते। अनध्यवसायश्च किञ्चिदितिज्ञानं विशेषादर्शनाद्भवति। अत्र, 'यदि अयं निर्वह्नि: स्यात्तदा निर्धूम: स्यात्' इति तर्को विपर्ययमध्ये बोध्य:। तत्र नैयायिकमते स्वप्नानध्यवसायौ विपर्ययमध्ये प्रविष्टौ। तेन तन्मते अयथार्थज्ञानं द्विविधं–संशयो विपर्ययश्चेति।

तरङ्गिणी

विनाप्यनुभवं स्वप्नस्यानुभवादाह-**अदृष्टेनेति**। कफाद्याधिक्येऽपि स्वप्नानुभवादाह-**धातुदोषेणेति**। कफपित्तवायूनां दोषेणेत्यर्थः। न चादृष्टस्य तन्नियामकत्वेनैवोपपत्तौ धातुदोषस्य कारणत्वे प्रमाणाभाव इति वाच्यम्। दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वात्, स्वतन्त्रान्वय-व्यतिरेकानुविधानाच्चेति भावः। यद्वा एतज्जन्मन्यनुभवाभावेऽपि जन्मान्तरीयानुभवकल्पनया त्रयाणां दण्डचक्रादिन्यायेन कारणत्वं बोध्यम्। अनध्यवसायश्च किंस्विदिति। विशेषतोऽनुल्लिखितनानाकोटिकज्ञानमनध्यवसायः। किंस्विदिदमितिज्ञानस्य किंस्वित्त्वेन नानाकोटित्वेऽपि विशेषतोऽनुल्लिखितत्वात्। किंस्विदयं पनस इति ज्ञानेऽपि पनसत्वस्य विशेषतो भानेऽपि कोट्यन्तरस्य किंस्वित्त्वेन भानात्। अत एवास्य विपर्ययत्वम्। इदं च वैशेषिकरीत्योक्तम्। तन्मते हि बुद्धिर्द्विविधा, विद्याऽविद्या चेति। विशेष्यावृत्त्यप्रकारकज्ञानत्वम्, तद्वति तदवगाहित्वं वा विद्यात्वम्। तद्भिन्नत्वमविद्यात्वम्। विद्यात्वे विद्याप्रकारकत्वं स्वप्नभिन्नत्वं च विशेषणमतो न संशयादिसाधारण्यम्। निर्विकल्पकसङ्ग्रहायाद्ये नञ्द्वयगर्भता। स्मृतिसङ्ग्रहायानुभवत्वानन्तर्भावः। तद्वद्विषयताशालित्वे सति तद्विषयत्वं द्वितीयार्थः। विद्या द्विविधा, प्रत्यक्षानुमानभेदात्। अविद्या चतुर्विधा। संशयविपर्ययस्वप्नानध्यवसायभेदादिति। तत्र तर्कस्यागणनान्न्यूनत्वमत आह-**अत्र यद्ययमिति**। वह्निमानयं निर्वह्निःस्यात्तदा धूमवानयं निर्धूमःस्यादित्याकारः। इत्थमेव सर्वत्र तर्कस्य विपर्ययत्वम्। न्यायनये द्विविधं यथार्थमयथार्थं च। तत्र यथार्थत्वं निर्विकल्पकस्मृतिसाधारणं पूर्वोक्तम्। तदेव च स्मृतिनिर्विकल्पकव्यावृत्तमनुभवत्वघटितं प्रमात्वम्। अयथार्थं तदभाववति तत्प्रकारकम्। तच्च द्विविधमित्याह-**तन्मत इति**।

चषकम्

धातुदोषेण चेति। **अयं** भावः। अत्र त्रयाणां दण्डचक्रवद्धेतुता स्मरणं विना विशिष्टबुद्ध्यात्मकस्वप्नासम्भवाच्चिन्तोद्बुद्धसंस्कारस्य भोगजनकादृष्टस्य भ्रमजनकदोषस्य चान्वयव्यतिरेकाभ्यां स्वप्नसामान्ये विशेषतो

हेतुताया आवश्यकत्वाच्चेति। **कथं** तर्ह्यदृष्टमप्यर्थमदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिमिति **चेत्त**ज्जन्मन्यदृष्टमित्यर्थादिति **केचित्। तन्न।** मनोरथेन स्वपतीकृतं नलं निशि क्वसानस्वपती स्मर पश्यतीति सन्दर्भविरोधापत्तेः। **परन्तु** तन्निष्ठनिरवच्छिन्नविषयतानिरूपकज्ञानाविषयमपीत्यर्थान्मनोरथगोचरीभूता नलपदार्थत्वादिना तत्पदप्रवृत्तिनिमित्तत्वादिना चोपस्थिता नलनलत्वादयोऽदृष्ट-विशेषप्रमुष्टतत्ताका **अत** एव निरवच्छिन्नविशेषणभावमापन्ना गृह्यन्त इति नलादिपदशक्तिग्रहन्यायेन स्वप्नदर्शनपरत्वा**दित्थं** चादृष्टवशाद्दोषविशेषवशाद्वा बाधित एवार्थो गृह्यत इत्ययथार्थत्वनियमस्तस्य। **अनध्वयवसायश्चेति।** विशेषतोऽनुल्लिखितविरुद्धनानाकोटिकं ज्ञानमित्यर्थः। **अत** एव विपर्ययत्व-नियमः। **किञ्चिदिति** ज्ञानमिति। किञ्चित्वेन नानाकोट्युल्लेखेऽपि विशेषतोऽनुल्लेखोऽक्षत एव। **अत** एव तथा कोट्युपस्थितेरप्यनावश्यकता। किमयमातपदोषः स्यादित्यादावप्येककोटेर्विशेषत उल्लेखेऽप्युत यथा मे मनसि वर्तत इत्यपर कोटेः सामान्यत एवोल्लेखेन नानाकोटेस्तथोल्लेखो नास्त्येवेति **मन्तव्यम्।**

न्यूनतां परिहरति। **अत्रेति** भेदचतुष्टयमध्य इत्यर्थकं विपर्ययमध्ये इत्यत्रान्वेति। **अयं** धूमवानत एव विपर्ययत्वनियमः। **तर्क इति।** आहार्यारोपविशेष इत्यर्थः। तर्कत्वञ्च मानसत्वव्याप्यो जातिविशेषस्तर्कया-मीत्यनुभवाद् वक्ष्यमाणदिशा जिज्ञासाविशेषनिवर्तकत्वात् सिद्ध इति। **अन्ये** तु व्याप्यारोपेण व्यापकारोपस्तर्क **इत्याहुः।** तर्कश्च द्विविधो विषयपरिशोधको व्याप्तिग्राहकश्चाद्य उक्त एव। **द्वितीयो** यथा। धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादिति। आपाद्यव्यतिरेकेणापादकव्यतिरेकसाधनं तर्कफलम्। तत्रेष्टकोटिमात्रपर्यवासने एवानिष्टकोटिकशङ्कानिवृत्तिरिति तदपर्यवसाने तर्काभासो भवति। **यथा** धूमो यदि वह्न्यव्यभिचारिगुणान्यतरो न स्यात्तर्हि वह्निजन्यो न स्यादिति। **ननु** न तर्कस्य व्यभिचारशङ्कानिवर्त्तकत्वं तर्ककारणव्याप्तिज्ञानेनैव स्वारसिकच्छङ्कानिवृत्तेः। **तथा** हि। आपादके आपाद्यव्याप्तौ गृहीतायां तुल्यवित्तिवेद्यतयापाद्येऽप्यापादकव्यापकता गृह्यते। तथा चापाद्यव्यातिरेकनिश्चयस्तर्ककारणीभूतो व्यभिचारव्यापकाभावज्ञानमुद्रया तच्छङ्काप्रतिबन्धक इति। **यद्वा** तर्ककारणतावच्छेदकापा-

दकज्ञाननिष्ठाहार्यत्वसम्पादकबाधादेव तथा शङ्कानिवृत्तिरिति **चेन्ना**हार्यशङ्का-निवृत्तयेतर्कानुसरणात्। **कथं** तर्कात्तन्निवृत्तिरिति **चेदित्यम्।** अनिष्टप्रसञ्जनात्मकेन तर्केणापादकज्ञाने आपाद्यज्ञानरूपानिष्ट-साधनत्वज्ञानजननद्वारा तत्र ज्ञाने द्वेषो जन्यते तेन चास्मिन्निच्छाप्रतिबन्धः क्रियते। एवं चेच्छारूपकारणविरहादेव नाहार्यशङ्कोत्पत्तिरित्यर्थवशसम्पन्नमेव तर्के तन्निवर्तकत्वमिति। **केचित्तु** व्याप्तिग्रहं प्रति व्यभिचारशङ्कायाः प्रतिबन्धकतायां तर्कस्योत्तेजकत्वं मन्यते। **परे तु** तदापादकापत्तित्वेनाहार्यानाहार्यसाधारणतद्विशिष्टबुद्धित्वावच्छिन्नं प्रति प्रतिबन्धकतया तर्कस्य व्यभिचारशङ्कानिवर्तकत्वमित्याहुः। वैशेषिकमतं प्रदर्श्य नैयायिकमतं प्रदर्शयति। **तत्रेति**। अयथार्थज्ञानभेदचतुष्टयमध्ये इत्यर्थः। **विपर्यय मध्य इति**। **यद्य**प्यनेककोटिकत्वेनानध्यवसायस्य संशयमध्ये प्रवेशो वक्तुमुचित**स्तथा**पि तत्कोटेरन्यकोट्यवच्छिन्नप्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदकत्वे एव संशयत्वं नान्यथेति तथोक्तम्। **द्विविधमिति**। तर्कस्य विपर्ययमध्यनिवेशः पूर्ववत्।

तात्पर्यटीका

समुच्चयार्थकचकारबलात् कार्योत्पादप्रयोजकतावच्छेदकं त्रितयपर्याप्त-समुदायत्वं लब्धमित्याहा**त्रययाणामिति**। विशेषणविषयकत्वेन हेतुतावादिनामपि जन्मान्तरीणानुभवजन्योऽप्युद्बुद्धसंस्कार आवश्यक एवेत्याह। **चिन्तोद्बुद्धेति**। बहुवचनार्थस्यास्यानुभूताननुभूतार्थगोचरस्मरणवैचित्र्यस्य प्रतिपादनाय शङ्कते। **कथं तर्हीति इति** कथमिति चेदितीति शब्द आवर्त्तते। **किमयमा**तपदोषः स्यादित्यभिज्ञानशाकुन्तलीये कामयमानायाः शकुन्तलाया अवस्थावर्णनमिदम्। **उत यथेति**। अहं यथैनां कामये तथेयमपि मां कामयते किमित्यभिप्राया सामन्यतो दुष्यन्तोक्तिः।

वक्ष्यमाणदिशाऽपादकज्ञाने आपाद्यज्ञानरूपानिष्टसाधनताज्ञान-जन्यद्वेषजननद्वारा जिज्ञासाविशेषनिवर्तकत्वादापादकजिज्ञासानिवर्त्तकत्वात्।

तादृशजातिविशेषपरिचयायाहा**न्येत्विति**। तर्काभासं वक्तुं भूमिकामारचयति। **आपाद्यव्यतिरेकेणेति**। **तर्काभासो भवतीति** निरुक्तफलाभावादिति भावः।

अभ्यर्हितां ग्राह्याभावमुद्रया प्रतिबन्धकतां सम्पादयितुं पक्षान्तरमाह **यद्वेति**। **तथा शङ्कानिवृत्तिः** स्वारसिकव्यभिचारशङ्कानिवृत्तिः। **उक्त**रीत्यैव निर्वाहे किमुत्तेजनकत्वेनेत्यस्वरसः केचिदित्यनेन **सूचितः**। **आपत्तेः** पृथक्प्रतिबन्धकत्वे गौरवमस्वरस आहुरित्यनेन सू**चितः**। **तत्कोटेरिति**। **न चैवं** रूपं तदभावो वा वायावित्यस्य संशयत्वानुपपत्ती रूपतदभावयोः कोटिताख्यविषयताविरहादिति वाच्यम्। विधेयताया इव कोटिताया अपि तयोरेवाभ्युपगमात् कोटिताया अपि निवेशे प्रयोजनाभावाच्च। **न च** तथापि स्थाणुर्वा पुरुषो वेति संशयाव्याप्तिर्नहि स्थाणुपुरुषत्वविषयकज्ञानं प्रति पुरुषस्थाणुत्वगोचरज्ञानस्य ग्राह्याभावानवगाहिनः प्रतिबन्धकतास्तीति वा**च्यम्**। तस्य स्थाणुत्वतदभावपुरुषत्वतदभावावगाहितया चतुष्कोटिकसंशयत्वाभ्युपगमात्। **सूत्रे** प्रथमगणनीयमेकमुपेक्ष्य द्वयावलम्बीत्युक्तिस्त्वेककोटिकस्य ज्ञानस्य संशयत्वव्युदासाय न तु बहुकोटिकस्यापीत्युक्तमन्यत्र **तथोक्तमिति**। विपर्ययमध्य इत्युक्तमित्यर्थः। एतदपि बाधमभिप्रेत्येतरथा प्रमैव सा परं त्वप्रामाण्यशङ्कया प्रवृत्तिनिवृत्त्ययोग्यताद्वयोरपीत्यवधेयम्।

तर्कामृतम्

सुखं धर्मजन्यम्। दुःखमधर्मजन्यम्। इच्छा इष्टसाधनताज्ञानजन्या। द्वेषोऽनिष्टसाधनत्वज्ञानजन्यः[1]। कृतिस्त्रिविधा–जीवनयोनियत्नरूपा, प्रवृत्तिः, निवृत्तिश्च। आद्या जीवनादृष्टजन्या। द्वितीया इच्छाजन्या। तृतीया द्वेषजन्या। धर्मः श्रुतिविहितकर्मजन्यः। अधर्मः श्रुतिविरुद्धाचरणजन्यः।

तरङ्गिणी

आद्या जीवनादृष्टजन्येति। अतीन्द्रिया चेयं

१. 'द्विष्टसाधनताज्ञानजन्यः' इति पाठान्तरम्।

प्राणपञ्चकसञ्चाररूपकार्यानुमेया। **तृतीयेति**। निवृत्तिरित्यर्थः। न च प्रवृत्त्यभावस्यैव तत्त्वमास्तामित्यत आह–**द्वेषजन्येति**। तथा च द्वेषरूपकारणानुविधानादस्मादहं निवृत्त इत्यभावविलक्षणप्रतीतिरतिरिक्तेत्यर्थः। **श्रुतीति**। स्मृतेरपि श्रुतिमूलत्वात् स्मृत्युक्तकर्मणोऽपि श्रुतिविहितत्वाक्षतिः। यथा दर्शादि श्रौतम्, सन्ध्योपासनादि स्मार्तम्। **श्रुतिविरुद्धेति**। श्रुतिनिषिद्धेत्यर्थः। यथा ब्राह्मणो न हन्तव्यः, न कलञ्जं भक्षयेदित्यादि।

चषकम्

इच्छेति। उपायेच्छेत्यर्थः। सुखदुःखाभावरूपफलस्य त्वितरेच्छानधीनेच्छाविषयत्वात्तज्ज्ञानमात्रादेवेच्छा **कथ**मन्यथा पुरुषार्थता। **द्विष्टं** बलवद्द्वेषविषयीभूतं बलवत्त्वं जातिः। स च दुःखे ताद्रूप्येण ज्ञानादेव तदुपाये तु तत्साधनता ज्ञानादिति विवेकः। नान्तरीयकश्रमके पाके द्वेषनिवारणाय **बलवदिति**। **प्र**वृत्यभाव एव निवृत्तिरिति तु न **युक्तं** द्वेषान्वयव्यतिरेकानुविधायित्वादित्याह। **द्वेषजन्येति**। **अत** एव मार्गे सर्पान्निवृत्तेऽपि गृहे शयिते निवर्तत इत्यप्रत्ययः। तथा च साक्षादगतिसाधनीभूतक्रियायासमवधानसत्त्वे यद्वशाद्गतेरनुपधानं सान्तरा निवृत्तिरिह विवक्षिता। कण्ठोक्तेषु प्रयत्नान्तेषु सप्तदशसु सौत्रेण क्रमेण निरूपितेष्वपि चशब्दसमुच्चितेषु शब्दान्तेषु सप्तसु क्लृप्तक्रमाभावं द्योतयितुं स्वयमुद्दिष्टमपि क्रममाक्षिप्यात्मगुणप्रसङ्गस्मृतान्संस्कारस्य गुणसाधर्म्यप्रकरणोपात्तं बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नभावनाधर्माधर्मा इत्यनुसृतमपि क्रमं समान्यरूपेणानात्मगुणत्वस्फोरणायोज्झित्वा धर्माधर्मसंस्कारा क्रमेण निरूपयति। **धर्म इत्यादिना**। **श्रुतीति**। स्मार्तादीनामपि तन्मूलश्रुतिमूलकत्वमव्याहतमेव। **तदुक्तम्**–

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्॥ इति

विहितकर्मेति। यागस्यैकस्य ध्वंसव्यापारकत्वसम्भवेऽप्यनेक- जलसंयोगध्वंसानां स्नानव्यापकरत्वकल्पने गौरवादेको धर्मस्तथा कल्प्यत

इत्याशय:। **नचास्य** पूर्ववृत्तित्वमात्रं कारणत्वं समवायिकारणस्येव कार्यकालवृत्तित्वमपीति किं धर्मेण। **एतेन** पूर्वापरीभावापन्नजलसंयोगानामेक-धर्मजनकत्वमपि न सम्भवतीत्यपास्तमिति वाच्यम्। कीर्त्तितयागादपि फलप्रसङ्गादस्माकं तु धर्मरूपद्वारनाशादेवानतिप्रसङ्गात्। **एतेन** कीर्त्तितफलोपहितयागाभ्यां फलकीर्त्तनयोरत्ययदशायां फलोपधानप्रसङ्गनिवृत्तये स्वीयफलकीर्त्तनयोर्ध्वंसानुपहितत्वनिवेशनायासो नोपा**देय:**। **विरुद्धेति** निषिद्धेत्यर्थ:। **अत्रापि** कृतप्रायश्चित्तस्य नरकप्रसङ्गनिवृत्तये ह्यधर्मस्य प्रायश्चित्तनाश्यस्य कल्पनाया आवश्यकत्वमिति बोध्यम् जीवधर्मयोरनयोर्मिथ्याज्ञानवासनाविशेषस्यापि हेतुत्वादेव न तत्त्वज्ञानिषु प्रसङ्ग इति कुतस्तेषु स्वर्गनरकादिफलसम्पत्ति:।

नन्वनयो: संस्कारवत्फलनाश्यत्वमेव **तदुक्तम्**। **"नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपी"**ति। **अत** एव तत्त्वज्ञानिनां पूर्वजन्मार्ज्जितसकलकर्मणां झटिति भोगाय कायव्यूहोऽपि प्रामाणिक:। श्रूयते च तत्त्वज्ञानं जनकादीनां तेन च तेषां मिथ्याज्ञानवासनाविरहेण क्रियमाणानां कर्मणां धर्माधर्मरूपव्यापारवैकल्येऽप्यनन्तजन्मार्जितकर्मणां सञ्चितानामानन्त्यात् कायव्यूहेनापि भोगासम्भवान्मोक्षासम्भव इति **चेन्न**। कृष्टमुक्तशिलीमुखसंञ्चितप्रारब्धकर्मणामेव तत्र कर्मपदेनोपादनात्। **"ज्ञानाग्नि: सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन"**। **"क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"** इत्याद्यनुरोधात्।

तात्पर्यटीका

गतिसाधनीभूतक्रिया पादान्तरप्रक्षेपहेतुपूर्वपादस्थितिरूपक्रियात **एव भूतेति**। वैकल्पिकेष्वपि न सर्वान् प्रति सर्वो धर्म:। आषाढ्यां प्रोष्ठपद्यां वेत्यादावाषाढ्या: सर्वान्प्रत्यप्राप्तेर्व्यवस्थासम्भवेऽव्यवस्थाया अन्याय्यत्वाच्च तथा च गर्भाष्टमेऽष्टमे वाब्दे इत्यादौ कं प्रति को धर्म इत्यपेक्षायां **स्वस्य** च प्रियमित्युक्तम्। तेन सूत्रसमाख्ययोर्व्यवस्थायकत्वासम्भवे यस्य यत्रेच्छा तस्य स धर्म इति व्यवस्थासिद्धेरन्यतरत्र करणेऽपि न प्रत्यवैतीति सिद्धम्।

अनेकजलसंयोगध्वंसानां स्नानपदार्थघटकयावज्जलसंयोगानां यावन्तो ध्वंसास्तेषां। **एको** धर्म इति द्वाभ्यां क्रमिकाभ्यां यत्र कालान्तरभावि स्वर्गादि तत्र ध्वंसद्वयव्यापारतापेक्षया लघुरेको धर्मः कल्प्यते क्वचित् कलिकापूर्वकल्पना तु फलमुखी फलापूर्वस्य स्वर्गं प्रति लाघवाद्द्वारत्वे सिद्धे पश्चात्तदपूर्वं क्रमिकेभ्यः कथमिति वीक्षोदयादिति भावः। **एतेन** यागकारणतायामव्यवहितत्वांशपरित्यागेन। **एतेन** धर्मकल्पनावश्यकत्वेन। **हेतुत्वादेवेति**। अन्यथेश्वरेऽपि तयोः प्रसङ्गादिति भावः। एतदनुगुणतयैव **जीवधर्मयोरित्युक्तम्**।

अत एव धर्माधर्मयोः फलनाश्यत्वादेव। **अन्तरा**द्यक्रियोत्तरदेश-संयोगयोर्मध्ये। **द्विक्षणा**वस्थायित्वप्रवादस्येति परिगणितक्षणमात्रावस्थायित्व-प्रवादस्य वा। अत्र प्रथमक्षणे क्रिया तया च द्वितीयक्षणे वेगस्तेन च तृतीयक्षणे क्रियानाश इति प्राचीनमतम्, नवीनमतं त्वग्रेमूल एवं व्यक्तमिति बोध्यम्। न तु स्थूलकालावस्थायित्वप्रवादस्येत्यर्थः। नाशावश्यम्भाव इति। **न च** विजातीयोत्तरदेशसंयोगत्वेन नाशकत्वेनायं प्रसङ्ग इति **वाच्यम्**। तादृशवैजात्यावच्छिन्नं प्रत्यननुगतानां कठिनकठिनतरदेशविशेषाणां प्रयोजकतायाः प्रबलप्रबलतरप्रयत्नसाध्यक्रियाविशेषाणां विरोधितायाश्च कल्पनया गौरवप्रसङ्गेन तादृशजातौ मानाभाव इत्याशयात्।

तर्कामृतम्

वेगाख्यः संस्कारः आद्यक्रियाजन्यः द्वितीयादिक्रियाजनकः, यथा वेगेन बाणश्चलतीति। भावनाख्यः संस्कारो विशिष्टज्ञानजन्यः।

तरङ्गिणी

यथा वेगेनेत्यादि। वेगे द्वितीयादिक्रियाजनकत्वमुपदर्शयता तत्र प्रमाणमुपदर्शितं भवति। **विशिष्टज्ञानेति**। तद्विशेष्यकतत्प्रकारकज्ञानेत्यर्थः।

चषकम्

वेगाख्य इति। तत्र प्रमाणं दर्शयति। **द्वितीयादीति**। **नन्व**न्तरा क्रियानाशोत्पादयो: प्रमाणाभाव:। शब्दबुद्धिकर्मणां द्विक्षणावस्थायित्वप्रवादस्य निर्युक्तिकत्वादित्याशङ्क्योपर्युपरि गच्छतो गुरुतरस्य पतनेन क्रियाभेदोऽध्यक्ष: न च क्रियावति क्रियान्तरमिति पूर्वक्रियानाश आवश्यक: स चोत्तरसंयोगादेवेति नाशकसत्त्वेन नाशावश्यम्भावे क्रियान्तरोत्पादको वेग: सिद्ध्यतीत्याशयेनाह। **यथेति**। यस्मादित्यर्थ: तन्नाकाशेनोद्यान्तरस्याभिघात्यस्य चाभावान्नासौ संयोग: क्रियोत्पादायालमिति भाव:।

निर्विकल्पकात्स्मरणानुनुभवा**द्विशिष्टेति**। **यत्तू**पेक्षान्यंत्यपि बो**ध्यम्**। उपेक्षात्वञ्च संस्कारप्रतिबन्धकतावच्छेदकावच्छिन्नत्वम्। तच्च तद्व्यक्तित्वमिति **केचित्तन्न**। उपेक्षा कालेऽनुपेक्षाज्ञानान्तरादपि संस्कारानुत्पादप्रसङ्गात्। अपेक्षाज्ञानानां तत्तद्व्यक्तित्वेन हेतुत्वस्य सुवचत्वाच्च। **न च** घटपटसमूहालम्बनस्य पटांशे उपेक्षात्मकस्य घटस्मृत्युपधायकस्य संस्कारद्वारा सत्त्वान्नियतोद्बोधिकाया: पटस्मृतेरापत्तिर्दुवरैवेति **वाच्यम्**। घटांशेऽपेक्षात्मकस्यापि तज्ज्ञानस्य पटविशेष्यकसस्कारं प्रत्यहेतुत्वादत एव संस्कारस्य सविशेष्यकत्वमावश्यकम्। **इत्थ**मेव घटत्वांशेऽपेक्षात्मनो द्रव्यत्वांशे उपेक्षात्मकात् समूहालम्बनाद्घटत्वेन स्मृत्युपधायकाद्द्रव्यत्वेन स्मृतिवारणाय सप्रकारकत्वमपी**त्यन्यत्र** विस्तर:।

अनुभवत्वस्य सन्दिग्धव्यभिचारकतां पुन: पुन: स्मृतेर्दृढतरसंस्कारजनकतां स्वजन्यसंस्कारनाश्यानां स्मृतीनामिति टीकां चालोच्याह **ज्ञानेति**।

तात्पर्यटीका

निर्विकल्पकस्मरणे इष्टापत्तिं वारयितुमनुभव**पर्यन्तम्**। **यत्वि**त्यध्याहृतवदन्तीति क्रियाविशेषणम्। **संस्कारानुत्पादप्रसङ्गादिति**। यत्रापेक्षाबुद्ध्यात्मकमुपेक्षाज्ञानमथापेक्षाज्ञानान्तरं तत्रानेन विनश्यदवस्थेनापि संस्कारो न सम्भवति पूर्वोपेक्षाबुद्धे: सत्त्वादिति भाव:। अपेक्षाबुद्धेर्नाशिकाया:

सत्त्वात् कुतो नोपेक्षाबुद्धेर्नाश इत्यतो दोषान्तरमाह**पेक्षाज्ञानानामिति**। **सुवचत्वाच्चेति**। तथा च पूर्वमते गौरवमित्याशयः। **न चोद्**बोधकाभावान्न स्मरणा**पत्ति**र्यादृशवस्तुविशेषदर्शने सत्यवश्यं पञ्चषाणि पटस्मरणान्यजनिषत तद्वस्तुदर्शने तदभावस्य वक्तुमशक्यत्वादित्याह **नियतोद्बोधिकाया इति**। ज्ञानोपरमेऽपि विशिष्टविषयोपधानेन जायमानकृतिसाक्षात्कारपूर्वं विशेषणतावच्छेदकप्रकारकसंशयान्यसविषयकस्यावश्यकतया संस्कारस्य सविषयकत्वसिद्धिः। **एवं** स्मृतिजनकतावच्छेदके एवोपेक्षान्यत्वप्रवेशे उपेक्षाज्ञानात् पंडसंस्कारकल्पनागौरवं चेत्यमिप्रेत्याहा**न्यत्र** विस्तर इति। अत्र **केचित्**। अनुभवध्वंसेनैवाव्यवहितपूर्ववृत्तित्वोपपत्तौ किं भावनयेति वदन्ति। **तत्रास्मन्मातामहचरणाः**। उपेक्षाज्ञानाच्छंस्कारकात् स्मृत्यापत्तिवारणाय तस्या आवश्यकतान्यथोपेक्षात्वस्यैकस्याभावेन नानोपेक्षास्थले तदुपेक्षान्यैतदुपेक्षात एतदुपेक्षान्यतदुपेक्षातश्च स्मृत्यापत्तिसम्भवादवच्छेदकताया व्यासज्य-वृत्तित्वानङ्गीकारात् तत्तद्भेदकूटस्यावच्छेदकत्वमसम्भवि। परस्परं विशेषणविशेष्यभावे विनिगमनाविरहेण विशिष्टस्याप्यवच्छेदकत्वं दुर्वचमित्यूचुः।

सन्दिग्धव्यभिचारकतां व्यभिचारसन्देहविषयधर्मताम्। उक्तलाघवज्ञान-स्योत्तेजनकत्वमाशङ्क्याह **पुनः पुनः स्मृतेरिति** स्मृतीनां बाहुल्यप्रयोज्येनोद्बोधकबाहुल्येन झटिति तत् समवधानमेवानुभवजन्यभावनायां दार्ढ्यमित्युक्ते त्वाह। **स्वजन्येति**।

तर्कामृतम्

स्थितिस्थापकाख्यः संस्कारः कारणगुणप्रक्रमजन्यः। गुरुत्वं कारणगुणप्रक्रमजन्यम्। नैमित्तिकं द्रवत्वं जतुघृतद्रुतसुवर्णादीनामग्नि-संयोगजन्यम्। स्नेहः कारणगुणप्रक्रमजन्यः।

चषकम्

स्थितिस्थापकाख्य इति। एतत्तत्वं प्रपञ्चितमधस्तात्। परीक्षाया

उद्देशक्रमानुरोधित्वादुद्देशक्रममनुरुध्यैवाह। **गुरुत्वमिति**। तच्च पतनासमवायिकारणं दुरपह्नवमित्याशयः। **तदुक्तम्**–

वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा।
द्विधैव कारणत्वं स्यादुष्णस्पर्शगुरुत्वयोः॥ इति

वेगो वेगस्पन्दयोरसमवाय्याभिघाते निमित्तम्। द्रवत्वं द्रवत्वप्रस्रवणयोरसमवायि सङ्ग्रहे निमित्तम्। भेरीदण्डसंयोग आद्यशब्दे निमित्तम्। भेर्याकाशसंयोगोऽसमवायी। वंशदलद्वयविभाग आद्यशब्दे निमित्तम्, वंशदलाकाशविभागोऽसमवायी। उष्णस्पर्श उष्णस्पर्शेऽसमवायी, पाकजे निमित्तम्। गुरुत्वं गुरुत्वपतनयोरसमवाय्यभिघाते निमित्तमिति तस्यार्थः। **कारणगुणेति**। **प्र**पञ्चितं चेदमधस्तादिति नेह प्रस्तूयते।

द्रवत्वमिति। तच्च प्रश्रवणासमवायिकारणमावश्यकम्। प्रागुक्तमाद्यं पृथिवीतेजसोरिति तद्विशदयति। **जत्वित्यादि**। नैमित्तिकत्वं निर्वक्ति। **अग्निसंयोगजन्यमिति**। **स्नेह इति**। स च विनिगमनाविरहेण विशेषतो निमित्तभूतसांसिद्धिकद्रवत्वेनापि साध्ये द्रुतसुवर्णासाध्ये चूर्णादिपिण्डीभावे सामान्यतो हेतुः प्रत्यक्षसिद्धो द्विविधः प्रकृष्टोऽपकृष्टश्च। **अत** एव यथा द्रव्यत्वतारतम्यात् प्रस्रवणतारतम्यमेवमेव स्नेहतारतम्यात् पिण्डीभावतारतम्यमुपपद्यते। **तथा** पाथस्तैलद्योर्दहनप्रातिकूल्यानुकूल्ये प्रकर्षश्चादृष्टतिरोहितद्रवत्वसामानाधिकरण्यं **जाति**विशेष इत्यपि वदन्ति।

तात्पर्यटीका

नायं वेगादतिरिच्यत इत्याशङ्क्याह। **एतत्तत्वमिति**। **ननु** स्थितिस्थापकस्य पाकजत्वमपि लीलावत्यामुक्तमित्यत आह **प्रपञ्चितमधस्तादिति**। एकव्यक्तौ द्विविधकारणत्वासम्भवेऽप्येकजातीये तदस्तीतिकारणवैचित्र्यं प्रदर्शयन्नाह **भेरीदण्डेति**। **भेर्याकाशेति च**। एवमग्रेऽपि। गुरुत्वस्य पाकजत्वमपि लीलावत्यामुक्तमित्यत आह **प्रपञ्चितं चेति**। **ननु** परमाणुनिष्ठमेव गुरुत्वं घटे प्रतीयतां किं कारणगुण प्रक्रमागतघटगुरुत्वेनेत्यत आहे**दमधस्तादिति**।

अत एव द्रवत्वप्रस्रवणयोः स्नेहपिण्डीभावयोश्च हेतुमद्भावस्यावश्यकत्वादेव। **उपपद्यत इति**। तेन यद्विशेषयोरिति व्याप्तिबलेनानयोः सामान्यकार्यकारणभावात् स्नेहत्वावच्छिन्नकारणताघटितं स्नेहलक्षणं ध्रुवमन्यथा द्रवत्वेऽतिप्रसङ्गः स्यादिति विशेषत **इति सा**मान्यत इति **च** पदनिगर्वः। **जातिविशेष इति** प्रकर्ष इत्यनुषज्यते। **अत्रा**वश्यक्लृप्तद्रवत्वसहकारित्वेनैवोपपत्तौ तादृशजातौ मानाभावइत्यस्वरसोऽपि वदन्तिभ्यां **सूचितः**।

तर्कामृतम्

शब्दस्त्रिविधः—संयोगजः, विभागजः, शब्दजश्च। आद्यो भेरीदण्डसंयोगजन्यः, द्वितीयो वंशादिदलद्वयविभागजन्यः, तृतीयस्तु संयोगेन विभागेन च[1] आद्ये शब्दे जनिते तेन शब्देन निमित्तवायुसहकृतेन वीचीतरङ्गन्यायेन[2] कदम्बगोलकन्यायेन वा जन्यते।।

इति गुणनिरूपणम्

तरङ्गिणी

निमित्तवाय्विति। तेन प्राच्यवायुना प्रतीच्याभिमुखं झटिति शब्दसाक्षात्कारोपपत्तिः। अत्र च शब्दोऽसमवायी। पूर्वत्र भेर्याकाशसंयोगो दलद्वयाकाशविभागोऽसमवायीति विशेषः। **वीचीतरङ्गन्यायेनेति**। शब्दाच्छब्दान्तरं ततःशब्दान्तरमितिरीत्या कर्णविवरावच्छेदेनोत्पन्नो गृह्यते। उत्पन्नशब्दस्य झटित्येव ग्रहणादीदृशपरम्परया कालविलम्बात्प्रथमशब्दानन्तरमेव सर्वदिगवच्छेदेन शब्दा उत्पद्यन्ते। तत्र च यद्दिगभिमुखो वायुस्तद्दिगवच्छेदेनाधिकशब्दोत्पत्तिः। अत एवाद्यशब्दो न गृह्यत इति सिद्धान्त इत्यभिप्रायेणाह—**कदम्बगोलकेति**।

---

१. 'वा आद्ये' इति पाठान्तरम्।

४. वीचीतरङ्गन्यायेन वा इति पाठान्तरम्।

चषकम्

त्रिविध इति मीमांसकास्तु स एवायं गकार इति प्रत्यभिज्ञानवशान्नित्यः शब्द इत्याहुः। **तन्न**। तारत्वमन्द्रत्वरूपविरुद्धधर्माध्यासेन भेदात्। **व्यञ्जक**वायुधर्म एवासाविति तु न **युक्तम्**। श्रोत्रेन्द्रियाग्राह्यत्वापत्तेः। **किञ्च** कत्वादेरपि तत्त्वसम्भवेन वर्णैक्यापत्तेः।

सोऽयमिति प्रत्यभिज्ञा तु साजात्यमवलम्बते तस्याः स्वरूपतो जात्यवगाहित्वे सोऽयमिति जातित्वेन तदवगाहित्वे तु तज्जातीयोऽयमित्युल्लेख इत्यभ्युपगमात्। **किञ्च** कण्ठताल्वाद्यमिघातान्वयव्यतिरेकानुविधानं साक्षात्कारोपक्षीणं तैर्वाच्यं तथा सति गौरवम्। **न च** लौकिकविषयितया कत्वमेव ममापि जन्यतावच्छेदकमिति न गौरवं **किमे**वमपि ककारविषयत्वस्य तदभिघातादिजन्यतानवच्छेदकत्वे विनैवाभिघातं तदवच्छिन्नापत्तिः **साम्प्रतम्**। यतः कत्वाविषयककारविषयकप्रत्यक्षासिद्ध्यालौकिकविषयिताकत्वस्य तद्व्यापकतया कत्वावच्छिन्नसामग्र्यास्तत्सहकारित्वं सर्वेषामप्यनुमतमिति वाच्यम्।

कोलाहलप्रत्यक्षानुपपत्तेः। नहि तत्र लौकिकविषयिताकत्वमस्तीति। **शब्देना**समवायिकारणेनाद्यशब्दासमवायिकारणभेर्याकाशसंयोगविगमेऽपि दूरे तदुत्पत्तेः। अत एवाग्रे **निमित्तेति**। **वायुसहकृतेनेति**। तेनानुकूले वायौ झटिति शब्दसाक्षात्कारोपपत्तिः। **नन्वे**वं मृदङ्गोत्पन्नस्य शब्दस्य कथं श्रोत्रेण ग्रहणं कर्णानवच्छिन्नत्वादत आह **वीचीतरङ्गन्यायेन वेति**। वायुप्रातिकूल्ये शब्दानुत्पाद उत्तरोत्तरमुत्कर्षो व्यापकदेशावच्छिन्नत्वमेकैकत्वञ्चेति **बोध्यम्**। **अत्र** नानादिगवच्छिन्नैकशब्दाङ्गीकारेण लाघवसम्भवेऽपि नानादिगवस्थितपुरुषाणां तारत्वमन्द्रत्वादिविवादयोग्यवैलक्षण्यानुभवात् प्रामाणिकं गौरवं न दोषायेति मत्वाह। **कदम्बेति**। लाघवादरेऽनुभवोपेक्षा, अनुभवादरे लाघवोपेक्षेति द्वयोस्तुल्यकक्षताद्योतनायोमयत्र वाकारः।

तात्पर्यटीका

वायुधर्मस्याप्यस्य सम्भवच्छोत्रसंयुक्तसमवायसन्निकर्षस्य श्रोत्रग्राह्यत्वमेवोपेयत इत्युक्ते त्वाह। **किञ्चेति**। **तत्व**सम्भवेन वायुधर्मत्वसम्भवेन **वर्णैक्यापत्तेरिति**। तथा च तव ककारगकारयोरपि भेदो न स्यादित्यर्थः।

तर्हि द्वयोरपि वर्णधर्मत्वे विरुद्धधर्माध्यासेन च पूर्वापरेषामपि वर्णानां भेदे सोऽयं गकार इति प्रत्यभिज्ञा न स्यादिति किन्न वीक्ष्यसे इत्याशङ्कां वारयति। **सोयमितीति**। **नन्वे**वं तज्जातीयोऽयमित्युल्लेखापत्तिर्नतु सोऽयमितीत्यत आह **तस्या इति**। **ननु** कत्वादिकं परस्परं विरुद्धमेव न तु तारत्वादिकं कुतश्चित्तारस्याप्यन्यस्मान्मन्द्रत्वादत आह। **किञ्चेति। तैरिति** मीमांसकैरित्यर्थः। **अस्मा**भिस्तूक्तान्वयव्यतिरेकाभ्यां शब्दं प्रत्येव हेतुत्वग्रहादुत्पत्यं- शेऽलौकिकमप्यध्यक्षमस्या व्यवस्थापनक्षममन्यथानुपपत्याङ्गीक्रियत इति वक्ष्यते "इति तत् सिद्धिः। **तदुक्त**"मुत्पन्नः को ब्रिनष्टः क इति बुद्धेरनित्यते"ति भावः। ध्वनिगोचरकत्वाद्युपनीतभ्रमे कण्ठाभिघातस्य व्यभिचारवारणाय **लौकिकेति**। **एव**मपि विषयितया कत्वस्य कण्ठताल्वाद्यभिघात- कार्यतावच्छेदकत्वाङ्गीकारेऽपि। **साम्प्रतं** किमिति योजना तत्सहकारित्वं ककारविषयकप्रत्यक्षसामग्रीसहकारित्वम्।

अनुपपत्तेरिति। कण्ठाभिघातकार्यतावच्छेदकानवच्छिन्नत्वादित्यर्थः। तदेवाह। **नहीति**। **कत्वमस्तीति** शब्देन कत्वाविषयककारविषयककोलाहलप्रत्यक्षे कारणान्तरकल्पनमावश्यकमिति समवायेन कत्वावच्छिन्नं प्रति ताल्वादिव्यापारः शब्दप्रत्यक्षसामान्यं प्रति श्रोत्रावच्छिन्नसमवायो हेतुरस्त्वित्यर्थः **सूचितः**। **शब्दा**नुत्पादस्तद्भागे शब्दानुत्पादः। **उत्कर्षो** मधुरमधुरतरमधुरतमभावः कविकुलसाक्षिकः। **तुल्य**कक्षतेति। तथा च क्वचित् स क्वचिच्चायमपीत्युक्तं भवति।

इति गुणनिरूपणम्

तर्कामृतम्

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि। उत्क्षेपणत्वादीनि जातय:। पृथिवी-जल-तेजो-वायु-मनोवृत्तीनि कर्माणि सर्वाणि अनित्यानि। अतीन्द्रियवृत्तीनि अतीन्द्रियाणि, प्रत्यक्षवृत्तीनि प्रत्यक्षाणि।

अथ कर्मप्रक्रिया-संयोगेन नोदनाख्येनाद्यं कर्म जन्यते, द्वितीयादि वेगजन्यम्। क्रियातो[१] विभाग:, विभागात् पूर्वसंयोगनाश:, तत उत्तरदेशसंयोगोत्पत्ति:, तत: कर्मविभागयोर्नाश:।

इति कर्मनिरूपणम्

तरङ्गिणी

उत्क्षेपणापक्षेपणेति। तत्र शरीरावयवेषु हस्तादिषु तत्सम्बद्धमुसलादिषु च यदूर्ध्वदेशै: संयोगस्याधोदेशैर्विभागस्य च कारणं गुरुत्वप्रयुक्तं संयोगाधीनं तदुत्क्षेपणम्। तेषु च यदूर्ध्वदेशविभागाधोदेशसंयोगकारणं तदपक्षेपणम्। ऋजुनो द्रव्यस्यावयवानामग्रिमदेशैर्विभागस्य मूलप्रदेशै: संयोगस्य जनकं कर्माकुञ्चनम्। तादृशद्रव्यस्याग्रावयवानां मूलप्रदेशाग्रिमप्रदेशाभ्यां विभागसंयोगजनकं प्रसारणम्। अनियतदिग्देशसंयोगविभागकारणं गमनम्। भ्रमणरेचनस्पन्दनोर्ध्वज्वलननतिर्यक्पतननमनोन्नमनादिकं गमनान्तर्भूतमेव। ननु ऊर्ध्वं गच्छति अधो गच्छतीत्यादिव्यवहारादुत्क्षेपणादिकमपि गमनान्तर्भूतमास्तामित्यत आह- **उत्क्षेपणत्वादीनि जातय इति**। तथा चानुगतव्यवहारात्तेषां जातित्वसिद्धौ तेषामेव भेदकत्वमिति संप्रदाय:। क्रिया ततो विभागस्तत: पूर्वसंयोगनाशस्तत उत्तरदेशसंयोगस्तत: कर्मनाश इति पञ्चमे क्षणे उत्सर्गत: कर्मनाश:।

---

१. 'क्रिया क्रियातो विभाग' इति पाठान्तरम्।

चषकम्

पञ्चकर्माणीति। नन्वेवं भ्रमतीति व्यवहारसिद्धजात्यापि विभागसम्भवान्न्यूनत्वमत आह। **उत्क्षेपणत्वादीनीति**। ऊर्ध्वाधः सन्निकृष्टविप्रकृष्टोत्तरदेशसंयोगरूपविचित्रकार्यकत्वस्य तद्व्यञ्जकस्य सत्त्वमभिप्रेत्याह **जातय इति**। प्रत्यक्षे कर्मणि प्रत्यक्षसिद्धाः परमाणुर्गमनवान् स्वक्रियाजन्यसंयोगविभागाश्रयत्वादित्यानुमानिकव्यवहारेणातीन्द्रियेऽपि तस्मिन् सिद्ध्यन्तीति भावः। **जातय** इत्युक्त्योत्क्षेपणत्वादीनां परस्परं व्याप्यव्यापकभावो वा विरोधो वेति सूचितम्। तथा च स्वतन्त्रेच्छेन महर्षिणा तावद्व्यापकगमनत्वरूपजात्यैवेतरेषां विभजनान्न न्यूनाधिकभावः शङ्कनीय इति भावः। **न च** विभाजके विभाजकान्तरावच्छिन्नयावद्भेदानां सामानाधिकरण्यनियमेन गमनत्वावच्छिन्नभेदस्य चोत्क्षेपणादौ क्वचिदप्यसत्त्वेन कथं तस्य विभाजकता। सङ्ख्यायाः पृथक्त्वनिवेशित्वादिति वाचो भङ्ग्या चैतदेव गीयते। **अस्यार्थः**।

सङ्ख्याया एकत्वान्यसङ्ख्यायाः पृथक्त्वेन स्वाश्रयस्य भेदेन सह निवेशिनी तद्भेदकूटसामानाधिकरणेति यावत्तत्त्वादिति। **स्वाश्रयाः** क्वचिदुपधेया यथा शतं गाव इत्यादौ। क्वचिदुपाधयो यथा पञ्च कर्माणीत्यादौ। **अत** एव भेदोऽपि प्रत्येकं स्वसमानाधिकरणयावदेकत्वावच्छिन्नस्य प्रथमे, तादृशैकत्वावच्छिन्नोपाध्यवच्छिन्नस्य द्वितीये। तथा च यैकत्वान्या सङ्ख्या सा तादृशैकत्वावच्छिन्नभेदसमानाधिकरणा वा तादृशोपाध्यवच्छिन्नभेदसमानाधिकरणोपाधिवृत्तिर्वा बोध्येति फलितम्। तथा सह निवेशोऽप्युद्देश्यतावच्छेदकव्याप्यपर्याप्तिसम्बन्धेन **तेना**काशाविति प्रयोगप्रामाण्यवारणम्। **कथ**मन्यथैकशतेऽपि नानापुरुषीयापेक्षाबुद्धिभेदभिन्ननाना शतत्वसम्भवान्न गवां शतानीत्यादयः प्रयोगा इति **वाच्यम्**। उत्क्षेपणादिचतुष्टयान्यगमनत्वस्य तथा भावात्। **संयोगेनेति**। **ननु** नोदनाख्येनेत्यधिकमभिघातादपि क्वचित्क्रियोत्पत्तिदर्शनादत एव संयोगविशेषान्नोदनाभिघात- लक्षणादिष्वादिकर्मेत्या**चार्याः**। **तथा** च सूत्रम्। नोदनादभिघाताद्वाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारात्तथोत्तरमुत्तरं चेति

सत्यम्। कर्मण्यभिघातव्यभिचारस्य स्फुटमुपलब्धेर्नोदनाख्येनेति। नोदनात्वस्यापि जातित्वात्र संयोगत्वापेक्षया गौरवमित्याख्यातुमाख्यापदम्। **न च** विनिगमनाविरहोऽत्यन्ताजनकव्यावृत्तत्वादित्याह। **संयोगेनेति**।

तात्पर्यटीका

संयोगविभागजन्यसंयोगविभागाश्रये वृक्षे व्यभिचारवारणाय **क्रियाजन्येति**। विहङ्गमक्रियाजन्यतदाश्रये तदवारणात् **स्वेति**। **ननु** कथं तावता न्यूनतोद्धार इत्यत आह **जातय इत्युक्तेति**। **नन्वे**वमुत्क्षेपणादीनामपि तेनैव सङ्ग्रहे विभागाधिक्यम्। **न चो**त्क्षेपणादौ न गमनव्यवहार इति **वाच्यम्**। ऊर्ध्वमधश्च प्रक्षिप्तो लोष्ठ ऊर्ध्वं गच्छत्यधो गच्छतीति व्यवहारादित्यत उक्तं **स्वतन्त्रेच्छेनेति**। **ताव**व्यापकेति। भ्रमणत्वादिसकलजातिव्यापकेत्यर्थः। **इत**रेषां भ्रमणादीनाम्।

अत एव नियमद्वयस्याभिप्रेतत्वादेव। **तेन** प्रथमनियमाङ्गीकारेण। **तादृशैकत्वेति**। प्रत्येकं स्वसमानाधिकरणयावदेकत्वेत्यर्थः। **तादृशोपाधीति**। प्रत्येकं स्वसमानाधिकरणयावदेकत्वावच्छिन्नोपाधीत्यर्थः। द्वितीयनियमानङ्गीकारे बाधकमुपदर्शयति। **कथमन्यथेति**।

तर्कामृतम्

सामान्यं त्रिविधम्, व्यापकं व्याप्यं व्याप्यव्यापकं च। व्यापकं सत्ता, व्याप्यं घटत्वादि, द्रव्यत्वादि व्याप्यव्यापकम्।

व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः॥

तरङ्गिणी

व्यापकं सकलजात्यपेक्षयाधिकदेशवृत्ति। व्याप्यं न्यूनदेशवृत्ति। द्रव्यत्वादि

घटत्वपृथिवीत्वाद्यपेक्षयाधिकदेशवृत्ति। सत्तापेक्षया न्यूनदेशवृत्तीत्युभयरूपम्। **व्यक्तेरभेद इत्यादि**। यस्य व्यक्तेराश्रयस्याभेदः स न जातिः। **तुल्यत्वं** समानत्वम्। सर्वत्रापि व्यक्तिरित्यनुषज्यते। यदाश्रयाणामन्यूनानतिरिक्तत्वम्। तथाच घटपदार्थतावच्छेदकस्य कलशपदार्थतावच्छेदकभेदाभावः। सङ्करो ययोराश्रयाणां तदुभयवद्भिन्नत्वे सति तदुभयवदभिन्नत्वं तदुभयं तदन्यतरद्वा न जातिः, यथा भूतत्वमूर्तत्वे। तयोराश्रययोर्गगनमनसोस्तदुभयवद्भिन्नत्वात् पृथिव्यादिचतुष्टयस्य तदभिन्नत्वात्। **अनवस्थितिः।** सर्वजातिषु जातिरित्यनुगतप्रतीत्या जातिस्वीकारे तत्साधारणानुगतप्रतीत्या तामादायापि जातिकल्पनम्। एवंरीत्या व्यक्तेः कल्पनीयजातिरूपाश्रयस्यानवस्थितिः। **रूपस्य स्वरूपस्य** हानिर्यथा विशेषेषु जात्यङ्गीकारे सामान्यवतो द्रव्यकर्मभिन्नस्य गुणत्वापत्तौ अतिरिक्तपदार्थत्वहानिः। **असम्बन्धो** व्यक्तेः प्रतियोगित्वा- नुयोगित्वान्यतरसम्बन्धेन समवायाभावः। यथा अभावः। अत्रेदं बोध्यम्। जातिस्वीकारो ह्यनुगतप्रतीत्यनुरोधेन। व्यक्तीनामननुगमात्। व्यक्तेश्चैकत्वेऽनुगततयैव प्रतीत्युपपत्तौ तत्स्वीकारो निष्प्रयोजनः। आश्रयाणां तुल्यत्वे एकजात्यैवानुगतप्रतीत्याद्युपपत्तौ विभिन्नजात्यङ्गीकारो व्यर्थः। जात्योराक्षेपकत्व- प्रतिक्षेपकत्वदर्शनात्। यथा शिंशिपात्ववृक्षत्वयोराक्षेप्याक्षेपकभावः। गोत्वाश्वत्वयोश्च प्रतिक्षेप्यप्रतिक्षेपकभावः। जातित्वव्यापकस्य पूर्वोक्तरूपस्य सङ्करस्थलेऽसम्भवा- ज्जातित्वाभावः। स्पष्टमन्यत्।

चषकम्

व्यापकं सामान्यसमानाधिकरणाभावाप्रतियोगि, व्याप्यं स्वभिन्नसामान्य- समानाधिकरणाभावप्रतियोगि, व्याप्यव्यापकं किञ्चित्सामान्यसमानाधि- करणाभावप्रतियोग्यन्यथा च। व्यापकत्वे तादृशभेदप्रतियोगितावच्छेदक- भेदकूटघटनाध्रौव्ये तत्प्रतिद्वन्द्वितया तादृशप्रतियोगितावच्छेदकताकूटमेव व्याप्यतायां घटमानं मा बाध्यतामिति स्वभिन्नेति सामान्यविशेषणे स्थिते विभागन्यूनता माभूदित्युभयप्रतिद्वन्द्वितया समवतीर्णं तृतीयेन भेदेनेति मदुपज्ञा वाचो **युक्तिः।**

व्यक्तेरिति। इति जातिबाधकस्य जातिसाधकविरोधिनः सङ्ग्रहः। सङ्क्षेपेण कथनमितीति शब्दमध्याहृत्य योज्यम्। **यथा** व्यक्तैरैक्ये जातिसाधकानुगतप्रतीत्यभावः। **तुल्यत्वे** यत्तुल्यत्वं तेनैव निर्वाहेऽतिरिक्तानवसरः।

न हि कुम्बुग्रीवादिमानिति प्रतीतौ साक्षाद् घटजातिविषयत्वसम्भवो मतुपोल्लेखात् **किन्तु** परम्परयान्यजातिविषयैव सेति न घटत्वतुल्यान्या जातिः। **कथं** तर्हि ज्योतिष्मतीतिप्रतीतेर्जातिसाधकता योगार्थाप्रत्ययात्। **ज्ञान**साधनत्वरूपयोगार्थप्रतीतावपि साधनतावच्छेदकतयैव तत् सिद्धिरिति तु मादृशाः। **साङ्कर्ये**ऽनुगतप्रतीत्यभावस्तथाहि यथा केषाञ्चिद्घटपट-जातीयानामनुगमकं पृथिवीत्वं सर्वेषामेव तेषां तथान्यथा कथमनुगमः। न च घटपटत्वयोर्घटपृथिवीत्वयोर्वा साङ्कर्यम्। विरोधाद्व्याप्यव्यापकभावाच्च। परस्परमत्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशो हि सङ्करस्तथा चामूर्तधर्मो भूतत्वञ्चेन्मूर्तस्य कस्यचिदनुगमकं तर्हि सर्वस्य स्या न चैवमिति न सा जातिः।

कथं तर्हि पृथिव्यनुगमकं घटत्वमपृथिवीधर्मोऽपीति चेत् क एवमाह किन्त्वननुगतव्यक्तिकानां घटानां नानैव तत्तथेति। **अनवस्थितौ** जात्यनुगमाय प्रवृत्तं जातित्वं यदि स्वस्मिन् जातौ न भवेत् कथं सर्वानुगमः। कासाञ्चिदेव तासां तत्तथेति **चेद**न्यासामन्यद्गवेषणीयं भवेद्गवेष्यमाणमपि न स्वानुगमाय प्रभवति **रूपहानौ** परमाणुभेदको विशेषो न विशेषान्तरसाधारणेन रूपेण व्यभिचारप्रसङ्गादिति व्यावर्त्तकत्वस्य तद्धर्मस्य। **ना**प्यसाधारणेनैकैक-व्यक्तेरननुगमासम्भवेन तदसिद्धेस्तत्परमाणुवृत्तिविशेषत्वादेः परमाणुभेदाधीन-सिद्धिकत्वाज्जात्याश्रयस्य रूपान्तरेण व्यावर्त्तकत्वानभ्युपगमाच्चान्यथै-कत्वादेरप्येवं व्यावर्त्तकत्वसम्भवे धर्मिणो विशेषस्यैव प्रच्यवापत्तेः। **तस्मात्र** सर्वेषु न वा प्रत्येकं विशेषेषु जातिः। तदेतद्दोषमहाग्राहग्रस्ता एव कतिपयविशेषव्यावृत्ताः कतिपयविशेषजातयः।

असम्बन्धे जात्यादिव्यतिरिक्ते समवेते वा जात्यादिव्यतिरिक्तस्य समवायिनि वा जातिप्रसक्तिरित्यनेवं विधे कथं सा वर्त्तेत व्यापकाभावे व्याप्याभावावश्यम्भावात् पक्षे साध्यसन्देहाहिता व्यभिचारशङ्का तु न व्यापकताग्रहं

प्रति विरोधिनी तस्मिन् समवायस्याकल्पनया लाघवस्यानुकूलतर्कस्य सद्भावात्। **अत्र** यद्यपि समवायित्वस्यैव व्यापकत्वं सम्भवति। **तथाप्य**भावे जातिसंशयकाले तद्व्यतिरेकस्य पक्षे सन्देहान्निश्चितो जात्यतिरिक्तसमवायित्वरूपव्यापकस्य व्यतिरेको हेतुर्वाच्यस्तस्य च जातिव्यापकता न सम्भवति तच्छून्ये गुणादौ जातिसत्त्वादतः **समवेत इति**। **न च** तत्र जात्यादिव्यतिरिक्तत्वं व्यर्थमिति **वाच्यम्**। प्रतियोगिसहचारस्थलपरिशेषद्वारा पक्षधर्मतानिश्चयसम्पादकत्वात्। तद्घटितस्याखण्डाभावरूपहेत्वन्तरविकासकत्वाद्व्यापककोटिप्रविष्टत्वाच्च न कस्यापि वैयर्थ्य**मिति**।

तात्पर्यटीका

अप्रतियोगित्वं प्रतियोगित्वसामान्याभावः सचाप्रसिद्धः सर्वस्यैव द्वित्वावच्छिन्नाभावप्रतियोगित्वादत आह। **व्यापकत्व इति**। **कूटघटनाध्रौव्य इति**। घटत्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वे सति द्रव्यत्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वमित्यादिक्रमेण प्रत्येकं तत्तज्जातिमुपादाय व्यापकत्वं वाच्यमित्यर्थः। तत् प्रतिद्वन्द्वितया पृथिवीत्वाद्यतिप्रसक्त्येत्यपि बोध्यम्। तेन तत्र सामान्याभावनिवेशसम्भवेऽपि न क्षतिः। **कूटमेवेति**। द्रव्यत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वे सति घटत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वमित्यादिक्रमेणैवेत्यर्थः। **स्वभिन्नेतीति**। तथा च द्रव्यपृथिवीत्वादीत्यवच्छेदकत्वान्येव तत्र निविशन्ते न तु घटत्वेत्याद्यपि घटत्वे घटत्वादीत्याद्यवच्छेदकत्वाभावादिति भावः। **उभय**प्रतिद्वन्द्वितयोभयभिन्नत्वेन। **यत्तुल्यत्वमिति**। यज्जाति तुल्यत्वं यत्र तत्प्रतीतेर्न तद्भिन्नतद्गतजातिविषयकता **यथा** घटः कलश इति प्रतितेरिति नियमादित्य**र्थः**।

घटत्वतुल्यस्यापि कम्बुग्रीवादिमत्त्वस्य प्रतीतेर्न घटत्वविषयकत्वमिति घटत्वातिरिक्तस्य तस्यावश्यकत्वमिति कथमेतदित्याशङ्क्याह **नहीति**। मतुब्घटितपदोल्लिखितप्रतीतिमात्रस्यैव न जातिसाधकतेति भ्रमेण शङ्कते **कथं तर्हीति**। अर्थपरमतुब्घटितप्रतीतेरेव न तथात्वमित्यभिप्रेत्य समाधत्ते

योगार्थेति। रूढ्यर्थतावच्छेदकतज्जातिसमानाधिकरणयोगार्थान्तर- प्रतीत्यभ्युपगमेऽपि न मतुप्प्रयोज्या तज्जातिविषयता तथा सति कम्बुग्रीवादिमानितिवदन्यजातिविषयताप्रसङ्गादिति दर्शयन्प्रमान्तरमपि तादृशजात्यालम्बनमेवेत्याह **ज्ञानसाधनत्वरूपेति**। **तत्**सिद्धिरेवेति योजनया घट: कलश इतिवदत्रापि प्रमाणद्वयस्याप्येकजातिविषयतेति फलितम्। मतुपोल्लेखादित्यस्यार्थपरिष्कारेणास्य पक्षस्याभ्यर्हितत्वं सूचयति। **मादृश इति**। सकलमूर्तानुगमाभावेऽपि पृथिव्यादिचतुष्टयवृत्तिभूतत्वस्य मूर्तत्वव्याप्यजातित्व- मिष्यत एवेत्यत उक्त**ममू**र्तधर्म इति। **न चैवमिति**। तथा च सकलमूर्तानुगतभूतत्वप्रतीत्याभाव: सिद्ध इत्यर्थ:।

इत्थमेव साङ्कर्यात् पार्थिवसौवर्णघटसाधारणीघटत्वाख्या न जातिरिति वक्तुं शङ्कते। **कथं तर्हीति**। उद्देश्यविधेयभवेनान्वये भिन्नलिङ्गता न दोषाय परामर्शोऽनुमानमितिवन्नचानुमानपदमजहल्लिङ्गमिति **वाच्यम्**। कोऽसानुमान इति महाभाष्यविरोधादित्यभिप्रेत्याह **स्वस्मिन्** जाताविति। **न स्वानुगमायेति**। तथा च यदेव जातित्वं सर्वजात्यनुगमायोरीक्रियते तेनापि स्वसाधारण्यनुगता प्रतीतिर्न सिद्धैवेति तादात्म्यातिरिक्तसम्बन्धावच्छिन्नं जातिवृत्तित्वं जातिभेदाव्याप्यमिति लाभान्न कापि जातौ जातिरस्तीति भाव:। **तद्धर्मस्येति**। प्रच्यवापत्तेरित्यनेनान्वय:। तथा चाव्यावर्त्तकव्यावृत्ता नानुगता प्रतीतिरिति भाव:। **नन्व**नुगतप्रतीत्या सर्वविशेषसाधारण्येव जातिरास्तां व्यावर्त्तकता पुनर्विशेषाणां किञ्चिद्विशेषणविशिष्टजात्या भविष्यतीत्याशङ्कते **तत्परमाण्विति**। **परमाणुभेदाधीनसिद्धिकत्वादिति**। तथा च तादृशजातिविशेषणमेव दुर्ग्रहमिति भाव:। स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्व- रूपैकमात्रवृत्तित्वमेव तत् सुग्रहं मत्त्वा **जात्याश्रयस्येति**।

जात्यादिव्यतिरिक्ते समवेत इति। गुणे कर्मण्यवयविनि चेत्यर्थ:। **जात्यादिव्यतिरिक्तस्य समवायिनीति**। द्रव्यसामान्य इत्यर्थ:। तेन द्रव्यगुणकर्मान्यतमत्वं जातिव्यापकमित्युक्तं भवति। धूमवत्त्वादित्यत्र मतुप इवास्य वैयर्थ्यमेवेत्याशङ्क्याह। **तद्घटितस्येति**। विशिष्टभेदस्य

जातिसाधारणस्य तद्व्यावृत्तशुद्धभेदान्यत्वादिति भावः **तथा**पि धूमालोकान्यतरस्मादित्यत्रेवानर्थक्यमनपवार्यमतो **व्यापककोटीति**।

तर्कामृतम्

नित्यत्वे सत्यनेकसमवेतत्वमिति सामान्यलक्षणम्। सामान्यानि नित्यान्येव। अतीन्द्रियवृत्तीनि अतीन्द्रियाणि, प्रत्यक्षवृत्तीनि प्रत्यक्षाणि।

नित्यद्रव्यवृत्तयोऽन्त्याः विशेषाः। ते च बहवो नित्या अतीन्द्रियाश्च। प्रलये परमाणूनां भेदाय ते स्वीक्रियन्ते, तेषां वैधर्म्यव्याप्यत्वादिति।

तरङ्गिणी

नित्यत्वे सतीति। सत्यन्तं संयोगविभागादिवारणाय। परमाण्वादिवारणाय विशेष्यम्। तत्रापि समवेतत्वमभावादिवारणाय। नन्विदमनित्यसामान्येऽव्याप्तमत आह–**सामान्यानीति**। संसारदशायां कस्यचिद्भेदकस्य सम्भवात्**प्रलय इति**। ननु तेषामपि भेदायान्येषामपि कल्प्यत्वेऽनवस्था स्यादित्यत आह–**तेषामिति**। वैधर्म्यव्याप्यत्वात् स्वतो व्यावृत्तत्वादित्यर्थः।

चषकम्

वक्ष्यमाणानित्यसामान्यस्याप्येवं व्यावर्त्तनाय तल्लक्षयति। **नित्यत्वे सतीति**।

संयोगव्यावर्त्तनाय **सत्यन्तम्**। अवृत्तिवारणाय वृत्ति**मत्त्वम्**। अभावव्यावर्त्तनाय सम्बन्धविशेषानु**धावनम्**। गगनादिपरिमाणादिव्यावर्त्तनाया**नेकेति**। सामान्यलक्षणेतिव्यवहारविषयस्याप्यनित्यसामान्यस्यालक्ष्यतां दर्शयति। **नित्यान्येवेति**। **अत** एव नित्यानित्यविभागोपेक्षा। **अतीन्द्रियवृत्तीनीति**। इन्द्रियविषयावृत्तीनीत्यर्थः। **नित्यद्रव्यवृत्तय इति**। द्रव्याणां विशेषैः परस्परं व्यावृत्तत्वे सिद्धे न तद्गुणानां विशेषवत्त्वमाश्रयभेदेनैव

भेदादिति सूचयितुं **द्रव्य**पदम्। **शब्द**नित्यज्ञानाभ्यामेवेश्वराकाशयोरितरभेदसिद्धौ न तत्र विशेष इत्य**प्याहु**:। अव्यावृत्तस्य कथं व्यावर्त्तकत्वमत आहा**न्त्या** इति व्यावर्त्तकान्तरनिरपेक्षा: स्वभिन्नलिङ्गजन्यव्यावृत्तिविशेष्य**घटा**दिविलक्षणा इति यावत् तथा च धर्मिग्राहकप्रमाणेन स्वतो व्यावृत्ता एव ते सिद्ध्यन्तीति भाव:। तदेवाह। **प्रलय इति** महाप्रलय इत्यर्थ:। अन्यदावयविनां तत्तदवयवसमवेतत्वेन परमाणूनां च तत्तत् क्रियावत्त्वेनापि भेदसम्भवाद्विशिष्टमुक्तम्।

आचार्यमते धूमवान् वह्निमानित्यनुमितौ धूमसमानकालीनत्वावच्छिन्न-वह्निसंयोग: संसर्गतया भासते। **अत** एव ज्ञायमानधूमजन्यत्वं तत्र तेषामनुमतमिति विरुद्धकालानवच्छिन्नव्याप्तिकाल्लिङ्गात् स्वसमानकालिकं साध्यं सिद्ध्यतीति भेदानित्यत्वशङ्काव्युदासार्थंपरं विशेषाणामावश्यकत्वं द्योतयितुं तावद्दूरानुधावनमिति भाव:। **वैधर्म्यव्याप्यत्वादिति** न हि स्वयमितरत्र वर्त्तमानमेवेतरव्यावृत्तये प्रभवतीति यो विशेषस्तद्वैधर्म्यमिति नियमात्तेषां स्वाश्रयस्येतरभेदसाधनफलकत्वमिति प्रघट्टकार्थ:। तथा च परमाणुषु द्विष्ठसंयोगाद्याश्रयत्वेन परस्परावृत्तिधर्माश्रयत्वे साधिते परमाणूनां विशेषाणां च भेदस्य क्रोडीकरणादित्याशय:।

तात्पर्यटीका

अनित्यसामान्यस्य सामान्यलक्षणापदार्थघटकानित्यसामान्यस्य। **एव**माकाशत्वादिवत्।

अतीन्द्रियवृत्तीनीतीति। इन्द्रियमतिक्रम्य वृत्तिर्येषामिति विग्रहादेवेन्द्रि-यविषयावृत्तित्वलाभात् परमाणुवृत्तिपृथिवीत्वस्य प्रत्यक्षत्वेऽपि नासङ्गतिरिति प्रघट्टकार्थ:। **अत्रा**व्यावृत्तस्वभावयोर्व्यावर्त्तकत्वायोगोऽस्वरस आहुरित्यनेन **सूचित**:। **ननु** विशेषा न द्रव्याणि गुणशून्यत्वादित्यनुमितिविशेष्यतया कथं वैलक्षण्यमत आह। **घटादीति**। तथा च व्यावृत्तौ स्वसजातीयभेदगोचरत्वमपि विशेषणमिति भाव:। **न चैवं** प्रतियोगिकोटौ स्वत्वनिवेशे समवायैकतावादिनामस्य स्वशब्देनानुपादेयतया तत्रातिव्याप्तिरिति **वाच्यम्**,

यतः स्वतो व्यावृत्ता एवेति लक्षणघटकस्य परतोऽव्यावृत्तत्वस्यैषा निरुक्तिरित्यतः स्वात्मकलिङ्गजन्यस्वसजातीय- भेदानुमितिविशेष्यत्वरूपविशेष्यदलेनैव तद्वारणान्न **च** द्रव्याणि विशेषादेः सजातीयानि पदार्थविभाजकोपाधेः परस्परव्यावृत्तत्वा**देतेन** समवायो न द्रव्यं तस्मादित्यनुमितिविशेष्यत्वेऽपि न **क्षतिः**। तत्तत् क्रियावत्त्वेनापी**त्यपिना** जात्याश्रयस्य रूपान्तरेण व्यावर्त्तकत्वाभ्युपगमेनापि न निस्तार इति सूचितम्।

अत एव धूमकालीनवह्निविशिष्टबुद्धित्वादेव लिङ्गात्। या यत्समानकालीनतया यद्विशिष्टबुद्धिः सा ज्ञायमानतद्विशेषणजन्येति व्याप्तेः। वह्निमान् वह्निध्वंसादित्यादौ स्वध्वंससमानकालीनवह्नेर्बाधादेव न तथानुमितिरिति सूचयितुं **विरुद्धकालावच्छिन्नेत्युक्तम्।**

तर्कामृतम्

स्वसम्बन्धिभिन्नो नित्यः सम्बन्धः समवायः। तेन स्वरूपसम्बन्धस्य संयोगस्य च निरासः। 'इह घटे घटत्वम्' इति प्रतीतिस्तत्र प्रमाणम्। नैयायिकमते समवायः प्रत्यक्षः, स च एको नित्यश्च।

तरङ्गिणी

तेन भिन्नत्वान्तेन। नित्यत्वस्य प्रयोजनमाह **संयोगस्येति**। तत्र समवाये। प्रमाणम्। अनुमानविधयेति शेषः। विशिष्टबुद्धेर्वैशिष्ट्यविषयत्वनियमादिति भावः।

चषकम्

क्रमेण विशेषणयोः फलमाह। **तेनेति**। तत्र प्रमाणमाह **इहेति**। गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद्दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानेन तत्साधनाद्वैशेषिकमते समवायो न प्रत्यक्षः सम्बन्धप्रत्यक्षं यावदाश्रयप्रत्यक्षस्य हेतुत्वादित्यत आह।

नैयायिकमत इति। स चैक इति। तस्या अनन्तस्वरूपविषयकत्वे गौरवादतिरिक्तैकविषयकत्वौचित्यादित्याशयः। **नचैवं** वायौ रूपवत्ताबुद्धिप्रसङ्ग इति **वाच्यम्**। रूपाभावात्। **सम्बन्ध** सत्त्वे कथं सम्बन्ध्यभाव इति **चेद्रू**पनिरूपितत्वविशिष्टसमवायाधिकरणताया रूपसम्बन्धत्वा**दित्थ**मेव पाकरक्ते श्यामनाशान्न तद्वत्ताबुद्धिः। **अत** एव नित्यस्याभावस्य वैशिष्ट्याख्यं सम्बन्धान्तरं नित्यमुक्तयुक्त्यास्त्विति शङ्का परास्**ता**। तथा सति भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात्। घटाभाववैशिष्ट्योर्नित्यैकयोस्तत्र सत्वा**दनि**त्यत्वे घटशून्ये देशेऽपि घटाभावप्रतीतेरनुपपत्तेः। अनेकत्वे लाघवानवकाशेन तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां सम्बन्ध इत्येव युक्तम्।

नव्यास्तु पृथिव्यां गन्धसमवायो न जले इति प्रतीत्या समवायस्य नानात्वमेवानुम**न्यन्ते। इद**मुपलक्षणम्। अयुतसिद्धयोरेव समवाय इत्यपि **बोध्यम्**। तौ चावयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति। **नन्वि**यं सङ्ज्ञा किं पारिभाषिक्युत यौगिकी **नाद्यो** महासङ्ज्ञाकरणा**न्नान्त्यो** योगार्थाप्रत्ययादिति। चे**दुच्यते**। युतमवयवादिमिः सम्बद्धं सिद्ध्यतीत्यर्थः। **न चैवं** नञुपादानं व्यर्थमिति **वाच्यम्**। यु मिश्रणामिश्रणयोरित्यनुशासनादमिश्रणं प्रकृते धात्वर्थ इत्यसम्बद्धं न सिद्ध्यतीत्यर्थलाभाय तदुपादाना**दन्यथा** संयोगिव्यावृत्यप्रतीते**स्तदुक्तम्**। ययोर्द्वयोर्मध्येऽविनश्यदेकमपराश्रितमेवावतिष्ठते तावयुतसिद्धाविति।

तात्पर्यटीका

इहेतीति। एतेन सन्निकर्षसत्त्वमादर्शितम्। **न प्रत्यक्ष इति। न च** बाधः। पृथिव्यां गन्धसमवायो न जले इति प्रत्यक्षानङ्गीकारादित्यनुपदं व्यक्तीभविष्यति। **हेतु**त्वादिति तत्कथमुच्यते इति प्रतीतिस्तत्र प्रमाणमितीति शेषः।

नैयायिकमत इति। न च सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात् कथं समवायस्य प्रत्यक्षमिति **वाच्यम्**। प्रमेयत्वसामान्यलक्षणाधीनसंयोगप्रत्यक्षे

व्यभिचारादिमौ संयुक्ताविति प्रत्यक्षस्याश्रयप्रत्यक्षं विनानुदयेन विलक्षणविषयताशालितत्प्रत्यक्षे तद्धेतुत्वाङ्गीकारेऽपि सम्बन्धविधया तत्प्रत्यक्षे एव तद्धेतुत्वमप्रामाणिकमिति का कथा समवायस्येत्याशयात्। **तस्या** इह घटे घटत्वमिति प्रतीतेः। **एवं** समवायस्य नित्यैकत्वयोरङ्गीकारे। **ननु** रूपप्रतियोगिकत्ववाय्वनुयोगिकत्वयोरवच्छेद्यावच्छेदकभावापन्नयोः समवायसम्बन्धत्वाङ्गीकारेणैव वायौ रूपवत्ताबुद्धिर्वारयितुं शक्यत इति विशिष्टाधिकरणताया रूपसम्बन्धत्वाङ्गीकारोऽनर्थक इति शङ्कायामाहे**त्थमेवेति**। विशिष्टाधिकरणतापर्यन्तस्य रूपसम्बन्धत्वाङ्गीकारेणैवेत्यर्थः। **अत** एव वक्ष्यमाणदोषादेव। घटसत्त्वे घटाभावासत्त्वादेव न तद्वत्ताबुद्धिरित्युक्ते त्वाह **नित्यस्येति**। अनन्तस्वरूपापेक्षया लाघवरूपपूर्वयुक्तिस्फोरणाय **नित्यमिति**। **तथा** सति वैशिष्ट्याख्यस्याभावसम्बन्धस्यातिरिक्तस्याङ्गीकारे सति। **अनि**त्यत्वे वैशिष्ट्यस्यैकस्यानित्यत्वे। एवमेकस्मिन्नधिकरणेऽपि प्रतियोग्यावापोद्वापाभ्यां वैशिष्ट्यस्यानेकत्वे तत्तदधिकरणस्वरूपसम्बन्धकल्पनापेक्षयापि गौरवं स्यादिति। भावः।

समवायप्रत्यक्षतावादिनां लाघवस्य प्रत्यक्षबाधितत्वावगमाय नानात्वमेवेत्येव**कारः**। अन्यथा न जल इति प्रतीत्यनुपपत्तेः। **महा**सङ्ज्ञान्वितार्थकानेकपदघटितसङ्ज्ञा। **करणा**त्सम्बन्धबोधनात्तेनानन्वितार्थकानेकपदघटिताश्वकर्णादिसङ्ज्ञाव्युदासः। कपालनाशनष्टघटस्य विनश्यतः कपलाश्रितत्वासम्भवादविनश्य**दित्युक्तम्**, तथा चाविनश्यतो यस्य समवायसम्बन्धव्यापको यन्निष्ठः स्वसम्बन्धस्ताविति फलितस्तस्यार्थोऽ**स्ति** हि यदा यदाऽविनश्यतो घटस्य समयसम्बन्धस्तदा तदा कपाले घटसमवाय इति **दिक्**।

तर्कामृतम्

ननु अन्यान्यपि अन्धकारसुवर्णादीनि द्रव्याणि सन्ति, आलस्यादयो गुणा अपि सन्ति, कथं नवैवेत्यादि। मैवम्। अन्धकारो न द्रव्यं किन्तु तेजोऽभावः। सुवर्णं तेज एव। आलस्यं कृत्यभाव एव। एवमन्यदपि बोध्यम्।

तरङ्गिणी

सुवर्णादीनीत्यादिपदाद्रजतादिपरिग्रहः। आलस्यादीत्यादिपदाद्रूक्षत्वादि-परिग्रहः। **तेजोऽभाव इति**। उद्भूतानभिभूतरूपा- लोकाभाव इत्यर्थः। **सुवर्णं तेज एवेति**। नच पीतरूपत्वानुपपत्तिः। तदुपष्टम्भकपार्थिवभागे एव तदभ्युपगमात्। न चाग्निसंयोगे सति पीतरूपनाशापत्तिः। द्रवीभूतसुवर्णरूपतेजः सम्बन्धस्य तत्र प्रतिबन्धकत्वाङ्गीकारात्। जलसंयोगस्येवाग्निसंयोगेऽपि पटादिपीतरूपनाशः। **कृत्यभाव इति।** प्रवृत्त्यभाव इत्यर्थः। रूक्षत्वं स्नेहाभावः। मृदुत्वकठिनत्वादिकमपि संयोगविशेषः स्पर्शविशेषो वा इत्यभिप्रेत्याह-**एवमिति**।

चषकम्

द्रव्याणीति। **तदुक्तं** तमः खलु चलं नीलं परापरविभागवत् प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमहर्तीति।

तत्र च कठिनाद्यन्यत्वे सति नलित्वादित्याशयेनोक्तं **नवभ्य** इति। **तेजोऽभावः** प्रकृष्टमहत्त्वोद्भूतानभिभूतरूपवत्तेजःसामान्याभावः। **न च** तमोऽभाव एव तेजः किं न स्यादिति **वाच्यम्।** उष्णस्पर्शानुपपत्तेः। **न च** तत्प्रतीतिर्भ्रम इति **वाच्यम्।** आश्रयासिद्ध्या तदसिद्ध्यापत्तेरसत्ख्यातिनिरासात्। प्रत्यक्षानुमितिशाब्दबोधहेतूनां सन्निकर्षव्याप्तिवृत्तीनामसत्यभावात्। **न च प्रतियोग्यप्रसिद्धिः**। सांसर्गिकविषयतामात्रस्य किञ्चित् प्रमात्वघटप्रकारता-निरूपित्वनियमबलेनार्थतस्तन्निरासात्। **अस्माकं** तु कज्जलादिप्रसिद्ध-नीलरूपस्य तमस्यारोपः सुवचः। **एतेन** तमसि कर्मप्रतीतिरपि व्याख्याता।

तस्याः प्रमात्वे आलोकापसारणौपाधिकत्वनियमव्यापकोपापत्तेः। **तेज एवेति**। पाकानुच्छेद्यद्रवत्वकत्वात्। **न च** पीतरूपानुपपत्तिः। उपष्टम्भकपार्थिवभागगतत्वात्। **एतेन** सुवर्णे न तेजो गुरुत्वाज्जलवदिति सत्प्रतिपक्षोऽपि निरस्तो वेदि**तव्यः**। **न चा**प्रयोजकत्वम्। पृथिव्यादिद्रवत्वस्याग्निसंयोगनाश्यत्वात्। **न च** पक्षतावच्छेदकस्य हेतुत्वे सिद्धसाध**नम्**। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात्। **यत्तु**

पीतरूपस्याश्रयेऽत्यन्ताग्निसंयोगे तन्नाशापत्तिर्द्रुतसुवर्णेन प्रतिबन्धादेव नेति तत्सिद्धिर्जलमध्यक्वथ्यमानपीतपटादौ पटविजातीयजलसंयोगस्यैव तथात्वदर्शनाद्रूपाभावेन वायोरद्रुतत्वादिति दिगि**ति।** तत्सुवर्णं तेज एवेति सन्दर्भविरोधादुपेक्षितम्। **कृत्यभाव**: प्रवृत्यभाव:। उक्तन्यायमन्यत्रातिदिशति। **एवमिति**। यथा रुक्षत्वं स्नेहाभावो जाड्यमान्द्यादयोऽपि ज्ञानक्रियाविशेषाद्यभाव एव। कठिनकोमलादि:स्पर्शविशेष एव। **भ्रमणा**दिगमनमेवेत्युक्तमधस्तात्।

तात्पर्यटीका

अवसितेऽभावनिरूपणे तद्विशेषविभागस्य युगपदेव न्यूनत्वमाशङ्कते **मूले** नन्विति। **परा**परविभाग: कालिकदैशिकपरत्वापरत्वविशेष:।

वैधर्म्यादिति। **ननु** नवभ्यो भेदसाधने दुर्लभो हेतुर्गन्धशून्यत्वे सति नीलत्वस्य निर्गन्धनीलघटे व्यभिचारित्वादत **आह कठिनाद्यन्यत्वे सतीति**। **आदि**ना चित्रकोमलपरिग्रह:। नि:स्पर्शपृथिव्यभावान्न कठिनाद्यन्यत्वे सति नीलत्वं **तथा** हेतुघटकविशेषणविशेष्यसहचारोऽपि प्रत्येकं त्रिविधस्पर्शवत्यपि भवतीति व्यभिचारो माभूदित्यादिपदं कूटतापन्नस्य हेतुघटकतां द्योतय**ति। स्पर्श**सामान्याभावस्याव्याप्यवृत्तेर्व्यभिचारसम्पादकतया पृथिवीत्वावच्छिन्नभेदस्य च साध्यघटकत्वेन न हेतुकुक्ष्यन्तर्भाव:। व्यतिरेकव्याप्तेर्ग्राह्यतया साध्यसाधनसहचाराग्रहेऽपि क्षतेरभावात्। नव्यास्तु गन्धशून्यत्वेन नीलत्वेन चान्वयिनैव पृथिवीभेदं जलादिभेदञ्च साधयन्ति। द्व्यणुकादिव्यावृत्तये महत्त्व**पर्यन्तम्**। त्रसरेणुव्यावृत्तये तत्रापि **प्रकृष्टे**ति। चक्षुर्वारणायोद्**भूतेति**। सुवर्णव्यावृत्तयेऽनभिभूतेति च रूपवि**शेषणम्** स्वमतेनैषानुपपत्तिरित्याहा**स्माकं त्विति। एतेन** नौकाकर्मणो वृक्षादाविवालोककर्मणस्तमस्यारोपसम्भवेन। **व्याख्यातेति**। सुप्रसिद्धस्य कर्मणस्तत्रारोपस्य सुवचत्वादिति भाव:।

प्रत्युत प्रमात्वमेव दुर्वचमित्याह। **तस्या** इति। स्वसामग्रीसिद्धालोकापसरणेनोपाधित्वनिश्चय इत्यत **आलोका**पसारणेति णिजन्तानुधावनं तेनान्वयव्यतिरेकप्रदर्शनेन तन्निश्चय: प्रदर्शित:। **न च** तस्य दोषविधया भवतां भ्रमहेतुत्वावश्यकत्वेऽस्त्वस्माकं प्रमाव्यञ्जकत्वमेवेति

वाच्यम्। व्यङ्ग्यकर्मतत्सहचरितगुणतदाश्रयतदारम्भकावयवपरम्परा तदुत्पादविनाशादीनां कल्पने महागौरवप्रसङ्गात्। **एतेन** गुरुत्वस्यापि पार्थिवभागगतस्य स्वरूपासिद्धिदोषेण। **पृथिव्या**दीत्यादिना जलपरिग्रहः। जलसंयोगस्य तत्र बाधादित्यमुमर्थं मनसि कृत्याह। **दिगिति**। **सन्दर्भविरोधादिति**। तेजस्त्वसाध्यताया एव ततः प्रतीतेरिति भावः। तदीयपक्षप्रसिद्ध्यर्थमेवैतदनुमानमिति **चेदोम्**। **भ्रमणादीति**। **एतेन** पूर्वपक्षस्थादिपदग्राह्यता पञ्चेत्यस्यापीति दर्शितम्।

तर्कामृतम्

अभावो द्विविधः—संसर्गाभावोऽन्योन्याभावश्च। आद्यस्त्रिविधः—प्रागभावः, ध्वंसः, अत्यन्ताभावश्च। प्रागभावो विनाशी अजन्यः। ध्वंसो जन्योऽविनाशी च[1]। अत्यन्ताभावान्योन्याभावौ[2] त्वजन्यौ अविनाशिनौ। योग्यानुपलब्ध्या अभावः प्रत्यक्षः;

तरङ्गिणी

योग्यानुपलब्ध्येति। यदभावप्रतियोगि तद्व्याप्येतरयावत्प्रति-योग्युपलम्भक- समवहिता प्रतियोग्यनुपलब्धिर्यत्र सम्भवति तत्र सोऽभावः प्रत्यक्षः।

चषकम्

अभाव इति। अभावत्वञ्च समवायेन सामानाधिकरण्येन वा सत्ताभावोऽनुगतोऽनुपस्थितः स्वरूपतः प्रकारोऽखण्डोपाधिर्वेत्यन्यदेतत्। **अत्यन्तान्योन्याभावाविति**। अत्यन्तः सदातनोऽभावोऽत्यन्ताभाव इत्यत्र समासे विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वक्तव्य इत्यनुशासनाद-

---

१. 'च' इति नास्ति।

२. 'अत्यन्तान्यो न्याभावालजन्याववविनाशिनौ' इति पाठान्तरम्।

भावपदलोपेऽत्यन्तेत्यस्य शिष्यमाणस्य लुप्यमानार्थाभिधायित्वव्युत्पत्तेः सदातनाभावेत्यर्थः। **न हि** रक्तकपालस्य कपालिका नीलावयवा भवतीत्यत्रापीयमेव गतिः नीला च नीलावयवा चेत्यर्थस्य विवक्षितत्वात्। अन्योन्याभाववारणायात्यन्तपदयोगोऽप्यादरणीयः। **स चान्तं** सहचारि स्वप्रतियोगिनिष्ठात्यन्ताभावप्रतियोगित्वमतिक्रम्य वर्त्तते तद्व्यभिचारीति यावदिति। **अस्ति** हि घटत्वेऽपि घटात्यन्ताभावो न चैतत् प्रतियोगिघटनिष्ठात्यन्ताभावप्रतियोगित्वं तत्रेति स तथा।

अत्रात्यन्तेत्यग्रे च भेदेति स्वजातीयाभावनिवेशाभिप्रायेण। साजात्यमपि तादात्म्यतदितरसम्बन्धावच्छिन्नप्रतियोगिताकत्वान्यतररूपेणेति सम्बन्धान्तरावच्छिन्नाभावो न सजातीयस्तेन परस्परलक्षणयोर्न परस्परातिप्रसङ्ग इति सर्वम**वदातम्। अन्योन्येति**। अन्योऽन्यं परस्परं वर्त्तमानोऽभाव इत्यर्थः। स्वव्यापकस्वप्रतियोगिनिष्ठभेदप्रतियोगित्वकोऽभाव इति यावत् **स च** तादात्म्यत्वेन तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताक एव भवति। संयोगसम्बन्धावच्छिन्नसंयोग्यत्यन्ताभाववारणाय **तादात्म्यत्वेनेति**। **योग्यानुपलब्ध्येति**। योग्या सहकारिसम्पन्ना यानुपलब्धिस्तयेत्यर्थः।

इन्द्रियसहकारिण्येति शेषः। तेन प्रमाणान्तरत्वशङ्काव्युदासः। **प्रत्यक्ष** इति। **एते**नाभावोऽधिकरणात्मक इति प्रत्यु**क्तम्**। तथा सति रसगन्धशब्दाद्यभावानामधिकरणस्य तत्तदिन्द्रियाग्राह्यतया प्रत्यक्षानुपपत्तेः।

तात्पर्यटीका

समवायेन सामानाधिकरण्येन वेति। समवायसामानाधिकरण्यान्यतरेणेत्यर्थः। समवायेन सत्ताभावस्य सामान्यादौ सामानाधिकरण्येन तदभावस्य प्रसिद्धावपि गगनादावतिप्रसक्तत्वादन्यतरत्वेन सम्बन्धत्वे मानाभावाच्चाहाखण्डोपा**धिर्वेति। इयमेवेति। पर**न्तु तत्रोत्तरपदलोपोऽत्र च पूर्वपदलोप इति विशेषः। **विवक्षितत्वादिति**। अत्र नीलकपालिकारूपार्थस्य कैमुत्येनावगम्यमानतया मास्तु पदावगम्यता। **न च** नीला न भवतीति प्रस्तुतं हित्वा कुतोऽप्रस्तुतप्रशंसेति **वाच्यम्**। प्रस्तुततात्पर्यकतया अर्तिलगवे

धुकस्तुतिरिव पयोविधिशेषतयेत्यपि **वदन्ति। सहचारीति**। घटात्यन्ताभावाधिकरणे पटे घटनिष्ठात्यन्ताभावप्रतियोगित्वमस्तीति योग्यतासहकृततात्पर्यबलाल्लक्षणया तदेव प्रकृतेऽन्तपदेन विवक्षितमित्याह **स्वप्रतियोगीति। न चेति**। विशेषनिषेधस्य शेषाभ्यनुज्ञाफलकत्वेन भूतलादौ तयो: सामानाधिकरण्य- मभिप्रेतमिति **बोध्यम्**।

ननु घटासमवायिनि घटत्वेऽपि घटनिष्ठभेदप्रतियोगित्वात्कथं तत्र तद्व्यभिचारो**ऽपि** च घटभिन्नेऽपि घटत्वे घटनिष्ठात्यन्ताभावप्रतियोगित्वं नास्त्येवेति कथं तत्र तद्व्यापकतेत्याशङ्क्याहा**त्रेति। नन्वि**त्थमपि कथं घटत्वे व्यभिचार: घटासमवायिनि घटत्वे घटनिष्ठसंयोगसम्बन्धा-वच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वादत आह **न सजातीय इति**। तथा च संयोगसमवायावच्छिन्नप्रतियोगिताकत्वस्याप्येकैकवृत्ते: साजात्याप्रयोजकत्वादिति भाव:। **ननु** संयोगेन घटात्यन्ताभावे न घटनिष्ठात्यन्ताभावप्रतियोगित्वव्यभिचार: घटेऽपि संयोगेन घटत्वस्याभावसत्त्वात् संयोगेन घटवृत्तेरपि पटस्याव्याप्यवृत्तितया घटेऽभावसत्त्वादत आह। **सर्वमवदातमिति। अयं** भाव:। स्वप्रतियोगिनिष्ठात्यन्ताभावप्रतियोगित्वमित्यस्य स्वप्रतियोगिनिरूपितनिरवच्छिन्न-वृत्तिकाभावप्रतियोगित्वमित्यर्थस्य स्फुटमवगमादेतद्दोषस्यानुद्भाव्यत्वादिति। **नन्व**भावो न यदार्थान्तरं मानाभावा**न्न**हीन्द्रियेणाभावो गृहीतुं योग्य: प्रत्यक्षविषयताया: सन्निकर्षव्याप्यत्वादभावे च तदसम्भवात्। **न च** समवायप्रत्यक्षानुरोधेन विशेषणताया: सन्निकर्षत्वस्य क्लृप्ततया तेनैवाभावप्रत्यक्षमुत्पत्स्यत इति **वाच्यम्**। समवायानभ्युपगमात्। भूतले घटो नास्तीत्यस्य भूतले घटं न पश्यामीत्यर्थकत्वाद्दर्शनाभाव-श्चात्मैवा**तएव**ानुपलब्धिप्रमाणान्तरकोऽभाव इति भट्टास्तद्दूषयितुमाह **योग्या** सहकारिसम्पन्नेति।

ननु योग्यानुपलब्धेरभावप्रत्यक्षहेतुत्वे तस्या: प्रमाणान्तरतापत्तिर्मनो यदसाधारणं सहकार्यासाद्य बहिर्गोचरां प्रमां जनयति तत् प्रमाणान्तरमिति नियमादत आहे**न्द्रिय**सहकारिण्येति शेष इति। तथा च सन्निकर्षान्तरेणैवोपपत्तौ न प्रमाणान्तरं युक्तमिति भाव:। आलोकादे: प्रमाणान्तरत्ववारणाय प्रमाणान्तरासहकारित्वस्य सहकारिविशेषणत्वावश्यकतया न तस्यास्तथात्वमित्याह। **तेनेति**। अधिकमग्रे· वक्ष्याम:।

तर्कामृतम्

अन्यत्र तु अतीन्द्रिय:[१]।

तरङ्गिणी

अन्यत्र। यत्रेदृशप्रतियोग्यनुपलब्धिर्न सम्भवति तत्रेत्यर्थ:, यथा भूतले घटाभाव:। घटतद्व्याप्यघटेन्द्रियसंयोगातिरिक्त घटोपलम्भकानि आलोकसमवधानादीनि। तत्सहितघटानुपलम्भे घटाभाव: प्रत्यक्ष:। पिशाचाभावस्त्वतीन्द्रिय:। प्रतियोग्युपलम्भकस्योद्भूतरूपस्याभावात्। एवमन्यत्रापि यथानुभवमूह्यम्।

चषकम्

अन्यत्र सहकारिसमवधानाभावे। यथालोके घटानुपलम्भेऽभावोपलम्भो नान्धकारे घटानुपलम्भेऽपि। **तदुक्तम्**। योग्यत्वं च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वमिति। यादृशोपलम्भाभावस्य प्रतियोगी ह्युपलम्भो यादृशाभावप्रतियोगिन: सत्त्वप्रसक्त्या प्रसञ्जितो भवति स उपलम्भाभावस्तदभावप्रत्यक्षे योग्य इति तदर्थ:। **न च** यत्र तदापादकिकापत्तिर्नोत्पन्ना तत्राभावप्रत्यक्षानुपपत्तिरिति **वाच्यम्**। तदधिकरणकारोपविषयप्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकत्वस्य प्रतियोग्युपलम्भे विवक्षितत्वात्। **न च** केवलप्रतियोगिसत्त्वं नोपलम्भव्याप्यं **किन्तु** महत्त्वोद्भूतरूपालोकसंयोगाद्यवच्छिन्नमिति तादृशव्याप्तिनिरूपकत्वं जलपरमाणौ पृथिवीत्वानुपलम्भस्य प्रतियोगिन्यपीति तत्र तदभावप्रत्यक्षापत्तिरिति **वाच्यम्**। तदधिकरणवृत्तिधर्मानवच्छिन्नत्वस्य व्याप्तौ निवेशात्।

न चैवमपि गन्धवदणुभिन्नत्वविशिष्टस्यापि पृथिवीत्वस्य तदुपलम्भव्याप्यत्वात्तद्दोषतादवस्थ्यमिति **वाच्यम्**। प्रतियोगिग्राहकाति-

---

१. 'व्याख्याता: पदार्था:' इति अधिक: पाठ:।

रिक्तानवच्छिन्नत्वस्यापि तत्र निवेशात्। **ननु** सन्निकर्षघटकमहत्त्वादीनामपि न प्रतियोगिग्रहजनकत्वमवच्छेदकसाधारणस्य तस्य विवक्षायां गन्धवदणुभिन्ना पृथिवीति विशेष्यतावच्छेदकधीमूलकस्य गन्धवदणुभिन्ना पृथिवी प्रकृष्टमहत्त्ववतीति प्रत्यक्षस्य जनकतावच्छेदकत्वं प्रकृतेऽपि दुर्वारमिति **चेन्न**। प्रतियोगिप्रकारतानिरूपितलौकिकविशेष्यताविरह प्रयोजकाभावप्रतियोगित्वस्य च तद्ग्राहकत्वस्य गन्धवदणुभिन्नत्वेऽभावात्। निरुक्तविशेष्यताविरहिणि जलपरमाणौ गन्धवदणुभिन्नत्वस्यैव सत्त्वेन तत्र महत्त्वाभावस्य प्रयोजकत्वावश्यम्भावे तादृशे पृथिवीपरमाणौ सतोऽपि गन्धवदणुभिन्नत्वाभावस्य तदप्रयोजकत्वात्। **नन्वे**वं स्तम्भे पिशाचत्वाभावप्रत्यक्षं न स्यादुक्तप्रतियोग्युपलम्भस्यैवाप्रसिद्ध्या योग्यानुपलम्भाभावादिति **चेद्यो**ग्यस्याभावस्य प्रत्यक्षे सा योग्यता।

अनयैव परमाण्वादौ महत्त्वाद्यभावप्रत्यक्षस्योपपत्तिः। रूपसत्त्वनिष्ठव्याप्तेः रूपेणेव महत्त्वसत्त्वनिष्ठव्याप्तेर्महत्त्वेनाप्यनवच्छेदात्। **न तु** वक्ष्यमाणाया परमाण्वधिकरणीयत्वव्यापकोपलम्भाप्रसिद्धेः। **अयो**ग्यस्याभावस्य प्रत्यक्षे तु तदधिकरणीयत्वप्रसञ्जनप्रसञ्जितप्रतियोगिकस्तदधिकरणवृत्तित्वीयलौकिकोपलम्भस्य विषयतासम्बन्धावच्छिन्नाभाव एव प्रतियोगिनिष्ठो हेतुः। **अत्रा**प्यापादनस्य सर्वत्रासम्भवात्तदधिकरणीयत्वप्रसञ्जनप्रसञ्जितत्वं तदधिकरणीयत्वनिष्ठव्याप्तिनिरूपकत्वं **बोध्यम्।**

न च जातित्वविशिष्टस्य तेजो वृत्तित्वस्योपलम्भव्याप्यत्वात्तेजसि गुरुत्वाभावस्य प्रत्यक्षत्वापत्तिः। **एवं** जातित्वविशिष्टस्य स्तम्भवृत्तित्वस्याप्युपलम्भव्याप्यत्वात् स्तम्भे पिशाचाभावस्यापीति **वाच्यम्।** पूर्ववद्योग्यताघटकव्याप्तौ प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वस्य निवेशाज्जातित्वस्य च पिशाचगुरुत्वाद्यवृत्तित्वेनोक्तापत्त्यसम्भवात्। **इत्थञ्च** पिशाचत्वरूपाया अयोग्याया अपि जातेरभावस्य स्तम्भे प्रत्यक्षं सूपपदम्। **यद्य**पि गुरुत्वादिकं पदयोग्यं तदभावस्तु न प्रत्यक्ष इत्येतावतैव तदभावप्रत्यक्षवारणं सुकरं **तथा**पि पिशाचत्वाभावस्य योग्य इवायोग्ये प्रत्यक्षस्य वारणाय द्वितीययोग्यानुपलब्धेर्हेतुताप्यवश्यं वाच्या यस्या अभावात् परमाणौ

पिशाचत्वाभावप्रत्यक्षवारणम्। जातित्वविशिष्टपरमाण्वधिकरणीयत्वीयोक्तोपलम्भाप्रसिद्धेरिति **ध्येयम्**।

वस्तुतस्तु संसर्गाभावप्रत्यक्षे योग्यमात्रप्रतियोगिकत्वे सति योग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वम्। अन्योन्याभावप्रत्यक्षे चाधिकरणयोग्यतासहितं जात्यवच्छिन्नप्रतियोगितांकत्व-जात्यतिरिक्तयोग्यधर्मावच्छिन्नप्रतियोगिताकत्वान्यतरदेव तन्त्रमित्यलं पल्ल**वितेन। व्याख्याता** वैशेषिकमतं सङ्गृह्य।

तात्पर्यटीका

सत्त्वप्रसक्त्येति। यद्धर्मावच्छिन्ने सत्त्वप्रसक्त्येत्यर्थः। **एतेन** तद्धूमत्वावच्छिन्ने वह्न्यभाववदवृत्तित्वे गृह्यमाणे वह्निशून्यदेशवृत्तिधूमान्तराकल्पना- लाघवबलाद्धूमत्वावच्छेदेनैव गृह्यत इत्यस्याव्याप्तेर्लौकिकाध्यक्षविषयता सम्भवतीति ब्रुवन्तः **परास्ताः**। प्रतियोगिसत्त्वप्रसञ्जने उपलम्भापत्तिफलोपहितत्वं विवक्षितमित्यभिप्रायिकां शङ्कां वारयति। **न चेति**।

तद्दोषतादवस्थ्यमिति। गन्धवदणुभिन्नत्वस्य जलपरमाणावपि सत्त्वेन तदवृत्तिधर्मानवच्छिन्नत्वस्य तदवच्छिन्नायामपि व्याप्तौ सत्त्वादिति भावः। **न प्रतियोगिग्रहजनकत्वमिति**। तेषां सन्निकर्षघटकत्वेनान्यथासिद्धत्वादिति भावः। **तस्येति** जनकत्वस्येत्यर्थः। तथा च कारणतावच्छेदकव्यावृत्तान्यथासिद्ध्यवच्छिन्नभेद एव तत्र घटक इत्याशयः। **प्रकृतेऽपीति**। गन्धवदणुभिन्नत्वस्य विशेष्यतावच्छेदकप्रकारकनिर्णयनिष्ठजनकतावच्छेदकत्वावश्यम्भावादिति भावः। **एवं** प्रतियोगिग्राहकत्वस्योक्तरूपत्वे। **उक्त**प्रतियोग्युपलम्भस्य लौकिकप्रतियोग्युपलम्भस्य **योग्यस्याभावस्येति**। **न चैवं** गुरुत्वाभाववारणेऽपि पिशाचत्वाभावो न वारितः स्तम्भे पिशाचत्वाभावप्रत्यक्षोदयादिति **वाच्यम्**। योग्यस्याभावस्येति न समानाधिकरण**मपि**तु योग्यप्रतियोगिकाभावार्थकमिति सर्वसामञ्जस्यात्।

ननु पिशाचत्वाभावस्यायोग्ये प्रत्यक्षस्य वारणाय क्लृप्तहेतुभावया वक्ष्यमाणयोग्यानुपलब्ध्यैवान्धकारादौ घटाभावप्रत्यक्षवारणे किमर्थमुक्तयोग्यानुपलब्धेर्हेतुत्वं कल्प्यते इत्यत आहा**नयेति**। **ननु** महत्त्वस्य परमाण्ववृत्तितया तदवच्छिन्नव्याप्ते: कथं तदधिकरणावृत्तिधर्मानवच्छिन्नत्वमत आह। **रूपसत्त्वनिष्ठव्याप्तेरिति**। तेन वायौ रूपाभावप्रत्यक्षोपपत्ति: दर्शिता। **महत्त्वेनापीति**। वायुपरमाण्वो: रूपमहत्त्वयोरभावेनैव महत्त्वावच्छिन्नरूपसत्त्वे रूपावच्छिन्नमहत्त्वसत्त्वे वोपलम्भव्याप्तेरवैकल्येन महत्त्वाद्युपलम्भव्याप्यतावच्छेदककोटौ महत्त्वादिप्रवेशे प्रयोजनाभावादिति भाव:। **ननु** जलपरमाणौ गन्धाद्यभावप्रत्यक्षवारणाय वक्ष्यमाणयोग्यानुपलब्धेरेव कारणत्वमुच्यतां तावतैव परमाणौ महत्त्वाभावप्रत्यक्षमुपपत्स्यत इति शङ्कामपाकर्त्तुमाह। **न त्विति**। ननु योग्यस्याभावस्य प्रत्यक्षे सा योग्यतेत्युक्त्याऽयोग्यस्याभावस्य प्रत्यक्षे न सा हेतुरित्यायातं तथा च परमाणावपि पिशाचत्वाभावप्रत्यक्षापत्ति परमाण्वन्तर्भावेण संयुक्तविशेषणताया: सत्त्वादत आह **अयोग्यस्याभावस्येति**। इदमपि न समानाधिकरणं प्रत्यक्षेत्वित्यसम्बद्धप्रलापापत्ते:। अनयैव स्तम्भेऽपि पिशाचत्वाभावप्रत्यक्षमुपपद्यते। तच्चाग्रे व्यक्तीकरिष्यते। न तु पूर्वया प्रतियोगिसत्त्वव्यापकोपलम्भाप्रसिद्धे:।

केवलतदधिकरणीयत्वे उपलम्भव्याप्तिर्नास्त्येव तत्तदधिकरणवृत्तेर्गुरुत्वस्यानुपलम्भात् कथञ्चिद्व्याप्तेर्घटकत्वे त्वाह। **न चेति**। गुरुत्वाभावस्यायोग्यत्वेनापि न प्रत्यक्षापत्तिसम्भव इत्यत आह। **एवमिति**। **पिशाचाभावस्यापीति**। **प्रत्य**क्षापत्तिरित्यनुषज्यते। अनुपलम्भस्य यन्निष्ठप्रत्यासत्या हेतुत्वं तदवृत्तिधर्मानवच्छिन्नत्वं तत्र व्याप्तौ निवेशनीयमिति दर्शयति। **पूर्ववदिति**। **इत्थञ्च** पिशाचत्वरूपप्रतियोगिवृत्तिजातित्वविशिष्टस्तम्भवृत्तित्वस्योपलम्भव्याप्यत्वे च, जातेरित्यनेन जातित्वस्य प्रतियोगिवृत्तित्वप्रदर्शनेन व्याप्तौ तद्व्यतिरिक्तधर्मानवच्छिन्नत्वमादर्शितम्। तादृशोपलम्भस्य विषयतया स्तम्भत्वे प्रसिद्धस्याभाव: पिशाचत्वे प्रतियोगिनि सुलभ इत्याह **सुलभमिति**। **इत्येतावतैवेति**। प्रत्यक्षे विषयस्य हेतुत्वाद्विषयत्वस्य लौकिकविषयतया प्रत्यक्षवत्त्वात्मकत्वादिति

भावः। **उक्तोपलम्भेति** लौकिकोपलम्भेत्यर्थः। **अप्रसिद्धेरिति**। परमाणोरतीन्द्रियत्वेन तद्घटितस्यास्याप्यतीन्द्रियत्वादिति भावः।

योग्येऽभावेगृह्यमाणे योग्यस्य प्रतियोगिनोऽनुपलम्भो योग्यसन्निकर्षस्य सहकारीत्येतावतैव सर्वं समञ्जसम्। सन्निकर्षयोग्यत्वञ्च प्रतियोगिव्यतिरिक्त तदुपलम्भकयावत्समाधानम्। तावतैव परमाण्वादौ महत्त्वाद्यभावस्य प्रत्यक्षं न पिशाचत्वाद्यभावस्येति किमनुपपन्नमित्यभिप्रेत्याभावयोग्यता नानैवेत्याह **वस्तुतस्त्विति**। द्रव्यसामान्याभाववारणाय **मात्रेति** सत्यन्तघटकम्। गुरुत्ववद्घटात्यन्ताभाववारणाय विशेष्य**दलम्**। रूपगुरुत्वान्यतरावच्छिन्नाभाव-वारणाय तत्रापि **मात्रेति**। अधिकरणयोग्यतायाः सन्निकर्षघटकत्वावश्यकत्वेन नात्र घटकता पृथग्वक्तव्या **कथम**न्यथा परमाणौ पिशाचत्वात्यन्ताभावपिशाचभेदयोः प्रत्यक्षस्य वारणम्। **यथो**क्ते त्वाद्ये पिशाचत्वस्य प्रतियोगिनोऽन्त्ये परमाणोरधिकरणस्यायोग्यतया वारणमित्यभिसन्धायोक्तमित्यलं पल्लविते**नेति**। तेन स्तम्भे पिशाच-तद्वतोरन्योन्याभावयोः प्रत्यक्षाप्रत्यक्षत्वे इति फलतीति भावः। नैयायिकमतानुसारेण प्रमाविभजनात्तन्मतानुसारेणैव पदार्था व्याख्याता इति विपरीताशङ्कां वारयितुं पूरयति। **वैशेषिकमतमिति**। **सङ्गृह्य** सङ्क्षिप्तं नैयायिकानामप्यविरुद्धमादृत्य। **व्याख्याता** इत्यनेन पदार्थनिरूपणे संस्थिते प्रमानिरूपणप्रतिबन्धकपदार्थनिरूपणजिज्ञासानिवृत्तिर्दर्शिता।

तर्कामृतम्

अथ प्रमा कथ्यते। सा चतुर्विधा, प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणानि प्रमाणानि चत्वारि–प्रत्यक्षानुमानोपमानशब्दभेदात्। तत्र प्रत्यक्षं द्विविधम्–निर्विकल्पकम्, सविकल्पकं च।

तरङ्गिणी

निर्विकल्पकमिति। इदं च अतीन्द्रियं विशिष्टबुद्धिरूपकार्यानुमेयम्।

चषकम्

प्रमा यथार्थोऽनुभवः। स च प्रत्यक्षमेवेति चार्वाकाः। अर्थापत्तिरपीति प्राभाकरास्तदयुक्तमिति दर्शयितुमाह। **चतुर्विधेति**। वह्न्यभावव्यापकाभावप्रतियोगिनि वृत्तिमत्यवश्यम्भाविनः स्वव्यापकवह्निसामानाधिकरण्यस्यावगाहिनो धूमादिदर्शनाज्जायमाने ज्ञाने सर्वानुभवसिद्धस्यानुमितित्वस्यैवानुभवबलेनान्यथा वा गृह्यमाणमर्थापत्तावनुमितित्वमर्थापत्तिर्नानुमितिरिति बाधानवतारादबाधितमेव **कथ**मन्यथा चेष्टायाः प्रामाणान्तरत्ववारणमित्याशयः।

स्मृतिव्यावर्त्तनप्रयोजनं स्पष्टयति। **तत् करणानीति**। **तस्याः** प्रमायाः। **चत्वा**रि चत्वार्येव। तथा च प्रमाणान्तरासहकारि यदसाधारणं सहकार्यासाद्य मनो बहिर्गोचरां प्रमां जनयति नियतव्यापारसम्भवे तत् प्रमाणान्तरमिति व्याप्तेरनुभवस्य संस्कारनियतव्यापारकस्य प्रमाणान्तरत्वं माभूदिति स्मृतिव्यावर्त्तनमितिभावः। **एते**नोपनयमासाद्य मनसो बहिरर्थप्रमापकत्वे उपनयस्य प्रमाणान्तरतापत्तिः **परास्ता**। धूमवान् पर्वतो वह्निमानिति वह्न्युपनीतभाने धूमरूपधर्मितावच्छेदकधीमुद्रया अपेक्षिताया अप्येकसम्बन्धिज्ञानाधीनापरसम्बन्धिस्मृतेर्व्यभिचारेणाव्यापारत्वादिति **दिक्**।

अत एव गृहीतग्राहिणश्चक्षुरादेस्तत्तत्प्रमाणेऽन्तरभावसम्भवात्तत्प्रमाव्यावर्त्तकमप्यनधिगतार्थगन्तृत्वमुपे**क्षितम्**। सर्वांशे प्रमानङ्गीकारेऽपि यद्यस्य यद्वत्ताप्रमां जनयति तत्तस्य तदवत्त्वे प्रमाणमित्युच्यत इति लक्ष्यभेदेन लक्षणभेदाद्विशेषलक्षणातिप्रसङ्गवारणाय पुनः प्रपदमुपात्तमिति **मन्तव्यम्। तत्र** प्रमासु मध्ये। **प्रत्यक्षं** प्रत्यक्षफलम्। **द्विविधमिति**। **तथा** च सूत्रम्। **इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञान मव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति**। **तस्यार्थः**। इन्द्रियोत्पन्नमित्युक्ते मनो जन्यानुमितावतिव्याप्तिरिति सन्निकर्षोपा**दानम्**। तथाप्यात्ममनः सन्निकर्षजन्यतया तत्रातिव्याप्तितादवस्थ्यमित्यर्यमाणार्थकार्थ**ग्रहणम्**[1]। तथा चेन्द्रियार्थसन्निकर्षत्वेन यत्र ज्ञाने कारणत्वं

---

१. गुणपूर्वकस्त्ररगतिधातुः

तत् प्रत्यक्षमिति फलितम्। **तेन** सिषाधयिषाधीनस्वात्मानुमितौ मनोयोगत्वेन तस्य हेतुत्वेऽपि नोक्तातिव्याप्तेरशक्यवारणता।

भ्रमवारणायाव्**यभिचारीति**। व्यधिकरणप्रकारकं यन्न भवतीत्यर्थः। निर्विकल्पकसाधारण्यस्यावगतये विभागमध्ये विशेषणस्यान्तर्भावः। तद्विभजते। **अव्य**पदेश्यमिति। कणादं कणादनामानमित्यर्थकथनात् पदवाच्यत्वं विशिष्टज्ञाने उपनीतं भासत इति प्राचां मतस्यानुसारेण पदवाच्यत्वानर्हं निर्विकल्पकमित्यर्थः। **नव्या**स्तु व्यपदेशं शब्दप्रयोगमर्हतियोग्यं भवति योग्यता च विशिष्टज्ञानत्वं तच्छून्यं निष्प्रकारकादीत्यर्थमाहुः। **व्यवसायात्मकमिति**। सप्रकारकज्ञानात्मक-मिति यावत्।

तात्पर्यटीका

अधुना यदुक्तं प्रमा वक्ष्यत इति तस्यायमवसर इत्याहा**थ प्रमेति**। तत्र शास्त्रीयप्रमापदव्यवहार्यतावच्छेदकं दर्शयति **प्रमा** यथार्थोऽनुभव इति। वह्न्यभावव्यापकाभावप्रतियोगि गगनमपि न च तद्व्यापको वह्निर्नवा वह्निसमानाधिकरणं गगनमिति तद्वारणाय वृत्तिमती**त्युक्तम्। अवश्य**म्भाविन इत्यनेन स्वव्यापकेत्यादिव्याप्त्यनुमितिसामग्री दर्शिता अनुमितव्याप्तिविशिष्टस्य पक्षधर्मताग्रहं दर्शयति। **धूमादिदर्शनादिति**। **अनुभवबलेनेति**। स्वमते। मीमांसकमतेऽप्याहा**न्यथा वेति**। प्रमित्यन्तराकल्पनेनैव प्रमित्यन्तर-सामग्र्यसम्बलने परस्परप्रतिबन्धकत्वाकल्पनालाघवबलेन वेत्यर्थः। **अर्था**पत्तौ वह्न्यभावव्यापकाभावप्रतियोगिमत्ताधीजन्यवह्निबुद्धावपि अनुमितित्वग्रहे प्रामाण्यग्राहकमपि नास्तीत्याहा**र्थापत्तिरिति**। **अबाधितमेवेति**। तथा चान्वयव्यतिरेकव्याप्तिघटितानुमितिसामग्रीभेद आवश्यक इत्याशयः। अत्रोपष्टम्भकमाह **कथमन्यथेति**। **तत्रापि** चेष्टाया वा चेष्टोपस्थित-शब्दाद्वार्थोपस्थितेस्तुल्यत्वादित्याशयः।

स्मृतीति। अनुभवत्वघटनया स्मृतेः प्रमाबहिर्भावस्य यत्प्रयोजनं प्रमाणचातुर्विध्यं तदित्यर्थः। प्रमासम्बन्ध्यभेदस्य समासार्थस्य लक्षणघटकत्वं

नास्तीत्यभिप्रायेण व्यासवाक्यमादर्शितम् **तस्या** इत्यनेन। **चत्वार्येवेति**। अन्यथानुभवः पञ्चमं प्रमाणं स्यादित्यर्थः। आलोकस्य प्रमाणान्तरत्ववारणाय **प्रमाणान्तरासहकारीति**। शरीरवारणाया**साधारणमिति**। तत्त्वञ्चानुभवत्वव्याप्य-जातिघटितधर्मावच्छिन्नं प्रति कारणत्वम्। तेन शरीरस्य जन्यज्ञानजनकस्य व्यावृत्तिः। **जात्य**वच्छिन्नेति विहाय जातिघटितधर्मावच्छिन्नेति कारणाच्च पक्षीकृतव्याप्तिस्मरणस्योपनीतभानरूपप्रत्यक्षविशेषे हेतुत्वेनैव सङ्ग्रहसम्भवात् प्रत्यक्षत्वावच्छिन्नं प्रत्यजनकत्वेऽपि नासिद्धिरित्यव**धेयम्**। **एतेन** नियतव्यापारसत्त्वे एव प्रमाणान्तरत्वप्रसङ्गेन। **एकसम्बन्धीति**। एकस्य सम्बन्धिनो वह्नेर्यदुपनायकं ज्ञानं तज्जन्याया अपरस्य सम्बन्धिनो धूमस्य स्मृतेरित्यर्थः। **व्यभिचारेणेति**। वह्निधूमज्ञानयोः क्रमानियमादित्याशयः। **किम्** वालोकादेरपि प्रत्यक्षप्रमाणेऽन्तर्भावात्तद्वारणाय प्रमाणान्तरासहकारीति न देयमित्याह। **दिगिति**।

अत एव प्रमाणान्तरताया अप्रसङ्गादेव। **ननु** प्रपदमनर्थकं सर्वं ज्ञानं धर्मिण्यभ्रान्तमित्युक्तत्वाद्भ्रमकरणस्यापि प्रमाकरणतया लक्ष्यतायाः सर्वसम्मतत्वात्। **न च** यत्रान्यदीयेदन्त्वेनावगतायां शुक्तौ रजतत्वभ्रान्तिस्तस्या उक्तिमात्रेण निराकर्त्तुमशक्यतया तद्वारणायैव तदिति **वाच्यम्**। कस्यापीदन्त्वस्य ग्रहे प्रवृत्तिनिवृत्त्युपधायकताविशेषानवधारणेन तादृशभ्रान्तिहेतुदोषाकल्पनादत आह **सर्वांश इति**। **विशेषलक्षणेति**। तथा चेदं रजतमिति भ्रान्त्युपधायके चक्षुषि रजतत्वांशे प्रमाणतापत्तिवारणायैव तदित्यर्थः। **तेन** सन्निकर्षत्वावच्छिन्नकारणत्वविवक्षणेन।

निर्विकल्पकसाधारण्यस्येत्यतः पूर्वं विशेषणस्येत्यनुषञ्जनीयं तेन कस्य साधारण्यमित्याशङ्कावारणमिति तत्राव्याप्तिशङ्कानिरासः। यादृच्छिक-शब्दातिरिक्तशब्दजन्यशाब्दबुद्धीनामेव पदवाच्यत्वभाने मानाभावः। कैव कथान्यासां विशिष्टबुद्धीनामित्यस्वरसं हृदि निधाय मतान्तरमाह। **नव्यास्त्विति**। **निष्**प्रकारकादीत्यादिना निर्विशेष्यकनिःसंसर्गकपरिग्रहः तच्च लक्षणत्रयं **बोध्यम्**।

तर्कामृतम्

प्रत्यक्षकरणानि षडिन्द्रियाणि– घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि। एतानि संनिकर्षसहितानि प्रत्यक्षं जनयन्ति। संन्निकर्षश्च[१] लौकिकोऽलौकिकश्च, अलौकिकस्त्रिविध:–ज्ञानलक्षणा[२], सामान्यलक्षणा, योगजधर्मश्च। लौकिक: षड्विध:–संयोग:, संयुक्तसमवाय:, संयुक्तसमवेतसमवाय:, समवाय:, समवेतसमवाय:, विशेषणता चेति। संयोगेन द्रव्यग्रह:[३], संयुक्तसमवायेन शब्दान्यगुणकर्मद्रव्यवृत्तिजातीनां प्रत्यक्षम्, संयुक्तसमवेतसमवायेन शब्दमात्रवृत्तिजातीतरगुणवृत्तिकर्मवृत्तिजातीनां[४] प्रत्यक्षम्, समवायेन शब्दस्य[५], समवेतसमवायेन शब्दवृत्तिजातीनां[६], विशेषणतया अभावस्य समवायस्य च प्रत्यक्षम्।

तरङ्गिणी

घ्राणेत्यादि। चक्षुस्त्वङ्मनसां द्रव्यग्राहकत्वमपि। इतरेषां न द्रव्यग्राहकत्वम्। सूचीकटाहन्यायेनाह–**लौकिक इति।** ज्ञानलक्षणा तत्तत्पदार्थविषयकं ज्ञानम्। सामान्यलक्षणा सामान्यविषयकं ज्ञानम्। योगजधर्म: योगाभ्यासजन्यादृष्टविशेष:। **शब्दान्येत्यादि**। शब्दान्यगुणा: कर्म च द्रव्यवृत्तिजातयश्चेति। शब्दस्य समवायेनैव ग्रहात्त**दन्येति**। **शब्दमात्रवृत्तिजातीतरेति**। शब्देतरावृत्तिजातीतरेत्यर्थ:। शब्दभिन्नगुणवृत्तिजातीति पर्यवसितोऽर्थ:। शब्दवृत्तीति। तेन शब्दत्वमन्द्र- त्वतारत्वसङ्ग्रह:। यद्यपि घटपटादीनां संयुक्तसमवायेन ग्रह: सम्भवति, तथापि आत्मग्रहार्थं संयोगस्य प्रत्यासत्तित्वमावश्यकम्।

---

१. 'सन्निकर्षो द्विविधो' इति पाठान्तरम्।
२. 'ज्ञानलक्षण: सामान्यलक्षणो योगजश्च' इति पाठान्तरम्।
३. 'द्रव्यस्य प्रत्यक्षम्' इति पाठान्तरम्।
४. 'गुणवृत्तिजाति' इति पाठान्तरम्।
५. 'शब्दस्य प्रत्यक्षम्' इति पाठान्तरम्।
६. 'जातीनां प्रत्यक्षम्' इति पाठान्तरम्।

चषकम्

घ्राणेत्यादि तत्र चक्षुष्त्वङ्मनांसि द्रव्यग्राहकाणीतरेषां द्रव्यग्रहेऽसामर्थ्यादिति **बोध्यम्। सन्निकर्षसहितानीति**। मनः संयोगरूपव्यापारविशिष्टानीत्यपि बोध्यम्।

अलौकिक इति। सविवादस्यालौकिकसन्निक- र्षस्याप्यावश्यक-त्वद्योतनाय प्रथममुपन्यासः। **ज्ञानलक्षण इति**। सामान्यलक्षणेनास्य गतार्थता न भवति तदनुपदं विवेचयिष्यते इति ध्वनयितु प्रथममुपन्यासः। **संयुक्तसमवेतसमावाय इति**। चक्षुरित्यादिः। अत्र महत्त्वावच्छिन्नेति संयुक्तविशेषणं तेन न परमाणुनीले नीलत्वग्रहः। **एव**मुद्भूतरूपावच्छिन्नत्वमपि तेन न वायुचक्षुषोरेकत्वे सत्ताचाक्षुषम्। **इत्थ**ञ्च द्व्यणुकस्य महत्त्वानवच्छिन्नतया त्रसरेणुरूपप्रत्यक्षोपपत्तये संयुक्तसमवाय आवश्यकः। **तत्रा**पि महत्त्वोद्भूतरूपावच्छिन्नत्वं संयुक्तविशेषणमिति न परमाणुवायुचक्षुष्षु सत्तादिग्रहः। **इत्थञ्च** त्रसरेण्वात्मनोः प्रत्यक्षस्योपपत्तये संयोगोऽप्यावश्यकः। **एव**मालोकसंयोगावच्छेदकदेशावच्छिन्नत्वं चक्षुर्विशेषसंयोगे विशेषणम्। तेन नान्धकारे शरावपिहितदीपगर्भघटादिचाक्षुषम्। **चक्षु**र्विशेषोपादानाच्च विडालादीनां चाक्षुषप्रत्यक्षमन्धकारेऽपि सूपपदं भवति। **एवं** विडालादिगोल-कस्योद्भूतरूपवदालोकसंयोगनियमात्तद्विषयकचाक्षुष- प्रत्यक्षमपि। **एव**मेव रूपस्थाने स्पर्शमन्तर्भाव्य त्वक्सन्निकर्षस्य हेतुत्वमिति **बोध्यम्। द्रव्यस्य प्रत्यक्षमिति**। अलौकिकसन्निकर्षेणापि लौकिसन्निकर्षे- सहायेनैवार्थग्रह इति प्रथमं तदर्थप्रपञ्चः।

अत एव सर्वांशोपनीतभानसम्भवोऽपि कामिनीजिज्ञासायाः प्रतिबन्धकत्वमभ्युपेत्योपपादितः। **शब्दमात्रवृत्तिजातीतरेति**। शब्दान्या-वृत्तिजातीतरेत्यर्थः। **यद्य**पि शब्दान्यगुणवृत्तिजातीत्येव वक्तुमुचितं **तथा**प्यन्यां तस्य ग्राह्यविशेषणतया प्रक्रमादापाततस्तथा भ्रमवारणायेत्थमभिहितम्। **शब्द**वृत्तिजातीनां गुणत्वशब्दत्वतारत्वमन्द्रत्वादीनाम्। अस्मात्तार इत्यादयः पुनर्व्यवहारा इदं व्यावर्त्तकोत्कर्षव्याप्यतारत्वादिजात्यवच्छिन्नपराः सन्तोऽवधि-

विशेषमपेक्षन्ते स च न कारक**मत** एव पञ्चमीविभक्त इत्यनेन सूत्रेणात्र पञ्चम्यनुशिष्टानिर्धारणस्य यद्धर्मावच्छिन्नावृत्तिसत्वं तदवच्छिन्नवाचकपदात्पञ्चमीति तदर्थ इत्युक्तमन्**यत्र**।

विशेषणतयेति। **यद्य**पि संयुक्तविशेषणतेत्यादिक्रमेण विशेषणताया अपि नानात्वं **तथा**प्यानन्त्यादसावेकैव विशेषणतात्वेन स्वतन्त्रेच्छेन महर्षिणा निर्दिष्टेति नाधिक्यमाशङ्क**नीयम्**।

वैशेषिकाणां मते समवायस्य न प्रत्यक्षमिति ध्वनयितुं चरमं तस्य निर्देशः। पुनः पुनः प्रत्यक्षपदेन कार्यप्रतिपादनं सर्वत्र कार्यतावच्छेदककोटाविन्द्रियाव्यभिचरितलौकिकत्वस्य घटनां सूचयति।

तात्पर्यटीका

सन्निकर्षसहितानीतीति। **च**क्षुरादीनां चाक्षुषत्वाद्येव सामान्यतः कार्यतावच्छेदकं संयोगादीनां तु द्रव्यचाक्षुषत्वादि वक्ष्यमाणमिति विवेक्त**व्यम्**। **यद्य**प्यर्थचक्षुःसंयोगरूपसन्निकर्षस्यैव व्यापारता सम्भवति **तथा**पि श्रोत्रसन्निकर्षस्य नित्यस्य समवायस्य न जन्यत्वघटिता सा सम्भवतीति सर्वसाधारणं व्यापारमादर्शयति **मनःसंयोगरूपेति**।

चक्षुः संयोगत्वादिविशेषरूपेणैव सन्निकर्षत्वमभिप्रेत्याह। **चक्षुरित्यादिरिति**। अन्यथातिप्रसङ्गादिति भावः। **इत्थ**ञ्च महत्त्वावच्छिन्नत्वस्य संयुक्तसमवेतसमवायरूपसन्निकर्षघटकसंयुक्तविशेषणत्वावश्यकत्वे च। **एव**मग्रेऽपि।

अत एव लौकिसन्निकर्षस्यावश्यकत्वादेव। सामग्रीसत्त्व एव कार्यानुत्पादस्य प्रतिबन्धकाधीनत्वेनोपष्टम्भकं सङ्गतिः। **नहि** कामिनीजिज्ञासाविषयं ज्ञानं निर्विकल्पकं तावतैव तन्निवृत्तिश्**चेत्य**लोऽभ्युपेत्येति। तेन वस्तुतस्तस्याः प्रतिबन्धकत्वं स्वविषयान्यविषयकज्ञान एवेत्यात्मांशे लौकिकमेव तदिति सूचितम्। कथमन्यथा शङ्खचूडापत्ररचनातिलकादीनां तत्र भानम्। अत एव यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधीक्षणादाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लय इत्यत्र बाह्येत्यनेन बहिरिन्द्रियजन्यज्ञानप्रतिवध्यत्वं ·प्रदर्श्यानन्देत्यनेनानन्दाध्यक्षस्याप्रतिबध्यत्वं

दर्शितमनुभवरसिकैरित्यस्तु। **अन्यान्तस्य** शब्दान्यगुणेत्यन्यान्तस्य। प्रक्रमाच्छब्दान्यगुणकर्मद्रव्यवृत्तिजातीनामित्यत्र ग्राह्यगुणविशेषणतया प्रक्रमात्। अव्यावर्त्तकताप्रसङ्गादेव न वस्तुतस्तथा भ्रम **इत्यापातत इति। तथा भ्रमेति।** शब्दान्यत्वस्याव्यावर्त्तकताप्रसञ्जकगुणवृत्तिजातिविशेषणताभ्रमेत्यर्थः। **तारत्वमन्द्रत्वादीनामिति। ननु** तारत्वादीनां जातित्वे सावधिकत्वाभावादस्मात्तार इति व्यवहारो न स्यादत आह। **अस्मात्तार इत्यादय इति। तदर्थ इति। अत** एव नरेभ्यो राक्षसाः शूरतमा इत्यादौ राक्षसत्वविशेषणविशिष्टे तच्छून्यनरव्यावृत्तशूरतमत्वविवक्षायामियं पञ्चम्येव न तु यतश्च निर्धारणमिति षष्ठीसप्तम्यौ। जात्यादिविशेषणविशिष्टयद्धर्मावच्छिन्नस्य तादृशविशेषणशून्यतद्-धर्मावच्छिन्नसामान्यव्यावृत्तत्वविशिष्टविधेयवत्तया प्रतिपादनं तद्धर्मा-वच्छिन्नार्थकपदात् षष्ठीसप्तम्यावित्यर्थकस्य तस्य प्रकृतेऽप्रवृत्तेः।

शूरतमा इति राक्षसविशेषणस्य नरत्वरूपतद्धर्मावच्छिन्ने तादृशविधेयवत्तया प्रतिपादनं कर्त्तुमसमर्थत्वाद्राक्षसानां नरत्वानवच्छिन्नत्वात्। **अत** एव सजातीयात् पृथक्करणं निर्धारणमिति गीयते। **यथा** नराणां क्षत्रियाः शूरतमा इत्यत्र क्षत्रियान्यनरावृत्तिशौर्यवन्तः क्षत्रिया नरा इति शाब्दबोधः। तत्र क्षत्रियान्यो नरो नरार्थः क्षत्रियो नरः क्षत्रियार्थो वृत्तित्वं षष्ठ्यर्थ एतदन्वय एकदेशेऽपि शौर्य इति बोध्यम्। **संयुक्तविशेषणतेत्यादीति।** द्रव्यगुण-कर्मत्वेष्वभावप्रत्यक्षोपपत्तये संयुक्तविशेषणता संयुक्तसमवेतविशेषणतासंयुक्त-समवेतसमवेतविशेषणतानामावश्यकत्व**मेवं** ध्वनौ वर्णत्वाभावस्य कत्वे ध्वनित्वाभावस्य च प्रत्यक्षोपपत्तये समवेतविशेषणतासमवेत-समवेतविशेषणतयो**रेवं** ध्वन्यभावे वर्णाभावस्य प्रत्यक्षोपपत्तये विशेषणविशेषणतया इति क्रमेणेत्यर्थः। **तदुक्तम्। विशेषणतया तद्वदभावानां ग्रहो भवेदिति। अस्यार्थः**। ते संयोगादयो विद्यन्ते येषु ते तद्वन्तस्तेष्वभावास्तेषां विशेषणतया संयुक्तविशेषणतादिभिर्ग्रहो भवेदिति। **अत** एव शब्दस्य समवायत इति निर्दिष्टवतोऽत्राभावानामिति बहुवचननिर्देशोऽप्यर्थवान्भवति। **अनन्त्यादिति** भावाभावाधिकरणाति-रिक्ताभाववादिनां विशेषणविशेषणविशेषणतादीनामाधिक्यस्य निराकर्त्तुमशक्यत्वा-दित्याशयः। **असावेकैवेति। नन्वे**वं संयोगत्वेन समवायत्वेन चान्येषामपि सङ्ग्रहः कुतो न कृत इत्याशङ्कावारणाय **स्वतन्त्रेच्छेनेति।**

इन्द्रियरूपैकसम्बन्धिज्ञानाल्लौकिकत्वस्मृत्युपयुक्ततयाव्यभिचरितत्व-सम्बन्धोल्लेखः। **अत** एव **कुसुमाञ्जलिप्रकाशे** साक्षात्कारत्वावच्छिन्न-लौकिकविषयताघटितं लौकिकप्रत्यक्षलक्षणमुक्तम्। साक्षात्कारत्वावच्छिन्ना साक्षात्कारत्वविषमव्याप्य-तन्न्यूनवृत्तिरिति यावत् तेन सर्वांशेऽलौकिकसाक्षात्कारे नातिव्याप्तिः। तथा च साक्षात्कारिताप्रयोजिका या लौकिकसन्निकर्षप्रयोज्या लौकिकविषयता तन्निरूपकसाक्षात्कारत्वमिति लक्षणं पर्यवसितम्।

तर्कामृतम्

अलौकिकः स यथा, ज्ञानलक्षणया 'सुरभि चन्दनम्' इति चाक्षुषं ज्ञानम्।

तरङ्गिणी

सुरभिचन्दनमिति। चन्दनखण्डे चक्षुः संयोगसत्त्वेऽपि सौरभांशे सन्निकर्षोऽपेक्षणीयः। प्रत्यक्षविषयतायाः सन्निकर्षनियम्यत्वादिति। घ्राणजतज्जन्यस्मृत्यादिरूप- सौरभज्ञानरूपप्रत्यासत्तेस्तद्ग्रह इति भावः। यद्यपि चक्षुः-संयुक्तसमवायोऽप्यस्ति सौरभे, तथापि स न तस्य चाक्षुषविषयतानियामकः। तथा सति तद्वृत्तिलौकिकसन्निकर्षजन्यत्वेन तदंशे तस्य लौकिकत्वापत्त्या रूपं पश्यामीति प्रत्ययापत्तिः। ज्ञानलक्षणयैव घटमहं जानामीति घटविषयको ज्ञानानुव्यवसायः।

चषकम्

ज्ञानलक्षणयेति। **यद्य**पि सौरभे चक्षुःसंयुक्तसमवायोऽपि सम्भवति। **तथा**पि तत्सन्निकर्षसहकारेण सौरभस्य चक्षुर्ग्राह्यत्वे सौरभं पश्यामीति तदनुव्यवसायापत्या ज्ञानलक्षणयैव तद्ग्रहः प्रत्यक्षविषयतायाः सन्निकर्षव्याप्यत्वाद्वाच्य इत्याशयः। **अथ** सौरभत्वसामान्यलक्षणयैव तद्ग्रहोऽस्तु किं ज्ञानलक्षणया **न च** तदिन्द्रियज-

तद्धर्माश्रयलौकिकचाक्षुषबोधाप्रसिद्ध्या तत्सामग्रीरूपसहकारिदौर्लभ्यमिति न सामान्यलक्षणाऽ**न्यथा** घटाभाववदित्यत्र सकलघटानामिवानुभवविरुद्धस्य सकलसौरभाणामपि विषयत्वस्यापत्तेरिति वा**च्यम्**।

बहिरिन्द्रियस्य स्वायोग्यमुख्यविशेष्यकज्ञानाजनकत्वरक्षणाय सौरभत्वेनोपनीतसौरभममुख्यविशेष्यकचाक्षुषज्ञानवारणाय सौरभत्वेन तन्मुख्यविशेष्यकचाक्षुषं प्रति चन्दनखण्डधर्मिकसौरभत्वप्रकारकभ्रमप्रसिद्ध्या प्रसिद्धसौरभत्वप्रकारक तद्विशेष्यकलौकिकचाक्षुषसामग्रीहेतुत्वेनैवा**न्यथा**-पाद्यस्याप्रसिद्धत्वेनैवानतिप्रसङ्गे सामान्यलक्षणाजन्यज्ञानं प्रति तद्धर्मप्रकारक-बोधसामग्रीहेतुतायां लौकिकत्वस्याप्रवेशेनालौकिकतत् सामग्र्या एव प्रसिद्ध्या सौरभत्वप्रकारकलौकिकप्रत्यक्षसौरभत्वावच्छिन्नप्रकारकप्रत्यक्षान्यतरसामग्री-सहकारित्वकल्पनया वात्र सहकारिसौलभ्या**दित्थ**ञ्चारोपहेतुदोषविशेषणज्ञान-घटितसामग्रीनियमाद्विषयनियम इति **चेत्तथा**पि सौरभत्वभानार्थं तदावश्यकत्वा**देवं** प्रमुष्टतत्ताकभ्रमानुव्यवसाये भ्रमविशेष्यभानार्थं ज्ञानलक्षणावश्यकी तत्प्रकारकस्य तद्विशेष्यावृत्तितया सामान्यलक्षणाया असम्भवादिति **ध्येयम्**।

तात्पर्यटीका

सकलघटनामिवेति। सामान्यलक्षणाज्ञानलक्षणयोरभावाद्यथा सकलघटानां विषयत्वमनुभवविरुद्धं **तदिद**मुक्तं सकलप्रतियोगिविषयत्वं तु तस्यासिद्धमिति। **तथा** सकलसौरभविषयत्वमत्रापद्यत इति भावः।

अन्यथा सौरभमुख्यविशेष्यकचाक्षुषाप्रसिद्धौ। आपाद्यस्य सौरभत्वेन सौरभमुख्यविशेष्यकचाक्षुषस्य। अनतिप्रसङ्गे सामग्र्या अभावेन वापाद्याप्रसिद्ध्यैव वा सौरभत्वेन चक्षुरयोग्यसौरभमुख्यविशेष्यकचाक्षुषस्यैव क्वचिदपि घटादौ तादृशबोधहेतुलौकिकसन्निर्षाद्यभावे सामान्यलक्षणाजन्य-प्रत्यक्षस्यापि वारणे अप्रवेशेनेति। अत एव भाषापरिच्छेदे **तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्षितेत्येवोक्तं पञ्चाननैः**। **अलौकिकतत् सामग्र्या इति**। अलौकिकश्चासौ स चालौकिक सोऽलौकिक तम्य

तद्धर्माश्रयचाक्षुषबोधस्य सामग्र्या इत्यर्थः। तत्र लौकिकत्वप्रवेशमभ्युपेत्यापि सहकारिसम्पत्तयं त्वाह। **सौरभत्वेति। लौकिकप्रत्यक्षेति।** भ्रमप्रमासाधारणलौकिकचाक्षुषेत्यर्थः। **सौरभत्वावच्छिन्नेति।** सौरभांशे लौकिकचाक्षुषेत्यर्थः। प्रसिद्ध्येत्यस्यात्र सहकारिसौलभ्यादित्यनेनान्वयः। तुल्यवच्चक्षुर्योग्यनानाधर्मिकचाक्षुषभ्रमाणां नानादोषघटितानां वह्नीनां सामग्रीणामन्यतमं सहकारीत्येवंविधकल्पनयोक्तापत्तिवारणापेक्षया तद्धर्मिक-लौकिकप्रत्यक्षसामग्रीसहकारित्वकल्पनमुचितमित्यभिप्रेत्य। तर्हि कस्यचिदेव सौरभस्य भाने किं नियामकमत आहे**त्थं चेति**। ज्ञानलक्षणाविषये कस्यापि धर्मस्याग्रहात् सामान्यलक्षणा न सम्भवतीत्युक्त्वा तत्र गृहीतधर्मस्य तदवृत्तित्वादपि न सेत्याहै**वमि**ति।

तर्कामृतम्

सामान्यलक्षणया घटत्वेन रूपेण यावद्घटज्ञानम्, योगजधर्मेण योगिनां सर्वज्ञानम्। तत्र निर्विकल्पकं विशेष्यप्रकारादिरहितं वस्तुस्वरूपमात्रज्ञानम्।

तरङ्गिणी

सामान्यलक्षणयेति। अयं घट इति घटत्वप्रकारकज्ञानरूप-घटत्वसामान्यलक्षणया घटत्वेन रूपेण यावतां घटानां भानम्। उभयोर्ज्ञानरूपत्वेऽपि यद्विषयकं ज्ञानं तस्यैवाद्या। द्वितीया तु यत्प्रकारकं ज्ञानं तदाश्रयोणामिति भेदः। आद्याया विषयेण सम्बन्धो विषयतैव। द्वितीयायास्तु स्वविषयसामान्यवत्त्वमेव। द्वितीयायां च ज्ञानजनने सामान्यलक्षणारूपं ज्ञानं यदिन्द्रियजं तत्सामग्र्यपेक्षणीया। तेन विनश्यदवस्थालोकसन्निकर्षादिना घटत्वप्रकारकज्ञानोत्तरं न सामान्यलक्षणया यावद्घटज्ञानम्। **योगजधर्मेणेति।** स च धर्म उत्पद्यमानः स्वरूपसम्बन्धेन सर्ववस्तुसम्बद्ध एवोत्पद्यते। **सर्वज्ञानमिति।** यस्येन्द्रियस्य यद्योग्यं तेनेन्द्रियेण तस्य दूरत्वे व्यवधानेऽपि च ज्ञानमित्यर्थः। न तु परमाण्वाद्यतीन्द्रियपदार्थज्ञानम्। तदुक्तमाचार्यैः "**यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्।**

दूरसूक्ष्मादिबुद्धौ स्यान्न रूपे श्रोत्रवृत्तिता'' इति। **विशेष्यप्रकारादिरहितमिति।** विशेष्यत्वप्रकारत्वानिरूपकमित्यर्थः। **वस्तुस्वरूपमात्रज्ञानमिति।** वस्तुनः विशेष्यत्वेनाभिमतस्य स्वरूपतो ज्ञानमित्यर्थः। निरवच्छिन्नविषयताशालिज्ञानमिति यावत्।

चषकम्

यावद्घटज्ञानमिति। न च यावद्घटज्ञानाभावे का क्षतिरिति **वाच्यम्।** देशान्तरीय घटे शक्तिग्रहासम्भवेन तच्छाब्दबोधानुपपत्तेः। **न** च समानप्रकारकत्वेन कार्यकारणभावान्न दोषोऽ**तए**वापूर्वस्य पूर्वमनुपस्थितत्वेऽपि कार्यत्वेन घटादौ शक्तिग्रहाद्योग्यतावशादेवापूर्वभानमिति **मी**मांसका इति **वाच्यम्।** अन्यथाख्यात्यनभ्युपगन्तृणां मते घटो घटपदवाच्य इति प्रमित्या संशयविरोधिन्या सर्वत्र शक्तेरावश्यकत्वेऽशक्यशाब्दबोधवारणाय शक्तेस्तत्प्रयोजकत्व-सिद्धेरित्याशयात्। **अत** एव सामानाधिकरण्येनेव लाघवात् समानविशेष्यताप्रत्यासत्या प्रत्यासन्नं शुक्त्यादावपि क्वचिदेव जायमानाया विसम्वादिन्या इच्छाया असिद्धरजतगोचरायाः सम्वादिन्या अपि नियामकमसिद्धरजतगोचरं समानप्रकारकं ज्ञानं निर्वहतीत्यलं क्षोदक्षमपरिष्कारेण।

इदं तु बोध्यम्। **यदा** सामान्यलक्षणया सामान्यज्ञानमात्रेण सामान्यप्रकारकं ज्ञानं बहिरिन्द्रियेण जननीयं **तदा** बहिरिन्द्रियजन्यस्य तत्सामान्यस्य किञ्चिद्धर्मिकलौकिकप्रत्यक्षस्य सामग्र्यपेक्षिता व्यापकसामग्रीत्वादिति। **योगजधर्मेणेति।** स च योगाज्जायमानो धर्मो यद्यपि स्वरूपसम्बन्धेन सर्ववस्तुसम्बद्ध इति स्वसंयुक्तमनः साध्यतादृशधर्मवत्त्वं वस्तुमात्र एव भवति। परन्तु यदिन्द्रिययोग्यं यत्तेन तद्व्यवहितं विप्रकृष्टञ्च ग्राहयति सन्निकर्षस्थानीयत्वादित्याचार्याः। **तदुक्तम्**–

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्।
दूरसूक्ष्मादिबुद्धौ स्यान्न रूपे श्रोत्रवृत्तितेति॥

तत्र तयोर्मध्ये, **निर्विकल्पकमिति**। विशिष्टबुद्धिरूपकार्यानुमेयमिति शेषः। **तथाहि**। घट इति विशिष्टबुद्धिर्घटत्वज्ञानजन्या तद्विशिष्टबुद्धित्वादिति। **न च** तद्विशिष्टबुद्धौ तज्ज्ञानहेतुत्वे मानाभाव इति **वाच्यम्**। जातित्वेन घटत्वोपस्थितौ तथा बुद्ध्यनुदयात् स्वरूपतो घटत्वोपस्थितेस्तद्धेतुताया आवश्यकत्वात्। **न च** तद्धेतोरेवास्त्विति **वाच्यम्**। दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वात्। **न चैवं** विशेष्यज्ञानत्वेनापि हेतुतापत्तिरिति **वाच्यम्**। सामान्यलक्षणाजन्यविशिष्टबोधे व्यभिचारात्।

नच सामान्यलक्षणयापि निर्विकल्पकं जनयित्वैव विशिष्टबुद्धिर्जन्यतामिति वाच्यम्। तथा सति स्वरूपतः सर्वधर्मभानबलात् सार्वज्ञापत्तेः परो घटज्ञानवान्नवा परकीयज्ञानविषयो घटो न वेति संशयो न स्यादिति। **अत** एव विशेष्यप्रकारादिरहितं विशेष्यताप्रकारत्वाद्यनिरूपकम्। **वस्तुस्वरूपमात्रज्ञानमिति**। न तु केनापि रूपेण तथा सति तस्यापि विशिष्टबुद्धित्वेनानवस्थानादिति भावः। तेन निर्विकल्पकस्य तुरीयविषयता दर्शिता।

तात्पर्यटीका

ननु सन्निकृष्टघट एव शक्तिप्रमाया विषयः संशयानुत्पादस्तु तज्जनकदोषाभाववदेवोपपन्न इत्यतः सामान्यलक्षणां विना स्थलविशेषेऽगतिरेवेत्याहात **एवेति**। सामान्यलक्षणात एवेत्यर्थः। **समान**प्रकारकं ज्ञानं निर्वहतीति योजना। **अयं** भावः। **ज्ञानं** विनेच्छानुदयात्तत्र ज्ञानं हेतुस्तत्वं यदि समानप्रकारकत्वेन तर्हि रजतत्वेन रजत एवेच्छा नान्यत्रेत्यत्र नियामकालाभः। **न च** स्वप्रकाररजतत्वसम्बन्धेन ज्ञानमेव तथेति **वाच्यम्**। तर्हि विसम्वादीच्छानुदयप्रसङ्गात्। **अथ** स्वप्रकाररजतत्वतदभावान्यतरसम्बन्धेन सम्वादिविसम्वाद्यन्यतरेच्छयोस्तत्तथेति **चेत्** सकलेच्छाविषयतायाः केवलान्वयित्वापत्ति**स्तस्मा**त्समानविशेष्यताप्रत्यासत्याप्रत्यासन्नं तत्तथा वाच्यम्। तथा च सिद्धत्वग्रहरूपप्रतिबन्धकबलेन सिद्धे इच्छाविषयताविरहादसिद्धरजतगोचरेच्छाया नियामकमसिद्धरजतगोचरं ज्ञानं न सामान्यलक्षणां विनेति। क्षोदक्षेमेणोक्तदूषणदुष्टेन परिष्कारेणानुपदमुक्तेनालमिति पूर्यतामित्यर्थः।

सामान्यज्ञानमात्रेणेति। सामान्यज्ञानत्वं कारणतावच्छेदकमित्यर्थः। **सामान्यप्रकारकं ज्ञानमिति**। सामान्यप्रकारकप्रत्ययत्वं कार्यतावच्छेदकमित्यर्थः। **व्यापकसामग्रीत्वादिति**। जायमानं सामान्यप्रकारकं ज्ञानं सन्निकृष्टघटांशे लौकिमसन्निकृष्टघटांशे त्वलौकिकमितिसामान्यलक्षणाजन्यतावच्छेदकतत्प्रकारकप्रत्यक्षत्वं व्यापकं तत्प्रकारकलौकिकप्रत्यक्षत्वमिति भावः।

परकीयज्ञानविषयो घटो नवेतीति। **यदि** च समानधर्मितावच्छेदककनिर्णयो न सामान्यलक्षणयापितु घटाः पटा गाव इत्यादि। स च न निरुक्तसंशयविरोधी। **यद्य**पि निर्विकल्पकानन्तरं विशिष्टबुद्धिवदेकविशिष्टेऽपरनिर्णयोऽपि तदनन्तरं निरुक्तसंशयविरोधी सम्भवति **तथा**पि संशयजनकदोषेण प्रतिबन्धात् स न जायते **यादृ**शसंशयजनकदोषाभावस्तत्संशयसमानाकारनिर्णयस्येष्टत्वादित्यपि वक्तुं शक्यमित्युच्यते **तदा**पि प्रमेयत्वसामान्यलक्षणयापि स्वरूपतः सकलजातिप्रकारकोऽपि निर्णयो नानुभाविको येन स्वप्नवन्मोक्षः कल्प्येत का कथा समानप्रकारकनिर्णयस्येत्येव तात्पर्यम्। **अत एव** स्मृत्यधिकरणसिद्धान्तावष्टम्भेन विशेषणविषयकज्ञानमात्रस्यानुमेयत्वादेव।

तर्कामृतम्

सविकल्पकं सप्रकारकम्। भासमानवैशिष्ट्यप्रतियोगित्वं च[१] प्रकारत्वम्। यथा 'अयं घटः' इत्यत्र अयं विशेष्यः, घटत्वं प्रकारः, भासमानवैशिष्ट्यं[२] तयोः समवायः, तस्य प्रतियोगि घटत्वम्। सविकल्पकमेव विशिष्टवैशिष्ट्यज्ञानं यथा[३] 'अयं दण्डी' इत्यत्र दण्डत्वविशिष्टस्य वैशिष्ट्यं पुरुषे भासते। अथ प्रक्रिया। आदौ इन्द्रियसंनिकर्षात् 'घटघटत्वे' इति निर्विकल्पकम्, ततः 'अयं घटः' इति विशिष्टज्ञानम्। तत्र–

---

१. 'च' इति पाठः नास्ति।

२. 'वैशिष्ट्यमेतयोः' इति पाठान्तरम्।

३. 'यथा दण्डीति। अत्र' इत्येवं पुस्तकान्तरे पाठः।

तरङ्गिणी

भासमानेति। प्रतियोगित्वं स्वरूपसम्बन्धविशेषः। ननु सप्रकारकज्ञानत्वमेव विशिष्टज्ञानत्वम्। तथा च विशिष्टज्ञानस्य सविकल्पकत्वेऽपि विशिष्टवैशिष्ट्यस्याधिक्यापत्तिरत आह-**सविकल्पकमेवेति**। विशिष्टवैशिष्ट्यज्ञानं सविकल्पकमेव तस्यापि सप्रकारत्वादिति भावः। **अयं दण्डीति।** अत्र च विशेषणतावच्छेदकीभूतदण्डत्वप्रकारकं ज्ञानं हेतुः। विशेषणतावच्छेदकांशे सधर्मितावच्छेदकरक्तदण्डवानिति ज्ञाने च दण्डत्वधर्मितावच्छेदकरक्तत्वनिर्णयो हेतुः। दण्डो रक्तो न वेति संशये तदनुत्पादस्य सर्वानुभवसिद्धत्वात्। **घटघटत्वे इति।** उभयोस्तुल्यवदेव भानमिति बोधनाय इतरेतरद्वन्द्वः। ततो विशेषणज्ञानानन्तरम्।

चषकम्

भासमान वैशिष्ट्येति। **न चैवं** संयोगप्रतियोगी दण्डोऽयं च पुरुष इत्यत्र दण्डस्य प्रकारतापत्तिरिति **वाच्यम्।** संसर्गविधया भासमानस्य वैशिष्ट्यस्य संसर्गविधया भासमानं प्रतियोगित्वमित्यर्थात्। **एतेन** स्वनिष्ठसंयोगप्रतियोगित्वाख्येन वैशिष्ट्येन पुरुषप्रकारके पुरुषे दण्ड इति ज्ञाने दण्डस्य प्रकारतापत्तिरपि **निरस्ता।** स्वघटकस्य संयोगस्य प्रतियोगितया पुरुष एव भानात्। तादृशस्य प्रतियोगित्वस्यानुयोगितयैव दण्डे भानात्।

ननु वैशिष्ट्यानवगाहिज्ञानाद्यथा वैशिष्ट्यावगाहिज्ञानं विलक्षणं तथैकवैशिष्ट्यावगाहिज्ञानाद्वैशिष्ट्यद्वयावगाहिज्ञानमपीति तत्कुतो नोक्तमिति कस्यचिदाशङ्कामपाकर्त्तुमाह। **सविकल्पकमेवेति**। न तु ततो व्यतिरिक्तम्। तथा च वैशिष्ट्यभेदनियतभेदाभ्युपगमेऽपि सविकल्पकान्तर्गतमेव तदिति भावः। **यथेति**। परन्तु परम्परयावच्छेद्यावच्छेदक- भावापन्नसांसर्गिक-विषयताद्वयनिरूपकमेव ज्ञानं मिश्राणामपि वैशिष्ट्यद्वयज्ञानत्वेन विवक्षितं **न तु** संयोगसमवायावित्यादिरूपं वैशिष्ट्यद्वयमात्रज्ञानं तस्यार्थसमाजाधीनत्वादस्य तु विशेष्ये विशेषणमितिवद्विशेषणतावच्छेदकप्रकारक- निश्चयाद्यनुविधानानु-भवविरोधापत्तेरित्यभिप्रेत्याह। **अत्रेति।**

तत्र च दण्ड इति ज्ञानं हेतुर्निर्विकल्पकोत्तरं विशेष्ये विशेषणमितिबुद्धिवदुक्तविशिष्टवैशिष्ट्यबोधानुदया**देवं** रक्तदण्डवानिति विशेषणतावच्छेदकांशे सधर्मितावच्छेदकविशिष्टवैशिष्ट्यबोधं प्रति दण्डो रक्त इति निश्चयो हेतुर्दण्डो रक्तो नवेति संशयानन्तरं तदनुदयादित्यन्यत्र **विस्तरः**।

प्रक्रियोत्पत्तिज्ञप्तिप्रामाण्यकथा। **घटघटत्वे इति**। घटघटत्वोभयावगाहीत्यर्थः। **एतेन** पञ्चम्यन्तसमभिव्याहृतेन प्रागेव सन्निकर्षसामान्यस्य प्रत्यक्षसामान्योत्पादकत्वोक्त्या विशेषणवद्विशेष्य-सन्निकर्षरूपतद्विशेषस्य तद्वद्विशेष्यकतत्प्रकारकप्रमारूपप्रत्यक्ष-विशेषोत्पादकत्वमधुनोक्तं भवति तदेव चोत्पत्तिप्रामाण्यं तदुक्तम्। उत्पद्यतेऽपि प्रमा परतो न तु स्वत **इति** परत उत्पत्तिश्चागन्तुकहेत्व-धीनोत्पत्तिर्हेतावागन्तुकत्वमपि तादृशप्रमात्वशून्यज्ञाननिरूपितजनकतानवच्छेद-कावच्छिन्नत्वमिति च तद्व्याख्यातार इति मदुपज्ञानवाचो यु**क्तिः**।

अयं सन्निकृष्टः। **तत्र** विशिष्टज्ञाने। ज्ञानप्रामाण्यं तदप्रामाण्याग्राहक-यावज्ज्ञानग्राहकसामग्रीग्राह्यं नवेति विप्रतिपत्तौ सत्यामिति शेषः।

तात्पर्यटीका

स्वघटकेति। अन्यथा निरुक्तवैशिष्ट्यस्य पुरुषप्रतियोगिकत्वानुपपत्या पुरुषविशिष्टबुद्धित्वानापत्ते**रेव**मग्रेऽपि।

सविकल्पकान्तर्गतमेव तदिति। अव्यपदेश्यं व्यवसायात्मक-मित्युक्तसूत्रानुसारादिति भावः। **संयोग**समवायावित्यत्रापि संयोगत्वसमवायत्वयोः समवायस्वरूपसम्बन्धयोः सम्बन्धविधया भानात् **परम्पर**येत्यादि। अवच्छेद्यावच्छेदकभावोऽपि निरूप्यनिरूपकभावमात्रं बुद्धित्रयसाधारणं **बोध्यम्। अस्य** दण्डत्वावच्छिन्नदण्डप्रकारतानिरूपितपुरुषविशेष्यताशालि-विशिष्टवैशिष्ट्यज्ञानस्य। **विशेष्ये विशेषणमितिवदिति**। दण्डत्व-प्रकारतानिरूपितदण्डप्रकारतानिरूपितपुरुषविशेष्यताशालिज्ञानवदित्यर्थः। तत्र

यावद्विशेषणज्ञानमसंसर्गाग्रहश्च हेतुर**त** एव निर्विकल्पकसंशययोरन्तरमपि तथा धीः। **निश्चय**येत्यपि दृष्टान्तार्थम्। प्रकृते निश्चयत्वस्य व्यर्थत्वात्।

तेन विशेषणतावच्छेदकांशे धर्मितावच्छेदकावगाहिन्यां तस्यां यथा विशेषणतावच्छेदकस्य निश्चयो हेतुस्तथास्य विशेषणतावच्छेदकप्रकारिका धीरेव **न तु** निश्चयत्वमपि तत्र निविशते निर्धर्मितावच्छेदककसंशयाभावेन वारणीयाभावादिति फ**लितम्**। त्रिविधविशिष्टवैशिष्ट्यबुद्धेस्त्रिविधविशेषणतावच्छेदकबुद्ध्यन्वयव्यतिरेकाभ्यामार्थसमाजाधीनोक्तधियो विशेषस्य प्रतिपिपादयिषितत्वादिति विवेचनीयम्। **नि**श्चयादीत्यादिना विशेषणतावच्छेदकप्रकारकज्ञानमात्रस्य तत्तदसंसर्गाग्रहसहिततद्विषयकज्ञानमात्रस्य च परि**ग्रहः**। विशेष्ये विशेषणमिति बुद्धितो विशिष्टस्य वैशिष्ट्यमिति बुद्धेर्वैलक्षण्यं कारणवैलक्षण्यमुखेन दर्शयति। **तत्र चेति**। **बुद्धिवदिति** व्यतिरेके दृष्टान्तः। प्रसङ्गादाहै**वमि**ति। **यद्यु**क्तसंशयानन्तरं न तादृश्यपि धीरित्युच्यते **तदा**स्तु तादृशधियं प्रति स संशयो विरोधी **न चै**वं व्यापकसामग्र्यभावादेव संशयकाले विशिष्टवैशिष्ट्यधीवारणे तत्र विशेषणतावच्छेदकप्रकारकनिश्चयहेतुत्वमनर्थकमिति **वाच्यम्**। इदं ज्ञानं रक्तत्ववति रक्तत्वाभावप्रकारकमिति संशयधर्मिकाप्रामाण्यग्रहदशायामप्रामाण्यज्ञानानास्कन्दितसंशयाभावरूपव्यापकसामग्रीबलाद्विशिष्टस्य वैशिष्ट्यमिति रीत्याप्युक्तधीवारणाय रक्तत्वप्रकारतानिरूपित रक्तत्वदण्डत्वोभयावच्छिन्नदण्डप्रकारतानिरूपितपुरुषविशेष्यताशलिधियं प्रतिदण्डे रक्तत्वाभावाप्रकारकरक्तत्व- प्रकारकनिश्चयहेतुत्वस्यावश्यकत्वादित्यभिप्रेत्याहान्**यत्र विस्तर इति**।

घटघटत्वोभयेति न चैवं सन्निकर्षवशाद्वैशिष्ट्यभानमप्यायातमिति **वाच्यम्**। सांसर्गिकविषयताभिन्नवैशिष्ट्यावगाहनस्येष्टत्वात्। **ननू**त्पत्तिप्रामाण्यं न मूलेऽभिहितमिति कथमुच्यते उत्पत्तीत्यत आह। **एतेनेति**। घटघटत्वे इति पदेनेत्यर्थः। घटघटत्वोभयावगाहितोक्त्या सन्निकर्षस्य विशेषणवद्विशेष्यसन्निकर्षत्वप्रदर्शनेनेत्यर्थः। **पञ्च**म्यन्तसमभिव्याहृतेनेन्द्रियसन्निकर्षादिति पञ्चम्यन्तसमभिव्याहृतेन **तेन** च सन्निकर्षादित्यस्योभयत्रान्वयः प्रदर्शितः। प्रत्यक्षस्य सन्निकर्षजन्यत्वप्रतिपादनायैव तदुक्तिरिति शङ्कां वारयति **प्रागेवेति**। एतानि सन्निकर्षसहितानि प्रत्यक्षं जनयन्तीति ग्रन्थेनेति शेषः।

तादृशप्रमात्वेति। विशेषणवद्विशेष्यसन्निकर्षजन्यतावच्छेदकप्रमात्वेत्यर्थः। भवति च भ्रमजनकतानवच्छेदकमुक्तसन्निकर्षत्वं तदवच्छिन्नहेत्वधीनोत्पत्तिः प्रमाया इति लक्षणसमन्वयः। **एव**मन्यत्र प्रमास्वपि तत्तत्प्रमावसरे वक्ष्यमाणं तत्तद्धेतुमादाय लक्षणं ग्राह्यमिति। **मदुपज्ञेति**। सम्भवन्निरुक्तार्थक-वाक्यस्यान्यैरनुक्तार्थकत्वं न दोषायेति भावः।

नन्वयमित्यधिकमित्याशङ्क्याह। **सन्निकृष्ट इति**। तेनात्र घटत्वग्रहप्रतिबन्धकस्यान्यत्र घटत्वारोपहेतोश्च दोषस्याभावो दर्शितः। वक्ष्यमाणप्रामाण्यग्रहे पुरोवर्तिनि प्रवृत्त्युपयोगिता चेति।

चषकम्

विवृण्वते चैतद्विप्रतिपत्तिवाक्यं दीधितिकृतः। **अत्र** तात्पर्यवशात् तद्वति तत्प्रकारकत्वरूपप्रकर्षविशेषविशिष्टं ज्ञानं प्रशब्दोपसंहितेन माधातुना प्रत्याय्यते भावल्युटा तादृशज्ञानत्वं करणल्युटा च तादृशज्ञानकरणत्वं तद्धितान्तेनोपस्थाप्यते तत्र तादृशज्ञानकरणत्वनिरासाय **ज्ञान**पदम्। तथा च विशेष्यतावच्छेकावच्छेदेन विशेषणान्वयस्यौत्सर्गिकत्वाद्यादृशप्रामाण्यत्वावच्छिन्नं सर्वं ज्ञानवृत्ति तदत्र विवक्षितमिति गम्यते। न हि तद्वति तत्प्रकारकज्ञानत्वमिव मनः श्रवणवृत्तिप्रमाकरणत्वं ज्ञानवृत्तीति तन्निरासः। **न च** ज्ञानपदेनापि ज्ञप्तिकरणमुच्यते इति मनः श्रवणयोरपि ज्ञप्तिकरणतया तद्वृत्त्येव प्रमाकरणत्वमपीति कथं तन्निरास इति **वाच्यम्**। योगरूढे रूढ्यनालिङ्गितार्थाप्रत्यायकत्वादिति केचित्तन्न।

विशिष्य ज्ञानत्वघटितप्रामाण्यपक्षत्वेनैवोपपत्तौ व्याप्यत्वनिवेशे प्रयोजनाभावात्। **विशिष्य** तात्पर्यग्राहकमेव ज्ञानपदमस्त्विति **चेन्न**। प्रकरणस्यैव तथात्वात्। **तस्मात्** प्रवर्त्तकज्ञानविषयप्रमातत्त्वात्मकप्रामाण्यपदार्थमधिकृत्य विचारादेव प्रमाकरणत्वपरताभ्रमो वारित इति **तज्ज्ञान**प्रामाण्यं तज्ज्ञानग्राहकयावत्सामग्रीग्राह्यं नवेति लाभार्थं तज्ज्ञानपरं **ज्ञानपदम्**। **व्यक्ती**भवष्यिति चैतदधिकमुपरिष्टात्। प्रामाण्यानुमितिसामग्रीमादाय विधौ सिद्धसाधनस्य निषेधे च बाधस्य वारणाय **यावदिति**। **न च** घटज्ञानं प्रमा

सर्वमभिधेयमित्यादिज्ञानविषयत्वस्य केवलान्वयित्वेन तत्सामान्याभावरूपया-वत्त्वाघटितसाध्याप्रसिद्धौ कथं निषेधे बाध इति **वाच्यम्**। यदभावत्वेन साध्यता पक्षे तद्वत्त्वस्य बाधत्वात् **न च** सामग्र्यां यावत्त्वविशेषणे यावत्सामग्रीजन्यग्रहाप्रसिद्धिस्तादृशसामग्रीत्वव्यापकग्राहकताकस्वत्वनिवेशेऽपि ज्ञानग्राहकात्मादौ प्रामाण्यग्राहकत्वस्यावश्यम्भावेनैव वक्ष्यमाणबाधानवसरात् सामग्रीत्वप्रवेशनवैयर्थ्यमिति **वाच्यम्**। सामग्रीजन्यग्रहे यावत्त्वस्य विवक्षित**त्वात्**।

तात्पर्यटीका

अत्रेति केचिदित्यन्तं मतान्तरम्। उपसर्गाणां द्योतकत्वे शक्तत्वरूपपदत्वाभावात् प्रशब्दे**त्युक्तम्**। भावकरणल्युटोर्द्वयोरेव तद्धितान्तेनेति विशेषणमित्याविष्कर्त्तुं पृथगुक्तिः (पृथग्विशेष्यव्यवधानेन विशेषणोक्तिः) समुच्चितान्वयबाधात् प्रत्येकान्वयस्य च क्रमेणेत्यध्याहारसापेक्षत्वात्तु न द्वन्द्वसमादरः। **तत्र** तयोर्मध्ये। **औत्सर्गिकत्वादिति एतेन** ज्ञानस्यैव प्रामाण्यमित्यर्थपरतया प्रमाकरणत्वपरताभ्रमनिवारणमेवकाराश्रवणादयुक्तमिति ध्व**नितम्** उपस्थितज्ञानकरणतया मनस उपस्थितौ तत्तुल्यतया नित्यस्य श्रवणस्याप्युपस्थितिरति पुरः स्फूर्तिकमनःश्रवणयोरुपा**दानम्**। **यद्वा** नित्यानां चक्षुरादीनां सर्वेषां न प्रमाकरणतेति तद्विशेषपर्यन्तानुधावने परिश्रमो माभूदिति तथोक्तमिति **ध्येयम्**। **प्रमा**करणत्वमपि प्रमाकरणत्वसामान्यमपि।

व्याप्यत्वनिवेशे प्रामाण्यत्वे ज्ञानत्वव्याप्यतावच्छेदकत्वपर्यन्तनिवेशे। प्रवर्त्तकं प्रवृत्युपयोगि। घटपटत्वादिभेदभिन्नप्रामाण्यस्य कस्यापि न यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वमतो विशिष्य ज्ञाननिवेश आवश्यक इत्याह। **व्यक्तीभविष्यतीति**। प्रातिस्विकरूपेण घटत्वभेदभिन्नज्ञानप्रामाण्यपक्षतायां यादृशप्रामाण्यग्रहविषयता केवलान्वयिनी तादृशज्ञानप्रामाण्यपक्षके तत्प्रामाण्यग्राहकसामग्रीग्राह्यत्वसामान्यस्यैव निषेध्यतया निषेधरूपसाध्यस्यैवाप्रसिद्धौ कथं बाध इत्याशङ्कते **न चेति**। **यावत्त्वाघटितसाध्याप्रसिद्धाविति**। विधिकोटौ यावत्त्वघटनायां तु

यत्किञ्चित्**साम**ग्रीग्राह्यत्वस्यैव निषेध्यतया सिषाधयिषितत्वेन साध्याप्रसिद्ध्यभावादिति भावः। **साध्यतेति**। अभिप्रेतेति **शेषः**।

चषकम्

इत्थञ्च सामग्र्यप्रवेशे ज्ञानग्राहकात्मादिजन्ययावद्ग्रहविषयत्वा-प्रसिद्धे**र्ज्ञान**त्वविशिष्टविषयकयावद्ग्रहोक्तौ तु तत्तत्प्रमाण्ये तादृशयावद्ग्रहविषयत्वस्य ज्ञानत्वे प्रसिद्धस्याप्यभावेन बाधापत्तेः। **सामग्रीति**। **न चात्म**नो प्रामाण्यग्राहकतयाऽप्रामाण्याग्राहकत्वविशेषणेनैव व्यावृत्तिरिति **वाच्यम्**। अप्रामाण्याग्राहकशरीरेन्द्रियविशेषादेरपि ज्ञानग्राहकतया तज्जन्ययावद्ग्रहविषयत्वाप्रसिद्धेस्तदुपादानस्यावश्यकत्वा**दधिक**मग्रे वक्ष्या**मः**। तत्तद्व्यक्तित्वेन घटादिज्ञानव्यक्तीनां साध्ये प्रवेशे तत्तद्व्यक्तावेव विधिकोटिप्रसिद्धिः सर्वेषां मते। **यदि** च पुरोवर्तिविशेष्यकत्वावच्छेदेनैव प्रामाण्यो स्वाश्रयघटविशेष्यकघटत्वप्रकारकज्ञानग्राहकसामग्रीजन्ययावद्ग्रह-विषयत्वं साध्यते तथा सत्येव प्रवर्त्तकज्ञानसम्पत्ते**रन्य**था प्रामाण्यारोपकालेऽपि निर्धर्मितावच्छेदकप्रामाण्यभानसम्भवेनाप्रामाण्याग्राहकेत्यस्यानर्थक्यापत्तेः।

तथा च कथं तत्तद्व्यक्तौ विधिकोटिप्रसिद्धिरित्युच्यते **तदा** ज्ञानत्वे एव तत् प्रसिद्धिः। **न चैवं** सति पुरोवर्तिविशेष्यकमिदं ज्ञानं घटत्ववति घटत्वप्रकारकं चेत्यनुव्यवसायादेः पुरोवर्तिविशेष्यकत्वं धर्मितावच्छेदकीकृत्य ज्ञानत्वावगाहित्वानियमात् कथं मीमांसकमते ज्ञानत्त्वेऽपि तत्प्रसिद्धिरिति **वाच्यम्**। ज्ञानत्वधर्मितावच्छेदकतया पुरोवर्त्तिविशेष्यकत्वग्राहिकाया एव सामग्र्याः साध्येऽन्तर्भावनीयतया तादृशसामग्रीजन्ययावद्ग्रहविषयताया ज्ञानत्वे प्रसिद्धेः सम्भवादित्यास्तां तावत्।

तात्पर्यटीका

इत्थञ्च ग्रहे यावत्त्वविवक्षणे च। **अप्र**सिद्धेरप्रसिद्धिमत्.....? **साम**ग्रीतीत्यन्वयः चक्षुषो बाधादिनाप्यवयवविश्लेषात्तदपेक्षया चिरावस्थायिनः

शरीरस्याप्रामाण्यग्राहकतापि सम्भाव्येतेत्यत इन्द्रियो**पादानम्। अधिकमिति**। प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद्भट्टमतसिद्धं तद्भिन्नार्थकमग्राहकान्तमित्यस्य वक्ष्यमाणत्वादात्मादे: प्रमाण्यग्राहकत्वेन भट्टमतेऽपि सिद्धतयोक्ताप्रामाण्याग्राहकत्वाद्यथास्थितमेव ज्याय इत्याशय:। **तत्त**द्व्यक्तित्वेनेत्युक्तकल्पे पुरोवर्तिनि घटार्थिन: प्रवृत्तिं दुर्घटां मत्त्वा कल्पान्तरं शङ्कते **यदि चेति। पुरोवर्तिविशेष्यकत्वावच्छेदेनैवेति**। इदं ज्ञानं घटत्ववति पुरोवर्तिनि घटत्वप्रकारकमित्याकारकग्रहविषयत्वमित्यर्थ:। **अन्य**था प्रकृतविप्रतिपत्तौ तावत्पर्यन्ताविवक्षणे। **निर्धर्मितावच्छेदककेति**। घटत्वांशे धर्मितावच्छेदकानवगाहि घटत्ववति घटत्वप्रकारकमित्याकारकेत्यर्थ:।

तथा च साध्ये घटत्वप्रकारकत्वादिना ज्ञानप्रवेशे च। **कथमिति**। तादृशघटविशेष्यकघटत्वप्रकारकज्ञानग्राहकनानासामग्रीजन्ययावद्ग्रहविषयत्वस्य क्वचिदपि तद्व्यक्तावसम्भवादिति भाव:। पुरोवर्तिविशेष्यकत्वावच्छेदेन यदेतादृशसामग्रीजन्ययावद्ग्रहविषयत्वं तत्प्रामाण्ये साध्यत इति प्रातिस्विकरूपेण सामग्रीप्रवेशं मत्त्वा शङ्कते। **न चेति**। **एवं** सति पुरोवर्तिविशेष्यकत्वावच्छेदेनेत्यस्यावश्यकत्वे सति। **पुरो**वर्तिविशेष्यकमित्यादि तु पुरोवर्तिविशेष्यकत्वावच्छिन्नत्वं घटत्वप्रकारकतायामप्यस्तीति सोपपत्तिकं प्राक्प्रतिपादितं शिष्यबुद्धिवैशद्याय स्मारयि**तुमुक्तम्। अनियमादिति**। तथा च यत्रेदं ज्ञानं घटत्ववति घटत्वप्रकारकमित्येवानुव्यवसायस्तस्य पुरोवर्तिविशेष्यकत्वावच्छेदेन ज्ञानत्वानवगाहनात्तादृशसामग्रीजन्यग्रहविषयताया उक्तरूपाया ज्ञानत्वे दुर्लभत्वादित्याशय:। **प्रामाण्ये** तदेतत्सामग्रीजन्ययावद्ग्रहविषयत्वमेव साध्यते तच्च ज्ञानत्वे प्रसिद्धमेवोक्तरूपमपीत्याशयेन गूढाभिसन्धिरुत्तरयति। **ज्ञानत्वेति**। **एव**कारेण ज्ञानत्वधर्मितावच्छेदकतया तदवगाहिसामग्रीव्यवच्छेद:। **वस्तु**तोऽनुगतरूपेणैव सामग्रीप्रवेशस्यानुपदमुक्तत्वाद्व्यवसाये ज्ञानत्ववैशिष्ट्यमात्रस्य-पुरोवर्तिविशेष्यकत्वावच्छेदेन च तत् प्रकारकत्वमात्रस्यावगाहिनोऽनुव्यवसायादे: सामग्र्या: प्रवेशोऽपीष्टसिद्धिरेव तावन्मात्रादेव पुरोवर्तिनि प्रवृत्तिनिर्वाहादित्यभिप्रेत्योक्त**मास्ता**न्तावदिति।

चषकम्

न च नैयायिकानां मते केवलघटत्वादिप्रकारकत्वेन ज्ञानग्रहस्य ज्ञानत्वानुपस्थित्या ज्ञानत्वाविषयकत्वात् कथं तत्र तत्प्रसिद्धिस्तेषामिति **वाच्यम्**। ज्ञानत्वविशिष्टस्वाश्रयग्राहकत्वेन सामग्र्या विशेषणात्। **न चा**ग्रेऽप्रामाण्याग्राहकेत्यनेन प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टमतसिद्धिभिन्नेति विवक्षणीयं तथा च घटत्ववति घटत्वप्रकारकत्वमात्रेण ज्ञनत्वाविषयकग्रहस्य जनिकोक्तशाब्दादिसामग्री न ज्ञानत्वघटितप्रामाण्यग्राहिकेति तथा भट्टमतसिद्धैवेति तद्भिन्नसामग्रीजन्ययावद्ग्रहविषयत्वं यथाश्रुतेऽपि ज्ञानत्वेसुप्रसिद्धमेवेति **वाच्यम्**। ज्ञानत्वघटितप्रामाण्यस्य तादृशज्ञानत्वत्वेन पक्षत्वे ज्ञानत्वत्वस्य स्वतो ग्राह्यत्वानङ्गीकारात्तद्विशिष्टे तत्साधने बाधापत्या तद्वति तत्प्रकारकत्वत्वस्यैव पक्षतावच्छेदकत्वस्यानापत्या स्वीकरणीयत्वा**दत** एवेच्छावृत्तिनिरुक्तप्रामाण्यस्येच्छाग्राहकाग्राह्यत्वाद्बाधनिवृत्तयेऽस्य पक्षबहिर्भावाय ज्ञानप्रामाण्यमित्यत्र ज्ञानपदमिति पक्षधरमि**श्राः**। **इत्थं** न प्रामाण्याग्राहकत्वेनेत्यात्रापि तावद्रूपावच्छिन्नग्राहकत्वमेव विवक्षितमिति तथा भट्टमतसिद्धभिन्नापि सामग्री भवत्येवेति तज्जन्ययावद्ग्रहविषयत्वस्य यथाश्रुते ज्ञानत्वे प्रसिद्धेरसम्भवात्।

इदं ज्ञानमप्रमेत्याकारकस्य ज्ञानग्रहस्य जनिकया सामग्र्या प्रामाण्याग्रहाद्बाधवारणाया**प्रामाण्याग्राहकेति**। एकावच्छेदेन तद्वद्वृत्तिभिन्नत्वेन रूपेण प्रामाण्यविरोधित्वेन भ्रमत्वाप्रामाण्याभावयोरनुगमान्नान्यतरोपादानेऽन्यतरासङ्ग्रहेण बाधतादवस्थ्यम्। प्रामाण्यतदभावाद्योरप्येकत्र ज्ञाने विषयभेदावच्छेदेन सत्त्वा**देकावच्छेदेनेति**। **इत्थ**ञ्च व्याप्यवृत्तिज्ञानत्वादेरपि तथात्वे तदग्राहकज्ञानग्राहकसामग्र्यप्रसिद्धिरिति तद्वारणाय प्रमात्वावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववत् प्रमानिष्ठाधिकरणताकान्यत्वं तथा बोध्यम्। अव्याप्यवृत्तिप्रमात्वादेस्तद्विरोधित्ववारणायानवच्छिन्न**त्वान्तम्**। व्याप्यवृत्तिज्ञानत्वादेस्तथात्ववारणायावच्छिन्नत्वान्त**र्भावः**। इत्थञ्च निष्प्रकारकत्वसङ्ग्रहाय-**प्रमा**निष्ठेति। **अन्य**था नृसिंहाकारज्ञानानम्युपगमे निर्विकल्पकनिष्ठनिष्प्रकारकत्वाधिकरणताया व्याप्यवृत्तितया तत् सङ्ग्रहानापत्तेः।

तात्पर्यटीका

ज्ञानग्रहस्य शाब्दज्ञानग्रहस्य। ज्ञानत्वाविषयककेवलघटत्वादिप्रकारकत्व-प्रकारकज्ञानग्रहजनकसामग्र्यास्तदप्रामाण्याग्राहकेत्यस्य विवक्षणीयार्थेनैव वारणे किं ज्ञानत्वविशिष्ट स्वाश्रयग्राहकत्वेन सामग्रीविशेषणेनेतिशङ्कते। **न चाग्र इति**। **यथा**श्रुतेऽप्युक्तज्ञानत्वविशिष्टेति स्वाश्रयविशेषणेन विना कृतेऽपि। एवमग्रेऽपि। **अनायत्या स्वीकरणीयत्वादिति**। तेन प्रामाण्यशब्दस्य ज्ञानत्वघटितयोगरूढ्या ज्ञानत्वघटितप्रामाण्यार्थकत्वेऽपि न क्षतिरिति भावः। **अत** एव ज्ञानत्वाघटितप्रामाण्यस्य पक्षत्वादेव। अस्येच्छावृत्तिप्रामाण्यस्य। **इत्थञ्च** तद्वति तत्प्रकारकत्वमात्रस्य पक्षत्वे च। **ताव**द्रूपावच्छिन्नेति। तद्वति तत्प्रकारकत्वत्वावच्छिन्नेत्यर्थः। **सा** यथोक्तशाब्दसामग्री।

तदभावाद्योरित्यादिना भ्रमत्वपरिग्रहः। **इत्थ**ञ्चैकावच्छेदेनेत्युक्तौ च **तथात्वे** प्रामाण्यविरोधित्वे। **अनवच्छिन्नत्वान्तमिति**। अन्यथा प्रमात्वाधिकरणतायां प्रमानिष्ठायामवच्छिन्नत्वसत्त्वेनावच्छिन्नत्वाभाववत्तादृशाधिकरणताकान्यत्वरूपं प्रामाण्यविरोधित्वं प्रामाण्येऽपि स्यादित्यर्थः। **अवच्छिन्नत्वान्तर्भाव इति**। अन्यथा ज्ञानत्वाधिकरणतायां प्रमानिष्ठायां प्रमात्वावच्छेदकानवच्छिन्नत्वसत्त्वेन तदभाववत्तादृशाधिकरणताकान्यत्वरूपं प्रामाण्यविरोधित्वं ज्ञानत्वेऽपि स्यादित्यर्थः। **इत्थ**ञ्चावच्छिन्नत्वान्तर्भावे च। **अन्य**था प्रमानिष्ठेत्यनुक्तौ। **व्याप्यवृत्तितयेति** तथा चावच्छिन्नत्वघटितोभयाभावत्वं तस्यामक्षत-मित्युभयाभाववदधिकरणताकत्वमेव निष्प्रकारकत्वे स्यान्नतु तदन्यत्वरूपं प्रामाण्यविरोधित्वमिति भावः। **अत** एव नृसिंहाकारज्ञानानभ्युपगम इत्युक्तम्। अन्यथात्रैव निष्प्रकारकत्वाधिकरणताया उभयवत्त्वेनोभयाभाववदधि-करणतासामान्यकज्ञानत्वाद्यन्यत्वं यथाश्रुतेऽपि निष्प्रकारकत्वे स्यादिति प्रमानिष्ठेत्यनुपादेयमेव स्यात्।

चषकम्

न च मीमांसकमते प्रामाण्यग्रहस्य लौकिकप्रायतया भ्रमत्वग्रहकालेऽपि सम्भवेनालं भ्रमत्वानुगमप्रयासेनेति **वाच्यम्**। पीतत्वभ्रमकाले श्वैत्यप्रमेव

भ्रमत्वारोपात् **मानप्रामाण्यग्रह इति** तदनुगमस्यावश्यकत्वात्। **न चैवं** प्रामाण्यविरोधित्वस्य ज्ञानत्वव्यावृत्तत्वेऽपि प्रामाण्यस्य ज्ञानत्वरूपप्रामाण्याभावावच्छेदकधर्मग्रहकालीनग्रहाविषयत्वेन बाधतादवस्थ्यमिति **वाच्यम्**। पीतत्वारोपात्मक श्वैत्यप्रमाया असम्भवेऽपि तदात्मक श्वैत्यावच्छेदकशङ्खत्वप्रमावद्भ्रमत्वारोपात्मक प्रामाण्यप्रमाया अभावेऽपि प्रामाण्याभावावच्छेदकज्ञानत्वप्रमात्मकप्रामाण्यप्रमायां बाधकाभावात्। दोषघटिताया विरोध्यारोपसामग्र्या एव तद्विरोधिलौकिकप्रत्यक्षसामाग्र्यपेक्षया प्राबल्याभ्युपगमात्। **यदि** च यद्दोषजन्ये ज्ञाने यत्साक्षात्कारित्वग्रहस्तद्घटिततदारोपसामग्र्या एव तद्विरोधिलौकिकप्रत्यक्षसामग्र्यपेक्षया बलवत्त्वमतीन्द्रियभ्रमत्वारोपे च न तथा ग्रह इति तत्सामग्र्यास्तुल्यबलतया भ्रमत्वारोपात्माप्रामाण्यग्रहोऽपीष्यत एवेत्युच्यते।

तदा प्रमात्वघटकतद्वद्विशेष्यकत्वाभावाद्यनुगमेनैवोक्तप्रयाससाफल्यं बोध्यम्। तदभाववांस्तदवानित्याहार्यभ्रमे भ्रमत्वलौकिकप्रत्यक्षसम्भवाद्भ्रमत्वस्यातीन्द्रियत्वेऽपि विवदन्ते **बहवः**। घटत्वघटितप्रामाण्यग्राहकसामग्र्या घटे तत्प्रामाण्यविरोधिघटत्वादेरवश्यं ग्रहात् प्रकृतप्रामाण्यविरोध्यग्राहकज्ञानग्राहकसामग्र्या अप्रसिद्धेर्वारणाय **तदिति। न चैव**मपि स यः प्रामाण्यविरोधीत्यनेन प्रामाण्याभावादिमुद्रया प्रतिबन्धको यो विषयस्तदग्राहिकेति चेद्विवक्षितं **किंवा** तस्य यः प्रामाण्यविरोधीत्यनेन प्रामाण्यविरोधिज्ञानवृत्तिधर्मग्राहिकेति। **इत्थ**मपीदं निष्प्रकारकमिति ज्ञानीयनिष्प्रकारकत्वादिमतीत्यादिप्रामाण्यग्राहकसामग्र्या सामान्याभावमुद्रया सकलप्रामाण्यविरोधिनो निष्प्रकारकत्वस्य निर्विकल्पकज्ञानधर्मस्यापीदमंशे ग्रहात्तत्प्रामाण्यपक्षकेऽप्रसिद्धितादवस्थ्यमिति**वाच्यम्।** तस्मिन्नप्रामाण्याग्राहिकेति सप्तमीसमासाश्रयणेन निष्प्रकारकत्वादिप्रकारकज्ञानग्राहकसामग्र्यास्तत्प्रामाण्याश्रयसविकल्पकरूपतज्ज्ञानांशे प्रामाण्यविरोधिनिष्प्रकारकत्वादिग्राहकत्वाभावेन तथाविधायाः प्रसिद्ध्योक्तदोषानवसरात्। **अथैवं** सत्यन्यथाख्यात्यनभ्युपगन्तुर्गुरोर्मते प्रामाण्याश्रयज्ञानविशेष्यकाप्रामाण्यग्रहाप्रसिद्ध्या साध्याप्रसिद्धिः।

तात्पर्यटीका

लौकिकप्रायतयेति प्रामाण्याप्रामाण्यग्राहकसामग्र्योः सम्बलनेप्रामाण्यग्राहकसामग्र्या बलवत्त्वाभिप्रायम्। **श्वैत्यप्रमेवेति**। तथा च लौकिक्या अपि तत्सामग्र्या यथा दुर्बलताङ्गीक्रियते तथा प्रकृतेऽपीति भावः। **एव**मुभयाभावघटनया। **तदात्मकेति**। तथा च यथा पीतत्वारोपश्वैत्यावच्छेदकशङ्खत्वप्रमयोः सामग्र्योस्तुल्यबलतैवाङ्गीक्रियते तथा प्रकृतेऽपीति भावः।

शङ्खत्वप्रमावच्छङ्खत्वप्रमायामानुभविक्यामिवाकुतस्तर्हि भ्रमत्वारोपात्माप्रामाण्यग्रहो नेष्यत इत्यत आह **दोषघटिताया इति**। पित्तादिदोषविशेषघटिताया इत्यर्थः। **विरोध्यारोपेति** अन्यथा दोषघटितसंशयसामग्रीकालेऽप्येककोटिकप्रमापत्तेर्दुर्वारत्वादिति भावः। न तु विरोध्यवच्छेदकधर्मप्रमासामग्र्या अपीत्येवकारार्थः। **अतीन्द्रियभ्रमत्वारोपे चेति**। यत्रारोपस्तत्र तदभावस्य दुर्ग्रहतया भ्रमत्वस्यातीन्द्रियत्वमित्याशयः।

तद्वद्विशेष्यकत्वाभावादीत्यादिना निष्प्रकारकत्वपरिग्रहः। **विवदन्त इति**। तथा च भ्रमत्वारोपात्मा न प्रामाण्यग्रह इति तदनुगम आवश्यक इति भावः। **एवमपि** तदित्युक्तेऽपि **प्रामाण्याभावादीति**। **आदिना** तद्वद्विशेष्यकत्वाभावपरिग्रहः। **इत्थमपि** विवक्षाद्वयेऽपि। **तथा**विधायाः प्रामाण्याश्रयज्ञाने प्रामाण्यविरोध्यग्राहिकायाः। **एवं सति** प्रामाण्याश्रयज्ञानधर्मिकप्रामाण्यविरोधिप्रकारकग्रहाजनकत्वस्य सामग्रीविशेषणत्वे सति।

चषकम्

अथ ग्रहत्वाविवक्षया ज्ञानेऽप्रामाण्यावगाह्यजनिकेत्येव विवक्षितम्। गुरोरपीष्टभेदाग्रहात्तादृशविसम्वादीच्छाप्रसिद्धैवेति **मतम्**। तर्हीच्छाजनकत्वस्य ज्ञानजनकसामग्र्यां सर्वस्यामपि सत्त्वेन परिष्कृतेऽपि वाऽव्यावर्त्तकतयास्या विशेषणत्वेन यथाश्रुतेऽपि वा निरुक्तबाधो दुर्वार एवेति चेन्न। प्रामाण्यविरोधिप्रकारतानिरूपिततत्तज्ज्ञाननिष्ठविशेष्यतानिरूपकत्वेन ग्रहस्य

विवक्षणात्। गुरुमते भ्रमस्थले विभिन्नज्ञानगोचरयोरपि धर्मधर्मिणोर्विशेषण-विशेष्यभावोपगमात्र तत्तन्मतसिद्धाप्रामाण्यभ्रमस्याप्यसङ्ग्रह इत्याद्यग्रे व्यक्तीक**रिष्यते। एतेन** गुरुमते भ्रम इति व्यवहारविषयस्य ग्रहणस्मरणात्मकक्रमिकज्ञानद्वयरूपतया ग्रहणसामग्र्याः स्मरणजनकतयैव तादृशव्यवहारविषयतावच्छेदकावच्छिन्ना जनकतया तदवस्थबाधवारणाय धर्मगृहीतासंसर्गकस्वतन्त्राप्रामाण्यग्राहकसामग्र्यसमवहितार्थकमग्राह**कान्तम्**। असमवधानं च क्षणद्वयान्तर्भावेण समवधानाभाव इति मतमपा**स्तम्**।

स्मरणजनिकाया बाधप्रसञ्जिकाया ग्रहणसामग्र्या यथोक्तग्रहजनकतया यथाश्रुतेनैव वारणात्। **न च** यादृशप्रामाण्याश्रयज्ञाने कदाचिदप्यप्रामाण्यभ्रमो न जातस्तत्प्रामाण्यपक्षकस्थले तत्राप्रामाण्यग्राहकाप्रसिद्ध्या साध्याप्रसिद्धिरिति **वाच्यम्**। तत्प्रामाण्यपक्षके तादृशविशेषणस्यानुपादेयत्वात्। **अत्र** प्रत्यवतिष्ठन्ते **यद्य**पि ज्ञानं गुण इत्याकारकज्ञानग्रहो न प्रामाण्यं परिच्छिनत्तीति बाधवारणं विषयोपरक्तज्ञानग्रहः प्रामाण्यपरिच्छेदक इत्युक्त्यार्ऽ सम्भवति। **एवं** घटज्ञानं गुण इत्याकारकोऽपि ज्ञानग्रहो न तथेति बाधस्तद्धर्मप्रकारकत्वेन सविशेष्यकत्वेन च ज्ञानग्रहपर्यन्तविवक्षया वारयितुं शक्यते **तथापि** घटत्वप्रकारकमिदं ज्ञानं सविशेष्यकमिति ज्ञानग्राहकशब्दादेः प्रामाण्याग्राहकत्वाद्बाधो दुर्वारः। **ननु** विशेष्ये तत्प्रकारकतया ज्ञानस्य ग्राहकत्वं वक्तव्यं तत्र तस्य प्रकारत्वञ्च तद्गतवैशिष्ट्यप्रतियोगित्वरूपं वैशिष्ट्याग्रहे दुर्ग्रहम्। **अत** एव भ्रमे विशेष्यानुयोगिकविशेषणप्रतियोगिकालिकवैशिष्ट्यभानमभ्युपगच्छन्ति टीका**कृतः। न चा**लोके सन्निकर्षव्याप्तिवृत्तीनामभावात् कथं तद्भानमिति **वाच्यम्**। तावता प्रकारतया तस्य भानासम्भवेऽपि संसर्गतया भाने बाधकाभावात्।

तात्पर्यटीका

अथेति यदीत्यर्थः। **ग्रह**त्वाविवक्षयाऽप्रामाण्यग्राहकेत्यत्र ग्रहत्वाविवक्षया। **ज्ञाने** प्रामाण्याश्रयज्ञाने। अन्यथाख्यात्यनभ्युपगमेन विसम्वादीच्छासमानप्रकार-कज्ञानासम्भवादाहे**ष्ट**भेदाग्रहादिति। **मतं** विवक्षितम्। **परि**ष्कृतेऽपि वाप्रामाण्याश्रयज्ञानधर्मिकाप्रामाण्यावगाह्यजनिकेति विशेषणघटितेऽपि वा।

अव्यावर्त्तकतया निष्प्रयोजकतया। **अस्य** प्रामाण्याश्रयज्ञान-धर्मिकाप्रामाण्यावगाह्यजनिकेति विशेषणस्य। **अ**विशेषणत्वेनाघटनाया। इदञ्च यथाश्रुतत्वे हेतुः। अथैवं सतीति पूर्वपक्षं दूषयतीति **चेन्नेति**। **नन्वे**वं धर्मधर्मिणोर्विशेषणविशेष्यभावाभ्युपगमेऽन्यथाख्यातिर्दुर्वारेत्याशङ्क्याह। **व्यक्तीकरिष्यत इति**। तथा च धर्मधर्मिविषयकत्वं नास्माकं वैशिष्ट्यविषयतानियतं **किन्तु** पारिभाषिकमिति भावः। **एतेन** वक्ष्यमाणदूषणेन। **धर्मी**त्यादिविशेषणद्वयमप्रामाण्यग्रहस्येति बो**ध्यम्**।

यथोक्तं ग्रहजनकतयाप्रामाण्यविरोधिप्रकारतानिरूपिततत्तज्ज्ञानविशेष्यता-निरूपकग्रहजनकतया। **यथाश्रुतेनैवो**पदर्शितग्रहाजनकत्वविशेषणेनैव। बाधप्रसञ्जकसामग्रीतः प्रामाण्यग्राहकसामग्रीं विवेक्तुकामो यथाश्रुते बाधं दर्शयितुमाह **अत्र प्रत्यवतिष्ठन्त इति**। **तत्प्र**कारकतया तन्निष्ठप्रकारतानिरूपकतया। **तद्गतेति** विशेष्यगतेत्यर्थः। **नन्वे**वं भ्रमस्य तत्प्रकारकत्वं न स्यात्तत्र तस्य वैशिष्ट्याभावादत आह**ात एवेति**। प्रकारत्वस्य तद्गतवैशिष्ट्यघटितत्वादेवेत्यर्थः। **नन्वे**वं भ्रमस्यापि प्रामाण्यप्रसङ्ग इत्यत आहा**लीके**ति। तथा च प्रामाण्यघटकसंसर्गस्य सत्त्वेन विशेषणीयत्वाददोष इति तेषामा**शयः**।

चषकम्

पुरोर्तिनि घटत्वप्रकारकमिति शाब्दादिज्ञानस्य प्रकारताघटकत्वेन धर्मिनिष्ठघटत्वादिवैशिष्ट्यावगाहिनः प्रामाण्यावगाहितापीष्यत एवेति **चेन्न** प्रकारत्वस्य स्वरूपसम्बन्धरूपत्वात्। प्रागुक्तस्य तद्विशेष्यकभानविषय-वैशिष्ट्यप्रतियोगित्वस्यापि प्रकारत्वस्य तद्गतवैशिष्ट्याघटितस्यावगाहनं तु धर्मिगतवैशिष्ट्यानवगाहनेऽपि सम्भवति तत्कथं पुरोवर्तिनि घटत्वप्रकारकमिति ज्ञानस्य प्रामाण्यावगाहि**ता**। **अन्य**था तदभाववति तत्प्रकारकत्वरूपं भ्रमत्वं न गृह्येत। विशेष्ये तदभावग्रहे तद्वैशिष्ट्यग्रहासम्भवेन तत्प्रकारकत्वस्य दुर्ग्रहत्वा**देव**मेकत्र विरुद्धभावाभावोभयप्रकारकत्वरूपं संशयत्वमपि न निश्चीयेत **तस्मा**त्तद्गतवैशिष्ट्याघटिततद्विशेष्यकभानविषयवैशिष्ट्यप्रतियोगित्वरूप-

प्रकारतानिरूपकत्वप्रकारेणापि ज्ञानस्य ग्रहेण तद्गतवैशिष्ट्यगर्भप्रामाण्यानवगाहनाद्बाधो दुर्वार एवेति।

तत्र केचित्। अस्ति हि कस्याञ्चित् सामग्र्यां विषयग्रहनियमो व्यवसायघटितप्रत्यक्षसामग्रीतो विषयाविषयकव्यवसायभानाननुभवात्। कस्याञ्चिन्नास्तिज्ञानपदात्केवलाद्वस्तुतो विषयेणापि घटादिनाऽविशेषितस्यापि ज्ञानस्य शाब्दाद्यनुभवादिति सर्वजनसिद्धम्। **तत्र** स्वाश्रयविषयकग्रहोत्पत्तिप्रयोजकयादृशसामग्रीघटकं ज्ञानभानप्रयोजकं निखिलं कारणं विषयितासम्बन्धेन किञ्चिदनवच्छिन्ना या ज्ञानविषयिता तच्छालिग्रहत्वावच्छिन्नाजनकं तादृशसामग्रीजन्ययावद्ग्रहविषयत्वं विवक्षितम्। अनुव्यवसायादिसामग्रीघटकं निरुक्तं किञ्चिदपि कारणं न तादृशमस्ति यद्विषयानवच्छिन्नं ज्ञानं गृह्णाति। व्यवसायमनः संयुक्तसमवायादेर्विषयोपरागेणैव ज्ञानादिभासकत्वनियमाद्विषयविशिष्टव्यवसायविषयकग्रहत्वस्यैव तत्कार्यतावच्छेदकत्वात्।

तात्पर्यटीका

पुरोवर्तिनि वस्तुतो घटे। प्रकारत्वस्य तद्गतवैशिष्ट्यघटितस्य प्राथमिकानुव्यवसायविषयत्वमभ्युपगच्छतां नैयायिकानां प्रामाण्यग्रहस्वतस्त्वखण्डनाय विचारारम्भ एव महासाहसिकतेति तद्गतवैशिष्ट्याघटितमेव तैस्तन्निर्वाच्यमिति मन्वानः समाधत्ते **प्रकारत्वस्येति**। **प्रागुक्तस्य** सविकल्पकप्रसङ्गे मूल एव प्रपञ्चितस्य। **तद्विशेष्यकभानविषय**वैशिष्ट्यप्रतियोगित्वस्यापीत्यपिना स्वरूपसम्बन्धरूपप्रकारत्वपरिग्रहः। **अन्यथा** प्रकारत्वस्य तद्गतवैशिष्ट्यप्रतियोगित्वरूपत्वे। **न गृह्येतेति**। तत्र हेतुमाह। **विशेष्य इति**। तत्प्रकारकत्वस्य तद्गतवैशिष्ट्यप्रतियोगित्वरूपप्रकारतानिरूपकत्वस्य। **एवमिति**। एकत्र विरुद्धभावाभावोभयग्रहे तत्तदभाववैशिष्ट्यसंशयसम्भवेऽपि संशयत्वनिश्चयासम्भवादिति भावः। **तस्मा**त्प्रकारत्वस्य तद्गतवैशिष्ट्याघटितत्वात्। **ज्ञान**स्य ग्रहेणेदं पुरोवर्तिनि घटत्वप्रकारकमिति शाब्दबोधेन। **वैशिष्ट्यगर्भेति**। **इद**मुपलक्षणम्। भ्रमसाधारण्यवारणाय प्रामाण्यघटकसंसर्गे सत्त्वविशेषणावश्यकतया तद्ग्रहादपि बाधो बोध्यः।

केचित् पक्षधरमिश्राः। **अस्ति हीति।** **इति** सर्वजनसिद्धं निर्विवादमस्ति हि निश्चितमिति योजना। **इतीति** किं तदाह **कस्याञ्चि**त्सामग्र्यां विषयग्रहनियमः कस्याञ्चिन्नास्तीति। तत्र यथाक्रमं हेतुर्व्यवसायघटितसामग्रीत इति ज्ञानपदात्केवलादिति च तेषामभिमत इति दर्शयितुं कस्याञ्चिन्नास्तीत्यतः पूर्वमेव व्यवसायेत्यादिर्हेतुरुक्तः **तत्र** तयोः सामग्र्योर्मध्ये। **निरुक्तं** ज्ञानभानप्रयोजकम्। **विषयोपरागेणैवेति** विशेषणे तृतीया। तथा च विषयोपरक्तस्यैव ज्ञानादेरित्यर्थः। भासकत्वनियमादिति तत्कार्यतावच्छेद-कत्वादित्यत्र हेतुस्तथा चानुभवानुरोधिनः कार्यकारणभावस्य बलान्न विषयाविषयको व्यवसायविषयकोऽनुव्यवसाय इति भावः।

चषकम्

घटं जानातीत्यादौ ज्ञानांशे विषयान्वयबोधजनकतया ज्ञानभानप्रयोजकस्य योग्यताज्ञानादेरुक्तसामग्रीघटककतिपयकारणस्य विषयानवच्छिन्नज्ञानाग्राहक-त्वान्निखिलपदोपा**दानम्**। तथा च ज्ञाधातुजन्यज्ञानोपस्थितेर्निखिलकारणान्तर्गताया विषयानवच्छिन्नज्ञानग्रहजनकत्वात्तद्व्यावृत्तिः। अनुव्यवसायादिसामग्रीघट-कात्ममनो योगादेर्विषयानवच्छिन्नज्ञानस्मृतिं प्रत्यपि हेतुत्वात्तादृशसामग्रीसङ्ग्रहाय **ज्ञानभानप्रयोजकमिति।** तत्कार्यतावच्छेदककोटौ ज्ञानविषयत्वस्याप्यप्रवेशेन तस्यातथात्वात्। **गुरु**मतेऽपि ज्ञानसामान्यकारणात्ममनो योगादिजन्यैकज्ञानेज्ञाना-न्तरविषयकत्वानुपगमेनानात्मादीनां ज्ञानभानप्रयोजकत्वं **किन्तु** तत्तज्ज्ञानप्रागभावस्यैव तत्तज्ज्ञानभानप्रयोजकत्वमभ्युपगम्यते**ऽत एव** विनिगमकात्तस्य च विषयावच्छिन्नैव ज्ञानविषयिताजन्यतावच्छेदकेति तत् सामग्रीसङ्ग्रहः।

तदिदमुक्तं या सामग्री विषयमविषयीकुर्वती ज्ञानमपि न गृहणातीति। **विवे**चयिष्यते चेदमधिकमुपरिष्टात्। **अथै**वमपि घटज्ञानमित्यादिशब्द-जन्यशाब्दबोधसामग्रीवारणमशक्यमेव घटान्वितज्ञानविषयकशाब्दबोधे घटपदसाकाङ्क्षज्ञानपदज्ञानत्वेनैव हेतुत्वादाकाङ्क्षायाः पृथक्कारणत्वापेक्षया पदोपस्थितिकारणतायामवच्छेदकत्वे लाघवात्तदवच्छिन्नतत्पदोपस्थितेश्च

विषयानवच्छिन्नज्ञानविषयिताघटितधर्मावच्छिन्नस्वरूपयोग्यतापि नास्ति। **मणि**कारैरपि पदार्थोपस्थितिकारणतायामाकाङ्क्षाया अवच्छेदकत्व एव निर्भरः कृत इति **चेत्**। **किं चातः**। ज्ञानग्राहकताप्रयुक्तमेव यस्याविषयग्राहकत्वं तत्सामग्रीजन्ययावद्ग्रहविषयत्वं विवक्षितम्। यत्र ज्ञाने ज्ञानभासकमेव विषयभासकं विषयभानार्थं नाधिकमपेक्षितं तज्ज्ञानसामग्र्या विषयग्राहकत्वे च न ज्ञानग्राहकत्वं प्रयोजकम्। तत्र ज्ञानभानाप्रयोजकघटादिपदज्ञानस्याधिकस्य विषयभासकत्वात्।

तात्पर्यटीका

निखिलपदप्रयोजनं प्रदर्शयन्नेव शाब्दसामग्रीवारणं प्रदर्शयति **घटमित्यादि**। **उक्त**सामग्र्युपदर्शितशाब्दसामग्री। **विषयानवच्छिन्नज्ञानाग्राहकत्वादिति**। तथा च तादृशसामग्रीवारणाय निखिलपदमिति भावः। **विषयानवच्छिन्नज्ञानस्मृतिं प्रत्यपीति**। निरुक्तशाब्दबोधसामग्रीघटक-ज्ञाधातुजन्यज्ञानोपस्थितिं प्रत्यपीत्यर्थः। **तादृशसामग्रीसङ्ग्रहायानुव्यवसाया-दिसामग्रीसङ्ग्रहाय**। **ज्ञान**विषयत्वस्या- पीत्यपिना विषयविषयत्वपरिग्रहः। **एक**ज्ञाने घटज्ञानानुव्यवसायात्मनि। **ज्ञानान्तरेति** पटज्ञानेत्यर्थः। **तत्त**ज्ज्ञानप्रागभावस्यैवेत्येवकारेणात्मादिरूपं ज्ञानसामान्यकारणमात्रं व्यवच्छिद्यते। विशेषकारणस्य विनिगमकाभावात्तथाभावस्तु न वार्यते यद्वक्ष्यति **सर्वाण्येवेति**। **विषयावच्छिन्नैवेति** विषयितासम्बन्ध- घटितसामानाधिकरण्येन विषयावच्छिन्नैवेत्यर्थः **ज्ञान**विषयिताव्यवसाय- विषयितानुव्यवसायस्थाना-भिषिक्तस्वनिष्ठा।

एतादृशार्थप्राप**णा**यैव यादृशसामग्रीघटकस्योक्तयोग्यताज्ञानादेर्जन्य-तावच्छेदकता विषयितासम्बन्धावच्छिन्ना योग्यताघटकज्ञाननिष्ठा विषयिता-सम्बन्धेन केनचिदवच्छिन्नेत्युक्तौ प्रामाण्यस्य यथोक्तशाब्दसामग्रीजन्यग्रहा-विषयत्वाद्बाधो दुर्वार इति मत्त्वैव नञ्द्वयघटना दीधितिकृतामिति दर्शयति। **तदिदमुक्तमिति। इदमधिकमिति**। **इदं** नञ्द्वयघटनाप्रयोजनम्। **अधिकं** ज्ञानग्राहकत्वविषयग्राहकत्वयोर्व्याप्यव्यापकभावलाभाय नञ्द्वयघटनावश्य-

कीत्यादिकम्। **एवम**पीत्थं सामग्रीविशेषोपादानेऽपि। **तदवच्छिन्नतत्पदोपस्थितेः** घटपदसाकाङ्क्षज्ञानपदोपस्थितेः **विष**यानवच्छिन्नेत्यादि। घटान्वितज्ञानविषयक-शाब्दबोधत्वस्य तत्कार्यतावच्छेदकत्वादिति भावः। इत्थं मणिकृन्मतानुसारेण निरुक्तशाब्दबोधसामग्रीवारणस्याशक्यतां मन्यमानाः पक्षधरमिश्रा एव पक्षान्तरमनुसृतवन्त इत्यभिप्रेत्याह **किं चात इति**। तमेव पक्षं दर्शयति। **ज्ञानग्राहकताप्रयुक्तमेवेति**। **उक्त**सामग्र्याः घटज्ञानमित्यादिशब्दजन्य-शाब्दबोधसामग्र्याः।

चषकम्

अनुव्यवसायसामग्र्याविषयग्राहकत्वे च ज्ञानग्राहकत्वं प्रयोजकं तत्र ज्ञानभासकयोर्व्यवसायज्ञानधर्मिकविषयासंसर्गग्रहाभावयोरेव विषयभान-प्रयोजकत्वात्। **न च** व्यवसायधर्मिकविषयासंसर्गाग्रहस्य न ज्ञानभासकतेति **वाच्यम्**। गुरुमते ज्ञानभानं विना ज्ञानज्ञाने विषयभानाभावेन तत्र विषयभानमात्रस्यैव ज्ञानभाननियमे तस्य तथात्वाभ्युपगमात्। **अन्यथा** विषयासंसर्गाग्रहस्य केवलविषयग्राहकत्वे **व्य**वसायासंसर्गाग्रहासत्त्वे केवलविषयभानापत्तेर्दुर्वारत्वात्।

अस्माकं तु तस्यापि ज्ञानग्राहकत्वेन तत्र च जनयितव्ये सहकारिभूतज्ञानासंसर्गाग्रहासत्त्वादेव नापत्तिः। **यत्तु** प्रयोजकत्वञ्चात्र ज्ञानविषयितावच्छिन्नजनकत्वम्। **तथा** हि। यस्या जन्यन्तावच्छेदकज्ञान-विषयितावच्छिन्नं यस्य विषयग्राहकस्य जन्यत्वं तदीयविषयग्राहकतायाः प्रयोजिका सा ज्ञानग्राहकता भवति। अस्ति हि घट इति व्यवसायस्य घटविषयके स्वस्य ज्ञाने जनकत्वमिति। **तत्र**। ज्ञानपदसमभिव्याहृतत्वेन घटपदज्ञानस्य विषयग्राहकस्य ज्ञानविषयिताया अपि जन्यतावच्छेदकत्वेन तत्सामग्रीसाधारणत्वात्। **किन्तु** यथैतद्बोधजनके वाक्ये तत्पदसत्त्वादस्य बोधस्यैतद्विषयकत्वमित्यादिव्यवहारसिद्धः स्वरूपसम्बन्धविशेषोऽस्ति। **न हि** घटज्ञानबोधे ज्ञानपदाज्ज्ञानभानमितिवद्घटपदाज्ज्ञाभानमित्यपि व्यवहारः। विषयोपस्थितिं विनापि ज्ञानस्य शाब्दबोधे बहुशो भानं न तु ज्ञानोपस्थितिं

विना क्वचिदपीतीति ज्ञानविषयोपस्थापकपदयोर्विशेषात्। **एवं** प्रकृते व्यवसायस्य ज्ञानग्राहकत्वाद्विषयग्राहकत्वमिति व्यवहारः सर्वेषामपि।

तात्पर्यटीका

तत्रानुव्यवसाये। **व्यव**सायेत्यादि। व्यवसायश्च ज्ञानधर्मिकविषयासंसर्गग्रहाभावश्च तयोरित्यर्थः। **ज्ञानधर्मिकेति**। व्यवसायधर्मिकेत्यर्थः। व्यवसायधर्मिकविषयासंसर्गाग्रहस्य विषयभासकत्वमेव न तु तत्कार्यतावच्छेदककोटौ ज्ञानविषयतापि प्रविष्टेत्यभिप्रेत्य नैयायिकः शङ्कते **न च व्यवसायेति**। **न ज्ञानभासकतेति**। विशेष्यधर्मिकप्रकारासंसर्गाग्रहहेतुत्वेन गतार्थतया निर्विषयकत्वग्रहस्य सविषयकत्वमात्रग्रहविरोधितयान्यसम्मतत्वेन च ज्ञानभानं प्रति तद्धेतुत्वे मानाभावादित्याशयः। ज्ञानग्राहकत्वे विषयग्राहकताप्रयोजकत्वं व्यवस्थापयितुं व्यवसायधर्मिकविषयासंसर्गाग्रह- जन्यतावच्छेदककोटौ ज्ञानविषयिताप्रवेशं समर्थयन्मीमांसकः समाधत्ते। **ज्ञानभानं विनेति**। **ज्ञान**ज्ञाने व्यवसायात्मनि। **तत्र** ज्ञानज्ञाने। **विषय**भानमात्रस्य विषयविषयितासामान्यस्य। **तस्य** व्यवसायधर्मिकविषयासंसर्गाग्रहस्य। **तथा**त्वाभ्युपगमाज्ज्ञानभानत्वावच्छिन्नं प्रति हेतुत्वाभ्युपगमात्। **अन्यथा** ज्ञानभानत्वस्य व्यवसायधर्मिकविषयासंसर्गाग्रहकार्यतावच्छेदक- कोटिप्रवेशानङ्गीकारे। **विषया**संसर्गाग्रहस्य व्यवसायधर्मिकविषयासंसर्गाग्रहस्य। **केवल**विषयग्राहकत्वे विषयविषयकग्रहत्वपर्याप्तकार्यतावच्छेदकताकत्वे। **व्यवसायासंसर्गाग्रहासत्त्वे नेदं** घटचाक्षुषादीत्यादिव्यवसायधर्मिक- चाक्षुषभेदग्रहसत्त्वे। इदानीमपि घटचाक्षुषवानिति विशिष्टानुव्यवसायस्य कस्याप्यसम्मतत्वात्तावतैव मिश्रमतसङ्ग्रहादन्यथा प्रामाण्यस्य स्वतो ग्राह्यता न स्यादिति भावः। **केव**लविषयभानापत्तेर्व्यवसायाविषयकविषयग्रहस्यापत्तेस्तथा चोक्तो नियमो भज्येतेत्याशयः।

अस्माकं तु ज्ञानभानत्वस्य व्यवसायधर्मिकविषयासंसर्गाग्रहस्यापि कार्यतावच्छेदककोटिप्रवेशाभ्युपगन्तृणां तु। **तस्यापि** व्यवसाये

विषयासंसर्गाग्रहस्यापि। **ज्ञान**ग्राहकत्वेन गुरूणां चक्षुःसंयोगस्येव विषयविषयक व्यवसायविषयकग्रहं प्रति जनकत्वेन। **तत्र चेति**। व्यवसायविषयके च ग्रह इत्यर्थः। **ज्ञानासंसर्गाग्रहासत्त्वादेवेति**। यथोक्तासंसर्गग्रहसत्त्वादेवेत्यर्थः। **नापत्तिरिति**। विषयविशिष्टज्ञानविषयकत्वस्य व्यापकं ज्ञानविषयकत्वं तदवच्छिन्नसामग्रीघटको यथोक्तो ज्ञानासंसर्गाग्रहोऽपि तदसत्त्वे च न व्याप्यधर्मावच्छिन्नसामग्री स्वस्य कार्यमपि जनयितुमीष्ट इत्याशयः। ज्ञानग्राहकतानिष्ठत्वार्थं व्याचष्टे **यस्या इति**। **ज्ञानपदेति**। ज्ञानपदसमभिव्याहृतं घटपदमिति ज्ञानस्येत्यर्थः। दृष्टान्तपुरःसरं स्वरूपसम्बन्धविशेषे प्रमाणं दर्शयितुमाह **किन्तु यथेति**। तव ज्ञानविषयितावच्छिन्नजनकत्वस्योभयसाधारण्येऽपि स्वरूपसम्बन्धविशेषस्यासाधारण्यमेवेत्याह **विशेषादिति**। **सर्वेषामपीति**। **अस्तीत्यनुषञ्जनीयम्**। तेन प्रकृतेऽप्यसावनपायीति भावः।

चषकम्

नन्वेतावतानुव्यवसायादिस्थलेऽपि तुल्यकालसम्बन्धिनोर्ज्ञानविषयभानयोरिव तथाविधयोः सामग्रीनिष्ठज्ञानविषयभासकतयोरपि न प्रयोज्यप्रयोजकभावः स्यात्तथा च यथाश्रुतेऽप्रसिद्धिः। **स्याद्वा** घटज्ञानमित्यादिशाब्दबोधरूपज्ञानग्रहस्य विषयग्रहरूपतया तत्सामग्रीनिष्ठज्ञानग्रहोपधानरूपज्ञानग्राहकताया विषयग्रहोपधानरूपविषयग्राहकतातो भिन्नतया तुल्यप्रयोजकप्रयुक्ततेत्**थञ्चो**क्तो बाधो दुर्वार इति **चेन्निःप्र**तिभोऽसि। यादृशसामग्रीजन्यग्रहे विषयभानं ज्ञानभानप्रयोजकत्वेन ज्ञानभानप्रयोजकप्रयुक्तं तत्त्वं सामग्र्या विशेषणं परिष्कृतं **वाच्यम्** घटज्ञानपदाद्यात्मकसामग्र्यास्तु ज्ञानपदाधीनं ज्ञानग्राहकत्वं न त्वेतावन्मात्राधीनं घटग्राहकत्वं **किन्तु** घटपदाधीनमपीति विषयभासकमध्यनिविष्टघटपदाद्यसङ्ग्राहकत्वेन ज्ञानभानप्रयोजकत्वस्य विषयभासकतानवच्छेदकत्वात्तद्व्युदासः।

इत्थञ्चैकयैवोपसन्दानिक्या शक्त्या विषयोपरक्तज्ञानग्राहकेण प्रमापदेन प्रामाण्यग्राहिणा सिद्धसाधनवारणाय **यावदिति**। तद्धि

धात्वर्थतावच्छेदकज्ञानत्वपुरस्कारेणैव ज्ञानमभिधत्ते। **नत्व**नुभवत्वपुरस्कारेणेति न ज्ञानत्वघटितप्रामाण्याग्राहकता। **कथं** तर्हि स्मृतिव्यावृत्तः प्रमाव्यवहारशास्त्र इति **चेत्** स्मृतिहेतोः प्रमाणान्तरतापत्तेर्भीतास्तु तान्त्रिकाः शास्त्रे प्रमाव्यवहारौपयिकं स्मृतिव्यावृत्तं रूपं परिभाषन्ते। **एव**मेकयैव शक्त्या विषयघटितमूर्तिकभ्रमत्वविशिष्टबोधकेन भ्रमपदेन प्रामाण्याग्रहादेव बाधवारणाय तदप्रामाण्येत्यादि। **न च** भ्रमपदस्य प्रामाण्याश्रयाग्राहकत्वान्न प्रामाण्यस्य तदग्राह्यत्वेऽपि बाध इति **वाच्यम्**। प्रमाया अप्यंशे भ्रमत्वसम्भवेन भ्रमपदस्य तादृशज्ञानबोधकतया प्रामाण्याश्रयबोधकत्वादशक्यतयैव चान्यांशेऽपि प्रामाण्याग्राहकत्वस्य निर्व्यलीक**त्वाच्च**।

तात्पर्यटीका

प्रयोज्यप्रयोजकभावे पौर्वापर्यं तन्त्रं तच्च प्रकृते न सम्भवतीत्याह। **तुल्यकालसम्बन्धिनोरिति**। **तथा**विधयोस्तुल्यकालसम्बन्धिनीः। **ननु** ग्रहोपधानमेव ग्राहकत्व**मित्थञ्च** विषयग्राहकत्वाभेद एव ज्ञानग्राहकत्वे प्रयोजकत्वं नामेत्यत आह **स्याद्वेति**। **इत्थ**ञ्च शाब्दसामग्र्यामपि ज्ञानग्राहकताया विषयग्राहकताप्रयोजकत्वे च। **उक्तो** बाध उक्तशाब्दसामग्रीजन्यग्रहविषयत्वस्य प्रामाण्ये बाधः। यादृशसामग्रीजन्यग्रहे विषयभानस्य प्रयोजकत्वादन्यून-वृत्तिज्ञानभानस्य प्रयोजकत्वं सा सामग्री प्रकृते विवक्षितेति शाब्दसामग्रीव्यावृत्तिः सुकरेत्याह। **निःप्रति**भोऽसीति। **प्रतिभा नवनवोन्मेषशालिनी मतिस्त**द्रहितोऽसि परिष्कर्तुं न ज्ञानासीति फलितोऽर्थः।

एवं विवक्षणे पूर्वोक्तं यावत्पदप्रयोजनं न सम्भवति यतस्तत्रानुमितौ पक्षधर्मताज्ञानाधीनं ज्ञानग्राहकत्वं न ह्येतावन्मात्राधीनं विषयघटित-प्रामाण्यग्राहकत्वं किन्तु व्याप्तिज्ञानाधीनमपीति तस्य प्रयोजनान्तरं दर्शयति। **इत्थञ्चेति**। **ननु** प्रमा यथार्थोऽनुभव इत्युक्तं तथा च ज्ञानत्वघटितप्रामाण्यस्य प्रमापदाग्राह्यत्वात्कथं सिद्धसाधनमित्याशङ्कां वारयति। **तद्धीति**। पूर्वग्रन्थविरोधं परिहर्तुं शङ्कते **कथं तर्हीति**। **शास्त्रे** प्रमायाः करणमित्यत्र अप्रामाण्याग्राहकेत्यस्यापि प्रयोजनं पूर्वोक्तमुक्तविवक्षायां न सम्भवति।

ज्ञानग्राहकसन्निकर्षातिरिक्ताया भ्रमत्वोपस्थितेर्विषयभाननियामकत्वादिति तस्यापि प्रयोजनान्तरं दर्शयति। **एवमिति**। कथं तर्हि भ्रमपदे न प्रामाण्याग्रह इत्यत आहा**शक्यतयैव चेति** तस्य भ्रममात्रशक्तत्वादिति भावः। **यदुक्त**वान् भ्रमत्वविशिष्टबोधकेनेति।

चषकम्

सर्वधीयाथार्थ्यमतेऽपि भ्रमपदं तदभाववद्धर्मिसाकाङ्क्षतद्विषयकज्ञानत्वेन तत्प्रमामेव बोधयतीति किमनुपपन्नमिति समादधिरे। **तदपरे** न मन्यन्ते। गुरुमते व्यवसायसामग्र्या अपि न ज्ञानभानप्रयोजकत्वेन घटादिरूपविषय-ग्राहकता। तथा सति ज्ञानं गुण इत्याद्याकारकघटज्ञानादिबोधेऽपि ज्ञानभानप्रयोजकसत्त्वेन घटादिभानप्रसङ्गात्। **किन्तु** घटतत्सन्निक-र्षादिसमुदायत्वेनैवे**ति** कथं तत्सामग्रीसाधारण्यम्। **यदि** च विषयभानप्रयोजकसमुदायसत्त्वे ज्ञानभाननियमेन विषयभानप्रयोजकत्वेन ज्ञानभानप्रयोजकत्वाभ्युपगमे क्षतिविरहाद्यत्र ग्रहे ज्ञानविषययोरेकतर-भानप्रयोजकत्वेनापरभानप्रयोजकता तद्ग्रहसामग्रीविवक्षाया गुरुमतसाधारण्य-मित्युच्यते **तथा**पि मिश्रमते दुर्वचमेकप्रयोजकप्रयोज्यत्वमन्यूनानतिप्रसक्तं ज्ञानविषयभानयो**स्तथाहि**। **यथाश्रु**तस्य तस्य योग्यताज्ञानादिकमादाय घटज्ञानमिति शाब्दबोधादिगततदुभय[illegible]ानसाधारणत्वाद्बाधतादवस्थ्यात्।

एकप्रयोजकत्वेनापरप्रयोजकताविवक्षणे चानुव्यवसायसामग्रीघटक-व्यवसायादेर्ज्ञानविषययोरेकतरभासकत्वेनापरभानप्रयोजकत्वे केवलज्ञानग्रहे विषयस्य कवेलविषयग्रहे च ज्ञानस्य भानप्रसङ्गाद्विनिगमनाविरहप्रसङ्गात्तु व्यवसायादिघटितसामग्र्या एव ज्ञानभानप्रयोजकत्वेन विषयभानप्रयोजक-त्वोपगमासम्भवेन तादृशसामग्र्या एवासङ्ग्रहात्। विषयभानप्रयोजकत्वस्याति-प्रसक्तत्वान्न विनिगमनाविरह इति चेज्ज्ञानभानप्रयोजकत्वस्याप्यति-प्रसक्तिरस्त्येवेति कथं मिश्रमतसाधारण्यम्। **ननु** यस्मिन् ज्ञाने विषयमानं ज्ञानभानाप्रयोजकाप्रयुक्तं तज्ज्ञानसामग्र्येव विवक्षणीया। घटज्ञानमित्यत्र

ज्ञानभानाप्रयोजकं घटपदं ज्ञाने घटभाने प्रयोजकमित्यत एव तद्व्युदासः। **अनु**व्यवसाये तु विषयभानप्रयोजको व्यवसाय एव स च न ज्ञानभानाप्रयोजक इति तत्सामग्रीसङ्ग्रहः। गुरुमते व्यवसायस्य सर्वाण्येव कारणानि व्यवसायसामग्रीत्वेनाविशेषेण ज्ञानभानप्रयोजकान्यतो न तदतिरिक्तस्य विषयभानेऽपेक्षेति तादृशसामग्रीसङ्ग्रह इति **चेन्न** घटज्ञानवान् घटेच्छावत्त्वादित्यनुमित्या तदग्रहेण बाधप्रसङ्गात्।

तात्पर्यटीका

ननु तथापि गुरुमते तदप्रामाण्येत्याद्यनर्थकमेव तैर्भ्रमानभ्युपगमादत आह **सर्वधीयथार्थ्यमतेऽपीति**। तैरपि भ्रमपदव्यवहार्यं किञ्चिदभ्युपगन्तव्यमेवेति तद्ग्राहकसामग्रीकालीनशाब्दबोधे तुल्ययुक्त्या बाधवारणाय तदप्रामाण्येत्याद्यावश्यकमित्याह **भ्रमपदमिति**। किं व्यवसायघटितसामग्र्या ज्ञानभानप्रयोजकत्वाद्विषयभासकतोऽत ज्ञानभानोपधायकतावच्छेदकघटतत्सन्निकर्षसमुदायत्वा**दाद्ये तथासतीति**। **द्वितीये किन्त्विति**। **इति कथमिति**। ज्ञानभानप्रयोजकत्वस्य विषयभानप्रयोजकतानवच्छेदकत्वादिति भावः। **यद्यपि** विषयभानप्रयोजकत्वेन ज्ञानभानप्रयोजकता यस्मिन् ग्रहे तत् सामग्री विवक्षयैव गुरुमतसाधारण्यं **तथा**पि मुरारिमिश्रमतसाधारण्यार्थमाह **ज्ञानविषययोरिति**। **यथा**श्रुतस्य ज्ञानविषययोरेकतरभानप्रयोजकप्रयोज्यत्वस्य।

केवलज्ञानग्रहे ज्ञानं गुण इति शाब्दबोधो। **केवल**विषयग्रहे च व्यवसाये च। **ननु** यथा गुरुमते व्यवसायसामग्रीसत्त्वे ज्ञानभाननियमस्तथा मिश्रमते व्यवसायादिघटितसामग्रीसत्त्वे विषयभाननियम इत्येतादृशसामग्र्यां ज्ञानभानप्रयोजकत्वेन विषयभानप्रयोजकतास्त्वत आह**विनिगमनाविरह-प्रसङ्गात्विति**। तथा चास्या विषयभानप्रयोजकत्वेन ज्ञनभानप्रयोजकतापि सम्भवतीति विनिगमनाविरह इति भावः। **व्यव**सायादिघटित सामग्र्या एवेत्येवकारेण शाब्दसामग्रीव्यवच्छेदः। अतिप्रसक्त्या नियम्यनियामकभावा-

सम्भवं दर्शयित्वावच्छेद्यावच्छेदकभावासम्भवमपि शङ्कोत्तरभावेन दर्शयति। **विषयभानेति**। ज्ञानभानप्रयोजकत्वेनेत्यत्रानतिरिक्तवृत्तित्वरूपमवच्छेदकत्वमभिप्रेतमिति शङ्कते। **नन्विति**। **अनुमित्येति**। अनुमितौ घटभाने ज्ञानभानप्रयोजकस्यैव परामर्शस्य प्रयोजकत्वमित्यभिमानः।

चषकम्

न चात्र ज्ञानग्राहकतायां व्यापकत्वं घटग्राहकतायां तदवच्छेदकत्वमिति नैकमुभयग्राहकतायां प्रयोजकम्। **कथ**मन्यथा परामर्शघटितसामग्रीवैचित्र्याभावेन विधेयता तदवच्छेदकत्वरूपविषयतावैचित्र्यमिति **वाच्यम्**। तथा सति प्रमापदेऽपि शक्तितदवच्छेदकत्वयोरेव ज्ञानविषयग्राहकतायां प्रयोजकत्वापत्या यावत्पदवैयर्थ्यापाता**दव्या**पकस्य तथानुमितिविषयत्वेऽतिप्रसङ्गस्य व्यापकतावच्छेदकत्वेनेव शक्यतया ज्ञातस्यापि तथा शाब्दधीविषयत्वेऽप्यस्य शक्यतावच्छेदकत्वेनैव निरासात्। **अन्यथा**खण्डशक्तिवादिनामिवावच्छेद्यावच्छेदकभावस्य नियन्तुमशक्यत्वात्। **नन्व**व्यापकस्यैव तथा भाने व्यापकतावच्छेदकत्वं नियामकं प्रकृते च शक्तेरपि तथा भाननियामकता सम्भवति।

शक्तिविषयतावैचित्र्यादेव शाब्दविषयतावैचित्र्योपपत्तेरिति **चेन्न**। शक्यतावच्छेदके शक्तेः सत्त्वेऽपि तस्याग्रहस्य गोत्वांशे शक्यत्वावगाहिनः स्वरूपतो गोत्वावगाहनासम्भवेन स्वरूपतस्तद्बोधेऽनुपयोगात्तदवच्छिन्नशाब्दबोधे तदवच्छिन्नशक्तिग्रहस्यैवोपयोगावश्यम्भावात्। **तथा** हि गोत्वविषयकत्वे सति गोविषयकत्वरूप गोत्वविशिष्टविषयकत्वशालिबोधजनकत्वप्रकारकस्य पदधर्मिकस्य गोशक्तं गोपदमित्युभयविषयकशक्तिग्रहस्य हेतुत्वापेक्षया गोपदजन्यबोधविषयत्वप्रकारकस्य गोत्वावच्छिन्नधर्मिकस्य गौर्गोपदाद्बोद्धव्य इति शक्तितदवच्छेदकत्वग्रहस्य हेतुत्वे लाघवा**द्विना**पि लक्षणा लक्ष्यतावच्छेदकस्येव विनापि शक्तिं शक्यतावच्छेदकस्य बोधसम्भवाच्च किं कुब्जशक्त्या।

तात्पर्यटीका

कथमिति। ज्ञानघटयोर्विधेयतातदवच्छेदकत्वरूपविषयतावैचित्र्यमिति योजना। **तथा** सत्युक्तानुमितौ विधेयतत्त्वावच्छेदकोभयग्राहकतायामेकस्य प्रयोजकत्वाभावेऽभिप्रेते सति। **यावत्पदवैयर्थ्यापातादिति**। भवदुक्तयावत्पदप्रयोजनासङ्गत्यापत्तेरित्यर्थ:। अगृहीतशक्तिकस्य शाब्दबोधविषयत्वेऽतिप्रसङ्गमाशङ्क्य **यत्रोभयो: समो दोष: परिहारोऽपि वा सम** इत्यभिप्रायेणोत्तरयति। **अव्यापकस्येति**। **अस्या**तिप्रसङ्गस्य **अन्य**थावच्छेदकत्वस्य तथा भाने नियामकत्वानङ्गीकारे। नियन्तुमशक्यत्वान्नियामकस्य दुर्लभत्वेन नियमस्यानुपपत्ते:। तत्रोभयत्र दृष्टान्त:। **खण्डशक्तिवादिनामिवेति**। **फला**नुकूलव्यापारेति व्यापारजन्यफलेति वावच्छेद्यावच्छेदकभावानवगाहिबोधोदयादित्याशय:। उक्तानुमितिशाब्दबोधसामग्रयोर्वैचित्र्यप्रदर्शनव्याजेन बाधं यावत्पदवैयर्थ्यञ्चोद्धर्त्तुं शङ्कते **नन्विति**। **नियामकमिति**। अगत्योपेयत इति कथं बाध इति शेष:। **सम्भवतीति**। ईश्वरेच्छायास्त्रिष्वपि सम्भवादेकप्रयोजकप्रयोज्योभयग्राहकताकत्वेन प्रमापदजन्यशाब्दसामग्रीसङ्ग्रहाद्यावत्पदमर्थवदिति भाव:।

शक्तिविषयतावैचित्र्यादिति। ईश्वरेच्छायास्तत्पदजन्यबोधविषयताप्रयोजक: सम्बन्धस्तत्र तत्पदशक्तिरिति व्यपदेशनियामक:। घटपदाद्घटो बोद्धव्य इत्येतादृशेच्छायां च घटत्वावच्छेदेन बोधविषयत्वमवगाहमानायां समवायावच्छिन्नं बोधविषयतावच्छेदकत्वं घटत्वे संसर्गमर्यादया भासते। एवं चाश्रयतासम्बन्धावच्छिन्नबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वं **घट**स्यावच्छेदकतासंसर्गावच्छिन्ना घटविशेषणतापन्नबोधविषयत्वस्य या प्रकारता तन्निरूपितविशेष्यत्वं **घट**त्वस्य घटत्वबोधविषयत्वयो: संसर्गविधया भासमानेऽवच्छेदकत्वेऽवच्छेदकतया भासमानत्वं **सम**वायस्येति त्रयाणां वाच्यत्वोपपत्ति:। **इत्थं** घटघटत्वसंसर्गेषु सङ्केतविषयतानां मिथो वैलक्षण्येऽपि तन्निरूपितबोधविषयत्वप्रकारताया ऐक्याच्छक्त्यैक्यप्रवाद:। **किं कुब्जशक्त्येति**। एतेन यदुक्तं शक्तेरपि तथा भाननियामकता सम्भवतीति तदपाकृतमिति भाव:।

चषकम्

अधिकमस्मत्कृतशक्तिवादव्याख्यायामनुसन्धेयमिति न निरुक्तैक-प्रयोजकप्रयोज्यत्वमिति कथं सिद्धसाधनावसरः। **ननु** माभूत् प्रामाण्यस्य प्रमापदग्राह्यतया सिद्धसाधनं तथापि विशेष्यताप्रकारतोपनायक तज्ज्ञानकालीनानुव्यवसायसामग्रीग्राह्यतया सिद्धसाधनं दुर्वारमेव तादृशसामग्र्यापि विषयग्रहे व्यवसायातिरिक्तानपेक्षणात्। **वस्तु**तस्तु शक्यतावच्छेदकत्वस्य ज्ञानभानाप्रयोजकस्य विषयभानप्रयोजकत्वे व्यपदाद्गुणवत्त्वेन द्रव्यं बोद्धव्यमित्याधुनिकसङ्केतसाधारणशक्तिग्रहाद्द्रव्यत्वेन द्रव्यबोधापत्तिः समानविशेष्यतावच्छेदकत्वादिघटितप्रत्यासत्यादिना साधारणरूपेणैवशक्ति-ग्रहहेतुत्वाङ्गीकारात्। **अत्र** तद्व्यावर्तकविशेषणदाने त्वाधुनिकसङ्केतधियः पृथक्कारणताकल्पनागौरवं स्यादिति तद्बोधवारणाय शक्यत्वस्यैव विषयभानप्रयोजकत्वमावश्यकमित्येकप्रयोजकप्रयोज्यत्वं तत्राप्यक्षतमेवेत्येव **ज्यायः**।

गवांशे शक्यत्वावगाहिनः शक्तिग्रहस्य स्वरूपतो गोत्वावगाहितयैव तथा शाब्दबोधनिर्वाहादिति **चेन्न**। भट्टमतेऽसम्भवात्। ज्ञाततालिङ्गकानुमित्यापि विषयग्रहे व्यापकतावच्छेदकताया एव नियामकतया स्वहस्तितत्वा-दुक्तानुमितिसामग्र्या यथोक्तविशेषणानाक्रान्तत्वात्। **न च** ज्ञाततालिङ्गकत्वमेकमेवविषयविशिष्टज्ञानरूपसाध्यस्यानुमितौ भाने तन्त्रमिति **वाच्यम्।** अनुमितिसामग्र्याः साध्यग्राहकत्वे लिङ्गविशेषस्येच्छालिङ्गकज्ञानानुमितौ व्यभिचारेणातन्त्रत्वात्। **ज्ञात**तामात्रेण ज्ञानमात्रानुमानसम्भवादन्वयव्यभिचाराच्च। **व्यव**सायसापेक्ष तथानुमितौ तत्तन्त्रमित्यपि प्रजल्पन्नत एव समा**हितः**। **ननु** लिङ्गभेदभिन्नपरामर्शहेतुताया आवश्यकतया घटेच्छालिङ्गकपरामर्शस्येव ज्ञाततालिङ्गकपरामर्शस्य शुद्धज्ञानत्वावच्छिन्नव्याप्त्यवगाहिनोऽपि विषयो-परक्तज्ञानानुमितित्वमेव जन्यतावच्छेदकमुपगन्तव्यमिति तद्घटितसामग्र्यां ज्ञानभानप्रयोजकमात्रप्रयोज्यविषयग्राहकताकत्वमक्षतमेवेति **चेन्न**।

तात्पर्यटीका

नन्वेवं द्रव्यपदाद्गुणवत्त्वेन द्रव्यं बोद्धव्यमित्याधुनिकस्य सङ्केतस्य ग्रहाद्द्रव्यत्वेन द्रव्यबोधापत्तिरनुपदं वक्ष्यमाणा दुर्वारैव द्रव्यत्वस्य बोधविषयताप्रयोजकेच्छासम्बन्धाभावेऽपि बोधविषयताप्रकारताया विशेष्यताव- च्छेदकत्वादत आहा**धिकमिति**। तथा च द्रव्यत्वस्य यथोक्तसङ्केतग्रह- विशेष्यतावच्छेदकत्वेऽपि गुणवत्त्वेन द्रव्यबोधं प्रत्येव गुणवत्त्वावच्छिन्न- बोधविषयत्वावगाह्याधुनिकसङ्केतग्रहस्य हेतुत्वान्तरं कल्प्यमित्यादीति भावः। अत एवास्वरसा**द्वस्तुतस्त्विति** वक्ष्यति। नैयायिकमते सिद्धसाधनस्योद्भाव- नीयत्वात्तेषाञ्च विशेषणधियोपेक्षणात्तज्ज्ञानकाली**नेत्युक्तम्** तदुपदर्शितमपि सिद्धसाधनमस्त्येवेति किं सिद्धसाधनस्थलान्तरगवेषणेनेत्यभिप्रायवानाह। **वस्तुतस्त्विति**। गुणवत्त्वेनेति तृतीयाबलाद्गुणवत्त्वं तत्पदजन्य- बोधविषयत्वेनेच्छाविषयत्वाद्विशेषणं द्रव्यत्वं तूपलक्षणमिति बोध्यम्। **सा**धारणरूपेणैवाधुनिकसङ्केतसाधारणरूपेणैव **अत्र** साधारणरूपेण हेतुताग्रहविषये शक्तिग्रहे। **तद्व्यावर्त्तकेति**। किञ्चित्प्रकारकत्वानवच्छिन्नबोधविषयतावगाहि- शक्तिग्रहत्वरूपविशेषणदाने त्वित्यर्थः। **पृथगिति**। स्वावच्छेदकावच्छिन्नत्वस्व- सामानाधिकरण्योभयसम्बन्धेन द्रव्यपदाद्गुणवत्त्वेन द्रव्यं बोद्धव्यमित्याद्या- धुनिकसङ्केतविशेष्यताविशिष्टविशेष्यतावच्छेदकत्वरूपसमानविशेष्यता- वच्छेदकत्वप्रत्यासत्येत्यर्थः।

नन्वेवं गोत्वशक्तिग्रहस्य स्वरूपतो गोत्वानवगाहितया स्वरूपतो गोत्वशाब्दबोधानुपपत्तिरत आह **गवांश इति**। साध्यग्राहकत्वे विषयविशिष्टज्ञानरूपसाध्यानुमापकत्वे। **लिङ्ग**विशेषस्य ज्ञाततालिङ्गकत्वस्य। व्यतिरेकव्यभिचारमुद्धरति। **व्यवसायेति**। इच्छालिङ्गकज्ञानानुमितेर्व्यवसाय- सापेक्षत्वाभावेनोक्तव्यतिरेकव्यभिचाराप्रसक्तेरिति भावः। **तथानुमितौ** विषयविशिष्टज्ञानानुमितौ। **तज्ज्ञा**ततालिङ्गकत्वम्। **अत** एव ज्ञाततालिङ्गिकाया अपि व्यवसायसापेक्षशुद्धज्ञानानुमितेर्विषयानवगाहनेनान्वयव्यभिचारादेव अन्वयव्यभिचारं समुद्धरन्नेव भट्टमतसङ्ग्रहं दर्शयितुं शङ्कते। **नन्विति**।

चषकम्

तथा सति व्यवसायानन्तरं द्वित्रिक्षणमध्ये एव विषयोपरक्तज्ञानभानस्यानुभाविकतया कालान्तरे शुद्धज्ञानव्याप्यतया ज्ञाततावगाहिपरामर्शाच्छुद्धज्ञानानुमितिनिर्वाहाय तादृशानुमितौ तादृशपरामर्शस्य हेतुताया आवश्यकत्वे विषयोपरक्तज्ञानानुमितौ तस्य हेतुत्वान्तरकल्पनं कालान्तरे ततस्तथानुमितिवारणाय तादृशपरामर्शेन तथानुमितौ जननीयायां कालविशेषस्य तत्सहकारितायाः कल्पनञ्चापेक्ष्य ज्ञानस्यैन्द्रियकताया एव कल्पयितुं युक्तत्वात्। **ननु** घटवृत्तिघटत्वप्रकारकज्ञाततायास्तादृशज्ञाततात्वेन घटविशेष्यकघटत्वप्रकारकत्वविशिष्टज्ञानजन्यत्वरूपसाध्यानुमापकत्वात्तत्र च व्यापकतावच्छेदकत्वमेवोभयभानप्रयोजकमिति न ज्ञानभानाप्रयोजकं विषयभानप्रयोजकमिति तत्सामग्रीसङ्ग्रहेणैव कृतार्थता तेषामिति **चेत्तु**ल्यमिदं घटेच्छात्वलिङ्गकघटज्ञानजन्यत्वानुमितावपीति बाधवारणाय साध्यम्। **प्रमा**पदेनेव तदादिसर्वनाम्ना प्रकरणवशाद्घटविषयकज्ञानोपस्थापकेन प्रामाण्याग्रहेण बाधाच्च।

एतेन प्रयुक्तत्वं व्यापकत्वं तथा च यादृशसामग्र्या विषयग्राहकत्वव्याप्यं ज्ञानग्राहकत्वं तादृशयावत् सामग्रीग्राह्यत्वमभिप्रेत**मत** एव विषयमविषयीकुर्वती ज्ञानमपि न गृह्णातीति नञ्द्वयघटनाप्रयासो दीधितिकृतामित्यपि **प्रत्युक्तम्।** मनः संयुक्तसमवायस्य व्यवसायविषयघटादिभानाप्रयोजकत्वेन मिश्रमतासङ्ग्रहाच्च। **अत्रोच्यते।** न प्रामाण्याग्राहिकाऽप्रामाण्याग्राहिकेतिसमासाश्रयणात्तज्ज्ञानप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद्भट्टमतसिद्धं तद्भिन्नार्थकमग्राहकान्तम्।

तात्पर्यटीका

तथा सति यथोक्तज्ञाततालिङ्गकपरामर्शस्यापि विषयोपरक्तज्ञानानुमितिजनकत्वे सति। **द्वित्रिक्षणमध्य इति** ज्ञाततोत्पत्तितद्व्याप्तिपक्षधर्मताधीसम्वलनकालोपलक्षणम्। **तस्य** शुद्धज्ञानव्याप्यवगाहिनः परामर्शस्य। **तथानुमितौ** विषयोपरक्तज्ञानानुमितौ। **कालविशेषस्य** व्यवसायसन्निहितकालस्य। **तत्सहकारिताया** ज्ञाततालिङ्गक-

परामर्शसहकारितायाः। **युक्तत्वादिति**। कालस्य प्रातिस्विकरूपेणानन्तकारणत्वाकल्पनेन लाघवादित्यर्थः। **नन्वस्तु** भट्टमते गौरवं प्रकृतस्तन्मतसिद्धसामग्रीसङ्ग्रहस्तु सुकर **एवेति चेच्छु**द्धज्ञानव्याप्तिज्ञानाद्विषयोपरक्तज्ञानानुमितिर्न भट्टाभिमता ज्ञाततायाः सप्रकारकत्वाभ्युपगमानर्थक्यादतो भट्टमतसङ्ग्रहं प्रकारान्तरेण शङ्कते **नन्विति**। **कृतार्थता** प्रामाण्ये ज्ञानभानप्रयोजकमात्रप्रयोज्यविषयोपग्राहकताकनिरुक्तसामग्रीजन्यग्रहविषयत्वरूपसाध्यवता। यावत्पदं सार्थकयितुं सिद्धसाधनघटनाय प्रमापदघटितसामग्र्या एवोक्तरीत्या त्रितयसाधारणैकशक्तेर्विषयविशिष्टज्ञानभासकतया सङ्ग्रहे निर्भरोक्ते स्वदृष्टान्तेन तदादिपदघटितसामग्रीणामपि सङ्ग्राह्यत्वप्रदर्शनाय **प्रमापदेनेवेति। बाधाच्चेति**। **एतेन** ज्ञाततात्वलिङ्गकानुमितौ ज्ञानग्राहकतायामवच्छेदकत्वं तन्त्रं विषयग्राहकतायां त्ववच्छेदकतावच्छेदकत्वमिति प्रजल्पन्समा**हितः**।

एतेनोक्तबाधेन। व्यापकत्वमिति। वह्निमत्वप्रयुक्तमेव धूमवत्वमित्यत्रेव प्रकृतेऽपि व्याप्यव्यापकत्वरूपमेव प्रयुक्तत्वं विवक्षितमित्याह। **तथा चेति**। **अत** एव ज्ञानग्राहकतायां विषयग्राहकत्वव्याप्यत्वस्य प्रकृते विवक्षितत्वादेव। **नञ्द्वयघटनाप्रयास इति**। **नञ्द्वय**घटनया विवक्षितार्थलाभादिति भावः। दूषणान्तरमप्याह **मनः संयुक्तसमवायस्येति**। घटज्ञानमित्यादिशाब्दबोधसामग्रीवारणायैवाप्रामाण्याग्राहकेत्युक्तमित्यभिप्रेत्योत्तरयति **अत्रोच्यत इति**। तस्यामप्रामाण्याग्राहकत्वस्यापि सत्त्वात्तेन कथं तत्सामग्रीवारणमित्यत आह **न प्रामाण्याग्राहिकेति**। **इति** समासाश्रयणादिति तु प्रामाण्यस्य ग्राहिकात्र भवतीति प्रामाण्याऽग्राहिकेति नञ्व्यत्यासेन समासान्तरोपलक्षणम्। एतावतापि कथं पटज्ञानं प्रमा घटज्ञानं गुण इति शाब्दसामग्र्या वक्ष्यमाणाया वारणं कथं वा सर्वमतसाधारण्यम्। यन्मते या सामग्री तज्ज्ञानीयप्रामाण्याग्राहकसामग्रीभिन्ना तत्सामग्रीजन्ययावद्ग्रहविषयत्वस्य च तत्तन्मतमादाय पर्यवसाने विधिकोटेर्नैयायिकमतसाधारण्यप्रसङ्गा**दधिकं** वक्ष्यमाणा रीतिरिहाप्यनुसन्**धेया** तेन ज्ञानविषयो घट इत्यप्रवर्त्तकशाब्दानुमितिसामग्र्यसङ्ग्रहो न दोषायेत्यतः पूरणादिना व्याचष्टे। **तज्ज्ञान** प्रामाण्याग्राहकत्वेनेति।

चषकम्

अप्रामाण्यग्राहकसामग्रीकालीनयापि ज्ञानग्राहकसामग्र्या तु विषयनिरूप्यत्व मर्यादोपबृंहितया बलवत्या निश्चीयत एव प्रामाण्यमिति प्रामाण्योपस्थितिरूपोपनयघटितयापरं तया तुल्यबलया विनापि धर्मिज्ञानं सन्दिह्यत एव तदिति च न बाधः शङ्कास्पदमपि। घटज्ञानमित्यादि शाब्द-सामग्र्या इच्छादिलिङ्गकज्ञानानुमितिसामग्र्याश्च ज्ञानग्राहकतया-प्रामाण्याग्राहकतया च भट्टैरभ्युपगमेनैव वारणाच्च। **अनु**व्यवसायस्य ज्ञानविषयकलौकिकप्रत्यक्षात्मकस्य ज्ञानातीन्द्रियतावादिभिर्भट्टैरनभ्युपगमान्मनः-संयुक्तसमवायादिघटिता तु सामग्री न ग्राहकत्वेनैव तन्मतसिद्धेति व्यवसायसामग्री च घटादिग्राहकत्वेन तदभ्युपगतापि न ज्ञानग्राहकत्वेन तन्मतसिद्धेति। **अत** एव ज्ञातताघटितज्ञाततालौकिकप्रत्यक्ष-सामग्रीवारणायानुयोगिन्यपि ज्ञानग्राहि**केति**। ज्ञानग्रहफलोपधायिकेत्यर्थः।

सामग्रीपर्याप्तसमुदायत्वस्य जनकतानवच्छेदकत्वेन सामग्रीत्वेन स्वरूपयोग्यत्वस्य विवक्षानर्हत्वात्। ज्ञाततालिङ्गकानुमितिसामग्री तु ज्ञानग्रहफलोपधायकत्वेन भट्टमतसिद्धापि तैस्तस्याः प्रामाण्यस्यापि ग्राहकत्वोपगमान्न प्रामाण्यग्रहफलानुपधायकत्वेन तन्मतसिद्धेति च तत्तन्मते प्रामाण्यग्राहकत्वेनाभिमतानां सामग्रीणां सङ्ग्रहः। विशिष्टभेदस्य तत्तन्मते प्राभाण्यग्राहकसामग्रीषु सत्त्वात्। पटज्ञानं प्रमा घटज्ञानं गुण इत्येतादृश-समूहालम्बनशाब्दादिसामग्र्या पटज्ञानप्रामाण्यग्राहिकयाऽत एव यथोक्ता भट्टमतासिद्ध्या प्रकृतप्रामाण्याग्रहाद्बाध इति **तज्ज्ञानेति**। **यद्य**पि गुरुमते घटत्ववतीत्यादिप्रामाण्यग्रहिकाणां ज्ञानविषयो घट इति शाब्दानुमितिसामग्रीणां प्रामाण्याग्राहकतया ज्ञानग्राहकतया च भट्टाभ्युपगतानां नेत्थमपि सङ्ग्रह**स्तथा**प्ययं घट इति प्रवर्त्तकप्रत्यक्षसामग्र्याः प्रामाण्यग्राहकताविचार एवेयं विप्रतिपत्तिरिति तदसङ्ग्रहेऽपि न क्षतिः। **गुरु**मिश्रयोर्मतेऽसिद्धां भट्टमतसिद्धामुपनीतघटज्ञानविषयकस्य ज्ञानजन्यज्ञाततावान् घट इत्याकारकस्योपनीतज्ञानप्रामाण्यानवगाहिनः प्रत्यक्षस्य सामग्रीं व्यावर्त्तयितुं गुरुमतसिद्धभिन्नेत्यादिनोक्तम्।

तात्पर्यटीका

नन्वेवमप्रामाण्यग्राहकज्ञानग्राहकसामग्र्या प्रामाण्याग्रहाद्बाधः कथं वारणीय इत्युल्वणाशङ्कां वारयितुमाह**प्रामाण्यग्राहकेति**। **विषयनिरूप्यत्वेति**। विषयनिरूप्यत्वस्य विषयाविषयकप्रत्यक्षाविषयत्वस्य मर्यादानियमः स्वीयलौकिकप्रत्यक्षनिष्ठ विषयिताव्यापकतेति यावत्तयोपबृंहितया वशंवदया स्वघटकज्ञानभानाप्रयोजकाप्रयुक्तविषयभानकतयेति यावदत एव बलवत्येत्यर्थः। **प्रामाण्यो**पस्थितिरूपोपनयघटितयेति। अन्यथा कोट्यन्तरोपस्थित्यभावादेक-कोटिनिश्चय इत्युक्तमेव। तयाऽप्रामाण्यग्राहक ज्ञानग्राहकसामग्र्या विषयनिरूप्यत्वमर्यादानुपबृंहितया। **विनापीति**। धर्मिसन्निकर्षस्यैवावश्यकस्य संशयहेतुतायास्तैरङ्गीकारादिति भावः। अग्राहकान्तेन शाब्दसामग्र्यादीनां वारणमुपदर्शयति। **घटज्ञानमित्यादीति**। ग्राहकत्वमात्रनिवेशाधीनतया प्रथमं मिश्रमतसिद्धसामग्रीसङ्ग्रहं दर्शयति। **अनुव्यवसायस्येति**। गुरुमतसिद्ध-सामग्रीसङ्ग्रहं दर्शयति। **व्यवसायसामग्री चेति**। **अत** एव प्रतियोगिकोटौ ज्ञानग्राहकत्वविवक्षया ज्ञातताप्रत्यक्षसामग्र्या यथोक्तभट्टमतसिद्धभिन्नत्वादेव। **वारणायेति**। अन्यथाप्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च यद्भट्टमतसिद्धं तद्भिन्नया तयाप्रामाण्याग्रहाद्बाधप्रसङ्गादति भावः। अनुयोगिन्यपीत्यपिना गुरुमतसिद्धसामग्रीसङ्ग्रहाय प्रतियोगिन्यपि तदावश्यकमेवेत्युक्तमिति सूचितम्।

सामग्र्याः स्वरूपयोग्यत्वस्य विवक्षानर्हत्वादेव फलोपहितत्वं विवक्षणीयमित्याह **सामग्रीपर्याप्तेति**। भट्टमतसिद्धसामग्रीसङ्ग्रहं दर्शयति। **ज्ञाततालिङ्गकेति**। **विशिष्टभेदस्येति**। मिश्रमतसिद्धसामग्र्या ग्राहकत्वेन तन्मतसिद्धभिन्नत्वाद्गुरुमतसिद्धसामग्र्या ज्ञानग्राहकत्वेन तन्मतसिद्धभिन्न-त्वाद्भट्टमतसिद्धसामग्र्याः प्रामाण्याग्राहकत्वेन तन्मतसिद्धभिन्नत्वाच्च सङ्ग्रह इति भावः। **प्रकृतेति** घटज्ञानेत्यर्थः। **प्रा**माण्याग्राहकतया शाब्दादिविषयीभूतज्ञान-प्रामाण्याग्राहकतया गुरुमतसिद्धभिन्नेति मिश्रमतसिद्धभिन्नेति वा कुतो नोक्तमित्याशङ्कां वारयति। **गुरुमिश्रयोरिति**।

चषकम्

न च विषयबाधभ्रमोत्तर व्यवसायकालीनानुव्यवसामेन मिश्रमते प्रामाण्याग्रहाद्बाध इति **वाच्यम्।** बाधो हि तद्ग्रहे विरोधितामासादयन् प्रामाण्यस्य ग्रहं विरुध्यान्न स्वातन्त्र्येण तच्च न प्रकृते व्यवसायस्य वृत्तत्वात्तत्कुतस्तदग्रहो येन बाधो भवेद्**बाध**ग्रहाभावेन विशेषणाद्वा। **एतेन** धर्मितावच्छेदकबाधभ्रमकाले तद्वत्त्वांशे निर्धर्मितावच्छेदककप्रामाण्य-ग्रहसम्भवेऽपि प्रकारधर्मिकावृत्तित्वग्रहस्य तत्प्रकारकग्रहसामान्यविरोधित्वात्तदा बाधो दुर्वार इत्यापि **निरस्तम्।** गुरुमतेऽप्रसिद्धिरुक्तप्राया। **ननु** गुरुनये घटेन जलमाहरेदित्यादौ छिद्रेतरत्वादेरिवौदनकामकर्त्तव्यताबोधविषयः पाक इत्यादौ शब्दानुपस्थितस्यान्वयप्रयोजकस्यौदनसाधनत्वज्ञानस्यापि शब्देन ग्रहात्तस्य च सप्रकारकत्वेन सविशेष्यकत्वेन चाग्रहेण तत्प्रामाण्याग्राहच्च बाधः।

भट्टैः शब्दानुपस्थितस्यार्थस्य शाब्दबोधप्रवेशानभ्युपगमेन तादृशसामग्र्याः प्रकृतप्रामाण्याश्रयौदनसाधनताज्ञानग्राहकत्वेन यद्भट्टमतसिद्धं तद्भिन्नत्वात्। **कथ**मन्यथा गुरुमते पटज्ञानविषयो घट इति व्यवसायसामग्रीसङ्ग्रहस्तस्यास्तथा-भूतघटज्ञानग्राहकत्वेन भट्टमतासिद्धत्वेऽप्युपनीतपटज्ञानग्राहकत्वेन भट्टमतसिद्धत्वात्। **न चो**दनसाधनतात्वेन साधनताभाने साधनतात्वघटकतया साधनरूपधर्मिभानात् साधनत्ववति साधनत्वप्रकारकत्वरूपं प्रकृतं प्रामाण्यं गृह्यत एवेति क्व बाधो गुरुमते स्ववृत्ति प्रामाण्यमात्रस्यैव स्वेन ग्रहादिति वा**च्यम्।** कार्यभेदभिन्नसाधनतानामनुगमकस्य साधनतात्वस्याखण्डोपाधितया जातिसमशीलतद्भाने साधनभाननियमात्। प्रकृते साधनस्य साधनतात्वघटकेतरत्वे विशेषणतया साधनमुख्यविशेष्यकत्वघटितप्रमाणयस्य प्रवृत्युपयुक्तस्य तादृशशाब्दबोधावृत्तेस्तेन गृहीतुमशक्यतया बाधस्य दुर्वारत्वाच्च।

तात्पर्यटीका

ननु बोधोत्तरं भिन्नेन्द्रियजन्यव्यवसायसम्भवेऽपि धर्मिणि तद्वत्त्वघटितप्रामाण्यग्रहो न सम्भवत्येवेति बाधो दुर्वार इत्यत आह। **बाधग्रहाभावेनेति।** **तत्**प्रकारकग्रहसामान्य इति। **न चैवं** घटं

जानामीत्युनव्यवसायस्यैवासम्भवेन ज्ञानग्राहिकैव सा सामग्री न भवतीति **वाच्यम्**। इदं विशेष्यकघटत्वप्रकारकज्ञानवानित्यनुव्यवसाये बाधकाभाव इत्याशयात्। **तदा** प्रकारधर्मिकावृत्तित्वग्रहकाले। **इत्य**पीत्यपिना समानप्रकारकत्वेनैव विरोधित्वाभ्युपगमेनोंपादेयमेव बाधग्रहाभावविशेषणमिति **सूचितम्**। **उक्तप्रायेति**। अवृत्तित्वाभाववत्प्रकारसाकाङ्क्षावृत्तित्वग्रहाभावस्य सुप्रसिद्धत्वादित्याशयः तदभाववद्धर्मिसाकाङ्क्षेत्याद्येव पूर्वमुक्तं न त्विष्टमिति प्रायेत्युक्तम्। योग्यताज्ञानमुद्रयेष्टसाधनाताज्ञानग्राहकसामग्रीजन्यग्रहाविषयत्वाद्-बाधमाशङ्कते **नन्विति**। **शब्**देन ग्रहाच्छाब्दबोधे विषयीकरणात्। कुतस्तर्हि न प्रामाण्यस्य विषयीकरणमत आह **तस्येति**।

नन्वेतत्सामग्र्याः कर्त्तव्यताबोधग्राहकत्वेन भट्टमतसिद्धायाः कथं तद्भिन्नत्वमत आह। **भट्टैरिति**। **शब्दानुपस्थितस्यार्थस्येति**। **न चै**वं पदाजन्यार्थोपस्थितेर्भट्टमते सामग्र्यनन्तर्भावेऽपि तदघटितसामग्री तैरभ्युपगतैवेति कथं तत्र तद्भिन्नत्वमिति **वाच्यम्**। तादृशसामग्रीत्वे यथोक्तग्रहोपधायकता-वच्छेदकताप्रकारकाभ्युपगमाविषयत्वस्य विवक्षणीयत्वा**दन्य**था ज्ञातता-लिङ्गकानुमितिसामग्रीघटकदृष्टान्तादिकतिपयकारणानां प्रामाण्याग्राहकत्वेन ज्ञानग्राहकत्वेन च भट्टैरभ्युपगमेन भट्टमतासङ्ग्रहप्रसङ्गात्। **प्रकृतप्रामाण्याश्रयेति**। तथा च तस्याः प्रकृतप्रामाण्याश्रयीभूतं यदोदनसाधनताज्ञानं तदग्राहकत्वेन भट्टमतसिद्धभिन्नत्वं तत्राक्षतमेवेति भावः। **कथमन्यथेति**। प्रकृतप्रामाण्याश्रयेत्यस्य ज्ञानाविशेषणत्वे इत्यर्थः। साधनतात्वस्याखण्डोपाधित्वाभावेऽपि प्रकारान्तरेण बाधं सङ्गमयति। **प्रकृत इति**।

चषकम्

न च पटज्ञानविषयो घट इति व्यवसायसामग्री तु घटत्वप्रकारकज्ञानविषयो घट इति व्यवसायसामग्रीतुल्ययोगक्षेमैवेति प्रवृत्यनुपयुक्ततत्प्रामाण्य- स्यैवैतत्प्रामाण्यस्यापि पक्षाद्बहिर्भावनीयत्वादेव ज्ञानग्राहकत्वेनेत्यत्र ज्ञानं प्रकृतप्रामाण्याश्रयत्वेन न विशेषणीयम्। तथा च

भट्टमते ओदनसाधनताज्ञानाग्रहेऽपि कर्त्तव्यताबोधग्रहान्न सामान्यतो ज्ञानग्राहकत्वेन भट्टमतसिद्धभिन्नत्वमुक्तसामग्र्यामिति न बाध इति **वाच्यम्**। तथापि स्वाश्रयज्ञानग्रहोपधायकतावच्छेदकस्य शब्दाजन्यकाम्यतासाधनताज्ञानोपस्थितिघटिसमुदायपर्याप्तसामग्रीत्वस्य गुरुमतसिद्धस्य यथोक्तज्ञानग्रहोपधायकतावच्छेदकताप्रकारकभट्टाभ्युपगमविषयभिन्नत्वमक्षतमेवेति तदवच्छिन्नसामग्र्यग्राह्यतयोक्तबाधप्रसरादित्यन्यत्र **विस्तरः**।

एवमयं कम्बुग्रीवादिमानित्यादिशाब्दबोधे घटत्वप्रकारकज्ञानविषयत्वरूपयोग्यताया अन्वयितावच्छेदकमुद्रया गुरुमते एव भानात्तादृशप्रामाण्यस्य च तत्राभानाद्बाधः। न हीयमपि सामग्री ज्ञानग्राहकत्वेन भट्टाभ्युपगतेति चे**न्नैवम्**। ज्ञानग्राहकेत्यनेनापि प्रकृतप्रामाण्याश्रयज्ञानग्राहकेति विवक्षणात् उपदर्शिता च सामग्री प्रकृतप्रामाण्याश्रयकाम्यसाधनताज्ञानरूपान्वयप्रयोजकरूपग्राहिकैव नेति निरुक्तबाधाप्रसक्तेः। **यतो** गुरुनयेऽपि शाब्दबोधे योग्यताज्ञानं प्रयोजकं सा च तेषामन्वयप्रयोजकरूपवत्त्वं ततः प्रथमं तज्ज्ञानं तैर्मृग्यते न तु शाब्दबोधे तदनुप्रवेशोऽपि पदजन्योपस्थितिं विनैवास्ति मानाभावात् **यद्यु**पस्थितिमात्रेण शाब्दबोधे भानं तर्ह्युपस्थिताबाधितयावत्पदार्थानां तथा प्रसङ्गो दुर्वारः।

तात्पर्यटीका

ननु गुरुमते पटज्ञानविषयो घट इति ज्ञानसामग्रीसङ्ग्रहाय ज्ञानग्राहकत्वेनेत्यत्र ज्ञानं प्रकृतप्रामाण्याश्रयीभूतं वाच्यमित्युक्तमयुक्तं तथोक्तावपि घटत्वप्रकारकज्ञानत्वेन प्रकृतप्रामाण्याश्रयघटज्ञानस्याप्यवगाहिनो घटत्वप्रकारकज्ञानविषयो घट इति ज्ञानस्य सामग्र्या दुःसङ्ग्राह्यतया तत्प्रामाण्यस्य पक्षबहिर्भार्वेऽस्या अप्यसङ्ग्राह्यत्वौचित्यादिति शङ्कते। **न चेति**। प्रामाण्यस्य पक्षबहिर्भावं सम्पाद्य सामग्र्या असङ्ग्राह्यत्वमनुमन्यसे चेत्प्रकृतप्रामाण्याश्रयेत्स्य ज्ञानविशेषणत्वानुपगमेऽपि सामग्रीत्वेन स्वरूपयोग्यत्वस्य विवक्षानर्हतायाः प्रागेवोक्तत्वा**त्स्वाश्रयज्ञानग्रहफलोपधायकतावच्छेदकस्येति**। **यथोक्तेति**। प्रामाण्यग्रहफलोपधायकतानवच्छेद-

कताविशिष्टेत्यर्थः। **तदवच्छिन्नेति**। ज्ञानग्रहोपधायकतावच्छेदकताविशिष्टेत्यर्थः। **अन्यत्र विस्तर इति**। सामान्यतो ज्ञानग्राहकत्वोक्तावपि घटत्वप्रकारकेच्छाविषयोऽयमित्यत्र शब्दानुपस्थितस्य योग्यतात्मकघटत्व-प्रकारकज्ञानस्य शब्देन गुरुमते ग्रहात्तत्प्रामाण्यस्य चाग्रहाद्बाधो विस्तरार्थः।

यत्र च केवलविषयग्राहकसामग्रीजन्यग्रहे योग्यतामुद्रया किञ्चिज्ज्ञानं विषयस्तत्र तज्ज्ञानप्रामाण्याग्रहादपि बाध इत्या**हैवमिति** गुरुमत एवेत्यनेन तन्मते ज्ञानग्राहकत्वमेवकारेण भट्टाभ्युपगतभिन्नत्वञ्च दर्शितम्। **इयमपि** केवलविषयग्राहिकापि। **अपि**नौदनकामकर्त्तव्यताबोधविषयः पाक इत्यत्र कर्त्तव्यताबोधग्राहकत्वेन भट्टाभ्युपगतत्वसम्भवाद्यथाश्रुतज्ञानग्राहकत्वेन भट्टाभ्युपगतत्वं यथा न तथा प्रकृतेऽस्तीति **सूचितम्**। पदोपस्थितिं विना निरुक्तयोग्यताया गुरुमतेऽपि शाब्दबोधविषयत्वं नास्त्येवेति पदाध्याहारपक्षमवलम्ब्य समाधत्ते **मैवमिति**। **ज्ञानग्राहिकेत्यनेनापीति** अनुयोगिनि प्रविष्टेनापीत्यर्थः। **नन्वे**वमपि गुरुमते तस्यां योग्यतामुद्रया प्रकृतप्रामाण्याश्रयकाम्यसाधनताज्ञानग्राहकताया अपि सत्त्वेन कथं बाधवारणमिति पूर्वपक्षिणः शङ्कां वारयितुमाहो**पदर्शिता चेति**। **नन्वे**वमपूर्ववाच्यतानुपपत्तिः। काम्यसाधनताज्ञानस्य शाब्दबोधार्थमेव हि गुरुभिस्तद्वाच्यतोपगमादत आह **यत इति**।

चषकम्

नन्वेवं स्वर्गकामो यजेतेत्यादौ कामनाविशिष्टस्य यागे कार्यताबोधोपयोगित्वरूपनियामकत्वेनान्वये काम्यसाधनताज्ञानोपयोगित्वरूप-योग्यतायाः पदानुपस्थिताया अन्वयितावच्छेदकमुद्रया भानानङ्गीकारे योग्यताघटकपरम्परासाधनतोपपादकापूर्ववाच्यताभ्युपगमप्रयासोऽनर्थक इति **चेन्न**। नियोज्यान्वयेऽपि स्वर्गसाधनयागकार्यवान् स्वर्गकाम इत्यपूर्वबोधाधीनस्य परम्परया काम्यसाधनताबोधस्य प्रथमं ज्ञानमावश्यकमित्येवा-पूर्ववाच्यताभ्युपगमान्न तु शाब्दबोधेऽपि तद्भानमितीत्यन्यत्र **विस्तरः**। **क्वचि**च्छिद्रेतरत्वादेरपि भानं त्वेकविशेषबाधे शाब्दबोधजनकसामान्यसामग्र्या विशेषान्तरप्रकारकबोधजननस्वाभाव्यात्।

हन्तैवं यथा छिद्रघटे जलाहरणसाधनताबाधाच्छिद्रेतरघटत्वावच्छिन्ने पदानुपस्थितेऽपि जलाहरणसाधनतान्वयधीस्तथा काम्यसाधनताज्ञानाविषये पाके कार्यताधीविषयत्वबाधबलात् पदानुपस्थितेनापि काम्यसाधनताधीविषयत्वेन विशिष्टे पाके कार्यतान्वयधीरावश्यकीति तादृशसामग्रीमादायैव बाध इति **चेद्भट्**टैरपीतरबाधबलात् पदानुपस्थितस्यार्थस्य शाब्दबोधे भानोपगमेन तत्सामग्र्या अपि भट्टाभ्युपगतत्वेन तद्भिन्नत्वाभावात् **अथार्था**ध्याहारवादिनो गुरोर्मते तात्पर्यसत्त्वे पदानुपस्थितस्यापि काम्यसाधनताज्ञानादेर्भानस्यावश्यकतया बाधवारणमशक्यमेव। न हि शाब्दबोधस्य पदाजन्यार्थोपस्थितिघटितापि सामग्री भट्टाभ्युपगता अन्वयबोधो द्विविधः पदकरणकोऽर्थकरणकश्चेति तेषां सिद्धान्तादिति **चेत्किञ्चातः**। यादृशसामग्रीप्रामाण्याविषयकज्ञानग्रहोपधायकत्वेन भट्टाभिमता तादृशसामग्रीघटकतानवच्छेदकावच्छिन्नघटितत्वमेव भिन्नान्तार्थो यथोक्तैः सन्निकर्षव्यवसायसमानाकारसिद्ध्यभावैर्घटितत्वात्तत्तत्सामग्रीणां सङ्ग्रहः।

तात्पर्यटीका

ननु लोकवद्वेदेऽपि शाब्दबोधात्प्राथमिकस्यान्वयप्रयोजकरूपवत्त्वरूपाया योग्यताया ज्ञानस्य कथञ्चिदपि सम्भवात्तदर्थमपूर्वस्य विध्यर्थत्वमनर्थकमेव गुरूणामित्याशङ्कते। **नन्वेवमिति**। **एवं** योग्यतायाः शाब्दबोधात्प्रागेव ज्ञानावश्यकत्वे। **कामनाविशिष्टस्येति**। **तदुक्तम्**। कामनाविशिष्टस्य हि ममेदं कार्यमिति बोद्धुर्नियोज्यत्वं कामनायास्तद्बोधोपयोगात् स च कामनाया काम्यसाधनाताज्ञानेन कार्यज्ञानोदयात्तद्यथा यागो मत्कृतिसाध्यो मत्कृतिं विनाऽसत्त्वे सति मदीयकामनाविषयसाधनत्वात् पाकवदिति। **इत्यपूर्वबोधाधीनस्येति**। **अयमा**शयः। इष्टसाधनत्वस्य विध्यर्थत्वेऽप्यपूर्वद्वारा साधनत्वोपस्थितिरपूर्वोपस्थित्यधीनैवेत्यपूर्वस्य शाब्दबोधाविषयत्वेऽपि शाब्दबोधात्प्रागुपस्थितिरावश्यकीति फलतो न कश्चिद्विशेष इति। **परम्परयाऽपूर्वद्वारा**। **प्रथमं ज्ञानमिति**। **न चैवं** काम्यसाधनताज्ञानजन्य-कार्यताज्ञानहेतुत्वापेक्षया काम्यसाधनताबोधाभिन्नकार्यताबोधहेतुत्वे लाघवाच्छाब्द-बोधे योग्यताविषयोऽस्त्विति **वाच्यम्**। अनन्तशाब्दबोधेष्वस्या विषयताकल्पने

एव गौरवादित्यास्तां **तावत्**। सा च प्रमाणान्तरानवताराच्छाब्द्येवेत्याह**ान्यत्र** विस्तर इति याग: परम्परया स्वर्गसाधनं साक्षादतथात्वे सति स्वर्गकामनियोगपरवाक्यविषयत्वादित्यनुमित्येतरबोधबलादपूर्वभानाभ्युपगमे नानाविधबाधोपबृंहितनानाविधप्रमाणकल्पनातः क्लृप्तशब्दस्य तथाभावो ऋजुरिति विस्तरार्थः। **कथं** तर्हि छिद्रेतरत्वादेः शाब्दबोधे भानं सर्वसम्मतत्वेन प्रतिपन्नं दृष्टान्तीकृतमत आह **क्वचिदिति**। **यत्र किञ्चिद्धर्मावच्छिन्ने** उद्देश्ये विधेयबाधावतारस्तत्रेत्यर्थः।

इतरबाधबलादेवेष्टसाधनताग्राहकसामग्रीजन्यग्रहाविषयत्वाद्बाधमाशङ्कते। **हन्तैवमिति**। इतरबाधबलात् पदानुपस्थितस्याप्यर्थस्य शाब्दबोधविषयत्वस्वीकार इत्यर्थः। अर्थाध्याहारपक्षे पदानुपस्थितेष्टसाधनताज्ञानग्राहकसामग्री-जन्यग्रहाविषयत्वाद्बाधमाशङ्कते। **अथार्थेति**। प्रामाण्याविषयकज्ञानग्रहोपधाय-कत्वेनेति। प्रामाण्याविषयकश्चासौ ज्ञानग्रहश्चेति कर्मधारयः। मतत्रयेऽप्यभिमत सामग्रीसङ्ग्रहं दर्शयति। **यथोक्तैरिति**। **ननु** प्रामाण्याविषयक-ज्ञानानुमितिसामग्र्यामपि सिद्ध्यभावस्य भट्टाभिमतत्वेन तद्घटकतानवच्छेदकावच्छिन्नस्य भट्टमतसिद्धप्राणग्राहकसामग्र्यां घटकत्वाभावादसङ्ग्रह इति शङ्कावारणाय **समानाकारेति** सिद्धिविशेषणम्। तथा च सङ्ग्राह्य वारणीयसामग्र्योर्नैकरूपः सिद्ध्यभावः प्रविष्टः किन्तु सङ्ग्राह्ययसामग्र्यां प्रमावानिति सिद्ध्यभावो वारणीयायां ज्ञाततामात्रेण ज्ञानानुमितिसामग्रीघटकतावच्छेदकेन ज्ञानवानिति सिद्ध्यभावत्वेनानवच्छिन्न एव घटक इति भट्टमतसिद्धसामग्रीसङ्ग्रहः सुकर इति भावः।

चषकम्

इत्थञ्च शब्दानुपस्थितयोग्यतायाः शाब्दबोधप्रवेशाभ्युपगमेऽपि न क्षतिः। पदाजन्योपस्थितेरपि विशेषणतावच्छेदकप्रकारकज्ञानादिविधया भट्टमते तादृशशाब्दबोधहेतुत्वेन तत्तदर्थोपस्थितित्वस्योभयमतेऽपि शाब्दसामग्रीघटक-तावच्छेदकत्वादिति। **वस्तु**तस्तु गुरुमतेऽपि पदाजन्यार्थोपस्थितेस्तत्तदर्थो-पस्थितित्वेन शाब्दसामग्रीघटकत्वं नोपेयते। तात्पर्यज्ञानस्य तत्तदर्थविषयकत्वनि-

यमेन तन्निवेशेनैवोपपत्तेः। तथा च गुरुमतसिद्धसामग्रीघटकनिखिलकारणानां भट्मतेऽप्युक्तसामग्रीघटकत्वं निर्विवादमेवेति तादृशसामग्रीत्वं यथोक्तभट्टाभ्युपगमविषय एवेत्युक्तरीत्यैव सर्वं समञ्जसम्।

न च स्वर्गकामकर्त्तव्यताज्ञानविषयो यागविषयकं कार्यमिति वेदजन्यं ज्ञानं गुणो ज्ञानत्वादित्यनुमितिशाब्दबोधस्मृतिसामग्रीभिस्तादृशवेद-जन्यगुरुमतसिद्धज्ञानप्रामाण्याग्रहाद्बाधः। **अपूर्वस्य** निर्विषयकत्वात्कथमुच्यते यागविषयकं कार्य**मिति**। जनकत्वाभिप्रायेण। **तदुक्तम्**। विशब्दो हि विशेषार्थः सिनोतिर्बन्ध उच्यते। विशेषण सिनोतीति विषयोऽतो नियामक इति। **एवं** मनः संयुक्तसमवायजन्यमहं घटं जानामीति ज्ञानं गुणो ज्ञानत्वादित्यनुमितिशाब्दबोधस्मृतिसामग्रीभिस्तादृशमनःसंयुक्तसमवायजन्य मिश्रमतसिद्धज्ञानप्रामाण्याग्रहाद्बाधो दुर्वारः। **वेदा**दिजन्यतादृशज्ञानस्य भट्टनये शशविषाणकल्पतया तद्ग्राहकसामग्र्या भट्टैरनभ्युपगमादिति **वाच्यम्**। अन्यथाख्यात्यभ्युपगन्तृणां भट्टानां मते यथाप्रसिद्धविषाणे शशीयत्वावगाहिन्याः शशविषाणं द्रव्यमित्याकारिकाया अनुमितेः सिद्धतया तत्सामग्र्यपि तन्मतसिद्धा **तथा** स्वर्गकामनियोज्यकं यागविषयकं कार्यमित्याद्याकारक-सामग्र्यन्तरजन्यबोधविशेष्यिकाया वेदजन्यत्वाद्यंशे भ्रमरूपाया भट्टाभ्युपगताया उक्तानुमित्यादेः सामग्र्यपि प्रामाण्याविषयकज्ञानग्रहजनकतया भट्टमतसिद्धैवेति तादृशज्ञानप्रामाण्यस्य तदग्राह्यत्वेऽपि बाधाप्रसक्..गित्यास्तां **तावत्**।

तात्पर्यटीका

ननु पदाजन्यार्थोपस्थितित्वेन भट्टाभिमतसामग्रीघटक-तानवच्छेदकेनावच्छिन्नतथोपस्थितिघटितात एव भट्टमतसिद्धभिन्ना या गुरुमतसिद्धा सामग्री तज्जन्यग्रहाविषयत्वाद्बाधः कथं वारणीय इत्यत **आहेत्थञ्चेति**। अर्थाध्याहारपक्षे उक्तबाधवारणाय भिन्नान्तस्योक्तार्थकत्वोक्तौ चेत्यर्थः। **न क्षति**र्न बाधावसरः। योग्यतायाः शाब्दबोधे भानं मत्वा पदाजन्यार्थोपस्थितिघटितगुरुमतसिद्धसाग्र्या अपि भट्टमतसिद्धत्वेन

निरुक्ततद्भिन्नत्वाभावादेवोक्तबाधवारणादित्याह **पदाजन्योपस्थितेरपीति**। ओदनकामपदस्योदनसाधनताज्ञानवत्योदनकामे लक्षणाग्रहादिना यत्र पदजन्यार्थोपस्थित्या काम्यसाधनताज्ञानगोचरः शाब्दबोधः स भट्टाभ्युपगत एव तत्सामग्र्यां सा गुरुमतसिद्धसामग्रीघटिका पदाजन्योपस्थितिरपि विशेषणतावच्छेदकप्रकारकोपस्थितित्वेन प्रविष्टैवेति न वस्तुतः पदाजन्यार्थोपस्थितित्वं भट्टमतसिद्धसामग्रीघटकतानवच्छेदकमिति गुरुमतसिद्धसामग्रीवारणमिति भावः। **नन्वस्तु** लोके तथा प्रकृते तु पदानुपस्थितस्यापि ज्ञानस्य योग्यतामुद्रया वेदजन्यशाब्दबोधे भानं गुरुमते नियतम्। पदजन्योपस्थितिरूपसहकारिवशात्तत्समानाकारः शाब्दबोधश्च न भट्टमते नियत इति क्वचित् काम्यसाधनताज्ञानस्य शाब्दबोधेऽप्रवेशे विशेषणतावच्छेदकप्रकारकनिश्चयमुद्रयापि पदाजन्यतदुपस्थितैर्न तच्छाब्दसामग्रीघटकत्वं भट्टाभ्युपगतमिति कथमुक्तरीत्याप्युक्तबाधवारणमत आह **वस्तुतस्त्विति**। **यथोक्त** भट्टाभ्युपगमविषय एवेति। प्रामाण्याविषयकज्ञानग्रहोपधायकतावच्छेदकताप्रकारकभट्टाभ्युपगमविषय एवेत्यर्थः। **उक्तरीत्यैव** सामग्रीत्वे तथाभ्युपगमाविषयत्वविवक्षयैव। **सर्वं** समञ्जसं सर्वबाधवारणम्।

बाध इति दुर्वार इत्यग्रिमेणान्वेति। गुरुमतमात्रप्रसिद्ध-विशेषणविशिष्टज्ञानपक्षकानुमित्यादिभिः। प्रामाण्याग्रहाद्बाधं दर्शयित्वा मिश्रमतमात्रप्रसिद्धविशेषणविशिष्टज्ञानपक्षकानुमित्यादिभिः प्रामाण्याग्रहाद्बाधं दर्शयति। **एवमिति**। तत्सामग्रीणां भट्टमतसिद्धभिन्नत्वं दर्शयति। **वेदादीति**। **आदिना** मनःसंयुक्तसमवायपरिग्रहः। **साम**ग्र्यन्तरं लौकिकवाक्यादि। **वेदजन्यत्वादीति आदिना** मनःसंयुक्तसमवायजन्यत्वपरिग्रहः। तत्प्रामाण्याविषयकत्वेन ज्ञानविषयकत्वेन च यो भट्टमतसिद्धस्तदन्यो यावान् विषयबाधग्रहाभावेन विशिष्टोऽविशिष्टो वा ज्ञानस्य ग्रहस्तद्विषयो न वेति तु विप्रतिपत्तिर्लघुः सम्भवतीति किं शिरोवेष्टनेन नासास्पर्शन्यायमनुसरन्त्या निरुक्तया विप्रतिपत्त्येत्यमुमर्थं सूचयत्यास्तां **तावदिति**।

तर्कामृतम्

'परतः प्रामाण्यग्रहः' इति नैयायिकाः। यथा आदौ 'घटः' इति व्यवसायः, ततः 'घटमहं जानामि' इत्यनुव्यवसायः। ततः 'प्रामाण्याप्रामाण्ये' इति कोटिद्वयस्मरणम्। अथ चतुर्थे 'इदं ज्ञानं प्रमा न वा' इति प्रामाण्यसंशयः, ततो विशेषदर्शनानन्तरं प्रामाण्यग्रहः–

तरङ्गिणी

परतः परत एव। तज्ज्ञानविषयकजन्यज्ञानजन्येनैव जन्यज्ञानेनेत्यर्थः। **ततो घटमहं जानामीति।** इदं च ज्ञानत्वस्य कथञ्चिदुपस्थितौ। अन्यथान्तरा ज्ञानत्वनिर्विकल्पकमपि बोध्यम्। विशेषदर्शनानन्तरं प्रमात्वव्याप्यसमर्थ-प्रवृत्तिजनकत्ववत्ज्ञानानन्तरम्। न च समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वात्कथमनुमितिरिति वाच्यम्। उपनीतभानसामग्र्या सर्वथा दुर्बलतयाऽनुमित्युत्पादे बाधकाभावात्।

चषकम्

एतेनोक्तबाधनिवृत्तये भट्टमतासिद्धज्ञानग्राहकताकायापरोक्षस्य सामग्री तद्भिन्नत्वेनापि सामग्री विशेषणीया तेनोक्तानुमित्यादिपरोक्षसामग्रीणां वराणम्। भट्टमतसिद्धयथोक्तसाग्रीसङ्ग्रहाय भट्टमतासिद्धेत्यादिसामग्रीविशे**षणम्**। परोक्षत्वं ज्ञानविषयकज्ञानजन्यत्वम्। तेनातीन्द्रियगुरुत्वोपनीतभानात्मकस्यापि व्यवसायस्य ज्ञानविषयकज्ञानाजन्यतया तत्सामग्र्या गुरुमते सङ्ग्रह इत्यपि **निरस्तम्**। **परतः** परत एव। परतः प्रामाण्यग्रहपक्षे ज्ञात एव ज्ञाने प्रामाण्यग्रहात्तज्ज्ञानविषयकजन्यज्ञानजन्यज्ञानेनैव जन्यज्ञानेनेति यावत्। **प्रामाण्यग्रह इति**। तच्च तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वं नातो वह्निगुञ्जयोर्गुञ्जावह्नी इति ज्ञानस्य प्रामाण्यम्।

यत्तु तत्प्रकारकत्वावच्छिन्न तद्वद्विशेष्यकत्वं तदिति। **तन्न**। वह्नित्वे

पुरोवर्तिविशेष्यकमिदं ज्ञानमिति व्यवहाराभावेन प्रकारस्यैव विशेष्तानवच्छेदकत्वे तन्निरूपकप्रकारकत्वस्य तथात्वं भानाभावात्। **अस्मा**कं तु पुरोवर्तिनि वह्निनत्वप्रकारकमिति प्रतीत्या तद्वद्विशेष्यकत्वस्य तत्प्रकारकत्वावच्छेदकत्वं सिद्ध्यति। **न चैव**म्विधप्रमाण्यग्रहस्य कुत्रोपयोग इति **वाच्यम्**। पक्षीभूतज्ञानसमानाकारज्ञानसाध्यनिष्कम्पप्रवृत्तावुपयोगात्। **यद्य**प्यस्यार्थ निश्चयेनान्यथासिद्धिस्तथाप्यर्थनिश्चयेऽप्रामाण्यशङ्काविधूननद्वारास्योपयोगिता-स्त्येवेत्ययमारम्भः। **नन्व**प्रामाण्यशङ्कासामग्र्यभावेनैव तद्विरहोपपत्तौ कुतस्तद्विधून नार्थं प्रामाण्यग्रहापेक्षेत्यतस्तत्सामग्रीमुपपादयति। **यथेत्यादि**। **प्रामाण्याप्रामाण्ये इतीति**। कोटिद्वयसहचरितस्य घटविशेष्यकत्वस्य व्यवसायेऽनुव्यवसायेन ग्रहादित्याशयः। **प्रामाण्यसंशय इति**। एतदनुरोधेनैव प्रामाण्यं न स्वतो ग्राह्यमित्युच्यते **तदुक्तं** 'प्रामाण्यं न स्वतो ग्राह्यं संशयानुपत्तित' इति। **प्रामा**ण्यनिश्चयस्य विरोधिविषयस्य तदभावसंशयप्रतिबन्धकत्वादिति भावः।

यद्यपि ज्ञाने प्रामाण्यनिश्चयस्य धर्मितावच्छेदकसामानाधिकरण्येन जायमानस्य धर्मितावच्छेदकसामानाधिकरण्येन प्रामाण्याभावं धर्मितावच्छेदकावच्छेदेन प्रामाण्यमवगाहमानः किमेवंविधं सर्वमेव ज्ञानं प्रमाऽहोस्वित्किञ्चिन्नापि तथेत्याकारो जायमानः संशयस्तु न प्रतिबध्य**स्तथा**पि प्रवृत्युपयुक्तस्य धर्मितावच्छेदकावच्छेदेन प्रामाण्यग्रहस्य स्वतस्त्वे संशयानुपपत्तिर्द्र**ष्टव्या**। **न चैव**मयं जातिमानिति निश्चयेऽप्ययं घटो न वेति संशयः कथमुत्पद्यतामिदमर्थे जातित्वेन घटत्वस्य निश्चयादिति **वाच्यम्**। घटत्वांशेऽन्याप्रकारकघटत्वप्रकारकनिश्चयस्यैव तथा संशयविरोधित्वोपगमात्। घटत्ववानिति निश्चयस्तु घटेतरावृत्तित्वेन घटत्वावगाही घटान्यत्वव्यावर्त्तकधर्मदर्शनविधया स्वातन्त्र्येणैव घटनान्यत्वग्रहविरोधी। **यद्य**पि घटेतरावृत्तित्वेन घटत्वनिश्चयस्य घटव्याप्यदर्शनविधयैव घटान्यत्वग्रहाविरोधित्वं सम्भवति **तथा**पि घटान्यत्वतद्भावकोटिकसंशयविरोधित्वोपपत्तये व्यावर्त्तकधर्मदर्शनविधयेत्युक्तम्।

न च प्रामाण्यग्रहसामग्रीसत्त्वे कथं न प्रामाण्यग्रह इति **वाच्यम्**। संशयजनकदोषेण प्रतिबन्धात्।

तात्पर्यटीका

एतेनोपदर्शितेनोक्तगुरुमतसिद्धसामग्र्या अपि भट्टमतसिद्धत्वव्यवस्थापन-रूपबाधवारणप्रकारेण। **तद्भिन्नत्वेनापीति**। चैत्रो ज्ञानवानिति शाब्दबोधसामग्र्या भट्टमतासिद्धज्ञानग्राहकताकत्वाभावेन यथोक्तसामग्रीभिन्नत्वेन सङ्ग्रहे तस्याश्च प्रामाण्याग्राहकत्वाद् बाधवारणाय प्रागुक्तविशेषणस्याप्यावश्यकत्वं सूचयितुम**पिशब्दः**। **उक्ता**नुमित्यादीत्यादिना शाब्दस्मृत्योः परिग्रहः। परोक्षसामग्रीसामान्यभिन्नत्वविशेषणे तु प्रामाण्यग्राहकत्वेन भट्टमतसिद्धसामग्र्यसङ्ग्रहप्रसङ्ग इत्याह। **भट्टमतसिद्धेति**। **यथो**क्तसामग्रीप्रामाण्यग्राहकत्वेनाभिमतज्ञाततालिङ्गकानुमितिसामग्री। **ननु** परोक्षत्वं ज्ञानजन्यत्वं तथा च घटो गुरुरित्युपनीतभानात्मकप्रत्यक्षस्यापि ज्ञानजन्यतया तत्सामग्र्या भट्टमतासिद्धज्ञानग्राहकताकपरोक्षसामग्रीत्वेन तद्भिन्नत्वाभावाद्गुरुमते प्रामाण्यग्राहिकायास्तस्या असङ्ग्रहापत्तिरति आह **परोक्षत्वं चेति**। तथा च तत्रापि प्रत्यक्षे ज्ञानविषयकज्ञानजन्यत्वाभावान्न परोक्षत्वमिति तत्सामग्रीसङ्ग्रह इत्याह। **ज्ञानविषयकज्ञानाजन्यतयेति**। इदञ्चसङ्ग्रहेऽन्वेति। मीमांसकमतव्यावृत्तं परतस्त्वं परिष्करोति। **तज्ज्ञानेति**। व्यवसायविषयकानुव्यवसायोत्तरभाव्यनुमित्यादिनेति मूल एव सुव्यक्तम्। **जन्यज्ञानेनेति यावदिति**। तथा च तज्ज्ञानविषयकजन्यज्ञान-जन्यज्ञानेतरजन्यज्ञानग्राह्यत्वमेवकारव्यवच्छेद्यमिति भावः।

पुरोवर्तिनि तद्वति पुरोवर्तिनि **एवंविधेत्यादि**। विशेषदर्शन-कालपर्यन्तविनष्टप्रवृत्यहेतुभूतज्ञानधर्मिकविशेषदर्शनजन्यस्य प्रामाण्यग्रहस्येत्यर्थः। **उपयोगादिति**। धर्मितावच्छेदकावच्छेदेन प्रामाण्यग्रहस्य धर्मितावच्छेदक-सामानाधिकरण्येन विपरीतज्ञानसामान्यविरोधित्वस्यानुपदं वक्ष्यमाणत्वादिति भावः। **अयमारम्भः** स्वतस्त्वपरतस्त्वविचारारम्भः। **अनुव्यवसायेनेति**। अनुकूलो विषयविधया कारणीभूतो व्यवसायो यत्रेति व्युत्पत्या व्यवसायाध्यक्षेणेत्यर्थः।

एवं विरोधिविषयकनिश्चयमात्रस्य तत्संशयप्रतिबन्धकत्वे। सामानाकारनिश्चयस्यैव विरोधिविषयकस्य विरोधित्वमित्यभिप्रेत्याह। **घटत्वांश**

इति। **नन्वेवम**यं घटत्ववानिति निश्चयेऽप्ययं घटो न वेति संशयापत्तिर्घटत्वत्वेन निश्चयस्य स्वरूपतो घटत्वसंशयसमानाकारत्वाभावादत आह **घटत्ववानिति निश्चयस्त्विति। घटान्यत्वतदभावेति।** तथा च घटत्वस्य घटव्याप्यत्वेन घटो नवेत्येवमाकारकघटतद्भेदकोटिकसंशविरोधित्वस्य सम्भवेऽपि यत्र घटत्वेन घटो न कोटिस्तत्र घटान्यत्वतदभावकोटिकसंशये विरोधित्वं घटान्यत्वव्यावर्त्तकत्वेनैवेति भावः।

तर्कामृतम्

इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् ज्ञानान्तरवत्।[1]

तरङ्गिणी

समर्थेति। समर्था सम्वादिनी तद्वति तत्प्रकारिकेति यावत्। न चेदृशप्रामाण्यग्रहस्य कुत्रोपयोगः, न प्राथमिकव्यवसायेन प्रवृत्तिजनने, तस्यैव विनाशात्, लाघवेनाप्रामाण्यज्ञानानास्कन्दितज्ञानत्वेनैव प्रवर्तकतया प्रामाण्यग्रहस्यानुपयोगाच्चेति वाच्यम्। ईदृशप्रामाण्यानुमितौ तदुत्तरं व्यवसाये तत इच्छोत्पत्तौ प्रवृत्तिसम्भवात्। अन्यथा व्यवसायस्य प्रामाण्यसंशयरूपतया प्रवृत्त्यसम्भवात्। अत एव प्रामाण्यसंशयपूर्वक एव प्रामाण्यग्रहप्रकारो दर्शितः। तच्च तद्वद्विशेष्यकावच्छेदेन तत्प्रकारकत्वम्। अत एव गुञ्जापुञ्जवह्न्योर्वह्निगुञ्जे इति ज्ञानस्य न प्रमात्वम्। वह्नित्ववद्विशेष्यकावच्छेदेन वह्नित्वप्रकारकत्व-विरहात्।

चषकम्

इदं ज्ञानं प्रमा समर्थपृवत्तिजनकत्वाज्ज्ञानान्तरवदिति। समर्थेति।

---

१. 'ज्ञानान्तरवदिति' पाठान्तरम्।

समर्थत्वञ्च तद्वद्विशेष्यकत्वम्। न चैवं कथं हेतुग्रह इति **वाच्यम्** विशेष्ये प्रकारग्रहे तद्वद्विशेष्यकत्वस्य सुग्रहत्वा**देवं** तत्प्रकारकत्वस्यापि। तयोरवच्छेद्या- वच्छेदकभावः परं न स्वतो गृह्यते ज्ञाने संशयानुरोधात्। **ननु** यत्र समर्थप्रवृत्तिजनकत्वमनभ्यासदशापन्ने ज्ञाने प्रवृत्यनन्तरं ग्राह्यं तत्र प्रागनवगतं तत्कथं प्रामाण्यमनुमापयेद्घटत्वव्याप्यकम्बुग्रीवादिमति घटत्वप्रकारकत्वेन प्रमाण्येऽनुमीयमाने घटत्वव्याप्यकम्बुग्रीवादि-मत्त्वग्रहस्यावश्यकतया तत एव घटत्वसंशयनिवृत्तावलं प्रामाण्यानुमानेनेति चेन्न। स्वतः सिद्धाव्यभिचारादर्शनाद्व्याप्तिग्रहे विपक्षबाधकतर्कानपेक्षणात् कम्बुग्रीवादिमत्त्वे घटत्वव्याप्तिग्रहं विनापि कम्बुग्रीवादिमति घटत्वप्रकारकत्व-हेतोर्घटत्वघटितप्रामाण्यव्याप्यत्वग्रहसम्भवेन प्रामाण्यानुमानसम्भवात्।

तात्पर्यटीका

ननु सामग्र्यभावादिति वक्तव्ये संशयानुपपत्तित इति वक्तुः सामग्रीसत्त्वमभिप्रेतं तत्कुतो न कार्यमिति शङ्कते। **न चेति**। **एवं** प्रामाण्यस्य स्वतो ग्राह्यत्वानङ्गीकारे। **कथमिति**। पक्षे इति शेषः। तद्वद्विशेष्यकतत्प्राकरकत्वयोरेव प्रामाण्यत्वादित्यर्थः। **अत** एव समानविशेष्यकत्वरक्षणाय ज्ञाने संशयानुरोधादि**त्युक्तम्**। **तयो**स्तद्वद्विशेष्य-कत्वतत्प्रकारकत्वयोः। **अ**नभ्यासदशापन्ने विशेषदर्शनाविषयस्वसजातीय-ज्ञानान्तरके। **ग्राह्यं** ग्रहणयोग्यम्। तत्र पक्षीभूते ज्ञाने। **तत्**समर्थप्रवृत्तिजनकत्वम्। समर्थत्वं वस्तुतस्तद्वद्विशेष्यकत्वम् तद्ग्रहश्च तद्वद्विशेष्यकत्वत्वेन तद्व्याप्यवद्विशेष्यकत्वत्वेन वेति विकल्प्य प्रथमे प्रवृत्यनन्तरमिति। द्वितीयमभिप्रेत्याह **घटत्वव्याप्यकम्बुग्रीवादिमतीति**। कम्बुग्रीवादिमति घटत्वप्रकारकत्वे घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्य-व्याप्तिग्रहेऽनुकूलतर्कविधया कम्बुग्रीवादिमत्त्वे घटत्वव्याप्तिग्रहोऽपेक्षित-स्तदिदमुक्तमावश्यकतयेतीति शङ्कां वारयति। **स्वत इति**।

तर्कामृतम्

स्वतः प्रामाण्यग्रह इति त्रयो मीमांसकाः। तत्र गुरुमते 'अयं घटः' इति ज्ञानम्, विषयम्, आत्मानम्, ज्ञानप्रामाण्यं च गृह्णाति। मुरारिमिश्रमते 'अयं घटः' इति ज्ञानानन्तरं घटमहं जानामीत्यनुव्यवसायः, तेनैव प्रामाण्यग्रहः।

तरङ्गिणी

स्वत इति। तज्ज्ञानविषयकजन्यज्ञानाजन्यज्ञानादित्यर्थः। तत्र तेषु। **अयं घट इति।** अयं घटो घटमहं जानामीत्याकारकमित्यर्थः। घटचक्षुःसन्निकर्षघटितसामग्र्या एव आत्मज्ञानप्रामाण्यविषयकत्वस्य कार्यतावच्छेदकत्वादिति भावः। **मिश्रमत इति।** व्यवसायेन घटघटत्वयोस्तद्वैशिष्ट्यस्य चोपनीतत्वाद्विशेष्यत्वप्रकारकत्वयोश्चानुप स्थितयोरेव भानात्। प्रथमानुव्यवसायेनैव तद्ग्रह इति भावः।

चषकम्

इदमुपलक्षणम्। द्वितीयाद्यनुव्यवसायेनापि न्यायनये प्रामाण्यं गृह्यत एव यत्र संशयजनकदोषाभावस्तत्र प्रथमानुव्यवसायेन ज्ञाने पुरोवर्तिविशेष्यकत्वस्यावगमे सति विशेष्यतावच्छेदकप्रकारक-निर्णयवशात्तद्विशिष्टे इष्टतावच्छेदकप्रकारकत्व वैशिष्ट्यस्यावगमादवच्छेद्या-वच्छेदकभावस्य सुलभत्वादित्यपि **बोध्यम्।** प्रामाण्यप्रत्यक्षे विशिष्टप्रामाण्योपस्थितेर्हेतुत्वे तु न द्वितीयानुव्यवसायेनापि प्रामाण्यग्रह इत्यास्तां **तावत्। ज्ञानान्तरवदिति।** तज्ज्ञानवदित्युक्ते तज्ज्ञाने प्रामाण्यसाधने इदं ज्ञानं दृष्टान्त इति शङ्कयाऽन्योन्याश्रयशङ्का स्यादितीत्थमभि**हितम्। यद्य**पीत्थमपि पूर्वपूर्वज्ञानमुत्तरोत्तरत्र दृष्टान्त इत्यनवस्थैव **तथा**प्यनादित्वादसौ न दोषः। **स्वतः** स्वतोऽपि **अत्रापि** तत्रेत्यनुवर्तते। स्वपदमात्मीयात्मोभयपरमिति मतत्रयसाधारण्यं प्रामाण्यग्रहः गुरोर्मते स्वीयसामग्रीतः स्वात्मको मिश्रभट्टयोस्तु स्वाभिन्नप्रामाण्याश्रयतः स्वकीयाध्यक्षानुमितिरूपः।

तथा च स्वतस्त्वे प्रामाण्यवत एव ज्ञानस्य ग्रहाद्भट्टमतेऽप्यनुमितिविषयप्रमाव्यक्तेरनुमितिजनकज्ञानागोचरत्वात्तज्ज्ञान-विषयजन्यज्ञानाजन्यजन्यज्ञानादपीति यावत्। **त्रय** इत्यनेन त्रिभिर्युगपदेव विवादे इति सूचितम्। **अत** एवं त्रितयसाधारणविप्रतिपत्तिप्रदर्शनमर्थवत्। **आत्मानं** व्यवसायम्। गुरुमते ज्ञानोत्पादकसामग्र्या विषयतज्ज्ञान-तत्प्रामाण्यैतत्त्रितयविषयकज्ञानोपधायकत्वात्। **तेनै**व प्राथमिकानुव्यवसायेनापि घटघटत्ववैशिष्ट्यानां व्यवयायोपनीतानामनुपस्थितयोरेव विशेष्यत्वप्रकारत्वयोश्च प्रकारत्वस्याभ्युपगमात् **ननु** ज्ञानज्ञानस्य विषयाविषयकत्वात्कथं विषयघटितप्रमाण्यं तद्विषय इति **चेज्ज्ञानं** यतो विषयाविषयकप्रत्यक्षविषयस्ततो विषयविषयितानियतस्वविषयिताकप्रत्यक्षकम्। **तदे**तदुक्तम्। विषयनिरूप्यं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषय इति।

तात्पर्यटीका

विशिष्टप्रमाण्योपस्थितेस्तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वोपस्थितेः। विशेष्ये विशेषणमितिरीत्या प्रामाण्यनिश्चयाभ्युपगमे विशेष्येप्रकारसंशयकालेऽपि तादृशप्रामाण्यनिश्चयसम्भवात्तेनापि निष्कम्पप्रवृत्यनिर्वाहादित्यभिप्रेत्योक्त**मास्तां तावदिति**। बाधादिभ्रमे स्वतः प्रामाण्यग्रहासम्भवेन कदाचित्प्रामाण्यानुमितिरपि तेषामविरुद्धेत्याशयेन पूरयति। **स्वतोऽपीति। अनुवर्त्तत इति** तेन स्वतः प्रामाण्यग्रहधर्मिणो जिज्ञासा निवर्तत इति भावः। मूले गुरुमतस्य प्रथममुपन्यासात्तदनुरोधेनात्मीयपरतया स्पपदं प्रथमं व्याचष्टे **स्वपदमिति**।।

भट्टमते स्वतस्त्वं व्युत्पादयितुं परिष्करोति। **तथा चेति**। ननु त्रयाणामपि प्रामाण्ये प्राथमिक ज्ञानग्रहविषयत्वमभिमतमन्यथा मतान्तराविशेषस्तथा च भट्टमते प्रामाण्यस्यानुमेयत्वेनानुमितौ च व्याप्तिग्रहस्य साध्यज्ञानाधीनस्यापेक्षणात्कथमेतदत आह **भट्मतेऽपीति**। तथा च यो यद्वृत्तियत्प्रकारकज्ञाततावान् स तद्विशेष्यकतत्प्रकारकज्ञानवानिति साध्यागोचरसामान्यमुखव्याप्तिग्रहादेवात्मपक्षिकानुमितिरित्यग्रे व्यक्तीभविष्यति। एवकारोऽप्यर्थे क्वचित्प्रामाण्यानुमितेस्तेषामप्यविरुद्धत्वादित्युक्तयुक्तेरहमेव ब्राह्मण इति न्यायादित्याह तेनैवेत्यादि।

तर्कामृतम्

भट्टमते ज्ञानस्यातीन्द्रियत्वेन ज्ञानमनुमेयं यथा, तथा तद्वृत्ति प्रामाण्यं च[१]। तथाहि 'अयं घटः' इति ज्ञानानन्तरं घटे ज्ञातता उत्पद्यते, ततो 'ज्ञातो मया घटः' इति ज्ञातताप्रत्यक्षम्, ततो व्याप्त्यादिप्रत्यक्षानन्तरं ज्ञानानुमानम्, यथा अहं घटत्वप्रकारकज्ञानवान्, घटत्वप्रकारकज्ञाततावत्त्वात्, तावतैव तस्य धर्मधर्मिविषयकत्वेन प्रामाण्यानुमानम्।

इति प्रत्यक्षनिरूपणम्

तरङ्गिणी

ज्ञानस्यातीन्द्रियत्वेनेति। निर्विकल्पकस्यातीन्द्रियत्वेन निष्प्रकारकज्ञानत्वेन प्रत्यक्षप्रतिबन्धकत्वे कल्पनीये ज्ञानत्वेनैव प्रतिबन्धकत्वे कल्पनीये लाघवम्। **यथा तथेति।** यथा ज्ञानमनुमेयं तथा प्रामाण्यमनुमेयं भवत्येवेत्यन्वयः। यैव ज्ञानानुमितिः सैव प्रामाण्यानुमितिरिति फलितोऽर्थः। **घटत्वप्रकारकज्ञानवानिति।** घटत्वप्रकारकज्ञाने घटभिन्नविशेष्यकत्वबाधसहकारेण घटविशेष्यक-घटत्वप्रकारकज्ञानत्वेनैव सिद्धेरिति। व्याप्तिश्च यो यत्प्रकारकज्ञाततावान् स तत्प्रकारकज्ञानवानिति सामान्यतो ग्राह्या। तावतैव इतरबाधसहकृततादृश-व्याप्तिग्रहेणैव। धर्मधर्मिविषयकत्वेन धर्मप्रकारकत्वधर्मिविशेष्यकत्वेन। ज्ञाततायाश्च तदीयतानियामकस्वरूपसम्बन्धेनात्मवृत्तित्वम्।

चषकम्

अतीन्द्रियत्वेनेति पूर्वं घटत्वप्रकारकज्ञानाभावेन घटत्वविशिष्टघटप्रकारेण जात्यतिरिक्तपदार्थस्य स्वरूपतो प्रकारतया च केवलघटप्रकारेणापि तत्प्रत्यक्षासम्भवादावश्यकातीन्द्रियभावस्य निर्विकल्पकस्य प्रत्यक्षवारणाय

---

१. 'च' इति पाठः नास्ति।

प्रत्यक्षे ज्ञानत्वेनैव प्रतिबन्धकत्वं कल्प्यत इत्याशयः। **यत्तु** विशेष्ये विशेषणमितिरीत्यैव घटत्वविशिष्टघटप्रकारेण निर्विकल्पकाध्यक्षं घटत्वप्रकारकं ज्ञानं विनापि सम्भवतीति प्रत्यवस्थानम्। **तन्न**। विशेष्ये विशेषणमिति रीत्या ज्ञानानुव्यवसायानुपगमात्। अन्यथा रक्तः पटो घटो द्रव्यमिति व्यसायेऽपि रक्तघटं जानामीत्यनुव्यवसायस्य दुर्वारत्वादित्यत्र **विस्तरः**। **यथातथेति** यस्मात्तस्मादित्यर्थः। तथा च ज्ञानानुमितिरेव प्रामाण्यानुमितिरिति भावः। **ज्ञात इति** घटत्वेनेत्यादिः। मयेति मदीयत्वोल्लेखेनात्मज्ञातयोः स्वरूपसम्बन्धः सूचितः। **घट इति**। घटत्वप्रकारकज्ञाततायां घटत्वसामानाधिकरण्यभानादेव तां प्रति घटे समवायिकारणत्वस्य तदभ्युपगतस्य निर्वाहादिति भावः। **तदि**दमुक्तं घटे ज्ञाततोत्पद्यत इति। **व्याप्त्यादिप्रत्यक्षे**ति। पूर्वानुभूतप्रामाण्यविशिष्टज्ञानस्मरणसहकारिवशादिति भावः। **नचैवमनवस्था**। तस्या अनादित्वे बीजाङ्कुरवददोषत्वमिति निगर्वात्।

घटप्रकारकेति। घटवृत्तिरित्यपि **बोध्यम्**। **अत्र** यो यद्वत्तियत्प्रकारकज्ञाततावान् स तद्विशेष्यकतत्प्रकारकज्ञानवानिति सामान्यमुखव्याप्तेर्ग्रहात्तच्च घटत्वादीति विशेषतो यत्पदार्थोपस्थिति-रूपसहकारिवशादुक्तरूपानुमितिर्भवतीत्यव**धेयम्**। **ज्ञाततावत्त्वादिति**। अस्याः पूर्वसूचितसम्बन्धेनैव हेतुता बोध्या। **स्व**जनकज्ञानवत्त्वेनैव तथात्वमित्यपि वदन्ति। **ताव**तैव घटत्वप्रकारकत्वेनैव। **तस्य** ज्ञानानुमानस्य। **धर्म**धर्मिविषयकत्वेन घटे धर्मित्वविषयकत्वे सति घटत्वे धर्मत्वविषयकत्वेन परस्परनिरूप्यनिरूपकभावापन्नस्य तस्यैव च विशिष्टस्य भ्रमव्यावृत्तस्य तैः प्रामाण्यतयाभ्युपगमात्। **प्रामाण्यानुमानमिति**। ययोर्द्वयोर्विशिष्टधीस्त-न्निष्ठपरस्परनिरूपितधर्मत्वधर्मित्वयोरसंसर्गाग्रहकालीनसमूहालम्बनस्याप्यविषयो-रगृहीतासंसर्गधर्मधर्मिविषयकैकबुद्धिरूपविशिष्टबुद्धिविषयत्वस्य भट्टैः स्वीकृतत्वादिति भावः।

गुरुमतानुयायिनस्तु सर्वत्र विशिष्टबुद्धौ सम्बन्धविषयता न नियता तेषां समवायातीन्द्रियत्वात् अन्यथाख्यात्यापत्तेश्च **किन्तु** पारिभाषिकेव धर्मधर्मिविषयकत्वम्। **तच्च** धर्मिनिरूपिततत्सम्बन्धावच्छिन्नधर्मकाङ्क्षावत्त्वम्। **सा** चोक्तविशेषणविशेष्यभावरूपा समूहालम्बने न वर्तते। **किन्तु** विशिष्टज्ञाने

भ्रमस्थानाभिपिक्तज्ञानद्वये च। **तथा** च शुक्तिनिरूपिततत्सम्बन्धावच्छिन्नरजतत्वाकाङ्क्षायास्तत्र सत्त्वेऽपि तयोर्न धर्मधर्मिभाव इति न तत्र रजतत्वप्रमाण्यप्रसिक्तिरित्याहु:।

तात्पर्यटीका

घटत्वविशिष्टघटप्रकारेणेति तत्प्रत्यक्षासम्भवादित्यत्राऽन्वेति। जातीत्यखण्डोपाधिमात्रोपलक्षणं तयोस्तु स्वरूपत: प्रकारत्वमानुभविकमिति भाव:। **दुर्वारत्वादिति**। कथं तर्हि रक्तं दण्डं सन्देह्मीत्यनुव्यवसाय इत्यत आहा**न्यत्रेति**। दण्डे रक्तत्वं सन्देह्मीत्येव तदनुव्यवसायोऽभ्युपेयत इत्याशय:। यत्वतत्वव्याप्यघटत्वाद्यवच्छिन्नस्यानुपस्थितौ न सामान्यमुखव्याप्तिग्रह इत्याशङ्क्याह **पूर्वानुभूतेति**।

पूर्वसूचितसम्बन्धेनैव स्वरूपसम्बन्धेनैव। मतान्तरमाह **स्वजनकेति** अत्र **पूर्वं** ज्ञानानुपस्थितौ परम्परासम्बन्धघटकप्रकारानुपस्थित्या परस्परविशेषणविशेष्यभावापन्नस्य ज्ञानघटितनिरुक्तपरम्परासम्बन्धस्य हेतुमत्तापरामर्शविषयत्वासम्भवो स्वरसोऽपि वदन्तिभ्यां **सूचित**:। विशिष्टस्य तद्धर्मितानिरूपिततद्धर्मत्वस्य तद्धर्मतानिरूपिततद्धर्मित्वस्य वा न तु द्वयस्यापि व्यर्थत्वादिति बोध्यम्। **भ्रमव्यावृत्तस्येति**। विशेषणवद्विशेष्यसन्निकर्षाजन्यत्वादिति भाव:। **न चैवं**गतमुत्पत्तिप्रामाण्यस्वतस्त्ववादेनेति **वाच्यम्**। प्रामाण्यस्यैवासतो धर्मधर्मिभावस्याप्यभाने तात्पर्यात्। यद्वक्ष्यति **धर्मधर्मिविषयकेति**। वास्तविकधर्मधर्मिभावापन्नवस्तुविषयकेति तदर्थ:। इत्थमेव धर्मधर्मिविषयकत्वेन प्रामाण्यानुमानमिति मूलसन्दर्भ: सङ्गच्छत इति बोध्यम्। धर्मत्वधर्मित्वयोरित्यस्य विशिष्टबुद्धिविषयत्वस्येत्यनेनान्वय:। अप्यविषययोरिति। अपिनाऽसंसर्गग्रहकालीनसमूहालम्बनविषयत्वं सुतरां न सम्भवतीति **सूचितम्**।

शुक्लो वह्निर्जपा लोहितेत्यत्र वह्नौ लौहित्यस्यासंसर्गग्रहकाले लौहित्ये जपाधर्मत्वस्य वह्नौ शुक्लधर्मित्वस्य च भाने बाधकाभावेऽपि निरूप्यनिरूपकभावाभावादेव वह्नौ लौहित्यविशिष्टबुद्धित्वं न सम्भवतीति

तद्वारयायाह। **गृहीतेति। अत एवैकेति।** परस्परनिरूप्य-निरूपकभावापन्नधर्मधर्मिभावप्रापकम्। तेन भ्रमस्य निरुक्तविशिष्टज्ञानत्वं नास्तीति कुतः प्रामाण्यमिति दर्शितम्। प्राभाकरैः समवायानभ्युपगमादनुयायिन **इत्युक्तम्**। वह्निमान्ह्रद इत्यत्रैन्द्रियकस्यापि संयोगस्य विषयत्वाङ्गीकारे दोषमाह**ान्यथाख्यात्यापत्तेश्चेति। न वर्तत इति।** तेन तस्य विशिष्टबुद्धित्वव्युदासः। **भ्रमस्थानाभिषिक्तज्ञानद्वये चेति।** तेन तस्य विशिष्टबुद्धित्वं सम्पद्यते। **न चैवं** भ्रमस्यापि प्रामाण्यं प्रसज्येतेत्याह। **तथा चेति। न धर्मधर्मिभाव इति।** तथा च ययोः परस्पराकाङ्क्षा तयोर्धर्मधर्मिभाव एव ज्ञानप्रामाण्यं तद्ग्रहेऽपि हेतुरुक्त एव विशेषणवद्विशेष्यसन्निकर्षः सोऽपि निष्पीड्यमानो वस्तुसत्तापर्यवसायीत्युक्तमधस्तादित्याशयः। **क्लृप्त**समवायविषयकत्वकल्पनापेक्षयोक्ताकाङ्क्षाकल्पना गौरवादुक्त-**माहुरिति।**

तर्कामृतम्

अनुमितिकरणमनुमानम्। अनुमितित्वं जातिः। व्यापारवत्कारणं करणम्। व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकः।

तरङ्गिणी

अनुमितित्वं जातिरिति। अनुमिनोमीत्यनुव्यवसायसिद्धेति शेषः। **तज्जन्यत्वे सतीति।** भवति च परामर्शो विशेषणज्ञानविधया हेत्वादिना जन्यः, तज्जन्यानुमितिजनकश्च।

चषकम्

करणस्य क्रियाभेदभिन्नमूर्तिकत्वमभिप्रेत्य क्रियाघटितं तल्लक्षणमाह। **अनुमितिकरणमिति। जतिरिति।** अनुमिनोमीत्यनुगतप्रत्यक्ष-

सिद्धानुमितिलक्षणमित्यर्थः। यथा च हेतुपक्षतावच्छेदकयोरैक्येऽपि न सिद्धसाधनं **तथोक्तमधस्ताद्वक्ष्यते** चाधिकमुपरिष्टात्। **तज्जन्यत्वे सतीति**। भवति च परामर्शो विशेषणज्ञानविधया हेतुज्ञानादिजन्यस्तथा द्वारेण द्वारिणोऽनन्यथासिद्धेः स्वतन्त्रान्वयव्यतिरेकाभ्यां वा तज्जन्यानुमितिजनकश्चेति मूल एव सुव्यक्तम्।

तात्पर्यटीका

करणस्येति। प्रत्यक्ष निरूपणानन्तरमनुमाननिरूपणोपयोगिन्यामनुमान-जिज्ञासायामनुमाननिरूपणासिद्धत्वज्ञानं हेतुस्तत्र प्रत्यक्षभेदधीस्तत्र च साक्षात्कारविजातीयप्रमितिकरणताधीरिति प्रमितिघटितप्रमाणलक्षणादर इति भावः। **मूर्तिः** करणत्वम्। तद्भेदादेव प्रमाणभेदव्यवहारात्। **अनुमितिलक्षणमिति**। तेन साक्षात्कारविजातीयत्वं ग्राह्यमित्याशयः। हेतौ व्याप्तिघटकसामानाधिकरण्यग्रहे साध्ये हेतुसामानाधिकरण्यं तुल्यवित्तिवेद्यं हेतुश्च पक्षतावच्छेदक इति पक्षतावच्छेदकविशिष्टे साध्यावगमात् सिद्धसाधनमित्यत आह। **यथा चेति**। **नेति** दोषायेति शेषः। **तथोक्तमिति**। अवच्छेदकावच्छेदेनानुमितेरुद्देश्यतया तत्र च सामानाधिकरण्येन सिद्धेरविरोधित्वादिति भावः। **वक्ष्यत इति** हेतुमान् साध्यवानित्यनुमितिसमानाकारा सिद्धिर्न वृत्तैवेति वक्ष्यत इति भावः। **ननु** यत्र द्वारिणः कारणता प्रमाणन्तरेण सिद्धा तत्रैव द्वारेणान्यथासिद्धिर्न भवतीत्याशङ्क्य तस्य कारणताग्राहकं प्रमाणं दर्शयति। **स्वतन्त्रेति**। अन्यपूर्ववृत्तित्वग्रहनिरपेक्षकार्यपूर्ववृत्तित्वग्रहकत्वात्किञ्चित् लिङ्गज्ञानादिकं विना कदाप्युक्तानुमितेरनुदयाद्धूमलिङ्गकानुमितिसामान्याभाव-प्रयोजकाभावप्रतियोगिधूमज्ञानत्वेन तत्र हेतुत्वे लाघवादत एव सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाहेतुत्वमामनन्ति। अन्यथा विशेषधर्मप्रकारकज्ञानेष्टसाधनताज्ञानहेतुतयाऽन्यथासिद्धिप्रसङ्गादिति भावः। **मूल एवेति**। **आदावनुभवस्तत** इत्यादिमूलेत्यर्थः।

तर्कामृतम्

हेतुज्ञानादि करणम्।

तरङ्गिणी

हेतुज्ञानादीत्यादिपदात्साध्यज्ञानाभावज्ञानयो: सङ्ग्रह:। हेतुज्ञानमात्रादनुमित्यतिप्रसङ्गश्च परामर्शरूपव्यापारेणैव निरसनीय:।

चषकम्

हेतुज्ञानादीति आदिना व्याप्तिज्ञानं परिगृह्णता व्याप्तिज्ञानजन्यत्वे सति परामर्शजन्यत्वमप्यनुमितिलक्षणमुक्तम्। तत्रैकैकजन्यविशिष्टवैशिष्ट्यप्रत्यक्षवारणायोभयजन्यत्वमुपात्तम्। द्वारद्वारिणोरेकमेवजन्यतावच्छेदकमित्यभ्युपगमात्तद्वारणं भवति। **अत्र** प्राञ्च:। परिचेये ज्ञाने व्यावर्त्तकान्तराभावेन न लिङ्गस्य परिचायकता सम्भवति विशिष्टे कारणताग्रहस्य विशेषणेऽपि कारणत्वावगाहितया परस्परं सम्भवतोऽवच्छेद्यावच्छेदकभावस्य तु विनिगन्तुमशक्यतया चोभयोर्हेतुत्वे ज्ञानव्यापरकं लिङ्गमनुमितिकरणमित्यूचु:।

यत: प्रमेयमितिज्ञानविषयाल्लिङ्गादनुमितिवारणाय परामर्शरूपव्यापारान्तरस्यापेक्षायां व्यापारपूर्ववर्तिनो हेतुज्ञानस्य कार्यपूर्ववर्तित्वं सुग्रहमित्यलं लिङ्गकरणतया। **परा**मृश्यमानलिङ्गत्वेन कारणत्वे परामर्शहेतुतायां लाघवान्न विनिगमनाविरह:। **अथ** विशिष्टज्ञानीयविलक्षणविषयतया लिङ्गज्ञानयोरवच्छेद्यावच्छेदकभावेऽस्त्येव विनिगमनाविरहो व्याप्त्याद्यप्रवेशादिति **चेदा**स्तां तदापातत:। तथाप्यतीतस्य लिङ्गस्य शाब्देन परामर्शेनानुमित्यनापत्ते:। स्वजन्यव्यापारसम्बन्धेन लिङ्गहेतुत्वापेक्षया समवायेन ज्ञानहेतुत्वे लाघवाच्च। **न च** लिङ्गज्ञानस्यापि स्वजन्यव्यापारसम्बन्धेनैव हेतुत्वात् कथं लाघवमिति **वाच्यम्**। फलोपधायकतायामेव सा प्रत्यासत्तिरित्याशयात्। **एतेन** न भवत्येव तत्रानुमिति: प्रवृत्तिस्तूपनयबलादप्युपपद्यते इति शङ्का **परास्ता**।

न च हेतुज्ञानस्यानुमितिजनकत्वे तन्मात्रादेवानुमितिप्रसङ्गः, करणान्तरस्य प्रत्यासत्यन्तरसम्भवादिति वाच्यम्। यं जनयित्वैव यस्य फलोपधानं तस्य तद्व्यापारकतया परामर्शं विनानुमित्यापादनासम्भवादिति। **तथा** च जन्यजनकभावघटितप्रत्यासत्या फलोपहितत्वं करणत्वमिति फलितं **तेनै**कच्छिदाकरणस्य पितुः पुत्रस्य व्यापारयापारिभावो न भवति। त्वां प्रति स्वजन्यपुरुषव्यापार्यत्वसम्बन्धेन पितुस्तथात्वभावात्। **न च** तथापि स्मरणात्मकपरामर्शजन्यानुमितौ हेतुज्ञानस्य व्यभिचार इति **वाच्यम्**। पूर्वानुभवस्य संस्कारद्वारा तत्रापि सत्त्वात्। **नव्यास्तु** परामर्शत्वव्यापक-हेतुज्ञानत्वादिनान्यथासिद्धतया न हेत्वादिज्ञानं करणं **किन्तु** मन एवेत्याहुः।

तात्पर्यटीका

एकैकेति। व्याप्तिज्ञानपरामर्शयोरेकैकेत्यर्थः। **ननु** तथापि परामर्शात्मकविशेषणतावच्छेदकप्रकारकधीमूलकप्रत्यक्षेऽतिव्याप्तिर्दुर्वारैव परामर्शात्मकस्यैव व्याप्तिज्ञानस्य जन्यताया अपि तत्रावैकल्यादत आह। **द्वारद्वारिणोरिति**। तथा च व्याप्तिज्ञानजन्यतावच्छेदकावच्छिन्ना या परामर्शजन्यता तद्वत्त्वं विवक्षितमिति भावः। **न च** व्याप्तिज्ञानजन्यतावच्छेदकं व्याप्तिज्ञानोत्तरानुमितित्वं तावन्मात्रञ्च न परामर्शजन्यतावच्छेदकमित्यसम्भव इति **वाच्यम्**। तथा सति धूमो वह्निव्याप्यो वह्निव्याप्यालोकवांश्च पर्वत इति समूहालम्बनजन्यानुमितेः पूर्वं परामर्शद्वारा धूमीयव्याप्तिज्ञानाभावेन व्याभिचारापत्या परामर्शोत्तरानुमितित्वस्यैव व्याप्तिज्ञानजन्यतावच्छेदकत्वात्। **परिचेय इति**। यथा काकपरिचेये गृहे उत्तृणत्वादि। अस्तु तर्हि विशेषणतैवेत्यत आह **विशिष्ट इति**। **विशेषणेऽपीति**। विशेषणत्वस्य विशेष्यान्वयि-नान्वयित्वरूपत्वादिति भावः। **का**रणत्वावगाहितयेत्युभयोर्हेतुत्वे इत्यनेनान्वितम्। अवच्छेदकत्वपक्षेनैष दोष इत्यभिप्रेत्याह **परस्परमिति** तथापि फलतो नानयोर्विशेष इत्याहोभ**योर्हेतुत्वं इति**।

व्यापारान्तरस्य प्रमेयमिति ज्ञानभिन्नस्य। **हेतु**ज्ञानस्य परामर्शजनकस्य। **न विनिगमनाविरह इति**। तथा चोभयोर्हेतुत्व इति व्याहतमिति भावः।

व्याप्त्याद्यप्रवेशादिति। **ननु** विलक्षणविषयतानामव्याप्त्यवच्छिन्न-हेतुविषयतावच्छिन्नपक्षविषयतैवेति तत्र व्याप्त्यादिप्रविष्टमेवेति **चेन्न**। अतिरिक्तविषयतामुपेत्य तथामिधानात्। तादृशविषयतायाः प्रतिबन्दिसहस्रकवलितत्वादा**पातत इति**। **पातः** प्रत्यवस्थानं प्रमाणकथन्तेति यावत्तां मर्यादीकृत्येत्यर्थः। अतीतस्यापि लिङ्गस्याध्यक्षद्वारके स्मरणे व्यापारत्वं सम्भवतीति **शाब्देनेति**। **एतेन** ज्ञानहेतुतायां लाघवेन।

यत्र विनश्यदवस्थपरामर्शोत्तरं लिङ्गमात्रगोचरं ज्ञानं जातं ततोऽनुमितेरापत्तिः। फलोपधायकतानियामकप्रत्यासत्तिलिङ्गज्ञानयोस्तत्रात्मनि सत्त्वादित्याशङ्कते। **न चेति**। यत्करणं तस्य सा प्रत्यासत्तिरपेक्षितेत्युत्तरयति। **यमिति**। **तथात्वाभावात्** फलोपधायकत्वाभावात्। **तत्रापि** स्मरणात्मकपरामर्शस्थलेऽपि। **स**विषयकत्वेनैव कारणत्वमस्तु किं संस्कारद्वारा व्याप्तिज्ञानकल्पनेनेति तु न **युक्तम्**। अत्यन्ताजनकेच्छादिसाधारण्येन तस्यातथात्वात्। अत्र व्यापाकरूपेणापि हेतुताया उक्तयुक्त्यावश्यकत्वे तेन रूपेणान्यथासिद्धिर्न कल्पनीयेत्यस्वरस आहुतिरत्यनेन सूचितः।

तर्कामृतम्

परामर्शो व्यापारः। परामर्शश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानम्।

तरङ्गिणी

व्याप्तिविशिष्टेति। व्याप्तिप्रकारकं पक्षधर्मताज्ञानमित्यर्थः। न च वह्निव्याप्यो धूमः, धूमवान् पर्वत इति ज्ञानस्यापि तादृशपक्षधर्मताज्ञान-त्वादतिप्रसङ्गः। व्याप्त्यवच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्न-विशेष्यताशालिनिर्णयस्यैव विवक्षितत्वात्। समूहालम्बने च पक्षतावच्छेदका-वच्छिन्नविश्येष्यतानिरूपिता प्रकारता न व्याप्त्यवच्छिन्ना। निर्णयत्वनिवेशाच्च संशयव्युदासः। तत्त्वं च विरोधसम्बन्धानवच्छिन्नप्रकारतानिरूपितव्याप्त्यवच्छिन्न-प्रकारतेत्यादिरूपम्। ईदृशविलक्षणज्ञानबोधनायैव प्रकारकपदमपहाय विशिष्टपदमुपात्तम्।

चषकम्

परामर्शो विशेषणज्ञानविधया हेतुज्ञानादिजन्यो . विशिष्टपरामर्शः। **व्याप्तिविशिष्टेति**। व्याप्तिविशिष्टञ्च तत् पक्षधर्मताज्ञानं चेति कर्मधारयः। सम्बन्धसामान्यार्थकेन शिष्धातुना प्रकृते प्रकारतारूपसम्बन्धस्य योग्यतावशेन लाभाद्व्याप्तिविशिष्टमित्यस्य व्याप्तिप्रकारकमित्यर्थः। तेन धूलीपटलगोचराद्वह्निव्याप्यधूमवानितिज्ञानादप्यनुमितिरुपद्यते।

न चैवं तथैव वक्तुमुचितमिति **वाच्यम्**। विशिष्टस्य वैशिष्ट्यमिति ज्ञाननियतस्य व्याप्तिप्रकारकत्वपक्षधर्मताविषयकत्वयोरवच्छेद्यावच्छेदकभावस्य लाभपरत्वा**दन्यथा** व्याप्तिघटकयावत्पदार्थानां विशृङ्खलोपस्थितिमूलो विशेष्ये विशेषणमिति रीत्या परामर्शोऽपि हेतुः स्यात्तथा सति व्याप्तिसंशयोत्तरं जायमानादत एव व्याप्त्यंशे सन्देहात्मनस्तादृशपरामर्शादनुमित्यापत्तेर्वारणाय व्याप्त्यभावाप्रकारकत्वनिवेशापत्या गौरवापत्तेः। **यद्य**पि व्याप्त्यभावांशे आहार्यसंशयवारणाय तन्निवेश आवश्यक एव **तथा**पि तदंशेनाहार्यसंशयव्यावृत्तये क्वचित्तदनिवेश इत्येव लाघवम्। **पक्षधर्मतेति**। पक्षे पक्षपदव्यवहार्ये। **धर्म**तया हेतुतावच्छेदकसम्बन्धेन ज्ञानमित्यर्थः। तेन वास्तविकहेतुपक्षसम्बन्धानवगाहिनोऽपि ज्ञानादनुमितेरुपपत्तिरिति दिक्।

ज्ञानं निश्चयः। तत्त्वञ्च हेतुतावच्छेदकसम्बन्धावच्छिन्नतदभावाप्रकारकत्वे सति तेन तत्प्रकारकत्वम्। तच्च पक्षविशेष्यकत्वान्तर्भावेण तेनाऽन्यत्र संशयात्मनोऽपि पक्षांशे निश्चयात् पक्षेनानुमितेरनुपपत्तिर्**नवा**न्यत्र संशयमात्रादेव तत्रापत्तिरित्यास्तां **तावत्**।

तात्पर्यटीका

हेतुज्ञानदीत्यादिना व्याप्तिज्ञानपरिग्रहः। **ननु** व्याप्तिविशिष्टधूमाभेदस्य पक्षधर्मताज्ञाने बाधात् कथं कर्मधारय इत्याशङ्क्याह **सम्बन्धसामान्यार्थकेनेति**।

तथैव व्याप्तिप्रकारकमित्येव। **विशिष्टस्य वैशिष्ट्यमितीति**। यथाश्रुताद्व्याप्तिविशिष्टस्य पक्षे धर्मतया ज्ञानमित्येतादृशविशिष्ट-वैशिष्ट्यधीलाभादुक्ततात्पर्यं निर्वहतीति भावः। **अन्य**था व्याप्तिप्रकारमित्युक्तौ। **हेतुः** स्यादिति तस्यापि व्याप्तिप्रकारकत्वात्पक्षधर्मताविषयकत्वाच्च। **क्व**चिद्यत्र लिङ्गे व्याप्त्यभावांशेऽनाहार्य एव संशयस्तल्लिङ्गकपरामर्शजनकतावच्छेदककोटौ। **वास्तविकहेतुपक्षसम्बन्धानवगाहिनोऽपीति**। अपिनेदमभ्युपेत्योक्तमिति **सूचितम्**। तेन तादृशभ्रमजनकदोषे मानाभावाद्यथाश्रुतमेव ऋज्विति। यत्र वास्तवो हेतुरपि न परामर्शविषयः **किन्तु** हेतुतावच्छेदकरूपेण घट एव तत्रानुमितिसम्पत्तये व्याप्तिप्रकारतानिरूपितवास्तवहेतुविषयतापि न निवेश्या **किन्तु** धूमत्वावच्छिन्नत्वादिनैवेत्याह **दिगिति**।

पक्षविशेष्यकत्वान्तर्भावेणेति। पक्षे तदभावाप्रकारकत्वे सति पक्षे तत्प्रकारकज्ञानत्वेन हेतुता वाच्येति भावः। **नन्वे**वमपि वह्निव्याप्यधूमवन्नवा महानसं वह्निव्याप्यधूमवान् पर्वत इत्यतोऽपि महानसं वह्निमदित्यनुमित्यापत्तिरत आहा**स्तां तावदिति**। तथा च पक्षे साध्यानुमितित्वं तस्य कार्यतावच्छेदकं वाच्यमिति भावः।

तर्कामृतम्

यथा 'वह्निव्याप्यधूमवानयम्' इति। आदौ महानसादौ धूमवह्निसामानाधिकरण्यग्रहे[१] सति 'धूमो वह्निव्याप्यः' इत्यनुभवो जायते।

तरङ्गिणी

सामानाधिकरण्यग्रहे सतीति। व्यभिचाराग्रहे सतीत्यपि द्रष्टव्यम्। **अनुभवो जायत इति**। ततस्तत्समानाकारसंस्कारोत्पादे सतीति शेषः।

---

१. 'वह्निधूमसामानाधिकरण्यग्रहे' इति पाठान्तरम्।

चषकम्

यथेति। व्याप्यविशेष्यकपरामर्शजनकोपनयस्यासाम्प्रदायिकत्वात् पक्षविशेष्यक एव परामर्शः कारणमित्याशयः। **अन्यथा** परस्परजन्यानुमितौ परस्परव्यभिचारापत्तेः। अनुमितिद्वैविध्यञ्चानुभवबाधितमेव। **कथम**न्यथोक्तानुमितेश्चाक्षुषोपनीतभानत्वं पूर्वपक्षयन्ति बाह्येन्द्रियाणां स्वसम्बद्धमुख्यविशेषयकज्ञानजनकत्वस्वाभाव्यादित्यन्यत्र **विस्तरः**। **आदावनुभवो** जायत इति योजना।

वह्निधूमसामानाधिकरण्यग्रह इति। **इदमुपलक्षणम्**। व्यभिचाराग्रहे चेत्यपि **बोध्यम्**। **अत** एव व्यभिचारस्य हेत्वाभासत्वं सङ्गच्छते। **यत्तू**पाध्यभावज्ञानं हेतुर्यस्य संशयेऽतिव्याप्तेरिति **तन्न**। स्वतस्तद्ग्रहप्रतिबन्धकत्वासिद्धेः। **अन्यथो**पाधेर्हेत्वाभासान्तरताया दुर्वारत्वात्।

तात्पर्यटीका

बाह्येन्द्रियाणामिति। वह्निः पर्वत इत्यनुमित्यङ्गीकारे वह्नौ चक्षुःसंयोगाभावेन तस्या वह्निमुख्यविशेष्यकचाक्षुषोपनीतभानत्वानिर्वाहादिति भावः। अव्यवहितोत्तरत्वस्य तत्तद्व्यक्तिविश्रान्तत्वान्नानुगतत्वमिति दर्शयति। **अन्यत्र** विस्तर इति। अग्रिमस्य तत इत्यस्य प्रतिनिर्देश्यतयादावित्युक्तमित्याहे**तियोजनेति**।

व्याप्तेरिति। **न च** व्यभिचारसंशयनिश्चययोः प्रतिबध्येऽव्यभिचारनिश्चयाजन्ये तन्निश्चये व्यभिचार इति **वाच्यम्**। व्यभिचारसंशयस्याप्यप्रतिबन्धकत्वात्। न हि संशयसामग्रीमात्रादेव निश्चय इत्यभ्युपगमात्। मणिकृतां व्याप्तिग्रहोपाये तथाभिधानस्य मतान्तरालम्बनत्वा**त्तदुक्तम्**। ग्राह्यसंशस्य तु न प्रतिबन्धकत्वमिति। **ननु** व्यभिचारसंशयस्याप्रतिबन्धकत्वेऽव्यभिचारनिश्चयाजन्ये तन्निश्चये व्यभिचारवारणाय प्रतिबन्धकयत्संशयादौ यदभावत्वप्रकारकतानैयत्यविवक्षणं

मिश्राणामयुक्तम्। **न च** ग्राह्यसंशयस्यापि प्रतिबन्धकत्वं तेषामभिमतमिति **वाच्यम्**। घटव्यतिरकेनिश्चयप्रतिबध्ये घटनिश्चये व्यभिचारस्य घटसंशयाप्रतिबध्यतया वारणोक्तेरसङ्गतेरिति चेदत्र **मि**श्रानुयायिन:। व्यभिचारज्ञानस्य व्याप्तिनिश्चये मणिमन्त्रादिन्यायेन पृथगेव प्रतिबन्धकता तेषामभिमता **न तु** ग्राह्याभावज्ञानतया **कथ**मन्यथात्यन्ताभाव-गर्भव्यभिचारग्रहस्याऽन्योन्याभावगर्भव्याप्तिधीविरोधिता ग्राह्याभावावगाहितया प्रतिबन्धकत्वमेव च संशयव्यावृत्तमिति व्यभिचारसंशयप्रतिबन्धकत्वं युक्तमेवेत्याद्यधिकमग्रे **वक्ष्याम**:। **स्वतो** ग्राह्याभावाद्यनुन्नायकतया। **तद्ग्र**हेति। उपाधिग्रहसामन्येत्यर्थ:। यस्य संशयो यस्य व्यतिरेकनिश्चयश्चेत्युक्त्या यद्व्यतिरेकज्ञानसामान्यलाभात्। **असिद्धेरिति**। ग्राह्याभावाद्यनवगाहित्वा-दित्याशय:। **अन्य**थानौपाधिकत्वरूपग्राह्याभावावगाहित्वेन प्रतिबन्धकत्वे।

चषकम्

अत्रेदं बोध्यम्। अभावदेशविप्रकर्षेण यथा वह्नौ विद्यमानमपि रासभादिदेशनिष्ठाभावप्रतियोगित्वं न गृह्यते धूमवन्निष्ठाभावप्रतियोगित्वमपि दुर्ग्रहमिति योग्यानुपलब्ध्यभावाद्वह्नौ तत्सामान्याभावो न लौकिकप्रत्यक्षगम्य:। **पर**न्तु धूमवति धूमाभावस्येव धूमे धूमसमानाधिकरणाभावप्रतियोगित्वस्याप्यसत एव विरोधस्फुरणवशाद्गृह्यमाणस्त्वसावुपनयमर्यादया वह्नौ गृह्यतेऽ**त ए**वानुमानिकव्यभिचारग्रहप्रतिबध्यत्वमपि व्याप्तिग्रहस्योपपद्यते।

स च व्यभिचारग्रहस्तत्त्वेनैव व्याप्तिग्रहविरोधी न तु ग्राह्याभावज्ञानत्वेनात्यन्ताभावगर्भव्यभिचारग्रहेऽन्योन्याभावगर्भव्याप्तेरप्यग्रहा**त्पर**न्तु समवायेन धूमजनकतावच्छेदकतेजो वृत्तिजातित्वावच्छिन्नधर्मिक-धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वप्रकारकप्रत्यक्षनिर्णयं प्रति तद्धर्मिकतादृशावच्छेदकत्वप्रकारकग्रहस्य समवायसम्बन्धावच्छिन्नाभाव आत्मनिष्ठप्रत्यासत्या हेतुर्वाच्यो**ऽन्यथा**त्मभेदेन कारणताभेदप्रसङ्गाद्विषयभेदेन तत्कारणताया भेदस्त्वावश्यक एव।

तात्पर्यटीका

ननु सिद्धान्तिनामपि व्यभिचाररस्य हेत्वाभासत्वानुपपत्तिरानुमानिकव्यभिचारधीकाले व्याप्तिलौकिकप्रत्यक्षसम्भवेनानुमितिविरोधित्वासम्भवादित्याशङ्क्य व्याप्तेर्लौकिकप्रत्यक्षासम्भवं व्युत्पादयन्नेवालौकिकप्रत्यक्षं व्यवस्थापयितुमुपक्रमते। **अत्रेदं बोध्यमिति**। **अपिः** सम्भावनायाम्। **तथा** वह्निशून्यधूमदेशविप्रकर्षेण। **धूमे**ऽसत एव धूमसमानाधिकरणाभावप्रतियोगित्वस्य विरोधस्फुरणवशादर्थाद्धूमत्वेन सह विरोधस्फुरणवशाद्धूमे गृह्यमाणस्त्वसौ धूमसमानाधिकरणाभावप्रतियोगित्वस्याभाव 'इति योजना **विरो**धस्फुरणवशाद्गृह्यमाण इत्यनेन धूमेऽप्यस्योपनीतभानमेवेति दर्शितम्। **लौ**किके विरोधस्फुरणानुपयोगात्। **अत एव** व्याप्तिग्रहस्योपनीतभानात्मकत्वादेव। **व्याप्तिग्रहस्य** व्याप्तिग्रहसामान्यस्य। व्याप्तिग्रहस्य लौकिकत्वे त्वानुमानिकव्यभिचारग्रहप्रतिबध्यत्वं तस्य न स्याल्लौकिकसन्निकर्षाजन्यत्वस्य तत्प्रतिबध्यतावच्छेदककोटौ प्रविष्टत्वादिति गूढाभिसन्धिः।

तत्त्वेनैव व्यभिचारणग्रहत्वेनैव। मणिमन्त्रादिन्यायेनेति शेषः। **आत्मभेदेनेति**। **अन्य**था चैत्रस्य धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकं वह्नित्वमिति व्यभिचारग्रहकाले वह्नित्वे तादृशानवच्छेदकत्वग्रहो मैत्रस्यापि न स्यादिति भावः। **ननु** विषयनिष्ठप्रत्यासत्तिपक्षे यथात्मभेदेन प्रतिबन्धकता भिद्यते **तथा**त्मनिष्ठप्रत्यासत्तिपक्षे विषयभेदेन प्रतिबन्धकतापि। **अन्य**था घटत्वं तादृशाभावप्रतियोगितावच्छेदकमिति ग्रहे वह्नित्वं तादृशाभावप्रतियोगितानवच्छेदकमित्यपि ग्रहो न स्यात्तत् कुत आत्मनिष्ठप्रत्यासत्तिरादियते इत्याशङ्क्य विषयनिष्ठप्रत्यासत्तिपक्षेऽपि विषयभेदेन प्रतिबन्धकताभेदस्यावश्यत्वं दर्शयति **विषयभेदेनेति**। **तत्कारणताया** व्यभिचारग्रहाभावकारणतायाः। **आवश्यक एवेति** विषयनिष्ठप्रत्यासत्यादरेऽपीत्यादिः। तथा चात्मनिष्ठप्रत्यासत्यादरे नात्मभेदेने कारणाताभेद इत्यैव लाघवात् तदादर -इति तु शब्दैवकारयो रूपसन्दानार्थः।

चषकम्

तथा हि तादृशवह्नित्वजातिरूपविषयनिष्ठप्रत्यासत्तिपक्षेऽपि वह्नित्वं तादृशावच्छेदकमितिग्रहे विद्यमानेऽपि धूमजनकतावच्छेदकतेजो वृत्ति जातिरनवच्छेदिकेति ग्रहोदयेन विशेष्यतया तत्पुरुषीयतादृशजातित्वा-वच्छिन्नधर्मिकतादृशानवच्छेदकत्वप्रकारकग्रहत्वावच्छिन्नं प्रति तादृशग्रहस्य तादृश्या निरुक्तावच्छेदकत्वप्रकारतानिरूपितविशेष्यताया अभावो हेतुर्वाच्यः। विशेष्यतायास्तादृशविशेष्यतात्वेन सम्बन्धत्वाभावात्तादृशविशेष्यता-सम्बन्धावच्छिन्नप्रतियोगिताकज्ञानत्वावच्छिन्नाभावहेतुताया वक्तुमशक्यत्वात्। सामान्यतो विशेष्यतायाः प्रत्यासत्तित्वे घटत्वं तदवच्छेदकं वह्नित्वं प्रेमयमिति ग्रहेऽपि वह्नित्वं तदनवच्छेदकमिति ग्रहानुदयप्रसङ्गात्।

तथा च धर्मिघटितधर्मितावच्छेदकनिवेशानुरोधेन तद्भेदेन कारणताभेदस्यावश्यं पर्यवसानादेव विषयनिष्ठ प्रत्यासत्तिकल्पनाया मूलशैथिल्यादिति। **नन्वेवं** व्यभिचाराग्रहसहितसहचारग्रहादनुमितिरेव जायतां तद्धेतोरिति न्यायात्। **यद्धर्मा**वच्छिन्ने सहचारोऽवगतस्तद्धर्मावच्छिन्ने व्यभिचारग्रहस्याभावस्तद्धर्मावच्छिन्नलिङ्गकानुमितौ हेतुरित्यस्य ममापि सुवचत्वात्।

यदि च वह्निसहचरितं वह्निव्यभिचारीति ग्रहेऽपि वह्निसहचरितवानिति ज्ञानादनुमित्यापत्तिरेवमपि दुर्वारे इत्युच्यते। **तदा** साहचर्यावच्छिन्नव्यभि-चाराग्रहोऽपि साहचर्यावच्छिन्नपक्षधर्मताज्ञानस्य सहकारी वाच्यः। **वह्नि**मदन्यावृत्तिवावच्छिन्नपक्षधर्मताज्ञानं पुनरपेक्षातां साहचर्यग्रहं तदवच्छिन्ने सम्भवतोव्यभिचारग्रहस्याभावं तु कुत इति **चेत्** साहचर्यावच्छिन्ने व्यभिचाराग्रहस्य पक्षधर्मताग्रहस्य च कारणत्वकल्पनामपेक्ष्य पक्षावलीढहेत्वव्यभिचारबुद्धितथात्वं ज्यायः। **तदि**दमुक्तं विवदन्ते च सामानाधिकरण्यज्ञानस्यैव **हेतुतायामिति**। **साध्य**सामानाधिकरण्यविशिष्ट-हेतुसत्त्वे साध्यसत्त्वावश्यकत्वेऽपि न तस्य ज्ञानमनुमितिहेतुः।

यतः स्वसमानाधिकरणाभावाप्रतियोगिसाध्यसामानाधिकरण्योपलक्षितहेतु-सत्त्वस्येव पक्षे साध्यग्रहं विना नामुष्यग्रहो भवितुमीष्टे। धर्मिणि

धर्मान्तरसामानाधिकरण्यविशिष्टतद्धर्मवत्तानिर्णयं प्रति धर्मिणि धर्मान्तरवत्तानिर्णयस्य हेतुत्वाद**न्यथा** पर्वतो वह्निमान्नवेति संशयेऽपि पर्वते वह्निसामानाधिकरण्यविशिष्ट धूमवत्तानिर्णयस्यापत्तेः। **इतो**ऽधिकमग्रे वक्ष्यामः।

तात्पर्यटीका

तादृशग्रहस्येति। तत्पुरुषीयग्रहस्येत्यर्थः। **तादृश्या** धूमजनकतावच्छेदकतेजोवृत्तिजातित्वावच्छिन्नायाः **निरुक्तेति** धूमसमानाधिकरणाभावप्रतियोगितेत्यर्थः। मैत्रस्य धूमजनकतावच्छेदकतेजोवृत्तिजातित्वावच्छिन्ने तथावच्छेदकत्वग्रहे चैत्रस्यैव वा वह्नित्वत्वावच्छिन्ने यथोक्तावच्छेदकत्वग्रहे **किं** वा प्रमेयत्वधर्मितावच्छेदकतया निरुक्तजातित्वग्रहेऽपि चैत्रस्य निरुक्तजातित्वाच्छेदेन तथानवच्छेदकत्वग्रहोपपत्तये त्रितयमपि विशेष्यताविशेषणम्। **तादृश**विशेष्यतात्वेनोक्तावच्छेदकत्वप्रकारतानिरूपितोक्तधर्मावच्छिन्नविशेष्यतात्वेन। **नन्व**वच्छेदकत्वप्रकारकस्य तत्पुरुषीयग्रहस्य सामान्यतो विशेष्यतासम्बन्धेन प्रतिबन्धकत्वाङ्गीकारे नैष दोष इत्याशङ्क्या**ह** **सामान्यतो विशेष्यताया इति**। **प्रत्यासत्तित्वे** प्रत्यासत्तिघटकत्वे कार्यकारणभावघटकसामानाधिकरण्यप्रत्यासत्तिप्रविष्टाभावप्रतियोगितावच्छेदकसम्बन्धत्वे इति यावत्। **प्रसङ्गादिति**। विशेष्यताप्रत्यासत्त्योक्तप्रतिबन्धकस्य सत्त्वादिति भावः।

अथ वह्नित्वत्वाद्यवच्छिन्नधर्मिकत्वेन ग्रहो विशेष्यते उक्तविशेष्यताया अभावो वा हेतुरुच्यते उभयथाप्याह। **तथा चेति**। उक्तविशेष्यत्वाद्यभावस्य हेतुत्वे चेत्यर्थः। **धर्मीति**। वह्नित्वत्वे स्वरूपतः प्रकारतया वह्नित्वस्य प्रवेशः। तादृशजातित्वे धूमजनकतावच्छेदकत्वविशिष्टतेजोवृत्तित्वविशिष्ट- जातित्वरूपे सामानाधिकरण्यरूपवैशिष्ट्यघटकतया संसर्गविधयेति **बोध्यम्**। **मूलशैथिल्यादिति**। धर्मिभेदेन कारणताकल्पनाविरहो हि विषयनिष्ठप्रत्यासत्त्यादरे बीजं तस्य शैथिल्याद्विरहादित्यर्थः। **एवं व्य**भिचारग्रहाभावस्य व्याप्तिग्रहहेतुत्वे। **नन्वे**वं व्यभिचारितयावगतधूमादपि वह्निसहचारमात्रेण गृह्यमाणाद्वह्न्यनुमित्यापत्तिरालोके व्यभिचाराग्रहस्यापि सत्त्वा**दस्मा**कं तु

यद्धर्मावच्छिन्ने व्याप्तिरवगम्यते तद्धर्मावच्छिन्ने व्यभिचाराग्रहोऽपेक्षित इत्यत आह। **यद्धर्मावछिन्न इति**। **ममापीति**। धूमसमानाधिकरणाभावाप्रतियोगि वह्निसमानाधिकरणालोकवान् पर्वत इति ज्ञानादनुमितिवारणाय हेतुतावच्छेदकभेदेन हेतुतायाः सिद्धान्तिनोऽप्यावश्यकत्वमपिशब्दार्थः।

साहचर्यधर्मितावच्छेदकावच्छिन्नव्यभिचारग्रहाभावो हेतुरित्युक्ते यत्र साहचर्यस्य धर्मितावच्छेदकतया किञ्चिन्नावगतं तत्र व्यभिचाराग्रहो न हेतुरिति प्राप्तं तत्र शङ्कते। **यदि चेति**। यदवच्छिन्नपक्षधर्मताज्ञानं तदवच्छिन्ने व्यभिचाराग्रहो हेतुरिति सामान्यतो भ्रमं वारयति। **वह्निमदन्येति**। **तद**वच्छिन्ने इत्यस्य देहलीदीपकन्यायेनान्वयः। **ज्याय इति**। क्लृप्तहेतुभावस्य पक्षधर्मताज्ञानस्य विषयितयाऽव्यभिचारस्यावच्छेदकत्वकल्पने लाघवादिति भावः। मास्तु सामानाधिकरण्यज्ञाने हेतुतावादिनामेतल्लाघवमस्माकं तु तदस्त्येवेत्याह **विवदन्ते चेति**। नव्या इति शेषः। तथा च नव्यमते एवैतल्लाघवमुपन्यस्तमित्याशयः।

साध्यसामानाधिकरण्योपलक्षितेति। **नन्वे**वं विशिष्टसत्ताव्यापकगुणस्य विशिष्टसत्तात्वावच्छिन्नसामानाधिकरण्योपलक्षितसत्तायाः कर्मणि परामर्शादनुमित्यापत्तिरत आह। **इतोऽधिकमिति**। निरुक्तसामानाधिकरण्यावच्छेदकहेतुतावच्छेदकस्य व्याप्तित्वमुपगम्योक्तापत्तिवारणं दर्शयिष्यत इति भावः।

तर्कामृतम्

ततः कालान्तरे पर्वते धूमे दृष्टे सति व्याप्तिस्मरणम्, ततश्च[1] व्याप्तिविशिष्टवैशिष्ट्यज्ञानं 'वह्निव्याप्यधूमवानयम्[2]' इति तृतीयलिङ्गपरामर्शः। पक्षतासहितेन तेन 'पर्वतो वह्निमान्' इत्यनुमितिर्जन्यते।

---

१. 'ततो' इति पाठान्तरम्।

२. धूमवानिति पाठान्तरम्।

तरङ्गिणी

धूमे दृष्टे सतीति। धूमदर्शनरूपोद्बोधकसमवधाने सति। ततश्चेति। धूमत्वावच्छिन्नविशेष्यकव्याप्तिस्मृतिरूपविशेषणतावच्छेदकप्रकारकनिर्णयादित्यर्थः। **तृतीयेति**। प्रथमं व्याप्त्यनुभवस्ततः स्मरणम्, ततः परामर्श इत्युत्सर्गाभिप्रायेण।

चषकम्

ततोऽनुभवात्। **धूमे दृष्टे सतीति** धूमदर्शनस्यैकसम्बन्धिज्ञानस्योद्बोधकविधयापरसम्बन्धिव्याप्तिस्मृतिहेतुत्वादिति भावः। **व्याप्तिस्मरणमिति**। **न चे**दानीमेव सम्भृतसामग्रीकानुमितिर्भवितुं शक्यं ज्ञानद्वयस्य तवाप्यावश्यकत्वेन विशिष्टज्ञानकल्पनायां गौरवादिति **वाच्यम्**। आलोको वह्निव्याप्यो धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तेः।

न च येन रूपेण व्याप्तिग्रहस्तेन रूपेण पक्षधर्मताज्ञानमनुमितौ तन्त्रमित्युक्तप्रायमेवेति **वाच्यम्**। अयमालोको धूमो वेति सन्देहेऽपि वह्न्यभाववदवृत्तिमानिति परामर्शादनुमित्युत्पत्तेः। व्याप्तिविशिष्टवैशिष्ट्यज्ञानहेतुतायामतिलाघवाच्च। **क**ल्पनागौरवज्ञानं तु विशिष्टज्ञानं तदनुमित्यव्यवहितपूर्ववृत्तित्वेन प्रमाणान्तरासिद्धमित्येवं रूपं कारणताघटकपूर्ववृत्तित्वरूपदलज्ञानाधीनं कारणताग्रहात्मकमेव भवतीति न प्रतिबन्धकम्। **तदे**तदुक्तम्। फलमुखगौरवस्यादोषत्वादिति। **ततो** विशेषणतावच्छेदकप्रकारकनिर्णयसम्पत्तितः।

तृतीयेऽतिव्याप्त्यनुभवस्मृत्यपेक्षया। परामर्शेनापि सिद्धिसत्त्वेऽनुमितेरजननादाह। **पक्षतासहितेनेति**। तेन पुरुषं साक्षात्करोमीत्यध्यक्षसिद्धविशेषदर्शनजन्यसंशयोत्तरप्रत्यक्षवारणम्। **तथा** च पक्षताजन्यत्वे सति परामर्शजन्यत्वमित्यप्यनुमितिलक्षणमुक्तं भवति। **सि**द्ध्यभावरूपायाः पक्षतायाः प्रत्यक्षस्य वारणाय परामर्शोपादानम्।

न चैवं सिद्धित्वप्रकारकसिद्धिज्ञानात्मकपरामर्शजन्यपक्षताप्रत्यक्षेऽतिव्याप्तिरिति **वाच्यम्**। सिद्धिज्ञानत्वेन तस्य हेतुत्वेऽपि

परामर्शत्वेनातत्वात्। **न च** तथापि वह्निव्याप्यधूमवान् पर्वतो नास्ति सिद्ध्यभावश्चेति समूहालम्बनं तथा हेतुत्वादतिव्याप्तिरिति **वाच्यम्**। एकावच्छेदेनोभयजन्यत्वस्य विवक्षितत्वात्। तच्च जन्यतावच्छेदकं तल्लिङ्गकत्वादतिरिक्तं विषयरूपमिह विवक्षितमिति **दिक्**।

तात्पर्यटीका

तत इत्यस्यानन्तर्यार्थकत्वे कालान्तर इत्यत्रान्तरपदस्यानर्थक्यमतो व्याचष्टे **ततोऽनुभवादिति**। तथा च जन्यत्वं पञ्चम्यर्थः स्मरणान्वयीति भावः। **मूले** कालान्तर इत्यस्य यदा कदाचिन्नत्वव्यवहितोत्तरमित्यर्थः। इदानीमित्यस्य सामग्रीसम्भरणेऽन्वयो न त्वनुमिताविन्यभिप्रायेणोक्तं **सम्भृतेति**। **अनुमितिरस्त्विति** व्याप्तिस्मरणानन्तरमनुमितिरेव जायतामित्यर्थः।

सहचाराव्याभिचारयोरेकरूपावच्छिन्नत्वोक्तौ व्याप्तिपक्षधर्मतयोरपि तत्सुज्ञेयमपि कण्ठरवेणानुक्तेः प्रायः **पदम्**। **नन्व**त्राप्यनुमितिः सन्दिग्धेत्यत आह **व्याप्तीति**। **अतिलाघवाच्चेति**। पुरुषान्तरस्य तस्यैव वा कालान्तरे व्याप्तिग्रहे पक्षधर्मताग्रहमात्रादनुमित्यापत्तिवारणाय तद्धर्मावच्छिन्नव्याप्तिज्ञानं तद्धर्मावच्छिन्नपक्षधर्मताज्ञानञ्च द्वयमपि तद्धर्मावच्छिन्नलिङ्गकानुमितौ हेतुरित्युक्तौ **यथा** कार्यकारणभावद्वयं **तथा** व्याप्तिप्रकारकत्वहेतुप्रकार-कत्वयोर्विपरीतनिरूप्यनिरूपकभावनिवेशानुरोधेन सिद्धान्तेऽपि। **पर**न्तु तद्धर्मावच्छिन्नपक्षधर्मताज्ञानमित्यत्र तद्धर्मावच्छिन्नविषयतापक्षविषयत-योर्निरूप्यनिरूपकभाववैचित्र्यं पूर्वपक्षिणमधिकमित्याशयः। **व्याप्त्य**वच्छिन्न-पक्षधर्मताविषयकत्वविशिष्टज्ञानत्वेन ज्ञानत्वविशिष्ट- व्याप्त्यवच्छिन्न-पक्षधर्मताविषयकत्वेन वा हेतुत्वमिति विनिगमनाविरहात् कार्यकारणभावद्वयमेव सिद्धान्तिनामिति **युक्तम्**।

यद्यपि प्राथमिकपर्वतीयधूमप्रत्यक्षजन्यं धूमो वह्निव्याप्य इति स्मरणं द्वितीयं ततः पक्षे वह्निव्याप्यधूमप्रत्यक्षमित्येव परामर्शस्य तृतीयत्वं सुघटं **तथा**पि पर्वते शिखरे धूमं पश्यतोऽपि नितम्बो वह्निव्याप्यधूमवानिति परामर्शोदयेनोद्बोधकीयसांसर्गिकविषयिताया: परामर्शीयसांसर्गिकविषयिता-

प्रयोजकत्वाभावात्किञ्च तेषां वारसङ्ख्यानियमस्य कर्त्तुमशक्यत्वाद्-व्याप्त्यनुभवीयव्याप्तिविषयितायाश्च तथात्वादव्याप्त्यनुभवस्मरणे समादाय तादृशमपि तृतीयत्वं समर्थयति। **व्याप्त्यनुभवेति**। **तेन** च यत्राधिकरणे सहचारदर्शनादव्याप्त्यनुभवस्तदन्यस्मिन्नगृहीतग्राहिण्या अनुमितेर्जनकः परामर्शोऽवश्यं मध्ये विशेषणतावच्छेदकप्रकारकमनुभवसमानाकारं स्मरणं द्वितीयमपेक्षते इति मीमांसकमतादविशेष इत्युक्तम्। **तेन** पक्षतासहितेति विशेषणेन। संशयोत्तरं विशेषदर्शने सत्यनुमितिरेव भवतीति शङ्कां वारयितुं **पुरुष**मित्यादि। **तथा** च तदवारकोक्तविशेषणोपादाने न सिद्धौ सिषाधयिषाविरहवैशिष्ट्यस्यैककालावच्छेदेनैकात्मवृत्तित्वरूपतया कालादि-धटितायास्तस्याः पक्षतायाः प्रत्यक्षासम्भवादु**क्तं सिद्ध्यभावरूपाया इति** यत्र सिद्धिसत्त्वे सिषाधयिषाप्रयुक्ता नानुमितिस्तत्र क्वचित्तावन्मात्रस्यैव पक्षतात्वादित्याशयः।

सिद्धित्वप्रकारकेत्यादि। पर्वतो वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति सिद्धिश्चेति समूहालम्बनात्मकेत्यर्थः। विलक्षणविशिष्टवैशिष्ट्यविषय-तामनभ्युपगच्छतामप्यभावबुद्धौ प्रतियोगिधियस्तथा हेतुत्वमस्तीति दर्शयति। **वह्नि**व्याप्यधूमवान्पर्वतो नास्तीति। अत्र चाभावज्ञाने प्रतियोगितावच्छेदकप्रकारकनिश्चयत्वरूपपरामर्शत्वेन हेतुत्वस्यापि मिश्रादिमतत्वात्सिद्ध्यभावरूपपक्षतायास्तु विषयविधया हेतुतायाः सर्वमतत्वादतिव्याप्तिरित्याशयः। **नन्वे**वं परामर्शस्य जन्यतावच्छेदककोटौ तल्लिङ्गकत्वं निविष्टं न पक्षताया इत्यसम्भव इत्यत आह। **तच्चेति**। **विषयरूपमिति**। पर्वतोद्देश्यकत्वादिकमपि पर्वतादिस्वरूपमित्याशयः। **दिगिति दिग**र्थस्तु पक्षताजन्यत्वे सतीत्यत्र पक्षतावच्छेदकावच्छेदेन सिद्ध्यभावरूपा विवक्षिता परामर्शश्च सामानाधिकरण्येन। **इत्थ**ञ्च सामानाधिकरण्येनानुमितित्वस्योभकार्यतावच्छेदकत्वान्नासम्भव इति।

तर्कामृतम्

व्याप्तिश्च हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्।

चषकम्

परामर्शघटिकां व्याप्तिं निर्वक्ति। **व्याप्तिश्चेति। हेतुसमानाधिरणेति।** वह्निमान् धूमादित्यादौ धूमसमानाधिकरणो न वह्न्यभावः किन्तु घटाभाव एव तत्प्रतियोगी च न वह्निरिति तत्सामानाधिकरण्यं धूमेऽस्तीति लक्षण**समन्वयः**।

धूमवान्वह्नेरित्यादौ च वह्निसमानाधिकरणधूमाभावप्रतियोग्येव धूम इति वह्नौ तत्सामानाधिकरण्यं न व्याप्तिरिति नातिव्याप्तिरिति। वह्नौ धूमसमानाधिकरणवह्निभेदप्रतियोगित्वादतिव्याप्तिवारणाया**त्यन्तेति**। **न च** धूमसमानाधिकरणघटात्यन्ताभावनिष्ठतदात्मकवह्निभेदप्रतियोगित्वात्तथैवाव्याप्तिरिति **वाच्यम्**। प्रतियोगितायां हेत्वधिकरणवृत्तितावच्छेदकात्यन्ताभावत्वनिरूपकत्वपर्यन्तविवक्षणात्। **अत** एव धूमसमानाधिकरणघटात्यन्ताभावात्मकवह्न्यत्यन्ताभावप्रतियोगित्वेऽपि वह्नेर्नाव्याप्तिः। **इत्थमेव** चाभावसाध्यके प्रतियोगिव्यधिकरणस्याप्यभावस्य प्रसिद्धिः।

तात्पर्यटीका

लक्षणसमन्वयव्याजेन हेतुसमानाधिकरणेत्यस्य प्रयोजनं दर्शयितुं न वह्न्यभाव इत्युक्त**मन्य**था धूमसमानाधिकरणघटाद्यभावप्रतियोगी न वह्निरित्येवावक्ष्यत्तेन वह्न्यभावव्यावृत्तये हेतुसमानाधिकरणेतीत्युक्तमिति **सूचितम्**। **प्रति**योग्येवेत्येवकारेणाप्रतियोगित्वव्यच्छेदद्वारा प्रतियोगित्वसामान्याभावस्य लक्षणघटकता सूच्यते। तेन वह्निसमानाधिकरणघटाभावाप्रतियोगित्वेऽपि धूमे नातिव्याप्तिः। **अत** एवात्यन्ताभावत्वे हेत्वधिकरणवृत्तितावच्छेदकत्वविशेषणादेव। **इत्थमेव** प्रतियोगिव्यधिकरणेत्यत्रापि प्रतियोगितायामुक्तविशेषणेनैव। **अभावसाध्यक इति** भावसाध्यके तु गोत्वाभावद्यधिकरणवह्न्यभावस्य भावप्रतियोगिकस्यातिरिक्तत्वेन तथाभूतवह्न्यभावभेदस्य च तद्रूपत्वेऽपि साध्यतावच्छेदकेन प्रतियोगितावच्छेदकेन वा सम्बन्धेन वह्न्यभावरूपप्रतियोगिवैयधि- करण्यमुभयाभावादिघटितं गोत्वाभावादः। सुलभमेवेति भावः।

चषकम्

अन्यथा सर्वस्याप्यभावस्य समानाधिकरणाभावान्तरभिन्नत्वात्तद्भेदस्य च स्वरूपानतिरिक्तत्वात्तादृशाभावदौर्लभ्यापत्तेरिति **सम्प्रदायः साध्यसामानाधिकरण्यमिति।** साध्यतावच्छेदकसम्बन्धेन साध्यसम्बन्धिनि हेतुतावच्छेदकसम्बन्धेन सम्बन्धित्वमित्यर्थः। तेन यथोक्तवह्निकालीनधूमवान् पर्वत इत्यादिज्ञानान्नानुमित्यापत्तिः। **उपप**द्यते च तादात्म्येन व्याप्यव्यापकभावोऽपि। **व्यक्ती**भविष्यति चैतदुपरिष्टात्। **न चैवं** रासभो वह्निव्याप्य इति व्यवहारापत्तिरिति **वाच्यम्**। यद्धर्मावच्छिन्न-समानाधिकरणाभावाप्रतियोगि साध्यं तत्सामानाधिकरण्यं तद्धर्मावच्छिन्नस्यैव तथाव्यवहारनियामकमित्यभ्युपगमात्। **न चैव**मपि तथाविधवह्नि-समानाधिकरणरासभवान् पर्वत इतिज्ञानादनुमित्यापत्तिर्व्याप्तिविशिष्टस्य पक्षधर्मताज्ञानसम्पत्तेरिति **वाच्यम्**। तद्धर्मावच्छिन्नसामानाधिकरण्यस्य तादृशसामानाधिकरण्यावच्छेदकतद्धर्मस्यैव वा व्याप्तित्वे तात्पर्यात्।

एतेन विशिष्टसत्ताव्यापकगुणादेर्यथोक्तसामानाधिकरण्योपलक्षितसत्तायाः कर्मणि परामर्शादनुमित्यापत्तिः परा**स्ता**। **तद**भिसन्धायैव वह्निधूमसामानाधिकरण्यग्रहे सति धूमो वह्निव्याप्य इत्यनुभवो जायत इत्युक्तमधस्तात्। **तत्रा**पि सामानाधिकरण्यसमानाधिकरणवद्धूमवानिति व्याप्त्यंशे लौकिकपरामर्शे सामानाधिकरण्यधर्मिणो धूमत्वस्य स्वरूपत एव धूमे प्रकारत्वान्न धूमत्वत्वाद्यग्रहेऽनुमित्यनुपपत्तिरपि। **एवम**न्यत्राप्य**धिक**मग्रे वक्ष्यामः।

तात्पर्यटीका

समानाधिकरणेत्यनेन हेतुसाध्यीभूताभावान्तररूपस्य भेदप्रतियोगिनः सामानाधिकरण्यं **दर्शितम् अभा**वान्तरं हेतुसाध्यीभूत वह्निधूमाभावादिरूपम्। वक्ष्यमाणे यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृश-प्रतियोगितानवच्छेदकत्वघटितपरिष्कारे भावत्वस्यैवाप्रवेशात् **सम्प्रदाय इति।** साध्यतावच्छेदकसम्बन्धहेतुतावच्छेदकसम्बन्धयोरप्रवेशेऽपि साध्यसम्बन्धि-

सम्बन्धित्वं व्याप्तेर्हेतुनिष्ठत्वसम्पादनायावश्यं विवक्षितं तद्विषयकत्वरक्षणाय वह्निकालीन **इत्युक्तम्**। मास्तु तादात्म्येन व्याप्तिरत आह। **व्यक्तीभविष्यतीति**। तथा सति गोत्वत्वाद्यग्रहेऽयं गौरित्यनुमितिर्न स्यादिति भावः।

एतेन तद्धर्मस्य व्याप्तित्वेन। **यथोक्तसामानाधिकरण्योपलक्षितेति**। विशिष्टसत्तात्वावच्छिन्नसामानाधिकरण्योपलक्षितेत्यर्थः। **इत्थञ्च** हेतुतावच्छेदकविशिष्टहेतुमत्तायाः पक्षे साध्यसन्देहकालेऽपि सुग्रहत्वाद्विशिष्टपरामर्शो हेतुर्वाच्य इति भावः। **तद**भिसन्धायैव साध्सामानाधिकरण्यावच्छेदकहेतुतावच्छेदकस्य व्याप्तित्वमभिसन्धायैव। **यद्यपि** सामानाधिकरण्यधर्मितया धूमत्वस्य स्वरूपतो भानं परामर्शस्य लौकिकत्वेऽपि सम्भवतीत्यलौकिकत्वोत्कीर्त्तनमफलं **तथा**पि प्रतियोगितावच्छेदकत्वाभावधर्मितया साध्यतावच्छेदकस्य स्वरूपतो भानं न सम्भवत्यभावलौकिप्रत्यक्षे धर्मितावच्छेदकप्रकारेण धर्मिनिश्चयस्य हेतुत्वादिति तदभिप्रेत्यैतदुक्तमित्या**हैवमन्यत्रापीति** अनवच्छेदकवह्निसमानाधिकरणेत्यादिरूपः स्वरूपतः साध्यतावच्छेदकावगाह्यलौकिकग्रह एव हेतुरित्याशयः। अनवच्छेदकत्वधर्मितया तथाभानानभ्युपगमेऽप्याहा**धिकमिति अग्रे**ऽवच्छेदकलक्षणपरिष्कारे।

चषकम्

केचित्तु सामानाधिकरण्यांशे वह्नित्वस्य स्वरूपतो भानेनैवानुमितेस्तथाविशेषमभ्युपगच्छन्ति। **न चै**तद्रूपवानेतद्रसादित्यादौ विशिष्टसाध्याभावस्य प्रतियोगिवैयधिकरण्याभावादुभयाभावस्य स्वाधिकरणावृत्तिरुक्तप्रतियोगिकस्यापि प्रतियोगितापर्याप्त्यनधिकरणत्वस्य साध्ये वक्तुं शक्यत्वाच्चाव्याप्तेरसम्भवेऽपि नानाधिकरणकनानाव्यक्तिकसाध्यके वह्निमान् धूमादित्यादौ चालनीन्यायेनाव्याप्तिः सर्वेषामेव वह्नीनां स्वस्वव्यधिकरणधूमसमानाधिकरणप्रत्येकाभावप्रतियोगित्वा**त्समा**नाधिकरणयोरेव व्याप्तिरित्यभ्युपगमेऽपि रूपवान् पृथिवीत्वादित्यत्रोक्तरीत्याऽव्याप्तेरवारणत्तत्रैकस्यैव हेतोर्नानाधिकरणकनानासाध्यसमानाधिकरणत्वादिति **वाच्यम्**।

अप्रतियोगिपदेन प्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणसाध्यतावच्छेदकावच्छिन्नस्य विवक्षणात्। **साध्यतावच्छेदकस्यापि** नानात्वेऽप्येषैव रीतिरनुसर्त्तव्येति किमति दूरं गत्वा। **पर्याप्तिनिवेशाच्च** विशिष्टाभावद्वित्वावच्छिन्नाभावाभ्युपगमेऽपि न क्षति:। **न वा** वह्न्याकाशोभयवान् धूमादित्यादौ यथाविवक्षितसाध्यतावच्छेदकद्वित्वाश्रयवह्निसमानाधिकरणधूमेऽतिव्याप्ति:। **न चैवं** प्रमेयधूमवान् वह्नेरित्यत्रातिव्याप्ति:। साध्यताच्छेदकस्य प्रमेयधूमत्वस्य धूमत्वापेक्षया गौरवेण वह्निसमानाधिकरणप्रमेयधूमाभावप्रतियोगितानवच्छेदकत्वादिति **वाच्यम्**। गौरवज्ञानं हि व्यावर्त्तकधर्मदर्शनमुद्रयावच्छेदकत्वसंसर्गकबुद्धिविरोधि वाच्यं तच्च न सम्भवति प्रतियोगिविशेषणतापन्ने धर्मे गौरवज्ञानेऽपि कम्बुग्रीवादिमान्नास्तीतिप्रतीतिबलेन गुरोरप्यवच्छेदकत्वाभ्युपगमात्तस्य व्यावर्त्तकधर्मत्वाभावात्।

तात्पर्यटीका ८८

भानेनैवेत्येवकारेणानवच्छेदकत्वधर्मितया स्वरूपतो भानव्यवच्छेद:। जातिमान् वह्निरितिज्ञाननिर्वाहायोभयथोपस्थितावुभयथा भानस्यावश्यम्भावेन नोक्तरीत्या तथा विशेष: सम्भवतीत्यभ्युपगच्छन्तीत्**युक्तम्**। **विशिष्ट**साध्याभावस्य पूर्वक्षणवृत्तित्वविशिष्टैतद्रूपाभावस्य। **प्रति**योगिवैयधिकरण्याभावाद्धेत्वधिकरणस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिमत्त्वात्। **उभ**याभावस्यैतद्रूपगगनोभयाभावस्य। **उभ**याधिकरणाप्रसिद्ध्या प्रतियोगिवैयधिकरण्याप्रसिद्धिं परिहर्त्तुं तत्साधारणं प्रतियोगिवैयधिकरण्यं निर्वक्ति। **स्वाधिकरणेति**। निरुक्तेति प्रतियोगितावच्छेदकावच्छिन्नेत्यर्थ:। प्रतियोगितापर्याप्तिर्न सिद्धान्तिनामुभयाभावप्रतियोगी नैक इति प्रतीत्यापत्तेरतो **वक्तुं** शक्यत्वादित्युक्तम्। **समानाधिकरणयोरेवेति** तथा च समानाधिकरण एव वह्निस्तथाभावाप्रतियोगीति भाव:। **उक्त**रीत्या चालनीन्यायेनाव्याप्तेरित्यन्वय:। **अवारणादिति**। व्यधिकरणवह्निधूमयोरिवात्रालक्ष्यतायाा असम्भवादित्यर्थ:। तदेवाह **तत्रै**कस्यैवेति।

ननु रूपत्वव्याप्यजातिमद्वान् पृथिवीत्वादित्यत्राव्याप्ति-र्हेत्वधिकरणनीलपटनिष्ठरक्तरूपाभावप्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वस्य रक्तत्वजातावसम्भवादत आह। **साध्यतावच्छेदकस्यापीति**। **एषैवेति**। शब्दैक्यस्यानुपादेयत्वादत्र साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदक-तानवच्छेदकं वाच्यमित्यर्थः। **यत्तु** तत्र तादृशजातित्वमेव परम्परया साध्यतावच्छेदकमिति। **तन्न**। जातिमानिति साध्योल्लेखापत्तेः। जातिमन्तं जातिं जानातीति प्रयोगानुपपत्या स्वातन्त्र्येण प्रकारताया दुर्वचत्वादत आह **किमतिदूरमिति**। साध्यतावच्छेदकावलीढेत्युज्झित्वा साध्यतावच्छेदका-वच्छिन्नेत्यभिधाने बीजं दर्शयति **न चेति**। **यथा विवक्षितेति** साध्याभावस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्ध्या प्रतियोगिवैयधिकरण्याभावेन प्रतियोगिव्यधिकरणाभांवान्तरप्रतियोगितानवच्छेदकत्वस्य द्वित्वेऽपिसम्भवादिति भावः।

चषकम्

अन्यथा यत्किञ्चिद्घटवत्यपि तथा प्रतीतिप्रसङ्गादत एवात्र तथा शब्दो न प्रमाणम्। **नचा**नवच्छेदकेऽवच्छेदकत्वावगाहनादेव तस्याप्रामाण्यं सम्भवतीति **वाच्यम्**। तथा सति तत एव घटसामान्यशून्येऽप्यस्याप्रामाण्यापत्तेः। **वक्ष्य**ते ह्यधिकमुपरिष्टात्। अत एव गुणद्रव्यत्वविशिष्ट सत्तात्वाद्यवच्छिन्नानां द्रव्यत्वादिव्याप्यत्वमपि साधु सङ्गच्छते।

अन्यथा द्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वसमनियतगुरुभूतद्रव्यत्वत्वा-वच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्नभेदस्य साध्यता-वच्छेदके दुर्वचत्वापत्तेः। **प्राति**स्विकरूपेण तावदवच्छेदकानां युगसहस्रेणापि दुर्ज्ञेयत्वाच्च कथञ्चिदपि प्रतीकारासम्भवात्। **इत्थ**मेव च घ्राणग्राह्यगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारिताऽपि। **अन्य**था तत्राप्यसौ दुरवस्था स्यात्। साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य पारिभाषिक-स्याप्युक्तरीत्या दुर्वचत्वादित्यलं पल्लवितेन।

तात्पर्यटीका

अन्यथा शुद्धप्रतियोगितायाः संसर्गतया भानाङ्गीकारे। **प्रतीतिप्रसङ्गादिति**। अत्रापादकाभावमाशङ्कमानं प्रत्याहात **एवेति**। कम्बुग्रीवादि-मत्त्वावच्छिन्नप्रतियोगितायाः संसर्गत्वादेवेत्यर्थः। **ननु** कम्बुग्रीवादिमत्त्वावच्छिन्न-प्रतियोगिताकाभावमभ्युपेत्य प्रकृते तदभावेन भ्रमत्वोपपादनापेक्षया कम्बुग्रीवदिमत्त्वेऽवच्छेदकत्वशून्येऽवच्छेदकतावगाहनादेव तथात्वं सुवचमित्याशङ्कते **न चेति**। **अप्रामाण्यापत्तेरिति**। तथा च तत्प्रतीतेः प्रमाण्यायैव गुरोरवच्छेदकत्वमभ्युपगम्यत इत्याशयः। **नन्वेवं** रूपवत्ताप्रतीतेः प्रामाण्याय तमसोऽप्यतिरिक्तद्रव्यत्वापत्तिरत आह **वक्ष्यते हीति**। तथा च प्रतीत्यन्यथानुपपत्त्यैव वस्तुनः सिद्धिर्यथोष्णस्पर्श प्रतीत्यन्यथानुपपत्या तेजसो न तु रूपप्रतीतिप्रामाण्याय तमसोऽपीत्यस्तु। घटसामान्यशून्ये कम्बुग्रीवादिमान्नास्तीतिप्रतीतेरवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन धर्मिविशेषणता-पन्नकम्बुग्रीवादिमत्त्वस्याभावांशे भ्रमत्वसम्भवात्तत्रेष्टापत्तिरेवेति भावः। **अत एव** गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वादेव। **गुणेति**। गुणश्च द्रव्यत्वञ्च विशिष्टसत्ताचेति द्वन्द्वोत्तरत्वप्रत्ययस्य प्रत्येकं समन्वयाद्गुणत्वादीत्यर्थः।

यद्धर्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वावच्छिन्नभेदः साध्यतावच्छेदके तद्धर्मावच्छिन्नस्यैव व्याप्यत्वं न चासौ प्रकृत इत्याहा**न्यथेति**। गुरुणोऽनवच्छेदकत्व इत्यर्थः। **द्रव्यत्वावच्छिन्नेति**। **इदमुपलक्षणम्**। गुणत्वावच्छिन्नविशिष्टसत्तात्वावच्छिन्नेत्यपि **बोध्यम्**। कथञ्चिदपि सामान्यभेद तत्तद्व्यक्तित्वावच्छिन्नभेदकूटयोर्निवेशेनापि। प्रतीकारस्य व्याप्यत्वनिर्वचनस्य। **इत्थमेव** गुरोरच्छेदकत्वेनैव। व्यभिचारितापीति सङ्गच्छत इत्यनुषज्यते। **अन्यथा** गुरोरनवच्छेदकत्वे। **असा**वुक्तैव दुरवस्था वदतो व्याहतिः पारिभाषिकस्यापीत्यपिना मुख्यस्य परिग्रहः। **उक्त**रीत्या। हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं गन्धत्वं घ्राणग्राह्यगुणत्वविशिष्ट-सम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकमित्यत्रावच्छेदकसामान्यभेदाप्रसिद्ध्या विशेषभेदकूटस्य दुर्ज्ञेयतया च।

दुर्वचत्वादिति। अत्रैवानुष्णाशीतस्पर्शस्योपाधित्वं च न स्यादुपाधितावच्छेदके तुल्ययुक्त्या साध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य दुर्वचत्वादिति वक्तव्ये श्रमबाहुल्या-**दुक्तमित्यलमिति**। यद्धर्मावच्छिन्नाभाववदसम्बद्धं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्यं तद्धर्मावच्छिन्नावच्छिन्नभेदवत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यरूपस्य गुरोरवच्छेदकत्वाभावेऽपि गुणत्वाद्यवच्छिन्नादीनां व्याप्यत्वादेरग्रे निर्वक्तव्यत्वात् पल्लवितेने**ति**। भवति च गुणत्वाद्यवच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्यं द्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वरूपलधुधर्मावच्छिन्नाभाववदसम्बद्धमिति तद्धर्मावच्छिन्नोक्तावच्छेदकत्वावच्छिन्नभिन्नमेव द्रव्यत्वत्वादिसाध्यतावच्छेदकमिति लक्षणसमन्वयः। **विरोधादिति**। व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वानभ्युपगमा**दन्य**था तथाविधानां बहूनां गुणानां प्रत्येकमव्याप्यवृत्तितानियामककार्यकारणभाववृद्धिप्रसङ्गात्।

तर्कामृतम्

न च, 'अयं संयोगवान् द्रव्यत्वात्' इत्यत्र अव्याप्तिः।

चषकम्

यथाश्रुतां व्याप्तिं परिष्कर्त्तुं शङ्कते। **न चेति**। **अव्याप्तिरिति**। संयोगस्य साध्यस्याव्याप्यवृत्तेरभावस्य वृक्षेऽपि भावात्। **न च** निरवरयवपरमाणुसंयोगस्य व्याप्यवृत्तेः सजातीयं संयोगान्तरं कथमव्याप्यवृत्ति विरोधादिति **वाच्यम्**। यतः पूर्वापरपरमाण्वोर्जायमानः संयोगो यदि तयोर्दिक्चतुष्टयं व्याप्यवर्त्ते तर्हि परस्परोदरं प्रविष्टौ परस्परौ भवेतां **न चै**तत्सम्भवति। ततश्च पूर्वस्य पश्चिमदिगवच्छिन्नो परस्य पूर्वदिगवच्छिन्नः स इत्यभ्युपगन्तव्यं तत् सिद्धं तस्याव्याप्यवृत्तित्वमिति सूक्ष्मदृशां परामर्शः।

न च परितः प्रतियोग्युपलब्धेर्दोषात्किञ्चिद्देशावच्छेदेनापि द्रव्ये संयोगाभावप्रत्यक्षासम्भवाद्वृक्षत्वादेः संयोगानवच्छेदकतया तदभावाच्छेदकत्वे गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसङ्गा**द्यथा** घटपूर्ववृत्तित्वस्य प्रतिदण्डं वह्निसामानाधिकरण्यस्य प्रतिधूमं भिन्नत्वेऽपि दण्डत्वं धूमत्वं वा तत्सामान्यस्यावच्छेदकं तथा संयोगसामान्यस्यावच्छेदकं द्रव्यत्वादीत्यस्यापि वक्तुं शक्यत्वाच्च। **तत्**कथं द्रव्ये संयोगसामान्याभाव इति **वाच्यम्**। संयोगसामान्याभावस्य दैशिकाव्याप्यवृत्तित्वासम्भवेऽपि कालिकाव्याप्यवृत्तित्व-सम्भवाज्जन्ये द्रव्येऽवश्यम्भाविनो जन्यैकत्वस्य कारणीभूतेनैकत्वसामान्याभावेन सह तुल्यवर्त्तिना गुणसामान्याभावरूपेण व्यापकाभावेन व्याप्याभावस्य संयोगसामान्याभावस्यावश्यं भावात्तदेतदभिप्रेत्यैव **जन्य**साधारणं द्रव्यत्वं हेतूकृतं नात्मत्वादि। **यद्य**पि नित्येऽप्यात्मादौ प्रलयावच्छेदेन संयोगसामान्याभावः सुलभ एव **त**थापि किन्तावदद्दूरानुधावनेनेत्याशयेनेदमिति बोध्यम्।

तात्पर्यटीका

प्रतियोगिमत्ताज्ञानप्रतिबन्धकतायामव्याप्यवृत्तित्वज्ञानस्योत्तेजकतया दोषादि**त्युक्तम्**। प्रत्यक्षासम्भवमुक्त्वानुमानमपि व्यभिचारस्वरूपासिद्धिभ्यां निषेधति। **वृक्षत्वादेरिति**। **प्रसङ्गादिति**। यो यदनवच्छेदकः स तदभावावच्छेदक इति नियमादिति भावः। **ननु** यदभावाधिकरणे प्रतियोगिनो वृत्तौ यदनवच्छेदकं तत्तदभावावच्छेदकमिति नियमो न च गुणाभावाधिकरणे गुणस्य वृत्तिरिति कथं तदभावावच्छेदकत्वमत आह **यथेति**। संयोगस्थलेऽनुरूपं दृष्टान्तमाह। **वह्नीति**। **तत्**तस्मात् प्रत्यक्षस्यानुमानस्य चाभावादिति यावत्। **सम्भवादिति**। तदेवाह जन्ये द्रव्य इति। **किं तावदिति**। तदर्थं प्रलयस्य व्यवस्थापने प्रयासापत्तेरिति भावः।

तर्कामृतम्

प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधि-करण्यमित्यर्थात्।

तरङ्गिणी

ननु संयोगस्याव्याप्यवृत्तित्वेन तद्वत्यपि किञ्चिदवच्छेदेन तदत्यन्ताभावसत्त्वादिति कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिरत आह- प्रतियोगिव्यधिकरणहेतुसमानाधिकरणेति। प्रतियोग्यनधि-करणहेत्वधिकरणेत्यर्थः। तेन प्रतियोगिव्यधिकरणत्वस्य प्रतियोग्यनधिकरणवृत्तित्वोक्तौ संयोगाभावस्यापि प्रतियोग्यनधिकरणी-भूतगुणवृत्तित्वादव्याप्तितादवस्थ्यम्, प्रतियोग्यधिकरणावृत्तित्वोक्तौ संयोगी सत्त्वादित्यत्रातिव्याप्तिः, संयोगाभावस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वेन प्रतियोग्यधिकरणावृत्तित्वविरहादिति परास्तम्। ननु वह्निमत्यपि वह्निह्रदोभया-भावस्य सत्त्वादव्याप्तिः। न च हेत्वधिकरणस्य वह्निरूपप्रतियोग्यधिकरण-त्वाददोष इति वाच्यम्। द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वादित्यादावति-व्याप्तिवारणाय प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यस्य वाच्यतया वह्निह्रदोभयत्वावच्छिन्नानधिकरणत्त्वस्य धूमवत्यपि सत्त्वादव्याप्तेर्दुर्वारत्वादिति चेत्। न। साध्ये तादृशाभावप्रतियोगितापर्याप्त्यनधिकरणस्य साध्यतावच्छेदके वा तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षणात्। यादृशस्य साध्यावच्छेदकता तादृशस्यैव प्रतियोगितानवच्छेदकत्वं वाच्यम्। एवं च दण्डिमान् दण्डिसंयोगादित्यादौ शुद्धदण्डत्वेन साध्यतावच्छेदकानां तत्तव्द्यक्तित्वेन प्रतियोगितावच्छेदकत्वेऽपि न दोषः। कम्बुग्रीवादिमान् नास्तीति प्रतीतिबलाद्-गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वाङ्गीकारात्र तद्धर्मावच्छिन्नसाध्यकव्यभि-चारिण्यतिव्याप्तिः। प्रतियोग्यनधिकरणत्वं च साध्यतावच्छेदकसम्बन्धेन यत्प्रतियोगि तदन्यत्वम्। कालिकसम्बन्धेन साध्यतायां कालिकसम्बन्धेन प्रतियोगितावच्छेदकमहाकालन्यत्वादिविशिष्टासम्बन्धित्वं महाकालस्येति न कालो घटवान् कालपरिमाणादित्यादौ अव्याप्तिः। कालिकविशेषणतात्वेनैव सम्बन्धता न तु विशेषरूपेणापीति महाकालमात्रवृत्तिविशेषणतया ह्रदादेः साध्यत्वे महाकालान्यत्वविशिष्टघटादेस्तेनाधिकरण्यप्रसिद्धावपि न दोष इत्यलं पल्लवेन।

चषकम्

प्रतियोगिव्यधिकरणेति। **यद्य**पि प्रतियोगिव्यधिकरणस्यात्यन्ताभावस्य विवक्षणादित्येव वक्तुमुचितं **तथा**पि हेतुसामानाधिकरण्यघटितलक्षणाव्याप्तिवारणप्रकारस्फोरणोपयोगिसन्दर्भघटनाव्युत्पत्तये पुनरनुवादः। **नन्वे**वं प्रतियोग्यसामानाधिकरण्याद्यनुपस्थितौ हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वग्रहेऽप्यनुमितिर्न स्यादिति **चेन्मैवम्**। प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधित्वेन तद्बुद्ध्योऽनुगमनीयाः। **विरुणद्धि** हि सामान्याभावबोधोऽयमपि सामान्यघटिताया विशेषवत्ताया बुद्धिम्। **सत्**यां हि घटो नास्तीति बुद्धौ जात्वपि नीलो घटो नास्तीति बोधानुदयात्तत् कस्य हेतोः।

अत एवावच्छेदकत्वयोरन्योन्यात्यन्ताभावबोधयोरुपग्रहः। **नन्वे**वमवच्छेदकत्वाभावादिव्याप्यबोधस्याप्युपग्रह इति **चेदत्र** केचित्। साध्यतावच्छेदकविशेष्यतानिरूपिता यत्प्रकारताप्रतियोगितान्यसम्बन्धेन किञ्चित्प्रकारतानवच्छिन्ना तदवच्छिन्नप्रतिबन्धकत्वविवक्षया तद्वारणमिति। **तन्न**। तथापि केवलतादृशावच्छेदकत्वव्यापकाभाववद्वह्नित्वमितिधीवारणासम्भवात्। **किन्तु** स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्ना तादृशावच्छेदकत्वप्रकारकग्रहत्वघटकविषयितानिरूपकधर्मनिष्ठा या प्रकारता तन्निरूपिताभावप्रकारतानिरूपितसाध्यतावच्छेदकविषयिताशालिग्रहत्वेन तत्त्वं वाच्यमिति नोक्तदोषः।

तात्पर्यटीका

हेतुसमानाधिकरणेत्यनुवादप्रयोजनं वक्तुं शङ्कते। **यद्यपीति**। **हेतुसामानाधिकरण्यघटितेति**। इदञ्चं यथोक्ताऽव्याप्तिवारणप्रकारे हेतुसमानाधिकरणपदवैयर्थ्यशङ्कानुगुणतयो**क्तम्**। **वारणप्रकारेति**। हेत्वधिकरणे प्रतियोग्यनधिकरणत्वविक्षेत्यर्थः। **पुनस्त्वर्थे**। **अनुवाद इति**। **अयं** भावः। केवलप्रतियोगिवैयधिकरण्येनापि नोक्ताव्याप्तिनिरासः संयोगाभावस्यापि

संयोगानधिकरणगुणवृत्तित्वादत: प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वं वाच्यम्, तच्च हेतुसमानाधिकरणपदपूर्वं प्रतियोगिव्यधिकरणपदनिर्देशे सत्युभयं मिलित्वा वक्ष्यमाणरीत्या निरुक्तार्थे पर्यवस्यतीति। **प्रति**योग्यसामानाधिकरण्येन यथाश्रुतेनैवोक्ताव्याप्तिवारणात्तमेवापातरमणीयं पक्षं मुख्यतयाक्षिपति। **नन्वे**वमिति।

अत एवोक्तग्रहविरोधित्वेन कारणीभूतबुद्ध्यनुगमादेव। **तथापि** केवलतादृशानवच्छेदकत्वव्याप्यवद्वह्नित्वमित्यस्येव तादृशावच्छेद-कत्वव्यापकाभाववद्वह्नित्वं तादृशानवच्छेदकत्वव्याप्यवच्चेति समूहालम्बन-स्यापि नञ्द्वयघटनया वारणसम्भवेऽपि केवलाया: साध्यतावच्छेदके तादृशानवच्छेदकत्वव्याप्याप्रकारिकाया: **ता**दृशावच्छेदकभेदतत्त्वात्यन्ता-भावयोरनुगमाय तत्प्रतियोगितावच्छेदकधर्मावनुगमयति। **तादृशावच्छेदकत्वेति** प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितायोगितावच्छेदकत्वेत्यर्थ:। तत्प्रकारकग्रहत्वघटकविषयितानिरूपकश्च धर्मस्तादृशावच्छेदकत्वत्वं तादृशावच्छेदकत्वञ्च तन्निष्ठस्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धावच्छिन्न-प्रकारतानिरूपिता प्रकारता चावच्छेदकत्वात्यन्ताभावप्रकारतावच्छेदकभेदप्रकारता च न तु व्याप्यादिप्रकारता न वा व्यापकाभावप्रकारतेति तद्व्युदास:। **तत्त्वं** विरोधित्वम्।

चषकम्

ननु प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितान-वच्छेदकवह्नित्वेन साध्यतायां प्रतिबध्यग्रहाप्रसिद्धिरि**ति चे**त्प्रसिद्धस्याहार्यस्य तादृशविशिष्टसाध्यतावच्छेदकधर्मिकस्य निरुक्तावच्छेदकत्वग्रहस्य विषयो यस्तद्विषयकग्रहाविरोधित्वेनानुगमात्। **प्रकृ**ते चाहार्यताप्रयोजकानवच्छेदक-पर्यन्तमपहाय शुद्धवह्नित्वप्रभृतेरपि प्रसिद्धतथाविधग्रहविषयतया तद्धर्मिकतथाविधावच्छेदकत्वग्रहविरोधित्वेनैव कारणीभूतबुद्ध्यनुगमसम्भवात्। **तथा** च प्रकृतसाध्यतावच्छेदकधर्मिकग्रहीया या यथोक्तग्रहविरोधिता-वच्छेदकविषयिता परम्परया तदवच्छिन्न सामानाधिकरण्यविषयितावच्छिन्न-हेतुप्रकारिताशालिग्रहत्वेन हेतुत्वाच्च न वह्निमात्रधर्मिकोक्तग्रहादुक्तविशिष्ट-

वह्नित्वविधेयतावच्छेदककानुमितिर्न **वा** वह्नित्वं हेतुसमानाधिकरणाभाव-प्रतियोगितानवच्छेदकं वह्निसमानाधिकरणधूमवान् पर्वत इति समूहालम्बनादेवानुमित्यापत्तिः। **यदि** च वृत्तिमदभावप्रतियोगितान-वच्छेदकत्वग्रहेऽपि नानुमितिः।

तदा वृत्तिमदभावप्रतियोगितावच्छेदकत्वग्रहविरोधितानवच्छेद-कत्वेनोक्तविषयितैव विशेषणीयेति वह्नित्वं वृत्तिमदभावप्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरण-धूमवान् पर्वत इति समूहालम्बनसङ्ग्रहोऽपि सुकर इत्यलमति विस्तरेण। **ननु** प्रतियोग्यधिकरणवृत्तित्वस्य तदर्थत्वे संयोगी सत्त्वादित्यत्रातिव्याप्तिरधिकरणभेदेनाभावभेदे मानाभावाद्धेतुसमानाधिकरणस्य संयोगाभावस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वेन साध्येऽतथा विधाभावान्त-राप्रतियोगित्वात्। **प्रतियोग्यनधिकरणवृत्तित्वस्य तदर्थत्वे तु** मूलोक्ताव्याप्तितादवस्थ्यं द्रव्यत्वसमानाधिकरणसंयोगाभावस्यापि प्रतियोग्यन-धिकरणगुणादिवृत्तित्वात्।

तात्पर्यटीका

अवच्छेदकत्वभेदावच्छेदकात्यन्ताभावग्रहयोर्वारणाय **यथोक्तग्रह-विरोधितावच्छेदकेति**। अन्यथा साध्यतावच्छेदकधर्मिकावच्छेदकत्व-भेदावच्छेदकात्यन्ताभावप्रकारकग्रहविषयतयोरपि प्रवेशलाभात्तथा ग्रहादनु-मित्यापत्तेर्यथोक्ते तूक्तग्रहीयभेदादिविषयतयोर्न तथात्वमिति तद्ग्रहयोर्वारणमिति भावः। प्रकृतेत्यस्य प्रयोजनमाह **न वह्नित्वमात्रेति**। **परम्परया** तदवच्छिन्नेत्यस्य प्रयोजनमाह **नवेति**। **ननु** वृत्तिमदभावप्रतियोगितानवच्छेदकत्वग्रहोऽपि सामान्याभावमुद्रया यथोक्तग्रहविरोधीति तद्ग्रहादनुमित्यापत्तिरिति शङ्कते **यदि चेति**। **केचित्तु** केवलान्वयित्वग्रहमात्रादप्यनुमितिमभ्युपगच्छन्तीति यदि **चेत्युक्तम्**।

उक्तविषयितैव यथोक्तग्रहविरोधितावच्छेदकविषयितैव। **यदि** यथोक्तविषयताशाली ग्रहो वृत्तिमदभावप्रतियोगितावच्छेदकत्वग्रहाविरोधित्वेन

विशेष्यते **तदा** समूहालम्बनविशेषासङ्ग्रह इत्येवकारार्थ इत्याह। **वह्नित्वमिति** सङ्ग्रहोऽपीत्यपिना विशिष्टसाध्यतावच्छेदकस्थले शुद्धसाध्यतावच्छेदकधर्मिकयथोक्तग्रहव्यावृत्तिः सूच्यते। **ननु** विशिष्टस्यानतिरिक्तत्वाद्वह्नित्वमात्रधर्मिकग्रहोऽपि प्रकृतसाध्यतावच्छेदकधर्मिकग्रह एवेति तद्दोषतादवस्थ्यमित्याशङ्क्य साध्यतावच्छेदकतावच्छेदकावच्छिन्नत्वेन साध्यतावच्छेदकविषयिता परम्परायां प्रवेशनीया **तदिदमुक्तं** प्रकृसाध्यतावच्छेदकधर्मिकग्रहीयेतीत्यभिप्रेत्योक्त**मलमति विस्तरेणेति**। विषयताकाण्डप्रपञ्चेनालमित्यर्थः। मानाभावादिति। तथा सत्यधिकरणातिरिक्तोऽभावो न सिद्ध्येदिति भावः।

चषकम्

न च व्याप्याव्याप्यवृत्तित्वरूपविरुद्धधर्मसंसर्गाद्द्रव्यवृत्युक्ताभावाद्गुणवृत्युक्ताभावो भिन्न इति **वाच्यम्**। संयोगाभाववद्द्रव्यनिष्ठाभावप्रतियोगित्वतद्वद्गुणनिष्ठाभावाप्रतियोगित्वयोर्गुणत्ववर्तिनोर्विशेषतोऽविरोधा**देवं** संयोगाधिकरणद्रव्यवृत्तित्वसंयोगानधिकरणगुणवृत्तित्वयोरप्याकाशाभावादावेकत्र सत्त्वादिति। **न च** प्रतियोग्यनधिकरणहेत्वधिकरणेति विवक्षितमिति **वाच्यम्**। हेतुसमानाधिकरणपदवैयर्थ्यात् प्रसिद्धानुमाने वह्न्यभावस्यापि प्रतियोग्यनधिकरणहेत्वधिकरणाप्रसिद्धेरेव वारणादिति **चेन्न**। वृत्तित्वस्यैकदैव निवेशे तात्पर्येणोभयथोपस्थितिकल्पने प्रयोजनविरहात् प्रकृते विगतमधिकरणमिति व्युत्पत्यादरेण प्रतियोगिव्यधिकरणेति हेतुसमानेत्यधिकरणेति त्रिपदबुहुव्रीह्याश्रयणात् प्रतियोग्यनधिकरणहेत्वधिकरणयोरभेदान्वयतात्पर्येण च सर्वसामञ्जस्यात्। **तदर्थमेव** पुनर्हेतुसमानेति समदर्भि तेन विनास्याव्याप्त्यवारकत्वादिति **स्मर्त्तव्यम्**। **न चाभेदयोरानर्थक्यम्**। सप्रयोजनार्थकपदव्युत्पत्तिलभ्यानां यावदर्थानां लक्षणघटकत्वस्यानियमात्।

प्रतियोग्यनधिकरणञ्च साध्यतावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं बोध्यम्। **अन्यथा** यथाश्रुते वह्नेः समवायेन वह्न्यनधिकरणहेत्वधिकरणवृत्तिसमवायावच्छिन्नवह्न्यभावप्रतियोगित्वेन वह्निमान् धूमादित्यत्राव्याप्तिः **विशिष्टसत्तावान्** जातेरित्यादौ विशिष्टसत्ताभावस्य

प्रतियोगिशुद्धसत्तानधिकरणजात्यधिकरणाप्रसिद्ध्याभावान्तरस्य च प्रतियोगितानवच्छेदकमेव विशिष्टसत्तात्वमित्यतिव्याप्तिर्वा। **तथा** हेत्वधिकरणमपि हेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकावच्छिन्नाधिकरणं **बोध्यमन्यथा**ऽयमात्मा ज्ञानाच्छब्दवानष्टद्रव्यान्यद्रव्यत्वादित्यत्र च विषयतया शुद्धस्य च हेतोर्ज्ञानस्य द्रव्यत्वस्य चाधिकरण आकाशे आत्मनि च स्वप्रतियोग्यनधिकरणीभूते वर्तमानस्यात्मत्वाभावस्य शब्दाभावस्य च प्रतियोगित्वादात्मत्वस्य शब्दस्य चाव्याप्तेः।

तात्पर्यटीका

अधिकरणभेदेनाभावभेदाभावेऽपि विरुद्धधर्माध्यासेनाभावभेदो दुर्वार इत्याशङ्कते। **न चेति**। **विशेष**तोऽधिकरणविशेषमन्तर्भाव्य। **अविरोधादिति**। सामन्यतो विरोधेऽपि न तयोरेकत्राध्यास इति भावः। संयोगाधिकरणवृत्तित्वसंयोगानधिकरणवृत्तित्वयोरपि विशेषतो विरोधपरिहारं दर्शयति। **एवमिति**।

अन्यथा शीघ्रोपस्थितिकेन प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वोक्तौ। **यथा**श्रुतेऽग्रिमप्रतियोगितायां साध्यतावच्छेदक-सम्बन्धावच्छिन्नत्वाविवक्षणे। तद्विवक्षणे तु प्रथमत एव साध्यतावच्छेदकसम्बन्धविवक्षाया उचितत्वादिति भावः। **अय**मात्मा ज्ञानादित्यत्रात्मत्वस्य विषयतया ज्ञानाधिकरणाकाशे स्वप्रतियोग्यनधिकरणे वर्त्तमानस्यात्मत्वाभावस्य प्रतियोगित्वादव्याप्तिरिति योजनैव**म**न्यत्रापि। **स्वप्र**तियोग्यनधिकरणीभूते सम्बन्धसामान्येन स्वप्रतियोग्यनधिकरणी भूते। **एतेन** प्रतियोगिवैयधिकरण्ये साध्यतावच्छेदकसम्बन्धविवक्षानिरपेक्षत्वं हेतुतावच्छेदकसम्बन्धविवक्षायामुक्तं भवति।

चषकम्

न चैवं घटपटान्यतरो घटपटोभयवृत्ति संयोगादित्यत्र विशिष्टसंयोगाधिकरणाप्रसिद्ध्याव्याप्तिरिति **वाच्यम्**। हेतुतावच्छेद-

कोपलक्षितहेतुस्थले हेतुतावच्छेदकोपलक्षितहेत्वधिकरणत्वगर्भव्याप्त्यन्तरस्यैव च वक्तव्यत्वात्।

तात्पर्यटीका

हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणत्वविवक्षणे उल्वणां हेतुतावच्छेदकोपलक्षिते हेतावव्याप्तिं शङ्कते **नचैवमिति**। **एवं** हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणत्वविवक्षणे। **हेतुतावच्छेदकोपलक्षितेति**। प्रतियोग्यनधिकरणहेतुतावच्छेदकोपलक्षितहेत्वधिकरणवृत्तित्वगर्भेत्यर्थः। **व्याप्त्यन्तरस्यैवेति**। **तत्र** द्वित्वोपलक्षितत्वस्य हेतुतावच्छेदकत्वे तु यथाश्रुतेऽपि नानुपपत्तिर**त** एव विशिष्टवैशिष्ट्यावगाहिपरामर्शहेतुत्वमुपपद्यत इति तु **नव्याः**। **वक्तव्यत्वादिति**। **ननू**भयथाप्युक्तव्याप्तेर्हेतुतावच्छेदकगर्भाया अनुमितिहेतुत्वाङ्गीकारेऽयमालोको धूमो वेति व्याप्यतावच्छेदकसन्देहे निरुक्तव्याप्तिग्रहस्य भवतामप्यसम्भवादनुमित्यनुदयेनैव तत्र मीमांसकमते व्याप्यतावच्छेदकनिर्णयाभावाद्व्यभिचारोद्भावनमसङ्गतमेव। **किन्तु** हेतुतावच्छेदकरूपाणां व्याप्तीनामननुगतानामपि स्वोत्तरानुमितौ हेतुता वाच्या। तथा च यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके गृह्यते तद्धर्मावच्छिन्नप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वमयं वह्निव्याप्यवान् धूमो वह्निव्याप्योऽयं धूमवान् वह्निर्धूमव्यापकोऽयं धूमवानित्यादिसकलवित्तिव्यापकत्वात् प्रथमाया अपि धूमत्वाद्यात्मकव्याप्त्यवच्छिन्नपक्षधर्मत्वावगाहित्वान्न तु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन। धूमो वह्निव्याप्यो धूमवान् पर्वत इति ज्ञानाद्यव्यापकत्वात्। **यदि** च वह्नित्वे धूमत्वावच्छिन्नव्यापकतावच्छेदकत्वप्रकारकत्वं धूमत्वावच्छिन्नपक्षधर्मताज्ञानत्वञ्च द्वयं कारणतावच्छेदकं मन्मते चाखण्डव्याप्तिप्रकारावच्छिन्नपक्षधर्मताज्ञानत्वमेकमेवेत्युच्यते **तदान्य**थाख्यातिवादिभिर्धूमादिसमानाधिकरणात्यन्ताभावाप्रतियोगिगगनसमानाधिकरणधूमादिमानयमिति ज्ञानादनुमित्यङ्गीकारेण तत्र चाखण्डव्याप्तेरप्रसिद्धतया प्रकारत्वासम्भवात् साध्ये साधनव्यापकत्वावगाहित्वे सत्यधिकरणे साध्यीयत्वावगाहित्वे च सति। पक्षे साधनावगाहि यज्ज्ञानं तत्त्वेन कारणत्वं वाच्यं **तथा च**

लाघवात्तादृशव्यापकत्वपक्षधर्मत्वावगाहित्वाभ्यामेव तदुचित**मवृ**त्ति-हेत्वनुरोधाद्व्यापकत्वस्यापि खण्डशो निरुक्तिः परं तेषामतिरिच्यते। **न चैवं** सामानाधिकरण्यज्ञानस्याहेतुत्वाद्धूमव्यापको वह्निर्धूमवानयमितिज्ञानकाले धूमो न वह्निसमानाधिकरण इति ज्ञानसत्त्वेऽप्यनुमित्यापत्तिरिति **वाच्यम्**। वह्न्यसमानाधिकरणधर्मान्तरस्येवास्यापि स्वातन्त्र्येण विरोधित्वा-भ्युपगमादिष्टापत्तेर्वेति **चेन्नैवम्**। तत्पुरुषीयवर्तमानग्रहविषयव्याप्यतावच्छेदक-प्रकारकपक्षधर्मताग्रहत्वेन ज्ञानद्वयसाधारणरूपेण हेतुत्वे कालपुरुषभेदभिन्नानन्त-कार्यकारणभावकल्पनागौरवप्रसङ्गाद**न्यथा** कालान्तरीणायाः **किम्वा** पुरुषान्तरीणाया बुद्धेर्विषयाया व्याप्यताया अवच्छेदकावच्छिन्न-पक्षधर्मताज्ञानमात्रादिदानीं मैत्रस्यानुमित्यापत्तेर्दुर्वारत्वादिति किं **बहुजल्पेन**।

चषकम्

नन्वन्त्ये हेतुतावच्छेदकीभूतविशिष्टद्रव्यत्वाधिकरणतात्मकसम्बन्ध-शून्यत्वात् कथमात्मा हेत्वधिकरणम्। **यदि** च समवाय एव हेतुतावच्छेदकसम्बन्ध इत्युच्यते। **तदा** व्यभिचारिताप्रसङ्ग इति **चेन्न**। हेतुतावच्छेदकस्य साध्याभाववदवृत्तितावच्छेदकत्व एव व्यभिचारित्वोपगमात् **न च** तथापि कपिसंयोगाभाववानात्मत्वादित्यादावव्याप्तिर्घटत्वाभावादेरपि प्रतियोगितावच्छेदकावच्छिन्नसामान्यान्तर्गतपूर्वक्षणवृत्तित्वविशिष्टस्वाभाव-वत्त्वस्योक्ताभावीयविशेषणतया हेत्वधिकरणे सत्त्वेन यथोक्तस्य हेत्वधिकरणस्याप्रसिद्धेः। कपिसंयोगाभावाभावस्य कपिसंयोगस्य गुणस्य यत्किञ्चित्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणहेत्वधिकरणात्म-वृत्तिकपिसंयोगरूपाभावस्य कपिसंयोगाभावनिष्ठप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वाद्वेति **वाच्यम्**।

यादृश्याः प्रतियोगिताया अवच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वाल्लक्षणसङ्गतेः। **अस्ति** हि कपिसंयोगगुणात्मकस्य साध्याभावस्य प्रतियोगिताद्वयी कपिसंयोगसामान्याभावत्वावच्छिन्ना गुणसामान्याभावत्वावच्छिन्ना च तयोराद्या

नात्र यादृशपदेनोपादातुं शक्या तदवच्छेदकावच्छिन्नकपिसंयोगाभावानधिकरण-कत्वस्यात्मवत्यसम्भवात् **किन्तु** द्वितीयैव तदनवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात्। **न च** प्रतियोगितावच्छेदकमेव विशिष्योपादाय तद्भेद एव साध्यतावच्छेदके कुतो न निवेशित इति **वाच्यम्**। मूलोक्तस्य प्रतियोगिताघटितस्य लक्षणस्य परिष्करणीयत्वाद्गुरोरपि लक्षणस्यावर्जनीय-त्वादिति। **इत्थ**ञ्च महाकालो घटवान् कालपरिमाणादित्यत्र महाकालान्यत्वविशिष्टघटाभाव एव निरुक्तप्रतियोगिव्यधिकरणः प्रसिद्ध एवमग्रेऽपीति नाव्याप्तिरन्यथा कालो घटवान् पटादित्यत्र हेत्वधिकरणवर्त्तमानक्रियायां चिरातीततत्तद्व्यक्त्यभावस्य तथात्वेऽपि प्रकृतेत्वधिकरणे महाकाले शुद्धघटत्ववति न तथात्वमित्यप्रसिद्ध्यापत्तेः।

तात्पर्यटीका

अन्त्येऽयं शब्दवानष्टद्रव्यान्यद्रव्यत्वादित्यत्र। **विशिष्ट-स्वाभाववत्त्वस्येति**। विशिष्टस्य स्वस्य घटत्वाभावादेरभाव-रूपप्रंतियोगिमत्वस्येत्यर्थः। अभावसाध्यकपर्यन्तानुधावनस्य फलं दर्शयति। **उक्ताभावीयविशेषणतयेति**। साध्यतावच्छेदकसम्बन्धरूपाभावीयविशेषण-तयेत्यर्थः। प्रतियोगितावच्छेद- कावच्छिन्नसामान्याधिकरणत्वविवक्षायां प्रतियोगिवैयधिकरण्याप्रसिद्ध्या- व्याप्तिमभिधाय यत्किञ्चिद्यत्प्रति-योगितावच्देदकं तदवच्छिन्नसामान्यान- धिकरणत्वविवक्षायामपि साध्याभाव एव यथोक्तप्रतियोगिवैयधिकरण्यस्यापि सम्भवरूपप्रकारान्तरेण तामेवाव्याप्तिमभिधत्ते **कपिसंयोगाभावाभावस्येति**। गुणस्येति। गुणसामान्याभावत्वस्य प्रतियोगितावच्छेदकत्वमाविष्कर्त्तुम्।

प्रतियोगितावच्छेदके यत्किञ्चित्वविवक्षापक्षे यादृशप्रतियोगितामादायाभावे प्रतियोगिवैयधिकरण्यं ततोऽन्यादृशप्रतियोागितामादाय साध्यतावच्छेदके प्रतियोगितावच्छेदकत्वमापाद्य याव्याप्तिरभिहिता तां तयोः प्रतियोगितयोरैक्यविवक्षया वारयति। **यादृश्या इति**। **इत्थञ्च** प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वोक्तौ च। **अग्रे**ऽपीश्वरज्ञानं घटवन्नित्यज्ञानत्वादित्यत्रापि। **अन्यथा** प्रतियोगितावच्छेदकावच्छिन्नेत्यनुक्तौ

चिरातीतेति। चिरपदेन यस्यां क्षणचतुष्टयस्थायिन्यां क्रियायां द्वितीयतृतीयादिक्षणे कस्याश्चिद्व्यक्तेर्नाशस्तद्व्यक्त्यभावस्य तस्यां हेत्वधिकरणीभूतक्रियायां न प्रतियोगिवैयधिकरण्यसम्भव इति वर्त्तमानव्यक्तिरिवातीतापि सा वारणीयेति सूचितम्। शुद्धघटवतीत्यनेन यथाश्रुते प्रतियोगिवैयधिकरण्यं नास्तीति दर्शितम्।

चषकम्

अथ महाकालमात्रवृत्तिविशेषणताविशेषेण साध्यतायामव्याप्तिस्तत्र तेन सम्बन्धेन महाकालान्यत्वविशिष्टघटस्याधिकरणाप्रसिद्धेः। सामानाधिकरण्य-घटकीभूतविशेषणविशेष्यसम्बन्धाभ्यां विशेषणविशेष्योभयवत्त्वं यत्र तत्रैव विशिष्टाधिकरणत्वस्याभ्युपगमात्। न च महाकाले तदन्यत्वं न वा तदन्यस्मिन्नसौ विशेषणतेति **चेन्न**। यत्किंञ्चिद्धेत्वधिकरणे साध्यतावच्छेदक-सम्बन्धेनावृत्तिप्रतियोगिकत्वस्य विवक्षितत्वात्। **इत्थञ्चा**वृत्तिगगनाद्यभावद्वारिकैव तत्प्रसिद्धिः। **न च** वाच्यं विशिष्टसत्तावान् जातेरित्यत्र विशिष्टसत्ताभावस्य तथात्वानापत्तिर्विशिष्टस्यानतिरिक्तत्वेन विशिष्टसत्तायामपि गुणादिवृत्तित्वा**दिति**। यत्किञ्चिद्धेत्वधिकरणवृत्तितानवच्छेदकप्रतियोगितावच्छेदककत्वस्य तदर्थत्वात्। **अथै**वमिदं संयोगवद् गुणान्यत्वे सति कर्मान्यत्वादित्यत्रातिव्याप्तिः। अद्रव्ये हेतुमति सामान्यादौ तेन सम्बन्धेन वृत्तेरप्रसिद्ध्याद्रव्ये च प्रतियोगिसिद्ध्या संयोगाभावतथात्वानापत्तेः।

न च साध्यतावच्छेददकसम्बन्धसामान्ये यादृशप्रतियोगितावच्छेद-कावच्छिन्नप्रतियोगिकत्व यत्किञ्चिद्धेत्वधिकरणानुयोगिकत्वोभयाभाव इत्यभावान्तं परिष्कृत्य तादृशप्रतियोगितेत्यादि वाच्यम्। **ह्रद**नौकासंयोगे निरुक्तोभयाभावाद्वह्नित्वावच्छिन्नप्रतियोगिताया अपि मादृशशब्दार्थत्वादव्याप्तेः **सामान्य इति**। **शेषं** प्राग्वदिति वाच्यम्।

तात्पर्यटीका

द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाभावस्यापि सत्ताधिकरणसामान्यावृत्ति-प्रतियोगिकत्वाभावाद्**यत्किञ्चिदिति**। तथा च सत्ताधिकरणे

गुणादावंवृत्तिप्रतियोगिकत्वाद्द्रव्यत्वाभावस्य प्रतियोगिवैयधिकरण्योपपत्तिः। **गुणादिवृत्तित्वादितीति** न च वाच्यमित्यत्रान्वेति। **न च** हेत्वधिकरण-वृत्तित्वसामान्यानवच्छेदकं विशिष्टसत्तात्वमित्यतिव्याप्तितादवस्थ्यादत्रापि **यत्किञ्चिदिति**। तस्य गुणवृत्तितानवच्छेदकत्वान्नातिव्याप्तिरिति भावः।

निरुतोभयाभावादिति। यादृशप्रतियोगिताया अवच्छेदकं साध्यतावच्छेदकं तादृशप्रतियोगितावच्छेदकावच्छिन्न-प्रतियोगिकत्वघटितोभय-स्याप्यभावादित्यर्थः। **शेषमिति**। प्रतियोगितावच्छेदकानुक्तौ विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिर्विशिष्टसत्ताभावप्रतियोगिताश्रयसत्ताप्रतियोगिकत्व-हेत्वधिकरणानुयोगिकत्वोभयस्य समवाये सत्त्वेन तत्प्रतियोगिताया यादृशशब्दार्थत्वाभावादिति **तदुपात्तम्**। तथा च विशिष्टसत्तात्वावछिन्नप्रतियोगितापि यादृशशब्दार्थ इति नातिव्याप्तिस्**तथा** यत्किञ्चिद्धेत्वधिकरणेत्याद्यनुक्तौ धूमवान् वह्नेरित्यादावतिव्याप्तिर्यतो धूमत्वावच्छिन्ना प्रतियोगिता न यादृशशब्दार्थस्तत्प्रतियोगिता-वच्छेदकावच्छिन्नप्रतियोगिकत्वस्य साध्यतावच्छेदकसम्बन्धे सत्वात्किन्तु जातित्वावच्छिन्नैव तदनवच्छेदकत्वस्य धूमत्वे सत्त्वादिति **यत्किञ्चिदित्यादि**। तन्न यत्किञ्चित्वाप्रवेशे तथैवातिव्याप्तिः साध्यतावच्छेदकसम्बन्धे धूमत्वावच्छिन्नप्रतियोगिकत्व वह्न्यधिकरणपर्वतानुयोगिकत्वोभयसत्त्वादतो **यत्किञ्चिदिति**। **इत्थञ्च** वह्न्यधिकरणायोगोलकानुयोगिकत्व-घटितोभयाभावस्तत्राक्षत इति साऽपि प्रतियोगिता यादृशशब्दार्थ इति नातिव्याप्तिरित्यादिकम्। **प्राग्वदिति**। यादृशप्रतियोगितावच्छेदका-वच्छिन्नानधिकरणं हेत्वधिकरणमित्यत्र हेत्वधिकरणत्वं **यथा** सद्धेतौ साध्यतावच्छेदकावच्छिन्नप्रतियोगिताया बहिर्भावाय **तथा**त्रासद्धेतौ तस्याः परिचयाय यत्किञ्चिद्धेत्वधिकरणानुयोगिकत्वमतीति भावः।

चषकम्

कालिकादिसम्बन्धेन गगनादेर्वृत्तिमत्त्वाङ्गीकारे गगनाद्यभाव-प्रतियोगित्वस्यापि तथात्वासम्भवात्। वह्निधूमोभयवान् धूमादित्यत्राव्याप्ते-

श्चोभयसम्बन्धस्यानेकत्वेन द्वित्वावच्छिन्नप्रतियोगिताया अपि तथात्वात्। **एते**नेदानीं महाकालान्यत्वविशिष्टो घट इति प्रत्ययस्य खण्डकालविषयकत्वेनाप्युपपत्तावुक्तनियमभङ्गभीतेर्महाकालान्यत्वविशिष्ट-घटस्य महाकालेऽसत्तया महाकालमात्रवृत्तिविशेषणतायां खण्डकालविशेषण-ताप्रसिद्धमहाकालान्यत्वविशिष्टघटप्रतियोगिकत्वघटितोभयाभावेऽपि यथोक्त-विशिष्टधर्मावच्छिन्नप्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वस्य साध्यतावच्छेदके सत्त्वेन महाकालो घटवान् कालपरिमाणादित्यादौ लक्षणसत्त्वेऽपि न **निस्तारः**। **न च** साध्यसाधनभेदेन लक्षणभेदाद्द्वित्वावच्छिन्नसाध्यकेन प्रतियोगितावच्छेदकं प्रवेशनीयमिति न वह्निधूमोभयाभावीयप्रतियोगिता यादृशशब्दार्थ इति **वाच्यम्**। तथा सति तत्रैव व्यभिचारिणि वह्नावतिव्याप्तिप्रसङ्गात्।

न च तदवच्छिन्नविशिष्टबुद्धिनियामकत्वमेव तदवच्छिन्नप्रतियोगिकत्वं विवक्षि**तमित्थञ्च** पर्वतनिष्ठसंयोगद्वये द्वित्वावच्छिन्नप्रतियोगिकत्वमस्ति नत्वयोगोलकनिष्ठवह्निमात्रसंयोग इति नाव्याप्त्यतिव्याप्ती इति **वाच्यम्**। द्रव्यं जातेरित्यत्रातिव्याप्तेः समवायस्यैकत्वेनासमवेतवृत्तिप्रतियोगिताया एव तथात्वादिति चे**न्मैवम्**। सम्बन्धान्तरावच्छिन्नाभावमादाय यथाश्रुते प्रदर्शितायाः प्रसिद्धानुमानेऽव्याप्तेर्वारणाय कृतायामपि प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्यभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्न-प्रतियोगितानवच्छेदकत्वविवक्षायां सर्वाधारतानियामकसम्बन्धेन साध्यतायामुक्ता-व्याप्तेर्दुरुद्धरत्वेऽप्युक्तप्रतियोगितायां यत्सम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्न-त्वोभयाभावस्तेन तस्य धर्मिणो व्यापकत्वं व्यापकसामानाधिकरण्यञ्च व्याप्तिरित्यत्र तात्पर्यात्। **न च** साध्यतावच्छेदकसम्बन्धधर्मद्वया-वच्छिन्नसाध्याभावः साध्यानधिकरणहेत्वधिकरणवृ**त्तिः** सद्धेतौ तथा सति व्यभिचारितापत्तेरिति न कोऽपि दोषः।

तात्पर्यटीका

वृत्तिमत्त्वाङ्गीकार इति। अन्यथा गगनस्य शब्दादिकं प्रति पूर्ववृत्तित्वघटितं कारणत्वं दुर्घटं स्यादिति भावः। **अखण्डोपाधिरेव**

तदित्युक्तावेतेनेत्यादि- वक्ष्यमाणरीत्या लक्षणसमन्वयाच्चाह। **वह्निधूमोभयवानिति।** **उक्त**नियम- भङ्गभीतेरित्यनेनेदानीं महाकालान्यत्वविशिष्टो घट इत्यत्रैतत्क्रियावच्छिन्नो महाकालो वा महाकालावच्छेदिकैतत्क्रिया वा विशिष्टाधिकरणतया भासत इत्यसौ विनिगमनाविरहो न भवतीति सूचितम्। **यथोक्तेति** यादृशशब्दोपायेत्यर्थः।

पर्वतनिष्ठसंयोगद्वये वह्निपर्वतसंयोगधूमपर्वतसंयोगद्वये। **अस्तीति।** नाव्याप्तिरिति भावः। **समवायस्यैकत्वेनेति।** अन्यथा द्रव्यत्वनिष्ठप्रतियोगिताया अपि यादृशपदेनोपादातुं शक्यतयातिव्याप्त्यसङ्गत्यापत्तेः। तथात्वाद्यादृश-शब्दार्थतयोपादेयत्वात्। यथाश्रुतेऽग्रिमप्रतियोगितायां साध्यतावच्छेदकसम्बन्धा-वच्छिन्नत्वागर्भे। **उक्ता**व्याप्तेः प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यन-धिकरणहेत्वधिकरणप्रसिद्धमहाकालवृत्यभावीयसाध्यतावच्छेदकसम्बन्धा-वच्छिन्नप्रतियोगिताया एवाप्रसिद्ध्याव्याप्तेः। **उक्तेति।** प्रतियोगितावच्छेदक-सम्बन्धेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्यभावीयप्रतियोगितासामान्य इत्यर्थः। **इत्यत्र** तात्पर्यदिति मैवमित्यत्रेव न कोऽपि दोष इत्यत्राप्यन्वेति।

चषकम्

न च गुरुधर्मावच्छिन्नसाध्यकेऽव्याप्तिः। घटाभावयोर्घटत्वावच्छिन्न-प्रतियोगिताया एव संसर्गत्वेन घटसामान्यशून्येऽपि कम्बुग्रीवादिमान्नास्तीत्यादेः कम्बुग्रीवादिमत्त्वावच्छिन्नत्वप्रतियोगित्वैतत्त्रितयपर्याप्तसंसर्गताकभ्रमस्यापि सम्भवेन गुरोरतत्तया साध्यतावच्छेदकावच्छिन्नत्वस्यासिद्धेरिति **वाच्यम्।** यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नत्वघटितोभयाभावविक्षया तस्या अपि वारणात्। **न च** तार्णातार्णोभयत्वरूपतादृशधर्मावच्छिन्नत्वघटितोभय-वत्त्वात्तथैवाऽव्याप्तिरिति **वाच्यम्।** यद्धर्मसमानवृत्तिकत्वेनापि धर्मस्य विशेषणीयत्वात्। **न चैवमपि** सत्तावान् जातेरित्यत्र प्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणवृत्तिविशिष्टसत्ताभाव-प्रतियोगितायां सत्तात्वन्यूनवृत्ति विशिष्टसत्तात्वावच्छिन्नत्वघटितोभया-भावासत्त्वादव्याप्तिरिति **वाच्यम्।**

तादृशप्रतियोगितासामान्ये यद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वयत्सम्बन्धावच्छेद्यत्वोभयाभावस्य विवक्षणात्। **न च** प्रमेयवह्नित्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्यापि गुरुणो न प्रतियोगितावच्छेदकत्वमित्यनवच्छेदकान्तदलस्यैवाप्रसिद्धिरिति **वाच्यम्**। वस्तुतस्तादृशीं प्रतियोगितां विशेष्योपादाय तदवच्छेदकत्वावच्छिन्नभेदकूटस्य तद्दलघटकत्वात्। **न चेदं** दुर्ग्रहमिति **वाच्यम्**। स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वसामान्यं यदभाववदसम्बद्धं तदवच्छिन्नभिन्नधर्मावच्छेद्यत्वघटितोभयाभावघटनया लक्षणस्य परिष्करणीयत्वाद्भवति हि वह्निव्यापकतानवच्छेदकवृत्तिप्रेमयवह्नित्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वसामान्यं स्वतुल्यवृत्तिवह्नित्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वाभाववदसम्बद्धमिति शुद्धवह्नित्वघटिततादृशावच्छेदकत्वरूपलघुधर्मावच्छिन्नभिन्नं वह्निव्यापकतावच्छेदकमात्रमेव तद्धर्मावच्छेद्यत्वघटितोभयाभावस्य सद्धतौ यथोक्तप्रतियोगितायां सत्त्वाल्लक्षणसमन्वयः। **इदञ्च** योग्यधूमसामान्ये वह्न्यभाववदसम्बद्धत्वमिव सुग्रहमेवेत्युक्त**प्रायम्**।

तात्पर्यटीका

त्रितयपर्याप्तेति। प्रतियोगिविशेषणतापन्नकम्बुग्रीवादिमत्त्वस्यैवावच्छिन्नप्रतियोगितयाभावे भ्रम इति **तु युक्तम्**। **न चैवं** कम्बुग्रीवादिमतो भावः कम्बुग्रीवादिमानित्युल्लेखापत्तिरिति **वाच्यम्**। परतन्त्रविशेषणस्यानुल्लेखात्। पारतन्त्र्यञ्चेतरविशेषणतावच्छिन्नविशेषणताकत्वम्। प्रकृते च प्रतियोगिविशेषणतावच्छेदिकैवाभावविशेषणतात्वावच्छिन्नैवेति न प्रतियोगिनस्तथोल्लेखविरोधः। **एतेन** तयोरभेदाभ्युपगमेऽपि न निस्तार इति **बोध्यम्**। **अतत्तया** प्रतियोगितानवच्छेदकतया। **असिद्धेरिति**। **न च** साध्यतायामेव तत्प्रसिद्धिरिति **वाच्यम्**। ज्ञानावच्छिन्नसुखादौ साध्ये दुःखात्मकहेतुसमानाधिकरणघटाभावप्रतियोगितायां ज्ञानावच्छिन्नत्वस्यापि सत्त्वादव्याप्तेर्विलक्षणस्यावच्छिन्नत्वस्य वक्तव्यत्वात्। **यद्धर्मसमानवृत्तिकत्वेन** यद्धर्मपर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तवृत्तिकत्वेन। **अपिना** निरुक्तान्यूनवृत्तित्वमसमुच्चयः।

यद्विशिष्टेति। विशिष्टसत्तात्वञ्च न सत्तात्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकमिति तद्व्युदासः। **इदञ्च** वह्नित्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वाभाववदसम्बन्द्धत्वञ्च। **उक्तप्रायमिति**। तत्र कार्यकारणभावस्येवात्र तादात्म्यस्यानुकूलतर्कत्वादित्याशयः।।

चषकम्

नन्वत्रापि साध्यतावच्छेदकसम्बन्धेन स्वविशिष्टसम्बन्धीत्यवश्यं वाच्य**मन्यथा** संयोगेन साध्यतायां व्यभिचारिण्यतिव्याप्तिधूमत्वस्य धूमसमवायिनिष्ठसंयोगावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकतया संयोगेन द्रव्यस्य व्याप्यवृत्तित्वे तादृशप्रसिद्धद्रव्यत्वावच्छेद्यत्वघटितोभयाभावस्य वह्निसमानाधिकरणाभावप्रतियोगितायां सत्त्वा**दत** एव स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगित्वमपि साध्यतावच्छेदकसम्बन्धेन वाच्य**मन्यथा** धूमत्वस्य धूमसंयोगिनिष्ठसमवायावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकत्वादुक्तातिव्याप्तितादवस्थ्यापत्ते**रेवञ्च** स्वविशिष्टसम्बन्धिनिष्ठोऽभावः प्रतियोगिव्यधिकरणो वाच्यो**ऽन्यथा** संयोगेन द्रव्यस्याऽव्याप्यवृत्तित्वमते धूमवान् वह्नेरित्यत्रातिव्याप्तेर्दुर्वारत्वाद्धूमत्वस्य धूमत्वविशिष्टसंयोगिनिष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकतयाभावत्वापेक्षया गुरुभूता तादृशप्रसिद्धद्रव्यत्वाभावत्वावच्छेद्यत्वं संयोगावच्छेद्यत्वोभयाभावस्य वह्निसमानाधिकरणाभावप्रतियोगितायां सत्त्वात्। **न च** तदवच्छेद्यत्वमप्रसिद्धमिति **वाच्यम्**। अभावभेदशून्यघटत्वाभावनिष्ठद्रव्यत्वाभावभेदप्रतियोगितायामेव तस्य प्रसिद्धत्वात्।

तत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नासम्बन्धि यत् स्वविशिष्टसम्बन्धि तन्निष्ठत्वम्। **ननु** धूमसंयोगिनि महानसे किञ्चित्कालावच्छेदेन धूमाभावसत्त्वेऽप्ययोगोलकावृत्ति द्रव्यं सर्वदैवास्तीति द्रव्यत्वाभावत्वमिव तादृशद्रव्यत्वमपि संयोगसम्बन्धावच्छिन्नधूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकं प्रसिद्धमिति तदवच्छेद्यत्वस्यैव हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वादेव यथाश्रुतेऽपि नातिव्याप्तिरिति

चेद्देवानां प्रियोऽसि। **न ह्यु**त्पत्तिकालेऽपि महानसे संयोगेन किञ्चिदस्ति येन स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं वह्निमदयोगोलकनिष्ठयथोक्ताभावप्रतियोगितावच्छेदकेऽयोगोलकावृत्तिद्रव्यत्वेयथाश्रुतेऽपि सम्भाव्येत। **यथा**विवक्षिते तु वह्निसम्बन्ध्ययोगोलकमयोगोलकावृत्तिद्रव्यत्वावच्छिन्नसम्बन्ध्येवेति तन्निष्ठयथोक्ताभावप्रतियोगितायामतादृशनिरुक्तरूपाद्यवच्छेदद्यत्वघटितोभयाभावसत्त्वात् कथमतिव्याप्तिः।

तात्पर्यटीका

अत एव साध्यतावच्छेकसम्बन्धेन स्वविशिष्टसम्बन्धित्वस्य विवक्षितत्वादेन। एवं चोक्तप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषणावश्यकत्वे च। घटत्वाभावो नाभाव इति प्रतीत्यापत्या नाभावत्वस्यात्र तथात्वमित्याहा**भावेति**।

सत्तावान् जातेरित्यादौ विशिष्टसत्ताभावमादाय विशिष्टसत्तात्वस्यापि सत्तात्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वमुपपादयितुं **प्रतियोगितावच्छेदकावच्छिन्नेति**। तथा च गुणादौ विशिष्टसत्ताभावोऽपि निरुक्तप्रतियोगिव्यधिकरण इति भावः। **धूमाभावसत्त्वेऽपीति**। तथा च धूमत्वं न धूमत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकमिति भावः। **यथा**श्रुतेऽपि प्रतियोगिवैय्यधिकरण्येन विनाकृतेऽप्येवमग्रेऽपि। **तन्निष्ठयथोक्ताभावेति**। प्रतियोगिव्यधिकरणयथोक्ताभावेत्यर्थः। **अतादृशनिरुक्तरूपेति**। स्वावच्छिन्नासम्बन्धि धूमत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेद- कायोगोलकावृत्तिद्रव्यत्वरूपेत्यर्थः। **आदिना** धूमत्वपरिग्रहः।

चषकम्

अत एव मूलोपात्तं प्रतियोगिवैयधिकरण्यं यथोक्तपरिष्कारेऽप्यर्थवद्भवति। **अन्यथा** कपिसंयोगत्वविशिष्टसम्बन्धिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदककपिसंयोगत्वावच्छेद्यत्वसमवायावच्छेदद्यत्वोभया-

भावस्यैव तद्वृक्षत्वसमानाधिकरणाभावप्रतियोगितायामसत्त्वेन कपिसंयोग्येतद्-वृक्षत्वादित्यादावव्याप्तिप्रसङ्गात्। **अव**च्छेदकलक्षणे प्रतियोगि-वैयधिकरण्यानुपादाने तु कपिसंयोगत्वस्य स्वविशिष्टसम्बन्धिनिष्ठाभाव-प्रतियोगितावच्छेदकतया तादृशप्रसिद्धद्रव्यत्वाभावत्वाद्यवच्छेद्यत्व-घटितोभयाभावस्य यथाश्रुतेऽपि हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वेनैव सामञ्जस्यात्। **इत्थञ्च** कालो जगदाधार: कालपरिमाणादीश्वरज्ञानं सर्ववन्नित्यसविषयकत्वादित्यत्र महाकालेश्वरज्ञानमात्रवृत्तिकालिक-विषयितासम्बन्धाभ्यां साध्यतायामव्याप्तिस्तदवस्थैव। महाकालेश्वरज्ञानयो: सर्वत्वविशिष्टसम्बन्धिनोस्तेन सम्बन्धेन प्रतियोगिव्यधिकरणस्याभावस्याप्रसिद्धे:। न च महाकालाद्यन्यत्वविशिष्टघटाभावस्तथाविध: प्रसिद्ध इति प्रागेव प्रपञ्चितत्वात्। **न चे**श्वरज्ञानान्यत्वविशिष्टघटाधिकरणमपीच्छादिकं प्रसिद्धमेव ज्ञानेच्छासाधारणविषयितयेति **वाच्यं** प्रातिस्विकरूपेणज्ञानस्वरूपस्य साध्यतावच्छेदकसम्बन्धत्वेनास्येच्छासाधारण्यकथाया अप्यनादिवासनामूलक-विकल्पायमानतया तदप्रसिद्धेर्दुर्वारत्वा**दत** एवोक्तमीश्वरज्ञानमात्रवृत्तीति।

नानारूपविषयतानामप्यखण्डविषयतात्वेन सम्बन्धत्वोपगमेऽपि महाकालान्यत्वविशिष्टघटाधिकरणाप्रसिद्ध्या प्रतियोगिव्यधिकरणाभावा-प्रसिद्धितादवस्थ्यमेवेति **चेत्सत्य**मप्यथ यथोक्तयद्विशिष्टसम्बन्धिनिष्ठा-भावप्रतियोगितायां वर्त्तमानो यद्धर्मावच्छिन्नत्वयत्सम्बन्धावच्छिन्नत्वोभयाभावो यथोक्तयद्धर्मावच्छिन्नहेतुसमानाधिकरणाभावप्रतियोगितासामान्ये वर्त्तते तदवच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्नस्य व्याप्तिरुच्यते। यत्तदर्थ: साध्यतावच्छेदकम्। यत्तद्धर्मो हेतुतावच्छेदकम्।

तात्पर्यटीका

अत एवावच्छेदकलक्षणे प्रतियोगिवैयधिकरण्य घटनादेव। अन्यथा मूलोक्तप्रतियोगिवैयधिकरण्यानुपादने। **असत्त्वेनेति**। द्रव्ये संयोगसामान्याभावस्य प्राचामस्वीकारात् **कपिसंयोगीति**। हेतुसमानाधिकरणाभावे साध्यतावच्छेदक-सम्बन्धेन प्रतियोगिवैयधिकरण्ये विवक्षिते प्रदर्शिता महाकालो घटवान्

कालपरिमाणादित्यादावव्याप्ति: स्वविशिष्टसम्बन्धिनिष्ठाभावेऽपि तथा तद्विवक्षायां दुर्वारैवेत्याहे**त्थञ्चेति**।

विषयताया: स्वरूपसम्बन्धरूपत्वेऽपि तदनुगमकमखण्डं विषयतात्वमावश्यकमिति तेनैव रूपेण तासां सम्बन्धता वाच्यान्यथैकविषयतया ज्ञानसत्त्वेऽपि विषयतान्तरेण तदभावसत्त्वाद्घटो न ज्ञानविषय इति प्रतीतिप्रसङ्गादित्यभिप्रेत्याह **नानेति**। **अप्रसिद्ध्येति**। विवेचितैवासावधस्तादधुनैव तुल्ययुक्त्या यद्विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितायामप्युभयाभावघटनया लक्षणं परिष्कृत्योक्ताव्याप्तिमुद्धरति **यथोक्तेति**। स्वप्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोग्यनधिकरणेत्यर्थ:। गुरुधर्मस्य प्रतियोगितावच्छेदकत्वं विनापि यथा गुरुधर्मेण साध्यतायां लक्षणसमन्वयस्तथा दर्शयति। **यत्तदर्थ इति**। यद्विशिष्टसम्बन्धीत्यत्र यच्छब्दार्थस्तदवच्छिन्नेत्यत्र तच्छब्दार्थश्चेत्यर्थ:। **यत्तद्धर्मेति**। यद्धर्मावच्छिन्नहेतुसमानाधिकरणेत्यत्र यद्धर्मशब्दार्थस्तद्धर्मावच्छिन्नस्येत्यत्र तद्धर्मशब्दार्थश्चेत्यर्थ:।

चषकम्

केवलय**द्धर्मस्तु** साध्यतावच्छेदकमन्यद्वेत्यन्यदेतदिति व्यपैतु ते गुरुधर्मेण साध्यतायामव्याप्तिशङ्काकालु**ष्यम्**। अत एव गोत्वत्वाद्यग्रहदशायामपीयं गौरिति तादात्म्येनानुमितिर्गोसम्बन्धीत्युक्तव्याप्तिग्रहादुपपद्यते। पूर्वत्रानवच्छेदकत्वधर्मिण: साध्यतावच्छेदकस्य धर्मितावच्छेदकरूपेणोपस्थिते: समवायेन गोत्वसाध्यतायां तु गोत्वसम्बन्धीत्येवं रीत्योक्तव्याप्तिग्रहेऽपि गोत्वत्वाद्युपस्थितेश्चावश्यकत्वादिति को**ऽयम्**। भवति हि सर्वत्वविशिष्टसम्बन्धिमहाकालादिनिष्ठसमवायाद्यवच्छिन्नप्रतियोगिताकघटाद्यभावप्रतियोगितायां वर्त्तमान: सर्वत्वाद्यवच्छेद्यत्वकालिकसम्बन्धावच्छेद्यत्वघटितोभयाभाव: कालपरिमाणसमानाधिकरणतादृशाभावप्रतियोगितायामपीत्युक्ताऽव्याप्तेरुद्धारप्रकारमाकलय। न हि भवति धूमत्वविशिष्टसम्बन्धिनिष्ठतादृशाभावप्रतियोगितायां वर्त्तमानो धूमत्वावच्छेद्यत्वसंयोगावच्छेद्यत्वोभयाभावो वह्निसमानाधिकरणधूमाभावप्रतियोगितायामित्यतिव्याप्तेरपि। **केचितु**। हंतु समानाधिकरणाभावीयविशेषणताविशेषावच्छिन्न-

प्रतियोगितावच्छेदकावच्छिन्नस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्यसम्बद्धं यद्विशिष्टसामान्यं तत्पारिभाषिकावच्छेदकं तदन्यत्वं साध्यतावच्छेदके **वाच्यम्**।

संयोगेन द्रव्यस्याऽव्याप्यवृत्तित्वेऽपि व्याप्यवृत्तेर्धूमप्रकारकप्रमाविशेष्यत्वस्य यथोक्तस्याभाववत्यसम्बद्धमेव धूमत्वविशिष्टसामान्यमिति तस्य पारिभाषिकावच्छेदकत्वोपपत्तिः न हि वह्निप्रकारकप्रमाविशेष्यत्वं यथोक्तमिति न वह्नित्वं तथेत्येव सर्वं सुस्थम्। **न च** वह्निमान् धूमादित्यादावव्याप्तिर्महानसीयवह्नित्वस्य यथोक्तपारिभाषिकावच्छेदकत्वेन तदन्यत्वस्य वह्नित्वेऽसत्त्वादिति वाच्यम्। तदविषयकप्रतीतिविषयत्वरूपस्य तत्पर्याप्तावच्छेदकताकप्रकारतावच्छेदकतापर्याप्त्यनधिकरणत्वपर्यवसितार्थस्य तदन्यत्वस्य विवक्षणात्तस्य च तत्रापि सत्त्वादित्यन्यत्र **विस्तरः**।

तात्पर्यटीका

० केवलयद्धर्मो यद्धर्मावच्छिन्नत्वेत्यत्र यद्धर्मशब्दार्थः। **साध्यतावच्छेदकमन्यद्वेति**। यथा प्रेमयवह्निमान् धूमादिति गुरुधर्मेण साध्यतायां प्रमेयवह्नित्वविशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगितायामप्रसिद्धप्रमेयवह्नित्वावच्छिन्नत्वघटितोभयाभावो न प्रसिद्ध्यतीति साध्यतानवच्छेदकमपि शुद्धवह्नित्वमेवोपादाय लक्षणमविकलम्। **परन्तु** शुद्धवह्नित्वेन साध्यतायां साध्यतावच्छेदकमेव वह्नित्वमप्युपादाय लक्षणं यातीति भावः। अमुमेवाशयं स्वयमेव प्रकटयति। **व्यपैतु त इति**। **अत एव** स्वरूपतः साध्यतावच्छेदकोपस्थित्यैवोक्तव्याप्तिग्रहसम्भवादेव। गोत्वत्वेन गोत्वानुपस्थितावप्युपस्थितद्रव्यत्वत्वाद्यवच्छिन्नयावद्धर्मावच्छिन्नत्वघटितोभयाभावस्तत्र गृह्यमाणो हेतुसमानाधिकरणाभावप्रतियोगितायामपि सुग्रह एवेति किमनुपपन्नमिति। **अतिव्याप्तेरपीति**। उद्धारप्रकारमाकलयेत्यनुषज्यते।

व्याप्यवृत्तेरिति। विपर्यये साधकाभावादिति भावः। अन्यथा धूमप्रकारकप्रमाविशेष्यत्वाभाववति धूमवति धूमस्य सम्बद्धत्वाद्धूमत्वं पारिभाषिकमवच्छेदकं न स्यादेवेति भावः। यथोक्तस्य

वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नस्य। यथोक्तं धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नम्। **न हीति योजना।** किन्तु घटप्रकारकप्रमाविशेष्यत्वं तथा तदभाववदसम्बद्धं घटत्वं तु पारिभाषिकं तत् प्रसिद्धमिति नैव वह्नित्वं तथेति तदनवच्छेदकमेवेत्यर्थः। साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं परित्यज्य द्विविधायामपि प्रतियोगितायां विशेषणताविशेषावच्छिन्नत्वस्योक्तत्वादेव नाऽव्याप्यवृत्तिसाध्यके व्यधिकरण-समवायावच्छिन्नप्रतियोगिताकस्य कपिसंयोगप्रकारकप्रमाविशेष्यत्वाभावस्य द्रव्येऽपि भावात् प्रमाविशेष्यत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य चाभावात्। व्याप्त्यतिव्याप्ती इत्याहेत्येव सर्वं सुस्थमिति। **ननु** वह्नित्वस्य महानसीयवह्नित्वानतिरिक्तत्वं कथं महानसीयवह्नित्वाविषयक-प्रतीतिविषयत्वमपि। प्रकारतया तदवच्छिन्नकार्यताभिन्ना साध्यतावच्छेदका-वच्छिन्नकार्यतेत्येतावत्पर्यन्तोक्तावपि यथाश्रुते तद्दोषतादवस्थ्यमेव वह्नित्वावच्छिन्नकार्यतायां महानसीयवह्नित्वावच्छिन्नकार्यताया अपि वह्नित्वावच्छिन्नतयैव तद्भेदाभावादित्याशङ्क्य परिष्कृतार्थमाह। **तत्पर्याप्तेति।** तत्पर्याप्तिश्च परस्परविशेषणविशेष्यभावानापन्ने तदापन्ने च यथा वह्निह्रदोभयवान् महानसीयवह्निमानिति प्रतीतिप्रकारतावच्छेदकतयोरित्युभयथापि प्रकृते न क्षतिः शुद्धवह्नित्वे कस्याश्चिदप्यवच्छेदकतापर्याप्तेरनधिकरणत्वादिति दर्शयति। **अन्यत्र विस्तर इति।**

चषकम्

इत्थञ्च नोपादेयमेव प्रतियोगिवैयधिकरण्यद्वयमपीति **वदन्ति। तन्न** जातिमान् भावत्वादित्यत्र यथोक्तप्रतियोगितावच्छेदकं जातिप्रकारक-प्रमाविशेष्यत्वत्वं तदवच्छिन्नाभाववति सामान्यादौ साध्यतावच्छेदकसमवायेन सम्बद्धत्वाप्रसिद्ध्या जातित्वस्य पारिभाषिकावच्छेदकत्वं न स्यादित्यतिव्याप्तेरिति **दिक्। परन्तु** विशेषणताविशेषावच्छिन्न-यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्सम्बन्धा-वच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियोगितासामान्ये नास्ति साधने तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति नञ्गर्भोक्तव्याप्तिलक्षणपरिष्कारः।

धूमवान् वह्नेरित्यादौ वह्निमदयोगोलकवृत्तिह्रदत्वप्रकारकप्रमाविशेष्यत्वाभावप्रतियोगितायां यस्यांकस्याञ्चित्तु धूमत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकीभूतधूमप्रकारकप्रमाविशेष्यत्वत्वावच्छेद्यत्वाभावोऽपीत्यतिव्याप्तिरतः **सामान्य इति**।

इत्थञ्च धूमप्रकारकप्रमाविशेष्यत्वाभावप्रतियोगितायां तदवच्छेद्यत्वाभावस्य सत्त्वादेव नातिव्याप्तिः कालो घटवान् कालपरिमाणादित्यादौ तु कालान्यत्वप्रकारकप्रमाविशेष्यत्वाभावप्रतियोगितायां यथोक्तायां प्रसिद्धायां विशेषणताविशेषावच्छिन्नघटत्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदककालत्वप्रकारकप्रमाविशेष्यत्वत्वाद्यवच्छेद्यत्वं नास्त्येवेति क्वाऽव्याप्तिप्रसङ्ग इति **दिक्**। **इत्यर्थादिति**। **अत्र केचित्**। इदं संयोगेतद्वृक्षत्वादित्यादावव्याप्तिस्तदवस्थैव मूले महीरुहो विहङ्गमसंयोगी नाग्र इति प्रत्यक्षेणाऽन्योन्याभावस्याऽव्याप्यवृत्तितया वृक्षस्यापीदं संयोगानधिकरणत्वं स्थितं प्रतियोगिव्यधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वस्यापीदं संयोगत्वे सत्त्वात्। **तस्मात्**प्रतियोगिवैयधिकरण्यमनर्थकम्। **कथम**न्यथा पक्वतादशायां घटो न श्याम इत्यादयो व्यवहाराः।

तात्पर्यटीका

इत्थञ्च प्रतियोगितायां विशेषणताविशेषसम्बन्धावच्छिन्नत्वविक्षणे च। **नोपादेयमेवेति**। प्रयोजनाभावादिति भावः। **न स्यादिति**। तथा च घटत्वत्वाद्येव तादृशावच्छेदकं प्रसिद्धं तद्भिन्नञ्च जातित्वं साध्यतावच्छेदकमित्यतिव्याप्तिरिति भावः। द्रव्यवाम् जातेरित्यत्र संयोगेन साध्यतायां यथोक्तं प्रतियोगितावच्छेदकं द्रव्यप्रकारकप्रमाविशेष्यत्वत्वं तदवच्छिन्नाभाववति गुणादौ साध्यतावच्छेदकसंयोगेन सम्बद्धत्वाप्रसिद्ध्या द्रव्यत्वस्य पारिभाषिकावच्छेदकत्वं न स्यादिति घटत्वाद्येव तादृशावच्छेदकं प्रसिद्धं तदन्यच्च द्रव्यत्वं साध्यतावच्छेदकमित्यप्यतिव्याप्तिरित्यभिप्रेत्य **दिगित्युक्तम्**। प्रतियोगितायां विशेषणताविशेषावच्छिन्नत्वमादृत्य प्रतियोगिवैयधिकरण्यं परित्यज्य लक्षणं परिष्कुरुते। **परन्त्विति**। **ननु**

यद्धर्मविशिष्टसम्बन्धिनिष्ठयथोक्ताभावप्रतियोगितावच्छेदकावच्छेद्यत्वं साधनसमानाधिकरणयथोक्ताभावप्रतियोगितासामान्येऽस्तीत्येतावतैव सामञ्जस्यं नञ्द्वयघटनानर्थक्यमत आह। **नञ्गर्भोक्तेति**। तथा च मूलोक्तस्य नञ्घटितलक्षणस्यायं परिष्कार: कृतोऽखण्डाभावस्य घटकत्वाच्च न वैयर्थ्यमिति भाव:।

ईश्वरज्ञानं सर्ववन्नित्यज्ञानत्वादित्यत्राप्येषैव दिगिति दर्शयति। **दिगिति**। **इदं संयोगीति**। अयं चासौ संयोगश्चेदं संयोग: सोऽस्यास्तीति विग्रहादद्रव्ये संयोगसामान्याभावस्य प्राचामस्वीकारेऽपि न क्षति:। **अनकर्थकमिति**। अव्याप्तिवारणरूपप्रयोजनशून्यमित्यर्थ:। प्रत्यक्षस्य सामग्रीवशाद्विशेषण-संसर्गाभावविषयकत्वमपि सम्भवतीत्यतोऽन्योन्याभावस्याऽव्याप्यवृत्तित्वे प्रतिनियतविषयं शब्दमप्युपष्टम्भकमाह **कथमन्यथेति**। **ननु** पक्वतादशायामपि घटो न श्याम इति न व्यवहार: किन्त्विदानीं न श्याम इति तस्य चेदानीं य: श्यामस्तदन्य एव विषय इत्यत **इत्यादय इति**। **आदिना** दण्डादिविनाशकालीनानां नायमिदानीं तद्दण्डवानिति व्यवहाराणां परिग्रह:। तत्र चेदानीं तद्दण्डवतोऽप्रसिद्ध्योक्तप्रतीकारासम्भवात्।

चषकम्

तेषामपि विशेषणसंसर्गाभावविषयत्वेऽनुयोगिनि सप्तमीप्रसङ्गात्। **कुतो** वान्यथा घटो न घट इत्यसाधु। धर्मिविशेषणतया भासमानस्य नञर्थविशेषणतया भानासम्भवाच्च। घटो न श्याम इत्यादौ श्यामादिपदं धर्ममात्रपरं सप्तमीप्रसङ्गस्तु न पचति चैत्र इत्यादाविव वारणीय इति चेद्व्युत्पादयिष्यते चेदं निपुणतरमुपरिष्टात्। **न च** स्वप्रतियोगिनिष्ठाधेयत्वानिरूपकत्वं हेत्वधिकरणे विवक्षितं निरूपकत्वञ्च व्याप्यवृत्तीति **वाच्यम्**। स्वप्रतियोगिनिष्ठ-साध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयत्वनिरूपकहेत्वधिकरणकाभावस्य कालो घटवान् कालपरिमाणादित्यादौ महाकाले महाकालान्यत्वविशिष्टघटस्य सत्त्वाऽसत्त्वाभ्यामसिद्धे:। अथ व्याप्यवृत्तिसाध्यक एवैतल्लक्षणं तत्र च प्रतियोगिवैयधिकरण्योपदर्शनं कालिकसम्बन्धेनाकाशाभावस्याभावे साध्ये

आत्मत्वे हेतावव्याप्तिवारणायान्**यथा** केवलान्वय्याकाशाभावरूपसाध्याभावप्रतियोगित्वस्य साध्ये सत्वेनाऽव्याप्तेः। अव्याप्यवृत्तिसंयोगादिसाध्यके तु साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियागिताकात्यन्ताभावे न सममसामानाधिकरण्यमिति चेत्।

इदं जन्यज्ञानविषयो मेयत्वादित्यादौ केवलान्वय्यव्याप्वृत्तिसाध्यके का गतिः प्रलयावच्छेदेन व्योमनिष्ठसाध्याभावप्रतियोगितया प्रतियोगिवैयधिकरण्याघटितस्यापि यथाश्रुतलक्षणस्य **तथा** साध्यव्यापकव्याप्यवृत्तिकेवलान्वय्यन्तरस्याभावाप्रसिद्ध्या च त्वदुक्तपरिष्कृतलक्षणस्याप्यव्याप्तेः। **न च** व्यापकाभावे यत्सामानाधिकरण्याभाव इति विवक्षित**मित्थञ्च** व्यापकीभूतस्य व्योमाभावस्याभावे। व्योम्नि हेतुसामानाधिकरण्याभावाल्लक्षणसमन्वय इति **वाच्यम्**। केवलान्वयिनो व्योमाभावस्याभावानभ्युपगमात्। **प्रतियोगित्वस्यान्यथैवोपपादनादिति**। **अत्र** वदन्ति। साध्यसामानाधिकरण्याभावस्य व्यापको यत्सामानाधिकरण्याभावस्तत्त्वं व्याप्तिः। तद्व्यापकत्वञ्च स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वमखण्डं तदत्यन्ताभावे सुलभमेव सद्धेतोः।

व्यभिचारिणस्तु समानाधिकरणे साध्यवत्त्वप्रकारकप्रमाविशेष्यत्वाभावेन साध्यसामानाधिकरण्यमिति व्यभिचारिसामानाधिकरण्याभावस्य न तथात्वम्। **के**वलान्वयिनः साध्यस्य साधनस्य वा सम्बन्धिनि विशेषणताविशेषेणावृत्तौ पुनस्तथाविधाभावौ प्रसिद्धाविति न कोऽपि दोष इत्यन्त्र वि**स्तरः**।

तात्पर्यटीका

सप्तमीप्रसङ्गादिति। **कथं** तर्हि चैत्रो न पचतीत्यत्र संसर्गाभावप्रत्यय इति चे**न्न भ**वत्येव तत्रापि तत्प्रत्ययः **किन्तु** शक्या लक्षणया वाख्यातार्थस्य कर्त्तुर्भेदप्रत्यय एव तत्रोपगम्यत इत्याशयः। **ननु** धर्मिविशेषणतानापन्नस्यैवात्यन्ताभावबोधने सप्तमी भवति। **अत** एव घटो न घट इत्यस्य वारणं प्रकृते च श्यामपदार्थैकदेशस्यात्यन्ताभावबोधने न किञ्चिद्बाधकमत आह **धर्मिविशेषणयेति**। **व्युत्पादयिष्यत** इति नामार्थस्याभावाऽन्वयेऽपि

सप्तम्यपेक्षितैव न विभक्त्यर्थस्येति प्रतियोग्यभावान्वयावित्यत्र प्रपञ्चयिष्यत इत्यर्थः। **व्याप्यवृत्तीति**। अन्यथा संयोगो न वृक्षवृत्तिरिति प्रत्ययप्रसङ्गादिति भावः। तथा च संयोगाभावो न तथेति नाव्याप्तिरिति भावः। **सत्त्वासत्त्वाभ्यामिति**। महाकालान्यत्वविशिष्टघटाभावस्य प्रतियोगिनो यथोक्तघटस्य कालिकसम्बन्धेन महाकाले सत्त्वे तन्निष्ठाधेयत्वन्निरूपकत्वा**दन्य**था तन्निष्ठयथोक्ताधेयत्वाप्रसिद्धेरिति भावः।

प्रतियोगिवैयधिकरण्याघटितस्यापीत्यपिना प्रतियोगिवैयधिकरण्यघटितस्य परिष्कृतस्याप्यव्याप्तिरिति **सूचितम्**। अन्योऽन्याभावस्याव्याप्यवृत्तितया प्रलयावच्छेदेन व्योम्नि जन्यज्ञानविषयभेदस्यापि सत्त्वेन तन्निष्ठसाध्याभावस्य प्रतियोगिव्यधिकरणत्वात्। **ननु** गगनाभावस्याभावानङ्गीकारे गगने तत्प्रतियोगित्वं न स्यादित्याशङ्क्य तस्याभावविरहरूपत्वेऽन्योन्याभावप्रतियोगितत्वावच्छेदकयोरव्याप्त्यतिव्याप्ती स्यातामित्यभावाधिकरणयोरिव प्रतियोग्यनुयोगिनोरपि स्वरूपसम्बन्धस्यैव शरणीकरणीयत्वादित्यभिप्रेत्याह **प्रतियोगित्वस्येति**। यत्सामानाधिकरण्यव्यापकं साध्यसामानाधिकरण्यमित्येव कुतो नोक्तमित्याशङ्कावारणायाखण्ड इत्यत्यन्ताभावविशे**षणम्**। तथा च सामानाधिकरण्यानां नानाव्यक्तिकतया धूमसामानाधिकरण्यसमानाधिकरणभेदप्रतियोगितावच्छेदकेषु तेषु तत्तत्सामानाधिकरण्येषु यथानिर्दिष्टं व्यापकत्वं दुर्लभमिति तथा नोक्तमिति भावः। **सद्धे**तोरित्यस्य तदत्यन्ताभावेत्यत्र तत्पदार्थे सामानाधिकरण्येऽन्वय **इतरः** स्पष्टः।

व्यभिचारिणस्तु समानाधिकरणे इत्यनेन साध्यवत्त्वप्रकारकप्रमाविशेष्यत्वाभावे हेतुसामानाधिकरण्याभाववद्भेदो दर्शितः। **न** साध्यसामानाधिकरण्यमित्यनेन च तत्र भेदे साध्यसामानाधिकरण्याभावसामानाधिकरण्यम्। **न त**थात्वं न साध्यसामानाधिकरण्याभावव्यापकत्वम्। **अन्यत्र विस्तर इति**। **विस्त**रार्थस्त्विदं वह्निसमवायि धूमादित्यादौ गगनत्वप्रकारकप्रमाविशेष्यत्वादौ यावति वह्निसामानाधिकरण्याभाववति धूमसामानाधिकरण्याभावादतिव्याप्तेः **साध्य**तावच्छेदकसम्बन्धेन साध्यवत्त्वं विवक्षित**मित्थञ्च** वह्न्यवयवभिन्नत्वप्रकारकप्रमाविशेष्यत्वेन साध्यसामानाधिकरण्यं हेतुसामानाधिकरण्यं त्वस्तीति नातिव्याप्तिः। **द्रव्यं** सत्त्वादित्यत्र

साध्यसामानाधिकरण्याभाववत्यवृत्तौ न हेतुसामानाधिकरण्यमित्यतिव्याप्ते-र्विशेषताविशेषण वृत्तिमत्वं विवक्षितम्। **इत्थञ्च** गुणत्वप्रकारकप्रमाविशेष्यत्वेन साध्यसामानाधिकरण्यं हेतुसामानाधिकरण्यं त्वस्तीति नातिव्याप्तिः। **वह्निमान्** धूमादित्यत्र यथोक्त साध्यसमानाधिकरणे धूमावयवत्वप्रकारकप्रमाविशेष्यत्वे धूमसामानाधिकरण्यसत्त्वादव्याप्तेर्हेतुतावच्छेदकसम्बन्धेन हेतुमत्त्वं विवक्षितम्। **इत्थञ्च** तत्रापि धूमसंयोगिवृत्तित्वं नास्त्येवेति नाव्याप्तिः। **तत्रैव** साध्यसामानाधिकरण्यशून्ये ह्रदत्वप्रकारकप्रमाविशेष्यत्वादौ धूमाधिकरणे कालिकादिनावृत्तेस्तथैवाव्याप्तिरिति विशेषणताविशेषेण वृत्तिमत्त्वं विवक्षित**मित्थञ्च** तत्रापि विशेषणताविशेषेणावृत्तित्वाल्लक्षणसमन्वयः।

तर्कामृतम्

पक्षता च सिषाधयिषाविरहसहकृतसिद्ध्यभावः।

तरङ्गिणी

सिषाधयिषेति। पर्वते वह्निमनुमिनुयामित्या- द्याकारकेच्छाविरहविशिष्टानां पर्वतो वह्निमानित्याद्याकारकनिर्णयानामभाव इत्यर्थः। वह्निव्याप्यधूमवान् पर्वतो वह्निमांश्चेत्याकारकसमूहालम्बनात्मकसिद्धिसत्त्वे पर्वते वह्निमनुमि-नुयामितीच्छासत्त्वेऽनुमित्युत्पादाय सहकृतान्तं सिद्धेर्विशेषणम्। सिद्धिसत्त्वे यादृशेच्छाया अनुमितौ सत्यामेव विषयसिद्धिस्तादृशेच्छैव तत्रोत्तेजिका। तेन सिद्धिसत्त्वे एतदुत्तरं पर्वते वह्निज्ञानं जायतामितीच्छासत्त्वेऽपि नानुमितिः। प्रत्यक्षाद्यात्मकसिद्ध्यापि इच्छाविषयसिद्धेः। भवति च प्रत्यक्षात्मकसिद्धिसत्त्वे शाब्दादिसामग्र्यसत्त्वे प्रत्यक्षान्यज्ञानं जायतामितीच्छासत्त्वेऽनुमितिः। अत एव च धूमेन वह्निमनुमिनुयामितीच्छासत्त्वे सति चालोकपरामर्शे नानुमितिः, तादृशेच्छायाधूमलिङ्गक परामर्शासत्त्वेन धूमलिङ्गकानुमित्युत्पत्त्यसम्भवेन विषयसिद्ध्यसम्भवात्। सिषाधयिषाविशिष्टत्वं दैशिकविशेषणतासमवाय-घटितसामानाधिकरण्यसम्बन्धेन। समवायसम्बन्धेनानुमितौ समवायेन परामर्शः, दैशिकविशेषणतया च पक्षता हेतुः। धूमपरामर्शनाशोत्पत्त्य-

धिकरणक्षणवृत्तिकानुमितिं प्रति धूमपरामर्शः कारणम्। अतो नालोकपरामर्शजन्यानुमितौ व्यभिचारः।

चषकम्

पक्षधर्मतां निर्वक्तुमाह। **पक्षता चेति**। **सिषाधयिषाविरहेति** समवायावच्छिन्नतदभावेत्यर्थः सिषाधयिषामात्रस्य पक्षत्वे व्याप्तिस्मरणादिना परामर्शक्षणे तन्नाशादनुमित्यनापत्तेः। **ननु तत्रा**प्यनुमितीष्टसाधनता-ज्ञानानुमित्सापरामर्शा अनुमितीष्टसाधनताविषयकस्मरणात्मकपरामर्शानुमित्से वा फलबलात् कल्प्यन्तामिति **चेन्न**। कल्पनागौरवात्। विनापि सिषाधयिषां गर्जितेन मेघानुमितिदर्शनाच्चा**त एव** साध्यसन्देहोऽपि न पक्षता। **सहकृता** समानाधिकरणा। तत्त्वं चैकदेशकालावच्छेदेनैकात्मवृत्तित्वम्। तेन कायव्यूहे देहान्तरीणस्य कालान्तरीणस्य परपुरप्रवेशे पुरुषान्तरीणस्य वा सिषाधयिषाविरहस्य तदानीं तत्रात्मनि शुद्धविशेषणतया सत्त्वेऽपि न क्षतिः। **तत** एव सिषाधयिषा विरहविशिष्टेति साधारणोक्तिरुपेक्षिता। समवायघटितसामानाधिकरण्यसम्बन्धावच्छिन्नाभावनिवेशे सिषाधयिषा-विशिष्टसिद्धेरपि कालिकसम्बन्धेन पुरुषान्तरीयज्ञानादिवृत्तियथोक्त-सिषाधयिषाविरहविशिष्टत्वेनानुमित्यनापत्तेः। अन्यकालीनसिषाधयिषासमानाधि-करणसिद्धेश्च सिषाधयिषाविरहवैशिष्ट्याभावेन वा तत्राप्यनुमितिप्रसङ्गात्।

तात्पर्यटीका

आह पक्षतामाह। **तत्रापि** यत्र सिषाधयिषाव्याप्तिस्मरणपरामर्शाः क्रमेण भवन्ति। न यत्र कल्पनावसरस्तत्राप्याह **विनापीति**। **अत** एव विनाऽपि सन्देहं गर्जिते मेघानुमितिरेव। **एकदेशेति**। देशोऽपि सिद्धिप्रतिबन्धकतावच्छेदको ग्राह्योऽन्यथा चैत्रस्य सिद्धिसत्त्वेऽपि मैत्रशरीरावच्छेदेन तदभाव-सत्त्वाच्चैत्रस्यानुमित्यापत्तिवारणाय चैत्रशरीरावच्छिन्नसिद्धेरभावकारणत्वे स्थिते एकदेशावच्छिन्नत्वमनर्थकं स्यादित्यतस्तदात्मानुमितिकारणतावच्छेदक-शरीरावच्छिन्नसिषाधयिषाविरहं दर्शयति। **कायव्यूह इति**। **कालिकेति**।

अन्त्याद्यक्षणावच्छेदेन विशेषणतयेत्यपि **बोध्यम्। अन्यकालीनसिषाधयिषेति।** यद्यपि सिषाधयिषाया असत्त्वे सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकसिषाधयिषाविरहोऽक्षत एव। तथापि वक्ष्यमाणसामानाधिकरण्याभावविशेषणत्वाभिप्रायेणेदम्। तथा च सिषाधयिषाविरहवैशिष्ट्याभावेनेत्यस्य सिषाधयिषासामानाधिकरण्याभाववैशिष्ट्याभावेनेत्यर्थः।

चषकम्

अत एव सामानाधिकरण्याभावप्रसिद्धिपरापि सिषाधयिषाऽसहकृत-सिद्धीत्याद्यभिधानं लाघवोक्तिरयुक्तिरेव। **ननु** परामर्शरूपकारणसत्त्वे सिद्धिरूपविरोधिसत्त्वे यद्यनुमित्सा स्यात्तदा तत्रानुमित्युपपत्तये तस्यानुत्तेजकत्वं वाच्यं तच्च न सम्भवति। योग्यात्मविशेषगुणानामेकसामग्र्या अपरप्रतिबन्ध-कत्वमभ्युपेत्यापि यौगपद्यनिषेधात् तत्कुतः सिषाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणमिति **चेन्न**। सिद्ध्यात्मकपरामर्शादनुमितीष्टसाधनता-विषयकाद्यत्रानुमित्सा तत्र त्रितयसमावेशेनोत्तेजकताया आवश्यकत्वात्। **परन्तु** यादृशेच्छासत्त्वे सिद्धिसत्त्वेऽनुमितिः सानुमित्सा विशिष्य धर्त्तव्या। **अन्यथा** सिद्धिसत्त्वेऽन्यद्यत्किञ्चिज्ज्ञानं जायतामित्येवं विधेच्छायामप्यनुमितिप्रसङ्गात्।

नन्वनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वमनुगतमेवोच्यतां लाघवात्ता-वताप्युक्तस्थलेऽनुमित्यापत्तिवारणादिति **चेन्नो**त्तेजकानुगमाय प्रभवतो रूपस्य तथाभावं निवारयामः। **किन्तु** तद्रूपविधुराणां प्रात्यक्षिकसिद्ध्यात्मक-परामर्शानन्तरमवतरन्तीनां प्रत्यक्षान्यज्ञानं जायतामित्येवं विधेच्छानां सत्त्वे शाब्दसामग्र्यसत्त्वेऽनुमित्युत्पत्तिस्तत् सत्त्वे च तदनुत्पत्तिरिति व्यवस्थोपपत्तये विशिष्यैवोत्तेजकत्वं कल्पयामो**ऽत एव** सिद्धिकालीनान्य-लिङ्गकेच्छायामनुमितित्वप्रकारिकायामप्यनुमित्यापत्तिर्वारिता। **अत** एव च समानविषयकप्रत्यक्षसामग्रीकालेऽप्यनुमितेरनुदयेन सा प्रतिबन्धिका तस्यामप्यनुमितीच्छायां सत्यामनुमित्युदयेन सिषाधयिषाया उत्तेजकत्वमावश्यकं **तत्रा**नुमितिविषयकेच्छाया अप्युत्तेजकत्वे त्वशाब्दं ज्ञानं जायतामितीच्छायामनुमित्युत्पादापत्तिर्न चेष्टापत्तिः स्वभावतो बलवती यस्य

सामग्री तदिच्छा सत्वे तस्यैवोत्पादनियमादित्यनुमितित्व-प्रकारकेच्छामात्रमुत्तेजकीकृत्य तस्याः पृथक्प्रतिबन्धकत्वमेव वाच्यं **न तु** पक्षताकुक्ष्यन्तर्भावो युक्तः।

तात्पर्यटीका

यतः सम्बन्धसत्त्वेऽपि न सम्बन्धिनः सत्त्वमिति मते यथाश्रुतेनोक्तानुमितिप्रसङ्गोऽत एव तत्राप्रसिद्धिं सूचयन् परिष्काराभि-प्रायेणोक्तप्रसङ्गं दर्शयत्य**त एवेति**। उक्तानुमितिप्रसङ्गादेवेत्यर्थः। **सामानाधिकरण्याभावप्रसिद्धिपरापीति**। सामानाधिकरण्यस्य वृत्यनियामकतया तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्युद्धारक्षमापीत्यर्थः। **अभ्यु**पेत्यापीत्यपिना तत्तदिन्द्रियमनो योगरूपकारणाभावपरिग्रहः। **अनुमितीष्टेति**। **परा**मर्शस्यानु-मितीष्टसाधनताविषयकत्वप्रदर्शनं तत्पूर्वमनुमित्सासामग्रीविरहप्रदर्शनाय। **एते**नानुमित्सानन्तरं परामर्शे व्याप्तिज्ञानसापेक्षतया त्रितयसमावेशानुपपत्तिः परा**स्ता**। **परन्त्विति**। यत्किञ्चिज्ज्ञानं जायतामितीच्छा सत्त्वेऽपि सिद्ध्यसत्त्वेऽनुमित्युदयेन तस्या विशिष्योत्तेजकत्वे तादृशसिद्धिसत्त्वेऽपि तदिच्छासत्त्वेन पुनरनुमित्यापत्तेः सिद्धिसत्त्व **इत्युक्तम्**। **अनुमितिप्रसङ्गादिति**। **न च** परामर्शाभावान्न पुनरनुमित्यापत्तिरिति **वाच्यम्**। तदिच्छापूर्वं ज्ञानान्तरेष्टसाधनताज्ञानात्मनः सिद्धिरूपस्य ज्ञानान्तरेष्टसाधनताज्ञानात्मकसिद्धि-पूर्वमपेक्षाबुद्ध्यात्मकस्य कस्यापि भावात्।

अत एव विशिष्योत्तेजकादेव। **अन्येति**। परामर्शविषयान्येत्यर्थः। धूमपरामर्शासत्त्वे धूमलिङ्गकानुमितित्वप्रकारकेच्छाया उत्तेजकत्व-वारणायानुमितित्वप्रकारिकाणामपि तत्तद्व्यक्तित्वे नैवोत्तेजकत्वं वाच्यमिति सूचयितुमनुमितित्वप्रकारिकायामपीत्**युक्तम्**। **वारितेति**। तस्यास्तद्व्यक्ति-त्वेनोत्तेजकत्वानुपगमादिति भावः। **अनुमितीच्छायाम**नुमितित्वप्रकारकेच्छायाम्। **अनु**मितित्वप्रकारकेच्छामात्रमित्यनेन पृथक्प्रतिबन्धकत्वे एव लाघवमित्यादर्शितम्। सिषाधयिषाविरहविशिष्टसिद्धिप्रत्यक्षसामग्र्यन्यतराभावः पक्षतेति मतमनादेयमित्याह **न त्विति**।

चषकम्

स्वतन्त्रान्वयव्यतिरेकशालित्वान्नियमेन प्रथममुपस्थितत्वाल्लाघवाच्चा**न्यथा** बाधादेरप्यत्रैवान्तर्भावप्रसङ्गात्। **न चा**नुमित्साया विरहस्य प्रत्येकविशेषणत्वापेक्षयान्यतरविशेषणत्वे लाघवमिति **वाच्यम्**। सिद्धे इच्छाविरहात् प्रात्यक्षिकसिद्धावसम्भवन्त्यापि शाब्दसिद्धौ सत्यां जायमानया पर्वते वह्नेरशाब्दं ज्ञानं जायतामितीच्छयानुमितेरुत्पादात् सिद्धावनुमितिविषयकेच्छाविरहस्य प्रत्यक्षसामग्रीसत्त्वे च तादृशेच्छायां कदाप्यनुमितेरनुत्पादात् सामग्र्यामनुमितित्वादिप्रकारकेच्छाविरहस्य पृथगेव विशेषणतायास्त्वयापि वाच्यत्वात्। **स्व**निवर्त्तकस्यानुमित्यन्यस्य प्रत्यक्षादेः सामग्र्या यद्यत्समवहितं तत्तदन्यत्वेनैतत्परिचित्तत्त तत्तद्व्यक्त्यन्यत्वेन वानुगमे त्वतीव गौरवम्।

ननु सिद्धिमात्रे येच्छोत्तेजिका तद्विरहविशिष्टसिद्धेः प्रत्यक्षसामग्र्याश्चान्यतरत्वेनानुमितित्वादिप्रकारकेच्छाभावसमुदायविशेष्यत्व-मुपेयतेऽ**न्यथा** साधारणेच्छाभावसमुदायस्य प्रत्येकविशेषणत्वे गौरवात्। यत्र च विषयविशेषेऽनुमितित्वप्रकारिकैवेच्छा जाता न त्वशाब्दं जायतामित्याकारिका तत्र तादृशेच्छाभावस्य प्रत्येकविशेषणत्वे गौरवाच्चेति **चेत्त**वाप्यन्यतरत्वघटक-योरन्योन्याभावयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहः। **किञ्चा**त्मनिष्ठः समवायेन सिद्धेरभावः कारणं भिन्नभिन्नेन च सम्बन्धेन तदसाधारणकारण-रूपायास्तत्सामग्र्याः मणिविशिष्टस्य वह्नेरिवेतरकारणविशिष्टस्य मनोयोगादेः प्रतिबन्धकत्वे गौरवात्तथा च कथमनुगमः। **एवं** सिषाधयिषाविरह-वैशिष्ट्यघटकश्चात्मनिष्ठः सिद्धेः समवायः। चक्षुःसंयोगरूपसामग्र्यास्तु स्वप्रतियोगिचक्षुर्नियामकमदृष्टमिति सम्बन्धाननुगमः। **अत** एवेच्छाननुगमात् सिद्ध्युत्तरानुमितौ सिषाधयिषा हेतुरित्य**पास्तम्**। अस्माकं त्वननुगतोत्तेजकाभावकूटविशिष्टस्य प्रतिबन्धकस्याभावोऽनुगतः सम्पद्यत इति जोषमध्याध्वम्।

तात्पर्यटीका

नन्वनुपस्थिते कथमन्वयव्यतिरेकौ ग्राह्यावत आह। **नियमेनेति**। **यद्य**पि तादृशान्यतरन्नास्तीति शाब्दादिबोधकाले तादृशसिद्ध्यभावादेरुपस्थित्यभावात् कथं नियम**स्तथापि** प्रत्येकरूपस्यान्यतरत्वघटकत्वात् प्रतियोग्युपस्थित्या तदभावभानसम्भव इत्याशयः। विनिगमनाविरहादेवान्यतरा भावत्वेनापि हेतुता स्यादित्याशङ्कां वारयति लाघवाच्चेति। शरीरलाघवाच्चेत्यर्थः। **अन्य**था स्वातन्त्र्येण प्रतिबन्धकतायोग्ययोरप्यन्यतरत्वेनाभावहेतुत्वस्य कार्यकारणभाव-लाघवमात्रेणाङ्गीकारेण शरीरलाघवानादरे। अनुमित्साविरहस्य प्रत्येकविशेषणत्वे गौरवात् प्रत्यक्षसामग्र्याः पक्षताकुक्ष्यन्तर्भावो न बाधस्येति विशेषं दर्शयितुं शङ्कते। **न चेति**। **कदापि** शाब्दसामग्र्यां सत्यामसत्यामपि। सिद्ध्यात्मकपरामर्शघटितानुमितिसामग्रीकालीनानुमित्सयाप्यनुमितिर्नस्यात्तस्याः स्वनिवर्त्तकानुमितिसामग्रीसमवहितत्वेनानुत्तेजकत्वादतोऽ**नुमित्यन्यस्येति**। **यद्यदिति**। समवहितत्वावच्छिन्नभेदनिवेशे तस्य नेच्छामात्रप्रतियोगिकत्वमिति सामान्ये नपुंसकतया विशेष्यं **निर्दिष्टम्**। इच्छाया विशिष्यनिवेशावश्यकत्वे वस्तुगत्योक्तसामग्रीसमवहितेच्छाया एव विशिष्य निवेशे लाघवात्तथैवाहै**तत्परिचितेति**। **अतीव** गौरवमिति अस्माकमनुमितित्व-प्रकारकेच्छात्वेनोत्तेजकत्वे लाघवमुपाध्यायानां तु तत्तद्व्यक्त्यन्ये-च्छात्वेनोत्तेजकत्वे गौरवमिति भावः।

अनुमितित्वप्रकारकेच्छाविरहकूटविशिष्टं यदनुमितिगोचरेच्छाभावकूट-विशिष्टसिद्धिप्रत्यक्षसामग्र्योरन्यतरत्तदभावः पक्षतेत्युक्तौ लाघवमस्त्येवेति शङ्कते। **नन्विति**। स्थलविशेषेऽस्माकं प्रत्येकविशेषणताप्रसक्तिरेव नास्तीति दर्शयति। **यत्र चेति**। मतं दूषयति **तवापीति**। **अन्यतरत्वेति**। सिद्धिभेदविशिष्टो यः सामग्रीभेदस्तद्वद्भिन्नत्वेन वा सामग्रीभेदविशिष्टो यः सिद्धिभेदस्तद्वद्भिन्नत्वेन वा हेतुत्वमित्यत्र विनिगमनाविरह इत्यर्थः। अवच्छेदकताया व्यासज्यवृत्तित्वाभ्युपगमे नैष दोष उभयभेदवद्भिन्नत्वेन कारणत्वस्य सुवचत्वादित्यतो दोषान्तरमाह। **किञ्चेति**। **भिन्नभिन्नेनेति**।

इन्द्रियभेदेन सम्बन्धभेदादित्यर्थः। **तत्सामग्र्या इति।** अत्राभावः कारणमित्युनषज्यते। प्रतियोगितावच्छेदकसम्बन्धभेदमुपदर्श्येच्छाविरहवैशिष्ट्यघटकसम्बन्धभेदमप्युपदर्शयति। **एवमिति।**

चषकम्

सा च सिषाधयिषा स्वविषयसिद्ध्यनुपहिता वाच्यान्यथा यत्र साध्यनिर्णयेच्छानन्तरं साध्यतद्व्याप्यविशिष्टपक्षस्य प्रत्यक्षं स्मरणं वा ततोऽनुमितिप्रसङ्गात्। **एवं** पर्वतो वह्निमान् वह्निव्याप्यवान् वह्निव्याप्यव्याप्यवांश्चेति तत्पक्षकसाध्यतद्व्याप्यवत्त्वानुमितिरिष्टसाधनमिति चैकं स्मरणं ततोऽनुमित्सा पर्वते वह्नेर्वह्निव्याप्यस्य चानुमितिर्जायतामित्याकारा ततः साध्यतद्व्याप्यवत्त्वानुमितिर्यत्र जाता तत्रापि। **सिद्धिश्च** पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टस्य प्रकृतवैशिष्ट्यावगाहिनिश्चयस्तेन पाषाणमयो वह्निमान् पर्वतस्तेजस्वी पर्वतो वह्निकालीन इति पर्वतो वह्निमान्नवेति वा सिद्धावपि विनैवेच्छां पर्वतो वह्निसंयोगीत्यनुमितिरुपपद्यते। **शेषं** सुगमम्। **यदि** च पर्वतत्वसामानाधिकरण्येनैकत्र साध्यसिद्धावपि विनानुमित्सामन्यत्र तादृशानुमितिरानुभविकी **तदा** धर्मिविशेषोऽपि निवेश्यो **नान्यथा**धिकमग्रे प्रपञ्चयिष्यामः।

एवं साध्यविशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वे तां प्रति पक्षविशेष्यिकैव सिद्धिर्विरोधिनी**त्थञ्च** पक्षविशेष्यकसिद्ध्यनन्तरमपि साध्यविशेष्यकानुमितिर्जायते समानाकारसिद्धेः प्रतिबन्धकत्वे पर्यवसानाद्यदु**क्तं तुल्यन्यायत्वादिति। वस्तुतः** साध्यविशेष्यकानुमितिं प्रति साध्यप्रसिद्धिरेव विरोधिनी पक्षवैशिष्ट्यावगाहित्वनिवेशे प्रयोजनाभावात्। इतरभेदत्वेन घटाद्यवगाहि पृथिव्यामितरभेद इति सिद्धेः साध्यतावच्छेदकप्रकारकसिद्धित्वेनैव सङ्ग्रहसम्भवादत **एव** प्रसिद्धसाध्यकस्थले पक्षविशेष्यिकैवानुमितिरनुभूयतेऽ**प्रसिद्धे**ऽभावे साध्ये पुनरसौ द्विविधाप्यस्तु।

तात्पर्यटीका

वाच्योत्तजिका वाच्या। अनुमितिगोचरेच्छायां स्वविषयसिद्ध्यनुपहितत्व-निवेशनप्रयोजनं दर्शयित्वानुमितित्वप्रकारकेच्छायामपि तद्दर्शयति। **एवमिति**। **तत्रापीति**। ततोऽनुमितिप्रसङ्गादित्यनुषज्यते। **वह्नि**संयोगीति संयोगस्य साध्यतावच्छेदकसम्बन्धत्वमाविष्कर्त्तुम्। एवमन्यत्रापि। **शेषमिति**। सांसर्गिकविषयतावच्छेदकत्वादीनां पर्याप्तिनिवेशनादिकमित्यर्थः। अन्यथा शुद्धसंयोगादिना सिद्धौ संयुक्तसंयोगेनानुमित्यनापत्तेः। पक्षतावच्छेदकसामानाधि-करण्येन सिद्धिसत्त्वे पक्षतावच्छेदकावच्छेदेनानुमितौ विवादाभावादुक्तम्। **ता**दृशानुमितिरिति पक्षतावच्छेदकसामानाधिकरण्येनानुमितिरित्यर्थः। **अधिक**मवच्छेदकावच्छेदेनानुमितौ सिद्धेः प्रतिबन्धकत्वम्।

विषयभेदेनेव विषयताभेदेनापि वैचित्र्यमाह **एवमिति**। **प्रमाणिकत्व इति**। समानविषयकत्वेन प्रतिबन्धकत्वे साध्यविशेष्यकसिद्ध्यैव पक्षविशेष्यकसंशयनिवृत्तावलं पक्षविशेष्यकानुमित्या परन्तु समानप्रकारकत्वेन विरोधित्वे त्वसावश्यकीत्यर्थः। लाघवादाह **वस्तुत इति**। **नन्वे**वमितरभेदत्वेन घटावगाहिन्यां पृथिव्यामितरभेद इत्यनुमितेरनन्तरमपि पुनस्तथाविधानुमित्यापत्तिः साध्यप्रसिद्धेरसत्त्वादित्याशङ्क्याहे**तरभेदत्वेनेति**। **अत एव** साध्यप्रसिद्धिमात्रस्य विरोधित्वादेव। **अनुभूयत इति** कथमन्यथानुमितेरुपनीतभानत्वपूर्वपक्षावतारः। **द्विविधापीति**। **ननु** साध्यतावच्छेदकप्रकारकज्ञानाभावात् कथं साध्यविशिष्टानुमितिरित्यत **उक्तमस्त्विति**। तथा च व्यापकाभावेन व्याप्याभावसिद्धौ जायमानायां साध्यप्रसिद्धिरूपबाधकाभावान्मुख्यविशेष्यतयैव साध्यं भासते इत्यविवादमेव। विशेषणाभावबुद्धिरूपप्रतिबन्धकाभावबलात्तु साध्यविशेषणिकाप्यनुमितिरविरुद्धैवेति भावः। **अत एव** विशिष्टवैशिष्ट्यप्रत्यक्षं प्रत्येव विशेषणतावच्छेदकप्रकारकबुद्धेर्हेतुत्वं समा**मनन्ति**।

चषकम्

व्यतिरेकिणस्तस्मादितरा **नेत्यन्व**यिनि तु तस्मात्तथेत्येव निगमनस्य साम्प्रदायिकत्वात् **एवं** सति पक्षसाध्यभेदेन पक्षताया भेदात् पृथग्घेतुत्वे यत्र

साध्यसिद्ध्यनन्तरं कदाप्यनुमितिर्न जाता तत्र सिद्ध्यभावमात्रं हेतुर्नत्विच्छानिवेशोऽपि गौरवात् प्रयोजनाभावाच्च। **एतेन** यत्पक्षसाध्यकानुमितौ कस्यापीच्छा न जाता तत्रोक्तिसाधारण्यमात्रसम्पादनायेश्वरेच्छानिवेशनायासो नोपादेय:।

इयञ्च पक्षता स्वप्रतियोगिसिद्धिविषयस्य तदात्मीयतादृशानुमिति-पक्षत्वव्यवहारे प्रयोजिकानुमितिकारणस्यापि सामग्र्यभावस्य तथात्वे गौरवात्। **सिद्ध**साधनस्थले पक्षत्वव्यवहारस्य त्वयाप्यस्वीकारेण सिद्ध्यभाव-तथात्वस्यावश्यकत्वाच्चोत्तेजकविरह विना कृतो लघुरपि बाधाभावो न निविश**तेऽत** एवोक्तं **प्रवृत्तिनिमित्तमुक्तमिति**।

परन्तु य: सिद्ध्यभावो यस्य पुंसो यादृशानुमितावुपयुक्त: स स्वप्रतियोगिसिद्धिविशेष्यत्वसम्बन्धेन यत्रास्ति स तथा व्यवह्रियते। **पर**म्परासम्बन्धानुसरणाच्च न सिद्धिकालेऽपि पर्वतादौ समवायेन सिद्ध्यभावसत्त्वेन पक्षत्वव्यवहारापत्ति:। **न वा** पक्षीभूतात्मनोऽहं सुखीति सिद्धिदशायामनुमातु: सिद्ध्यभावसत्त्वेन जायमानस्य तत्र पक्षे पक्षत्वव्यवहारस्यानुपपत्तिरिति सङ्क्षेप:।

तात्पर्यटीका

नन्वन्यत्रेवात्राप्येकतरविशेष्यकत्वनियम: कुतो नाभ्युपगम्यते इत्यत आह। **व्यतिरेकिणीति** प्रसिद्धसाध्यकव्यतिरेकिणीत्यर्थ:। तथा च निगमनसमानाकारानुमित्यनुभवात् प्रसिद्धसाध्यके तथा नियमोऽप्रसिद्धाभाव-साध्यके तु प्रतिज्ञाद्यसम्भवेन न्यायप्रयोगानभ्युपगमान्नोक्तं नियामकमित्यभिप्राय:। **तस्मा**दितरा नेत्यादि घटादौ साध्यप्रसिद्धिमभिप्रे**त्योक्तम्**। **अत** एव प्रसिद्धसाध्यकेऽन्वयसहचारग्रहरूपेण प्रकारान्तरेणापि व्याप्तिग्रह-सौलभ्येनाप्रसिद्धसाध्यके स्वार्थ एव व्याप्तिग्रहकथन्तायां वक्ष्यमाणं प्रकारमस्त्वप्रसिद्धसाध्यके स्वार्थेव्याप्तिग्रहेऽसावेवेति वक्ष्यमाणग्रन्थेन नियामयन्वक्ष्यति। **एवं** सत्यनुमितिवैचित्र्येण पक्षतावैचित्र्ये सति। प्रामाणिकं गौरवं न दोषायेत्यत आह **प्रयोजनाभावाच्चेति**

सिद्धिकालेऽपीच्छयानुमितिसम्पत्तिर्हि प्रयोजनं तदभावाच्चेत्यर्थः। **एतेन** सिद्ध्यभावमात्रपक्षतात्वसम्भवेन। **कस्यापीति** तेन प्राक्पुरुषान्तरस्य तादृशेच्छायाः प्रसिद्धत्वेऽपि नानुमितिप्रयोजिका सेत्युक्तं भवति। **उक्तिसाधारण्यमात्रेति**। **मात्र**पदेन लाघवप्रयोजनयोर्व्युदासः। **आयास** इत्यनेनेश्वरस्य तदिच्छायास्तन्नित्यत्वसर्वविषयकत्वयोश्च व्यवस्थापने प्रयासो भवतीति **सूचितम्**।

ननु पक्षधर्मताघटिका पक्षता निरूपणीया तस्याश्च निरुक्तसिद्ध्यभावरूपाया विशेषणत्वे तज्ज्ञानस्य परामर्शत्वघटकत्वमापद्यते उपलक्षणत्वे सिद्धिकालेऽप्यनुमित्यापत्तिः व्यवहारमात्रप्रयोजकत्वेऽपि कथं पर्वतादेरेव तथा व्यवहारः केवलान्वयित्वात्तस्या इत्याशङ्क्योपलक्षणमेव सा सिद्ध्यभावस्य स्वातन्त्र्येणानुमितिहेतुत्वाच्च न सिद्धिकालेऽनुमित्यापत्ति**रत एव** व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यमित्यनुमितिलक्षणे पक्षताया जन्यत्वान्वयप्रापणाय पक्षधर्मतेत्यत्र पक्षताविशेषणं तत्त्वञ्च पक्षतायाः परम्परया विशेष्यीभूतज्ञानान्वयिना जन्यत्वेनान्वयित्वरूपं लोहितोऽमीषा ऋत्विजः प्रचरन्तीत्यत्र परम्परया लौहित्यस्य विशेष्यीभूतप्रचारान्वयिनेष्ट-साधनत्वेनान्वयित्वमिवेत्युक्तं **पक्षधरमिश्रैरि**त्यभिप्रेत्य व्यवहारातिप्रसङ्गं वारयितुमाह**यञ्चेति**। **नन्वेवं** सर्वस्य पुंसः सर्वानुमितिपक्षत्वं पर्वते स्यादत उक्तं **तदात्मीयेति**। चैत्रीयेत्यर्थः। **तादृशानुमितीति**। पर्वतो वह्निमानित्यनुमितीत्यर्थः। तथा च चैत्रीय पर्वतो वह्निमानित्यनुमितेः पक्ष इति व्यवहारनियामिकेत्यर्थः। सिद्ध्यभावापेक्षया सामग्र्यभावस्य पक्षनिष्ठतायां सम्बन्धलाघवेन पक्षताव्यवहारनियामकत्वमाशङ्क्य निषेधति। **अनुमितिकारणस्यापीति**। **गौर**वात्सिद्ध्यभावापेक्षया सिद्धिसामग्र्भावस्य गुरुत्वात्। यद्यप्यखण्डाभावे लाघवगौरवावसरो न भवति तथापि सिद्ध्यभावत्वापेक्षया तत्सामग्र्यभावत्वं गुर्वेवेति बोध्यम्। यथा सिद्धिसत्त्वे न पक्षता तथा बाधसत्त्वेऽपीति सिद्धिबाधान्यतराभावस्तथेति मतं दूषयति। **सिद्ध**साधनस्थल इति। **त्वयापि** बाधाभावपक्षत्ववादिनाऽपि। **च**स्त्वर्थे। तर्हि बाधाभाव एव तथास्त्वित्यवान्तरशङ्कां निषेधति। **उत्ते**जकविरहविनाकृतोऽत एव **लघुरपीति**।

ननु बाधे पक्षतावारणाय बाधाभावोऽप्यावश्यक एवेत्याशङ्कां वारयति **न निविशत इति। इत्थञ्च** न निविशतेऽपीति योजना। प्रकृतग्रन्थस्य केवलबाधाभावपक्षताखण्डनपरत्वे बाधाभावो न तथेत्येवावक्ष्यत्। **परन्त्व**पिना केवलोऽपि न तथेत्युक्तम्। तथा च बाधेऽपि मन्मते पक्षत्वमिष्टमेवानुमितिस्तु बाधेनैव प्रतिबध्यत इति **बोध्यम्। अत एव** सिद्ध्यभावस्यैव तथा व्यवहारनियामकत्वादेव। उक्तं मणिकृद्भिः।

सिद्धिविषयस्य तथा व्यवहारे प्रयोजिकेत्युक्तं तच्च सिद्धिविषयः साध्यमपीत्यतिप्रसक्तमत आह **परन्त्विति**। यादृशानुमितौ यत्र पक्षे यस्य साध्यस्यानुमितावुपयुक्तो यः सिद्ध्यभावो यस्य पुंस इदं पदद्वयं देहलीदीपवदुभयान्वयि स मैत्रवृत्तिस्तादृशसिद्ध्यभावः स्वप्रतियोगिसिद्धिविशेष्यत्वसम्बन्धेन यस्मिन्नस्ति स तथा मैत्रीय तदनुमितिपक्षत्वेन व्यवह्रियते इत्यर्थः। **परम्परासम्बन्धानुसरणात्** स्वप्रतियोगिसिद्धिविशेष्यत्वानुसरणात्। **पर्व**तादावित्यादिपदात् साध्यादिपरिग्रहः। समवायेन सिद्ध्यभावस्य तथात्वे व्यवहारातिप्रसक्तिं प्रदर्श्याप्रसक्तिमपि दर्शयति। **न वेति**। पक्षीभूतात्मनश्चैत्रः सुखीति मैत्रीयानुमिति पक्षस्य चैत्रस्य। **अनुमातुर्मैत्रस्य**। सिद्ध्यभावस्य कालविशेषोऽपि प्रवृत्तिनिमित्तेऽन्तर्भाव्यो**ऽन्यथा**नुमित्युत्पत्तिक्षणेऽपि तथाव्यवहारापत्तिरित्याह। **सङ्क्षेप इति**। तथा च यत्र तथेत्यनयोः पूर्वं यदातदेति। पूरणीयमित्यर्थः।

तर्कामृतम्

अनुमानं द्विविधम्—स्वार्थं परार्थं च। तत्र[1] परार्थं पञ्चावयवसाध्यम्। अवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि।

तरङ्गिणी

प्रतिज्ञेति। पक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्ने

---

१. 'तत्तु परार्थं यत्' इति पाठान्तरम्।

साध्यतावच्छेदकसम्बन्धत्वाश्रयाभेदान्यतरसम्बन्धेन विशेष्यताभिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानजनकवाक्यत्वं प्रतिज्ञात्वम्। भिन्नत्वान्तेन निगमने प्रतिज्ञाहेतुसमुदाये च नातिव्याप्तिः। एवमवयवान्तराघटकत्वं निवेश्यम्। नातो निगमनघटके उदाहरणघटके च तादृशभागेऽतिव्याप्तिः। चैत्रः पचतीत्यादौ साध्यतावच्छेदकीभूतसमवायेन पाककृतिरूपसाध्यप्रकारकबोधजनकत्वात्। पर्वतो वह्निमानित्यादौ च पर्वते स्वाश्रयाभेदसम्बन्धेन वह्निप्रकारकबोधजनकत्वाल्लक्षणसङ्गतिः। पञ्चम्यर्थहेतुविशेष्यकशाब्दबोधजनकवाक्यत्वं हेतुत्वम्। मुख्यत्वोपादानान्निगमनवारणम्। द्विरुक्तपदबोध्यहेतुसाध्याभावसम्बन्धिनि साध्यहेत्वभावसम्बन्धकवाक्यत्वमुदाहरणत्वम्। पक्षतावच्छेदकावच्छिन्ने व्याप्तिविशिष्टवदभेदबोधकवाक्यत्वमुपनयत्वम्। साध्यव्याप्यहेत्वन्वितपञ्चम्यर्थहेतुत्वान्वितसाध्यस्य पूर्वोक्तान्यतरसम्बन्धेन पक्षमुख्यविशेष्यकबोधजनकवाक्यत्वं निगमनत्वम्। तृतीयान्तेन हे[तु]प्रयोगश्च न संप्रदायसिद्धः। एवं तत्पदे वीप्सापि। हेतुत्वं ज्ञाप्यत्वम् (ज्ञापकत्वम्?)। वृत्तित्वघटितसामानाधिकरण्यबोधायोदाहरणे सप्तम्यन्तत्वेनोल्लेखः। अधिकमस्मत्कृतचिन्तामणिटिप्पण्याम्।

चषकम्

अवयवसापेक्षत्वनिरपेक्षत्वाभ्यां भेदे प्रदर्शनीये प्रतियोगिविधया शीघ्रोपस्थितिकं सापेक्षमेवादौ प्रदर्शयति। **तत्त्विति**। **पञ्चावयवसाध्यमिति**। जायते हि पञ्चावयवैः स्वार्थज्ञाने जनिते व्युदस्ताप्रामाण्यशङ्कं धूमे व्याप्तिपक्षधर्मतयोर्ज्ञानं ततः परामर्श इति। **अवयवाश्चेति**। अवयवत्वं तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वम्। न्यायबहिर्भूतवारणाय **सत्यन्तम्**। एकदेशवारणाय **विशेष्यम्**। **न च** प्रतिज्ञाद्येव न्यायान्तर्गतमुपादायान्यतमत्वं निर्वाच्यं किं स्वातन्त्र्येण न्यायान्तर्गतत्वनिवेशनेति **वाच्यम्**। तथापि न्यायान्तर्गतत्वघटितस्य प्रतिज्ञादिपञ्चकस्यान्यतमत्वनिर्वचनापेक्षया स्वातन्त्र्येणैकदा तत्प्रवेशे लाघवात्। **नन्वेवं** सत्यप्यनुमितिसमानाकारबोधजनकेऽत एव प्रतिज्ञाभिन्नभिन्ने रमेश्वरः पूज्य इत्यस्याः प्रतिज्ञाया एकदेशे मेश्वरः

पूज्य इति भागेऽतिव्याप्तेर्वारणाय साध्यम्। **न्याया**वयवत्वेनोक्तैकदेशस्य वारणसम्भवेऽप्यन्योऽन्याश्रयादिति **चेदन्यतमत्वं** तावद्भिन्नभिन्नत्वं तत्र च प्रतिज्ञादिवाक्यस्यानुमितिसमानाकारबोधजनकवाक्यत्वेन न प्रवेशो येनोक्तैकदेशं व्याप्नुया**त्किन्तु** न्यायान्तर्गततादृशवाक्यत्वेन तच्चानुपूर्वीविशेष इति तेनैवोक्तैकदेशस्यापि निरास एकदेशो न समुदाय इति प्रतीतेरिति **बोध्यम्**।

तात्पर्यटीका

धूमे व्याप्तिपक्षधर्मतयोर्ज्ञानमिति। **यद्यपि** पक्षधर्मताज्ञानं नापेक्षितं संसर्गत्वात्**तथापि** पक्षधर्मता ज्ञायतेऽनेनेति व्युत्पत्या श्रोतुः सम्भावितेऽप्यपक्षधर्मताज्ञाने प्रामाण्यज्ञानं तेन विवक्षितम्। **न्यायावयवत्वेन** प्रतिज्ञाघटकेन **अत** एवाहा**ऽन्योन्याश्रयादिति**। प्रतिज्ञावयवत्वयोः परस्परसापेक्षग्रहकत्वादिति भावः। यद्यवयवलक्षणं एव न्यायान्तर्गतत्वस्थाने न्यायावयवत्वमभिप्रेतं तदात्माश्रयो **बोध्यः**।

चषकम्

न्यायान्तर्गतत्वञ्च न्यायत्वविशिष्टनिरूपितविषयिताव्यापकविषयिताप्रतियोगित्वम्। **नन्वत्र** प्रतिज्ञात्वादेर्व्यासज्यवृत्तित्वे सम्भवः प्रतिज्ञादिभिन्नयोस्तदेकदेशयोर्भेदस्य प्रतिज्ञादावभावात्। **प्रति**ज्ञा न पकारादिवर्णात्मिकेति प्रयोगप्रसङ्गात्तु व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताकभेदानभ्युपगमात्। **इतर**था त्वेकदेशेऽतिव्याप्तिः प्रतिज्ञाद्येकदेशे तद्भेदाभावादिति **चेत्** प्रतिज्ञाद्यन्यतमत्वं परित्यज्य प्रतिज्ञाद्यघटकत्वे सत्युभयघटकभागद्वयाघटितत्वं वक्तव्यम्। एकदेशस्य वारणाय द्वितीयस्य सत्यन्तस्य प्रवेशः।

तदर्थस्तु यद्यद्रूपावच्छिन्नं प्रतिज्ञादिघटकं तत्तद्रूपावच्छिन्नभेदकूटे यद्रूपसामानाधिकरण्यं तद्रूपवत्त्वं सतीतिघटकतावच्छेदकतद्रूपावच्छिन्नभेदो हि न तत्तद्रूपसमानाधिकरणा**स्ता**वद्वर्णवृत्ति**घट**कतानवच्छेदकप्रतिज्ञात्ववत्त्वं

तु प्रतिज्ञाघटकत्वं प्रतिज्ञादावविकलम्। **न** च पर्वतवृत्तिवर्णत्रयस्य प्रतिज्ञाघटकतावच्छेदकत्रित्ववृत्तिपर्याप्त्यवच्छिन्नावच्छेदकताके भेदे त्रित्वसामानाधिकरण्यस्यापि प्रत्येकावच्छेदेन सत्त्वात्तद्वत्येकदेशे तथैवातिव्याप्तिरिति **वाचम्**। घटकतावच्छेदकस्य प्रत्येकपर्याप्तस्य विवक्षितत्वात्। **तथा** च त्रित्वस्य घटकतावच्छेदकतानियामक-यथोक्तस्वरूपसम्बन्धावच्छिन्नत्रित्ववृत्यवच्छेदकतानिरूपकभेदस्यैव लक्षण-घटकस्य प्रत्येकमसत्त्वान्नोक्तरीत्या दोषप्रसक्तिरपि। **तत्र** च घटकत्वं स्वाविषयकप्रतीत्यविषयतत्कत्वे सति तदविषयकप्रतीतिविषयस्वत्वम्

तात्पर्यटीका

न्यायत्वविशिष्टेति। न्यायत्वविशिष्टनिरूपितविषयिता न्यायज्ञाने तत्रावश्यमवयवविषयितास्ति तत्प्रतियोगित्वं तन्निरूपकतावच्छेद-कानुपूर्वीमत्त्वमवयवेषु। तदेकदेशानामपि तथात्वाद्विशेष्यदलमर्थवद्भवति। **व्यासज्यवृत्तित्वे** प्रतिज्ञात्वनिष्ठपर्याप्तिसम्बन्धावच्छिन्नावच्छेदकताके भेदे प्रतिज्ञाभिन्नेत्यत्र विवक्षिते **प्रतिज्ञादावभावादिति**। भागद्वयरूपायां प्रतिज्ञायामन्यान्यभागावच्छेदेनान्यान्यभागभेदसम्भवेऽपि तत्तद्भागभेदासम्भवेन भागद्वये भागद्वयस्य भेदद्वयासम्भवादिति भाव:। **ननु** तत्तद्भागे तत्तद्भेदासत्त्वेऽपि भागान्तरेऽपि पर्याप्तैतद्भागसाधारणसमुदायत्वरूपप्रतिज्ञात्वावच्छेदेन भागद्वयस्यापि भेदसत्त्वे बाधकाभाव इत्याशङ्क्य तत्र बाधकमुपदर्शयति। **प्रतिज्ञेत्यादि**। **पकारादिवर्णात्मिकेति**। पर्वतो वह्निमानित्यक्षर-समुदायात्मिकेत्यर्थ:। **इतरथा** प्रतिज्ञात्वादे: प्रतिज्ञाघटकयावद्वर्णेषु प्रत्येकं पर्याप्तत्वं। प्रत्येकवृत्तितानियामकस्वरूपसम्बन्धावच्छिन्नप्रतिज्ञात्व-निष्ठावच्छेदकतानिरूपके भेदे विवक्षित इति यावत् **प्रतिज्ञाद्यन्यतमत्वं** तावन्मात्रं तेन न्यायन्तर्गतत्वे सतीति सत्यन्तस्य व्युदासोऽ**त एव** वक्ष्यति द्वितीयस्य **सत्यन्तस्येति**।

एकदेशेऽतिव्याप्तिं वारयंल्लक्ष्ये लक्षणं ग्राहयति। **घटकतावच्छेदकेति**। **तावद्वर्णवृत्ती**त्यनेन घटकतावच्छेदकतत्तद्रूपावच्छिन्नप्रत्येकभेदपु

सामानाधिकरण्यं दर्शितम्। **घटकतावच्छेदकेत्यनेन** प्रतिज्ञात्वावच्छिन्नभेदं कूटानन्तर्गतत्वम्। **तथा च** घटकतावच्छेदकस्य प्रत्येकपर्याप्तस्य विवक्षितत्वं च। प्रत्येकपर्याप्तिनियामकसम्बन्धावच्छिन्नावच्छेदकताके भेदे विवक्षितं सतीति यावत्। **उक्तरीत्या** त्रित्ववृत्तिपर्याप्त्यवच्छिन्नावच्छेदकताकभेदमादाय। **तत्र च** द्वितीयसत्यन्तार्थे च। **स्वाविषयकेत्यादि**। स्वपदार्थो घटकमेकदेशादि तत्पदार्थश्च घटितं प्रतिज्ञादि। न विद्यते विषयो यस्याः साऽविषयिका सा चाऽसौ प्रतीतिश्च सा तथा तस्या अविषयस्तत् प्रतिज्ञादि यस्यैकदेशस्य तदविषयकप्रतीत्यविषयतत्कं स्वं च तदविषयकप्रतीत्यविषयतत्कञ्च तत्तथा तस्य भावस्तत्त्वं तथात्वे सतीति विग्रहः। **यस्येत्यन्यपदार्थ** एकदेशस्तदुत्तरषष्ठ्यर्थो निरूपितत्वमविषयकत्वघटकविषयित्वान्वयि। **एवमन्यत्रापि**।

चषकम्

अत्र चोभयघटकेत्यादिविशेष्यदलस्य सार्थकीकारणाय सत्यन्तमखण्डाभावस्यापाद**कम्**। **अन्यथा** प्रतिज्ञाहेत्वाद्येकदेशयोः समुदायस्य प्रतिज्ञाद्यविषयकप्रतीतिविषयस्वात्मकस्य प्रतिज्ञादिघटकत्वेन द्वितीयसत्यन्तेनैव वारणादेतद्वारणमात्रप्रयोजनकस्यास्यानर्थक्यापत्तेः। **स्वस्य** स्वघटकत्वेऽसम्भव इति तद्वारणाय विशेष्यमिति **बोध्यम्**। प्रतिज्ञाद्येकदेशहेत्वाद्येकदेशघटितसमुदायेऽतिव्याप्तिवारणायोभयघटकेत्यादेर्विशेष्यदलस्य। तत्र चाघटितत्वं भागद्वयाविषयकप्रतीतिविषयत्वं न तत्रेति तद्वारणम्। **न च** स्वीयदलद्वयघटकभागद्वयघटितत्वादव्याप्तिरिति **वाच्यम्**। प्रतिज्ञाहेतू हेतूदाहरणे उदाहरणोपनयावुपनयनिगमने इति विशिष्यैवोभयस्य वक्तव्यत्वात् पूर्वावयवोत्तरभागोत्तरावयवपूर्वभागघटितसमुदाय एव दलद्वयातिप्रसङ्गात्तस्य चैतावतैव वारणादिति। **न चैवं** सति प्रतिज्ञोदाहरणभागद्वयेऽतिव्याप्तिरिति **वाच्यम्**। तथा प्रतिसन्धाने न्यायानन्तर्गतत्वाच्छ्रूयमाणक्रमस्यैव न्यायान्तर्गतत्वात् भागद्वये उभयघटकत्वञ्च तत्तदुभयमात्रघटकत्वं तथा च प्रत्येकं हेतावघटकं सद्यत्प्रतिज्ञायां घटकं यच्च प्रतिज्ञायामघटकं सद्धेतौ घटकं तादृशेन भागद्वयेनाघटितत्वमिति तु परमार्थः।

तेनायमित्युपनयभागस्य निगमनेऽनुषङ्गपक्षेऽपि न तत्राव्याप्तिः। स्वाविषयकप्रतीत्यविषयहेत्वादिकत्वमेव च हेत्वादिघटकत्वं **न तु** तदविषयकप्रतीतिविषयस्वत्वमपि स्वस्य स्वघटकत्ववारणाय प्रागुपात्तमत्र प्रवेशनीयमव्यावर्त्तकत्वात्। स्वस्य स्वघटकत्वेऽप्यवयवद्वयरूप-तादृशभागद्वयाघटितत्वस्य प्रत्येकं सत्त्वेन प्रागवदसम्भवाप्रसक्तेः। अवयवद्वयैकदेशद्वयेनेवावयवद्वयेनापि घटितत्वादेव समुदायविशेषस्य वारणं पुनरिष्टमेवेत्यास्तां **तावत्**। **न्यायत्वं** पुनरुचितानुपूर्वीकप्रतिज्ञादि-पञ्चकसमुदायत्वम्। व्युत्क्रमकृतप्रतिज्ञादिसमुदायेतिव्याप्तिवारणायोचितेति। तत्त्वञ्च हेत्वाद्युत्तरप्रतिज्ञादिरूपकथकसम्प्रदायविरुद्धान्यत्वं घटमानयेत्युदासीन-समुदाये गतमतः **प्रतिज्ञेत्यादि**। प्रतिज्ञाहेतुमात्रसमुदायवारणाय **पञ्चकेति**। उचितानुपूर्वीकाणि प्रतिज्ञादीनि पञ्चैव यत्रेति विग्रहादुचितानुपूर्वीकस्य प्रतिज्ञादिपञ्चघटितोदासीनवाक्यान्तरघटितसमुदायस्य वारणम्।

न्यायत्वं समुदितपञ्चक एव पर्याप्तमिति दर्शयितुं समुदायग्रहणम्। **असाधकता** साध्यीयन्यायत्वमुभयसिद्धाया व्याप्तेर्ग्राहकेणोदाहरणेनाघटितेषु चतुरवयवेष्वेव पर्याप्तमिति तु विभाव**नीयम्**। **ननु** प्रतिज्ञात्वं न्यायत्वघटितं वक्ष्यते न्यायत्वञ्च प्रतिज्ञात्वघटितमित्यन्योन्याश्रय इति **चेदु**दासीनवाक्यवारकन्यायत्वाघटितमेव प्रतिज्ञात्वादिन्यायेऽन्तर्भावनीयम्। साध्यादिविशेषनियन्त्रिताश्च प्रतिज्ञादयो वाच्या इति न विभिन्नसाध्यकादिहेत्वादिघटितसमुदायेऽतिव्याप्तिः। **इत्थञ्च** व्याप्त्यादेरिव साध्यादेरननुगमादननुगमो न्यायादेरपीष्यत एव।

तात्पर्यटीका

अत्र च घटकत्वनिरुक्तौ च। **इति** बोध्यमित्यनेनान्वयः। **अखण्डाभावेति**। सत्यन्तस्य स्वाविषयकप्रतीत्यविषयप्रतिज्ञाकत्वस्याभावात् प्रतिज्ञाहेत्वाद्येकदेशद्वयसाधारणविशिष्टभेदस्य केवलप्रतिज्ञाद्यविषयकप्रतीति-विषयस्वत्ववत्त्वाच्च तद्व्यावृत्तशुद्धभेदान्यत्वादित्यर्थः। **अस्य** उभयेत्यादि-

विशेष्यदलस्य **विशेष्यं** तदविषयकप्रतीतिविषयस्वत्वं **विशेष्यदलस्येति**। प्रवेश इत्यनुषज्यते। **ननु** सामान्यशब्दस्य विशेषपरतायां कथमन्यत्रातिप्रसङ्ग-वारणमित्याशङ्कामतिप्रसङ्गस्य सङ्कोचं दर्शयन् वारयति। **पूर्वावयवेत्यादि**। नास्य सङ्कोच इत्यनवधानशङ्कते। **न चैवं सतीति**। **एवं** सत्युभयस्योक्तविधस्य विवक्षणे सति। **परमार्थ इति** मात्रपदार्थे तद्घटकत्वांशस्य पौनरुक्त्यादनन्तर्भावं द्योतयति।

न तत्राव्याप्तिरिति। निगमनघटकस्यायमितिभागस्योपनयमात्र-घटकत्वाभावादिति भावः। **घटितत्वादेवेति**। प्रतिज्ञाहेतुरूपोभयघट-कभागद्वयाविषयकप्रतीतिविषयकत्वरूपाघटितत्वाभावादेवेत्यर्थः। **समुदाय-विशेषस्य** प्रतिज्ञाहेतुसमुदायस्य प्रतिसन्धानभेदेनायं पदस्यापि भेदान्नैकस्योभयघटकतेति मात्रार्थानन्तर्भावेऽपि नाव्याप्तिरित्यभिप्रेत्यास्तां **तावदित्युक्तम्**। उचितत्वं यदि प्रतिज्ञोत्तरहेतूत्तरेत्यादिक्रमेण निरुच्यते तर्हि **प्रति**ज्ञेत्याद्यनर्थकमत आह **तत्त्वञ्चेति**। पञ्चा**प्रवापी**त्यत्राधिकसङ्ख्या-व्यवच्छेदाप्रतीतेरा**होचितानुपूर्वीकाणीति** तथा च प्रतिज्ञादीनि पञ्चेति विधेयविशेषणतया सङ्ख्याविधावधिकसङ्ख्याव्यवच्छेदो विध्यन्यथानुप-पत्त्यैवावगम्यतेऽष्टाकपालः पुरोडाश इतिवदित्यर्थः। एतत्सूचनायैवोद्देश्यविधेय-भावप्रत्यययोग्ये विग्रहवाक्ये एवकारान्तर्भाव इति **बोध्यम्**।

पञ्चाप्रवापीत्यत्र पञ्चग्रहणं तु न्यूनसङ्ख्याव्यवच्छेदायाधिकसङ्ख्यायाः पुण्यातिशयप्रतिपादकवाक्यान्तरैकवाक्यत्वात्सप्तदशावराः सत्रमासीरन्नितिवत्। **विभिन्नसाध्यकादीति**। यथाऽयं वह्निमान् नौकाया यद् द्रव्यं तत् सद्यथा तेजो गुणव्याप्यक्रियावत्य आपस्तस्मान्मन इत्येवं रूपेत्यर्थः। **इत्थञ्च** साध्यादेर्विशेष्योपादाने च।

तर्कामृतम्

यथा, १. अयं वह्निमान् २. धूमात् ३. यो यो धूमवान् स वह्निमान् यथा महानसम् ४. वह्निव्याप्यधूमवान् अयम् ५. तस्माद् वह्निमान् इति।

चषकम्

शाब्दानुपूर्वीभेदेनार्थभेदप्रतिपत्तौ प्रसक्ता प्रतिज्ञातसाध्यव्याप्तिर्नोक्तैवेति शङ्का माऽभूदिति प्रतिज्ञादिस्थसाध्यादिबोधकशब्दसमानानुपूर्वीकशब्दप्रतिपाद्य-साध्यादिकत्वेनोदाहरणादौ विशेषिते शब्दस्यापि च भेदेन न्यायभेदोऽभ्युपगन्तव्य एव। **इत्थञ्च** तथा चायमित्युपनयादि न भवत्येवेत्यस्त्विवति मत्त्वा प्रतिज्ञाद्युदाहरति।

यथेत्यादिना। **तथा** च सूत्रं **साध्यनिर्देशः प्रतिज्ञेति**। **अस्यार्थः**। साध्यो विधेयधर्मविशिष्टो धर्मी तस्य निर्देश उद्देश्यविधेयभावेनान्वयबोधकं वाक्यमिति। तथा च विशिष्टं पक्षे विशिष्टस्य साध्यस्यान्वयबोधकं वाक्यं प्रतिज्ञेति फलितमित्याहा**यं वह्निमानिति**। **न** चायं गौश्चैत्रः पचतीदं राज्ञा इत्यादिप्रतिज्ञायामुक्तलक्षणसम्भवेऽप्ययं वह्निमानित्यत्रायं पदार्थे पर्वते वह्निपदार्थान्वितमतुबर्थसम्बन्धिन एवाभेदेन प्रकारत्वाल्लक्षणासम्भवः। **तत्र** वह्निमानेव तादात्म्येन साध्यतामिति तु न **युक्तम्**। वह्न्यादेरसाध्यतापत्तेः। बह्निव्याप्यधूमवानयमित्युपनयासङ्गतेश्चेति **वाच्यम्**। **नामार्थयोः** साक्षादेव भेदान्यबोधस्याव्युत्पन्नतया प्रकृते च मतुबर्थभेदसम्बन्धद्वारा प्रकृत्यर्थसाध्यस्य तत्रान्वये क्षतिविरहादित्याशयः।

तात्पर्यटीका

इत्थञ्चोदाहरणादावुक्तविशेषणावश्यकत्वे च। **इत्यस्त्विवति मत्त्वेति**। विषयितासम्बन्धेन पाकविशिष्टकृतिसाध्यकस्य चैत्रः पचतीति न्यायघटकोपनयस्य नव्यानामप्यनन्यगतिकतया तद्व्याप्यवांस्तद्वान्वेत्य-स्यावश्यकत्वेऽपि पर्यायान्तरेण साध्यादिप्रतिपादनमेव नेष्यते। **न तु** सर्वनाम्नाऽपि तस्माद्वह्निमानिति गमनासङ्गते**रित्थञ्च** तथा चायमित्युपनयोऽपि प्राचां सुवच एवेत्यपि नव्यतरमतमादृत्येत्यर्थः।

अत्र यथाश्रुतं साध्यबोधकशब्देऽतिव्याप्तेराहा**स्यार्थ इति**। सिद्धिकर्म साध्यं तदस्यास्तीत्यर्थेऽर्शआद्यचि विवक्षितार्थलाभ इत्याशयेन पुंस्त्वेन निर्दिशति।

साध्य इति। लक्षणासम्भव इति। लक्ष्यभेदेन लक्षणस्य भिन्नत्वादसम्भव **इत्युक्तम्। असाधकतापत्तेरिति।** प्रथमान्तपदोपस्थाप्ये पर्वते पाकानुकूलव्यापाररूप वह्नेः प्रतिपादकपच्धातुसमभिव्याहृताख्यातवशात् पदोपस्थापितस्याप्यर्थस्य संसर्गत्वे बाधकाभावेन संयोगसंसर्गेणापि प्रतिपादनं सम्भाव्य दोषान्तरमाह **वह्निव्याप्यधूमवानयमितीति।** तथा च केवलवह्नेरसाध्यत्वे तादृशोपनयासङ्गतिरिति भावः। **साक्षात्** प्रत्ययार्थमद्वारीकृत्य। **मतुबर्थभेदसम्बन्धद्वारेति** मत्त्वर्थसंयोगेनेत्यर्थः। विशेषणतावच्छेदकस्य मुख्यविशेष्ये प्रकारत्वं नानुभाविकमिति **चेन्न।** विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकस्यापि मुख्यविशेष्ये प्रकारत्वाभ्युपगमात्। **न च** तस्य निर्देश इत्यस्य पक्षतावच्छेदकावच्छिन्नेऽभेदान्वयबोधकमित्यर्थेनासम्भव इति **वाच्यम्।** अयं गौश्चैत्रः पचतीदं राज्ञ इत्यादावसम्भवादयं गौरित्यत्रापि पृथिवीतरभिन्नेत्यादाविव साध्यधर्मिणोऽभेदाबाधादत एवाशय **इत्युक्तम्।**

चषकम्

उदाहरणाच्च साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानं न पक्षतावच्छेदकविशिष्ट इति तद्व्युदासः। न च पक्षतावच्छेदकस्यैव धूमस्य हेतुत्वे पक्षे तत्रातिव्याप्तिर्दुर्वारैवेति **वाच्यम्।** पक्षतावच्छेदके धर्मितावच्छेदकत्वस्य पर्याप्तेर्विवक्षणात्। उदाहरणजन्यबोधीय-धर्मितावच्छेदकतायाश्च धूमवन्महानसत्व एव पर्याप्ततयाऽतिप्रसङ्गविरहात्। मेयसाध्यकधूमहेतुकोपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमिति तद्व्युदासः। **न च** साध्यस्यापि हेतुत्वसम्भवात्तत्रातिव्याप्तिर्दुर्वारैवेति **वाच्यम्।** सिषाधयिषया न्यायप्रयोगानङ्गीकारेणैतल्लक्षणाभिधानात्। निगमनं चायं यदानुषङ्गो नास्तीति साध्यतावच्छेदके विधेयतावच्छेदकत्वपर्याप्तेरविवक्षणेऽपि न क्षतिः। **न्यायावयवत्वे सतीति** विशेषणाच्च नोपनयस्थायमादि-निगमनान्तभागेऽतिव्याप्तिर**न्यथा** न्यायान्तर्गते सदाशिवः पूज्य इति प्रतिज्ञाया एकदेशे शिवः पूज्य इतिभागेऽतिव्याप्तेः। **यदि** च शिवसदाशिवपदाद्योर्न पर्यायतानुमन्यते।

तदा नेडमूकोन्नपात्रं क्षुधित्वादित्यस्याः प्रतिज्ञाया एडमूकोन्नपात्रमित्येकदेशेऽतिव्याप्तेर्दुर्वारत्वादेडमूकानेडमूकशब्दयोः पर्यायतायामविवादादि**त्यतो**ऽवयवाघटकन्यायान्तर्गतत्वविवक्षायां तु सिषाधयिषया न्यायप्रयोगसत्त्वेऽपि न दोषः। तथासत्यमादिनिगमनान्तभागवारणार्थमवश्यकर्त्तव्येन साध्यतावच्छेदके विधेयतावच्छेदकत्वपर्याप्तिनिवेशेनैव सामञ्जस्यात्। **यद्वे**तरार्थान्वितस्वार्थबोधजनकत्वे स्वीयं यतन्त्यपदभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे च सति न्यायावयवत्वं प्रतिज्ञात्वम्। उदाहरणवारणाय प्रथमं **सत्यन्तम्**। हेत्वादिवारणाय **द्वितीयम्**। **तत्र** को वह्निमानित्यस्यान्त्यत्वेन पर्वतदस्याप्यन्त्यपदत्वादन्त्यपदत्वावच्छिन्नभिन्नपदाप्रसिद्धेस्तत्प्रतियोगिकभेदस्यायमादिपदेऽतिप्रसक्तत्वाच्च **स्वीयमिति**। तथाचान्त्यपदे स्वीयत्व**विशेषणे** न स्वीयान्त्यपदत्वावच्छिन्नभेदविवक्षयाऽप्रसिद्ध्युपनययोर्व्यावृत्तिः। **इत्थमेव** स्वीयान्त्यपदभिन्नोपनयस्थायं पदार्थविशेष्कबोधजनकस्य **निगमनस्यापि**।

तात्पर्यटीका

न साध्यतावच्छेदकेत्यादि। वस्तुतो धूमस्य साध्यत्वेऽपि धूमत्वस्य साध्यतावच्छेदकत्वादिति भावः। **नन्वयं** तस्माद्वह्निमानित्यत्रातिव्याप्तिवारणाय साध्यतावच्छेदेके विधेयतावच्छेदकतापर्याप्तिविवक्षाया आवश्यकत्वात्तेनैव वह्निव्याप्यवह्निमान् पर्वत इत्युपनयवारणसम्भवे सिषाधयिषया न्यायप्रयोगानङ्गीकारपक्षाश्रयणं व्यर्थमित्यत आह। **निगमने चेति**। नन्वयमादिनिगमनान्तभागवारणायैव साध्यतावच्छेदकेविधेयतावच्छेदकतापर्याप्तिविवक्षावश्यकीत्यत **आह**। **न्यायावयवत्त्वे सतीति विशेषणाच्चेति**। अन्यथोदासीनवाक्यवारकन्यायान्तर्गतत्वस्यैवादरे। **न पर्यायतेति** न समानार्थकतेत्यर्थः। **सदा**पदेन सार्वदिक्त्वरूपाधिकार्थप्रत्ययादेवं रमेश्वर इत्यादावपि रमाशब्देन क्रीडाकर्त्र्यभिधानादिति भावः।

अनेडमूक इति। अत्र योगाविशेषेऽप्यसौ न रूढिसमानाधिकरण इति तदर्थके न्यायानन्तर्गतैव स्यादिति भावः। **इति** एवं रूपन्यायघटिकायाः। अविवादादिति। अयमर्थः एडमूकः स्मृतो धीरैः शठे वाक्श्रुतिवर्जितेऽनेडमूक उद्दिष्टः शठे वाक्श्रुतिवर्जिते इति कोशाभ्यां पर्यायताया एवावगतेः। इत्यत

एवं प्रदर्शितातिव्याप्तेस्तामुद्धर्त्तुमिति यावत्। **अवयवा**घटकन्यायान्तर्गतत्व-विवक्षायामवयवाघटकत्वे सति न्यायान्तर्गतत्वे सतीति सत्यं तद्वयविवक्षायाम्। **न** दोषो नोक्तोपनयेऽप्यतिव्याप्तिः। **तथा** सति निरुक्तसत्यन्तद्वयविवक्षणे कृते सति। **अयमादीति।** तस्यावयवाघटकत्वान्न्यायान्तर्गतत्वान्नेति भावः। **सामञ्ज**स्यादुक्तोपनयप्रतिज्ञैकदेशायमादिनिगमनान्तभागेष्वनतिप्रसङ्गादेव निर्दुष्ट-त्वात्। लाघवाल्लक्षणान्तरमाह। **यद्वेति। तत्र** द्वितीयसत्यन्ते। अस्तु तर्हि प्रतियोगिकोटावेव स्वीयत्वमित्याशङ्क्याहे**त्थमेवेति। यथा**यंपदस्यात्यन्त-प्रतियोगिकभेदवत्त्वात् प्रसक्त्युपनयातिप्रसङ्ग प्रतियोगिकोटिप्रविष्टस्वीयत्वेन वार्यते **तथा**नुयोगिप्रविष्टस्वीयत्वेनैवेत्यर्थः। **निगमनस्यापी**त्यनन्तरं व्यावृत्ति-रित्यनुषज्यते। तथा चानुयोगिन्यपि तदावश्यकमित्यर्थः।

चषकम्

इत्थञ्च मदीयं गोभिन्नं ग्राह्यमित्यत्र मदीयगोरिवान्यदीयगोः प्रतिषेधाप्रत्ययात् प्रतियोगिन्यपि स्वीयत्वान्वयो व्युत्पन्न इति नोक्तदोषः। **पदञ्च** विभक्त्यन्तमिति न सुबन्तमतुबर्थविशेष्यकान्वयबोधजनके निगमने-ऽतिव्याप्तितावदस्थ्यम्। **न वा** विभक्त्यन्तरूपान्त्यपदात्मकभिद्धातुभिन्ना-ख्यातार्थविशेष्यकान्वयबोधजनके। **ननु** तस्मान्नेतराणीति निगमनेऽतिव्याप्ति-स्तस्यानन्त्यनञ्पदार्थविशेष्यकबोधजनकत्वात्। **न च** नञ्पदं न विभक्त्यन्तमिति नातिव्याप्तिरिति **वाच्यम्**। तथा सति दधि प्रमेयमिति प्रतिज्ञायामव्याप्तेरिति **चेन्न**। यज्जातीयपदस्यान्ते कदाचिद्विभक्तेः श्रूयमाणत्वं तत्त्वस्योक्तत्वान्नहि क्वचिदपि नञः श्रूयमाणविभक्तिकत्वम्। दधिपदञ्च श्रूयमाणतृतीयादि-विभक्तिजातीयमेव। स्वः प्रमेयमित्यादि च प्रतिज्ञानेष्यत एवेत्यन्यत्र विस्तरः।

ननु प्रतिज्ञा न साधनाङ्गं विप्रतिपत्तेः पक्षे साध्यग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्यैव प्राथम्यादिति **चेन्न**। यतो विप्रतिपत्त्यग्रे समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनो वाऽकाङ्क्षायां शब्दानित्यत्वं साध्यं लिङ्गेन। **न चेदानीं** साध्यनिर्देशं विना हेतुवाक्यं निरनुयोगिकमन्वयं बोधयितुमीष्टे **तस्मात्** साध्याभिधानं विना न हेतोराकाङ्क्षा न वाऽन्वयबोधकत्वमिति **प्रतिज्ञा साधनाङ्गम्**। साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां साधनताव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचित**मन्यथा**

नाकाङ्क्षाभिधाने निग्रहाल्लोके तथैवाकाङ्क्षानिवृत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यास इत्याह। **धूमादिति।**

तात्पर्यटीका

कुतस्तर्ह्यनुयोगिमात्रविशेषणतया तन्निर्दिष्टमित्याशङ्क्याहे**त्थेञ्चेति। प्रतिषेधाप्रत्ययादिति।** गोभिन्नेमदीयत्वान्वये मदीयसमुदायान्तर्गताया एव गोः प्रत्ययस्यानुभविकत्वा**दन्यथा** गोभिन्नेत्यस्यानर्थक्यापत्तेर्गवि **मदीय**त्वानवगमादिति भावः। **व्युत्पन्न इति।** तथा च तत्र स्थितस्यैवोभयसाकाङ्क्षत्वमिति तथोक्तमिति भावः। **नोक्तदोषः** प्रतियोगिनि स्वीयत्वाभावेप्रसिद्ध्युपनयातिप्रसक्ती प्रसज्येते यथाविवक्षमनुयोगिनि तदभावे तु निगमनेऽतिप्रसक्तिः। **सुबन्तेति।** स्वीयान्त्यसुप्पदभिन्नमतुप्पदार्थविशेष्यकेत्यर्थः। **अन्वयबोधजनक इति।** निगमनेऽतिव्याप्तितादवस्थ्यमित्यनेनान्वयः। **न हीति।** तथा च नञो विभक्त्यन्तत्वाभावान्नातिव्याप्तिरित्यर्थः। अव्याप्तिं वारयति। **दधिपदञ्चेति। तृतीया**दीत्यादिना चतुर्थ्यादिपरिग्रहः। तुल्यन्यायात् स्वःपदस्यापि न विभक्त्यन्तत्वमित्यव्याप्तिमाशङ्क्याह। **स्वः** प्रमेयमित्यादि चेति। एडमूकोऽन्नपात्रमित्येकदेशस्यानेडमूकोन्नपात्रमितिन्यायान्तर्गतस्य वारणाय **न्याया**वयवत्वपर्यन्तमिति।

स्व प्रमेयमिति प्रतिज्ञाया लक्ष्यत्वे तदर्थविशेष्यकेत्यत्र मुख्यविशेष्यता वाच्या**ऽन्यथो**पनयातिव्याप्तेस्तथा चाव्ययस्य विभक्त्यन्तत्वेऽप्युपनयैकवाक्यतया बोधे नञर्थस्य प्रकारत्वाद्वारणं **यत्र** च नैतादृशबोधफलोपधानं श्रोतृदौर्बल्या**त्तत्रापि** तत्प्रयोजकाकाङ्क्षारूपा तादृशबोधस्वरूपयोग्यताक्षतैव। तदर्थप्रकारकबोधप्रयोजकाकाङ्क्षाशून्यत्वेनापि वाक्यस्य विशेषणीयत्वात्। **यत्रापि** नोक्ताकाङ्क्षा तस्य न्यायानन्तर्गतस्य तस्मान्नेतराणीति निगमनस्य न्यायावयवत्वेनैव वारणमिति स्वःपदस्य च पक्षनिर्देशरूपस्योक्ताऽकाङ्क्षापि नेति तदर्थस्य मुख्यविशेष्यत्वमनपायीति तस्याः स्वः प्रमेयमिति प्रतिज्ञायाः सङ्ग्रहोऽपि सुकर इति च मनसि कृत्या**हान्यत्र विस्तर इति। साध**नाङ्गन्यायघटिका। **समय**बन्धो विधिकोटिस्त्वया ग्राह्या मया निषेधकोटिरिति सदृष्टान्तमेवोदाहरणं प्रयोज्यमित्यादिश्च सङ्केतः। **इदानीं** बाधाकाङ्क्षायाम्। **अन्यथोक्तवचनादरे।** अनाकाङ्क्षाभिधानं धूमवानित्यादि प्रथमान्तप्रयोगे।

हेतुप्रयोगे कुतो न हेत्वाकाङ्क्षा निवृत्तिरत आह **लोक इति**। **तथैव** यद्धर्मावच्छिन्ने जिज्ञासितस्यान्वयः प्रश्नवाक्याद्भवति तद्धर्मावच्छिन्ने जिज्ञासितत्वव्याप्यधर्मावच्छिन्नान्वयबोधेनैव।

चषकम्

तत्त्वञ्च हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वम्। न च निगमनेऽतिव्याप्तिरिति **वाच्यम्**। विभक्त्यर्थहेतुत्वविशेष्यकान्वयबोधजनकत्वस्य तदर्थत्वात्। **न च** सुबर्थसङ्ख्यायाः प्रकृत्यर्थे विशेषणतयैव भानात् कथं विभक्त्यर्थहेतुत्वविशेष्कत्वमिति **वाच्यम्**। सङ्ख्यातिरिक्तसुबर्थस्य प्रकृत्यर्थ-विशेष्यतानियमा**दन्यथा** विभक्त्यर्थप्रकारेण प्रकृत्यर्थस्य विक्त्यर्थघटित-भेदसम्बन्धेन नामार्थेऽन्वयस्याऽव्युत्पन्नत्वाच्चैत्रस्येदमित्यादिप्रयोगानुपपत्तेः। पृथिवीतरेभ्यो भिद्यते गन्धादित्यत्र हेतुत्वान्वितप्रकृत्यर्थस्य क्रियायां यथोक्त-सम्बन्धेनान्वयानुपपत्तेश्च। **अत एव** सम्बुद्ध्यर्थस्यापि प्रकृत्यर्थ विशेषणतयैव **भानमिच्छन्ति**। हेतुत्वं प्रमेयमिति प्रतिज्ञावारणाय **विभक्त्यर्थेति**। **न चे**दमपि हेतुत्वं विभक्त्यर्थ एवेति कथमतिव्याप्तिवारणमिति **वाच्यम्**। विभक्ति-जन्योपस्थितिसहकारेण तादृशबोधजन्यत्वस्य लाभात्। तस्मादितरेभ्यो भिद्यते इत्यादि निगमनवारणाय **हेतुत्वेति विशेष्येति च**। **अन्यथा** तज्जन्यबोधस्य तिङ्विभक्त्यर्थाश्रयत्वविशेष्यकत्वात्तस्मादिति पञ्चम्यर्थहेतुत्वविषय-कत्वाच्चातिव्याप्तेरवारणात्।

अनेडमूकादिति हेत्वैकदेशस्यैडमूकादित्यस्य वारणाय **न्यायावयवत्वपर्यन्तम्**। **ननु तथा**पि वह्निपक्षकधूमज्ञापकत्वसाध्यक-वह्निर्धूमादितिप्रतिज्ञास्थलीये तस्माद्धूमादिति निगमनेऽतिव्याप्तिर्विभक्त्यर्थहेतुत्व-विशेष्यकान्वयबोधजनकत्वादिति **चेन्न**। धूमादिनिष्ठज्ञापकताया वह्निरूपपक्षावृत्तित्वान्निरूपकत्वात्मकवृत्यनियामकसम्बन्धस्याभावप्रतियोगितान-वच्छेदकत्वे पक्षधर्महेत्वव्यापकत्वाच्च। **ज्ञाप्यत्वस्य** पञ्चम्यर्थत्वेऽपि सम्प्रदायविरोधेन तथा प्रतिज्ञाद्यसिद्धेः। **यद्वा** विशिष्टबोधजनको यः स्वार्थविशिष्टबोधस्तज्जनकन्यायावयवत्वं हेतुत्वम्। **अत्र** तस्मादिति निगमनैकदेशार्थविशिष्टबोधस्य तज्ज्ञानज्ञाप्यो वह्निरित्यस्य तज्ज्ञानज्ञाप्यवह्निसम्बन्धीति विशिष्टबोधजनकत्वान्न्यायावयवत्वमुपात्तमिति

स्वपदस्य न्यायावयवपरतया लाभान्न क्वाप्येकदेशेऽतिव्याप्तिरिति **बोध्यम्**। वह्निर्धूमज्ञानज्ञाप्य इति स्वार्थविशिष्टबोधस्य हेतुवाक्याधीनस्य धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वत इति विशिष्टबोधजनकत्वाल्लक्षणसमन्वयः।

तात्पर्यटीका

भानादिति। घट इत्यत एकत्ववान् घट इत्यन्वयबोधादित्यर्थः। **अन्यथा** विभक्त्यन्तरार्थस्यापि विशेषणतयैव भाने। **विभक्त्यर्थप्रकारेण** प्रकृत्यर्थस्य स्वामित्वाश्रयचैत्रस्य। **विभ**क्त्यर्थघटितभेदसम्बन्धेन स्ववृत्तिस्वामित्वनिरूपकत्वसम्बन्धेन। **अव्युत्पन्नत्वात्** कर्म गच्छतीत्यादाविव नैराकाङ्क्ष्यस्यौचित्या**देवमग्रेऽपि**। एतावतापि विभक्त्यर्थहेतुत्वस्य विशेष्यत्वं नोक्तमेवेति मन्यमानं स्थूलदर्शिनं प्रति विशिष्य तस्य विशेष्यत्वं दर्शयितुकामः प्रातिपदिकार्थयोरिव धातुप्रातिपदिकार्थयोरप्यन्वयानुपपत्तिमाह **पृथिवीति**। **हेतुत्वेति**। गन्धादिति हेतुवाक्यार्थस्येत्यर्थः **अन्वयानुपपत्तेरिति**। अत्र क्रियाया विशेष्यस्याख्यातार्थाश्रयत्वस्य विशेषणतया पृथिव्यामन्वयोऽनुभवसिद्ध इति **वक्ष्यत्यग्रे**। **अत एव** प्रकृत्यर्थस्य नामार्थक्रिययोरन्वयघटनायैव विभक्त्यर्थविशेष्यत्वनियमस्याङ्गीकारादेव। **अन्यथा** द्वयोरेकतरस्याप्यनुपादाने।

निगमने प्रकृतहेतुज्ञानज्ञाप्यधूमनिष्ठं ज्ञापकत्वमित्यन्वयबोधजनके। **पक्षावृत्तित्वादिति**। **ननु** निरूपकतासम्बन्धेन साध्यतायां नैष दोष इत्यत आह। **निरूपकत्वेति**। पक्षावृत्तित्वादव्यापकत्वाच्चेति द्वयं सम्प्रदायविरोधेनेतिवदसिद्धौ हेतुः। तथा सम्प्रदायमनुरुन्धानमुक्तातिव्याप्तिं मन्वानं प्रति तुष्यत्विति न्यायेन लक्षणान्तरमाह। यद्वेति। स्वतः प्रसक्तनिगमनैकदेशातिप्रसङ्गवारणायावश्यकर्त्तव्येन न्यायावयवत्वेन निगमनस्येव प्रकृते हेत्वर्थविशिष्टबोधस्यैव हेत्वेकदेशार्थविशिष्टबोधत्वेनावयवान्तरैकवाक्यतया प्रसक्तस्य पूर्वोक्तहेतोरेकदेशेऽतिप्रसङ्गस्यापि वारणं न्यायान्तर्गतत्वेन तयोरवारणादिति दर्शयति। **अत्रेति**।

चषकम्

धूमज्ञानज्ञाप्यवह्निमदभिन्नो वह्निव्याप्यधूमवदभिन्नः पर्वत इत्याकारकस्योपनयसहकारेण निगमनजन्यस्वार्थविशिष्टबोधस्य विशिष्टबोध-

जनकत्वाभावान्न तत्रातिव्याप्तिः। **अत्यन्ताभावाप्रतियोगिसाध्यसमानाधिकरण-पक्षसपक्षसद्धेतुवचनं** केवलान्वयि। **पक्षवृत्तित्वे** सति विपक्षावृत्तिर्यो प्रतीतसाध्यान्वयो हेतुस्तद्वचनं केवलव्यतिरेकि। **पक्षवृत्तित्वे** सति सपक्षवृत्तित्वे सति विपक्षावृत्तिर्यो हेतुस्द्वचनमन्वयव्यतिरेकीति विशेषलक्षणानि। कथायां धूमादित्येव प्रयोक्तव्यं **न तु** धूमवत्त्वादिति मतुपो व्यर्थत्वादिति **बोध्यम्**। **यत्तु** शब्देऽनित्यत्वे साध्ये सामान्यवत्त्वे सति बाह्यकरणप्रत्यक्षत्वादित्यपार्थकम्। विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभक्त्यन्तरावरुद्धस्यानन्वयादिति। **तन्न**। सत इत्यध्याहारसापेक्ष (यस्य च तावेन भावलक्षणम् अत एव अध्यहारसापेक्ष) सतिसप्तमीबलात् सामान्यवत्त्वस्य बाह्यकरणप्रत्यक्षत्वे दैशिकसामानाधिकरण्योपस्थितौ विशिष्टस्य हेतुत्वान्वयान्नामार्थयोः साक्षादेव भेदान्वयबोधस्याव्युत्पत्तेः प्रकृते दैशिकसामानाधिकरण्यस्यापि संसर्गविधया सप्तम्या बोधनसम्भवात्।

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षयां व्याप्तिपक्षधर्मतयो-रुपदर्शनप्राप्तौ व्याप्तेर्विशेषणत्वेन प्रथममुपस्थिताया जिज्ञासावश्यम्भावात् **किम्वा** कथमस्येत्यस्य किम्प्रकारकज्ञानविषयस्यास्येत्यर्थाद्व्याप्तेरेवासौ प्रश्नस्तस्माच्च तत् प्रदर्शनायोदाहरणमित्याह। **यो यो धूमवान् स वह्निमान् यथा महानसमिति**। **तत्त्वञ्च** द्विरुक्तसमभिव्याहृतपदबोध्ये व्याप्यत्वाभिमत-हेतुसाध्याभावसम्बन्धिनि व्यापकत्वाभिमतसाध्यहेत्वभावयोर्व्यापकत्वविशिष्टयोः सम्बन्धबोधकवाक्यत्वम्। व्याप्तिघटकसामानाधिकरणयविशिष्टबोधकोप-नयवारणाय **द्विरुक्तेत्यादि**। वह्निपदस्य धूमव्यापकवह्नौ लक्षणायां तात्पर्य-ग्रहोपक्षीणस्य यत्पदादेरर्थाविवक्षणात्तत्रापि **समभिव्याहृतेति**। उदासीनवाक्य-वारणाय वाक्यत्वं न्यायावयवत्वार्थ**कम्**। तेन न समयबन्धविशेषाधीनस्य दृष्टान्तसहितोदाहरणस्य सर्वस्यैव न्यायान्तर्गतस्यैकदेशे दृष्टान्तरहितभागे **न वा** तादृशसमयबन्धविशेषानधीनस्य दृष्टान्तरहितस्यैवोदाहरणस्य न्यायान्तर्गतस्य यद्यदात्मज्ञानकरणं **तद्धृ**दयमित्यस्यैकदेशे यद्यदात्मज्ञानकरणं तद्धृदित्य-त्रातिव्याप्तिः। साध्यसाधनसम्बन्धबोधकत्वेन साध्यसाधनाभावसम्बन्धबोधकत्वेन च घटितं निरुक्तमेव विशेषलक्षणद्वयम्।

तात्पर्यटीका

विशिष्टबोधजनक इत्यस्य प्रयोजनमाह। **धूमेति**। **उपनयसहाकारेणेति**। इदं चोपनयस्थायं पदस्य निगमनेऽननुषङ्गेऽनुषङ्गे तु नैराकाङ्क्ष्यान्न सम्भूयैकार्थबोधकत्वं **तदैतदुक्तं कथञ्चिदुपनयनिगमनयोरिति**। तत्र चाबाधितत्वबोधोपयोगितायाऽनुषङ्गपक्षो मुख्यस्तच्चाग्रे प्रपञ्चयिष्यामोऽननुषङ्गपक्षस्तु गौड इति सूचयितुं कथञ्चिदित्युक्तम्। **कथायां** जल्पकथायां वादकथायां शिष्यस्य पक्षधर्मताबुबोधयिषया मतुबादिप्रयोग इष्ट एवेति **बोध्यम्**। **व्यर्थत्वादिति**। पक्षधर्मताया इदानीमनाकाङ्क्षितत्वादित्याशयः। **अपार्थकं** निश्चिताऽनन्वितार्थकम्। **दैशि**कसामानाधिकरण्योपस्थितावित्य-संसर्गाग्रहपर्यन्तमपरम्। सति सत इत्यर्थस्य हेतुघटकत्वे धूमवत्त्वादित्यत्रैव वैयर्थ्यं स्यादिति हेतुं परिष्करोति। **विशिष्टस्येति**। **स्पष्टम्**।

जिज्ञासावश्यम्भावादिति ल्यब्लोपे पञ्चमी प्रथममिति चात्राप्यनुवर्त्तते। तथा च जिज्ञासाप्राथम्यावश्यम्भावं मत्त्वेत्यर्थः। **जिज्ञासा**द्वयकल्पने गौरवादाह**किम्वेति**। **हेतुसाध्याभावेति**। हेतुश्च साध्याभावश्चेत्यर्थः। **साध्यहेत्वभावयोरिति**। साध्यञ्च हेत्वभावश्च तयोरित्यर्थः। **व्याप्तिघटकेति**। धूमे वह्न्यधिकरणवृत्तित्वावगमे धूमाधिकरणे वह्न्यधिकरणत्वस्याप्यधिकन्त्विति न्यायेनावगमादित्यर्थः। **तदुक्तम्**। व्याप्तिभावे सामान्यतोऽपि पक्षे वह्निमत्त्वभानादिति। दृष्टान्तरहितभागस्यैव लक्ष्यत्वे नोक्तातिव्याप्तिरतः स्थलान्तरेऽतिव्याप्तिं दर्शयति। **न वेति**। न्यायान्तर्गतत्वेन वारणमस्य न भवतीति दर्शयति **न्यायान्तर्गतस्येति**। **साध्यसाधनाभावसम्बन्धेति**। साध्यञ्च साधनञ्च तयोर्याविभावौ तयोः सम्बन्धेत्यर्थः।

चषकम्

चैत्रो जानाति कर्त्तृत्वादित्यस्य यो यः करोति स जानातीत्युदाहरणे आश्रयबोधकपदाभावेनान्वयापत्ते**र्यत्त**दर्थविवक्षायां त्वनयोः परस्परमनाका-ङ्क्षत्वेनान्वयादे**वेतरा**नन्वितस्वार्थबोधकन्यायावयवत्वमुदाहरणत्वमित्येव **तत्त्वम्**। **यत्तु** न्यायावयवदृष्टान्तवचनमुदाहरणमिति। **तन्न**। दृष्टान्तप्रयोगस्य

सदृष्टान्तोपन्याससमयनिबन्धनत्वेनासार्वत्रिकत्वात्। **न च** साध्यपदस्य व्यापकत्वविशिष्टसाध्यलक्षणायां दृष्टान्तस्तात्पर्यग्राहक इति सार्वत्रिक एवेति **वाच्यम्**। वीप्साया एव तथात्वेन यो यो धूमवान् स वह्निमानित्यत एव व्याप्तिप्रतीतेः। **न्यायाचार्यास्तु** सहचारमात्रप्रदर्शकमुदाहरणं तथा च वीप्सां विना सकलधूमाधिकरणे वह्निमत्त्वाबोधनादधिकरणान्तरे व्यभिचारशङ्का स्यादिति वीप्सामावश्यकीमनु**मन्यन्ते**। तत्र **मणिकृतः**। इदं प्रमेयं द्रव्याभिन्नं वा गगनत्वादित्यत्रैवं सति वीप्सानावश्यकतापत्तेः साध्यस्याभावाप्रसिद्ध्या हेतोरधिकरणान्तराभावेन च तत्र व्यभिचारशङ्काप्रसक्त्यभावेनैव सर्वत्र हेत्वधिकरणे साध्यवत्त्वबोधनानपेक्षणात्।

सहचारग्रहस्य ग्राह्याभावानवगाहिनो व्यभिचारशङ्काविरोधित्वाभावाच्च। **न** चैवं तत्पदे वीप्सा तव मते न स्यादेकत्र वीप्सयैव तात्पर्यग्रहा**न्मम** तु विरूपोपस्थितयोर्द्वयोः परामर्शार्थं यच्छब्दवत्तच्छब्देऽपि द्विरुक्तिरावश्यकी सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति व्युत्पत्तेरिति **वाच्यम्**। इष्टत्वात्। **किञ्च** विरूपोपस्थितियोरपि तदा परामर्शसम्भवाद्बुद्धिस्थवाचकत्वात्। **'यद्यत् पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे'** इतिवदिति न व्युत्पत्तिविरोधोऽपि। **तदुक्तम्**। इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादिति स्थूलसूक्ष्माकृतिसाक्ष्यसाक्षिप्रत्यक्षपरोक्षबुद्धिचतुष्टयविषयः पदचतुष्टयवाच्य इति तस्यार्थः। **इदमुपलक्षणम्**। साक्षात्परम्परातो वा स्वार्थस्य च विशेष्यमर्थो यः। समभिव्याहृतधातोः कारकमपि यः स एष च स्वार्थः। स्वव्यापकसामानाधिकरण्यं धूमस्येत्यत्र स्वरूपेऽस्तीतिकारकमध्याहृतं स्वार्थः।

तात्पर्यटीका

यत्तदर्थाविवक्षायां यो यो धूमवानित्यादौ धूमवान् धूमव्यापकवह्निमानिति बोधसम्भावाच्चैत्रो जानातीत्येतावत् **पर्यन्तम्**। **आश्रयबोधकपदाभावेनेति**। यत्तदर्थाविवक्षायामाख्यातसाकाङ्क्षप्रथमान्तपदाभावेनेत्यर्थः। **यत्तदर्थविवक्षायां त्विति**।अत्राऽप्याख्यातार्थधर्मितावच्छेदककोऽपि बोधो न भवत्येव पचति चैत्रः सुन्दर इत्यप्रयोगादित्याहा**नयोरिति**। यत्तदर्थयोरित्यर्थः। **अना**काङ्क्षत्वेने-

त्याख्यातार्थधर्मितावच्छेदककबोधानङ्गीकारेण तादृशशाब्दबोधौपयिका-काङ्क्षायास्तयोरकल्पनेनेत्यर्थः। यो यो धूमवानित्यत्रापि यदर्थयोः पक्षदृष्टान्तयोरभेदस्य बाधितत्वेन तच्छब्दार्थान्वयबाधेऽपि महानसं धूमवन्महानसं वह्निमदित्यत्रेव यत्तदोरनाकाङ्क्षत्वेनेत्येवार्थः। **अनन्वयादेवेति** उदाहरणार्थचतुष्टयस्यापि परस्परमन्वयबोधानुदयादेवेत्यर्थः। तथा च पूर्वोक्तलक्षणाव्याप्तं **'यस्य न स्वजने प्रीतिः का वा तस्य परे जने'** इति न्यायेनैवेदं लक्षणं ध्रुवमित्येवकारार्थः। **इतरेति**। अवयवान्तराद्येत्यर्थः। **स्वार्थः** स्वघटकवाक्यार्थः। स वह्निमानित्याद्येकदेशस्य न्यायान्तर्गतस्य वारणाय न्यायावयवत्वपर्यन्तम्। **न च** दृष्टान्तरहितभागे न्यायावयवत्वाभावादव्याप्तिरिति वाच्यम्। तस्यालक्ष्यत्वाल्लक्ष्यत्वं तावत एव न्यायावयवत्वाद्यतः **प्राग्व**न्मतभेदेनात्रापि **लक्षण**तावयवत्वव्यवस्थाया उक्तरीत्याभ्युपगमोऽस्त्येव।

मास्त्वभावं प्रतियोगिनां भ्रमोऽभ्युपगम्यतां तर्ह्युदाहरणाघटितस्तत्र न्यायः प्रकृते तु वस्तुतोऽस्याधिकरणान्तरायेऽप्यधिकरणान्तरे गगनत्वस्य भ्रमसम्भवं नावश्यं व्यतिरेकिसाध्येऽत्रापि वीप्सार्थवतीत्याशङ्कमानं प्रत्याह **सहचारग्रहस्येति**। **एवं** वीप्सायास्तात्पर्यग्राहकत्वं। **ननु** तवाप्येकस्यैव महानसस्यैकेन यच्छब्देन परामर्शसम्भवेऽपि कथं बहूनां महानसान्यधूमवतामेकेन यच्छब्देनोपस्थितिः। **एक**धर्मावच्छिन्नं बोधयतीति तदर्थादिति **चेन्म**यापीदं सुवचमित्याह। **किञ्चेति** तदा तच्छब्देन कथं सुवचन्तदाह। **बुद्धिस्थेति**। **इतिवदिति**। अन्यथा तद्विरोधः स्यादिति भावः। **न व्युत्पत्तिविरोधोऽपीति**। बुद्धिस्थत्वरूपैकधर्मावच्छिन्नस्यैव महानसमहानसान्ययावद्धूमवतोर्द्वयस्यापि बोधादित्याशयः। **सैष दाशरथी राम** इत्यादौ तदेतच्छब्दयोः सहप्रयोगदर्शनादर्थभेदं प्रपञ्चयितुमुपक्रमते। **तदुक्तमिति**। **स्थूलसूक्ष्मेत्यादि**। स्थूला च सूक्ष्मा च ये आकृती तयोः साक्षिणी तदन्या च याः प्रत्यक्षाः परोक्षाश्च बुद्धयस्तासामित्यर्थः। परोक्षबुद्धिविषये तच्छब्दस्याकृत्य-ग्राहकप्रत्यक्षविषयेऽदसः सूक्ष्माकृतिग्राहकप्रत्यक्षविषय एतदः। स्थूलाकृतिग्राहकप्रत्यक्षविषये त्विदमः शक्तिरित्यर्थः। **धातोः** कारकं धात्वर्थान्वयि। **स्वार्थः** स्वशब्दस्यार्थः। स्वाधिकरणावृत्तिसाध्याभावको धूमश्चैत्रः स्वं पश्यति **चैत्रेण** स्वपुत्रो दृश्यत इत्यादौ यथा धूमचैत्राद्यनेक**विधस्यापि** तथात्वमुपपादयति। **स्वेति**।

चषकम्

तथा जिज्ञास्यं किं बोध्यं सर्वादेर्व्यापको बोध्यः। युष्मत्तः सम्बोध्यः स्वतन्त्रवक्तास्मदो बोध्य इत्यपि **बोध्यम्**। **कथं** तर्हि–

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिम्वरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपाल॥

इत्यत्र तत्पदे वीप्सेति **चेद**व्यग्रचित्तो भव। यत्र व्यापकतायां कस्यचित्पदस्य तात्पर्यग्रहोपक्षीणा सा तत्र तत्पदे वीप्सोक्त युक्त्या व्यर्थैव **यत्र** च वक्तुः प्रागुपस्थितयावदर्थानां कथञ्चित् परामर्शस्य विवक्षा तत्राप्यसौ नावश्यकी। वैरूप्येण परामर्शस्य विवक्षायां द्विरुक्तेरावश्यकतां तु न वारयामः। अन्यथा प्रत्येकातिक्रमसमनन्तरमेव प्रत्येकं वैवर्ण्यस्य प्राप्तिरिति सर्वानुभवसिद्धस्य शाब्दबोधस्यानुपपत्तेरिति **सम्प्रदायः**। **उदा**हरणानन्तरं भवतु व्याप्तिस्तथापि व्याप्तं किं पक्षे वर्तते नवेत्याकाङ्क्षायां व्याप्तस्य पक्षधर्मत्वोपदर्शनायोपनय इत्याह। **वह्निव्याप्यधूमवानयमिति तत्त्वं** च प्रकृतसाध्यानुमित्यौपयिकव्याप्तिविशिष्टप्रकृतहेतुप्रकारकपक्षविशेष्यकशाब्द-बोधजनकत्वे सति न्यायावयवत्वम्।

अन्वयव्यतिरेक्युपनयद्वयसङ्ग्रहायौपयिकान्तं **व्याप्तिविशेषणम्**। मेयहेतुकवाच्यत्वव्याप्यमेयसाध्यकप्रतिज्ञावारणायाद्यं **प्रकृतेति**। धूमाभाव-साध्यकधूमाभावव्याप्वह्न्यभाववदभावतादात्म्यहेतुकहेतुवारणाय **द्वितीयम्**। न्यायान्तर्गतस्य प्रमाणव्यवहारविषयत्वव्याप्यात्मज्ञानकरणत्ववद्हृदयमित्युपन-यैकदेशयस्य हृदित्यन्तस्य वारणाय न्यायावयवत्व**पर्यन्तम्**। पदान्तरव्यावृत्तिः पूर्ववदुन्नेया। **यद्वा** स्वार्थ विशेष्यकेतरार्थान्वयबोधजनकन्यायावयवत्व-मुपनयत्वम्। **अत्र** न्यायावयवत्वं व्याख्यातार्थम्। **तथा हि**। प्रतिज्ञाजन्योऽपि हेत्वर्थान्वयबोधो न स्वार्थविशेष्यकः। **किन्तु** स्वैकदेशार्थसाध्यविशेष्यक इति तद्व्युदासः। **साध्य**व्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापका-भावप्रतियोगिमत्पक्षबोधकावयवत्वञ्च **विशेषलक्षणद्वयम्**।

तात्पर्यटीका

जिज्ञास्यमिति। **इदमुपलक्षणम्**। कुत्सायामपि किं शब्दप्रयोगात् कुत्सितमपि किंशब्दार्थो यथा **'स किंसखा साधु न शास्ति योऽधिपमि**'त्यादावित्यपि **बोध्यम्**। **किंबोध्यं** किमो बोध्यम्। **सर्वादेरिति**। सर्वे घटा रूपवन्त इत्यतो यो यो घटः स रूपवानिति प्रत्ययादिति भावः। **युष्मत्तो** युष्मच्छब्दात्। **सम्बोध्यो** वक्ष्माणवाक्यजन्यबोधाश्रयत्वेन वक्त्रिष्टः। **स्वतन्त्र**वक्तान्योच्चारणानधीनोच्चारयिता। **व्यर्थैवेति**। न्यायोऽधिक पदाप्रयोगस्य सम्प्रदायविरुद्धत्वादिति भावः। **नावश्यकीति**। **कृताकृतेति** यावत्तेन' **यद्यत्पापं पुरा चीर्णं तत्तन्मे जहि जाह्नवीति**' तत्पदे वीप्सापि साधीयसीति **सूचितम्**। **अन्यथा** वैरूप्येण परामर्शे हेतुभूताया वीप्साया अभावे। **सर्वानुभवसिद्धस्येति**। **अत** एव **'यां यां प्रियः प्रैक्षत कातराक्षी सा सा ह्रिया नम्रमुखी बभूवे**'त्यत्रापि वीप्सा समादृता। युगपत् वृत्तिद्वयविरोधाङ्गीकारेऽपि विरूपोपस्थितानां वैरूप्येण परामर्शोऽपि बुद्धिस्थावच्छिन्ने शक्ति पक्षे सम्भवति **परन्तु** यत्तदोः समानार्थकत्वरक्षायै तत्पदेऽप्येतादृशस्थले वीप्सावश्यकीति **स यं स यं इति**। तथा च बुद्धिस्थत्वावच्छिन्नयद्धर्मावच्छिन्नोपस्थापको यच्छब्दस्तच्छब्दोऽपि तथैवोपस्थापक इत्याशयः।

अभावपक्षकधूमाभावसाध्यकधूमाभावव्याप्यवह्न्यभाववदभावहेतुके तस्माद्धूमाभाववानिति निगमनेऽतिव्याप्तिवारणाय पक्षविशेष्यकेत्युक्तमित्याह। **पदान्तरव्यावृत्तिरिति**। **तत्रापि** वह्न्यभाववदभावपर्यन्तानुधावनं त्वेतन्निगमनजन्यबोधस्य पक्षविशेष्यकत्वेऽपि प्रकृते हेतुप्रकारकत्वानुपपत्तिरेवेत्युपदर्शनयैवेति **मन्तव्यम्**। **नन्वे**वमपि वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रतिज्ञायामतिव्याप्तिः। **न च** प्रकृतेति पक्षविशेषणेन वारणमिति **वाच्यम्**। तथा सति तत्रत्योपनये व्याप्तेरुद्देश्यतावच्छेदकविधेययोरैक्येन तस्य तादृशबोधाजनकत्वादतो लक्षणान्तरमाह **यद्वेति**। **व्याख्यातार्थमिति**। प्रतिज्ञैकदेशवारकतयावश्यकर्त्तव्यं तत्प्रतिज्ञातदेकदशेयोर्वारकमित्युपदर्शितार्थकमेवेत्यर्थः। **स्वार्थ**विशेष्यक इत्यादि।

तथा च प्रतिज्ञैकदेशवारणाय न्यायावयवत्वोपादाने तत्समभिव्याहारवशात् स्वपदेन न्यायावयवसमर्पणान्न प्रतिज्ञायामप्यतिव्याप्तिरिति भाव:।

चषकम्

उदाहरणान्त एव न्यायप्रयोग इति तु न **युक्तम्**। तृतीयलिङ्गपरमर्शस्य वचनान्तरादलाभाद्विशिष्टपरमर्शस्य हेतुत्वानङ्गीकारेऽपि पक्षधर्मताज्ञान-स्यावश्यकत्वात्। **न च** हेतुवाक्यादेव तदवगम इति **वाच्यम्**, कोऽत्र हेतुरित्याकाङ्क्षया प्रयुक्तस्य तस्य पक्षधर्मतायां तात्पर्याभा**दत** एव मतुपो व्यर्थत्वादित्युक्तं **प्राक्**। **न च** हेत्वन्तवाक्याज्ज्ञानज्ञाप्यत्वेऽवगते पक्षधर्मताक्षेपो भविष्यतीति **वाच्यम्**। अप्रामाण्यशङ्काकलङ्कित**त्वादन्यथा** प्रतिज्ञावश्यादेव कुत इत्याकाङ्क्षा न स्यात्। **न च** हेतुवाक्याद्धेतूपस्थितौ प्रतिपाद्यानामुपनयं विनैव पक्षे तदुपनीतभानं सम्भवतीति **वाच्यम्**। पक्षे हेतुमत्ताज्ञानवतां तदुपनीतभानसम्भवेऽपि तच्छून्यानां तदसम्भवात्। **यत्र** यदवगतं तत्रैव तदुपनीयत इति नियमात्। **तद**ङ्गीकारेऽपि प्रतिपादकेन यथोक्ताकाङ्क्षानिवर्त्तकवाक्यप्रयोगस्यावश्यङ्कर्त्तव्यत्वा**दन्यथा**वयवान्तरेऽप्येवं प्रसङ्गादुदाहरणान्तत्वनियमोऽपि न स्यात्। अबाधितासत्प्रतिपक्षितत्वयोरलाभे चतुर्णामप्यपर्यवसानादुपनयानन्तरं निगमनं प्रयोज्यमित्याह। **तस्माद्वह्निमानितीति**। **इति**शब्द: प्रत्येकवाक्यसम्बद्ध: स्वरूपमात्रपरतामवगमयति। **न वेति विभाषेति** शब्दशास्त्रे तु स्वरूपप्रतिपाद्यार्थपर्यन्तपरतामिव।

तत्त्वञ्च प्रकृतन्यायावयवत्वे सति प्रकृतव्याप्तिविशिष्टप्रकृत-पक्षधर्मताविशिष्टप्रकृतहेतुज्ञानज्ञाप्यत्वप्रकारकप्रकृतसाध्यज्ञानजनकवाक्यत्वम्। **असाधारणं** सत्यन्तदलप्रयोजनं पूर्ववदयमादिनिगमनान्तभागवारणम्। धूमाद्वह्निमत: सधर्मा पर्वतो वह्निमानिति प्रतिज्ञावारणाय विशिष्टान्तद्वयं प्रकृतहेतु**विशेषणम्**। वह्निव्याप्तिपर्वतवृत्तित्वविशिष्ट**धूमा**दित्यादि विशिष्टपर्वत-पक्षकप्रतिज्ञावारणाय पक्षे **तथा** पर्वतो **यथो**क्तधूमाद्वह्निमानित्यादि-

साध्यकप्रतिज्ञावारणाय व्याप्तिसाध्ययोश्च **प्रकृतेति**। तथा च प्रथमे प्रकृतव्याप्तिविशिष्टहेतोः द्वितीये प्रकृतपक्षधर्मताविशिष्टहेतोः प्रकारत्वेऽपि प्रकृतव्याप्तिविशिष्टहेतुर्न ज्ञानज्ञाप्यत्वेन **वा** द्वितीये तज्ज्ञानज्ञाप्यत्वं प्रकृतसाध्यतावच्छेदकावच्छिन्ने तज्जन्यज्ञाने प्रकार इति तद्व्युदासः। **इत्थमेव** विशेष्यदले प्रकारकान्तस्य हेतो प्रकृतपदस्य च व्यावृत्तिः सुधीभिरूहनीया।

तात्पर्यटीका

मीमांसकमतपमाकरोति। उदाहरणान्त एवेति। धूमवत्त्वादिति वाक्येन पक्षधर्मत्वेऽवगते सत्युदाहरणेन व्याप्तिमात्रप्रतिपादनादेवास्माकं कृतार्थतेति मन्वानं प्रत्याह। **विशिष्टपरामर्शस्येति**। अन्यथाख्यात्युच्छेदापत्तिभयादाह। **तदनङ्गीकारेऽपीति। एवं प्रसङ्गादिति**। केषाञ्चिद्व्याप्तिग्रहस्यापि सम्भवेनोदाहरणस्याऽप्यानर्थक्यप्रसङ्गादित्यर्थः। **तदेवाहोदाहरणान्तत्व-नियमोऽपि न स्यादिति**। अपर्यवसानाद्बाधादिप्रतिबद्धानुमिति-फलोपधानासम्भवात्।

न्यायबहिर्भूतस्यायं तस्माद्वह्निमानिति वाक्यस्य न्यायान्तर्गतत्वेनापि **वारणादसाधारणमिति। पूर्ववदिति**। साध्यनिर्देशः प्रतिज्ञेत्यत्र न्यायावयवत्वे सतीति विशेषणाच्च नोपनयस्थायमादिनिगमनान्तभागेऽतिव्याप्तिरित्युक्तत्वाद्यद्वेति प्रतिज्ञालक्षणेऽप्यनुयोगिनि स्वीयत्वाप्रवेशेऽन्त्यपदप्रतियोगिकभेदस्य लक्षण-घटकतायामयमादिनिगमनान्तभागेऽतिव्याप्तेरप्ययमादिपदेऽतिप्रसक्तत्वादित्यादिग्रन्थेन सूचितत्वाच्चेत्थमुक्तम्। **धूमा**दित्यादीत्यादिना वह्निमत्सधर्मत्वविशेषणेत्यस्य परिग्रहः। पक्षे प्रकृतेतीति योजना। **यथोक्तेति**। वह्निव्याप्तिपर्वतवृत्तित्व-विशिष्टेत्यर्थः। धूमाद्वह्निमानित्यादीत्यादिनाऽऽलोकाद्वह्निमानित्यस्य परिग्रहः। प्रथमे विशिष्टपक्षकप्रतिज्ञास्थले प्रकृतविशिष्टपक्षधर्मताविशिष्टो हेतुर्न ज्ञानज्ञाप्यत्वे प्रकार इति योजना। केवलपर्वतवृत्तित्वस्य प्रकृतविशिष्टपक्षधर्मता-नात्मकत्वादिति भावः। एवमग्रेऽपि। **इत्थमेवेति**। द्रव्याद्वह्निमतः सधर्मा पर्वतो वह्निमानिति प्रतिज्ञावारणाय प्रकृतहेतुज्ञानज्ञाप्यत्वप्रकारकेतीत्यर्थः।

चषकम्

इत्थञ्च हेतौ प्रकृतसाध्यव्याप्तेरनवगमे प्रकृतसाध्ये तद्धेतुज्ञानज्ञाप्यत्वं नैवावगम्यत इति दर्शयितुं परं प्रकृतेति **व्याप्तिविशेषणम्**। **यद्वा**वयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वम्। **अत्र** तस्मादिति निगमनैकदेशस्यावयवार्थविशेष्यकबोधाजनकत्वेऽपि वह्निमानिति निगमनैकदेशस्योपनयार्थविशेष्यकबोधजनकत्वान्न्यायावयवत्व**मिति**। **इत्थञ्च** स्वपदस्य न्यायावयवपरत्वेऽपि प्रतिज्ञैकदेशार्थवह्निविशेष्यकस्वार्थान्वय-बोधजनकहेत्ववयववारणायैवावयवार्थेत्युक्तमिति **बोध्यम्**। **अथा**भिधानामि-धेययोर्व्याप्तिविशिष्टपक्षधर्मतावल्लिङ्गप्रतिपादनादेव पर्यवसाने निगमनानर्थक्यम्। विपरीतशङ्कानिवृत्तेरपि तत एव भावात्। **अन्य**था निगमनेनापि तदवारणात्। **न हि** तद्विशेषदर्शनतामनादृत्यैव विपरीतशङ्कानिवर्त्तकं विशेषदर्शनतायां तु तेन विनैव तथात्वं शोधितविषयत्वात्।

न च हेतुविभक्तिसाकाङ्क्षितत्वरूप साध्यत्वविरुद्धसिद्धत्वविशिष्ट-साध्यबोधकत्वात्ततथेति **वाच्यम्**। साध्यत्वानुपस्थितौ तस्मादिति विभक्त्यर्थानन्वयप्रसङ्गात्। प्रमाणसिद्धत्वं त्वनादृत्य स्वरूपमात्राभिधानाच्चेति **चेन्न**। व्याप्तिपक्षधर्मताज्ञानेऽपि बाधसत्प्रतिपक्षबुद्धौ सत्यां साध्यज्ञानानुदयात्तदभावाबोधने समीहितानिर्वाहात्। **अथ** स्वरूसन् बाधादिबुद्ध्यभाव: प्रयोजक इति तद्बोधानुपयोग इति **चेन्मैवम्**। बाधादिबुद्धावप्रामाण्यग्रहप्रसञ्जकतया तद्बोधनोपयोगसम्भवात्। **यद**वगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमितिव्याप्ते**रस्ति** हि बाधबुद्धावभवत: शाब्दबोधस्य बाधाभावरूपयोग्यताज्ञानसाध्यता। **एवं** व्यभिचारबुद्धावभवन्त्या अनुमितेरव्यभिचरितत्वरूपव्याप्तिज्ञानसाध्यता चेति। **अथ** कथं निगमनात् प्रकृतहेतावबाधितत्वादिबोधस्तद्वाचकपदाभावात्। **न च** ज्ञानज्ञाप्यत्वेन वह्नौ निगमनेन पर्वते बोधिते पर्वतीयवह्नेर्धूमज्ञानज्ञाप्यत्वं धूमस्य पर्वतवृत्तित्वं विना न घटत इत्यन्यथानुपपत्त्यावगतात्तथाविधपक्षवृत्तित्वाल्लिङ्गादिति **वाच्यम्**। पूर्वान्वितहेतुविभक्त्यर्थस्यैव पुनरन्वे निराकाङ्क्षत्वेन तद्बोधकताया एव दुर्लभत्वादिति **चेन्ना**न्तत आकाङ्क्षाभ्रमाधीनतादृश- शाब्दबोधोत्तरमेवा-बाधितत्वानुमित्युपयुक्ततद्बोधसम्भवात्।

तात्पर्यटीका

ननु प्रकृतव्याप्तिविशिष्टो हेतुर्न ज्ञानज्ञाप्यत्वे प्रकार इत्युक्तं **प्राक्तथा** च प्रकृतपक्षधर्मताविशिष्टहेतुज्ञानज्ञाप्यत्वस्यापि प्रकृते साध्ये प्रकारत्वाभावादेव वारणे व्याप्तौ प्रकृतेतिव्यर्थमत आह**इत्थञ्चेति**। साध्ये प्रकृतेति विशेषणावश्यकत्वे चेत्यर्थः प्रकृते हेतुज्ञानज्ञाप्यत्वविशिष्टसाध्यबोधकवाक्यत्वरूपपरिष्कृत-लक्षणस्य तस्माद्वह्निमतः सधर्मा पर्वतो वह्निमानिति प्रतिज्ञायामतिव्याप्तेर्वारणायैकवाक्यताधीनपक्षविशेष्यकबोधोपयोगित्वरूपप्रकृत-पक्षधर्मताविशेषणापेक्षया पुरःस्फूर्तितयापि लाघवाच्चाह **यद्वेति**। **अव**यवार्थविशेष्यकबोधाजनकत्वेऽपीति। तावता तद्वारणेऽपीत्यर्थः। अवयववार्थविशेष्यकेत्यस्य व्यावृत्तिं दर्शयति। **इत्थञ्चेति**। अवयवार्थेत्युक्तावपि न्यायावयवत्वावश्यकत्वे चेत्यर्थः। **हेत्ववयववारणायैवेति**। तथा च न्यायावयवत्वेन निगमनैकदेशवारणेऽपि हेतोरवारणादिति भावः। **अन्यथा** व्याप्यवत्तानिश्चयस्याविरोधित्वे। **विशे**षदर्शनतामेककोटिनिश्चयत्वादिकम्। विपरीतबुद्धिप्रतिबन्धकता- वच्छेदकावच्छिन्नत्वस्यैव विशेषदर्शनत्वादिति भावः। मणिमन्त्रादिन्यायेनेति यावत्। **विपरीतशङ्कानिवर्त्तकमिति**। मानाभावादिति शेषः। **शोधितविषयत्वादिति**। उदाहरणोपनयाभ्यामित्यादिः। तथा च तेन विनापि विषयपरिशोधजन्यं विशेषदर्शनमप्रामाण्यशङ्कानास्कन्दितमेवेति **भावः**।

प्रकृते नाऽप्रामाण्यशङ्काकालुष्यं सिद्धत्वबोधकत्वादित्याशङ्कते। **न चेति**। प्राक्प्रमाणोपन्यासादनेन प्रमाणसिद्धोऽर्थः प्रतिपाद्यत इत्यस्य विपरीतशङ्कानिव-र्त्तकत्वमित्यनुशयानः प्रमाणासिद्धत्वमप्रतिपाद्यैव वह्निमात्रप्रतिपादनमभिप्रेत्याह। **प्रमाणसिद्धत्वं त्विति**। **अव्यभिचरितत्वरूपेति**। व्यभिचाराभावरूपेत्यर्थः। **आकाङ्क्षा भ्रमाधीनेति**। पदस्याजनितान्वयबोधकत्वेऽपि वाक्यान्तरजन्य-शाब्दबोधस्य प्रकृतशाब्दबोधसमानाकारस्य श्रोतरि सत्त्वात्तच्छाब्दबोधा-भावरूपाकाङ्क्षाप्रमाया असम्भवेऽपि तद्भ्रमसम्भवादित्यर्थः। प्रतिज्ञाहेतुजन्यशाब्दबोधस्य चिरातीतत्वेनाप्रमाणशङ्काकलुषितत्वेन चान्तत इत्युक्तम्। **वस्तु**तस्तत्पदजन्यशाब्दबोधाभावोऽक्षत इत्याशयः।

चषकम्

न च तथाविधपक्षवृत्तित्वमुपनयेनैव बाधितमिति निगमनानर्थक्यमिति **वाच्यम्**। उदाहरणोपनयाभ्यामवगतस्य पुनर्बोधने किं प्रयोजनमित्याकाङ्क्षया परिकल्पितस्य निगमनेऽबाधितत्वादिबोधप्रयोजनकत्वस्य पक्षवृत्तित्वाबाधितत्वयोर्व्याप्यव्यापकभावं विनानुपपत्तिरित्यन्यथानुपपत्यात्मकेनानुकूलतर्केण तथाविधपक्षवृत्तित्वेऽबाधितत्वव्याप्तेर्निश्चयस्य सम्भवेन निगमनोत्तरमेवाबाधितसाध्यकत्वादिबोधः सम्भवति **न** तु प्रागनुकूलतर्कानवतारादिति तथाविधबोधसम्पत्यर्थं निगमनस्यावश्यकत्वमिति। **के**चित्वबाधितत्वादिबोधप्रयोजनकत्वान्यथानुपपत्या निगमनघटकतत्पदस्यैवाबाधितसाध्यकत्वादिलक्षणेत्य**प्याहुः**। **अत्र प्राञ्चः**। यथा तस्मादिति सर्वनाम्ना हेतोः परामर्शः पूर्वोक्ताशेषरूपलाभाय तथा साध्यांशस्यापि तथेति सर्वनाम्ना स युक्तश्चैत्रः पचन्क्लिश्यत्ययमपि तथेतिवत्।

अन्यथा किं जातं किं भविष्यतीत्यत्रेव पुनरुक्तशब्दान्तरादप्यर्थभेदशङ्क्या हेतुसाकाङ्क्षप्रतिज्ञापेक्षया निगमनस्यान्यूनविषयकबोधाजनकत्वशङ्काप्रसङ्गेनोपक्रमोपसंहारयोर्विरोधापत्तेरिति **वदन्ति**। **तन्न**। बहूनां प्रक्रमेण विशिष्याभिमतानन्वयाच्चैत्रः पचति मैत्रः पठत्ययमपि तथेतिवत्। **योग्य**ताया वह्नाविव व्यापकान्तरे धूमसंयोगादावपि प्रक्रान्तेऽभावात्। **तस्मा**दित्यत्र ज्ञाप्यत्वे तु हेत्वन्तरस्य पूर्ववाक्यैरन्वयाबोधनाप्रक्रान्तत्वादेव विवक्षितान्वयबोधः। **ननु** ममाप्युदाहरणेन यद्धर्मावच्छिन्नस्य व्यापकत्वमवगतं तत्रैव तज्ज्ञाप्यत्वान्वयो नान्यत्राप्रक्रान्तत्वादिति **चेन्नैवम्**। साध्यस्य विशिष्योपस्थितौ पुनरनुवाद्यत्वनिश्चयात् प्रागुक्तयुक्त्याऽबाधितत्वावगमात्।

क्वचिद्विरुद्धार्थकपदसमभिव्याहारश्चार्थभेदप्रतिपत्तौ गमको न प्रकृत इति न कोऽपि दोषः। **नन्वे**तावतानुमितिचरमकारणलिङ्गपरामर्शप्रयोजको यः सोऽवयव इति फलितम्, **तच्च**सन्देहेऽपि गतं सन्दिग्धे न्यायः प्रवर्तत इति न्यायादिति **चेच्छृणु**। संशयत्वनिर्णिनीषयोस्त्ववयवव्यवहारोपयोगिनो लक्षणस्य वाक्यत्वघटितस्याभावादेव नावयवत्वं **किन्तु** न्यायाङ्गतामात्रम्। **कः** कुतः कथमिति कण्टकोद्धारस्य तु तादृशजिज्ञासायाः प्रकारान्तरादप्यवगमादनावश्यकतेति ध्येयम्।

तात्पर्यटीका

परिकल्पितस्येति। **दृष्टादृष्टा मया सीतेत्यादौ** पुनरुक्तेरबाधितत्वज्ञापकत्वग्रहादिति भावः। **तथाविधबोधसम्पत्त्यर्थं** व्याप्तिनिश्चयसम्पत्त्यर्थम्। **अत्र** पदस्याबाधितत्वबोधकत्वं लक्षणया न सम्भवति वादिवाक्ये लक्षणाविरहात् तथा च पक्षधर्मतायाः पुनर्बोधनस्य प्रयोजनाकाङ्क्षया पुनर्बोधनफलत्वमबाधितत्वबोधे प्रतिपन्नं बाध्येता**स्माकं** तु तस्य लिङ्गविधयानुमितावुपयोगः सम्भवतीति न बाधः शङ्कास्पदमपीत्यस्वरस आहुरित्यनेन **सूचितः**। **पूर्वोक्ताशेषरूपेति**। व्याप्तिविशिष्टपक्षवृत्तित्वेत्यर्थः।

अन्यथा प्रतिज्ञाघटकसाध्यबोधकशब्दसमानानुपूर्वीकशब्देन निगमने साध्यनिर्देशे। **किं भविष्यतीत्यत्रेवेति**। **इदमुपलक्षणम्**। सरूपैकशेषविषयपदयोरिवेत्यपि **बोध्यम्**। **अप्यर्थ**भेदशङ्कयार्थभेदशङ्कयापि। **अपिना** पक्षबोधकपदाभावेनापि न्यूनता दर्शिता। **अन्यूनविषयकबोधाजनकत्वशङ्केति**। प्रतिज्ञाप्रतिपाद्यवह्न्यप्रतिपादकत्वशङ्केत्यर्थः। **उपक्रमोपसंहारयोर्विरोधापत्तेरिति**। तस्माद्वह्निमानिति निगमनप्रयोगे पक्षबोधकपदाभावादिना या न्यूनताशङ्का तत्प्रयुक्ता योपक्रमोपसंहारयोर्विभिन्नविषयकत्वरूपविरोधशङ्का तस्या आपत्तेरित्यर्थः। **ननु** सर्वत्र शब्दाद्यथा विवक्षितान्वयबोधो योग्यताबलात्तथात्रापि भविष्यतीत्यत आह **योग्यताया इति**। **उपस्थितौ** पुनरुपस्थितावेव। **प्रागुक्त** युक्त्यानुवादप्रयोजनाकाङ्क्षाद्वारकोक्ततर्काधीनव्याप्तिनिश्चयसम्पत्या।

ननु पुनरुक्तशब्देऽर्थभेदप्रतिपत्याऽनुवाद्यत्वमेव दुर्ग्रहमतस्तामपाकरोति। **क्वचिदिति। अन्यथा रामरामेतिरामेति रमे रामे मनोरमे। सहस्रनामतत्तुल्यं रामनामवरानने** इत्यत्रार्थ भेदप्रतिपत्यापत्तेः। नन्वत्रैव रामे रमे इत्यर्थैक्यप्रतिपत्तौ गमकमस्त्विति चेद्भिन्नार्थप्रतिपत्तेः क्वाचित्कत्वमभिदधता लाघवस्य विनिगमकस्य स्फुटमभिधानात्। **सहस्रनामतदिति** कर्मधारायः **विरुद्धार्थकपदसमभिव्याहारश्चेति**। भूतभविष्यदर्थकस्योभयाद्यन्वययोग्यद्वित्वाद्यर्थकस्य च लृडादिद्विवचनादिपदस्य समभिव्याहारश्चेत्यर्थः। अन्यूनविषयकबोधजनकत्वं पुनरुपनयैकवाक्यतयैवोपपद्यत इत्यभिप्रेत्याह

न कोऽपि दोष इति। वाक्यत्वघटितस्येति। तथा च सर्वत्र न्यायावयवलक्षणयोर्वाक्यत्वनिवेशादेव नोक्तातिप्रसङ्ग इति भाव:। **कण्टकोद्धारस्य तु** जिज्ञासानिवृत्यौपयिकवाक्यविशेषस्य तु। **प्रका**रान्तराद्वादिनिग्रहस्य प्रतिवादिन: कथञ्चिदपि चिकीर्षितत्वावधारणात्।

तर्कामृतम्

स्वार्थं च स्वीयव्याप्त्यादिज्ञानसाध्यम्, न तत्र परप्रतिपत्त्यर्थमेवमाहशब्दप्रयोगम्।

तच्चानुमानं त्रिविधम्, केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्। यत्र साध्यव्यतिरेको[१] न कुत्राप्यस्ति स केवलान्वयी।

तरङ्गिणी

स्वीयव्याप्त्यादिज्ञानेति। सावधारणम्। **न तत्रेति।**

चषकम्

स्वीयेति। स्वीयव्याप्त्यादिज्ञानेति सावधारणम्। तेन परकीयव्याप्त्यादिज्ञाननिरपेक्षेण स्वीयव्याप्त्या देज्ञानेन-साध्यमित्यर्थान्न परार्थेऽतिप्रसङ्ग:। **आदिना** सहचारपरिग्रह:।

परकीयव्याप्त्यादिज्ञाननिरपेक्षत्वमेव व्युत्पादयति। **न तत्रेति। तत्र** स्वीयव्याप्तिज्ञाने जनयितव्ये। **एवं** शब्दप्रयोगं पञ्चावयववाक्यरूपम्। **पर**प्रतिपत्यर्थमिति परो वक्तु: पर: स्वीयव्याप्तिज्ञानवानिति यावत्। तस्य प्रतिपत्यर्थम्। बोधायेत्यर्थ:। **नाह** न कश्चिद्भूत इति भाव:। **अत्र** क्वचित्पुस्तके परप्रतिपत्यर्थमयमिवाहान्य: शब्दप्रयोगमिति पाठ: स **ऋजुरेव। यत्रेति** षष्ठ्यर्थे सप्तमी मोक्षे इच्छेतिवदेवमग्रेऽपि। तथा च यत्सम्बन्धिन:

---

१. 'साध्यस्य' इति पाठान्तरम्।

साध्यस्येत्यर्थः। **साध्यस्य** व्यतिरेक इति। वृत्तिमद्व्यतिरेकाप्रतियोगिसाध्यक इति तु निष्कर्षः। तेनाकाशाद्यभावातिरिक्त केवलान्वयिसाध्यके न सिद्ध्यसिद्धिव्याघातः। **न** चोदक्षरत्वमिति **वाच्यम्**। कुत्रापि व्यतिरेकः साध्यस्य नास्तीति योजनया वृत्तिमद्व्यतिरेके साध्यप्रतियोगिकत्वाभावे बोधिते तादृशव्यतिरेकप्रतियोगित्वा- भावस्यापि साध्ये सुबोधत्वादेवमग्रेऽपि।

तात्पर्यटीका

क्रियानन्वयेन यत्रेति सप्तम्यनुपपत्तिं परिहर्त्तुं दृष्टान्तोपन्यास**ः**। **व्यक्ती**भविष्यति चैतदुपरिष्टात्। **साध्यप्रतियोगिकत्वाभाव** इति। साध्यस्य प्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः। **नन्वत्र** किमभावत्वावच्छेदेन तथा साध्याभावोऽवगतस्तत्सामानाधिकरण्येन वा **नाद्यो** वह्निमान् वह्न्यभाववानितिवदनन्वयापत्तेः प्रतियोगितया वह्निमदभावबुद्धौ तथा वह्न्यभाववदभावग्रहस्य कार्यकालवर्तिनो विरोधिनः सत्त्वात्। **नापि** द्वितीयः। घटाभावे वह्निप्रतियोगिकत्वाभावे बुद्धेऽपि वह्न्यभावबोधवत्तस्मिन् सत्यपि साध्यीयाभावबोधसम्भवेन केवलान्वयित्वव्याघातापत्तेरिति **चेन्न**। साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वावच्छेदेन साध्यस्य प्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकाभावे इत्यर्थात्।

तर्कामृतम्

यथा, 'घटोऽभिधेयः प्रमेयत्वात्' इत्यत्र अभिधेयत्वस्य साध्यस्य व्यतिरेको न कुत्राप्यस्ति[१]।

तरङ्गिणी

अभिधेयत्वस्य ईश्वरेच्छाविषयत्वस्य। वस्तुमात्रस्यैवेश्वरेच्छाविषयत्वादिति भावः।

---

१. 'अस्ति' इति पाठः नास्ति।

चषकम्

यथा घट इति। अत्र वदन्ति। साध्याभाववदवृत्तित्वमेव व्याप्तिरनुमितिहेतुर्लाघवात्। प्रायशः साधनभेदेऽप्यभेदाच्च। तत्कथं केवलान्वय्यनुमानं केवलान्वयित्वग्रहे पक्षे साध्यग्रहसम्भवात्संशयासम्भवाच्च। **यत्सम्ब**न्धावच्छिन्नसाध्याभाववति हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन साध्यसिद्धिः फलम्। साध्याभाववति येन सम्बन्धेन हेतोरवृत्तित्वं तेन सम्बन्धेन पक्षधर्मताधीः कारणमिति नातिप्रसङ्गः। आकाशादेस्तथात्वेऽपि पक्षधर्मताज्ञानविरहान्नानुमितिः। **निविशतां** वा तत्र सामानाधिकरण्यं वृत्तिमत्त्वं वा। तेन गगनधर्मिकावृत्तित्वग्रहस्य गगनवत्ताग्रहाविरोधितया वह्न्यभाववदवृत्तिगगनवानितिग्रहसम्भवेऽपि नानुमित्यापत्तिः। **अभि**धेयत्वादेश्च घटादिवृत्तित्वं केवलान्वयित्वेनोन्नेयम्। **न तु** प्रमेयत्वादिहेतुका तदनुमितिरानुभविकी।

न च द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिर्विशिष्टसत्तानतिरिक्तायाः सत्ताया गुणवृत्तित्वाद्धेतुतावच्छेदकरूपेणावृत्तित्वोक्तावपि न निस्तारस्तद्विशिष्टस्य तस्मिन् सत्त्वे तेन रूपेण तदवृत्तित्वासम्भवादिति **वाच्यम्**। साध्याभाववद्वृत्तितानवच्छेदकहेतुतावच्छेदकवत्त्वस्य व्याप्तित्वे तात्पर्यात्। तन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैव तन्निरूपिताधेयतावच्छेदकतया विशिष्टसत्तात्वस्य गुणाधेयतानवच्छेदकत्वाद्व्यापकाभावाद**न्यथा** गुणो विशिष्टसत्तावनिति प्रतीत्यापत्तेः। **अथ** वह्न्यभाववति धूमादेः समवायेन तन्तुत्वाभाववति पटादेः संयोगेन वर्त्तमानत्वाद्विशिष्यैवाभावो वाच्यस्तथा च जातिमद्गुणवत्त्वाद्गुणवद्घटादित्यादिकं विलीयेत जातिगुणाभाववतोः सामान्यगुणप्रभृत्योः समवेतत्वसंयोगित्वयोरप्रसिद्धेरि**ति चेदु**पदर्शयैतदपि केवलान्वयिनः सरणिम्। **सत्ता**देर्द्रव्यादिवृत्तित्वं तु ध्वंसकारणत्वाद्यवच्छेदकत्वादिनोन्नेयं **न तु** गुणवत्त्वादिलिङ्गिका तदनुमितिरित्यस्यापि सुवचत्वात्।

तात्पर्यटीका

प्रायशः साधनभेदेपीति। वह्न्यभाववन्निरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावस्य धूमालोकादिसाधारणत्वादित्यर्थः। तत्रापि हेतुतावच्छेदकसम्बन्धभेदे त्वसावपि भिद्यते **यथा** वह्निमानेतद्रूपादित्यादौ वह्न्यभाववत्समवेतत्वाभावस्य ततोऽन्यत्वादत उक्तं **प्रायश इति।** प्रतिबन्धकसत्तामुपपाद्य कारणाभावमप्युपपादयति। **संशयाभावाच्चेति।** संयोगसम्बन्धावच्छिन्नवह्न्यभाववद्वृत्तित्वज्ञानात् समवायेन वह्न्यनुमितिधूमावयवे कथं न भवतीत्यत आह **यत्सम्बन्धावच्छिन्नेत्यादि। गृह्यत** इत्युत्तरत्राप्यवृत्तित्वेऽन्वेति। तद्धर्मिकावृत्तित्वग्रहस्यापि विरोधिविषयितामात्रेण तद्वत्ताग्रहविरोधित्वमुपगम्योक्तं **पक्षधर्मताज्ञानविरहादिति। अत एव** वक्ष्यमाणास्वरसादाह **निविशतां** वेति। सामानाधिकरण्यज्ञानहेतुतावादिमतमनुसृत्याह **सामानाधिकरण्यमिति** लाघवादाह **वृत्तिमत्त्वं वेति।**

अन्यथा तस्य गुणनिष्ठाधिकरणतानिरूपकतावच्छेदकत्वे। **विशिष्यैव** हेतुतावच्छेदकसम्बधावच्छिन्नवृत्तित्वत्वादिनैव। **सरणिमिति**। *तत्र यथा* व्याप्तिभ्रमकाले एवानुमितिस्तथात्रापि भ्रमादेवानुमितिरभ्युपेयेत्याशयः। **ध्वंसकारणत्वादिति। आदिना** द्रव्यकार्यत्वपरिग्रहः। **अवच्छेदकत्वादिति। आदि**नावच्छेदककोटिप्रविष्टत्वपरिग्रहः। प्रागभावावृत्ति प्रतियोगितया ध्वंसं प्रति तादात्म्येन सतः कारणत्वादत एव न भेदादेर्ध्वंसः। **प्रागभावस्य** तु ताद्रूप्येण हेतुता ध्वंसं प्रति पृथगेव वाच्येत्य**स्तु**। समवायेन जन्यसत्त्वावच्छिन्नं प्रति तादात्म्येन द्रव्यस्य कारणत्वाच्चेति भावः। **अन्य**था गुणादौ जन्यस्य सतोऽनुत्पत्तौ नियामकदौर्लभ्यं स्यात्।

चषकम्

स्वीकुरु वा स्वाधिकरणावृत्तिसाध्याभावकत्वमेव व्याप्तिम्। स्वत्वाननुगमस्य प्रागेव स्वहस्तितत्वादिति। **अत्राहुः** हेत्वधिकरणावृत्तित्वं साध्याभावस्य साध्यग्रहविरोधितानियामकसम्बन्धेन **वाच्यमन्यथा** धूमवति

वह्न्यभावस्य कालिकसम्बन्धेन वृत्तेरव्याप्तेर्मेयत्वाधिकरणे **पक्षेऽपि** पटत्वरूपसाध्याभावस्याभावीयविशेषणतयाऽवृत्तेः पटत्वाभाववान् मेयत्वादित्यत्रातिव्याप्तेर्वा। **भावा**भावसाधारण्येऽप्यस्याः कालिकसम्बन्धेनाकाशाभावस्याभावे दैशिकविशेषणतया साध्ये आत्मत्वेऽव्याप्तिः स्यादेवे**त्थं** च सत्ताभाववान् जात्यभावादित्यत्रापि हेतुमति जात्यादौ तथाविधसमवायेन वृत्तेरेवाप्रसिद्ध्याव्याप्तिः।

किञ्च संयोगावच्छिन्नघटाभावे साध्ये विषयितया हेतौ घटे लक्षणद्वयस्याप्यव्याप्तिर्विषयितया हेत्वधिकरणेऽद्रव्ये ज्ञाने साध्याभावतावच्छेदकसंयोगेन **तथा** तथाभूतसंयोगेन साध्याभावात्मकघटाधिकरणे निर्विषयिणि द्रव्ये हेतुतावच्छेदकविषयितया च वृत्तेरप्रसिद्धेः। **सा**ध्याभाववदवृत्तित्वलक्षणेऽपि साध्याभावत्वस्य साध्याभाववतावच्छेदकसम्बन्धेन वाच्यत्वा**दन्यथा**-प्रसिद्धानुमानादौ दर्शिताया अव्याप्तेरनुद्धारात्।

एतेन निरुक्तव्याप्तिद्वयस्य व्यवस्थामाश्रित्योक्ताऽव्याप्तिद्वयोद्धारेऽपि। **न निस्तार इति**। **यदि** च स्वाधिकरणावृत्तिसाध्याभावाधिकरणताकत्वमित्युच्यते तदा न कोऽपि दोषस्तादृशाधिकरणत्वीयस्वरूपसम्बन्धेन **वृत्तित्वस्य** सर्वत्र हेत्वधिकरणे प्रसिद्धेः। **शेषं** दर्शितदिशावसेयम्। **एवं** साध्याभाववदवृत्तित्वलक्षणेऽपि साध्याभाववद्वृत्तित्वसामान्यस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नाभावविवक्षायां दोषाभावः प्रसिद्धस्य यत्किञ्चित् सम्बन्धावच्छिन्नविपक्षवृत्तित्वस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धेन क्वचिदपि सद्धेतावसत्त्वात्।

तात्पर्यटीका

अत्र व्याप्तिप्रमायाप्यनुमितिं समर्थयति। **स्वीकुरु वेति**। **स्वाधिकरणेति**। **एतेनेयं** नीलेतररूपवती नीलावृत्तिगोत्वादित्यत्र विशिष्टस्य शुद्धानतिरिक्तस्य साध्याभाववदवृत्तित्वादव्याप्तिरिति **परास्तम्**। विशिष्टहेत्वधिकरणे साध्याभावासत्त्वेनोक्तलक्षणसङ्गतेः। **प्रागेवेति**। साध्याभाववदपृत्तित्वेत्यादि

व्याप्त्यभ्युपगमकाल एव। **यद्वा** प्रागेवेति सुतरामित्यर्थे निपातः स्वत्वाप्रवेशेऽपि साध्याभाववदवृत्तित्वस्य साध्याभाववद्वृत्तितानवच्छेदकहेतुतावच्छेदकवत्त्वार्थकताया भवताप्युक्तत्वात्। **एतेन** व्याप्तिद्वयाभ्युपगमयोः पौर्वापर्यं दुरवधारणमत एव तयो व्यवस्थाश्रयणाशङ्का वक्ष्यमाणा सङ्गच्छत इति शङ्का परास्ता। **अव्याप्तिः** स्यादेवेति। पूर्वोक्ताव्याप्त्यतिव्याप्त्योरुद्धारेऽपीयमव्याप्तिः सुदृढैवेत्यर्थः। **यद्यप्युक्तविवक्षयाप्यात्मनिरूपितयथोक्तकालिकसम्बन्धा**वच्छिन्नवृत्तित्वाप्रसिद्ध्याव्याप्तिर्दुर्वारा **तथापि** तादृशाव्याप्तिप्रसञ्जकोक्तविवक्षाबीजभूता हेत्वधिकरणे साभावसत्त्वनिबन्धनाऽव्याप्तिर्वारितैवान्यादृशी त्वभिधित्सितैवेति **मन्तव्यम्**। **इत्थञ्च** साध्यवत्ताग्रहविरोधितानियामकसम्बन्धेनावृत्तित्वोक्तौ च।

एतेनेत्यादिना वक्ष्यमाणास्वरसादाह **किञ्चेति**। अनुपदोक्तस्वाधिकरणेत्यादिलक्षणाव्याप्तिमुपपादयति। **विषयितयेति। अद्रव्य इति**। संयोगेन वृत्तेरप्रसिद्ध्यनुगुणतयोक्तं द्रव्ययोरेव संयोग इति नियमात्। **साध्याभावतावच्छेदकेति**। यत्सम्बन्धविशिष्टस्य साध्याभावत्वं स इत्यर्थः। **एवमन्यत्रापि**। प्रतियोग्यनुयोगिनोर्विरोधादनयोर्विरोधितानियामकौ सम्बन्धौ प्रतियोगितावच्छेदकसम्बन्धाभावतावच्छेदकसम्बन्धशब्दाभ्यामभिलप्येते इति **बोध्यम्**। संयोगेन वृत्तेरप्रसिद्धेरित्यन्वयः। साध्याभाववदित्यादिलक्षणाऽव्याप्तिमुपपादयति। **तथेति**। **तथाभूतेति**। साध्याभावतावच्छेदकेत्यर्थः। **निर्विषयिणीति** हेतुतावच्छेदकविषयितया वृत्तेरप्रसिद्ध्यनुगुणतयोक्तम्। **ननु** साध्याभाववदवृत्तित्वलक्षणे साध्याभाववत्त्वे सम्बन्धविवक्षायाः प्रकृतेऽनुक्तत्वात् कालिकसम्बन्धेन घटरूपसाध्याभावाधिकरणे घटविषयकज्ञाने विषयितयावृत्तित्वं पटादेरेव प्रसिद्धमित्याशङ्क्याह। **साध्याभाववदवृत्तित्वलक्षणेऽपीति** **प्रसि**द्धानुमानादावित्यादिना संयोगसम्बन्धावच्छिन्नघटाभावसाध्यकस्य विषयितया हेतोर्घटस्य परिग्रहः। तत्रापि कालिकसम्बन्धेन घटात्मकसाध्याभाववति घटविषयकज्ञाने विषयितया घटस्य सत्त्वादव्याप्तेः। **दर्शितायाः** स्वाधिकरणावृत्तीति लक्षणे साध्याभावतावच्छेदकसम्बन्धेन हेत्वधिकरणे वृत्तित्वविवक्षाप्रयोजनावसरे दर्शितायाः।

एतेन किञ्चेत्याद्युक्ताव्याप्तिप्रसङ्गेन। **व्यवस्थामिति**। यत्र साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तित्वमेवाऽप्रसिद्धं तत्र स्वाधिकरणेत्यादिकां **यत्र** च स्वाधिकरणे साध्याभावतावच्छेदकसम्बन्धेन वृत्तित्वमेवाप्रसिद्धं तत्र साध्याभाववदित्यादिकां च व्याप्तिमाश्रित्येत्यर्थः। **न निस्तार इति**। अत्रोभयविधाप्रसिद्धेरप्युक्तत्वादित्यर्थः। साध्याभावतावच्छेदकसम्बन्धेन हेत्वधिकरणवृत्तित्वाप्रसिद्धिमुद्धरति। **यदि चेति**। **नन्व**प्रसिद्ध्युद्धारेऽप्यव्याप्तिरनुद्धृतैव हेत्वधिकरणे ज्ञानेऽपि कालिकसम्बन्धेन साध्याभावस्य घटस्य सत्त्वेन तस्या अधिकरणताया स्वाधिकरणेऽवृत्तित्वासम्भवादत **आह शेषमिति**। तथा च क्वचित्प्रसिद्धायाः साध्याभावतावच्छेदकसम्बन्धावच्छिन्न-साध्याभावाधिकरणतायाः स्वाधिकरणे स्वरूपसम्बन्धेनावृत्तित्वस्य वक्तव्यत्वेनाव्याप्तेरुद्धारस्यापि सम्भवादित्याशयः। हेतुतावच्छेदसम्बन्धेन साध्याभाववद्वृत्तित्वाप्रसिद्धिमप्युद्धरति। **एवमिति**। क्वचिदपि सद्धेतावित्येकोक्त्यभिप्रायेण। यत्र विपक्षे हेतुतावच्छेदकसम्बन्धेन वृत्तित्वमप्रसिद्धं तत्रैवेत्थं निर्वक्तव्यं तत्र तत्प्रसिद्धौ तु यथाश्रुतमेव सम्यगित्यभिप्राये तु क्वचिदपि सद्धेतावित्यसङ्गतं स्यात् सर्वसद्धेतोर्निरुक्तपरिष्कृत-लक्षणलक्ष्यत्वादिति।

हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपत्वेनापि सम्बन्धत्वानङ्गीकाराल्लाघवाच्चाह **किम्** वेति। कालिकसम्बन्धावच्छिन्नाधेयतायाः साध्याभाववन्निरूपितत्वा**न्निरुक्तेति**। हेतुतावच्छेदकसम्बन्धावच्छिन्नेत्यर्थः। द्रव्यं विशिष्टसत्त्वादित्यत्र सत्तात्वावच्छिन्नाधेयताया गुणादिरूपविपक्ष-निरूपितत्वादव्याप्तेराह **दिगिति**। **दिगर्थस्तु** साध्याभाववन्नि-रूपकतानवच्छेदकहेतुतावच्छेदकावच्छिन्नाधेयतात्वावच्छिन्नवत्त्वं विवक्षितमिति नोक्ताऽव्याप्तिरिति।

तर्कामृतम्

यत्र साध्यप्रसिद्धिः पक्षातिरिक्ते नास्ति स केवलव्यतिरेकी।

तरङ्गिणी

पक्षातिरिक्त इति। जलादिचतुर्दशभेदस्य पृथिव्यतिरिक्तेऽभावादिति भावः। व्याप्तिश्च व्यतिरेकतो ग्राह्या। पक्षे साध्यसन्देहेन पक्षातिरिक्ते साध्यहेतोरग्रहादन्वयसहचारग्रहासम्भवेनान्वयव्याप्तिग्रहासम्भवात्।

चषकम्

किम्वा साध्याभाववदनिरूपितनिरुक्ताधेयताश्रयत्वमर्थ इति **दिक्। पक्षातिरिक्त इति।** इतरभेदस्य पृथिव्यतिरिक्तेऽग्रहादिति भावः। **स इति।** अनिश्चितव्यतिरेकसाध्यसहचार इत्यर्थः। **न च** पक्षातिरिक्ते हेतुसाध्ययोरग्रहेऽन्वयसहचारग्रहासम्भवाद्व्याप्तेरग्रहेण कथमनुमानप्रवृत्तिरिति **वाच्यम्।** वस्तुतो यद्धर्मावच्छिन्नत्वेनोपस्थितेऽभावे हेत्वभावसहचारग्रहे व्यभिचाराग्रहे च सति हेत्वभावव्याप्तिग्रहाद्व्यापकाभावेन हेतुना तद्धर्मावच्छिन्नीयत्वेन व्याप्याभावस्य साध्यस्य सिद्धेरावश्यकत्वात्। **शेषं** दर्शितदिशावसेयम्। **अत एव** न केवलान्वयिसाध्यकव्यतिरेक्याभासोच्छित्तिरपि।

तात्पर्यटीका

वस्तुतो यद्धर्मावच्छिन्नत्वेन वास्तविककिञ्चिद्धर्मावच्छिन्न-प्रतियोगिताकत्वेन। एवमग्रेऽपि। **यद्धर्मा**वच्छिन्नत्वेनोपस्थितहेत्वभावस्य व्याप्तिग्रहो व्यापकतावच्छेदकतद्धर्मावच्छिन्नीयत्वेन ज्ञानं हेतू कार्यमित्याह **शेषमिति। अत एव** केवलान्वयिसाध्यकेऽप्युक्तरीत्या व्यतिरेकव्याप्तिभ्रमसम्भवादेव। **नेत्यादि।** अथेदं वाच्यं सत्त्वादित्यादौ वाच्यत्वाभावत्वेनोपस्थिते कस्मिंश्चिदप्यभावे हेत्वभावव्यापकताग्रहे हेत्वभावाभावेन वाच्यत्वाभावीयाभावत्वेन वाच्यत्वसिद्धिसम्भवादिति भावः।

चषकम्

अत एव च प्रसिद्धव्यतिरेकिणि तस्मान्न तथेत्येव निगमनमनुमितिसमानाकारं साम्प्रदायिकम्। **परं** प्रति साध्याप्रसिद्ध्या प्रतिज्ञाद्यसम्भवात् परार्थेनायं प्रकार: सम्भवदुक्तिक इति **चेदस्त्व**प्रसिद्धसाध्यके स्वार्थ एवासाविति। **अत्र** व्याप्यव्यापकभावावच्छेदकयोर्धर्मसम्बन्धयो: प्रतियोग्यनुयोगिभावावच्छेदकयोश्च तयोरैक्यस्य विवक्षाया वशम्वदेन नियमविशेषेणैवेतरभेदत्वेनापि साध्यं सिद्ध्यतीति ध्येयम्। **एतेन** विना साध्यसिद्धौ च सिद्धसाधन**मेवं** व्यापकत्वावच्छिन्नाभावोऽप्रसिद्धो व्यापकप्रतियोगिकाभावश्च व्यभिचरतीति **परास्तम्**। **साध्यस्य** घटादावेव प्रत्यक्षसिद्धत्वाच्च यत्रेतरभेदाभावस्तत्र पृथिवीत्वाभाव इत्युत्तरग्रन्थस्य नासङ्गति:। **सर्वा** पृथिवीतरभिन्नेत्युद्देश्यप्रतीतेरभावाच्च न **सिद्धसाधनम्**।

इत्थमेवान्वयिनि पक्षतावच्छेदकेहेतौ व्याप्तिघटकसामानाधिकरण्यग्रहेणापि सिद्धसाधनशङ्कानिरसनीयेत्युक्तं **प्राक्**। **अत्र** पक्षतावच्छेदकहेतौ साध्यसामानाधिकरण्यभानेऽपि साध्यधर्मितावच्छेकत्वाभानात्तुल्यवित्तिवेद्यत्वे मानाभावादित्यपि **केचित्**। किं तर्ह्यंशत: सिद्धसाधनं दोष एव न भवति। सर्वत्रैव जिज्ञासितविषयान्तरविषयिण्या अनुमिते: सिद्धविषयतायास्त्व-दुक्तदिशासम्भवादि**तिचे**द्यत्रोद्देश्यप्रतीति: सिद्धा तत्रैव तस्य दोषत्वाद्यथा पक्षतावच्छेदकनानात्वे नित्ये वाङ्मनसे इत्यादावनित्या वागिति सिद्धाविति सङ्क्षेप:।

तात्पर्यटीका

अत एव च साध्याभावत्वरूप यद्धर्मावच्छिनीयाभावत्वेन साध्यसिद्धेरेव च। **अप्रसिद्धसाध्यके** परार्थानुमानासम्भवात् प्रसिद्धेति। पक्षैकदेशे प्रसिद्धसाध्यके व्यतिरेकव्यभिचारिणीत्यर्थ:। **न तथा** नेतरभेदाभाववती। **परं प्रति** परोद्देशेन। **नायं** प्रकार उक्तरीत्या व्यतिरेक्यनुमानम्। प्रसिद्धसाध्यके परार्थेऽप्यस्य सम्भवादुक्तमप्रसिद्धसाध्यके स्वार्थ **एवासाविति**। अत एव

स्वार्थेऽसावेवेति योजनीयम्। **नियमविशेषेति**। येन रूपेण येन सम्बन्धेन व्याप्यता तद्रूपावच्छिन्नतत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वेनैव सिद्धिरिति नियमेनेत्यर्थः। **एतेन** साध्यप्रसिद्धिं विनापि व्यतिरेकव्याप्तेः सुग्रहत्वेन। **व्यभिचरतीति**। गन्धाभावगगनोभयाभावस्य जलेऽपि सत्त्वात्तत्र चेतरभेदाभावादित्यर्थः। **नन्वेव**मप्युत्तरग्रन्थासङ्गतिस्तेन साध्याभावत्वेन सहचारप्रतिपादनादत आह **साध्यस्येति** तथा च प्रसिद्धसाध्यक व्यतिरेक्यभिप्रायेणोत्तरग्रन्थः सङ्गमनीय इति भावः। **चस्त्वर्थे** एवमग्रेऽपि। **सर्वेति**। तथा चावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतया पक्षैकदेशे घटे सिद्धावपि न सिद्धसाधनं दोष इति भावः।

मतान्तरमाहात्रेति हेतुमान् साध्यवानिति स्वसामग्रीसम्पन्नग्रहेणापि सिद्धसाधनप्रसक्तावस्मदुक्तप्रकार एव शरणीकरणीय इत्यस्वरसः केचिदित्यनेन **सूचितः**। ननु सामानाधिकरण्येन सिद्धेरवच्छेदकावच्छेदेनानुमितिर्भिन्न-विषयै**वात** एवांशतः सिद्धिः स्वसमानविषयकानुमितिप्रतिबन्धकतया दोष इति **प्राञ्च** इति **चेन्ना**वश्यकसम्बन्धभेदेनैवोपपत्तौ पक्षवैचित्र्ये मानाभावादित्याह **सर्वत्रैवांशतः** सिद्धसाधने, घटकत्वं सप्तम्यर्थः, स्वावच्छिन्नप्रतियोगिताकत्व-सम्बन्धेनान्तरपदार्थैकदेशभेदान्वयी, जिज्ञासितमतीतजिज्ञासायोग्यं सिद्ध्यविषयीभूतमिति यावद्विषयान्तरं प्रकृतसिद्धेरप्यविषयीभूतं प्रकृतपक्षतावच्छेदकावच्छिन्ने च तद्विषयिण्या अनुमितेः पूर्वानुमितिद्वितीयक्षणोत्पन्नसर्वपर्वतपक्षकपरामर्शजन्यायाः पक्षतावच्छेदका-वच्छेदेन जायमानतया पूर्वसिद्ध्यप्रतिबध्यायाः सिद्धविषयतायाः पूर्वानुमिति-विषययावद्विषयकतायाः शुद्धसंयोगसंसर्गकतायाश्च दोषत्वादिप्रतिबन्धकसत्त्वे अवच्छेदकावच्छेदेनानुमितेश्शुद्धसंयोगसंसर्गत्वं **गोचरीक्रियत** इत्याशयः तथाप्यत्र प्रतिबन्धकत्वे विवादसम्भवादाह। **यथेति**। **नन्वेवं** व्यापकतावच्छेदकरूपावच्छिन्नाभावज्ञानं हेतुरित्युक्तव्यापकतावच्छेदकञ्च रूपं नानेति परस्परं व्यभिचार इत्यतः सङ्क्षेप **इति**। तथा च धूमव्यापकवह्न्यभाववान् धूमव्यापकसामग्र्यभाववानिति ज्ञानद्वयं स्वोत्तरानुमितौ हेतुर्वाच्यमिति नोक्त दोष इत्याशयः।

तर्कामृतम्

यथा 'पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात्'। यत्र इतरभेदाभावः तत्र पृथिवीत्वाभावः यथा जलादौ।

चषकम्

पृथिवीतरेभ्यो भिद्यते इत्यत्र पृथिवी पक्ष इतरभेदः साध्यमिति सर्वतान्त्रिकानुमतः पन्थास्तमनुसृत्यैव व्यतिरेकव्याप्तिग्राहकं व्यतिरेकसहचारमाह। **यत्रैतरभेदाभाव इति**। **अत्र** विवदन्ते बहवः। भिद्धातोरन्योन्याभावार्थकत्वे भिनत्तीति स्यान्न भिद्यत इति। **तच्चिन्त्यम्**। दिवादेराकृतिगणत्वात् पदव्यत्ययस्यापि दृष्टचरत्वादित्यन्यत्र विस्तरः।

वस्तुतस्त्वितरस्य भेदप्रकारकज्ञानविषयतारूपं फलं व्याप्तिपक्षधर्मतारूपो व्यापारश्च प्रकृते धात्वर्थो **न त्वन्योन्याभावमात्रमत्रैव** न जलत्वादिति प्रयोगस्य प्रामाण्योपपत्तये निरुक्तव्यापारस्य **धात्वर्थेऽन्तर्भावोऽन्यथा** तन्निष्ठव्याप्तिद्वारकप्रयोज्यत्वस्य फली भूतविषयतायामसत्त्वेऽपि प्रत्येकं प्रसिद्धनां जलादिभेदानां साध्यतया विशेषणज्ञानविधया साक्षादेव तस्य सत्त्वेनाऽप्रामाण्यस्य दुर्वारत्वापत्तेः। **इत्थञ्च** कर्तृभूतपृथिवीत्वनिष्ठव्याप्त्या-दिप्रयोज्यायाः पृथिवीत्वप्रयोज्यत्वावश्यम्भावेन व्यापारान्वितोक्तविषयतायाः प्रयोज्यत्वरूपहेतुविभक्त्यर्थान्वितायाः अन्वयबलात् पृथिव्यादेः कर्मतैवेति ऋजुः **पन्थाः अत** एव हेतुविभक्त्यर्थप्रयोज्यत्वान्वययोग्यत्वाय सर्वत्रैव प्रतिज्ञास्थसाध्यशब्दस्य साध्यज्ञानविषयत्वलाक्षणिकतामनुमेने **मणिकण्ठः**।

तात्पर्यटीका

दिवादेराकृतिगणत्वादिति। **न च** वृत्करणानुपपत्तिरिति **वाच्यम्**। तस्य **युषादि**समाप्तिमात्रद्योतकत्वादित्युक्तत्वात्। **पदव्यत्ययस्यापीति**। **अपिना** प्रकृते पदव्यत्ययाभावेऽपि न क्षतिर्दिवाद्याकृतिगणे आत्मनेपदिधातुमध्ये

एवास्य पाठकल्पनादिति सूचितम्। **दृष्टचरत्वादिति।**

अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे।
सारङ्ग्गङ्कतिचिच्च सञ्जगदिरे भूच्छायमैच्छन्परे॥
इन्दौ यच्छलितेन्द्रनीलशकलश्यामं दरीदृश्यते।
तत् सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे॥

इत्यादौ सञ्जगदिरे इत्यादेस्तस्य बहुशो दृष्टत्वादित्यर्थः। **तत्रापि** तुल्योऽनुयोग इह वा कथं कर्मव्यतिहार इत्याशङ्क्याहान्यत्र विस्तर **इति। स चेत्थम्।** पृथिवीतरेभ्यो भिद्यत इत्येतावन् साध्यनिर्देश इति कर्मव्यतिहारयोग्यत्वं स्फुटमवगम्यते। **किञ्च** पृथिवीभिन्नावधिकभेदाश्रयत्वाभावश्चोदाहरणवाक्यार्थ इत्यनेन च कर्त्राख्यातत्वद्योतनमपीति। **उक्तञ्चाभियुक्तैः**–

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङाञ्च।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्ध्यति बाहुलकेन॥

इत्यलमसदावेशेनेत्यास्तां **तावत्।**

द्वयोर्बहूनां वा व्यतिहारः सम्भवति न च पृथिव्या इवेतरेषां क्रियाकाङ्क्षेत्यपरितुष्यन्नाह **वस्तुतस्त्विति। प्रकृते** प्रतिज्ञावाक्ये। **न त्वन्योन्याभावमात्रमिति।** अन्योन्याभावमात्रस्य साध्यत्वेऽपि प्रकृते प्रतिज्ञाघटकसाध्यशब्दस्यैतादृशार्थकत्वमुपेयत इति भावः। अत्रैव पृथिवीतरेभ्यो भिद्यत इति प्रतिज्ञास्थल एव। न जलत्वादिति प्रयोगस्य जलत्वस्य हेतुतानिषेधवाक्यस्य। **अन्यथो**क्तव्यापारस्य धात्वर्थेनन्त**र्भावासत्त्वे**ऽपीत्यनेन व्यापारस्य धात्वर्थेऽन्तर्भावे प्रमाणोपपत्तिर्दर्शिता। **तस्य** प्रयोज्यत्वस्य **सत्त्वेन** फलीभूतविषयतायां सत्त्वेन। **दुर्वारत्वापत्तेरिति। इदमुपलक्षणम्।** जलत्वादित्यस्य प्रामाण्यापत्तेरित्यपि **बोध्यम्। कर्त्तृभूतेति। न च** पञ्चम्यनुपपत्तिरिति **वाच्यम्।** रथो गच्छतीत्यत्र कर्त्तुश्चैत्रो रथेन गच्छतीति तृतीयावद्धूमो वह्निमनुमिमीत इत्यत्र कर्त्तुरेव वह्निमान् धूमादिति पञ्चमीवदेव वोपपत्तेः। **व्यापारान्वितेति।** व्याप्तिपक्षधर्मताप्रयोज्यात **एवा** पृथिवीत्वप्रयोज्यंयेतरभेदप्रकारकज्ञानविषयता तदाश्रयः पृथिवीति

बोधादुक्तफलाश्रयतायाः कर्मतारूपत्वादिति भावः। **ऋजुः** पन्था इति पूर्वपक्षे क्लेशबाहुल्यादरेऽप्यनिस्तारादिति भावः। **अत एव** हेतुविभक्त्यर्थप्रयोज्यत्वान्वयानुपपत्तेरेव।

तर्कामृतम्

व्यतिरेकव्याप्तौ तु साध्याभावो व्याप्यः, हेत्वभावो व्यापकः।

तरङ्गिणी

ननु "**व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्**" इत्युक्तेर्यत्रेतरभेदाभाव इत्याद्युक्तिरसङ्गतेत्यत आह-**व्यतिरेकेति**। व्यापकाभावस्य व्याप्यत्वं व्याप्याभावस्य व्यापकत्वमिति नियमादिति भावः।

चषकम्

यत्तु **व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परमिति** सम्प्रदायादितरभेदरूपव्यापकस्य पूर्वं वचनं विरुद्धमत **आह। व्यतिरेकव्याप्ताविति**। साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपायामित्यर्थः। व्याप्यव्यापकभावान्वयि घटकत्वं सप्तम्यर्थः। **न चावृत्तावतिव्याप्तिः**। संयोगादिव्यतिरेकिहेतुनाप्यभ्रान्तस्य पृथिवीत्वानुमितिवारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यस्यावश्यं वाच्यत्वेनैव **तद्वारणादत एव** संयोगाभावे साध्ये विभागाभावः केवलान्वयीत्येवाभिहितं तार्किकशिरोमणिभिः। **यद्यपि** व्यतिरेकव्याप्त्या विशेषदर्शिनां संयोगसाध्यकद्रव्यत्वहेतुकानुमितिनिर्वाहाय साध्याभावेऽप्येतदावश्यकमिति कथं हेत्वभावे प्रतियोगिवैयधिकरण्योपष्टम्भकता। **तथापि** साध्यवैयधिकरण्यानवच्छिन्नसाध्याभावव्यापकताधियोऽप्यनुमितिरु**पेयते**। **कथमन्यथा** संयोगाभावसाध्यकगुणत्वव्यतिरेकि- हेतुकानुमितिरुपपद्येत

संयोगरूपस्य साध्याभावस्य प्रतियोगिवैयधिकरण्याभावेन तदवच्छिन्न-साध्याभावव्यापकताधियोऽसम्भवात्। **किम्वा** केवलान्वयिनो व्योमाभावस्याभावानभ्युपगमेन तस्मिंस्तदभावत्वरूपस्य तत्प्रतियोगित्वस्या-भावादेवावृत्तौ नातिव्याप्तिरिति **स्मर्त्तव्यम्**।

तथा च यस्मिन् व्याप्ति: समभिव्याहारमात्रावधृततात्पर्येणोपदर्शनीया तस्य पूर्वं वचनमित्येव **सम्प्रदाय:** तेन वह्निमानेव धूमवानित्यत्र व्यापकस्य पूर्वं वचनं न विरुध्यते। **तत्र** ह्येवकारेणैव वह्निमदन्यावृत्तित्वस्य धूमे लाभादिति भाव:। **तदुक्तं** व्यापकताज्ञानकारणतावादिना। उदाहरणस्य व्याप्तिग्राहकत्वे वह्निमानेव धूमवानित्याकारक: स्यात्। **यो य** इत्यादिना तु धूमसमानाधिकरणाभावाप्रतियोगित्वरूपं धूमव्यापकत्वं वह्नावगम्यते इतीत्यवतरणे **चि**क्लिशु:। व्यतिरेकसहचारेणान्वयव्याप्तिर्गृह्यत इत्याचार्यमतं कटाक्षयन्व्यतिरेकव्याप्तिमाह **व्यातिरेक**व्याप्ताविततीति तु ततो वरमुत्पश्याम:। **एतेना**न्वयव्याप्तिघटकतावत्पदार्थज्ञानादेवान्वयव्याप्तिज्ञानोत्पत्तौ व्यतिरेक-सहचार- ज्ञानस्य तद्धेतुत्वे मानाभाव इति। **न चान्वयव्यतिरेकाभ्यां** व्यतिरेकसहचारज्ञानस्यान्वयव्याप्तिग्राहकत्वमिति **वाच्यम्**। दैववशसम्पन्न-सामग्रीक्रमाधीनत्वादुक्तान्वयंव्यतिरेकयोरित्युक्तं प्राक्।

ननु व्यतिरेकव्याप्तौ व्याप्तेरप्रवेशेन साध्याभावो व्याप्य इत्युक्तिरनर्थिकेति **चेत्सत्यम्**। प्रथमं साध्याभावो व्याप्य इत्युक्त्या व्याप्तिनिरूपकत्वं व्यापकत्वमिह प्रविष्टं व्याप्तिश्च सामानाधिकरण्यावच्छेदकं रूपमिति तद्घटितव्यतिरेकव्याप्तिज्ञानस्य तथा सहचारापेक्षत्वं निर्व्यूढमिति च सूचितमिति **स्मर्त्तव्यम्**। **अत्र वदन्ति**। व्यतिरेकव्याप्तिग्रहाधीना च धीर्नानुमितिस्तत्वेनाऽननुभवात्। क्लृप्तकारणाभावात्। सामग्रीभेदकल्पनाया-श्चानुभवैकाधीनत्वात्। **किन्तु** शाब्दयामीतिवदर्थापयामीत्यनुभवेन विजातीया तत्करणमपि प्रमाणान्तरमनुपपत्तिरेव। क्लृप्तप्रमाणद्वयसमाहारसमशीलं च युगपदन्वयव्यतिरेकि धर्मद्वयप्रतिसन्धानमिति।

तात्पर्यटीका

यत्त्विति चिक्लिशुरित्यन्तं मतं व्यतिरेक्याभासे व्याप्यव्यापकयोरप्रसिद्धत्वेऽपि तद्धर्मयोर्घटकत्वमस्त्येवेत्यभिप्रेत्योक्तं **भावेति**। **अत एव** विभागरूपंहेत्वभावे प्रतियोगिवैयधिकरण्याभावादेव। **कथमिति**। साध्याभावे प्रतियोगिवैयधिकरण्याभावेनापि तस्य व्यतिरेकित्वासम्भवादिति भाव:। **अन्यथा** साध्याभावे प्रतियोगिवैयधिकरण्यस्यावश्यमुपादाने। कथमुपपद्येते त्यत्र हेतुमाह। **संयोगरूपस्येति**। उक्तप्रकारापेक्षया लघुभूतमप्यवृत्तिहेतावतिव्याप्तिवारणप्रकारं दर्शयति। **किम्वेति**। **अभावादेवेति**। अत्र लक्षणे तथैव प्रतियोगित्वस्य घटनादित्याशय:। व्याप्तिवदशेषे व्योमाभावस्याभावे व्योम्नीत्युक्तत्वा**त्स्मर्त**व्यमित्युक्तम्।

समभिव्याहारमात्रेति। वीप्सादिसमभिव्याहारेत्यर्थ:। मात्रपदेन पदप्रतिपाद्यत्वव्यवच्छेद:। तत्प्रयोजनमाह। **तेनेति**। **कटाक्षयन्नाहेति**। व्यतिरेकसहचारधियो व्यतिरेकव्याप्तिधियं प्रत्यपेक्षामाहत्य दर्शयन्नाहेत्यर्थ:। **एतेन** व्याप्तिघटितव्यतिरेकव्याप्तिनिर्वचनेन। **मानाभाव** इतीत्यस्य सूचितमित्यनेनान्वय:। **अन्वयव्यतिरेकाभ्यां** व्यतिरेकसहचारग्रहेण व्यभिचारशङ्कानिवृत्तौ व्याप्तिग्रह इत्यन्वयव्यतिरेकाभ्याम्। **तत्र** व्यतिरेकसहचारग्रहमात्रेण नान्वयव्याप्तिर्गृह्यते **किन्तु** गोत्वाभावाश्वत्वयोर्विरोध-स्फुरणसहितेनैवात एव विरोधस्फुरणसमानकालिकसामग्रीसम्पन्नव्याप्तिग्रहोत्तरं गोत्वाभाववत्यश्वत्वाभावासंसर्गाग्रहघटितस्वसामग्रीवशाद्व्यतिरेकसहचारग्रहोऽपि सम्भाव्यत इत्यभिप्रेत्योत्तरयति **दैववशेति**।

अनर्थिकेति हेत्वभाव: साध्याभावव्यापक इत्यस्यैव सम्यक्त्वादित्याशय:। **तद्घटितेति**। साध्याभावे **हेत्वभाव-सामानाधिकरण्यघटितेत्यर्थ:**। **तथा सहचारेति**। व्यतिरेकसहचारेत्यर्थ:। **निर्व्यूढमिति**। विशिष्टबुद्धौ विशेषणज्ञानकारणताया नैयायिकसिद्धत्वादित्याशय:। **विशेषोपक्षीणतद्धेतुताया** इत्यन्तेनोक्तत्वात् **स्मर्त्तव्यमिति**। वस्तुतस्तस्यास्तथात्वेऽननुभवस्य दोषमाहात्म्येनाप्युपपादनीयत्वादाह। **क्लृप्तेति**। तृणारणिमणिन्यायेनेयमप्यनुमितिसामग्र्यस्त्वित्युक्तं त्वाह **सामग्रीति**।

विजातीयप्रमित्योः सामग्र्योः परस्परं प्रतिबध्यप्रतिबन्धकभावस्त्वावश्यक एवेत्याह क्लृप्तप्रमाणेति।

तर्कामृतम्

यत्र साध्यं साध्याभावश्चान्यत्र प्रसिद्धः, सोऽन्वयव्यतिरेकी, यथा 'पर्वतो वह्निमान् धूमात्' इति। अन्वयव्यतिरेकिणि हेतौ अवश्यं पञ्चरूपोपपन्नता अपेक्षणीया। पक्षवृत्तित्वम्[1], सपक्षसत्त्वम्, विपक्षव्यावृत्तत्वम्, अबाधितत्वम्, असत्प्रतिपक्षितत्वं चेति पञ्च रूपाणि। केवलान्वयिनि विपक्षव्यावृत्तत्वरहितम्, केवलव्यतिरेकिणि सपक्षसत्त्वरहितं चतूरूपमेवापेक्षितम्। यत्र साध्यसन्देहः स पक्षः, यत्र साध्यनिश्चयः स सपक्षः, यत्र साध्याभावनिश्चयः स विपक्षः; साध्याभाववान् पक्षो बाधः, साध्यविरोधिसाधको हेतुः सत्प्रतिपक्षः।

तरङ्गिणी

विपक्षव्यावृत्तत्वम् विपक्षावृत्तित्वम्। केवलान्वयिकेवलव्यतिरेकिणोर्विपक्ष- व्यावृत्तसपक्षसत्त्वराहित्ये बीजं दर्शयितुं सपक्षत्वविपक्षत्वे निर्वक्ति-**यत्रेत्यादि।** तथा च केवलान्वयिकेवलव्यतिरेकिणोः सपक्षविपक्षयोरप्रसिद्धेरिति भावः। **साध्याभावेति।** साध्यमभावो यस्येति बहुव्रीहिणा साध्यात्यन्ताभावसाध्यवद्भेदयोः सङ्ग्रहः। **बाध इति।** येन केनापि सम्बन्धेन तद्वान् हेतुर्बाधितः। **साध्येति।** साध्यं विरोधि यस्येति बहुव्रीहिः। तेन साध्याभावव्याप्यसाधकव्युदासः। साध्यवद्भेदग्रहे साध्याभावग्रहे च साध्यग्रहस्य विरोधित्वात् प्रकृतसङ्गतिः। साध्यवद्भेदसाधकसङ्ग्रहाय साध्याभावेत्यपहाय साध्यविरोधीत्यभिधानम्। तत्साधनत्वं च तत्सिद्ध्यनुकूलव्याप्तिपक्षधर्मताज्ञानविषयत्वम्। **प्रतिपक्ष इति।** एकज्ञानविषयत्वसम्बन्धेन तद्वान् हेतुः सत्प्रतिपक्षितः।

---

१. 'पक्षसपक्षसत्त्वम्' इति पाठान्तरम्।

चषकम्

अवश्यमिति। **अन्यथा** व्याप्तिद्वयविशिष्टे पक्षधर्मताया दौर्लभ्यप्रसङ्गादिति भावः। **द्वन्द्वान्ते श्रूयमाणस्य पदस्य प्रत्येकं समस्यमानपदार्थेऽन्वितस्वार्थबोधकत्वव्युत्पत्तेः** पदलाघवमभिप्रेत्याह। **पक्षसपक्षेति।**

विपक्षव्यावृत्तत्वरहितमिति। तत्र विपक्षाप्रसिद्धेरेव तत्कार्यव्यभिचारबुद्ध्यसम्भवेन तस्यानपेक्षणादित्याशयः। **सपक्षसत्त्वरहितमिति।** तत्र व्यतिरेकव्याप्तेरेव ग्राह्यतयान्वयव्याप्तिग्राहकान्वयसहचार- स्यानपेक्षणादित्येवाशयः। **पञ्चरूपोपन्नं** लिङ्गं गमकं तत्राबाधितत्वासत्प्रतिपक्षितत्वे स्वरूपसती इतराणि ज्ञातान्युपयुज्यन्ते इत्यपि के**चित्।** पञ्चरूपघटकं पक्षादिकं निर्वक्ति। **साध्यसन्देह इति।** अन्यथा सिद्धसाधनाद्यापत्तेरिति भावः। **साध्याभाववानिति।** साध्यमभावो यस्येति व्युत्पत्या साध्यतद्वतोरत्यन्ताऽन्योन्याभावयोरुपग्रहः। **इदमुपलक्षणम्।** पक्षनिष्ठे साध्याभावसाध्यवदन्यत्वे इत्यपि **बोध्यम्। साध्यविरोधिसाधक इति।** साध्यं विरोधि यस्येति व्युत्पत्या यद्ग्रहप्रतिबन्धकग्रहविषयः साध्यमित्यर्थात् साध्याभावव्याप्यसाधकव्युदासः। वस्तुतो विरोध्यवगाहिनोऽपि ग्राह्याभावाद्यनवगाहिनः साध्यग्रहस्य साध्याभावव्याप्यग्रहे विरोधित्वे **मानाभावात्।**

तात्पर्यटीका

व्यतिरेकसहचारेणान्वयव्याप्तिग्रहे केवलव्यतिरेकीति मतेऽन्वयसहचारापेक्षा स्यादतस्तद्व्यवच्छेदायोक्तमित्येवाशय **इति। एवकारेण** व्यतिरेकव्याप्तिनिर्वचनानर्थक्यापत्तेस्तन्मतमनादेयमिति **सूचितम्।** अबाधितत्वज्ञानकारणत्वस्याऽपि परार्थे व्यवस्थापितत्वात् **केचिदिति। अन्यथा** संशयविषयैककोटिज्ञानमात्रपक्षतादरे। **सिद्धसाधनादीति। न च** सिषाधयिषाधीनानुमितौ न सिद्धसाधनं दोष इति **वाच्यम्।** यतोऽगृहीतग्राहिण्याः प्रमानुमितेरुपयोगीदं पक्षत्वं निरुक्तमिति। **ननु** साध्यविरोधि साध्याभावव्याप्यं तत्साधकः साध्याभावव्याप्यव्याप्यस्तत्रातिव्याप्तिरतो बहुव्रीहिमाह **साध्यमिति।**

कृतेऽपि बहुव्रीहौ विरोधित्वस्य तद्वदवृत्तित्वरूपत्वे तथैवातिव्याप्तिरतो यद्ग्रहेत्यादि।

चषकम्

तस्य साध्यविरोधिनः साधकस्तत्सिद्ध्युपयुक्तव्याप्तिपक्षधर्मताश्रयः पक्षनिष्ठौ साध्यावसाध्यवदन्यत्वव्याप्याविति यावत् साध्याभावसाध्यवद्भेदग्रहयोर्विरोधित्वस्य साध्यग्रहे सत्त्वेनोभयोपग्रहात्। **इदमुपलक्षणम्।** यथोक्तव्याप्यवान् पक्ष इत्यपि **बोध्यम्। न च हेत्वाभासाधिक्यम्।** प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधित्वे सति प्रकृतपक्षसाध्यग्रहाविरोधिप्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधिरूपोन्नायकत्वेन सत्प्रतिपक्षादैरैक्यस्य सुवचत्वात्। **तच्चोन्नायकं** विरोध्यनुमितिजननोत्सुको यादृशविशिष्टविषयकः परामर्शस्तादृशं विशिष्टं साध्याभावव्याप्यवत् पक्षादिकं सर्वमेवेत्यन्यत्र **विस्तरः**।

हेतुरिति हेतुत्वोत्कीर्त्तनं तु तस्य विशिष्टस्य दोषत्वमाविष्**कर्त्तुम्। तेन** दोषाकाङ्क्षायां स एवोद्भाव्यो न पुनर्द्व्यवयवत्र्यवयवादि यथामतमिति **सूचितम्। ननु** साध्यव्यापकत्वेन सन्दिग्धोपाधौ निश्चितसाध्याभाववद्व्यावृत्तत्वस्यापि निश्चयसम्भवात् पञ्चरूपोपपन्नलिङ्गप्रतिपादनादनुमित्यापत्तिः। **तथा हि।** यथा क्षितिः सकर्तृका कार्यत्वादित्यत्र हेतुसाध्ययोर्व्याप्यव्यापकभावग्राहकसहचारदर्शनस्य **योगस्तथा** सकर्तृकत्वशरीरजन्यत्वयोः साध्योपाध्योरपि। **यथा**वात्रानुकूलतर्कानवतारस्तथैव तत्राप्यस्य **क्षेममेवास्ति न** चेष्टापत्तिः। वस्तुतः सद्धेतावपि दशाविशेषेऽनुमित्यनुदयस्य सर्वसिद्धत्वात्। अनुकूलतर्कानवतारे पक्षेतरत्वस्य सन्दिग्धोपाधित्वकथनेन पक्षतत्समयोर्व्यभिचारसंशयस्यापि प्रतिबन्धकत्वात्।

तात्पर्यटीका

अन्यपदार्थं स्पष्टयति। **तस्य** साध्यविरोधिन इति। पक्षवैशिष्ट्यानवगाहिनः साध्याभावादिव्याप्यग्रहस्यानुमित्यविरोधितया तावन्मात्रस्य हेत्वाभासत्वानुपपत्तेस्त**दुक्तम्** व्याप्तिपक्षधर्मताश्रय **इतीत्याह पक्षनिष्ठाविति। प्रकृतेत्यादि।**

वह्न्यभावव्याप्यव्याप्यवत्पक्षव्यावृत्तये। **सत्यन्तम्**। काञ्चनमयो ह्रदः काञ्चनमयवह्निमानित्यत्र ह्रद आश्रयासिद्धिस्तदुन्नायकस्य काञ्चनमयत्वाभावव्याप्यह्रदस्य। तथा काञ्चनमयत्वाभाववान् वह्निः साध्याप्रसिद्धिस्तदुन्नायकस्य काञ्चनमयत्वाभावव्याप्यवद्वह्नेर्व्युदासायाविरोध्यन्तं विरोधिरूप **विशेषणम्**। वह्निव्याप्याभावे साध्ये वह्निव्याप्यवत्पक्षात्मकस्य बाधस्य वारणाय विरो**ध्यन्तम्**। वह्निव्याप्याभावग्रहं प्रति वह्निमत्ताग्रहस्य ग्राह्याभावानवगाहिनोऽविरोधित्वात्त**द्वारणम्**। सत्प्रतिपक्षादेरैक्यस्येत्यस्य सत्प्रतिप्रक्षादेरनुगमस्येत्यर्थः। **आदिना** नानाविधव्यभिचारप्रभृतीनामपीत्थमनुगमास्तानि तानि दूषकताबीजानि विभाव्य स्वयमूहनीया इति **सूचितम्**। **ननु** वह्न्यभावव्याप्यव्याप्याभाववान् ह्रदो वह्निमानित्यत्र वह्न्यभावव्याप्यव्याप्यवद्ह्रदात्मकाश्रयासिद्धावतिव्याप्तिरत **आहान्यत्र विस्तर इति**।

स च सत्यन्तार्थे यद्रूपावच्छिन्नं प्रति विरोधिता प्रविष्टा तद्रूपावच्छिन्नप्रतिबन्धकोन्नायकत्वं विवक्षितम्। **न च** तत्प्रकृतं। वह्न्यभावव्याप्यव्याप्यवद्ह्रदस्य वह्न्यभावव्याप्याभाववद्ह्रदज्ञानं प्रति वह्न्यभावव्याप्यवद् ह्रदस्य, वह्निमद्ह्रदज्ञानं प्रति विरोधित्वादिति। **स एवायं पक्षः** साध्याभावव्याप्यवानित्येव। **यथा**मतमिति सदृष्टान्तोदाहरणपूर्वकोपनयो न्याय इति द्वाववयवाविति बौद्धमतं त्र्यवयवा इति मीमांसकमतं पञ्चावयवा इति नैयायिकमतं तदनतिक्रमेत्यर्थः। **दशाविशेषे** दोषस्फूर्तिदशायां पक्षेतरत्वव्यभिचारेण सिद्ध्यन् साध्यव्यभिचारः पक्षान्तर्भावेनैव सिद्ध्यति स च न प्रतिबन्धक इति पक्षीय व्यभिचारसन्देहो न दोष इति प्रवादस्तत्र पक्षत्वमेतन्त्रमित्याशयेनोक्तं **पक्षतत्समयोरिति**। पक्षतावच्छेदकानाक्रान्ते साध्यसन्देहधर्म्यन्तरेऽपीत्यर्थः।

तर्कामृतम्

सोपाधौ पक्षसपक्षसत्त्वाद्यन्यतमभङ्ग आवश्यकः। सोपाधिश्चस्वव्यभि[१]-चारितासम्बन्धेन उपाधिविशिष्टः। उपाधिश्च[२] त्रिविधः—१. साधनाव्यापकत्वे

१. 'स्व' इति पाठः नास्ति।

२. 'च' इति पाठः नास्ति।

सति शुद्धसाध्यव्यापकः २. साधनाव्यापकत्वे सति पक्षधर्मावच्छिन्नसाध्यव्यापकः ३. साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकश्च[1]।

तरङ्गिणी

ननु सोपाधेरनाभासस्थललक्ष्यत्वात्तत्र व्याप्तिलक्षणमव्याप्तमत आह-**सोपाधौ त्विति। पक्षसत्त्वाद्यन्यतमभङ्ग आवश्यक इति।** तथा च तस्याभासनियतत्वेनालक्ष्यत्वाल्लक्षणस्य तद्व्यावृत्तत्वं न क्षतिकरमिति भावः। स्वव्यभिचारिता स्वाभाववद्वृत्तित्वम्। उपाधिविशिष्टः साध्यव्यापकविशिष्टः। स्वव्यभिचारित्वस्य सम्बन्धिता चेह हेतावुपाधिर्नेहोपाधिरिति प्रतीत्यनुरोधात्। उपाधिश्चेति। ईदृशसम्बन्धेन यद्वैशिष्ट्यं हेतौ स इत्यर्थः। साधनाव्यापकत्वे सतीति। तत्समानाधिकरणाभावप्रतियोगित्वतदभावयोरव्यापकत्व-व्यापकत्वरूपतयाऽव्यापकत्वस्य पूर्वमभिधानम्।

चषकम्

साध्याभाववत्तया निश्चिते हेतुसंशयाधीनस्तत्संशयस्तु निखिल एव तथानुकूलतर्कानवतारनियमात्। **अयं** तु बाधानुन्नीतपक्षेतरत्वोपाधिसंशयः साध्यसाधनयोस्तदवतारेऽपि सम्भवन्न प्रतिबन्धक इति कश्चिदेव तथेति विशेषादित्याशङ्क्य **तदानीं** निश्चितसाध्याभाववद्व्यावृत्तत्वरूपस्य विपक्षव्यावृत्तत्वस्य **तत्र** सुनिश्चेयत्वेऽपि वस्तुतस्तदपि न तथेत्याशयेनोत्तरयति। **सोपाधाविति** तथा च यथोक्तविपक्षव्यावृत्तत्वप्रतिद्वन्द्विनो निश्चितसाध्याभाव-वद्वृत्तित्वस्यैव हेतुदूषकत्वे यथोक्तसपक्षवृत्तित्वप्रतिद्वन्द्विनो निश्चितसाध्यवद्व्यावृत्तत्वस्यापि **तथात्वापत्तिर्न** चेष्टापत्तिः सद्धेतुधर्मयोरन-योर्नित्यदोषताव्याकोपापत्तेरित्यन्यतमभङ्गावश्यकता यथा घटेत तथा तद्रूपं

१. 'च' इति पाठः नास्ति।

वाच्यं **तच्च** साध्याभाववद्व्यावृत्तत्वं न सुनिश्चेयं दशाविशेषे सोपाधाविति भावः। **केचित्तु** यदव्याप्यत्वेन साधने साध्याव्याप्यत्वमुन्नीयते स **उपाधिरत** एवेदं जलमाकाशादित्यत्र द्रव्यत्वस्योपाधित्वनिर्वाह इति **वदन्ति** तत्कटाक्षयन्नाह। **सोपाधिश्चेति**। **न चो**क्तद्रव्यत्वाव्याप्तिराकाशे किञ्चिद्व्यभिचारस्याप्य- भावादिति **वाच्यम्**। तस्यालक्ष्यत्वा**द्विवेचयिष्यते** चेदमधिकमुपरिष्टात्।

उपाधीति। साध्यव्यापकेत्यर्थः। **अत** एवोक्तं **व्यभिचारितेति**। **नन्वस्याः** सम्बन्धत्वे किं मानम्। **न चे**होपाधिरिति प्रत्यय एवेति **वाच्यम्**। सोपाधौ साध्यव्यापकस्य व्यभिचारनिरूपकान्यत्वादेराश्रयाश्रयिभावस्यापि सम्भवादिति **चेन्न**। नेहोपाधिरिति प्रत्ययेन तस्यास्तथात्वात्। **अन्या**श्रयाश्रयिभावसम्बन्धेन सद्धेतोरपि साध्यव्यापकविशिष्टत्वान्नेहोपाधिरिति प्रत्ययानापत्तेः।

न चेह विशिष्टोपाधिर्निषेद्धुं **शक्यः**। सिद्ध्यसिद्धिव्याघातात्। **अधिकमस्म**त्कृतनौकायामनुसन्धे**यम्**। **उपाधिरिति**। ईदृशसम्बन्धेन यस्य साध्यव्यापकस्य वैशिष्ट्यं सोपाधौ स इत्यर्थः।

साधनेति। तदव्यापकत्वं तत्समानाधिकरणाभावप्रतियोगित्वम्, तदभावस्तु व्यापकत्वमिति प्रतियोगित्वमात्रघटिता व्यापकत्वदलप्राथम्यम्। **अथवा**-नुमानदूषकोपाधिः प्रकृते निरूप्यस्तद्दूषणौपयिकं तु रूपं न सत्प्रतिपक्षोन्नायकत्वं सत्प्रतिपक्षे तदनुद्भावनप्रसङ्गात्। **किन्तु** व्यभिचारोन्नायकत्वम्। **इत्थञ्च** साधनव्यापकस्तु कश्चिदपि न भवत्येवोपाधिः पक्षवृत्तिरेवेतरेषामिति ध्वनयितुमव्यापकत्वदल**प्राथम्यम्**। **अत एव** सत्यन्तावृत्तिरप्यर्थवती।

तात्पर्यटीका

साध्याभावावगाहित्वे नियमो न तु सन्देहत्वमपि तन्त्रमित्यन्वय-व्यतिरेकाभ्यां दृढयति। **साध्याभाववत्तयेति**। **अयं** तु साध्यव्यापकता-सन्देहाधीनस्तु। **बाधानुन्नीतेति**। यथा वह्निरनुष्णः कृतकत्वादित्यादौ वह्नावनुष्णत्वव्यतिरेकग्रहेऽनुष्णत्वव्यापकत्वं वह्नीतरत्वे सुग्रहं न

तथोक्तपक्षेतरत्वे। पक्षे साध्यग्रहसम्भवादिति भावः। **कश्चिदेवेति**। अनुकूलतर्कानवतारदशानापन्न एवेत्यर्थः। वस्तुतस्तदपि वास्तविकसाध्याभाववद्व्यावृत्तत्वमपि। **अत एवा**व्याप्यत्वोन्नायकाव्याप्यत्वकस्यैवोपाधित्वादेव। **इदमेतदपेक्षया** लघुभूतस्य वक्ष्यमाणस्योपाधिपदव्यहार्यतावच्छेदकस्य द्रव्यत्वे सत्त्वेन तस्यालक्ष्यत्वम्।

अत एव साध्यव्यापकमात्रस्योपाधिपदार्थत्वादेव। यदि साधनाव्यापकत्वमप्युपाधित्वघटकमभविष्य**त्तदा** येन केनापि सम्बन्धेन तद्वान् प्रकृतो हेतुः सोपाधिरित्येवावक्ष्यद्धेत्वाभासवदित्याशयः। **ननु** नेहोपाधिरित्यत्रोपाधिपदेन साध्यव्यापकव्यभिचारित्वार्थकेन तदेव हेतौ निषिध्यतामित्यत आहा**धिकमिति अयं भावः**। व्यभिचारितायाः सम्बन्धत्वसम्भवेनाप्यन्यलभ्यतया न तदर्थान्तर्भावेण लक्षणा युज्यते। **अन्यथा** घटो नेत्यत्रापि प्रथमायाः प्रतियोगित्वलक्षणोपेक्षाया निर्बीजत्वापत्तेः। **न चार्द्रेन्धनवान्** वह्निरितिप्रत्ययापत्तिरिति **वाच्यम्**। उपाधिपदप्रतिपाद्यत्वावच्छिन्नस्यैव स सम्बन्ध इत्युपगमादाकाङ्क्षाधीनत्वाच्छाब्द**संसर्गस्येति**।

प्रतियोगित्वमात्रघटितेति। तथा च प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानार्थमव्यापकत्वस्य प्रथमं निर्देश इति भावः। **ननु** साध्यसमानाधिकरणाभावप्रतियोगितात्वापेक्षया साध्यसामानाधिकरणाभावप्रतियोगितात्वं भिन्नमेवेत्येतद्ग्रहस्य न तदभावग्रहेऽपेक्षा **न वा** सत्यन्तावृत्तिरेतावतार्थवतीत्यरुचेरा**हाथवेति**। **तदनुद्भावनप्रसङ्गादिति**। यथा पर्वतो वह्निमान् धूमादित्यस्य सत्प्रतिपक्षे पर्वतो वह्न्यभाववान् पाषाणमयत्वादित्यत्र वह्निसामग्र्यभावस्योपाधित्वोद्भावनेऽपि वह्निसामग्रीलिङ्गेनाऽपि वह्न्यनुमितिर्धूमलिङ्गिकेव पाषाणमयत्वपरामर्शे नैव प्रतिबध्यतेति तत्र तदुद्भावनस्य निष्फलत्वादित्यर्थः। **कश्चिदपीति**। यथा **करका** पृथिवी कठिनसंयोगादित्यत्र सत्प्रतिपक्षोन्नयनसमर्थोऽप्यनुष्णाशीतस्पर्शः **पक्षवृत्तिरिवेतरेषामिति**। यथा घटः पृथिवीसंयोगादित्यत्र व्यभिचारोन्नयनसमर्थोऽप्यनुष्णाशीतस्पर्शः सत्प्रतिपक्षोन्नायकतया दूषकतावादिनामित्यर्थः। **अत एव** त्रिविधोपाधावपि द्योतनीयस्योक्तार्थस्य द्योतकसत्ताया अवश्यापेक्षितत्वादेव।

तर्कामृतम्

आद्यो यथा, 'अयोगोलकं धूमवद्वह्नेः।' अत्र आर्द्रेन्धनप्रभववह्निमत्त्वमुपाधिः साधनाव्यापकत्वे[१] सति शुद्धसाध्यव्यापकः।

तरङ्गिणी

स्वनिष्ठव्याप्तिसङ्क्रामकत्वरूपयोगस्य साध्यसमव्याप्त एव सम्भवेन तस्यैव मुख्योपाधित्वात्तमेवाह-आर्द्रेन्धनेति।

चषकम्

उपाधिपदं योगरूढं तत्र स्वनिष्ठधर्मसङ्क्रामकत्वं योगार्थः। स च धर्मः साधनादिपदसमभिव्याहारगम्यतात्पर्यविषयो व्याप्तिरूपः साध्यसमव्याप्त एवोपाधावस्तीति तमेवोपाधिं मन्यन्ते न्यायाचार्या इति दर्शयति। **आर्द्रेन्धनप्रभवेति**। **वयं** तूपाधित्वौपयिकव्यापकताग्राहककार्यकारण-भावस्फोरणायैतदुक्तम्। **न च** तादृशकार्यकारणभावे मानाभाव इति **वाच्यम्**। दाहप्रतिबन्धकसमवधाने धूमोत्पत्तिवारणाय मण्यभावादीनां बहूनां धूमकारणत्वापेक्षया त्वन्मतेऽपि क्लृप्तसामान्यहेतुभावस्य वह्नेर्विशेषहेतुताया एवौचित्यात्। **वह्नि**मत्त्वमिति विशिष्टार्थकपदोत्तरो वैशिष्ट्यार्थो मतुबुत्तरो भावे त्वप्रत्ययस्तु वृत्तिनियामकसम्बन्धेनोपाधिताप्रापणेन तत्सम्बन्धावच्छिन्न-प्रतियोगिताकतदभावप्रसिद्धिप्रदर्शनाय विशिष्टाभावस्यातिरिक्तत्वान्न विशिष्टा-भावहेतौ व्यर्थविशेषणेति **वदामः**।

तात्पर्यटीका

नन्वेवमितरेषां तदुपादानमनर्थकमत आह **वयं त्विति**। **ननु** साध्यव्यतिरेके साधनीये आर्द्रेन्धनप्रभववह्न्यभावे हेतौ व्यर्थमार्न्द्रेन्धनप्रभवत्वं विशेषणं

---

१. 'साधनाव्यापकत्वं सति' इति पाठः नास्ति।

वह्न्यभावमात्रस्यैव समर्थत्वात्। **न च** स्वरूपासिद्धिरिति **वाच्यम्**। असिद्धिवारकत्वेऽपि वैयर्थ्यस्य दुर्वारत्वात्। **तदुक्तम्**। एकामसिद्धिं परिहरतो द्वितीयापत्तिरितीत्याशङ्क्याह **विशिष्टाभावस्येति। अतिरिक्तत्वादिति।** तथा च धर्मिभेदेन व्याप्तिग्रहौपयिकविशेषणत्वान्न वैयर्थ्यं यन्निष्ठा व्याप्तिर्येन विशेषणेन विना गृहीतुं न शक्यते तत्तत्र सार्थकमित्युक्तत्वादिति भावः।

तर्कामृतम्

द्वितीयो यथा, 'वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात्'। अत्र बहिर्द्रव्यत्वावच्छिन्नस्य[1] प्रत्यक्षत्वस्य साध्यस्य व्यापकं उद्भूतरूपवत्त्वमुपाधिः। तृतीयो यथा 'ध्वंसो विनाशी जन्यत्वात्।' अत्र जन्यत्वावच्छिन्नविनाशित्वव्यापकं भावत्वमुपाधिः।

तरङ्गिणी

दूषकताबीजस्य व्यभिचारो व्यापकत्वस्य साध्यविषयव्याप्तेऽपि सम्भवाद्भवत्युपाधित्वमित्यभिप्रेत्योद्भूतरूपवत्त्वमुपाधिं वक्ष्यति-**वायुरिति।** अत्र प्रत्यक्षत्वस्य रूपादावात्मनि च सत्त्वेन तत्र चोद्भूतरूपस्यासत्त्वात् शुद्धसाध्यव्यापकता न घटते। अतो **बहिर्द्रव्यप्रत्यक्षत्वस्येति।** आत्मभिन्नत्वे रूपबद्धिष्ट्वविशिष्टं द्रव्यत्वं वायुरूपपक्षधर्मः। **ध्वंस इति।** अत्र जन्यत्वं प्रागभावप्रतियोगित्वम्। तेनास्य न पक्षधर्मत्वम्। यद्यपि विशिष्टसाध्यव्यापकत्वेन विशिष्टसाध्यव्यभिचारोन्नयनमेव स्यात्, न तु शुद्धसाध्यव्यभिचारोन्नयनम्, तथापि प्रत्यक्षस्पर्शाश्रयत्वं बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यभिचारि। तादृशप्रत्यक्षत्वव्यापकोद्भूतरूपव्यभिचारित्वात्। व्यापकव्यभिचारे व्याप्यव्यभिचारित्वनिर्णये विशेष्यभूतप्रत्यक्षत्वव्यभिचारमादायैव पर्यवस्यतीति न दोषः।

---

१. 'बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य' इति पुस्तकान्तरे पाठः।

चषकम्

बहिर्द्रव्यत्वेति। बहिष्ट्वावच्छिन्नप्रत्यक्षत्वं रूपादौ द्रव्यत्वावच्छिन्न-प्रत्यक्षत्वमात्मन्युद्भूतरूपव्यभिचारीति **तदद्वयमुपात्तम्**। रूद्‌यर्थतावच्छेदकं व्यभिचारोन्नायकत्वं दूषकताबीजं साध्यविषमव्यापकेऽपीति सोऽप्युपाधिः शास्त्रे भवत्यंवंत्याशयेनाहो**द्भूतरूपवत्त्वमिति**। **इत्थञ्च** साध्योपाध्योर्व्याप्य-व्यापकभावग्राहककार्यकारणभावरूपानुकूलतर्कस्फोरणायो**द्भूतेति**। **जन्यत्वा-दिति**। **न चायमपि** पक्षधर्म एवेति पक्षधर्मावच्छिन्नसाध्यव्याप-कोपाधिसाङ्कर्यमिति **वाच्यम्**। भेदादेः पक्षतायामसाङ्कर्यात्। **तथा हि**। जन्यत्वरूपसाधनस्य ध्वंसरूपपक्षधर्मत्वेऽपि भेदो विनाशी जन्यत्वा-दित्यत्राजन्यत्वरूपप्रकृतपक्षधर्ममात्रावच्छिन्नविनाशित्वव्यापकं प्रागभावत्वं जन्यत्वरूपसाधनमात्रावच्छिन्नसाध्यव्यापकभावत्वाद्भिन्नमेवोपाधिः। घटः प्रत्यक्षो विभुत्वादित्यत्रात्मत्वं केवलसाधनावच्छिन्नस्यैवोद्भूतरूपवत्त्वञ्च बहिर्द्रव्यत्वरूपकेवलपक्षधर्मावच्छिन्नस्यैव साध्यस्य व्यापकं सम्भवतीत्यपि **द्रष्टव्यम्**।

यत्तु प्रत्यक्षस्पर्शाश्रयत्वं तथेति मीमांसकमतम्। तन्न। **स्वमते** बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्ववत्यां प्रमायां प्रत्यक्षस्पर्शाभावेन साध्याव्यापकत्वात्। **एतेन** भेदे पक्षे साधनावच्छिन्नसाध्यव्यापकोऽपि क्वाचित्कध्वंसरूपपक्ष-धर्मावच्छिन्नसाध्यव्यापक एवेति तदेकतरत्र तदन्यतरलक्षणाव्याप्त्यभिधानं ग्रन्थकृतामसङ्गतमित्य**पास्तम्**। यथाश्रुते पक्षधर्मावच्छिन्नेत्यस्याव्यावर्त्तकत्वेन प्रकृतपक्षधर्मावच्छिन्नेत्यर्थकत्वेऽपि प्रकृते पक्षैक्येऽप्यवश्य-मुपाधिर्भेदेनाव्याप्तिसम्भवात्। **हन्तैवं** किं ध्वंसपक्षत्वानुसरणेनेति **चेच्छृणु**। वस्तुतोऽत्रानयोरुपाध्योरसाङ्कर्यमस्त्येव **परन्तु** साध्योपाध्योर्हेतौ व्यभिचारगवेषणायामुपस्थितस्य ध्वंसस्य पक्षत्वेऽप्युदाहरणताया अक्षतेरित्याशयेन तथाभिधानम्। **अत** एवात्रैवात्मपक्षतायां मेयत्वे हेतौ बहिर्द्रव्यत्वरूपोदासीनधर्मावच्छिन्नसाध्यव्यापकस्याप्युक्तोद्भूतरूपस्य पृथगविभजनेऽपि न क्षतिः। तस्यैकत्र सङ्ग्रहेणैवान्यत्रापि सङ्ग्रहात्।

तात्पर्यटीका

इत्थञ्च साध्य**विषम**व्यापकस्याप्युपाधित्वे च। **अय**मपि जन्यत्वात्मा हेतुरपि। **साङ्कर्यमभेदः**। भेदपक्षतयात्र हेतौ पक्षधर्मत्ववारणेनोक्तसाङ्कर्यवारणेऽपि जन्यत्वरूपसाधनावच्छिन्नसाध्यव्यापकभावत्वस्यापि भेदरूपपक्षवृत्तिपक्ष-जन्यान्यतरत्वरूपपक्षधर्मान्तरावच्छिन्नसाध्यव्यापकत्वेन तथैव साङ्कर्यमतो **भेदादेरित्यादिना** प्रागभावपरिग्रहः। तथा च पक्षे एव प्रागभावे व्यभिचारान्नोक्तपक्षधर्मावच्छिन्नसाध्यव्यापकताभावस्येति भावः। **प्रागभावान-ङ्गीकारे**ऽप्याह **घट इति**।

तथा बहिर्द्रव्यत्वरूपकेवलपक्षधर्मावच्छिन्नस्यैव साध्यस्य व्यापकम् **एतेन** वक्ष्यमाणदूषणेन। **एक**तरत्र पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधौ। **अन्यतर**-लक्षणाव्याप्त्यभिधानं साधनावच्छिन्नसाध्यव्यापकत्वघटितलक्षणाव्याप्त्यभिधानम्। **ग्रन्थकृतां** मणिकाराणां **पक्षैक्ये** प्रागभावरूपपक्षैक्ये। उपाधिभेदेन भावत्वप्रागभावत्वादिरूपोपाधिभेदेन। **अव्याप्ति**सम्भवादित्याद्यस्यसाधना-वच्छिन्नस्यैव द्वितीयस्य पक्षधर्मावच्छिन्नस्यैव साध्यस्य व्यापकत्वादिति भावः। **एवं** पक्षैक्येऽप्युपाधिभेदसम्भवे। **अत्र** भेदादिपक्षके। **अनयोरु**पाध्योः साधनावच्छिन्नसाध्यव्यापकभावत्वाजन्यत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापक-प्रागभावत्वयोरुपाध्योः। **अत एव** वक्ष्माणहेतोरेव **अत्रैव** प्रत्यक्षत्वे एव साध्ये। वायोः पक्षत्वे बहिर्द्रव्यत्वं पक्षधर्म एव प्रत्यक्षस्पर्शाश्रयत्वे हेतौ साधनावच्छिन्नसाध्यव्यापकमेवोद्भूतरूपं भवेदित्युभयमपि परित्यज्याहा**त्मपक्ष**-तायां मेयत्वहेताविति। **एकत्र** वायुपक्षके। **सङ्ग्रहेणैव** सङ्ग्रहदिशैव **अन्यत्रा**त्मपक्षकेऽ**पि**।

चषकम्

प्रकृते पक्षभेदस्याप्युपाधिभेदाप्रयोजकत्वात्। भेदपक्षके मेयत्वे हेतौ भावत्वस्य सङ्ग्रहोऽप्युक्तयैव दिशा बोध्यः। **कुत**स्तर्हि साधनावच्छिन्नसाध्यव्यापकः पृथगुक्त इति **चेद्वक्तुः** स्वतन्त्रेच्छयेति न न्यूनाधिकभावः शङ्कनीय इत्यास्तां **तावत्**।

ननु किमुपाधित्रयसाधारणं लक्षणम्। **न च** लक्षणत्वं दुर्वचमिति **वाच्यम्**। लक्ष्यतावच्छेदकसमनियतत्वस्य तत्त्वात्। **न च** निष्प्रयोजनकं तदिति **वाच्यम्**। व्यावर्त्तकत्वात्। **न चैवं** साध्यमानव्यावृत्तेरपि लक्ष्यतावच्छेदकसमनियतत्वादतिव्याप्तिः। **न चासौ लक्षणं** साध्यस्य हेतुत्वासम्भवेन व्यावृत्तेर्व्यावर्त्तकत्वासम्भवा**दत एव** साध्यञ्च नोपाधिरित्युक्तमिति **वाच्यम्**। व्यवहारप्रयोजकतया तस्या अपि लक्षणत्वस्य सुवचत्वात्। **अत** एव पदस्यार्थः पदार्थ इति व्युत्पत्यामिधेयत्वं पदार्थसामान्यलक्षणमिति गीयते। **अन्यथा** प्रतियोग्यप्रसिद्ध्या तस्यापि व्यावर्त्तकत्वासम्भवेन लक्षणत्वासङ्गतेरिति **चेदत्र केचित्**। यत्रोपाधिस्तत्रानुकूलतर्को यदि नास्ति तदा साध्यसाधनयोर्व्याप्तेरेवाग्रहोऽ**थास्ति** तदा साध्यव्याप्याव्यापकत्वेन साध्याव्यापकत्वान्नोपाधित्वग्रह इत्युभयथापि नोपाधिर्दूषणमिति किं तन्निरूपणेन। **न च** व्याप्त्यभाव-व्याप्योऽनुकूलतर्काभाववदयमपीति सोऽपि दूषणमेवेति **वाच्यम्**। साधनाव्यापकोपाधावुपाधित्वघटकसाध्यव्यापकत्वनिर्णयोपयोगितया-नुकूलतर्काभावस्यापे**क्षायामुप**जीव्यतया तस्यैव दोषत्वादिति। **तन्न**। तर्काभावेन व्याप्त्यभावोन्नयने कर्त्तव्ये उपाधेरप्युपजीव्यत्वा**दन्यथा** साध्यसमानाधिकरणे तदभावसामानाधिकरण्यस्य विरोधेन व्याप्त्यभावोन्नयनानुपपत्तेः। **अत एव** साधने साध्याभावसम्बन्धिन्यवच्छेदकीभूय येनैव साध्यसम्बन्ध उपपाद्यते स एव साध्यसम्बन्धितावच्छेदको धर्म उपाधिरिति गीयते।

तात्पर्यटीका

ननु पक्षधर्मस्य पक्षधर्मत्वेन प्रवेशे भेदे पक्षे जन्यत्वासङ्ग्रहः साधनस्य साधनत्वेन प्रवेशे मेयत्वे हेतौ तदसङ्ग्रहः स्यादत आह **प्रकृत इति**। तथा च वाय्वात्मरूपपक्षभेदेऽपि बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपमेक एवोपाधिरित्युभयत्राप्यस्य सङ्ग्रहः सुकर इति भावः। अपिना साधनभेदपरिग्रहः। **उपाधीति**। पक्षसाधनयोरुपाधित्वघटकधर्माविशेषणत्वेनोपाधेरेकत्वादित्यर्थः। तथा च य एव ध्वंसे पक्षे उपाधिः स एव भेदे पक्षे यश्च वायौ पक्षे स एवात्मन्यपीति यत्पक्षक यत्साध्यक यद्धेतौ यादृशसाधनपक्ष-

धर्मावच्छिन्नसाध्यव्यापक उपाधिस्तौ साधनपक्षधर्मौ जन्यत्वत्व-बहिर्द्रव्यत्वत्वादिनैव प्रविष्टाविति चान्यपक्षसाधनकस्यापि तथात्वमिति पक्षसाधनयोरैक्येऽपि निरुक्तोपाधिभेदस्य दर्शनात्तद्भेदस्य पक्षादिभेदप्रयोज्य-त्वासम्भवादित्याशयः। पक्षधर्मस्योदासीनत्वं दर्शयित्वा साधनस्याप्युदासीनत्वं दर्शयति **भेदपक्षक इति**। ध्वंसे पक्षे जन्यत्वं पक्षधर्म एव जन्यत्वे च हेतौ भावत्वं साधनावच्छिन्नसाध्यव्यापकमेव स्यादित्युभयपरित्यागः। मेयत्वे हेताविति साध्यञ्च विनाशित्वमेवेति भावः। **उक्तयैव दिशा**। लिङ्गभेदेन पक्षभेदेन च जन्यत्वादेरुदासीनधर्मत्वेऽपि भावत्वादेरेकस्यैवोपाधितया। **ननु** शास्त्रेऽपि स्वातन्त्र्ये स्वोत्प्रेक्षामूलकत्वशङ्कयाऽप्रामाण्यशङ्का स्यादेवा**न्यथा**ऽक्ताः शर्करा उपदधातीत्यत्राञ्जनसाधनद्रव्याकाङ्क्षायां तेजो वै घृतमित्यर्थवादबोधितप्राशस्त्यस्य घृतस्यैवोपादानमिति नियमो न स्याल्लोकतस्तैलादीनामप्यञ्जनसमर्थत्वावधारणे न कदाचित्तदुपादानस्यापि प्रसक्तौ लोकविगानप्रसङ्गावत आहा**स्तां तावदिति**। तथा च लक्ष्यैकचक्षुष्कतया शास्त्रार्थे पारतन्त्र्येऽपि परिभाषायां स्वातन्त्र्यमस्त्येवा**न्यथा**चस्वरादिपरिभाषाभेदस्योच्छेदापत्तेरिति भावः।

अत एव सिद्धसाधनादेव। **अत एव** व्यवहारप्रयोजकस्यापि लक्षणत्वादेव। **अन्यथा** व्यावर्त्तकस्यैव लक्षणत्वे। **अन्यथो**पोधेस्तर्काभावेन व्याप्त्यभावोन्नयने उपजीव्यत्वानङ्गीकारे। **विरोधेनेति**। तत्तदभावयोर्विरोधध्रौव्ये तत्तदभाववृत्तित्वस्यापि विरोध औचित्यापात एव तत्तदभावघटितमूर्तिकत्वात्। कथमन्यथा सत्तायां द्रव्ये द्रव्यत्वसामानाधिकरण्यं न गुणे इत्यवच्छेदकोल्लेखनियम इत्याशयः। **अत एव** साध्यतदभावसामानाधि-करण्ययोर्मिथो विरोधादेव।

चषकम्

अत्रोपाधेः साधनावृत्तेः सामानाधिकरण्येनान्यूनानतिरिक्तवृत्तित्व-मवच्छेदकत्वं गुरोरप्युपाधिसामानाधिकरण्यस्याक्षतम्। तथा च साध्यविशिष्टसाधनव्यापको यः साध्याभावविशिष्टसाधनवदवृत्तिः स तथेति **तस्यार्थः**। प्रत्यक्षो मूर्त्तत्वादित्यत्र चोद्भूतरूपवत्त्वं नोपाधिर्यथोक्तफलाभावादत

एव व्यभिचारे चावश्यमुपाधिरित्युच्यतेऽ**न्यथा** व्यभिचारेणोपाध्युन्नयनस्यानर्थक्यापत्तेः **किञ्च** तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थानान्न व्याप्तिग्राहकतेत्युक्त**प्रायम्**। **तत्र** न तावत्साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकत्वं तत्। सिद्धिकर्मकरणत्वरूपे साध्यसाधनत्वे न वस्तुतो व्यभिचारिणीत्यभिमानस्य विशेषणत्वेऽपि यत्र न तदभिमानस्तत्राव्याप्तेः।

अथ यद्धर्मावच्छिन्नव्यापकत्वे सति यद्धर्मावच्छिन्नाव्यापको यः स तथा। **यद्धर्मावच्छिन्नेति** करणाच्च विशिष्टसत्तावान् ज्ञातेरित्यत्र संयोगेनाव्याप्ति**र्नवा** संयोगी विशिष्टसत्त्वादित्यत्र द्रव्यत्वेऽतिव्याप्तिः। **अत्र** च व्यापकत्वाव्यापकत्वे एकरूपेणैकसम्बन्धेन च बोध्ये। **अन्यथा** द्रव्यत्वत्वेन समवायेन च वह्निव्यापकस्यापि पृथिवीत्वविशिष्टद्रव्यत्वत्वेन संयोगेन च वह्निवृत्तिधूमाव्यापकत्वादतिव्याप्तेरिति **चेन्न**। तथापि साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः। **किञ्च** व्यतिरेकित्वमात्रस्य लक्षणत्वसम्भवे न व्यर्थमधिकम्। दूषणौपयिकस्य तद्रूपस्य पक्षेतरेऽपि सुग्रहतयास्य दूषकतापत्तिः। **न च** यद्धर्मावच्छिन्नाभावत्वं साध्याभावव्याप्यतानवच्छेदकविशेषणाघटितं तद्धर्मावच्छिन्नं व्यापकत्वं विवक्षितमार्द्रेन्धनाभावत्वस्य धूमाभावव्याप्यतावच्छेदकत्वे तद्घटकस्य सर्वस्यैव तथात्वेनातथाविधविशेषणाघटितत्वं तत्राक्षतमेव।

तात्पर्यटीका

अन्यूनानतिरिक्तवृत्तित्वमिति। **अत्र** यथाश्रुते प्रत्यक्ष उद्भूतरूपादित्यत्र गुणत्ववर्तिनः साध्यसामानाधिकरण्यस्य न्यूनवृत्त्येव महत्त्वोपाधिकसामानाधिकरण्यं **तथा** गगनत्ववर्तिन उपाधिसामानाधिकरण्यस्य न्यूनवृत्त्येव साध्यसामानाधिकरण्यमित्यव्याप्तेः **साधन**निष्ठसाध्यसामानाधिकरण्यव्यापकसामानाधिकरण्यकत्वे सति साधननिष्ठस्वसामानाधिकरण्यव्यापकसाध्यसामानाधिकरण्यकत्वरूपे परिष्कृतार्थेऽपि द्रव्यं सत्त्वादित्यत्र घटत्वादेरुपाधिताया वारणायाधिकरणान्तर्भावेण तस्मिन्निर्वक्तव्ये फलितार्थं दर्शयति। **तथा चेति**। **नन्वेवं** प्रत्यक्षो मूर्त्तत्वादित्यत्रोद्भूतरूपवत्त्वेऽव्याप्तिः

साध्याभावविशिष्टसाधनवति परमाणौ सत्त्वादत आह। **प्रत्यक्ष इति। अत** एवोपाधेर्विरोधभञ्जनफलकत्वादेव। अन्यथा व्यभिचारोन्नयनस्योपाधिफलत्वे तत्तदभावसामानाधिकरण्ययोरविरोधेन नोक्तदिशोपाधेरुपजीव्यत्वमित्याशङ्क्यानवस्थितानुकूलतर्काभावेऽपि व्यभिचारानुपस्थित्या व्याप्तिग्रहप्राप्तावुपाधेर्दूषकता सम्भवतीत्याह **किञ्चेति।** तत्र सिद्धदूषणभावस्योपाधेर्निरूपणेऽवश्यङ्कर्त्तव्ये अभिमतेत्यनेनाऽसम्भववारणेऽप्यव्याप्तिर्दुर्वारेत्याह **सिद्धीति।** व्याप्यव्यापकभावापन्नतारूपां सिद्धियोग्यतां खण्डयित्वा तदुपधानं खण्डयति **यत्र नेति।**

साध्यत्वसाधनत्वे परित्यज्यैव परिष्कुरुतेऽथेति। दूषयति। **तथापीति।** ननु **किञ्चिद्धर्मा**वच्छिन्नसाध्यव्यापकत्वंन लक्षणं परिष्कर्त्तव्यमिति न पक्षधर्माद्यवच्छिन्नसाध्यव्यापकोपाध्यव्याप्तिरित्याशङ्क्य किमिदं स्वरूपलक्षणमुत दूषणौपयिकमिति विकल्प्याद्ये **व्यतिरेकित्वमात्रस्येति।** द्वितीये **दूषणौपयिकस्येति। पक्षे** पक्ष इतरो यस्मात् स पक्षनिष्ठभेदप्रतियोगी तादात्म्येनोपाधिः स्यादित्यग्रे व्यक्तीभविष्यति। **अस्य** पक्षेतरस्य। दूषकतापत्तिरिति सर्वत्र पक्षे साध्यसन्देहशायां तस्य निरुक्तदूषणौपयिकरूपग्रहेणानुमानमात्रोच्छेदापत्तिरिति भावः।

चषकम्

प्रकृते च पर्वतेतरत्वावच्छिन्नभेदत्वं नासिद्धिवारकतया वह्न्यभावव्याप्यतानवच्छेदकेन पर्वतत्वविशेषणेनाघटितमिति पर्वतेतरत्वावच्छिन्नं नोपाधिरिति **वाच्यम्।** बाधोन्नीतपक्षेतरस्याप्यनुपाधितापत्तेः। **न चेष्टा**पत्तिः। अप्रसिद्धिवारकविशेषणस्यापि व्याप्तिग्रहौपयिकतयार्थवत्त्वात्। **अत एव** व्याप्तिग्रहानौपयिकेत्युक्तावपि न निस्तारः। बाधानुन्नीतपक्षेतरस्यापि तथात्वात्। **एतेन** व्याप्यवृत्तियद्धर्मावच्छिन्ने वृत्तिमद्व्यतिरेकप्रतियोगियद्धर्मावच्छिन्नस्य प्रतियोगिवैयधिकरण्याघटितान्वयव्याप्तिस्तद्धर्मावच्छिन्नमवश्यं तद्धर्मावच्छिन्नाभावत्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकाभावत्वावच्छिन्नप्रतियोगीति व्याप्तिः। **तत्र** द्रव्यं संयोगादित्यत्र

द्रव्यत्वाभावत्वस्य व्यर्थद्रव्यत्वविशेषणकस्य केवलान्वयिसंयोगाभाव-व्याप्यतानवच्छेदकतया व्यतिरेकव्याप्त्यभावेन व्यभिचारवारणाय **व्याप्यवृत्तीति**।

आकाशाभावसाध्यके व्यभिचारवारणाय **व्यतिरेकप्रतियोगीति**। आकाशे स्वाभावाभावत्वाङ्गीकारे तद्दोषतादवस्थ्यमतो **वृत्तिमदिति**। संयोगी द्रव्यत्वादित्यत्र केवलान्वयिनं संयोगाभावं प्रति व्यतिरेकिणो द्रव्यत्वाभावस्याव्यापकत्वेन व्यतिरेकव्याप्त्यभावाद्व्यभिचारो माभूदित्य**घटितान्तम् इत्थञ्च** प्रकृते पर्वतेतरत्वं न वह्निव्यापकतावच्छेदकं वह्न्यभावत्वावच्छिन्ननिरूपितव्याप्यतावच्छेदकस्वावच्छिन्नभेदत्वकत्वाभावात्। न हि व्यर्थविशेषणकं व्याप्यतावच्छेदकं तथा च साध्यव्यापकत्वाभावात् कथमसावुपाधिरिति **परास्तम्**। **एवमपि** पर्वतभेदत्वेनास्याप्युपाधित्वस्यैवं **वारणेऽपि** तद्व्यक्तित्वेनास्योपाधिताया दुर्वारत्वात् पर्वतभेदनिष्ठतद्व्यक्तित्वावच्छिन्नाभावत्वस्य व्यर्थविशेषणकत्वाभावात्। **इदं** शरीराहेतुकमहेतुकत्वादित्यत्र शरीराहेतुकत्वाभावत्वावच्छिन्ना न व्यतिरेकव्याप्तिः शरीरविशेषणवैयर्थ्याद्यत्राहेतुकत्वं तत्र शरीराहेतुकत्वमित्यन्वयव्याप्तिरस्तीति व्यभिचाराच्च। **ननु** शरीरहेतुकत्वव्यापकसहेतुकत्वाभावेनैव शरीराहेतुकत्वसिद्धौ सम्भवत्यामिह व्यतिरेकव्याप्ति- विरहिण्यन्वयव्याप्तेरसत्त्वेऽपि न क्षतिः। **अत एव** धूमाभाववान् वह्न्यभावादित्यत्र व्यभिचारो नोट्टङ्कितः। उक्तरीत्याऽन्वयव्याप्त्यनभ्युपगमसम्भवादि**त्यास्तां** तावदिति **चेन्ना**भिप्रायमवगतवानसि तत्रापि तद्वैयर्थ्यस्योद्भावितत्वात्।

तात्पर्यटीका

ननु पर्वते वह्निसंशयकालेऽपि पर्वतेतरत्वे वह्निव्यापकतावच्छेदकत्वस्यैव पर्वतेतरत्वावच्छिन्नभेदत्वे वह्न्यभावव्याप्यतावच्छेदकत्वस्यापि सुग्रहत्वात्कथं वारणमत आह।**सिद्धिवारकतयेति**। तथा च तत्र पर्वतविशेषणस्यासिद्धिवारकस्य व्याप्यतानवच्छेदकत्वेन तद्घटितत्वान्न पर्वतेतरत्वावच्छिन्नमुपाधिरित्याशयः। **अत एव** वक्ष्यमाणदूषणादेव। **व्याप्य**वृत्ति व्यतिरेकिणोरिति प्रगल्भग्रन्थस्य व्याप्यवृत्तिश्चासौ व्यतिरेकश्च स ययोरस्तीत्यर्थे

कर्मधारयोत्तरमत्त्वर्थीयविरोध इतीन्नन्तेन क्तिन्नन्तस्य द्वन्द्वमभिप्रेत्याह **व्याप्यवृत्ति** यद्धर्मावच्छिन्न इत्यादिः। **तद्धर्मावच्छिन्नाभावत्वावच्छिन्नेति**। तद्धर्मावच्छिन्नाभावनिष्ठेत्युक्तौ तु नोद्देश्यसिद्धिः **स्यात् पर्वतेतर**-निष्ठताद्रूप्यात्मकभेदव्यक्त्यवच्छिन्नभेदत्वेन व्याप्यतायां व्यर्थविशेषणत्वाभावेन व्यतिरेकव्याप्तेरवैकल्ये तदभावेनान्वयव्याप्त्यभावसाधनासम्भवात् पर्वततरोपाधेर्वह्निव्यापकतया तत्रातिव्याप्तेरवारणादिति भावः।

न हीति। **यद्यपि** व्यर्थविशेषणताप्रसिद्धिवारकविशेषणस्यापि व्याप्तिग्रहौपयिकतयार्थवत्त्वादिति ग्रन्थेन प्राक् परिहृता **तथापि** विपक्षाव्यावर्तकविशेषणाघटितत्वं तद्धर्मावच्छिन्नाभावत्वे विवक्षितमित्याशयः। **एव**मप्युक्तव्याप्त्यङ्गीकारेऽपि। **अस्यापी**त्यपिना पर्वतभिन्नस्य परिग्रहः। **एवं** व्यर्थविशेषणत्वेन। वस्तुतस्तथा व्याप्तिरपि नास्तीत्याहे**दमिति**। उक्तरीत्या व्यापकाभावेनैव व्याप्याभावसिद्ध्या वस्तुतो व्याप्यव्यापकभावे कथमनभ्युपगम इत्याशङ्क्य साध्यसम्बन्धितावच्छेदकधर्मरूपव्याप्तेरुक्तहेतुतावच्छेद-कानात्मकतायाः सुवचत्वादित्यभिप्रेत्या**हास्तां तावदिति**।

चषकम्

अत्र व्यभिचारवारणाय वृत्तिमद्व्यतिरेकेत्यत्र व्यतिरेकपदेन **सप्त**मपदार्थरूपाभावविवक्षेणे च प्रकृतासङ्गतिः **पक्ष**भेदाभावस्य पक्षतावच्छेदकरूपत्वादिति। **अस्तु** पक्षनिष्ठभेदप्रतियोगी पक्षेतरपदार्थः पक्ष इतरो यस्मादिति बहुव्रीह्याश्रयणा**दत एव** न सर्वनामकार्यं तत्र तन्निषेधात्। तथा च विग्रहवाक्यघटकपदार्थान्वयविपर्यासेन तु समासस्यान्वयबोधकत्वं प्राप्तोदकमित्यादौ दृष्टमिति प्रकृते निपातार्थानामिव समासघटकपदार्थानामपि भेदसम्बन्धेनान्वयबोधाभ्युपगमे आधेयतया पक्षान्वितेनेतरपदार्थैकदेशेन भेदेन विशिष्टः प्रतियोगिरूप इह विवक्षितः। **आश्रये** निरूढोऽयं न प्रतियोगिव्युत्पन्न इति चेत् **किं तेन**। **इतर**पदलाक्षणिकार्थे धर्मिणि प्रतियोगिरूपे पक्षस्य स्वनिष्ठभेदप्रतियोगित्वेन सम्बन्धेनान्वयाद्विवक्षितार्थलाभः। **इत्थमेव** मुखेन्दुरित्यत्र

मुखपदार्थस्य स्वनिष्ठाभेदप्रतियोगिनीन्दुपदार्थेऽनुयोगिमुखेन सम्बन्धेनान्वय इतीन्द्वभेदरूपकमित्युपगायन्त्यालङ्कारिकाः।

अस्तु च तद्भेदस्य पक्षतावच्छेदकसमनियतस्यापि भावप्रतियोगिकस्यातिरिक्तस्या**भ्युपगमस्तथापि** संयोगादौ वाच्यत्वादौ वा साध्ये त्वयाप्युक्तव्याप्तेरनङ्गीकारेण तत्र पक्षेतरातिव्याप्तितादवस्थ्याच्च। **यद्य**पि हेतौ व्याप्यवृत्तित्वमुपात्तवता यथाऽव्याप्यवृत्तिनिष्ठाऽन्वयव्याप्तेर्व्यतिरेकव्याप्तिव्याप्यत्वं प्रतिषिद्धं **तथा** व्यतिरेकित्वमनुक्तवतोस्य केवलान्वयिनिष्ठान्वयव्याप्तेर्व्यतिरेकव्याप्तिव्याप्यत्वमप्रतिषिद्धमनुमतमेवेति व्यापकाभावेन व्याप्याभावसाधनसम्भवात् केवलान्वयिसाध्यव्यापकत्वाभावः पक्षेतरे साधयितुं शक्य एवेति न केवलान्वयिसाध्यके पक्षेतरेऽतिव्याप्तिरवशिष्यते **तथा**पि साध्ये व्यतिरेकित्वविशेषणमुक्तवता केवलान्वयिहेतौ तत् साध्यव्याप्यत्वस्याप्रसिद्धेरेव व्यतिरेकि-हेतुनिष्ठायास्तदन्वयव्याप्तेर्व्याप्यत्वपर्यवसानमार्थिकं प्रदर्शयतेदं वाच्यं घटत्वादित्यत्रापि व्यतिरेकव्याप्त्यभावेन व्यतिरेकि पक्षेतरोपाधौ केवलान्वयिसाध्यव्यापकत्वाभावपर्यवसन्नस्य केवलान्वयिसाध्ये व्यतिरेक्युपाध्यन्वयव्याप्त्यभावस्यसाधनासम्भवो दर्शितप्राय एवेति तत्राप्यतिव्याप्तिर्वज्रलेपायितैवेति **ध्येय**मनहितमनोभिः।

तात्पर्यटीका

प्रकृतासङ्गतिरुद्देश्यासिद्धिः। **सप्तम**पदार्थरूपाभावे विवक्षेणे चेति। तथा च शरीराहेतुकत्वाभावस्य भावरूपतयोक्तान्वव्याप्त्यभावादेव न व्यभिचार इति भावः। असङ्गतिमेवोपपादयति। **पक्षभेदाभावस्येति**। तथा च प्रकृतेऽपि व्याप्यव्यापकभावस्य तवानभिप्रेतत्वेन साध्यव्यापकत्वाभावपर्यवसन्नस्योपाधिव्याप्यत्वाभावस्य साधनासम्भवादिति भावः। **आश्रये** निरूढोऽयमिति। तत्रैव स्वारसिकप्रयोगादिति भावः। **इतरपदलाक्षणिकार्थ इति**। सर्वनामकार्याभावायावश्यकल्प्यबहुव्रीहिणा तथा तात्पर्यावधारणादिति भावः। अत्र सम्मतिमाह। **इत्थमेवेति**। **द्वन्द्वभेदरूपकमिति**। अन्यथा मुखाभेदरूपकं

स्यादिति भावः। **नन्विन्दौ** मुखान्वये द्वयोस्तुल्ये केन विशेषेण भवतामिन्द्रभेदरूपकतोपपत्तिरि**ति चेच्छुणु** इन्दुप्रतियोगिकाभेदोऽस्माकं मुखप्रतियोगिकाभेदस्तु युष्माकं भासते **इत्यनेनेति**।

ननु पक्षेतरपदस्य पक्षनिष्ठभेदप्रतियोगित्वार्थकत्वेऽपि तद्भेदस्य पक्षतावच्छेदकरूपस्य सप्तमपदार्थत्वाभावे प्रकृतासङ्गतिस्तदवस्थैवेत्यत आहास्तु **चेति**। **तद्भेदस्य** पक्षनिष्ठभेदप्रतियोगिकस्यैवाभावस्यातिरिक्त-स्यानभ्युपगमादिति भावः। **अभ्युपगम इति**। तथा च प्रकृते व्याप्यव्यापकभावस्याभिप्रेतत्वादुद्देश्यसिद्धिरप्रत्यूहैवेति भावः। **तथाप्यत्र** पक्षेतरेऽनातिप्रसङ्गेऽपि। **हेतावन्वयव्याप्त्याश्रये**। **साध्ये** तन्निरूपके।

चषकम्

वस्तुगत्या साध्याव्यापको बाधोन्नीतपक्षेतरो भवत्येवोपाधिर्बाधानुन्नीत-पक्षेतरस्तु न **तथेति चेद्य**द्विषयकज्ञानस्य प्रतिबन्धकत्वं तदेवोपाधित्वं प्रकृते निरूप्यं नान्यदनुपयुक्तत्वा**त्तच्चे**दुक्तं रूपं **तर्हि** तद्वत्तया पक्षेतरस्यापि ग्रहादनुमितिमात्रमुच्छिद्येते**त्युक्तम्**। **न च** पक्षे साध्यसन्देहान्नासावुपाधिरिति **वाच्यम्**। सत्प्रतिपक्षोन्नायकतया दूषकतावादिनां मते उपाधिमात्रस्ये**तरेषां** मते तु पक्षावृत्तेस्तस्योच्छेदप्रसङ्गात्। **ननु** यत्किञ्चिद्विपक्षभेदव्याप्यताया उपाधिनिष्ठाया अवच्छेदककोटिप्रविष्टं यद्यत्तद्भिन्नविशेषणानवच्छिन्नत्वेन व्यापकत्वं विशेष्यम्। ह्रदान्यपर्वतेतरत्ववारणाय नञ्द्वय**गर्भता**। **अत्रो**पाधितावच्छेकस्य सर्वस्यैव व्यभिचारनिरूपकतत्तदधिकरण-भेदव्याप्यतावच्छेदकतयैव सर्वसङ्ग्रहे कोटीति विशेषणेति प्रविष्टेति च परिचायकमेव तद्व्याप्यतानवच्छेदकानवच्छिन्नत्वमात्रं तु विवक्षितमिति **बोध्यम्**। बाधोन्नीतपक्षेतरे च वह्निविशेषणं वह्नेरेव विपक्षस्य भेदव्याप्यतावच्छेदककोटौ प्रविष्टमिति तस्य **सङ्ग्रहः**। **पर्वते**तरत्वादौ पर्वतविशेषणञ्च पर्वतस्यैव भेदव्याप्यतावच्छेदककोटौ प्रविष्टं न चासौ विपक्षे इति तद्व्युदास इति **चेत्**।

तत्किं पक्षेतरो नोपाधिरेव **मैवं** मंस्था:। **किन्तु** साध्यव्यापकात् साधनाव्यापकाच्चास्मादेव पक्षे हेतुमति साध्यस्य निवृत्तौ हेतोर्व्यभिचारित्वेनोपाधेरवश्यापेक्षत्वे पक्षेतरस्यैव तथात्वौचित्याद्व्यर्थं विशेषणदानेन **तद्वारणमिति**। **ननू**पाधिर्न व्यभिचाराद्युन्नायकतया दूषणम्। **यथा** हि साध्यव्यापकोपाध्यव्याप्यतया हेतो: साध्याव्याप्यत्वं **तथा** साध्यव्याप्य हेत्वव्यापकतया साध्याव्यापकत्वमप्युपाधे: स्याद्व्याप्तिग्राहकस्योभयत्रापि साम्येन विनिगन्तुमशक्यत्वात्त**स्माद्यथा** साध्यं स्वव्याप्येन साधनीयं तथा स्वव्यापकोपाधिव्यावृत्या साध्याभावोऽपीति दूषकताबीजं सोऽयं सत्प्रतिपक्ष:। पक्षेतरव्यतिरेकश्च न साध्याभावसाधकोऽसाधारण्यादिति **चेन्न**। एवं हि पक्षेतरव्यतिरेकेनासाधारण्यमुद्भावनार्हम्। **साध्य**वदवृत्तित्वरूपासाधारणयस्य साध्याभावनिरूपितोपाध्यभावनिष्ठाऽन्वयव्याप्तिघटकान्वयसहचारधीविरोधि-धीविषयतया दूषकत्वं तच्च न पक्षेतरव्यतिरेके। व्यतिरेकित्वाद्**व्यतिरेकिणा** सत्प्रतिपक्षे च नासाधार**ण्यम्**।

तात्पर्यटीका

ननु वस्तुलक्षणमेवैतत्। **न च** व्यतिरेकित्वस्यैव तथात्वं सम्भवतीति व्यर्थमधिकमित्युक्तमिति **वाच्यम्**। एतस्य प्रत्येक साध्यसाधनघटितस्य विशेषणलक्षणत्वादित्याशङ्कते **वस्तुगत्येति**। **न वयं** पक्षेतरत्वेऽतिव्याप्तिं ब्रूम: **किन्तु** दूषणौपयिकरूपस्य तत्र ग्रहेणानुमानमात्रोच्छित्तिमिति समाधत्ते। **यद्विषयकज्ञानस्येति**। ज्ञानातिप्रसङ्गमुद्धर्तुं शङ्कते **न चेति**। **दूषकतावादिनामिति**। तेषां पक्षावृत्तेरेवोपाधितया तस्य च साध्यव्यापकतया निश्चयासम्भवादिति भाव:। **इतरेषामिति**। व्याभिचारोन्नायकतया दूषकतावादिनामित्यर्थ:। तेषां पक्षवृत्तेस्तथा निश्चयसम्भवादाह **पक्षावृत्तेरिति**।

विपक्षाव्यावर्त्तकविशेषणवत्त्वं नानुपाधित्वे प्रयोजकं परिभाषामात्रत्वात् **किन्तु** साध्यव्यापकताग्राहकानुकूलतर्काभाव एवेति गूढाभिसन्धी पृच्छति। **तत् किमिति**। अभिसन्धिमुद्घाटयति। **किन्त्विति**। **अस्मादे**वेत्येवकारेण निरुक्तविशेषणोपादानेन वारितादपीत्यर्थ: सूचित:। **व्यर्थ**मित्यभ्युच्चयमात्रम्।

वस्तुतो व्यभिचारिणि वास्तविकोपाधेरावश्यकत्वेऽपि तज्ज्ञाने तस्यानपेक्षणादत एवास्वरसाद् **भवतु** वेति वक्ष्यति। **व्यभि**चारादीत्यादिनाऽव्याप्यत्वपरिग्रहः। लक्ष्यतावच्छेदकापरिचयेऽव्याप्यतोन्नायकत्वमपि दूषकताबीजं सम्भवतीत्यभिप्रेत्याह **यथा हीति**। असाधारण्यात् पक्षमात्रवृत्तित्वात्। **एवं** ह्युपाधेः सत्प्रतिपक्षोन्नायकतया दूषकत्वे हि। किं सहचारग्रहविरोधितयोऽत सत्प्रतिपक्षोत्थापकतयेत्यसाधारण्यस्य दूषकत्वं विकल्प्योभयथाप्यनुद्भावनीयत्वं समर्थयति **साध्यवदवृत्तित्वरूपेति**। **व्यतिरेकिणेति च**। **व्यति**रेकित्वात् वह्निव्यापकस्य पर्वतेतरत्वस्याभावेन व्याप्यस्य वह्नेरभावस्य साधनादन्वयव्याप्तेरग्राह्यत्वादेव।

चषकम्

साध्यतदभावयोर्द्वयोरप्युपाध्यभावे व्याप्तिग्रहाविशेषेणोपाध्यभावस्य साध्याभावस्येव साध्याभावाभावस्यापि साधनक्षमस्यास्यापि सत्प्रतिपक्षोत्थापकतया सत्प्रतिपक्षेऽनवकाशात्। **किञ्च** तथा सति सत्प्रतिपक्षे उपाध्युद्भावनमपि न स्यात् सत्प्रतिपक्षान्तरवत्। **न च** सत्प्रतिपक्षे सत्प्रतिपक्षोऽप्युद्भाव्यः स्थापनायां बाहुल्यरूपबलसम्पत्तये **तदुक्तं** बहुत्वमपि बलमितीति **वाच्यम्**। **यथा** शतमप्यन्धानां न पश्यत्येकेनैव चक्षुष्मता बहवोऽप्यन्धाः स्वानुरोधेन नीयन्ते **तथा** प्रकृते व्याप्तिपक्षधर्मतारूपबलसम्पन्नेनैकेनैव तद्विधुराणां बहूनां प्रतिरोधसम्भवा**द्यदुक्तं** बहुत्वमपि बलमिति तन्न प्रतिबन्धकतौपयिकं साक्षात् **किन्तु** विरुद्धार्थग्राहिणामेकतरस्मिन्नङ्गभङ्गप्रसक्तौ सत्यां क्वचिद्बहुषु तत्कल्पने गौरवमेकत्र लाघवमिति तर्कोत्थापकयेति न सत्प्रतिपक्षमुद्रया स दूषणं परमुखनिरीक्षकतापत्तेः **यत्र** बाधादिना न लाघवतर्कावतारस्तत्र बहुत्वस्याबलवत्त्वेनोपाध्युद्भावनादेर्वैयर्थ्यमेव। **तस्मादुभयो**रपि व्याप्तिग्राहकसाम्येन विरोधान्न क्वचिदपि व्याप्तिनिश्चय इति तत् संशायकत्वं तथा। तच्च प्रत्यक्षेतरेऽप्यस्ति। **तदुक्तमुपाधेर्व्यभिचारशङ्कैवेति**। भवतु वा कश्चित् पक्षेतरो नोपाधिरुपादीयतां च तद्व्यावृत्तये विपक्षाव्यावर्त्तकेत्यादिकं विशेषणम्। **तथापि** लक्षणमतिव्याप्तकमेवाणवः सकर्तृकाः

कार्यत्वादित्यादावणुभिन्नत्वादौ। **तत्र** ह्यणुत्वरूपविशेषणस्य परमाणुरूपविपक्षव्यावर्त्तकतया यथोक्तस्य विपक्षाव्यावर्त्तकविशेषणशून्यत्वस्याक्षतेः।

यदि च वस्तुतः साध्याभावेऽपि परमाणौ सकर्त्तृकत्वसन्देहेन निश्चितसाध्याभाववत्त्वरूपं विपक्षत्वं न सम्भवतीत्युच्यते **तदा** जन्याणवः पक्षीकार्याः। **ननु** व्यभिचाराद्युन्नायकतामात्रेण दूषकतायां व्यापकव्यभिचारादावतिव्याप्तिः। **स्वव्यभिचारेण** व्यभिचारोन्नायकत्वस्य तथात्वे हेत्वनभिमते यत्र क्वचन व्यभिचारोन्नयनसमर्थे सर्वत्रापि विषमव्यापके सा दुर्वारेति साध्यव्याप्यत्वमावश्यकं **न चाणुभिन्नत्वं** तथेति **चेत् कोऽयं** हेतुदूषणौपयिकरूपवतस्तस्यानुपाधित्वे दुराग्रहः। **पक्षे**तरसाध्यवत्त्वनिवारणाय वा कमुपायमनुसरिष्यत्यायुष्मान्। **के**वलान्वयिसाध्यके पक्षेतरत्वं वा कां गतिं प्रतिपत्स्यत इति निपुणतरमूह**नीयम्। स्यादेतत्**। पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वम्। पर्यवसितत्वञ्च पक्षधर्मताबललभ्यत्वम्। **यथा** शब्दो नित्यत्वातिरिक्तो यः शब्दधर्मस्तदतिरिक्तधर्मवान् मेयत्वादित्यत्र पर्यवसितं यत् साध्यमनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः। **यदि** च तथैव कृतकत्वमपि शब्दे साध्ये तदा **नित्यत्वमुपाधिः**।

तात्पर्यटीका

नानासाधारण्यमुद्भावनार्हमित्युक्तं तत्रहेतुमाह साध्यतदभावयो**र्द्वयोरपीति**। पक्षमात्रवृत्तौ हि सपक्षविपक्षसामान्यनिष्ठाभावप्रतियोगित्वस्य सुबोधत्वादिति भावः। **अनवकाशात्** स्थापनाहेतुनैवासाधारण्यस्यकृतकर्त्तव्यत्वात्। **तथा सत्युपाधेः** सत्प्रतिपक्षोन्नायकत्वे सति। **तन्न** प्रतिबन्धकतौपयिकं साक्षादिति बहुत्वस्य प्रतिबन्धकतानवच्छेदकत्वादिति भावः। **स** उपाधिः। **परस्तर्कः। बाधादिना** एकत्रैव हेतावङ्गभङ्गबाधादिना। **उपाध्युद्**भावनादेरित्यादिना सत्प्रतिपक्षपरिग्रहः। उक्तास्वरसादाह **भवतु वेति**। कश्चिद्विपक्षाव्यावर्त्तकविशेषणावच्छिन्नसाध्यव्यापकताकः। विपक्षाव्यावर्त्तकविशेषणशून्यत्वेनापि न सकलपक्षेतरातिव्याप्तिर्वार्यत इत्याह **तथापीति**।

यद्यप्युन्नायकत्वं नामानुमितिजनकत्वं तच्च नोपाधौ तस्यानुमितिजनकोपाधिव्यभिचारज्ञाने विषयितयावच्छेदकत्वेनान्यथासिद्धत्वादित्यसम्भवो वक्तुमुचितस्तथापि प्रकृते कारणतावच्छेदकव्यावृत्तान्यथासिद्धिचतुष्टयशून्यत्वमेवोन्नायकत्वे यदि निविशते तदा नासम्भव इत्यतिव्याप्तिमाह। **व्यापकेति**। **सर्वत्रापिति**। पृथिवी संयोगादित्यत्र द्रव्यत्वादावत्र हि सत्तादौ द्रव्यत्वव्यभिचारेण पृथिवीत्वव्यभिचारः साधयितुं शक्यते न संयोग इति भावः। **कमुपायमिति**। तस्य साध्यव्याप्यत्वादपीति भावः। साध्यञ्च नोपाधिरित्युक्तं तत्र च सिद्धसाधनमेव व्यभिचारोन्नयने दोषोऽभिप्रेतः सोऽत्रापीति दूषकताबीजाभावादेव नाऽसौ दोष इत्यतो दोषान्तर**माह** **केवलान्वयिसाध्यक इति**। **कामिति**। वारयितुमिष्टस्याप्युक्तविशेषणेनावारणाद्दूषकताबीजानपायाच्चेति भावः। **स्यादेतदिति**। **एतदुपाधित्वम्**। **तथैव** कृतकत्वातिरिक्तशब्दधर्मातिरिक्तधर्मत्वेनैवं **यद्वा** तथैव स्वातन्त्र्येणैव। अनित्यत्वसाधनोपयोगितया कृतकत्वसाधने तु कृतकत्व व्यतिरेकस्यापि पक्षे निश्चयाभावने सत्प्रतिपक्षासम्भवादित्याशयः।

चषकम्

तदुक्तमार्यया। वाद्युक्तसाध्यनियमच्युतोऽपि कथकैरुपाधिरुद्भाव्यः। पर्यवसितं नियमयन् दूषकताबीजसाम्राज्यादिति। अनेन साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोप्युपाधिः सङ्गृह्यते। तादृशस्यापि साध्यस्य पर्यवसितत्वात्। **घटः** प्रत्यक्षो विभुत्वादित्यत्र बाधानवतारे साधनस्य स्वसमानाधिकरणसाध्यसाधकत्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकासङ्कीर्णसाधनावच्छिन्नसाध्यव्यापकात्मत्वस्यापि सङ्ग्रहसम्भवादिति। **अथः** काकः श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वेऽव्याप्तिस्तस्य पक्षावृत्तिसाध्यबाधे पर्यवसितपक्षीयसाध्याव्यापकत्वाद्व्यभिचारोन्नायकतया च लक्ष्यत्वात्। **किञ्च** कृतकत्वोपाधेरदूषकत्वापत्तिः। **न हि** तद्व्यभिचारेण हेतौ शुद्धसाध्यव्यभिचारः शक्योन्नयनः। शब्देऽनित्यत्वसाध्यबाधानवतारे तादृशव्यभिचाराप्रसिद्धे**रन्यथा** नैरर्थक्यान्न **वा** पर्यवसितसाध्यव्यभिचारः साध्यव्याप्यत्वविरोधीति **चेदत्र** लक्ष्यतानियामकं दूषकताबीजं

सत्प्रतिपक्षोन्नायकत्वं मीमांसकानां तत् समर्थत्वाच्च तत्र कृतकत्वमुपाधिः। **न तु** काकपक्षतायां बाधात्तदसमर्थ शाकपाकजत्वमिति। **न चैवं** साधनाव्यापकत्वं व्यर्थमिति **वाच्यम्**। साधनव्यापकस्याप्युपाधितया वक्ष्माणस्यानुष्णाशीतस्पर्शस्य कथकानामुपाधिव्यवहाराभावेन वारणीयात्। पर्यवसितसाध्यव्यापकस्यापि स्वरूपासिद्ध्या दूषणासमर्थस्य पक्षतावच्छेदकस्य काकत्वादेरुपाधितावारणाय **पक्षावृत्तित्वे सतीति** देयमेव।

अत्र केचित्। साध्ये यथोक्तपर्यवसितत्वविशेषणे द्व्यणुकस्य सावयत्वे **सिद्धे** द्व्यणुकमनित्यद्रव्यासमवेतं जन्यमहत्त्वानधिकरणद्रव्यत्वादित्यत्र निःस्पर्शद्रव्यसमवेतत्वमुपाधिः **स्याद्भवति** हि नित्यद्रव्यसमवेतत्वं पर्यवसितं साध्यं तस्य व्यापकं साधनाव्यापकञ्च तत्। **नन्वेव**मनवस्थानाद्द्रव्यारम्भ-कत्वानुपपत्तेश्च निरवयवं स्पर्शवत्किञ्चिदस्तीत्यवश्यं वाच्यमिति तत्समवेतद्रव्ये पर्यवसितं साध्यमस्ति नोपाधि**रन्यथा** स्पर्शवदसमवेतत्वस्य यथाश्रुतेऽपि तथात्वापत्तेर्दुर्वारत्वादिति **चेदस्त्वेवमापाततः**। तथापि पक्षधर्मताबल लभ्यसाध्यसिद्धावुपाधिर्निष्फलस्तदसिद्धौ कस्य व्यापकः। नहि सोपाधौ पक्षधर्मताबलात् साध्यं सिद्ध्यति यस्य व्यापक उपाधिः स्यादिति न **किञ्चिदेतत्**। **तत्र वदन्ति**। यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिर्लक्ष्यः। **एतद्विवृण्वते दीधितिकृतः**। **तथा** ह्युन्नीयत इति शेषः। **अत्र यद्यपि** पञ्चमीतृतीयाविकल्पितागुणहेतुपदाद्विधीयते गुणहेतुत्वञ्च कार्यस्य ज्ञाप्यस्य वाश्रयेष्वाश्रितत्वम्। **अत** एव पुत्र आहूतः पितुः पाण्डित्येन पर्वतो वह्निमान् धूमस्य सत्त्वेन वह्निव्याप्यत्वेन वेत्यादिवत् पाण्डित्याद्धूमस्य स्वस्मिन् सत्त्वाद्वह्निव्याप्तेरित्यादयो न प्रयोगाः।

तात्पर्यटीका

पर्यवसितसाध्यस्य घटप्रत्यक्षादेरव्यापकतात्मत्वादेः सङ्ग्रहायाह **घट इति**। बाधावतारे निरुक्तात्मत्वोपाधिसङ्ग्रहं दुर्घटं **मन्वानः** शाकपाकजत्वासङ्ग्रहं तुल्यवच्छङ्कते। **अथेति**। आत्मत्वतुल्यतया दत्तोत्तरत्वं मन्यमानो दोषान्तरमाशङ्कते। **किञ्चेति**। **पर्यवसित**साध्यव्यभिचारस्तु न दूषणौपयिकं रूपमित्याह **नवेति**। **देयमेवे**त्यवकारेण साधनाव्यापकत्वेनास्था दर्शिता।

सावयवत्वे सिद्ध इति। तदसिद्धौ त्वसमवेतत्वमेव पर्यवसितं साध्यं स्यात्तथा च निःस्पर्शद्रव्यसमवेतत्वस्य साध्याव्यापकत्वान्नोपाधित्वमापादयितुं शक्यमिति भावः। **अन्य**थोक्तद्रव्यानङ्गीकारे। **यथाश्रुतेऽपि** यथोक्तपर्यवसितत्वाविवक्षणेऽपि। अभ्युपगम्य समाधत्ते। **अस्त्विति**। एवमुपाधित्ववारणम्। द्रव्यारम्भकतावच्छेदकपृथ्व्यादिचतुष्टमात्र-वृत्तिभूतत्वजात्यभ्युपगन्तणां तस्य स्पर्शवत्त्वे विवादसम्भवादापातत **इत्युक्तम्**। उपाधेर्दूषकताबीजं विवेचयति। **तत्र वदन्तीति अत एव** गुणहेतुत्वस्येदृशस्य विवक्षितत्वादेव।

चषकम्

तस्यास्तृतीयाया उक्तपञ्चमीसमानार्थकत्वे पञ्चम्या अशक्यवारणीयतापत्तेः। तच्च प्रकृतेऽप्यस्ति। **तथ** च ज्ञापकत्वार्थकतृतीयैवोन्नायकत्वस्य विवक्षितस्य लाभे नोन्नीयत इति पूरणमनर्थकमिति **प्रतिभाति**। तथापि व्याप्तिपक्षधर्मत्वावगाहिनो ज्ञापकज्ञानस्य विषयत्वमेव तथाभूततृतीयया बोध्यते **न** तु ज्ञापकज्ञानविषयतामात्रमुक्तदोषा**दित्थञ्च** साधनरूपपक्षतावच्छेदकविशिष्टे उपाध्यभावरूपहेतुमत्तापरामर्शस्य साधनरूपक्षतावच्छेदके उपाध्यभावरूपहेतुसामानाधिकरण्यविधया साधने उपाधिव्यभिचारावगाहितया साधनरूपपक्षतावच्छेदकविशिष्टे साध्याभावरूपसाध्यवत्तानुमितेरपि साधनरूप-पक्षतावच्छेंदके साध्याभावरूपसाध्यसामानाधिकरण्यविधया साधने साध्यव्यभिचारावगाहितया च साधनवत्युपाध्यभावस्य साध्याभावोन्नाय-कत्वस्याप्युपाधिव्यभिचारस्य साधने साध्यव्यभिचारोन्नायकत्वेऽपि यदभावेन साधनवति साध्याभाव उन्नीयते इत्यर्थे एतत् पर्यवसानस्याग्रे कर्त्तव्यस्य विरोधः स्यादुक्तविधया ज्ञापकताया यद्व्यभिचारित्वपदोत्तरतृतीयया बोधनासम्भवादतस्त**दावश्यकम्**।

तथा सति पर्वतत्वस्य **धूमसामानाधिकरण्येन** वह्निसामानाधिकरण्य-मनुमीयत इति प्रयोगाद्धात्वर्थानुमितावुक्तविधया प्रयोजकत्वस्यापि तृतीयया

बोधनान्न विरोध इत्यन्यत्र **विस्तरः**। उन्नायकत्वं तद्योग्यता सा च व्याप्तिपक्षधर्मतं **तथा** च यद्व्यभिचारो यद्धर्मावच्छिन्नाभावाधिकरणी-भूतयत्किञ्चिदधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्तित्वसामान्यं साध्यव्यभिचारव्याप्यं **किञ्चिच्च** तदधिकरणवृत्तित्वं साधनवृत्ति च तद्धर्मावच्छिन्नं तत्रोपाधिरित्यर्थः **तेन** द्रव्यं जातेरित्यत्र गुणान्यत्वविशिष्ट-सत्तापि तत्त्वेनोपाधिः।

तात्पर्यटीका

अशक्यवारणीयतापत्तेरिति। तथा च सा तृतीया प्रयोज्यत्वार्थिका सूत्रान्तरानुशिष्टाऽन्यैवेति भावः। **तच्च** गुण हेतुत्वञ्च। **प्रकृते** यद्व्यभिचारे। **तथाभूतेति**। गुणहेतुपदाद्विहितेत्यर्थः। **उक्तदोषात्** पुत्र आहूतः पितुः पाण्डित्यादिति प्रयोगप्रसङ्गात्। **इत्थञ्च** निरुक्तज्ञापकज्ञानिविषयत्व-स्यैवोक्ततृतीयार्थत्वे च। **साध्यव्यभिचारोन्नायकत्वेऽपि** वस्तुगत्या साध्यव्यभिचारोन्नायकतारूपत्वेऽपि। **उक्तविधया** व्याप्तिपक्षधर्मत्वाव-गाहिज्ञापकज्ञानविषयतात्व**मरूपेण**। **तृतीयया** पञ्चमीविकल्पितृतीयया। **बोधनासम्भवादिति**। व्यभिचारित्वे व्याप्तिपक्षधर्मत्वानवगाहिन उपाध्यभावपरामर्शस्य यथोक्तविषयतायास्तत्र बाधादिति भावः।

तथा सत्युन्नीयत इति शेषे कृते सति। **तृतीया** सूत्रान्तरानुशिष्टया। न **विरोध इति** उन्नयनान्वितप्रयोज्यत्वार्थकतायास्तस्यां तृतीयायां सम्भवादिति भावः। **ननु** धर्मिविशेषणतापन्नसाध्य एव ज्ञापकत्वान्वयेन मुख्यविशेष्यसाध्यव्यभिचारित्वे कथं तृतीयार्थान्वयोऽ**न्यथा** धूमेन वह्निरित्यपि प्रयोगापत्तिरित्याशङ्क्य न तथा व्युत्पत्तिरत्राकाशमात्मन इति तथा व्युत्पत्तिविरोधमुज्झित्वा सम्प्रदायविरोधन च वह्निर्धूमादिति न प्रतिज्ञेति च दीधितिविरोधा**त्किन्तु** यद्धर्म्युपरागेणैषभासमानसाध्ये तृतीयार्थान्वयस्तद्धर्मिणि साध्यज्ञापकत्वं विभक्त्या बोध्यत इति व्युत्पत्तिस्तत एव धूमेन वह्निरिति प्रयोगवारणं प्रकृते च साधनोपरक्ते साध्यव्यभिचारित्वे तृतीयार्थान्वयेन तत्र तज्ज्ञापकत्वस्य विभक्त्या बोधने बाधकाभावश्चेत्याशयेनोक्त**मन्यत्र विस्तर**

इति। अत एव तद्धर्मिणि ज्ञापकत्वं तद्धर्मस्यैवेति पक्षधर्मत्वोपपादनायो**पनयः** पर्वतो वह्निमान्महानसत्वादित्यस्या**साधुता च**। यद्धर्मावच्छिन्नेत्यस्य फलमाह **तेनेति। तत्त्वेनोपाधिरिति।** अन्यथा सत्तात्वावच्छिन्नाभाववद्वृत्तित्वरूपव्यभिचारस्यैवाप्रसिद्ध्योपाधित्वं न स्यादिति भावः।

चषकम्

एवं संयोगेन धूमे साध्ये समवायेन वह्नौ हेतावार्द्रेन्धनरूपद्रव्यविशेषाभाववद्वृत्तित्वेन वह्नौ धूमव्यभिचारसाधनेऽप्यार्द्रेन्धनं द्रव्यत्वादिना न तत्रोपाधिः। **किञ्च** गुणत्वे प्रसिद्धस्य द्रव्यत्वावच्छिन्नाभाववद्वृत्तित्वस्य साध्यव्यभिचारव्याप्यत्वेऽपि प्रकृतसाधनात्मकपक्षीभूतवह्न्यवृत्तित्वात्। **न वा** व्यञ्जनाभाववद्धूमसंयोगिस्वावयवरूपयत्किञ्चिदधिकरणसमवेतत्वस्य स्वस्मिन् साधने सत्त्वेऽपि व्यञ्जनं तत्त्वेनोपाधिः। धूमसंयोगिमात्रसमवेतवह्निवृत्तियथोक्तस्वावयववृत्तित्वस्य साध्यव्यभिचाराव्याप्यत्वात्। **अत एव** सामान्येति। **अन्यथा** सत्तादिवृत्तियथोक्तस्वावयवादिवृत्तित्वस्य तथात्वात्तद्दोषतादवस्थ्यापात्तेः।

नन्वेवमपि तद्दोषतादवस्थ्यमेवोक्तधूमशून्यस्वावयवरूपयत्किञ्चिदधिकरणवृत्तित्वसामान्यस्य तथात्वादिति चेन्नात्रा**सद्धेतौ** तत्तथात्वेऽस्येष्टत्वाच्छाकपाकजत्ववत्। **न चैवं** साधनसमानाधिकरणधर्मान्तरवृत्तेस्तदधिकरणवृत्तित्वस्य साधनेऽसम्भव इति **वाच्यम्**। किञ्चिच्चेत्युक्तत्वात्। **न चेत्थं** दीधितिसन्दर्भ इति चे**च्छुणु**। तत्र हि वह्निर्धूमव्याप्य इति व्यवहाराभावेऽपि स तद्व्यभिचारीति व्यवहाराद्व्याप्यत्वस्य सर्वत्रान्वयेऽपि वृत्तित्वस्य **क्वचिदेवान्वयो** व्युत्पन्न इत्यनर्थान्तरम्। **कुतोऽन्यथा** प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचार्यनात्मद्रव्यत्वाव्यभिचारित्वे सत्यनात्मद्रव्यप्रत्यक्षत्वव्यापकोद्भूतरूपव्यभिचारित्वान्महत्त्ववदित्यत्र महत्त्वपदस्य जन्यमहत्त्वपरता तैरभ्यधाय्याभि**हिते** वा कथमिष्टसिद्धिरात्ममहत्त्वे सत्यन्ताभावेनेवोद्भूतरूपसमानाधिकरणजन्यमहत्त्वे विशेष्याभावेन दृष्टान्ते साधनवैकल्यानपायादिति।

तात्पर्यटीका

अत्रैव यद्धर्मतद्धर्मपदयोः सामानाधिकरण्यं स्पृष्टयितुं तद्धर्मावच्छिन्नमित्यस्य फलमाह। **एवमिति**। **द्रव्यविशेषेति**। तेन तद्धर्मावच्छिन्नमित्यनुक्तौ द्रव्यसामान्यस्य तत्रोपाधित्वं स्यादिति सूचितम्। **वह्न्यवृत्तित्वादिति**। तथा च वह्नेर्गुणवृत्तित्वेन कस्यापि गुणवृत्तित्वस्य वह्न्यवृत्तित्वादिति भावः। आर्द्रेन्धनं द्रव्यत्वादिना न तत्रोपाधिरिति योजना। समवायानुधावनं स्पृष्टयितुं चरमोक्तस्यापि साधनवृत्ति चेत्यस्य फलमाह। **किञ्चेति**। **गुणत्वे प्रसिद्धस्येति**। अत एव समवायेन हेतावित्युक्तं प्राक्। साध्यव्यभिचारव्याप्यमित्यस्य फलमाह **न वेति**। **ननु धूमा**संयोगिस्वावयवावच्छेदेन धूमव्यभिचारस्यापि स्वस्मिन् सम्भवात् कथं तद्वारणमत आह। **धूमसंयोगिमात्रेति** मात्रपदेन धूमासंयोगिव्यवच्छेदः। तथा च यद्वह्नेरवयवः कश्चिदपि न धूमासंयोगी तद्धेतुके व्यञ्जनस्योपाधित्वं वारितमेव व्याप्यमित्यन्तेनेति भावः। **यथोक्तेति**। व्यञ्जने शून्येत्यर्थः। **तथात्वा**देकव्यक्तिसत्तायां साध्यव्यभिचारस्यापि सत्त्वेन तस्य साध्यव्यभिचारव्याप्यत्वात्। **तद्दोषतादवस्थ्येति**। व्यञ्जनस्योपाधित्व-तादवस्थ्ये**त्यर्थः**।

अत्रासद्धेतौ धूमशून्य स्वावयवसमवेतवह्नौ। तेन धूमसंयोगिमात्रसमवेतो वह्निः सद्धेतुरिति सूचितम्। **ननु** साध्यव्यापकत्वाभावात् कथं व्यञ्जनं तत्त्वेनोपाधिः स्यादत आह। **शाकजत्ववदिति**। तथा चात्रापि महानसधूमासंयोगि-स्वावयवान्यतरत्वावच्छिन्नसाध्याव्यापकतास्त्येवेति भावः। **एवं** सामान्यपदोपादाने। **अनर्थान्तर**मर्थान्तरं न भवति **किन्त्वस्मदुक्त एवेति** यावत्। **तैर्भ**ट्टाचार्यशिरोमणिभिः। **कथ**मिष्टसिद्धिर्जन्यमहत्त्वेऽपि दृष्टान्ते विशिष्टसाधनसत्ता। तदेवाहा**त्ममहत्त्व इति**।

चषकम्

शुद्धसाध्यव्यापके तूपाध्यभाववन्मात्रवृत्तित्वं यद्यपि सम्बन्धान्तरा-वच्छिन्नं धूमव्या**प्येऽपि तथापि** हेतुतावच्छेदकसम्बन्धावच्छिन्नं

तत्साध्यव्यभिचारव्याप्यम्। **अवच्छिन्न**साध्यव्यापकं पुनः साधनपक्षधर्मरूपावच्छेदकाधिकरणीभूततत्तदभावाधिकरणव्यक्तिविशेषवृत्तित्वं तथेत्थमवच्छिन्नसाध्यव्यापकसङ्ग्रहाय **यत्किञ्चिदि**त्युक्तमित्युभयत्रापि लक्षणसमन्वयः। **अत एव** द्रव्यत्वेन रूपे साध्ये सत्ता द्रव्यत्वजलत्वमात्रविशेषयकधीविशेष्यत्वे सति जलसमवेतनित्यत्वे सति वा पृथिवीत्ववद्वृत्तित्वादित्यादिना प्रकारेण द्रव्यत्वं रूपव्यभिचारोन्नयनसमर्थोऽपि पृथिवीत्वाभावादिर्नोपाधिः। **न हि** पृथिवीत्वात्मकस्य तदभावस्याधिकरणं तादृशं किञ्चिदस्ति यद्वृत्तित्वसामान्यं साध्यव्यभिचारव्याप्यं पृथिवीत्वादावेव व्यभिचारात्। कैव कथा नानैव रूपैर्गुरुत्वे साध्ये व्यभिचारव्याप्त्येतत् साधनरूपपक्षधर्मताभ्यां विकलव्यभिचारिणस्तस्य।

पृथिवीरूपे साध्यव्यभिचाराभावात् **पृथित्ववद्**वृत्तित्वस्य तेजोरूपात्मकपक्षीभूतसाधनावृत्तित्वाच्च। **न च** व्यभिचारोन्नायकत्वमात्रेण प्रकृतोपाधित्वनिर्वाहः। **किन्तु** कथकानां तथाविधव्यवहारविषयत्वेन तदवच्छेदकञ्च यथोक्तम्। **ननु** साध्यव्यभिचारव्याप्यमित्यस्य स्थानेऽव्यभिचरितत्वविशिष्टसामानाधिकरण्यरूपसाध्यव्याप्यत्वाभावव्याप्यमित्येवोच्यतां तावतापि पृथिवीत्वाभाववारणादिति **चेन्न** गौरवात्। **अत** एवेदं जलमाकाशादित्यत्र स्वाव्याप्यत्वेन जलत्वाव्याप्यत्वोन्नायकस्यापि द्रव्यत्वादेरसङ्ग्रहो न दोषाय यथोक्तस्य लघोर्व्यवहारविषयतावच्छेदकस्य तत्र द्रव्यत्वेऽसत्त्वेनोपाधित्व-व्यवहारानुपगमात्। **अथैवं** विशेषितेनाविशेषितेन वा स्वव्यभिचारेण व्यभिचारोन्नायकत्वमेव तथाऽस्त्वति लाघवात्तच्चोक्तोपाधावप्यस्तीति **चेदेवं** तर्हि साध्याभावसाधनोभयाधिकरणवृत्त्यभावप्रतियोगित्वमेव तथास्त्वितोऽपि **लाघवादस्तु** च सहार्थतृतीयाश्रयणेनास्यापि स एवार्थः। **न चेद**मुक्तोपाधौ।

तात्पर्यटीका

उपाध्यभाववन्मात्रवृत्तित्वमुपाध्यभाववद्वृत्तित्वसामान्यम्। **अत एवो**पाध्यभावाधिकरणकिञ्चिद्वृत्तित्वसामान्यस्य साध्यव्यभिचारव्याप्यत्व-विवक्षणादेव। दृष्टान्तासिद्धिपरिहाराया **सत्तान्तर्भावः**। स्वरूपासिद्धिपरिहाराय

द्रव्यत्वान्तर्भाव:। जलत्वाप्रवेशे सत्यन्तस्यैव साध्यव्यभिचारव्याप्यत्व-सम्भवादुपाधिव्यभिचारस्य नोन्नायकत्वमिति **तत्प्रवेश**:। तथा सति जलत्वं साध्यव्यभिचाराभावात् पृथिवीत्ववद्वृत्तित्वं विशेष्यमावश्यकमिति तस्योन्नायकत्वं युज्यते इत्याशय:। लाघवादाह **जलसमवेत नित्यत्वे सति वेति**। कैमुतिकन्यायेनाह। **कैव कथेति**। नानैवेत्यनेन द्रव्यत्वे तु साध्योपाधिव्यभिचारयो: सामानाधिकरण्यमस्ति रूपे तु तदपि नास्तीत्यादर्शितम्। कैमुतिकन्यायमेवोपपादयति। **साध्यव्यभिचारव्याप्तीति**। विकलव्यभिचारिण इति न कर्मधारयान्मतुबर्थीय इत्यस्य लाघवमूलकस्यानित्यत्वात् साधु।

कथं व्यभिचारस्य वैकल्यं तद्दर्शयति। **पृथिवीरूप इति**। **पृथिवीत्ववद्वृत्तित्वस्येति** च। **यथोक्तं** यद्व्यभिचार इत्यादिना निरुक्तम्। **अत एव** व्यवहाराविषयस्योपाधित्वानङ्गीकारादेव। **एवं** लाघवेन यथोक्तस्य व्यवहार्यतावच्छेदकत्वोपगमे। **विशेषितेन** सत्ताद्रव्यत्वेत्यादिविशेषणविशिष्टेन। **अविशेषितेन** वा शुद्धसाध्याव्यापके केवलेन वा। **अतिलाघवाद्**-भवदुक्तयथोक्तरूपापेक्षयाऽपिलाघवात्। **उक्तोपाधावपि पृथिवीत्वाभावो-पाधावपि एवं तर्हीति**। व्यवहारमनादृत्य लाघवमात्रादरे इत्यर्थ:। **इतोऽपीति**। उन्नायकत्वांशस्याऽप्यप्रवेशादिति भाव:।

चषकम्

यथाश्रुते विरु[१]द्धसाधारण्यात् साध्यसामानाधिकरण्यविशेषणेऽपि तद्रूपे ज्ञाते एव व्यभिचारस्य निर्ज्ञातत्वेन साध्यव्यभिचारानुन्नायकत्वाच्चैतद्रूपमात्रज्ञाने तेषां नोपाधिव्यवहार **इति चेत्तुल्यमिदं** पृथिवीत्वाभावसङ्ग्राहके त्वदुक्तेऽपि। व्यवहारस्य पृथिवीत्वाभावव्यावृत्तत्वादेव शुद्धसाध्याव्यापकस्थले साध्ये व्याप्यतावच्छेदकं नियतमतस्तादृशं धर्ममनुसरन्ति ते। यद्धर्मवति साध्यव्यभिचारनियमो भवत्युपाधिव्यभिचारस्य। **यथा** स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वे मित्रातनयत्वम्। **यथा** वा वायु: प्रत्यक्ष:

---

१. धूमवान् वह्नेरित्यविरुद्धजलत्वसाधारण्यात्।

प्रेमयत्वादित्यत्रोद्भूतरूपे आत्मान्यद्रव्यत्वं **अन्यथा** सत्ताश्याममित्रातनयत्वमात्रविशेष्यकधीविशेष्यत्वे सति शाकपाकजत्वव्यभिचारित्वादित्यादिना **प्रकारेण** तत्रापि व्यभिचारानुमानसम्भवे तदनुसरणं वृथा स्या**च्छ्याममित्रातनयत्वञ्च** तद्वृत्तिधर्मस्तच्छ्यामं रूपं मित्रातनयत्वञ्चेति तच्छ्यामरूपे व्यभिचारवारणाय **विशेष्यम्**। रूपवान् द्रव्यत्वादित्यत्र पृथिवीत्वाभावे तु नैवं कश्चिद्धर्मोऽस्ति यदधिकरणे उपाधिव्यभिचारो वाऽस्य साध्यव्यभिचारनियमो वा भवेत्।

तस्य पृथिवीव्यावृत्तिसाधारण्याभ्यां व्याघातात्। **तस्माद्य**द्धर्माधिकरणे यद्व्यभिचारः साध्यव्यभिचारनियतस्तद्धर्मावच्छिन्नस्यैव साध्यस्य व्यापकः स एव तत्रोपाधित्वेन तेषां व्यवहार्यो नानीदृक्पृथिवीत्वाभावोऽपि। साध्याभावासमानाधिकरणाभावकत्वा**दतएव** विभिन्नाधिकरणे साध्यव्यभिचारनियतव्यभिचारकोऽपि हेतुमति साध्यासमानाधिकरणो नोपाधिः। **यथेदमेतद्रू**पाभिन्नं गुणत्वादित्यादावेतद्रूपभेदादिः। **यथा वा** महाकाऽलान्यो घटादित्यत्र खण्डकालभेद इति **तत्राद्यः** साध्यासमानाधिकरण एवान्त्यस्तु व्योमादौ साध्यसमानाधिकरणेऽपि हेतुमति न तथेति विशेषः। **तत्र** ह्येतद्रूपसमवेतमात्रस्यैवैतद्रूपभिन्नसमवेतत्वात्खण्डकालवृत्तेर्विशेषणतया महाकालवृत्तित्वनियमाच्च।

तात्पर्यटीका

यथाश्रुते साध्यसामानाधिकरण्याघटिते। तुल्यमिदं पृथिवीत्वाभावेनोपाधिव्यवहार इत्युत्तरम्। **त्वदुक्तेऽपि** विशेषितेनेत्यादिना त्वदुक्तेऽपि। पृथिवीत्वाभावो न तथा व्यवहार्यस्तेषामिति कुतोऽवगतमित्याशङ्क्याह **व्यवहारस्येति**। **ते** व्यवहारविदः कथकाः। **न चात्र** पृथिव्यन्यत्वं तादृशो धर्मस्तद्वति वाय्वादौ पृथिवीत्वाभावव्यभिचारस्यैवाभावात्। **न वा** पृथिवीत्वमपि। स्वस्मिन्नेवोपाधिव्यभिचारिण साध्यव्यभिचाराभावान्नीरूपपृथिव्या**भावादिति** भावः। तादृशं धर्ममुदाहरति। **यथेति**। विशेष्यदलप्रयोजनं स्फुटयन्नुपाधिव्यभिचारस्य साध्यव्यभिचारोन्नायकत्वं दर्शयति।

श्याममित्रातनयत्वञ्चेति पृथिवीत्वाधिकरणे उपाधिव्यभिचारसम्भवादा**हास्येति**। उपाधिर्व्यभिचारस्येत्यर्थः।

तस्य धर्मस्य **पृथिवीव्यावृत्तिसाधारण्याभ्यामिति**। पृथिव्यन्यत्वादे-रुपाधिव्यभिचारस्यैवाभावात् पृथिवीत्वादेः साध्यव्यभिचारनियमाभावाच्चेत्यर्थः। यद्धर्माधिकरणे यद्व्यभिचारः साध्यव्यभिचारनियत इत्यनेन तदधिकरणे उपाधिव्यभिचारस्य साध्यव्यभिचारव्याप्यत्वमादर्शितम्। तेन च तदधिकरणे साध्यसत्त्वेऽवश्यमुपाधिसत्त्वमिति दर्शयति। **तद्धर्मावच्छिन्नस्यैवेति**। अतिप्रसङ्गं वारयति। **नानीदृगिति**। तत्र हेतुमाह। **साध्याभावेति**। का कथा व्याप्यत्वादेरिति भावः। **अत एव** यत्किञ्चिदधिकरणे इत्यस्य प्रवेशादेव। **विभिन्नाधिकरण** इति। यथैतद्रूपाभिन्नं गुणत्वादित्यत्रैतद्रूपभेद उपाधिस्तद्व्यभिचार एतद्रूपावच्छेदने गुणत्वेऽस्त **न तु** तदवच्छेदेन साध्यव्यभिचारः। **किन्त्वेतद्रूपभिन्नरूपावच्छेदन सोऽस्ति नतूपाधिव्यभिचार** इति भावः। **एतद्रूपसमवेतमात्रस्यैवेत्य**नेनोपाधिव्यभिचार एतद्रूपावच्छेदन दर्शितः। एतद्रूपाभिन्नसमवेतत्वादित्यनेनैतद्रूपभिन्नावच्छेदेन साध्यव्यभिचारो दर्शितः। इत्थमेवोदाहरणान्तरेऽपि योज्यमित्याह **खण्डकालवृत्तेरिति**।

चषकम्

तदुतम्– "सर्वे साध्यसमानाधिकरणाः सदुपाधयः हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिते"ति। एकस्य कस्यचित्साध्यनिष्ठोपाधि-व्याप्यतावच्छेदकधर्मस्याश्रये येषां समुदायप्रविष्टस्य स्वस्योपाधेः साध्यस्य च व्यभिचारिता हेतोस्ते हेतोरेकाश्रये साध्यसमानाधिकरणाः सर्वे सदुपाधय उपाधित्वेन कथकैर्व्यवहार्या इति **तस्यार्थः**। **ननु** जलं स्नेहवद् द्रव्यत्वादित्यादौ जलत्वतेजस्त्वोभयमुपाधिः स्यादुपाधितावच्छेदकोभयत्वाश्रयीभूतजलत्वस्य साध्यसमानाधिकरणत्वाद्द्रव्यत्वरूपहेतोरधिकरणे पृथिव्यादौ यस्मिन् कस्मिंश्चित्साध्योपाध्योर्व्यभिचाराच्चेति **चेदत्राहुः**। यदभावेन यद्वदन्यत्वेन वा साधनवति साध्याभाव उन्नीयते स उपाधिर्लाघवाद्द्रव्यं सत्त्वादित्यत्र संयोगसङ्ग्रहाय **यद्वदन्यत्वेन वेति**। अत एव जलत्वतेजस्त्वयोस्तदुभयत्वेन

न क्वचिदप्युपाधित्वं जले उभयाभावेऽपि स्नेहरूपसाध्यसत्त्वादुभयवतोऽप्रसिद्धत्वाच्चेति **सङ्क्षेपः**।

यद्व्यभिचारित्वेनेत्यस्यापि स एवार्थः। लघुभूतार्थे तात्पर्यकल्पनाया एवोचितत्वात्। **तथा हि**। वह्निमान् धूमाभाववानार्द्रेन्धनाभावादित्यादावार्द्रेन्धनाभावेन धूमाभावे वह्निमत्यनुमीयमाने यद्व्यभिचारित्वेनोपाध्यभावरूपहेतुमद्वृत्तित्वविधया साधनस्य पक्षतावच्छेदकीभूतस्योन्नायकज्ञाने विषयीभवता प्रयोज्यायाः साध्यव्यभिचारित्वं सिद्ध्यति साध्याभावरूपसाध्यवत्पक्षवृत्तित्वविधयानुमितेर्विषयीभवतीति। **लक्षणं** तु पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वम्। **अत्र** यद्धर्मवति साध्यं प्रसिद्धं तद्धर्मसमानाधिकरणं साध्यं पर्यवसितमित्युच्यते। **तेन** चैतद्घटोत्पत्तिकालीनरूपस्यैतद्घटेऽसत्त्वे नैतद्घटान्यत्वस्यैतद्घटोत्पत्तिकालावच्छिन्नरूपव्यापकत्वेऽप्येतद्घटोत्पत्तिकालीनत्वं रूपं चैतद्घटेऽपीति तत्रावर्त्तमानमेतद्घटान्यत्वं न निरुक्तपर्यवसितसाध्यीभूतरूपव्यापकमिति रूपवान् पृथिवीत्वादित्यत्र नैतद्घटान्यत्वमुपाधिः। **स च** धर्मः क्वचित्साधनमेव क्वचिद्द्रव्यत्वादि। क्वचिन्महानसत्वादि। **तथा हि**। समव्याप्तस्य विषमव्याप्तस्य वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभिचारः स्फुट एव। व्यापकव्यभिचारिणो व्याप्यव्यभिचारित्वनियमात् साधनपक्षधर्मावच्छिन्नसाध्यव्यापकयोर्व्यभिचारित्वेनापि साधनस्य साध्यव्यभिचारित्वमेव।

तात्पर्यटीका

व्याप्यतावच्छेदकधर्मस्य व्याप्यतावच्छेदकघटकधर्मस्य। **तेन** गौरवेण साध्यतानवच्छेदकस्य कस्यचिदुपाधिव्याप्यतानवच्छेदकतया शुद्धसाध्यव्यापके तस्मिन्नाव्याप्तिस्तत्रापि तादृशधर्माणां परिचायकत्वात्तद्रूपसाध्यकेऽपि परिचायकत्वानपायादित्यग्रे व्यक्तम् यद्व्यभिचारित्वेनेत्यस्य यथोक्तार्थं परिहर्त्तुं शङ्कते। **नन्विति**। समाधत्ते। **अत्राहुरिति**। **यदभावेन** वस्तुतो यदभावेन। **एतेना**योगोलकत्वत्वेनायोगोलकत्वस्यैव गमकत्वसम्भवेनायोगोलकत्वाभावा-

भावत्वेन गमकत्वासम्भवादयोगोलकत्वाभावो नोपाधिः स्यादिति **प्रत्युक्तम्**। **ला**घवाद्यव्यभिचारित्वेनेत्येतदपेक्षया लाघवात्। **अत एवो**पाध्यभावादः साध्याभावानुन्नायकत्वादेव। **अत्रेदं** तेजो द्रव्यत्वादित्यत्र जात्यभावस्य विरुद्धस्योपाधितापत्तिर्जात्यभावाभावेन जलत्वेन द्रव्ये तेजस्त्वाभावोन्नयन-सम्भवादतः साध्यसामानाधिकरण्यमुपाधौ देयमित्यभिप्रेत्याह **सङ्क्षेप इति**।

यद्व्यभिचारित्वेनेत्यादिपूर्वकल्पे तु यद्धर्मपर्याप्त्यधिकरणे साध्यसामानाधिकरण्यं देयमन्यथोक्तद्वित्वावच्छिन्नस्य व्यभिचारोन्नयन-समर्थस्योपाधिताया यथाश्रुतेनावधारणादित्येवमपि गौरवं इष्टव्यमिति **तदर्थः**। पूर्वनिरुक्तपर्यवसितत्वस्य **दूषितत्वादाहात्रेति। एतद्घटेऽपीति**। तथा चैतद्घटोत्पत्तिकालावच्छिन्नरूपस्यैतद्घटेऽसत्त्वेऽप्येतद्घटोत्पत्तिकालीनत्व-सामानाधिकरण्यावच्छिन्नं रूपमेतद्घटेऽस्त्येवेति भावः। **स च** धर्मः साध्यसमानाधिकरणतयाप्रसिद्धिविषयश्च धर्मः साधनमेवेति सौलभ्यार्थकेनैवकारेण सद्धेतौ साधनावच्छिन्नसाध्यव्यापकस्येन्धनादेः साधनाव्यापकत्वासम्भवादेव नातिप्रसङ्ग इति सूचितमितरयोः सम्भवन्नसावग्रे **निरसनीयः**।

चषकम्

साधनपक्षधर्मावच्छिन्नसाध्यव्यापकयोर्व्यभि चारित्वेनापि साधनस्य साध्यव्यभिचारित्वमेव। **यथा** ध्वंसस्यानित्यत्वे सा ये भावत्वस्य **यथा** वा वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपस्य। **नन्वेवं** प्रत्यक्षस्य स्पर्शाश्रयत्वं बहिर्द्रव्यप्रत्यक्षत्वव्यभिचारि बहिर्द्रव्यप्रत्यक्षत्वव्यापकोदभूतरूपव्यभि-चारित्वादित्याद्यनुमानेऽर्थान्तरं शुद्धसाध्यव्यभिचारो हि जिज्ञासितः प्रकृतानुमानदोषत्वान्न **तु** विशिष्टसाध्यव्यभिचार इति **चेच्छृणु**। विशेषणाव्यभिचारिणि विशिष्टव्यभिचारस्य विशेष्यव्यभिचारित्वनियमात् प्रकृते विशेषणाव्यभिचारित्वेन ज्ञाते साधनं विशिष्टव्यभिचारः सिद्ध्यन् विशेष्यसाध्यव्यभिचारमादायैव सिद्ध्यतीति नार्थान्तरम्। सामान्यतो दृष्टस्यैकविशेषबाधेऽपरविशेषालम्बनंत्वादन्यथा विशिष्टाभावस्य

विशेषणविशेष्याभावाभ्यामनतिरिक्तत्वेन प्रतीतेरपर्यवसानात्। **न च** पक्षधर्मताबलादपि प्रकृतसिद्धावर्थान्तरम्। **यद्वा** प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि बहिर्द्रव्ये उद्भूतरूपव्यभिचारित्वादिति **एवं** जन्यत्वं विनाशित्वव्यभिचारि जन्ये भावत्वव्यभिचारित्वादिति वा व्यभिचारोन्नयनम्। तेन विशिष्टाभावस्यातिरिक्तत्वेऽपि न क्षतिः। **न वा** मेयत्वे साधने बहिर्द्रव्यत्वरूपविशेषणाव्यभिचारित्वस्यासत्त्वेनोक्तरीत्या साध्यव्यभिचार-पर्यवसानासम्भवेऽपि च क्षतिरिति।

एतदेव पक्षद्वयं सुमुग्धाकारेण सत्प्रतिपक्षोन्नयनपक्षमालम्ब्य विलिलिखुर्दीधिति**कृतः** सिद्ध्यति च विशेषणवति विशिष्टसाध्यव्यापकव्यतिरेकेण शुद्धसाध्यव्यतिरेक इति। एतावन्मात्रे कृते वह्निमान् धूमादित्यादौ महानसत्वावच्छिन्नसाध्यव्यापकव्यञ्जनवत्त्वादा**दावेवं** सत्तावान् जातेरित्यादौ द्रव्यत्वावच्छिन्नसाध्यव्यापकसंयोगादौ चातिप्रसङ्ग **इति चेतद्धर्मा**वच्छिन्नसाधनाव्यापकत्वमप्युच्यतां **किम्वा**स्वानधिकरणसाधनाधि-करणवृत्तिधर्मत्वेन ते धर्मा अनुगम्यन्ताम्। प्रत्यक्षो गुणत्वादित्यत्र च वह्निर्द्रव्यत्वस्यातथात्वेऽपि द्व्यणुकजन्यत्वस्यैव तथात्वेन तदवच्छिन्नसाध्यव्यापकत्वादविकलमेवोद्भूतरूपस्योपाधित्वम्। **एतेनैक**-स्मिन्नेवोपाधौ व्याप्यतावच्छेदकधर्मभेदाल्लक्षणभेदोऽपि **परिहृतः**। **सद्धेतौ** तु व्यञ्जनानधिकरणसाधनाधिकरणपर्वतवृत्तिधर्मावच्छिन्नं साध्यं स्वानधिकरणेऽस्मिन्नवश्यमस्त्यन्यथा व्यभिचारितापत्तेरिति न तद्व्यापकं व्यञ्जनवत्त्वमित्येव सामञ्जस्यात्।

तात्पर्यटीका

सहकार्यन्तरवशात् कथञ्चिदपि जिज्ञासितार्थसिद्धौ नार्थान्तरमित्याह। **विशेणाव्यभिचारिणीति। सामान्यतोदृष्टस्य** विशेषणाभावविशेष्या-भावसाधारणरूपावच्छिन्नविषयकज्ञानस्य। **अन्यथा**बाधितविषयाति-रिक्तविषयस्याप्यनालम्बने। **अपर्यवसाना**न्निरालम्बनत्वापात्। **न चेति** न हीत्यर्थः **तेनेत्यादिना** च क्षतिरित्यन्तेन वक्ष्यमाणास्वरसादाह **यद्वेति**।

संमुग्धाकारेणैकोक्त्या विशेषणवतीत्यस्यार्थद्वयप्रापकत्वा**त्तथा हि**। विशिष्टसाध्यव्यापकव्यतिरेकेण विशिष्टसाध्यव्यतिरेक: सिद्ध्यन्विशेषणवति विशेषणवत्तया निश्चिते पक्षे शुद्धसाध्यव्यतिरेके पर्यवस्यतीत्येकोऽर्थ:। विशिष्टसाध्यव्यापकव्यतिरेकेणैव हेतुना विशेषणवति परामृष्टेन विशेषणवद्वृत्तित्वविशेषितेनेति यावच्छुद्धसाध्यव्यतिरेक: सिद्ध्यत्याहत्य सिद्ध्यतीत्यपरोऽर्थ:। संयोगादावित्यादिनैकत्वपरिग्रह:। **अत**थात्वेऽप्युपाध्यनधिकरणसाधनाधिकरणवृत्तिधर्मत्वाभावेऽपि। **तथात्वेनो**पाध्यनधिकरणसाधनाधिकरणद्व्यणुकरूपवृत्तिधर्मत्वेन। **एतेनो**क्तानुगमेन। **व्याप्य**तावच्छेदकधर्मभेदाद्बहिर्द्रव्यत्वद्व्यणुकजन्यत्वरूपोक्तधर्मभेदात्। साधनाव्यापकत्वविशेषणं विनापि न सद्धेतावतिप्रसङ्ग इति दर्शयति। **सद्धेतौ त्विति**। **अन्यथो**पाध्यनधिकरणसाधनवत: साध्यशून्यत्वे।

चषकम्

तद्धर्मावच्छिन्नसाध्यव्यापकत्वं तु न तन्निष्ठव्याप्तिनिरूपकत्वम्। **किन्तु** तद्धर्माधिकरणीभूतसाध्याधिकरणनिष्ठभेदप्रतियोगितानवच्छेदकत्वादिरूपं शुद्धसाध्यव्यापकोपाधिसाधारणम्। **तत्रापि** प्रतियोगिता विशिष्योपादेयेति तद्रूपवान् द्रव्यत्वादित्यादौ किञ्चिद्रूपावच्छिन्नतद्रूपसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्य गुरोरनवच्छेदकत्वेऽपि न क्षति:। **नाना**व्यक्तिकार्द्रेन्धनादे: सङ्ग्रहाय तूपाधितावच्छेदके तादृशप्रतियोगितावच्छेदकतानवच्छेदकत्वं वक्तव्यम्। **इत्थञ्च** यत्रैव स्वानधिकरणे साधनस्य साध्यव्यभिचारो यत्र च स्वाधिकरणे साध्यम्। तदुभयमात्रवृत्तिर्यो धर्मस्तदधिकरणे उपाधिव्यभिचारेण साधने साध्यव्यभिचार: साधनीय:।

वायु: प्रत्यक्षो द्रव्यत्वादित्यत्र यत्र स्वाधिकरणे साध्यं घटादौ तद्वृत्तिद्रव्यत्वावच्छिन्नं साध्यमात्मनि तत्र नोद्भूतं रूपमिति तस्य साध्यव्यापकत्वोपपत्तये **यत्रैवे त्यादि**। तत्रापि साध्यव्यभिचारनिरूपकाधिकरणपरमाणुघटान्यतरत्वावच्छिन्नसाधनाव्यापकत्वासम्भवात्तदुपपत्तये **स्वानधिकरण इति**। स्वानधिकरणात्मघटान्यतरत्ववारणाय **साध्यव्यभिचार**

इति। अतीन्द्रियरूपाद्यवच्छेदन तदवृत्तिद्रव्यत्वसाधने साध्यव्याभिचारान्न-यनासम्भवात्तत्साधारणातीन्द्रियरूघटान्यतरत्ववारणाय साध्यभाव इति **नोक्तम्**। सत्तायाः साध्यव्याभिचारोऽप्यतीन्द्रियरूपेऽस्तीति **साधनस्येति**। नीरूपाध्यक्षात्मसाधारणधर्मावच्छिन्नसाध्यव्यापकता दुर्घटा माभूदित्यात्मगग-नान्यतरत्ववारणाय **स्वाधिकरण इति**। परमाणुगगनान्यतरत्वावच्छिन्नसाध्या-प्रसिद्ध्या तद्व्यापकता दुर्घटा माभूदिति तद्वारणाय **साध्यमिति**। मित्रातनयत्वं श्यामत्वव्यभिचारि प्राणिनि शाकपाकजत्वव्यभिचारित्वादित्यत्र गौरमित्रातनयश्याममित्रातनयोभयवृत्तिप्राणित्वावच्छिन्नं श्यामत्वं काकादावुपाधिशून्येऽपीति काकत्वे व्यभिचार इति **मात्रेति**। **किञ्चद्धर्मा**वच्छिन्नसाध्यव्यापकत्वेऽपि स्वानधिकरणसाधनाधिकरण-पक्षधर्मावच्छिन्नसाध्यस्य पक्षेऽपि सन्देहादनुकूलतर्काभावेनोपाधित्वौ-पयिकधर्मावच्छिन्नसाध्यव्यापकत्वानिश्चयान्न पक्षेतरेऽतिव्याप्तिः। **यत्र तु** बाधोन्नीतपक्षेतरेऽनुकूलतर्कोऽप्यस्ति स भवत्येवोपाधिर्यथा वह्निरनुष्णः कृतकत्वादित्यत्र **वह्नीतरत्वम्**।

तात्पर्यटीका

ननु तद्धर्मावच्छिन्नसाध्यव्यापकत्वं यदि तद्धर्मावच्छिन्न-साध्यनिष्ठव्याप्तिनिरूपकत्वं तदा शुद्धसाध्यव्यापकार्द्रेन्धनाव्याप्तिस्तत्र शुद्धसाध्यतावच्छेदकस्यैवोपाधिव्याप्यतावच्छेदकत्वसम्भवेन तद्धर्मावच्छिन्न-साध्यनिष्ठव्याप्त्यप्रसिद्धेरत आह तद्धर्मावच्छिन्नसाध्यव्यापकत्वं त्विति। **ननु** तद्रूपवान् द्रव्यत्वादित्यत्र तदेतद्घटान्यतरत्वावच्छिन्नसाध्यव्यापक-तद्रसेऽव्याप्तिरन्यतरत्वाधिकरणीभूततद्रूपाधिकरणनिष्ठभेदप्रतियोगिता-वच्छेदकत्वस्य तद्रूपाधिकरणनिष्ठभेदप्रतियोगितावच्छेदकत्वापेक्षया गुरुणोऽनवच्छेदकत्वेनोपाधौ यथोक्तानवच्छेदकत्वरूपतादृशधर्मावच्छिन्नसाध्य-व्यापकताया अपि दुर्वचत्वादत आह। **तत्रापीति**। **प्रतियोगिता** वस्तुगत्या तद्धर्माधिकरणीभूतसाध्याधिकरणनिष्ठभेदप्रतियोगिता। **विशिष्य** प्रातिस्विकरूपेण। **नन्वेवं** तत्तद्धूमवति तत्तदार्द्रेन्धनवद्भेदस्यापि सुलभत्वेन

तादृशप्रतियोगितानवच्छेदकत्वमार्द्रेधनं दुर्लभमत आह। **नानाव्यक्तिकार्द्रेन्धनादेरिति**। तथा चोपाधितावच्छेदके तादृशभेदप्रतियोगितावच्छेदकतावच्छेदकतावच्छेदकत्वपर्याप्त्यनधिकरणत्वं वक्तव्यमिति विशिष्टस्यानतिरिक्तत्वेऽपि न क्षतिरित्याशय:। **इत्थञ्च** स्वानधिकरणसाधनाधिकरणवृत्तित्वेनोक्तधर्मानुगमे च। **साधनीयो**ऽनायासेन **साधयितुं** शक्य:।

स: श्यामो मित्रातनयत्वादित्यत्र यथोक्तोभयवृत्तिधर्म: प्राणित्वं तदधिकरणे शाकपाकजत्वरूपोपाधिव्यभिचारेण मित्रातनयत्वे हेतौ श्यामत्वव्यभिचार: साधयितुमशक्य: **श्यामत्व**व्याभिचाररूपसाध्याभाववति काकत्वे शाकपाकजत्वव्यभिचाररूपहेतो: सत्त्वेनव्यभिचारदूषितत्वादत: प्राणित्वव्यावर्त्तनाय यथोक्तोभयमात्रवृत्तित्वमुक्तमिति दर्शयति **मित्रातनयत्वमिति**। पक्षेतरे प्रागुक्तं ज्ञानातिप्रसङ्गं वारयति। **किञ्चिद्धर्मावच्छिन्नेति**। महानसत्वावच्छिेन्नत्यर्थ:। **साध्यव्यापकत्वेऽपीति**। **न चासौ** व्यापकतोपाधि**त्वौपयिकी**। तदधिकरणे महानसे उपाधिव्यभिचाराभावेन साध्यव्यभिचारानुन्नायकत्वात् पर्वतमहानसान्यतरत्वावच्छिन्नसाध्यव्यापकत्वादेतत्तथा स्यादित्याशङ्क्य निषेधति। **स्वानधिकरणेति**। सन्देहान्तमनिश्चये स चोपाधित्वानिश्चये ज्ञानातिप्रसङ्गवारणपरस्य नातिव्याप्तिरित्यस्यार्थे हेतुरिति **बोध्यम्। उपाधिर्निश्चितोपाधि:**।

चषकम्

एवमेवान्यत्राऽप्यनुकूलतर्केण स्वत:सिद्धव्यभिचाराग्रहेण वा पक्षेतरे तथा व्यापकतानिश्चये भवत्यंव सोऽपि निश्चितोपाधि:। **न चानुमान**मात्रोच्छेदकत्वान्न तथेति**वाच्यम्**। वह्निधूमकार्यकारणभावरूपानुकूलतर्कादिना निश्चितव्याप्तिके हेतौ तदभावात्। स्वव्याप्याव्यापकस्य स्वाव्यापकत्वनिश्चयात्। **न च** साधने स्वव्यभिचारेण साध्यव्यभिचारसाधने साधनेतरोपाधिभिया न तथेति **वाच्यम्**। साध्योपाधिव्याप्यव्यापकभावरूपानुकूलतर्केण तत्रापि तन्निरासात्। **तथा** ह्युपाधे: साध्यव्यापकतानिश्चये

हि व्यापकव्यभिचारिणि व्याप्यव्यभिचारावश्यम्भावेनोपाधिव्यभिचारे साध्यव्यभिचारव्याप्यत्वनिश्चयोदये नोपाधिर्व्यभिचाराव्यापकतया गृहीतस्य पक्षेतरत्वस्य साध्यव्यभिचारव्यापकत्वग्रहायोगेन व्यभिचारानुमाने पक्षीकृतसाधनेतरोपाधेर्दूषकता न सम्भवतीति विदाङ्कुर्वन्तु।

कुतस्तर्ह्यनुपाधिताप्रवादस्तस्य। **सम्प्रदायविरोधात्** परार्थेऽनुद्भाव्यत्वादिति **केचित्तत्र** सम्प्रदायमननुरुन्धानस्य कथायां तदुद्भावनस्याशक्यवारणीयतापत्तेः। **तस्मादश्रद्धेय** एव तादृशः प्रवाद इति **युक्तम्। एतेन** सन्दिग्धोपाधिरपि **व्याख्यातः। केचित्तु** सत्प्रतिपक्षोत्थापनमुपाधेः फलम्। **तथा हि।** अयोगोलकं धूमवद्वह्नेरित्यादावयोगोलकं धूमाभाववदार्द्रेन्धनाभावादिति सत्प्रति- पक्षसम्भवादिति। **इत्थञ्च** साधनव्यापकोऽपि क्वचिदुपाधिर्दूषणसमर्थत्वा**द्यथा करका** पृथिवी कठिनसंयोगादित्यादावनुष्णाशीतस्पर्शः। वक्ष्यमाणव्यभिचारोन्न- यनक्षम इव पक्षवृत्तिरितरेषाम्।

अपरेषां सत्प्रतिपक्षोन्नयनक्षमस्य साधनव्यापकस्येवास्माकमपि व्यभिचारोन्नायकस्य पक्षवृत्तेरसङ्ग्रहो न दोषाय। **परेषां** साधनभेदादिवास्माकमपि पक्षभेदादुपाधिर्भिद्यते। **न चात्र** स्वरूपासिद्धिरेव दोष इति **वाच्यम्।** सर्वत्रोपाधेर्दूषणान्तरसाङ्कर्यादि**त्याहुः। तन्मते** च पर्यवसितसाध्यव्यापकत्वे सति पक्षावृत्तित्वं लक्षणम्। घटः पृथिवीसंयोगादित्यादावनुष्णाशीतस्पर्शश्च नोपाधिर्दूषणासमर्थत्वा**च्छेषं** दर्शितदिशाव**सेयम्।**

तात्पर्यटीका

अन्यत्रापि आनुमानिकगन्धनिश्चयविषयीभूतपाषाणपक्षके पाषाणो गन्धशून्यो जन्यत्वादित्यत्रापि। **सोऽपि** पक्षेतरोऽपि। **न तथा।** न पक्षेतर उपाधिः। **ननु** पक्षेतरस्योपाधित्वे व्यभिचारोन्नायकत्वासम्भवाद्दूषकताबीजा- भावान्नार्द्रेन्धनादीनामप्युपाधिता स्यादिति न पक्षेतर उपाधिरित्याशङ्कते। **न चेति। साधनं** वह्नौ। **स्वव्यभिचारेणेति** स्वमार्द्रेन्धनाद्युपाधिः।

साधनेतरोपाधिभियेति। वह्नीतरोपाधिभियेत्यर्थः। **न तथा** न पक्षेतरोपाधिता। तथा च पक्षेतरस्याप्युपाधित्वे वह्नीतरोपाधिना वह्नावार्द्रेन्धनव्यभिचारेण धूमव्यभिचारानुमितौ प्रतिरुद्धायामार्द्रेन्धनस्याप्युपाधिता न स्याद्दूषकताबीजाभावादिति भावः। **तत्राप्यार्द्रेन्धनव्यभिचारेण** धूमव्यभिचारसाधनेऽपि। **तन्निरासाद्वह्**नीतरोपाधिनिरासात्। तदेवाह **तथा हीति**।

व्याख्यात इति। साध्योपाध्योः साध्यसाधनयोर्वानुकूलतर्कावतारे स्वव्याप्याव्यापके स्वव्यापकत्वसंशयस्याप्ययोगात् प्रत्याख्यात **एवान्यथात्व** प्रत्याख्येय एव स इति भावः। सत्प्रतिपक्षोन्नायकतयोपाधेर्दूषकतावादिनां मतमुपन्यस्यति **केचित्त्विति**। **उपाधेः** फलमिति। **न च** सत्प्रतिपक्षे उपाध्युद्भावनानापत्तिरिति **वाच्यम्**। सत्प्रतिपक्षन्यायेनोपाध्युद्भावनसम्भवात्। सत्प्रतिपक्षे हि विरुद्धार्थग्राहिणोरन्यतरस्मिन्नङ्गभङ्गप्रसक्तौ लाघवतर्कोत्थापकत्वं सम्भवति सत्प्रतिपक्ष उद्भाव्यो नान्यथेत्युक्तमधस्तादित्याशयः। **इत्थञ्चो**पाधेः साध्यव्यभिचारानुन्नायकत्वे च। **क्वचिदुपाधेः** पक्षावृत्तित्वसम्भवे। **तदेवाह दूषणसमर्थत्वादिति। इतरेषां** व्यभिचारोन्नायकतया दूषकतावादिनाम्।

साधनव्यापकस्येत्यनेनास्य सङ्ग्राह्यत्वेऽभिमते भवदीयलक्षणाव्याप्तिस्तुल्यैवेति दर्शित**मेवमग्रे** पक्षवृत्तेरित्यनेनापि। **अस्माकं** सत्प्रतिपक्षोन्नायकतादूषकतावादिनाम्। **सर्वत्रेति**। भवदुक्तोपाधिस्थलेऽपि व्याप्यत्वासिद्धेः सम्भवादिति भावः। लक्ष्यालक्ष्यविवेकोपयोगिनि दूषकताबीजेऽभिहिते प्राप्तावसरं लक्षणं परिष्कुरुते। **तन्मते चेति**। **ननु** घटः पृथिवी संयोगादित्यत्रानुष्णाशीतस्पर्शे व्यभिचारोन्नायकेऽव्याप्तिः पक्षावृत्तित्वाभावादत आह **घट इति**। **दूषणासमर्थत्वादिति**। तथा च सोऽलक्ष्य एवेत्युक्तमेवेत्याशयः। व्याप्यतावच्छेदकधर्मभेदादुपाधिन्यभेदं परिहर्तुं **शेषमिति। शेषं** पर्यवसितत्वनिर्वचनम्। **दर्शितदिशा** स्वानधिकरणपक्षावृत्तिधर्माधिकरणमात्रवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वक्तव्यमित्यर्थः। **इत्थञ्च** स्वानधिकरणं यत्पक्षावृत्तिधर्माधिकरणं यच्च स्वाधिकरणं साध्यवत्तदुभयमात्रवृत्तिधर्मवत्युपाध्यभावेन साध्याभावसाधनमपि सुकरमित्युक्तं **भवति**।

तर्कामृतम्

अथ हेत्वाभासा: कथ्यन्ते।

तरङ्गिणी

हेत्वाभासा: हेतुवदाभासन्त इति व्युत्पत्त्या दुष्टहेतव इत्यर्थ:। अनुमितितत्करणान्यतरत्र साक्षात्प्रतिबन्धकत्वमाभासत्वम्।

चषकम्

हेत्वाभासा इति। हेतोराभासा दूषकताबीजानीति व्युत्पत्या हेतुदोषा उच्यन्ते हेतुवदाभासन्ते इति व्युत्पत्या तूक्तदोषवन्तो दुष्टा हेतव:। **अनुमितेस्तत्कारणज्ञानस्य वा किम्वा** साध्यव्याप्यहेतुमान् पक्ष: साध्यवानित्यनुमितेरेव साक्षात्प्रतिबन्धकं यस्य यस्य ज्ञानं ते दोषा:।

न च पर्वतो वह्निमानित्यत्र वह्न्यभावभ्रमस्याप्यनुमितिविरोधित्वाद्वह्न्यभावो दोष: स्यादिति **वाच्यम्**। यस्येत्यस्य यादृशविशिष्टस्येत्यर्थात्। **न च** तथापि वह्न्यभावत्वविशिष्टस्य तथात्वात्तद्दोषत दवस्थ्यमिति **वाच्यम्**। ज्ञाननिष्ठानुमितिविरोधिताया यादृशविशिष्टविषयकत्वमनतिरिक्तवृत्ति तत्त्वस्योक्तत्वात्। **न चैवमप्यत्रैव** ह्रदपक्षतायां ह्रदोऽपि न दोष: स्यात् प्रतिबन्धकताशून्ये ह्रद इति ज्ञाने वस्तुतो वह्न्यभावविशिष्टह्रदविषयकत्वादिति **वाच्यम्**। यद्धर्मविशिष्टधर्मिणो धर्मधर्मिभावावगाह्यनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयनिष्ठयादृशविशिष्टविषयकत्वस्य तथाभावविवक्षणात्। **अत्र** च निश्चयत्वं संशयान्यत्वं संशयत्वञ्च पूर्वोक्तदिशा परिष्कर्त्तव्यमिति नाननुगम:।

तात्पर्यटीका

मणिकारोक्त हेत्वाभाससामान्यलक्षणेऽनुमितिपदस्यानुमितिविशेषपरत्वे ह्येका लक्षणा तत्कारणपरत्वे चापरेति लक्षणाद्वयकल्पनागौरवमनुमिति निष्ठकार्यतानिरूपकसम्बन्धिपरत्वेऽप्यावश्यकविशेषलक्षणयैवोपपत्तावुक्त-प्रयासमप्यसहमान आह **किम्वेति** ।

व्यभिचारोन्नयनद्वाराऽनुमितिकारणव्याप्तिग्रहविरोध्युक्तोपाधिव्यावर्त्तनाय **साक्षादिति** । साक्षादेव यथोक्तग्रहविरोधिकामिनीजिज्ञासाविषयकामिनी-ज्ञानव्यावृत्तये **ज्ञानमिति** । बाधितहेतो: प्रतिबन्धकज्ञानविषयत्वासम्भवादाह **ते दोषा इति**।

गूढाभिसन्धिरुत्तरयति। **यस्येत्यस्येति**। अभिसन्धिमुद्घाटयितुं शङ्कते। **न च तथापीति**। **अनतिरिक्तवृत्तीति** । तथा च यद्विशिष्ट-विषयकत्वमुक्तानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तदत्र यादृशविशिष्ट-पदेनोक्तमिति नोक्तातिव्याप्तितादवस्थ्यमित्याशय: विशिष्टपदानतिरिक्तपदाभ्यां समभिव्याहृतेन च ज्ञानपदेन ज्ञानस्य विशिष्टविषयकत्वं विशिष्टविषयकञ्चज्ञानं विलक्षणं विवक्षितमिति वक्तुं शङ्कते। **न चैवमपीति**। **एवमपि** यादृशविशिष्ट-विषयकत्वेऽनतिरिक्तवृत्तित्वोक्तावपि ।

अत्रैव वह्नौ साध्य एव । **ह्रद पक्षतायां** ह्रदस्य पक्षतायां कृतायाम्। धर्मविशिष्टधर्मिणो वह्न्यभाववद्ध्रदस्य। **धर्मधर्मिभावावगाहीति धर्म**धर्मिभाव:। संसर्गस्**तदवगाही** तदीयसांसर्गिकविषयताशालीति यावत्। **यादृशविशिष्टविषयकत्वस्येति**। यद्धर्मावच्छिन्नप्रकारकत्वावच्छिन्नस्य यद्धर्मावच्छिन्नविशेष्यकत्वस्येति प्रघट्टकार्थ:। **पूर्वोक्तदिशा** तत्कोटिविषयितावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकापरकोटि-विषयिताशालितया। **नाननुगमो** न धर्म्यननुगमाल्लक्षणाननुगम:।

चषकम्

न चैवं व्यभिचारिहेतोरेव दोषत्वे तद्वत्त्वस्य तत्राभावान्नासौ दुष्टः स्यादिति **वाच्यम्** । यथा कथञ्चित्तद्वत्त्वस्य तत्रापि सत्त्वात् । **न चैवं** वह्निव्यभिचारिद्रव्यत्वाश्रयो धूमोऽपि दुष्टः स्यादिति **वाच्यम्** । यादृशविशिष्टविषयकं ज्ञानं यल्लिङ्गकानुमितिप्रतिबन्धकं तद्वान् स हेतुर्दुष्ट इत्यभ्युपगमात्। **विशेषणीयञ्च** प्रकृतानुमितिप्रतिबन्धकतावच्छेदकान्तराघटितत्वेनानुमितिविरोधितावच्छेदकमिति धूमाभाववद्वृत्तिर्वह्निः प्रमेयमिति ज्ञानसामान्यस्यैव तथात्वेन प्रमेयत्वविशिष्टव्यभिचारस्यानुमितिप्रतिबन्धकताननतिरिक्तवृत्तित्वेऽपि न क्षतिः। **एतेन** हेतुनिष्ठं साध्याभाववत्पक्षकत्वं बाधो**ऽन्यथा** हेतोर्दुष्टत्वव्यवहारानापत्तेरित्यपि **निरस्तम्**। तत्र साध्याभाववत् पक्षरूपप्रतिबन्धकतावच्छेकान्तरघटितत्वेनाव्याप्तेः।

न चैवं धूमव्यभिचारिवह्निमान् पर्वतो धूमवान् वह्नेरित्यत्र धूमाभाववत्तादृशविशिष्टपर्वतात्मके बाधेऽव्याप्तिस्तत्र बाधाविषयकप्रतीतिविषयस्य धूमव्यभिचारिवह्न्यात्मकस्य तादृशप्रतिबन्धकतावच्छेदकान्तरस्य घटकत्वादिति **वाच्यम्**। स्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकस्वाविषयकप्रतीतिविषयकं यद्यत् स्वं प्रमेयत्वविशिष्टव्यभिचारप्रमेयत्वविशिष्टबाधादिरूपं तादृशावच्छेदकान्तरं प्रसिद्धं तदविषयकप्रतीतिविषयत्वस्य विवक्षितत्वात्। **उक्तबाधस्य** चेत् स्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेकं सव्यभिचारोऽभविष्यस्तर्ह्यसौ बाधः स्वपदार्थोऽभविष्यदिति तदविषयकप्रतीति**विषयत्वं** न तस्मिन्नित्येवाव्याप्तिः प्रासरिष्यन्नत्वेवमस्ति व्यभिचारस्य बाधावच्छिन्नप्रतिबध्यानुमितिप्रतिबन्धकतानवच्छेदकत्वादिति प्रमेयत्वविशिष्टनिरुक्तविशिष्टबाधरूपप्रसिद्धतादृशावच्छेदकान्तराविषयकप्रतीतिविषयत्वं प्रमेयत्वविशेषणनिर्मुक्तोक्तबाधेऽपीत्यन्यत्र **विस्तरः** ।

तात्पर्यटीका

उक्तस्य दोषलक्षणत्वे तद्वत्त्वं दुष्टहेतुलक्षणं वाच्यं तत्राशङ्कते **न चैवमिति** विशिष्टस्य दोषत्वे इत्यर्थः । **अभावादिति** । **न च** तादात्म्येन

तद्वत्त्वं विवक्षणीयं तच्च तत्राप्यस्तीति **वाच्यम्** । तथा सति बाधेऽव्याप्तिप्रसङ्गात्। **यथा कथञ्चिदिति**। तथा च तद्वत्त्वे सम्बन्धविशेषो न विवक्षित इत्याशय: । **एवं** तद्वत्त्वे सम्बन्धविशेषाविवक्षणे । **विशेषणीयञ्चेति** । **न च** विशिष्टस्यानतिरिक्ततया शुद्धव्यभिचारे प्रमेयत्वविशिष्टव्यभिचारभेदाभावेन प्रकृतानुमितिप्रतिबन्धकतावच्छेद-कान्तराघटितत्वं तत्राक्षतमेवेति कथं तद्वारणमिति **वाच्यम्** । स्वाविषयक-प्रतीतिविषयत्वरूपस्य प्रतिबन्धकतावच्छेदकान्तरत्वस्य विवक्षितत्वात्। **एतेन** तादृशबाधे आवश्यकोक्तविशेषणघटितसामान्यलक्षणाव्याप्तिप्रसङ्गरूपवक्ष्य-माणदोषेण।

एवमुक्तविशेषणावश्यकत्वे। **तत्रो**क्त बाधे। स बाधाविषयकप्रतीतिविषय:। ननु यादृशविशिष्टविषयकज्ञानस्येत्यादिवक्ष्यमाण- निष्कृष्टकल्पेऽनुमिति प्रतिबन्धकताया एवाघटकत्वान्नोक्तरीत्या बाधसङ्ग्रह इत्यनुशयानस्तत्र यादृशविशिष्टमेव यथोक्तपदार्थान्तराघटितत्वेनावश्यं विशेषणीयम्। कथमन्यथोक्त प्रमेयत्वविशिष्टे व्यभिचारवारणमिति तत्कल्पेऽप्युक्त बाधसङ्ग्रहप्रकारं सूचयन्नाह। **अन्यत्र विस्तर इति**। **स च** स्वसजातीय तादृशप्रतिबन्धकतावच्छेदकान्तराघटितत्वं वक्तव्यम्। साजात्यञ्च हेत्वाभासविभाजकरूपेण। व्यभिचारश्च न बाधसजातीय इति **नोक्ताऽव्याप्ति:** **न च** स्वसजातीयं स्वाविषयकप्रतीतिविषयश्च प्रतिबन्धकतावच्छेद-कान्तरमप्रसिद्धमिति **वाच्यम्** । साध्याभाववत् पक्षसजातीय: पक्षनिष्ठा भावप्रतियोगी साध्यादि: साध्याभाववद्वृत्तिर्हेतो: सजातीयं हेतुसमानाधिकरणाभावप्रतियोगिसाध्य**मेवं** सर्वत्र लक्षणसम्भवादिति।

चषकम्

यत्पदार्थविषयकज्ञानेनावश्यं बाधादिर्विषयीकृतस्तस्मिन्नुदासीनपदार्थेऽति-व्याप्तिवारणाय यदवच्छिन्नत्वेनोपस्थिते धर्मिणि यदवच्छिन्नधर्मवत्ताज्ञानत्वं प्रकृतानुमितिप्रतिबन्धकताया: स्वरूपसम्बन्धरूपावच्छेदकतावत्तद्धर्मिणि

तद्धर्मवत्त्वं तत्त्वमित्यस्य वक्तव्यत्वादेव सर्वसामञ्जस्य**मित्यन्ये** । **प्राञ्चस्तु** यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम्। अत्रावच्छेदकत्वं स्वरूपसम्बन्धविशेषः । सत्प्रतिपक्षादौ विरोधिव्याप्त्यादिकमेव तथा तद्वत्त्वञ्च हेतौ ज्ञानरूपसम्बन्धेन । **न चैवं** वह्निमान् धूमादित्यादौ पक्षे बाधभ्रमस्यानुमितिविरोधित्वाद्धेतौ ज्ञानरूपसम्बन्धेन तद्वत्त्वस्यापि सत्त्वात्सद्धेतोरपि बाधितत्वापत्तिरिति **वाच्यम्** । यथा स्फटिकादिभिन्ने सन्नपि लौहित्यस्य स्वाश्रयसंयोगो न सम्बन्धः **किन्तु** स्फटिकादावेवैवमत्र बाधितव्यहाराभावेन ज्ञानस्य सम्बन्धत्वाकल्पनाद्**दशाविशेषे** तत्रैवासाधारणसत्प्रतिपक्षितव्यवहारेण तत्कल्पनादित्या**हुस्तत्र**।

निर्युक्तिकव्यवहारस्याश्रद्धेयतया सर्वेषामेव दोषाणां नित्यदोषताया एवौचित्यात् । **तत्र बाध**सत्प्रतिपक्षविरुद्धा अनुमितेरसिद्धसव्यभिचारौ तत्कारणज्ञानस्य विरोधिनः । **व्यक्तीभविष्यति** चैतदुपरिष्टात् । **अत्रेदं बोध्यम्** । पर्वतो वह्निमान् धूमादित्यादौ पर्वतादेः काञ्चनमयत्वाभावो माभूद्दोष इति तद्धर्मावच्छिन्नतत्पक्षकतद्धर्मावच्छिन्नतत्साध्य-कतद्धर्मावच्छिन्नतद्धेतुकानुमितिप्रतिबन्धकत्वं वाच्यं तथा च निर्वह्निः पर्वतो वह्निमानित्यादौ न कोऽपि हेत्वाभासः स्यात्तादृशानुमितेरप्रसिद्धत्वात्।

तात्पर्यटीका

सर्वसामञ्जस्यमित्यस्योक्तविशेषणं विनैवेत्यादिस्ता**दृश**विषयविशेषग-वेषणाक्लेशो अपि च वह्न्यभावव्याप्यत्वेनावगतपर्वतत्वस्य पर्वते वस्तुतः सत्त्वात् सत्प्रतिपक्षस्यानित्यदोषतापत्तिर्न चेष्टापत्तिरपसिद्धान्तादित्यस्वरसोऽन्य इत्यनेन **सूचितः** । **व्याप्त्यादिकमि**त्यादिना पक्षधर्मतापरिग्रहः । **तथेति** । विरोधिपरामर्शजनकतावच्छेदककोटौ व्याप्तेरप्यनुप्रवेशादिति भावः। **ननु** विरोधिव्याप्त्यादिकं विरोधिहेतावेव न तु सत्प्रतिपक्षित इत्यत आह **तद्वत्त्वञ्चेति**। **एवं** स्वरूपसम्बन्धरूपावच्छेदकताकोटिप्रविष्ट-त्वरूपस्यावच्छेदकत्वस्य प्रकृते विवक्षणे। **दशाविशेषे** पक्षे साध्यसन्देहकाले विरोधिपरामर्शकाले च। **तत्रैव** सद्धेतावेव।

औचित्यादिति । **कथं** तर्हि शब्दस्यानित्यत्वे साध्ये शब्दत्वस्यासाधारणव्यपदेश **इति चेत्**पक्षमात्रवृत्तित्वनिबन्धन इति **गृहाण ननु** विरोधस्य सामानाधिकरण्यग्रहात्मकानुमितिकारणव्याप्तिग्रहविरोधित्वमेव तत्कथमुक्तमनुमितेरितीत्याशङ्क्याह । **व्यक्तीति** । **उप**रिष्टाद्धेत्वाभासविशेषलक्षणावसरे। **तद्यथा** । साध्यवदवृत्तित्वं ह्यसाधरणत्वं प्रकृतग्रन्थकर्त्तुर्विवक्षित**मन्यथा** सव्यभिचारान्तर्भावानुपपत्तेर्वक्ष्यमाणत्वात्तच्च सामानाधिकरण्यग्रहस्य विरोधिनानुमितेः । **एव** साध्याभावव्याप्तो हेतुर्विरुद्ध इति च वदतो ग्रन्थकर्त्तुः साध्याभावव्याप्यवत्ताज्ञानमुद्रयाऽनुमितिविरोधित्वं विरुद्धस्याभिप्रेतं **न तु** तत्कारणज्ञानं **प्रतीति** । वक्ष्यमाणानुमित्यप्रसिद्धिमुपपादयितुं पक्षादीन् विशिनष्टि। **अत्रेदं बोध्यमिति** । पर्वतत्वादिनैव ह्रदादेः पक्षत्वादौ कृते बाधासिद्धी व्यवस्थापयितुं सर्वत्र तत्तान्तर्भावः । **न कोऽपीति** । पर्वतत्वावच्छेदेन निर्वह्नित्वेऽवगते आश्रयासिद्धिस्तत्सामानाधिकरण्येन तथात्वे बाधश्च न स्यादित्यर्थः।

चषकम्

न च विरोधित्वमनुमित्यनुत्पादनियतत्वमत्र विवक्षितम् **तथा** च यादृशविशिष्टविषयकज्ञानस्य विरोधिविषयिताप्रयुक्तस्तदुत्तरमानसज्ञाने पक्षे साध्यावगाहित्वसाध्यव्याप्यहेत्ववगाहित्वयोर्व्यतिरेकस्तादृशविशिष्टत्वम्। तादृशावगाहित्वप्रसिद्धिराहार्यज्ञान एव। **यद्वा** तादृश पक्षे तादृशसाध्यस्य तद्व्याप्तिविशिष्टतादृशहेतोर्वावगाहिनो ज्ञानस्य यद्विषयं ज्ञानं विरोधिविषयं तत्त्वम्। **किम्वा** तादृशज्ञानविरोधित्वम् । **इत्थ**ञ्चाधिकं व्याप्त्यनुगमे दर्शिता रीतिरिहाप्यनुसन्धेयेति **वाच्यम्** ।

तथापि निर्वह्निर्वह्निमानित्यादावव्याप्तेस्तत्र तादृशाहार्यग्रहविषयविषयकग्रहस्य निर्वह्निरित्यस्य वह्निमानित्यस्य वा धर्मितावच्छेदकानियन्त्रितस्य विरोधिग्रहाप्रसिद्धेः । **न चा**भाववान् वह्निमानित्येवं तथाविधं ग्रहं प्रति विरोधिनमभाववान्निर्वह्निरितिग्रहमादायैव तत्र लक्षणसमन्वय इति **वाच्यम्**। तथापि वह्निमान्निर्वह्निरित्यादौ वह्निमति निर्वह्नित्वाभावो बाध इति

वह्निमानभाववानिति यथोक्तग्रहं प्रत्यपि तस्याविरोधित्वादव्याप्तेस्**तस्मा**द्यत्र यावन्तो दोषास्तावतां विशिष्टानां यावत्यो विषयितास्तावदन्यान्य-विषयितानिरूपकत्वपर्याप्त्यधिकरणत्वं तत्त्वमिति न केवलपक्षहेत्वादावतिव्याप्तिरपि। **एक**दोषस्थले तत्त्वमेव हेत्वाभासत्वमिति च नेतरभेदसाधने व्याप्यत्वासिद्धिरपि। **वक्ष्यमाणं** पञ्चेति तु सम्भवाभिप्रायमिति।

तात्पर्यटीका

वस्तुमात्रविषयकनिश्चयोत्तरमानसे तथा व्यतिरेकसम्भवेन वस्तुमात्रस्य तत्र हेत्वाभासत्ववारणाय विरोधिविषयिताप्रयुक्त **इत्युक्तम्**। बाधसत्प्रतिपक्षविरोधसङ्ग्रहाय पक्षे साध्यावगाहित्वस्य सव्यभिचारा-सिद्धसङ्ग्रहाय साध्यव्याप्यहेत्ववगाहित्वस्य च व्यतिरेकप्रतियोगिमुद्रयो-**पादानम्। ननु** निर्वह्निर्वह्निमानित्यादौ तथावगाहित्वमप्रसिद्धमत आह **तादृशावगाहित्वेति**। **नन्वत्र** प्रयुक्तत्वं व्याप्यव्यापकभावो विषयितायाः स्वाश्रयनिश्चयोत्तरज्ञानत्वसम्बन्धेन वाच्यः स च न सम्भवति बहुपदार्थघटितस्य तस्य सम्बन्धत्वे मानाभावादत आह **यद्वेति**। यद्विषयं ज्ञानं विरोधिविषयमित्यत्र विषयताद्वय प्रवेशेन गौरवाद्यत्पदविरोधिपदयोर्विषयाद्येकपदसमभिव्याहृतयोरपि समानार्थत्वव्युत्पत्तौ मानाभावेन च विरोधिविषयकज्ञान-स्योदासीनपदार्थावगाहित्वस्यापि सम्भवादुदासीन पदार्थेऽतिव्याप्तेश्चाह। **किम्वेति**। विरोधित्वं विरोधिज्ञानविषयत्वं तत्र पूर्ववदाहार्यस्य तादृशज्ञानस्य प्रसिद्धावपि तद्विरोधिज्ञानस्यात्राप्रसिद्धिरेव स्यादित्याशङ्क्याहेत्**थञ्चेति**। विरोधिज्ञानघटितलक्षणादरे चेत्यर्थः। **अधिकं** पूर्वलक्षणापेक्षयाधिकं यथा भवति तथानुसन्धेयेति योजना। **तथा** च निर्वह्निः पर्वतो वह्निमानित्येतादृशग्रहविषयविषयकस्य पर्वतो वह्निमानित्यस्यानाहार्यग्रहस्य विरोधित्वं वक्तव्यमित्याशयः।

तस्य वह्निमान् निर्वह्नित्वाभाववानितिग्रहस्य। अविरोधित्वादित्यस्य विरोध्यविषयकत्वादित्यादिः। **तस्मा**दुक्तलक्षणानामव्याप्त्यादिदोषग्रस्तत्वात्

अतिव्याप्तिरपीति। तादृशनिरूपकत्वपर्याप्त्याधिकरणतायाः केवलपक्षादावभावादित्यर्थः.। **अपिना** तादृशविषयितानामन्यान्यत्वेनानुगमादेकैकोपादाने प्रत्येकाव्याप्तेरभावस्य परिग्रहः । **एकदोषस्थल** इति। काञ्चनमयः पर्वतो वह्निमान् धूमादित्यादावित्यर्थः। **तत्त्वमेवेति** तदीय विषयितानिरूपकत्वपर्याप्त्यधिकरणत्वस्य स्वघटकतत्त्वापेक्षया गौरवेणानर्थक्यादिति भावः। **व्याप्यत्वासिद्धिरपीति**। उक्तगौरवेण तत्त्वस्य व्याप्यतानवच्छेदकत्वादिति भावः । **ननु** द्वित्रादिदोषस्थले द्वित्रादयो दोषाः सम्भवन्ति न पञ्चापीति कथं पञ्चेत्युक्तिरत आह **वक्ष्यमाणमिति। सम्भवेति**। वायुर्गन्धवान् शीतस्पर्शादित्यत्र सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधितानां पञ्चानामपि सम्भवादिति भावः।

तर्कामृतम्

सव्यभिचार-विरुद्ध-सत्प्रतिपक्षासिद्ध-बाधिताः पञ्च हेत्वाभासाः। सव्यभिचारस्त्रिविधः—साधारणासाधारणानुपसंहारिभेदात्। साध्याभाववद्वृत्तित्वं[७] साधारणत्वम्, यथा 'धूमवान् वह्नेः'। सकलसपक्षव्यावृत्तत्वम् असाधारणत्वं यथा 'पर्वतो वह्निमान् पर्वतत्वात्'।

तरङ्गिणी

साध्यात्यन्ताभाववद्वृत्तित्वमिति। अयं च नित्यदोषः। एतज्ज्ञाने च व्यापकत्वघटितव्याप्तिज्ञाने साक्षादेव प्रतिबन्धकम्। **सकलेति** सम्पातायातम्। **सपक्षेति**। साध्यनिश्चयविषयव्यावृत्तमित्यर्थः। अयं चानित्यदोषः। निश्चयघटितत्वेन दशाविशेष एव हेतुवृत्तित्वात्। एतज्ज्ञानं च सामानाधिकरण्यग्रहे प्रतिबन्धकम्।

---

७. 'साध्यात्यन्ताभाव' इति पाठान्तरम्।

चषकम्

तान्विभजते । **सव्यभिचारेति** । **दोषदुष्टयोर्द्वयोः** प्रक्रमे सर्वनाम्ना द्वयमन्यतरद्वा परामर्शनीयमिति व्याकुलीभावव्युच्छित्तये पुनर्हेत्वाभासा **इत्युक्तम्**। यौगिकस्य सव्यभिचारपदस्य साधारणमात्रप्रसिद्धतया तं विभजते। **सव्यभिचार इति**। त्रैविध्यं दर्शयति। **साधारणेति** । साधारणं लक्षयति **साध्येति**। साध्याभाववद्वृत्तित्वज्ञानमनुमितिकारणस्य तद्वदवृत्तित्वादिरूपव्याप्तिग्रहस्य विरोधि । **प्राञ्चस्तु 'यः सपक्षे विपक्षे च भवेत्साधारणस्तु स' इत्यूचुः**। असाधारणं लक्षयति। **सकलसपक्षेति**। सपक्षसामान्यावृत्तित्वप्राप्तये **सकलेति**। **सपक्षः** साध्यवान्।

निश्चितसाध्यवद्व्यावृत्तत्वस्य सद्धेतुसाधारण्येनादूषकत्वादित्युक्तं **प्राक्**। यावन्ति साध्यवन्ति प्रमेयाणीत्यादिसाध्यनिश्चयविषयत्वस्य पक्षेऽपि सम्भवेन तद्व्यावृत्तत्वस्य क्वचिदप्यसत्त्वाच्च। तद्व्यावृत्तत्वं तदवृत्तित्वम् । तथा च साध्यासमानाधिकरण इति फलितम् । **अस्य** ज्ञानं व्याप्तिघटक-सामानाधिकरण्यग्रहविरोधि। **यत्तु** साध्यव्यापकाभावप्रतियोगित्वं तच्चानुमितिविरोधीति **मतं** **तत्**सव्यभिचारपरिभाषाविरोधा**दुपेक्ष्यं सचानुपदं** व्यक्तीभविष्यति । **वह्निमांस्तद्वह्निमान्** । **अत** एव नित्यः शब्दः शब्दत्वादित्यसाधारणं **व्याचख्युः**।

तात्पर्यटीका

ते च सव्यभिचारादयः पञ्चेत्येतावतैव विवक्षितार्थलाभात् पुनर्हेत्वाभासग्रहणमनुचितमत आह। **दोष दुष्टयोरिति**। प्राचीनमतमाह। **प्राञ्चस्त्विति** । विरुद्धवारणाय **सपक्ष इति** । **अत एव** साधारणपदप्रवृत्तिवत्तास्य **निर्वहति** । सपक्षवृत्तित्वस्य दूषणानौपयकिस्याप्यस्तु साधरणाद्यन्यतमत्व-रूपविभाजकतावच्छेदककोटिघटना लक्षणघटनापरं व्यर्थैव। विरुद्धस्याप्यनेन रूपेण साधारण्ये दोषाभावात्त**दुक्त**मुपधेयसङ्करेऽप्युपाधेरसङ्करादितीत्यस्वरस ऊचुरित्यनेन **सूचितः**। सर्वेषां नित्यदोषत्वमित्यभिप्रायेणैव

विशेषलक्षणान्यभिधेयान्यन्यथा निरुक्तसामान्यलक्षणाव्याप्तिशङ्कां स्यादतो व्याचष्टे **सपक्षः** साध्यवानिति।

सद्धेतु साधारण्येन यथाश्रुतमूलोक्तसद्धेतुसाधारण्येन। यावन्ति साध्यवन्तीत्येतावन्मात्रोक्ते बाधितार्थकत्वं स्यात् **किं वा सर्वेभ्यः** कामेभ्यो दर्शपूर्णमासावित्यत्रोपस्थितयत्किञ्चित्फलकत्ववत् सिद्धिकर्म यत्किञ्चित्साध्यवद्विषयकत्वेनैव गतार्थता स्यादतः **प्रमेयाणीत्युक्तम्**। तथा चोद्देश्यतावच्छेदकसाध्यवत्त्वनियतयावत्त्वलाभाद्यावत्साध्यवत्येव साध्यनिश्चयो दर्शितो भवतीति भावः । **क्वचिदपीति** । सद्धेताविति शेषः। **तदवृत्तित्वं** साध्यवदवृत्तित्वं **प्रति**योगित्वमिति। फलितमित्यनुषज्यते। **सव्यभिचारपरिभाषाविरोधादिति** भावः । **स चेति** । विरोधोऽपीत्यर्थः । **व्यक्तीभविष्यतीति** । स्वमतेऽग्रे व्याप्तिग्रहविरोधित्वरूपस्य तादृशैकधर्मस्य प्रदर्शनेनेह तच्छून्यत्वस्य सुग्रहत्वादिति भावः । सद्धेतुत्वपरिहाराय व्याचष्टे **वह्निमा**ंस्तद्वह्निमानिति । अत्र तच्छब्दः प्रसिद्धार्थकः पक्षीयवह्निस्तु न प्रसिद्ध इत्याशयः । तद्वह्निशब्देन पर्वतत्वव्यधिकरणो वह्निर्विवक्षित इत्यत्र नव्यमतेनोपष्टम्भकमा**हात एवे**ति । सर्वेषां नित्यदोषत्वादेवेत्यर्थः **शब्दो नित्य इति** प्रतिज्ञातस्त्वनित्यत्वस्य साध्यताप्रतिपत्तावुपष्टम्भासङ्गतेर्नित्यः शब्द इति निर्देशः।

तर्कामृतम्

सर्वपक्षकत्वम् अनुपसंहारित्वम्, यथा 'सर्वं ःमेयं अभिधेयत्वात्'।

तरङ्गिणी

सर्वपक्षकत्वमिति। साध्यसन्देहविषयसर्वकत्वम्। अयमप्यनित्यो दोषः। एतस्यापि सामानाधिकरण्यग्रहप्रतिबन्धो दूषकताबीजम्। सर्वत्र साध्यसन्देहे साध्यसामानाधिकरण्यनिर्णयासम्भवात्।

चषकम्

प्राञ्चस्तु 'यस्तूभयस्माद्व्यावृत्त: सत्वसाधारणो मत: । उभयस्मात् साध्यतदभावाभ्यां निश्चितादनुपसंहारितुल्ययोगक्षेमं दूषकताबीजम् । **साधारणस्येव** कोटिद्वयसहचरिताभावप्रतियोगिनोऽपि ज्ञानं संशायकमिति हि निर्विवाद**मित्यूचु**: । अनुपसंहारिणं लक्षयति। **सर्वेति** । **पक्ष**: सन्दिग्धसाध्यवान् । तथा च **सर्वं** पक्ष: सन्देहविषय साध्यधर्मी यस्येति व्युत्पत्या सर्वत्राबाधितयथोक्तसाध्यकत्वमित्यर्थ: । **व्याख्याततत्त्वमेतत्** । अस्य ज्ञानं व्यतिरेकव्याप्तिग्रहविरोधि केवलान्वयिसाध्यकानुमिति: पुनरन्वयव्याप्तिज्ञानादेव। **व्याप्ति**ग्रहविरोधित्वं च त्रयाणामप्येषामित्येक-हेत्वाभासत्वमित्य**वधेयम्** ।

प्राञ्चस्तु 'तथैवानुपसंहारी केवलान्वयिपक्षक:'। अत्र सामानधिकरण्यग्रहस्थलाभावान्नानुमिति: **न च** सिद्धिसिषाधयिषासत्त्वे व्याप्तिनिश्चयसम्भवात् सद्धेतुत्वेनालक्ष्ये सिद्ध्यभावस्य केवलान्वयित्वा**दति व्याप्तिरिति वाच्यम्** । साध्यसन्देहरूपस्य पक्षत्वस्य विवक्षितत्वा**त्तथा** च केवलान्वयिधर्मावच्छिन्नस्य केवलस्य वा साध्यसंशयस्य यो विषयस्तद्वृत्तित्वम् । **किम्वा** साध्यसन्देहविषयताव्याप्यसाध्यसिद्ध्यनुकूल-व्याप्तिग्रहौपयिकसत्ताकत्वमनुपसंहारित्वमिति फलितम्।

तत्र 'केवलमन्वयी पक्षसाध्यसन्देहधर्मी यस्येति व्युत्पत्या साध्यसन्देहधर्मिमात्रवृत्तित्वमर्थ: । **इत्थञ्च** सार्वत्रिकस्य संशयस्य सामग्र्या प्रतिबन्धान्न कुत्रापि हेतुमति साध्यग्रह इति दूरापास्तो व्याप्तिग्रह **इत्यूचु**:। **अत्र नव्या**:। सर्वत्वधर्मितावच्छेदककसंशयसामग्रीसत्त्वेऽपि घटत्वादिधर्मितावच्छेदककसाध्यनिश्चयोत्पादे बाधकाभावाद्धेत्वाभासत्वानुपपत्ति:। **यत्र चेदेवमपि** तस्य सहचाराग्रहस्य स्वरूपसत एव विरोधित्वेनोक्तदोषतादवस्थ्यमे**वात एव** तत्प्रयोजक: संशयोऽपि न तथा संशयविषयस्त्वप्रसिद्ध एव **तस्माद**नुमित्यनुत्पादप्रयोजको न कश्चिद्धेतुदोष: सहचाराज्ञानं तु पुरुषापराध इति **वदन्ति**।

तात्पर्यटीका

वृत्तिमत: साध्यतदभाववद्व्यावृत्तत्वासम्भवादुभयस्मादिति व्याचष्टे। **निश्चितादित्यन्तेन**। **तुल्य योगक्षेममिति**। हेतो: साध्यसंशयविषयमात्रवृत्तित्वेन हेतुमति सर्वत्र साध्यसंशयसामग्र्यानुमित्यनुत्पादसम्भवादिति भाव: । अत एवानुपसंहारिलक्षणं तथैवेति **वक्ष्यति** । तदेव दर्शयति । **साधारणस्येवेति**। निरुक्तोभयव्यावृत्तत्वस्यापि यथाश्रुतमूलोपदर्शितसद्धेतुसाधारण्यान्न दूषणौपयिकत्वमित्यस्वरस ऊचुरित्यनेन **सूचित:** । ननु सार्वत्रिकस्य साध्यस्य बाधाप्रसिद्ध्या कथमबाधितत्वप्रसिद्धिरित्याशङ्क्य सार्वत्रिकस्यापि गगनाभावरूपसाध्यस्य गगनरूपबाधप्रसिद्ध्या सम्भवत्या: क्वाचित्कोक्तेस्तात्पर्यान्तरवर्णनं नान्यत्राप्यबाधितत्वं सुकरमित्याह । **व्याख्यातेति**। सर्वत्राबाधितं सञ्जातं वृत्तिमद्विरोधि यस्य तादृशं यद्यत्तदन्यच्छिद्यमानमेव न तु क्वचिदपि बाधितमित्युक्तिभङ्ग्या वृत्तिमद्व्यतिरेकाप्रतियोगिसाध्यकेत्युपदर्शितार्थकमेव सर्वत्राबाधितेत्यादिकमित्यर्थ:। **अन्वय**व्याप्तिज्ञानादेवेत्येवकारेण विशिष्टस्य दोषत्वमभ्युपगच्छतामपि नव्यानां मते रूपान्तरेणाव्यभिचारिणोऽपि रूपान्तरेण व्यभिचारित्वमिव व्याप्त्यन्तरेण सद्धेतोरपि व्याप्त्यन्तरग्रहविरोधितावच्छेदककेवलान्वयि- साध्यकत्ववतो हेत्वाभासत्वमविकलमिति **सूचितम्**।

उपसंहार: साध्यसिद्ध्यौपयिकव्याप्तिद्वयग्रहानुकूलसहचारद्वयमपि यस्य नास्ति सोऽनुपसंहारीत्यर्थानुसारेणाह **केवलान्वयिधर्मावच्छिन्नस्येत्यादि**। **केवलान्वयिधर्मावच्छिन्नस्य** केवलान्वयिधर्मव्यापकविषयताप्रतियोगिन: **इत्थञ्च** केवलान्वयिधर्मस्य संशयधर्मितानवच्छेदकत्वेऽपि द्रव्यत्वादिप्रत्येकरूपेण सर्वत्र साध्यसंशयदशायामपि लक्ष्यतां दर्शयितुं **केवलस्य वेति**। केवलान्वयिधर्मितानवच्छेदककस्य वेत्यर्थ: । **नन्विदमपि** यत्र कतिपयेष्वेवाधिकरणेषु हेतुस्तदभावश्च गृहीतस्तत्रैव च साध्यसन्देहस्तत्रापि व्याप्तिद्वयान्यतरस्यापि ग्रहासम्भवाद्दूषकताबीजसत्त्वेन लक्ष्ये व्याप्तं यथोक्तसंशयविषयताया: केवलान्वयिधर्मं प्रत्यव्यापकत्वादत: केवलान्वयिधर्मव्यापकत्वमपि परित्यज्यैवाह **किम्वेति** । **अत्रापि** प्राचां मते शब्दोऽनित्य:

शब्दत्वादित्यसाधारणव्यतिरेकि हेतुसत्तायाः साध्यसन्देहविषयताव्याप्यत्वात्त्रातिप्रसङ्गवारणाय साध्यसिद्ध्यनुकूलत्वेनान्वयव्यतिरेकव्याप्ती अनुगमय्य तद्ग्रहौपयिकत्वेन हेतुतदभावस्तयोरनुगतीकृतयोः प्रकृते प्रवेश इत्यभिप्रेत्योक्तं **साध्यसिद्ध्यनुकूलेत्यादि** । तथा च हेत्वभावसत्ताया उक्त विषयताव्याप्यत्वाभावान्नातिप्रसङ्ग इति भावः।

नन्वेवं सत्यत्र केवलान्वयीत्यपार्थकमत आह **तत्र चेति**। परित्यक्तकेवलान्वयिधर्मावच्छिन्नत्वके परिष्कारे चेत्यर्थः। **केवलमन्वयीति**। यस्यान्वयी निरुक्तसत्तावान् केवलं पक्षः साध्यसन्देहधर्मो वेत्यर्थः। **धर्मिमात्रवृत्तित्वमिति**। धर्मिमात्रवृत्तिनिरुक्तसत्ताकत्वमित्यर्थः । **अर्थो** वाक्यार्थः। तादृशव्याप्तिग्रहानुकूला सत्ता च हेतोरन्वयव्याप्तिग्रहानुकूला तदभावास्य व्यतिरेकव्याप्तिग्रहानुकूलेति द्विविध सत्तायाः साध्यसन्देहविषयताव्याप्यत्वे गृहीतेन कस्याश्चिदपि व्याप्तेर्ग्रह इत्याह**त्थञ्चेति**। संशयविषयताव्याप्यनिरुक्तसत्ताकत्वस्यानुपसंहारित्वे चेत्यर्थः। यत्र कतिपयेष्वेवेत्युक्तस्थले हेतुतदभावग्रहाविषये धर्मिणि साध्यग्रहस्यापि सम्भवात्तदभिप्रायेण **हेतुमतीत्युक्तम्। इदमुपलक्षणम्**। साध्याभाववति हेत्वभावग्रहोऽपि न सम्भवतीत्यपि **बोध्यम्**। व्याप्तिग्रहोऽन्वयतो व्यतिरेकतश्च व्याप्तिग्रहः। **अप्रसिद्ध एवेति**। हेत्वाभासताप्रयोजकः साध्यस्याभावस्य वा धर्मी न कश्चिदप्युक्तसत्ताक इत्यर्थः।

तर्कामृतम्

साध्याभावव्याप्तो हेतुर्विरुद्धः, यथा 'घटो नित्यः सावयवत्वात्'।

तरङ्गिणी

साध्याभावव्याप्य इति। एतस्य च तदभावव्याप्यवत्ताज्ञानविधयाऽनुमितिप्रतिबन्धो दूषकताबीजम्। अयं च नित्यदोषः। **घटो नित्य इति**। नित्यत्वरूपसाध्यस्याभावोऽनित्यत्वम्। तद्व्याप्यत्वं च सावयवत्वम्।

चषकम्

विरुद्धं लक्षयति। **साध्याभावेति**। पृथिवी गन्धवती नित्यत्वादित्यादिवारणाय **व्याप्तिपर्यन्तम्** । यथाश्रुतैव व्याप्तिर्न परिष्कृतेति गन्धस्याव्याप्यवृत्तित्वेऽपि नातिव्याप्तितादवस्थ्यम् । **अस्ति हि** नित्यत्वसाध्याभावेन ध्वंसप्रतियोगित्वेन व्याप्तं सावयवत्वम् ।

साध्याभावव्याप्यवत्ताज्ञानविधया स्वलिङ्गिकाया अनुमितेः प्रसक्तायाः प्रतिबन्धोऽस्य दूषकताबीजम्। **नन्वेवं** सत्प्रतिपक्षाभेदस्तत्रापि परस्परानुमितिप्रतिबन्धस्यैव दूषकताबीजस्य वक्तव्यत्वात्। **न च** हेतुभेदे सत्प्रतिपक्षो हेत्वैक्ये विरुद्ध इति **वाच्यम्**। तथा सति यत्रान्वयिना हेत्वन्तरेण प्रतिबन्धस्तत्र सत्प्रतिपक्षो **यत्र** तु व्यतिरेकिणा हेत्वन्तरेण स तत्र हेत्वाभासान्तरतापत्तेरिति **चेदत्राहुः** । अयं गौरश्वत्वादिति वादिनं प्रति नायं गौरश्वत्वादित्युद्भाविते तव साध्याभावसाधकत्वाज्ञानात् साध्यसाधकत्वभ्रम इत्यशक्तेरुन्नायको विरुद्ध एव न सत्प्रतिपक्ष इति तयोर्भेदादिति।

तात्पर्यटीका

व्याप्तिपर्यन्तमिति। **अत्र** यदि साध्यवदवृत्तित्वं साध्याभावव्याप्तिरुच्येत **तर्ह्यवृत्तेर्विरुद्धत्वापत्तिर्नचेष्टापत्तिः** साध्याभावव्याप्यवत्ताज्ञानासम्भवेन दूषकताबीजाभावाज्जात्यभाववान् सत्त्वादित्यादेर्विरुद्धत्वानापत्तिश्च जात्यभाववति समवायेन वृत्तेरप्रसिद्धत्वात्तस्माद्व्यापकसामानाधिकरण्यरुपैव सा वाच्या तस्याश्च निष्कृष्टाया गन्धाभावेऽनपायाद्व्याप्तिपर्यन्तनिवेशेनापि कथं तद्वारणमत आह **यथाश्रुतैवेति**। प्रतियोगिवैयधिकरण्याघटितैवेत्यर्थः। तथा च नित्यत्वाधिकरणपृथिवीपरमाणुनिष्ठगन्धस्वरूपाभावप्रतियोगित्वादेव गन्धाभावे नित्यत्वव्यापकत्ववारणेन तस्य विरुद्धत्वं वारितमिति भावः । **यद्यपि** गौरवान्न परिष्कृतव्याप्तिनिवेशशङ्का **तथापि** धूमप्रागभाववदखण्डाभाव-घटितहेत्वन्तरतया तच्छङ्कायामाह **न परिष्कृतेति** न प्रतियोगिवैयधि-करण्यघटितेत्यर्थः। प्रयोजनाभावादतिव्याप्तिकरत्वाच्च। **गन्धस्य**

गन्धस्वरूपाभावस्य। **अव्याप्यवृत्तित्वेऽपि** गन्धाभावरूपप्रतियोगिसमानाधिकरणत्वेऽपि। तथा च गन्धस्वरूपाभावो न प्रतियोगिव्यधिकरणोऽभावान्तराप्रतियोगित्वात्तु गन्धाभावस्य व्यापकत्वं स्यादित्यतिव्याप्तितादवस्थ्यमिति भावः। लक्ष्ये लक्षणं ग्राहयति। **अस्ति हीति** व्याप्तम् अवयवापचयस्य नाशहेतुत्वादिति भावः गोत्वाश्वत्वयोर्विरोधो न स्फुटयति तदुपेक्षितमिति द्योतयन्नेव। अभावश्च वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताको ग्राह्यः । तेन विशिष्टाद्यभावमादाय नासम्भवः।

साध्याभावव्याप्यवत्ताज्ञानविधया प्रतिबन्ध इति योजना। **अस्य** विरुद्धस्य। **न चैव**मसाधकता साधने व्याप्यत्वमधिकमिति **वाच्यम्**। हेतुद्वयोपन्यासे क्लृप्तायाः प्रथमेन द्वितीयस्य कृतकर्त्तव्यताया दुष्टबीजतया धूमप्रागभावमात्रोपन्यास इव प्रकृतेऽपि तदभावात्। हेतुभेदस्येव व्याप्तिभेदस्यापि हेत्वाभासभेदकत्वं स्यात्तुल्यन्यायात्तथा च हेत्वाभासाधिक्यमित्याह **तथा सतीति**। सत्प्रतिपक्षव्यावर्तकमन्यदपि विरुद्धेऽस्तीति समाधत्ते। **अत्रा**हुरिति **तवेति** स्थापना वाद्यत्र सम्बोध्यः। **उन्नायक इति**। अयमश्वत्वधर्मिक गोत्वसाधकताभ्रमवान् गोत्वसाधकजिज्ञासानिवृत्तीच्छया गोत्वाभावसाधकाश्वत्वोपन्यासादित्युन्नयनसम्भवादिति भावः। **न सत्प्रतिपक्षस्तत्र** हेतुभेदेनोक्तरीत्योन्नयनासम्भवात्। **इति** विशेषात्। **तयो**र्विरुद्धसत्प्रतिपक्षयोः। **भेदात्** पृथग्घेत्वाभासात्।

तर्कामृतम्

सत्प्रतिपक्षो यथा 'पर्वतो वह्निमान् धूमात्', 'पर्वतो वह्न्यभाववान् महानसान्यत्वात्'।

तरङ्गिणी

साध्यविरोधिसाधको हेतुरित्यादिना सत्प्रतिपक्षलक्षणस्योक्तत्वात्तदनुक्त्वैवोदाहरणमाह-**पर्वत इति**। महानसान्यत्वस्य साध्याभावसाधकत्वं

साध्याभावसिद्ध्यनुकूलव्याप्तिग्रहविषयत्वम्। व्याप्तिग्रहः प्रमारूपो भ्रमरूपो वेति न कश्चिद्विशेषः। अयमप्यनित्यदोपः, ज्ञानघटितत्वादिति बोध्यम्।

चषकम्

सत्प्रतिपक्षलक्षणस्य पूर्वं कृतत्वादुदाहरणं दर्शयति। **सत्प्रतिपक्षो यथेति**। **साध्य**व्याप्यपरामर्शकालीनसाध्याभावव्याप्यपरामर्शविषयः सत्प्रतिपक्ष इत्युच्यते। **सन्प्रति**पक्षः प्रतिपरामृश्यमाणो यस्य परामृश्यमानस्येति विग्रहात् प्रत्यौपसन्दानिकशक्तिबलात् परामृश्यमानत्वस्य लाभादित्यपि **केचित्**। **रत्नको**शकृतस्तु **यथा** घटाभावव्याप्यवत्ताज्ञाने विद्यमानेऽपि घटचक्षुः संयोगे सति घटवत्ताज्ञान**मेवं** सत्यपि पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने पित्तादिदोषे सति पीतः शङ्ख इति **धीरेवं** पुरुषत्वव्याप्यकरचरणादिमत्ताज्ञाने स्थाणुत्वव्याप्यवक्त्रकोटरादिमत्ताज्ञाने च सति कोटिद्वयस्य प्रत्यक्षरूपः संशयो भवति।

तात्पर्यटीका

ननु सत्प्रतिपक्षलक्षणाकरणादुदाहरणप्रदर्शनेन कथं व्युत्पत्तिः सर्वसाधारणी स्यादित्याशङ्कां वारयन्नाह। **सत्प्रतिपक्षलक्षणस्येति**। **सत्प्रतिपक्षो** यथेतीति। **ननु** स्थापनाया दोषदुष्टत्वे प्रतिस्थापना भवति। **यथा**ऽयं गौरवश्वत्वादित्यत्र नायं गौरश्वत्वादिति। **न चैवं प्रकृत इति चेन्न**हीयं जल्पकथा **किन्तु** वादकथेति परोक्ते दूषणस्फूर्तिं फलमनुसन्धाय प्रतिस्थापनामेवादौ निर्दिष्टवानु**पाध्यायः** । **प्रत्यौपसन्दानिकशक्तिबलादिति**। प्रत्युपसर्गस्य समभिव्याहारोन्मिषितायाः शक्तेः कार्यकारणभावस्य बलादित्यर्थः। प्रतिमल्लप्रतिभटादिशब्दानां तथैव व्युत्पन्नत्वादिति।

चषकम्

आमनन्ति चाहत्यैव विप्रतिपत्तिजन्मानमपि संशयम्। **तथा** सत्प्रतिपक्षसम्वलनदशायां संशयरूपानुमितिर्भवति। संशायकत्वमेव च

सत्प्रतिपक्षस्य दूषकताबीजम्। **अत** एव प्रत्येकं हेत्वोः साधारण्येऽपि द्वयोरसाधारण्यमेवेत्यूचुष्टीका**कृतः**। **इत्थमेव** व्याप्यसंशयस्य व्यापकसंशयं प्रति हेतुत्वमिति **तदनुयायिनः**। **यत्र** चैककोटिव्याप्यदर्शनं तत्र सन्निकर्षवशादुभयकोटिकसंशयस्तु न भवतीत्यपरकोटिभासकसामग्र्या न्यूनबलवत्त्वं कल्प्यते कल्पनायाः फलबलाधीनत्वादिति **वदन्ति**।

तदपरे न मन्यन्ते। तदभावव्याप्यवत्ताज्ञाने तदुपनीतभानविशेषशाब्दबोधादेर्दूरे लौकिकाध्यक्षस्याप्यनुदयाददूरलौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानसामान्ये तस्य प्रतिबन्धकता लाघवान्नतूपनीतभानविशेषे शाब्दबोधे च पृथक् प्रतिबन्धकता गौरवात्तथा च प्रतिबन्धकसत्त्वात् कथमनुमितिः। **न हि** लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयम्। **इयम**प्युद्बुद्धविरुद्धसंस्काराभ्यां संशयरूपस्मरणस्य वारणसरणिः। **कथं** तर्हि कोटिद्वयव्याप्यदर्शने प्रात्यक्षिकः संशय इति **चेत्**।

तात्पर्यटीका

इन्द्रियान्यप्रमाणस्य निश्चयजनकत्वस्वाभाव्यमपि नास्तीति दर्शयति। **आमनन्ति चेति**। शास्त्रकृत इति शेषः। विप्रतिपत्त्या कोट्युपस्थितौ मानस एव संशय इति शङ्कां वारयति। **आहत्यैवेति**। **तथा सति विप्रतिपत्तेरिति** तत्संशयसार्थक्योपदर्शनविरोधापत्तेः। **नन्वे**वमनुमित्यविरोधित्वे दूषकताबीजाभावात् सत्प्रतिपक्षो न हेत्वाभासः स्यादतस्तन्मते तस्य दूषकताबीजं दर्शयति। **संशायकत्वमेव चेति**। **प्रत्येकं हेत्वोरिति**। प्रत्येकनिरूपितसाहचर्यवतोरपि प्रत्येकं हेत्वोरित्यर्थः। **साधारण्येपीति**। एकत्वस्य साधारण्ये तन्त्रत्वादित्याशयः। **असाधारण्यमेवेति**। कोटिद्वयसहचरिताभावप्रतियोगित्वादिति भावः। **इत्यमे**वासाधारणधर्मदर्शनमुद्रयैव न वह्निसंशय इति। कोटितानवच्छेदकरूपेणासाधारणधूमज्ञानसत्त्वादिति भावः। कोटिद्वयसहचरितोभयत्वावच्छिन्नव्यतिरेकप्रतियोगितावच्छेदकोभयत्वेनाग्रहाद्धूमसंशयाद्वह्निसंशयानुपपत्तिः **कथम**न्यथा यथोक्तस्य धूमस्य निश्चयादेव न वह्निसंशय इति विभाव्यानुयायिन **इत्युक्तम्**। **नन्वे**ककोटिव्याप्यवत्ताज्ञानस्यापरकोटिभान-

प्रतिबन्धकत्वानभ्युपगमे तद्दशायामपि संशयो दुर्वार इत्याशङ्क्य चाक्षुषरासनसामग्र्योरिव तत्र बलाबलं फलोन्नेयमित्याह **यत्र** चेति।

तदभावव्याप्यवत्ताज्ञाने विद्यमानेऽपि पीतः शङ्ख इत्युपनीतभानोदयाद्विशेषेति। दोषविशेषाजन्योपनीतभानेत्यर्थः **दूर इति** दूरतः प्रमितस्यापि स्थाणुत्वादेः शाखायां करत्वभ्रमकाले धर्मिण्यग्रहादित्यर्थः। केवललौकिकसन्निकर्षाजन्यत्वं न विशेषणं **किन्तु** दूरत्वाभावविशिष्टलौकिकसन्निकर्षाजन्यत्वमित्याहा**दूरेति**। सामान्यतो दोषजन्यभ्रमसामान्य प्रतिबध्यत्वोपपत्तये **दोषविशेषेति**। तेन दोषविशेषात् पित्तमण्डूकवसाञ्जनादीन्। विशिष्योपादाय तत्तदजन्यत्वं देयमिति **बोध्यम्** । **ननु** यत्र दिवसादिविलम्बेनैकत्रैव भूतले घटतदभावनिश्चयौ तज्जन्यसंस्काराभ्यां संशयात्मकस्मरणापत्तिरत आहे**यमपीति**। विरुद्धसंस्कारयोः स्वस्वविरुद्धविषयकस्मरणं प्रति ताद्रूप्येण प्रतिबन्धकत्वकल्पनापीत्यर्थः। **अपिना विरो**ध्यनुभवस्य प्राचीन विरुद्धसंस्कारनाशकताकल्पनापीति **सूचितम्**।

चषकम्

तत्रोभयोरन्यतरद्बाध्यं विरुद्धार्थग्राहकत्वादित्यवगमे विशिष्यैतस्य निर्णयाभावादुभयत्राप्यप्रामाण्यज्ञानात्। अगृहीताप्रमाण्यकस्यैवोक्तज्ञानस्य प्रतिबन्धकत्वात्। **एतेन** वह्न्यभावबाधावतारे वह्न्यभावव्याप्यवत्ताज्ञानेऽपि वह्नेरनुमित्युदये न बाधस्योत्तेजकत्वमावश्यकमिति मत**मपास्तम्**। तेनाप्यप्रमाण्यग्रहात्। **व्याप्य** संशयस्तु पृथगेव व्यापकसंशयहेतुः **न चाऽसौ** को ह्युपस्थित्युपक्षीण इति **वाच्यम्**। हुताशनो महानसे न ह्रदे इति स्मरतां पर्वतादिकं पश्यतां धूमसंशयभावाऽभावाभ्यां वह्निसंशयभावाऽभावदर्शनात्।

बाधबुद्धेः प्रतिबन्धकतायामप्येषैव रीतिरनुसन्धेया। प्रवृत्तिनिवृत्तियौगपद्य-हेतोर्युगपद्भावाऽभावनिर्णयस्यानुभवबाधितत्वाद्यत्र यदा तद्बुद्धिस्तत्र स्वाधिकरणतत्क्षणाव्यवहितपूर्वत्वविशिष्टविशेषणतासम्बन्धेन बाधबुद्ध्यभाव इति नियमाङ्गीकारात्। **स्वं** बाधबुद्ध्यभावः । **इदमेव** कार्यकालवृत्तितया हेतुत्वं नाम। **इन्द्रियभं**देन प्रतिवध्यप्रतिबन्धकभावस्त्वस्मन्मातामहचरणैः प्रपञ्चितः।

तात्पर्यटीका

स्थाणुत्वपुरुषत्वाभावयोर्धर्मिण्यनिश्चयादेवोभयत्राप्यप्रामाण्यनिश्चयासम्भवेऽप्यप्रामाण्यसंशयः सम्भवत्यंवंत्यभिप्रेत्यज्ञानादित्**युक्तम्**। अगृहीताप्रामाण्यकस्यैवेदन्त्वावच्छिन्नधर्मिकस्वसमानाधिकरणाप्रामाण्यग्रहविषयो यद्यत्तत्तद्भेदकूट एव। **न त्व**निश्चितताप्रामाण्यकस्येत्यंवकारार्थः **एतेना**गृहीताप्रामाण्यकोक्तज्ञानप्रतिबन्धकत्वेन। **तेनापि** बाधेनापि। **ननु** तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे व्याप्यसंशयाद्व्यापकसंशयो न स्यादत आह। **व्याप्यसंशयस्त्विति**। व्याप्तिविशिष्टवैशिष्ट्यावगाहिसंशयस्त्वित्यर्थः। तेन व्याप्याभाववान्वेति संशयान्न व्यापकसंशयः। **इति** स्मरतामित्यनेन कोटिद्वयोपस्थितिर्दर्शिता। **पर्वतादिकं** पश्यतामित्यनेन पर्वतचात्वालादिरूपधर्मिज्ञानमादर्शितम्। **धूम**संशयभावाभावाभ्यामित्यनेन यत्र धूमसंशयः पर्वते तत्र वह्निसंशयोऽस्ति नान्यत्रेत्यन्वयव्यतिरेकौ दर्शिताविति **बोध्यम्** ।

एषैवेति । तत्रापि प्रतिबन्ध्यतावच्छेदककोटौ लौकिकसन्निकर्षाद्यजन्यत्वस्य प्रवेशात्। प्रतिबन्धकतावच्छेदककोटौ निश्चयत्वाप्रवेशाच्चेति भावः। **नन्वेवं** योग्यतासंशये शाब्दबोधोऽपि न स्यादिति **चेन्न**। प्रत्यक्षनिश्चयं प्रत्येव विशेषादर्शनविशिष्टतदभावज्ञानस्य प्रतिबन्धकत्वाभ्युपगमात्। **न चैवं** बाधनिश्चयानन्तरमपि शाब्दबोधापत्तिरिति **वाच्यं** प्रत्यक्षनिश्चयान्यज्ञानसामान्ये विशेषदर्शनमुत्तेजकीकृत्य बाधनिश्चयस्य पृथगेव प्रतिबन्धकताया **वाच्यत्वादत** एवोक्तं **रीतिरिति**। युगपद्भावाऽभावनिर्णयस्य बाधितत्वानुभवाभावे प्रवृत्तिनिवृत्ती स्यातामित्याह **प्रवृत्तिनिवृत्तियौगपद्यहेतोरिति**। **तत्क्षणेति**। तद्बुद्ध्युत्पत्तिक्षणेत्यर्थः। **प्रपञ्चित इति**। **सचा**नुभूयमानारोपात्मकतदभावचाक्षुषोत्तरं लौकिकस्यापि तच्चाक्षुषस्यानुदयाल्लौकिकसन्निकर्षाजन्यत्वमात्रं प्रतिबध्यतावच्छेदककोटावनिवेश्य तच्चाक्षुषं प्रति तदभावचाक्षुषस्य पृथक्प्रतिबन्धकता वाच्या। **न चारोपकाले** तज्जनकदोषवशादेव तच्चाक्षुषवारणमिति तदुत्तरकालेऽपि तत एव तद्वारणमिति **वाच्यम्**। विनश्यदवस्थदोषजन्यारोपोत्तरं तद्वारणाय तत्प्रतिबन्धकत्वस्याप्यावश्यकत्वादित्यादिः।

तर्कामृतम्

असिद्धस्त्रिविध:, आश्रयासिद्ध:, स्वरूपासिद्ध: व्याप्यत्वासिद्धश्च। यत्र पक्षोऽसन् सिद्धसाधनं वा, स आश्रयासिद्ध:, यथा 'शशविषाणं नित्यं अजन्यत्वात्' 'शरीरं हस्तादिमत् हस्तादिमत्तया प्रतीयमानत्वात्। यत्र पक्षावृत्तिर्हेतु: स स्वरूपासिद्ध: यथा 'पर्वतो वह्निमान्' महानसत्वात्।

तरङ्गिणी

पक्षोऽसन्निति। पक्षतावच्छेदकविशिष्ट:। असत्ख्यात: स्वमतेऽसत्त्वेन यथाश्रुतासङ्गते:। सिद्धसाधनं वेति। पक्षतावच्छेदकरूपेण पक्षे साध्यनिर्णय:। अनयोराद्यस्य ज्ञातस्यैवानुमितिप्रतिबन्धकत्वम्। अपरस्य तु स्वरूपत इति शेष:। तत्रापि पक्षतावच्छेदेनानुमितौ पक्षतावच्छेदकावच्छेदेनैव सिद्धिर्विरोधिनी। सामानाधिकरण्येनानुमितौ तूभयथापि। बाधे तु सामानाधिकरण्येन विशिष्टबुद्धौ अवच्छेदकावच्छेदेनैव बाधधियो विरोधिता। अवच्छेदकावच्छेदेन विशिष्टबुद्धौ तूभयथापीति ध्येयम्। **पक्षावृत्तिरिति।** एतस्य परामर्शप्रतिबन्धो दूषकताबीजम्। भागासिद्धेरपि पक्षतावच्छेदकावच्छेदेन परामर्शविरोधित्वात्।

चषकम्

असिद्ध इति। सिद्धिरनुमितिकारणज्ञानसम्पत्तिस्तद्विरोधिनीत्यसिद्धिर्भण्यते तद्वानित्यर्थ: । **असन्** पक्षतावच्छेदकाभाववान् । अस्ति हि विषाणे पक्षे शशसम्बन्धिभेद इत्युदाहरणसङ्गति: । तेन न सिद्ध्यसिद्धिव्याधात: । **सिद्धसाधनं** पक्षे साध्यनिर्णय: । **तदभावस्तु** कार्योत्पत्तिपूर्वकाल एवापेक्षितो **न तु** कार्यकालेऽप्यसम्भवदिति **बोध्यम्** । **इदन्तु** स्वरूपसदेवानुमितिविरोधीति तद्विषयस्तु न तद्विषयविरोधीति च न हेत्वाभास इत्यन्यत्र **स्पष्टम्।** **परन्त्व**सिद्धिपदयोगस्यातिप्रसक्तिदर्शनेन रूढिं व्यवस्थापयन् पक्षदोषतामाश्रित्या-श्रयासिद्धिमध्ये तत्**प्रदर्शितवान्** । अवच्छेदकावच्छेदेनानुमितौ तथैव सिद्धिर्विरोधिनी सामानाधिकरण्येन तु तस्यां सिद्धिमात्रम्।

बाधे त्वेतद्वैपरीत्यमेकत्र बाधे तत्रेव सर्वत्राप्येवं **शुद्धसम्बन्धेन** बाधे विशिष्टसम्बन्धेऽप्यनुमितेरसम्भवात्। **परामर्शस्तु** पक्षतावच्छेदके साध्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यामनुमितौ तथैव हेतुमत्ता **पक्षता**वच्छेदकावच्छिन्नसम्बन्धेन व्यापकतां वावगाहमानो हेतुरिति **बोध्यम् क्रमेणोदाहरति। शशविषाणमिति। हस्तादिमत्तयेति** च। **पक्षावृत्तिः** पक्षनिष्ठाभावप्रतियोगी। तेन न वक्ष्यमाणभागासिद्धासङ्ग्रहः। **न चागुणः** सत्तावान् घटाकाशादित्यत्र गुणे संयोगेन वृत्तेरप्रसिद्धावपि **क्षतिः**।

तात्पर्यटीका

शशस्य विषाणमिति व्युत्पत्या शशसम्बन्ध्यभेदस्य पक्षतावच्छेदकत्वमित्यभिप्रेत्याह **शशसम्बन्धिभेद इति**। तदिदं प्रकृतसाध्यानुमितिदोषो वा तदभावानुमितिदोषो वा न युक्त इत्या**हेदन्त्विति**। **न च** संशयरूपपक्षताविघटकत्वात् सिद्धसाधनं दोष इति **वाच्यम्**। तथा सति साध्याभावस्यैव विरुद्धसाध्यवत्त्वं दोष इति फलितं तच्च साध्याभावानुमितिप्रतिबन्धकं न सिद्धसाधनमपितु बाध एवेति विरमत्वायुष्मानित्यभिप्रेत्या**हान्यत्र स्पष्टमिति**। तस्य[1] च साध्यानुमितिकारणसंशयस्य कथञ्चिद्विरोधीदं ज्ञानविषयसाध्यस्यापि विषयविरोधं विना हेत्वाभासात्वं दुर्घटम्। **तदुक्तम्**। तद्विषयस्त्वित्यादीत्याशयः। **अतिप्रसक्तिप्रदर्शनेन** सिद्धसाधनस्याप्यनुमितिकारणज्ञानात्मकसाध्य-संशयरूपपक्षताविरोधित्वप्रदर्शनेन। **अत** एव सिद्धिपदार्थे निश्चयमुपेक्ष्य ज्ञानमेव सङ्घटितम्। **रुढिमिति** रुढ्यर्थतावच्छेदकं च परामर्शविरोधित्वं स्वयमेव परिष्करिष्यति। ननु सिद्धिकालेऽपि क्वचिदुनमितिदर्शनात् कथं तस्याविरोधितेत्याशङ्क्याहाऽवच्छेदकावच्छेदेनेति।

सर्वत्रापीति। अनुमितेरसम्भवादित्यग्रेतनेनान्वयः **शुद्धसम्बन्धेन संयोगेन**। **तथैव** पक्षतावच्छेदकव्यापकत्वविशिष्टहेतुतावच्छेदकसम्बन्धेनैव। **हेतुरिति**। तत्तत्परामर्शाव्यवहितोत्तरानुमितित्वं कार्यतावच्छेदकमिति न व्यभिचारः। **ननु**

---

१. इत्याशय इति योजना

पक्षावृत्तित्वं निरवयवत्वरूपवक्ष्यमाणभागासिद्धे व्याप्तं **यत्किञ्चित्**पक्षावृत्तित्वं नानुगतमतः **पक्षनिष्ठेति**। वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्न-हेतुतावच्छेदकसम्बन्धावच्छिन्नपक्षनिरूपितवृत्तित्ववृत्तिप्रतियोगिताकाभावोपेक्षाबीजं दर्शयति। **न चेति**। यथोक्तपक्षनिरूपकत्वाभाववद्यथोक्तवृत्तित्वसामान्य-कत्वोपेक्षाबीजमादर्शयितु**मवृत्ति**हेत्वनुसरणम्।

तर्कामृतम्

स च विशेषणासिद्धविशेष्यासिद्धभागासिद्धभेदाद्बहुविधः। आद्यो यथा 'शब्दोऽनित्यः चाक्षुषत्वे सति जन्यत्वात्'। द्वितीयो यथा 'शब्दोऽनित्यः गुणत्वे सति परमाणुवृत्तित्वात्'। तृतीयो यथा 'एतानि द्रव्याणि निरवयवत्वात्'। सोपाधिर्व्याप्यत्वासिद्धः

तरङ्गिणी

स चेत्यादि। आद्ये शब्दे पक्षे चाक्षुषत्वरूपविशेषणस्य द्वितीये परमाणुवृत्तित्वरूपविशेष्यस्य तृतीये सर्वेषु द्रव्येषु निरवयत्वभावः। अयं त्रिविधोऽपि नित्यदोषः। एतदुभयभिन्नं परामर्शविरोधिरूपं व्याप्यत्वासिद्धिः, यत्र साध्यं हेतुर्वा असन्, यथा शशविषाणवत् शशविषाणाद्वेति।

चषकम्

विशेषणासिद्धोऽनेकविधो विशेषणतावच्छेदकाद्यसिद्धभेदाद्यथा चाक्षुषत्वं यदि विषयताविशेषस्तदा विशेषणासिद्धोऽथ चक्षुर्जन्यज्ञानविषयता तदा ज्ञाने चक्षुर्जन्यत्वरूपविशेषणतावच्छेदकासिद्ध इत्यादि इष्टव्यमित्यभिप्रेत्योक्तं **बहुविध इति**।

शब्दोऽनित्य इति। यद्यप्यनित्यः शब्द इत्यनित्यत्वस्य साध्यतायाः निःसन्दिग्धप्रतिपतये वक्तुं युक्तं **तथापि** शब्दत्वस्य साध्यताभ्रमस्तत्राप्यस्ति

व्याख्यानतो विशेषप्रतिपत्तिस्त्विहापि समानेति साम्प्रदायिकप्रतिज्ञायाः परित्यागो नोचित इत्याशयेनेत्थमभिहितमे**वमन्यत्रापि**। **न च** नित्यत्वस्य साध्यतायामपि प्रकृता क्षतिरिति **वाच्यम्**। तथा सति बाधेन साङ्कर्यात्। **'अणुरपि विशेषोऽध्यवसायकर'** इति न्यायात्। **एतानि** क्षित्यादीनि नव। **सोपाधिरिति**। **एत**त्तत्वं प्रागेवोक्तम्। **वक्ष्यते** चाधिकमुपरिष्टात्।

वस्तुतस्तु सोपाधिरुपाध्युन्नीतधर्मावान् स चापक्षधर्मत्वं यथोक्तसाधकत्वं व्यभिचारश्चेति यथामतम्। **अत एव** यद्व्यावृत्या साध्यसाधनवैशिष्ट्यं व्यावर्त्तते स उपाधिरिति **वदन्ति**। तथा च व्याप्तिविशिष्टपक्षधर्मतयान्ततः साध्य एव प्रसिद्ध्या शून्य इति यावत्। **यद्यपि** साध्याभाववद्वृत्तित्वं व्यभिचारस्तदभावो न व्याप्तिः केवलान्वयिन्यभावा**त्किन्त्व**न्यैवेत्युक्तं तथा चोक्तव्यभिचारान्यः केवलव्याप्त्यभावो व्याप्यत्वासिद्धिः सुलभैवेति विशिष्टाभावपर्यन्तानुधावनं व्यर्थम्। **तथापि** मेयत्वं वाच्यत्वव्यभिचारीति व्यवहारात्[१] स्वसमानाधिकरणाभावप्रतियोगित्वादिनिरूपकत्वमपि व्यभिचार एवेत्युक्तकेवलव्याप्त्यभावोऽपि निरुक्तव्यभिचार एव केवलपक्षधर्मत्वाभावश्च स्वरूपासिद्धिरेवेति विशिष्टमुपात्तमिति सर्वसामञ्जस्यम्।

इदमुपलक्षणम्। अयोगोलकं वह्निमद्धूमादित्यत्र स्वरूपासिद्धित्वोपपत्तये व्याप्यविशेषाभावस्यैव स्वरूपासिद्धित्वे स्थिते निर्वह्नौ वह्निव्याप्यत्वेन वह्निव्याप्याभावोऽपि व्याप्यत्वासिद्धि**स्तथा** हेतुसाध्याप्रसिद्धीश्चेत्यपि **बोध्यम्**। **असिद्धिविभाजकं** तु व्याप्यत्वासिद्धौ साध्याप्रसिद्ध्याद्यन्यतमत्वादिकमेव सुवचम्।

तात्पर्यटीका

अन्यत्रापि विशेष्यासिद्ध्युदाहरणेऽपि। **एवं** साम्प्रदायिकप्रतिज्ञानुसरणम्। घटादेः परमाण्वादेर्वा पक्षत्वे निरवयवत्वं न भागासिद्धमतः **शाखाकम्पन्यायेन** व्याचष्टे **एतानि क्षित्यादीनि नवेति**। **ननु** सोपाधिरित्यनेनोपाधेर्व्याप्य-

---

१. घटत्वव्यभिचारिति।

त्वासिद्धित्वमुच्यते **न चै**तद्युक्तमुपाधेर्हेत्वाभासत्वस्य केनाऽप्यनङ्गीकारादत आहै**तत्तत्वमिति**। **साक्षा**त्तस्याविरोधित्वान्न हेत्वाभासत्वमित्युक्तं प्राक्। व्यभिचारव्याप्यत्वेन साक्षात् विरोधित्वमाशङ्क्याह **वक्ष्य**ते चेति। तद्व्याप्यस्य तत्रैवान्तर्भावान्न व्याप्यत्वासिद्धित्वमित्यग्रे वक्ष्यत इत्यर्थः।

कस्तर्हि सोपाधिरित्यस्यार्थ इत्यत आह **वस्तुतस्त्विति। उपाध्युन्नीतेति**। तथा चोपाधिः परिचायक इति भावः। **यथामतमिति**। **अपक्ष**धर्मत्वमित्यसिद्ध्युन्नायकत्वमते। तेषां साधनव्यापकत्वे सति पक्षावृत्तित्वं लक्षणम्। तेनायोगोलकं वह्निमद्धूमादित्यत्राऽयोगोलकं धूमाभाववदार्द्रेन्धना-भावादित्यसिद्ध्युन्नयनं बोध्यम्। धूमोऽयोगोलकावृत्तिरार्द्रेन्धनव्याप्यत्वादित्यपि केचित्तच्चिन्त्यमुक्तार्थपर्यवसितार्थकत्वात्। **यथोक्तसाध्यकत्वमिति** सत्प्रतिपक्षोन्नायकत्वमते। **व्यभिचारश्चेति** व्यभिचारोन्नायकत्वमते। जलं द्रव्यं गन्धवत्त्वादित्यत्र पृथिवीत्वादिकमप्युपाधिरेव। पर्वतपक्षतायां सद्धेतोरपि वह्निसाध्यकधूमस्य ह्रदपक्षतायां बाधितत्ववत् पृथिवीपक्षतायां **निरुपाधे**रप्यस्य जलपक्षतायां सोपाधित्वाङ्गीकारा**दन्यथा** तत्र साधनोपादानवैयर्थ्यादित्या**हात एवेति**। त्रयाणामप्युपाधित्वादेवेत्यर्थः। तथा चोपाधेर्वैशिष्ट्यव्यावर्त्तकत्वोक्त्या च। **तथा च** व्याप्त्यभावस्योक्तव्यभिचारादन्यत्वे च। **विशिष्टमुपात्तमिति**। तथा च विशिष्टाभावोऽतिरिक्तो व्याप्यत्वासिद्धिरिति भावः।

विशेषणाभावविशेष्याभावाभ्यां विशिष्टाभावस्यातिरिक्तत्वानङ्गीकारे त्वाहे**दमुपलक्षणमिति**। **व्याप्यविशेषाभावस्यैवेति**। व्याप्यसामान्याभावस्य स्वरूपासिद्धित्वे वह्निव्याप्यवह्नेस्तत्र सत्त्वेन स्वरूपासिद्धिर्न स्यादिति भावः। वह्निसत्त्वे सोऽपि वह्निव्याप्य एवेति निर्वह्नावित्युक्तम्। वह्निव्याप्यसामान्यलिङ्गकानुमितौ वह्निव्याप्यसामान्याभावोऽपि स्वरूपासिद्धि-रेवेति मत्त्वा हेतुसाध्याप्रसिद्धि इति।

तर्कामृतम्

यथा, धूमवान् वह्नेः।

चषकम्

वह्नेरिति। आकाशात् करका पृथिवी कठिनसंयोगादित्यपि **बोध्यम्**। **प्राञ्चस्तु 'व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेदित्यूचुः। अत्र नव्याः**। नीलधूमेऽव्याप्तिसत्त्वात् कथं व्याप्यत्वासिद्धिः। **ननु** हेतुतावच्छेदकस्य व्याप्यतानवच्छेदकत्वं व्याप्यत्वासिद्धि**रत** एव साध्यसम्बन्धितावच्छेदकधर्मलक्षणां व्याप्तिं परिष्कृतवन्तः **पक्षधरमिश्राः**। तथा च स्वसमानाधिकरणतादृशधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वेन नीलधूमत्वस्य धूमत्वघटितत्वान्न तदवच्छेदेन व्याप्तिग्रह सम्भव इत्यक्षतैव व्याप्यत्वासिद्धिः। **धूम**प्रागभावत्वादिसङ्ग्रहाय **स्वसमानाधिकरणेति**।

विशिष्टत्वमात्रस्यातिप्रसक्तस्यानवच्छेदकतया विशिष्टसत्तात्वस्य सत्तात्वघटितस्य सङ्ग्रहाय **तादृशेति**। साध्यसम्बन्धितावच्छेदकेत्यर्थः। सत्तात्वगुणकर्मान्यत्वादि तु न द्रव्यत्वसम्बन्धितावच्छेदकमिति सर्वं **सुस्थम्**। **यदि** चैवं वह्निमदन्यावृत्तित्वमप्यवच्छेदकं न **स्यान्न** चेष्टापत्तिः। धूमत्वालोकत्वादनुपस्थितावप्युक्तधर्मावच्छिन्नतल्लिङ्गकानुमितिनिर्वाहकस्यास्य विकासकतया[1] तथात्वस्य सर्वसंयतत्वात्। **विशेष्यतया** घटत्वोक्तौ तु धूमान्यान्यत्वादेस्तथात्वापत्तेर्दुर्वारत्वादिति विभाव्यते **तदा** स्वसमानाधिकरणेति विहाय स्वव्यापकेत्येवोच्यताम्। धूमत्वालोकत्वयोरपिप्रत्येकं धूमालोकान्यतरत्वं प्रत्यव्यापकत्वेऽपि स्वघटकोक्तधर्मत्वेन व्यापकत्वमक्षुण्णम्। **तदेतदेवास्मद्गुरुचरणाः** परिष्कुर्वन्ति।

तात्पर्यटीका

वह्नेरिति व्याप्त्यभावाभिप्राये**णाकाशादिति** पक्षधर्मत्वाभावाभिप्रायेण **करकेति** व्याप्यसामान्याभावाभिप्रायेण। वह्निधूमयोः काञ्चनमयत्वे विशेषणे कृते मूलोक्तमेव साध्यसाधनाप्रसिद्ध्युदाहरण- स्फुटमित्युपेक्षितम्। **अत**

---

१. सामान्यधर्मतया

एव व्याप्यत्वासिद्धेरुक्तरूपत्वादेव। **व्याप्तिमिति**। अन्यथोक्त-व्याप्यत्वासिद्धेरनुमितिकारणव्याप्त्यन्तरज्ञानविरोधित्वाभावेन हेत्वाभा-सत्वानुपपत्तेरिति भावः।

एवं साध्यसम्बन्धितावच्छेदकघटितधर्मस्य व्याप्यतानव्च्छेदकत्वे। **विशेष्यतयेति**। वह्निमदन्यावृत्तित्वे वह्नित्वस्य विशेषणतयैव घटकत्वात्तत्सङ्ग्रहः। **नीलधूमत्वे** तु धूमत्वस्य विशेषणतयैव घटकत्वात्तद्वारणमिति भावः। **धूमान्यान्यत्वादेरिति**। अत्र धूमस्य विशेषणतयैव घटकत्वादिति भावः। **स्वव्यापकेत्येवेति**। तथा च वह्नित्वस्य वह्निमदन्यावृत्तित्वाव्यापकत्वात्तादृशधर्माघटितत्वं तत्राक्षतमित्याशयः। **नन्वेवं** धूमालोकान्यतरत्वमपि व्याप्यतावच्छेदकं स्याद्धूमत्वादेरन्यतरत्वाव्यापकत्वेन तद्व्यापकधर्मान्तराघटितत्वस्य तत्राप्यक्षतत्वादत आह। **धूमत्वालोकत्वयोरिति**। **स्वघटकोक्तधर्मत्वेनेति**। **नन्वेवमपि** धूमतद्ध्वंसान्यतरत्वं तथा स्यादत्र सम्बन्धाननुगमेन **तद्धूम** तद्ध्वंसयोः स्वघटकधर्मत्वेनापि व्यापकत्वासम्भवादत आह। **तदेतदेवेति**।

चषकम्

स्वव्यापकविशेष्यतानिरूपितघटकतावच्छेदकसम्बन्धावच्छिन्न प्रकार-ताश्रयधर्माघटितत्वं विवक्षितम्। **व्यापकत्वञ्च** तादृशधर्मप्रकारतानिरूपित-सम्बन्धावच्छिन्नविशेष्यतात्वेन। **भवति** च धूमालोकावित्यादिप्रमा-विशेष्यतोक्तरूपेणोक्तान्यतरत्वव्यापिका तन्निरूपितोक्तप्रकारताश्रयश्च धर्मो धूमत्वादीति तद्घटितोक्तान्यतरत्वव्युदासः। **इत्यथञ्च** धूमतद्ध्वंसत्वयोः समवायादिना तादृशान्यतरत्वव्यापकत्वाभावेऽपि न क्षतिरिति **चेन्न**। यतो हेतुतावच्छेदकेऽनतिरिक्तवृत्तित्वरूपव्याप्यतावच्छेदकत्वावगाहिज्ञानस्यैवहेतुता वाच्या।

तदभिप्रेत्यैव स्वविशिष्टाधिकरणावृत्तिसाध्यासमानाधिकरणकत्वं तत्राप्यवच्छेदकत्वमूचिरे **दीधितिकृतः अन्यथा** प्रमेयत्वसामानाधिकरण्येन व्याप्त्यवगाहिनो वह्निमदन्यावृत्तिप्रमेयवानितिज्ञानादप्यनुमित्यापत्तेस्**तथा च**

स्वरूपसम्बन्धरूपतदनवच्छेदकत्वावगाहिनो निरुक्तव्याप्यत्वासिद्धिज्ञानस्य ग्राह्याभावानवगाहितयानुमितिहेतूक्तज्ञानाविरोधित्वान्न भवत्येव व्याप्यत्वासिद्धिः। **ननु** हेतुतावच्छेदके स्वरूपसम्बन्धरूपव्याप्यतावच्छेदकत्व-ग्रहस्यैवानुमितिहेतुत्वम्। तावतैव हेतुतावच्छेदकसामानाधिकरण्येन व्याप्तिग्रहादनुमित्यापत्तिवारणसम्भवात्। **अत** एव न ह्यतिप्रसक्तमवच्छेदकमिति सङ्गच्छतेऽ**न्यथातिप्रसक्तं** नानतिप्रसक्तमितिवदनुक्तिसम्भवस्**तदुक्तम्**।

तात्पर्यटीका

स्व व्यापकेति। स्वं व्याप्यतावच्छेदकत्वेनाभिमतम्। **न तु** वह्निमदन्यावृत्तय इति प्रमाविशेष्यता वह्निमदन्यावृत्तित्वव्यापिका तन्निरूपितप्रकारताश्रयो धर्मो वह्नित्वं तदघटितत्वाभावाद्वह्निमदन्यावृत्तित्वस्य व्याप्यावच्छेदकत्वं न स्यादत आह। **व्यापकत्वञ्चेति**। **तादृश धर्मप्रकारतेति**। घटकधर्मान्तरमात्रवृत्तिप्रकारतेत्यर्थः **न च** वह्निमदन्यावृत्तित्वं स्वघटकं धर्मान्तरं वह्नित्वस्यातथात्वेऽपि वह्नित्वप्रकारतानिरूपितविशेष्यतात्वेन न स्वव्यापकत्व- मिति नोक्तप्रमामादाय दोषः। **इत्थञ्च** व्यापकत्वस्य धर्माविशेषणत्वे च। **न क्षतिरिति**। धूमतद्ध्वंसावितिप्रमाविशेष्यताया यथोक्तरूपेण धूमतद्ध्वंसान्यतरत्वव्यापकतया तन्निरूपितयथोक्त-सम्बन्धावच्छिन्नप्रकारताश्रयधूमत्वादिघटितत्वादेवोक्तान्यतरत्वस्यापि वारणा-दित्यर्थः। अनतिरिक्तवृत्तित्वरूपेत्यादि। एवकारेण स्वरूपसम्बन्ध-रूपावच्छेदकत्वावगाहिज्ञानव्युदासः।

तदभिप्रेत्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वमभिप्रेत्य। द्रव्यं विशिष्टसत्त्वादित्यत्र विशिष्टसत्तात्वसङ्ग्रहाय **स्वविशिष्टेत्यादि**। **अत्र** सामानाधिकरण्येन गुणकर्मान्यत्वमेब व्याप्यतावच्छेदकं समवायेन गुणकर्मान्यत्वविशिष्टं च हेतुर्न तु सत्तात्वमपि निविशते प्रयोजनाभावादिति **बोध्यम्**। **तत्रापि** **साध्य**सम्बन्धितावच्छेदकधर्मरूपव्याप्तावपि। **अन्यथा**नतिरिक्तवृत्तित्वरूपावच्छेदकत्वानवगाहिनोऽपि व्याप्तिज्ञानस्यानुमिति-हेतुत्वे। **उक्तज्ञानेति**। हेतुतावच्छेदकेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वाव-

गाहिज्ञानेत्यर्थः। **ननु** हेतुतावच्छेदके स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिज्ञानहेतुत्वमभ्युपेत्याप्युक्तवह्निमदन्यावृत्तिप्रमेयवानिति ज्ञानादनुमितिवारणे किमिति गुरुशरीरस्यानतिरिक्तवृत्तित्वरूपावच्छेदकत्वंस्यावगाहिज्ञानस्य हेतुत्वमभ्युपगम्यतें इत्याशङ्कते **नन्विति**। **अत्रोपष्टम्भकमाहात एवेति**। ननु साध्यसम्बन्धितावच्छेदकेत्येतद्विषयोऽयं ग्रन्थो न प्रकृतविषय इत्याशङ्क्य प्रकृतविषयत्वेऽप्युपष्टम्भकान्तरमाह **तदुक्तमिति**।

चषकम्

तेन च गुरुणाऽपि रूपेण व्याप्तिग्रहे कथायां हेतोरुपन्यासे वानुयोगः प्रकारान्तरेण व्याप्तिवादिनामपि समान इति **चेत्तत्र** पशुमान् सास्नादिमत इत्याद्यनुमित्युच्छेदापत्तिरिति **स्मर्त्तव्यम्**। **तस्मान्नात्र** व्याप्यत्वासिद्धि-**र्हेत्वाभासः**।

परार्थे पुरुषस्त्वधिकेन निगृह्यते। दृष्टान्तस्य साधनवैकल्यादिवद्धेतोर्व्यर्थविशेषणत्वमपि पृथगेव वा निग्रहस्थानमिति **वदन्ति**। साधारण्यासाधारण्यभिन्नत्वे सति परामर्शविरोधित्वं तु त्रितयानुगतमसिद्धौ हेत्वाभासविभाजकं **बोध्यम्**। **न च** काञ्चनमयो ह्रदः प्रमेयो मेयत्वादित्यादावाश्रयासिद्धावव्याप्तिस्तत्र साधारण्यासाधारण्ययोरप्रसिद्ध्या तद्भेदाप्रसिद्धेरिति **वाच्यं** तत्र तस्यानुपादेयत्वा**च्छेषं** व्याप्त्यनुगमवत्।

तात्पर्यटीका

तेन च साध्यसम्बन्धितावच्छेदकत्वस्य स्वरूपसम्बन्धरूपस्यादरेण च। **प्रकारान्तरेण** साध्याभाववदवृत्तित्वादिप्रकारेण। **व्याप्तिवादिनामिति** कर्तरि षष्ठी। साध्यसम्बन्धितावच्छेदकधर्मरूपव्याप्तिवादिनं प्रतीति शेषः। **अनुयोगो** गुरुधर्मेण हेतुतायां कथं तव व्याप्तिग्रह इति प्रश्नः। **समान इति**। हेतुतावच्छेदके स्वरूपसम्बन्धरूपव्याप्यतावच्छेदकत्वावगाहिव्याप्तिज्ञानस्यैव हेतुत्वस्य तवापि

वाच्यत्वात्तस्य च कथन्ताविषयतायास्तुल्यत्वादिति भावः। **तत्र** स्वरूपसम्बन्धरूपावच्छेदकत्वोक्तौ। **सास्नादिमत इति**। सास्नादिमत्त्वे स्वरूपसम्बन्धरूपसाध्यसम्बन्धितावच्छेदकत्वस्येव व्याप्त्यन्तरावच्छेदकत्वस्यापि यथोक्तस्यासम्भवादिति भावः। **नील**धूमत्वं तु धूमत्वघटितत्वात् **किम्वा** कम्बुग्रीवादिमत्त्वं गौरवान्न व्याप्यतावच्छेदकमित्युक्तत्वात् स्मारयति। **स्मर्त्त**व्यमिति। **तस्मा**द्गुरोरप्यनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्यावगाहिज्ञानस्यानुमितिहेतुत्वावश्यकत्वेन दूषकताबीजाभावात्। **व्याप्यत्वासिद्धिरिति**। गुरोः स्वरूपसम्बन्धरूपावच्छेदकत्वाभावेन नीलधूमत्वेऽप्युक्तव्याप्यत्वासिद्धिः सम्भवत्यपीति भावः। **तथापि** ग्राह्याभावानवगाहितया निरुक्तपरामर्शविरोधित्वान्न तस्या हेत्वाभासत्वमित्याह **हेत्वाभास इति**।

कुतस्तर्हि वादिनिग्रहस्तत्राह **परार्थ इति**। **अधिकेनेति**। अधिकोक्त्येत्यर्थः। अधिकस्य प्रथमेन द्वितीयस्य कृतकर्त्तव्यताया दुष्टिबीजतया हेतुद्वयोद्भावनादिनियतविषयकत्वस्योक्तत्वादाह **दृष्टान्तस्येति**। साधारण्यासाधारण्ययोरपि परामर्शविरोधित्वात्तयोर्वारणाय सत्यन्तम्। अनुपसंहारिणोऽपि व्यतिरेकव्याप्तिघटितपरामर्शविरोधित्वात्तत्रातिव्याप्तेः परामर्शोऽन्वयव्याप्तिघटित उपादेय इति वक्ष्यते। व्यक्तीकरिष्यते चैतदुपरिष्टात्। **ननु** पर्वतान्यपर्वतो वह्निमान् धूमादित्याद्याश्रयासिद्ध्यादावव्याप्तिरुक्तरूपपरामर्शसम्भवादित्याशङ्क्य तत्राहार्यग्रहसमानविषयकग्रहविरोधित्वं वाच्यमित्याह **शेषमिति**। **ननु** तद्विषयविषयकग्रहस्यापि प्रकृताश्रयासिद्ध्यादिग्रहप्रतिबध्यस्याप्रसिद्धिरेवेत्यतो **वदिति**। **अयं भावः** । पक्षस्येदन्त्वमपि लक्षणे निवेशनीयम्। तेनेदन्त्वविशिष्टविशिष्टे पक्षे तथैव साध्यसाधनवैशिष्ट्याव- गाह्याहार्यग्रहविषयविषयकग्रहविरोधित्वं वाच्यं तथा च पर्वतान्योऽयं पर्वतो वह्निव्याप्यधूमवानित्याद्युक्तग्रहविषयविषयकोऽयं पर्वतान्य इति ग्रहस्तद्विरोधी चायं न पर्वतान्य इति ग्रहस्तद्विषयत्वादाश्रयासिद्धौ लक्षणसमन्वयः। **एवं** साध्यसाधनाप्रसिद्ध्योरपीति।

चषकम्

वह्न्यव्यभिचारिमेयत्ववान् वह्निसमानाधिकरणह्रदत्ववान् वा पर्वतो वह्निमान् मेयत्वाद्ध्रदत्वाद्वेत्यादौ यथोक्ते व्याप्यत्वासिद्धिस्वरूपसिद्धी व्यवहारनिमित्ते **न त्वाश्रयासिद्धिरपि** वह्निव्यभिचारवह्निमदवृत्तित्वयोः सत्यन्ताभावेनासिद्धित्वानङ्गीकारादाश्रयासिद्धिलक्षणेऽसिद्धित्वे सतीति विशेषणान्नानयोस्तदतिव्याप्तिः। **प्रकृतपक्षाप्रविष्टाभावके** ये साधारण्यासाधारण्ये तद्भिन्नत्वे सतीति वा सत्यन्तं परिष्कर्त्तव्य**मभावत्वं विरोधित्वम्**।

इत्थञ्च वह्निव्यभिचारिमेयत्वरूपाश्रयासिद्धिविरोधिवह्न्यव्यभिचारिमेयत्वं प्रकृतपक्षे प्रविष्टमेवेत्यतथा विधं वह्नौ मेयत्वसमानाधिकरणाभावप्रतियोगित्वरूपं साधारण्यान्तराद्येव तद्भिन्नत्वमुक्ताश्रयासिद्धावस्ति **न तूक्त**साधारण्यान्तरेऽपीति। नोक्ताव्याप्त्यतिव्याप्ती **इत्यास्तां** तावत्। **परामर्शे** चान्वयव्याप्तिरुपादेया। तेन व्यतिरेकि परामर्शप्रतिबन्धकानुपसंहारित्वव्युदासः। **तथा हि**। वह्निमान् मेयत्वादित्यादिव्यतिरेकिसाध्यके साध्याभाववदवृत्तित्वरूपव्याप्तेरुपादानात् पक्षवृत्तित्वविशिष्टस्य साध्याव्यभिचरितसामानाधिकरण्यस्याभावरूपव्याप्यत्वासिद्धौ नाऽव्याप्तिः। **तद्ग्रहस्य** ग्राह्याभावावगाहितया निरुक्तपरामर्शं प्रत्येव विरोधित्वात्।

अत्र साध्येऽभावाप्रतियोगित्वमनुपसंहारित्वं नास्त्येव हेतौ सम्भवदपि नोक्तपरामर्शं विरुणद्धीति क्वातिव्याप्तिसम्भावना। **वाच्यं** मेयत्वादित्यादिकेवलान्वयिसाध्यके हेतुसमानाधिकरणेत्यादिव्याप्तिरुपादेया तदविरोधितया चोक्तरूपानुपसंहारित्वव्युदासः। **न ह्यत्र** पक्षवृत्तित्वविशिष्टसाध्याव्यभिचरितसामानाधिकरण्याभावः प्रसिद्ध्यतीति क्वाऽव्याप्तिराशङ्क्येतापि। **लक्ष्यस्यानुगमासम्भवेन** शब्दैक्यस्यानुपादेयत्वा**दिति**।

तात्पर्यटीका

उक्तसत्यन्ताभावेनाश्रयासिद्धिविशेषेऽव्याप्तिमाशङ्क्यालक्ष्यत्वेनोत्तरयति **वह्न्यव्यभिचारीत्यादि**। व्याप्तिविशिष्टपर्वतवृत्तित्वाभावपर्वतनिष्ठाभावप्रतियोगित्वरूपयोर्व्याप्यत्वासिद्धिस्वरूपासिद्ध्योरभावयो: पक्षतावच्छेदकत्वे कृतेऽपि तयोस्तु साधारण्यासाधारण्ययोर्यथाश्रुतयोरपि भेदस्यानपायेन ते तत्र स्यातामित्याशङ्कां वारयितुं **यथोक्ते इति**। असिद्धित्वगर्भे स्वस्वलक्षणलक्षिते इत्यर्थ: । **ननु** तयोराश्रयासिद्धित्वानङ्गीकारेऽपि पक्षे पक्षतावच्छेदकाभावरूपमाश्रयासिद्धिलक्षणमस्त्येव व्याप्यत्वासिद्धिस्वरूपासिद्धिलक्षणवदत **आहाश्रयासिद्धिलक्षणे इति**। न तु व्याप्यत्वासिद्धिस्वरूपासिद्धिलक्षणयोर्व्यर्थत्वादिति भाव: । **नन्वेव**मुक्त-विशिष्टपक्षकस्थले व्याप्तिविशिष्टहेतुमत्त्वोपनीतभानानन्तरं हेतौ व्यभिचारादेर्लौकिकप्रत्यक्षेऽप्यनुमित्यापत्ति: परामर्शस्य वृत्तत्वेन व्यभिचारधियोऽकिञ्चित्करत्वादाश्रयासिद्धेर्भवता दोषत्वानङ्गीकारेणानुमितिप्रतिबन्धकदोषाभावादत आश्रयासिद्धेर्लक्ष्यत्वाभिप्रायेण तत्सङ्ग्रहं दर्शयितु**माह प्रकृतपक्षेति**। **नन्वेवमपि** वह्न्यव्यभिचारि मेयत्वं प्रकृतपक्षे प्रविष्टं न चेदं वह्निव्यभिचारि मेयत्वस्याभाव इति तद्दोषतादवस्थ्यमत **आहाभावत्वं** विरोधित्वमिति।

ननु **तथापि** प्रकृतपक्षाप्रविष्टाभावकं प्रकृते साधारण्यमप्रसिद्धमेवेति तद्भिन्नत्वाप्रसिद्ध्याश्रयासिद्ध्यव्याप्तिर्दुर्वारैव। **न च** तत्र तद्दलं नोपादेयमिति शक्यं **वदितुम्** । परिष्कारानर्थक्यापत्तेरित्याशङ्क्य सत्यन्तवारणीयं यथोक्तं साधारण्यान्तरं प्रदर्श्योक्ताऽव्याप्तिं वारयितुं परिष्कार इत्याहे**त्थञ्चेति** । **यत्र** च सर्वेषामेव साधारण्यानामभाव: प्रकृतपक्षे प्रविष्टस्तत्र तद्दलं नोपादेयमेवेत्युक्तप्रायमित्या**हास्तां तावदिति**। **नन्व**नुपसंहारित्वेऽतिव्याप्ति: साधारण्यादिभिन्नस्य तस्य व्यतिरेकव्याप्तिघटितपरामर्शं प्रत्यपि विरोधित्वादत आह **परामर्शे चेत्यादि**। **अनुपसंहारित्वेति**। अभावाप्रतियोगिसाध्यकत्वरूपेत्यर्थ:। ननु तत्रापि हेतुसमानाधिकरणेत्यादिव्याप्त्युपादाने वह्निमान् मेयत्वादित्यादावुक्तव्याप्यत्वासिद्ध्यव्याप्तिर्व्याप्तिविशिष्ट-

पक्षधर्मत्वाभावग्रहस्य तादृशपरामर्शाविरोधित्वात्। साध्याभाववदवृत्तित्वरूपव्याप्त्युपादाने वाच्यं मेयत्वादित्यंतदीयानुपसंहारित्वेऽतिव्याप्तिः। साध्येऽभावाप्रतियोगित्वग्रहस्य साध्यीयाभावघटितव्याप्तिविशिष्टपरामर्शं प्रति विरोधित्वादत आह **तथा हीति**। **साध्याव्यभिचरिते** साध्याभाववदवृत्तौ प्रसिद्धस्य साध्यसामानाधिकरण्यस्य पक्षवृत्तित्वविशिष्टस्याभावरूपव्याप्यत्वासिद्धौ नाव्याप्तिरिति योजना **तद्ग्रह**स्योक्तव्याप्यत्वासिद्धिग्रहस्य। **निरुक्तपरामर्शं प्रति** साध्याभाववदवृत्तित्वरूपव्याप्तिघटितपरामर्शं प्रति। **एवकारेण** व्यतिरेकव्याप्तिघटितपरामर्शव्यवच्छेदेनोक्तानुपसंहारित्वव्युदासो दर्शितः।

अत्र वह्निमान् मेयत्वादित्यादिव्यतिरेकिसाध्यके। **नोक्तपरामर्शमिति**। हेत्वभावस्य साध्याभाववदवृत्तित्वरूपव्याप्त्यघटकत्वादित्यर्थः। **तदविरोधितयेति**। हेतुसमानाधिकरणाभावाप्रतियोगित्वग्रहेऽभावाप्रतियोगित्वग्रहस्याविरोधित्वादिति भावः। **न चैवमननुगमो** दोषायेत्याह। **लक्ष्यस्येति**।

तर्कामृतम्

बाधो यथा, 'ह्रदो[१] वह्निमान् द्रव्यत्वात्'।

तरङ्गिणी

लक्षणस्योक्तत्वादुदाहरणमाह—**ह्रद** इति। वैशेषिकास्तु असिद्धविरुद्धसव्यभिचारानध्यवसिताश्चत्वारो हेत्वाभासाः। बाधस्य व्यभिचारेऽसिद्धे वान्तर्भावः। सत्प्रतिपक्षस्याप्यसिद्ध एव। व्याप्तिपक्षताविशिष्टधर्मतयोरप्रतीतेरसिद्धित्वादुभयत्रापि साध्यसन्देहरूपपक्षताघटितपक्षधर्मताप्रतीत्यसम्भवात्। अनध्यवसितः पक्षैकदेशवृत्तिरिति वदन्ति।

---

१. 'जलह्रदो' इति पाठान्तरम्।

चषकम्

बाधलक्षणस्य पूर्वमेव कृतत्वात्तमुदाहरति। **बाधो यथेत्यादि। यद्यपि** साध्याभाववान् साध्यासमानाधिकरणधर्मवान् वा पक्षः पक्षावृत्तिपक्षनिष्ठाभावप्रतियोगि वा साध्यमित्यनेके बाधा इति हेत्वाभासाधिक्यं **तथापि** तेषां कथञ्चिदनुगमः स्वतन्त्रेच्छस्य महर्षेरभिमतः। **दूषणौ**पयिकस्यैव रूपस्य विभाजकत्वमिति नियमानङ्गीकारात्।

तच्च प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोध्यनुन्नायकत्वे प्रकृतपक्षसाध्यग्रहाविरोधित्वे च सति प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधित्वादिकमवगन्तव्यम्। **द्रव्यत्वादिति। न च** व्यभिचारेण साङ्कर्यं धूमे हेतावप्यसिद्ध्येति **वाच्यम्।** यतः प्रागेव व्याप्तिरवगतेति न जायमानोऽपि साध्यव्याप्यवान् पक्षः साध्याभाववानिति ग्रहः साध्याभावहेतोः सामानाधिकरण्यं विषयीकर्त्तुमीष्टे। कथञ्चित् परामर्शानन्तरभाविनो बाधज्ञानस्यानुमितिविरोधित्वाव्ययम्भावेन तद्विषये हेत्वाभासत्वस्य दुर्वारत्वात्।

तात्पर्यटीका

कथञ्चिदिति। विरोधितावच्छेदकरूपेणापीत्यर्थः। **नन्वेवं** साक्षादनुमितिविरोधित्वेन बाधप्रतिरोधयोरेकहेत्वाभासत्वे पञ्च हेत्वाभासा इति विरुद्धमित्याशङ्क्याह **स्वतन्त्रेच्छस्येति। अभिमत इति। न तु** बाधप्रतिरोधादिसाधारणोक्तरूपेणेति भावः। **ननु** दूषणौपयिकस्यैव रूपस्य विभाजकता दृष्टा यथानुपदोपदर्शितोपाधिविभाजकरूपाणां तत्कथं प्रकृते दूषणानौपयिकरूपेण विभाग इत्याशङ्कामपाकरोति। **दूषणौपयिकस्येति।**

सत्प्रतिपक्षत्ववारणायानुन्नायकत्व **इति।** पक्षासिद्धिसाध्याप्रसिद्ध्योर्वारणायाविरोधित्वे च **सतीति।** व्यभिचारवारणाय **विशेष्यम्।** तावदन्यतमत्वं वा बाधत्वमिति सूचयितु**मादिपदम्। प्रागेव** बाधग्रहात् प्रागेव। **विषयीकर्त्तुमीष्ट इति।** हेतौ साध्याभाववदवृत्तित्वग्रहस्य पक्षे साध्याभावज्ञानाऽविरोधित्वेऽपि हेतौ साध्याभाववदवृत्तित्वज्ञानविरोधित्वादिति

भाव:। मास्तु हंतु साध्याभावसामानाधिकरण्यरूपव्यभिचारग्रहोऽसौ तथापि साध्यव्याप्यवत्ताज्ञानस्य कार्यकालवर्त्तिन: प्रतिबन्धकस्य सत्त्वात् परामर्शात्मकं बाधज्ञानं न सम्भवत्येवेत्यस्वरसात् प्रकारान्तरेण बाधं व्यवस्थापयितुमाह **कथञ्चिदित्यादि**। बाधलौकिकप्रत्यक्षस्य तदप्रतिबध्यत्वं मनसि कृत्य **कथञ्चिदित्युक्तम्** । लौकिकरूपस्येत्यर्थ:। **परामर्शानन्तरभाविन** इत्यनेन व्यभिचारधियोऽकिञ्चित्करता **दर्शिता**।

चषकम्

किञ्चाद्यकालावच्छिन्ने घटादौ गन्धसंशयोच्छितये पक्षतावच्छेदकदेशकालावच्छेदेनाप्यनुमितेरानुभविकतयाद्यकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वान् मूलावच्छिन्नो वृक्ष: कपिसंयोगयेतद्वृक्षत्वादित्यसङ्कीर्णबाद्योदाहरणस्यापि सम्भवात्। **पक्षता**वच्छेदकदेशकालादिनिष्ठस्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिन: परामर्शस्य तथानुमितौ हेतुताया: केनाप्यनङ्गीकारात् । **अङ्गीकारेऽपि** भ्रमसाम्राज्यात्।

इत्थमपि सुखाद्यनवच्छेदकशरीरविशेषाद्यवच्छेदेन दु:खादिमति सुखसाधने बाधो निराबाधं पदमादधातीति **दिक्** । **मणिकृतस्त्वयं** जीवनमरणान्यतरवान् प्राणित्वादित्यत्र जीवनं मरणापेक्षया लघ्विति लाघवज्ञानरूपसहकारिवशादनुमितौ प्रकारीभवति। **कथमन्यथा** बहि: सत्त्वानुमापकस्य जीवित्वे सति गृहासत्त्वस्य हेतो: सिद्धि:। **इत्थञ्च** तादृशानुमितौ न तादृशविशेषधर्मावच्छिन्नबाधातिरिक्त: प्रत्यूहोऽस्तीति बाध: पृथगिति **प्राहु:** । **अन्ये** तृपनयसहकृतशुद्धव्याप्तिज्ञानजन्यकाञ्चनमयत्वप्रकारकानुमितिप्रतिबन्धकज्ञानविषय: स्वव्यधिकरणकाञ्चनमयत्वेन वह्निवृत्तिप्रतियोगिताकोऽभावो बाध **इत्याहु:**। **तन्न** । अनुमितावुपनीतभाने मानाभावात्।

तात्पर्यटीका

अत्र बाधो नाऽनुमितिप्रतिबन्धको येन हेत्वाभास: स्यादपितु परामर्शेऽप्रामाण्यप्रसञ्जक इत्युक्तं दूषणान्तरमाह **किञ्चेति**। **असङ्कीर्णेति**।

व्यभिचारसिद्ध्यसङ्कीर्णेत्यर्थः। तथा चात्र क्लृप्तबाधप्रतिबन्धकत्वेनैवोपपत्ताव-प्रामाण्यभ्रमजनकदोषादिकल्पनायां मानाभावः। **न च** दोषा अप्यननुगता विषयादिनिष्ठाः क्लृप्ता एवेति **वाच्यम्** । तथापि तेषां तत्तद्धूमहेतुता कल्पनागौरवस्य दुष्परिहरत्वादिति भावः । **ननु** पृथिवीत्वस्य व्याप्यवृत्तितयावच्छेदकावच्छेदेन परामर्शाभावात् कथमवच्छेदकावच्छेदेनानुमितिः स्यादत आह **पक्षतावच्छेदकेति। स्वरूपसम्बन्धरूपेति**। तथा च पक्षतावच्छेदकेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यामनुमितौ पक्षतावच्छेदकेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिपरामर्शहेतुत्वस्य सर्वानुमतत्वेऽपि स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिपरामर्शहेतुतायां मानाभावादिति भावः। **अत्राद्य**कालावच्छिन्नेऽनिश्चितबाधदशायामनुभूयमाने।

साध्यस्य तथा भाने नियामकान्तराभावेनाकस्मिकत्वापत्तिरित्याशङ्क्य तथा परामर्शहेतुत्वमभ्युपेत्याह**ाङ्गीकारेऽपीति। भ्रमसाम्राज्यादिति**। तस्य च फलबलकल्प्यत्वेन तादृशगौरवस्यादोषत्वादित्युक्तप्रायमेवेति भावः।

प्रमापरामर्शमप्युपपादयति। **इत्थमपीति**। व्याप्यवृत्तित्वग्रहदशायां विशेषदर्शनेन भ्रमासम्भवेऽपीत्यर्थः। **सुखादीति**। एतच्छरीरावच्छिन्न आत्मा सुखी दुःखादित्यादावित्यर्थः। सृष्टिकालावच्छिन्न आत्मा मिथ्याज्ञान-वासनाध्वंसवानदृष्टादित्यादिपदग्राह्यम्। **शरीरविशेषेति**। बालवृद्धादिशरीरेत्यर्थः। **निरा**बाधं कारणाभावादिना कार्याभावकथयाप्यनाक्रमणीयालम्बनम्। **नन्ववच्छेदकत्वस्य** व्यापकत्वाघटकस्य कथमनुमितौ भानं येन बाधः स्यादत आह **दिगिति** । दिगर्थस्तु पर्वतो वह्निमानित्यनुमित्यनन्तरं पर्वतत्वावच्छेदेन वह्न्यभावसंशयाभावादसंसर्गाग्रहवशादेवावच्छेदकत्वस्यानुमितिविषय-त्वाङ्गीकारा**दन्यथा** तादृशसंशयप्रतिबन्धकज्ञानान्तरकल्पना गौरवप्रसङ्गादिति। **कथमन्यथेति**। लाघवज्ञानवशाद्व्यापकतानवच्छेदकरूपेणानुमित्यनङ्गीकार इत्यर्थः **इत्थञ्च** तादृशानुमितेः सिद्धौ च। **विषयगवेषणाक्लेशाभावः** प्रकर्षः प्रशब्देन **सूचितः** । **बाधो**ऽसङ्कीर्णो बाधः। **मानाभावादिति**। प्रवृत्त्युपधायकरङ्गगोचररजतत्वप्रकारकप्रत्यक्षोपपत्तये कल्प्यमाने उपनये कार्यस्यान्यथानुपपत्तिः कल्पिकास्ति **न चैवं** प्रकृत इत्यर्थस्**तदुक्तमारोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति**।

चषकम्

अन्यथा पर्वते वह्निसन्देहवतो निश्चितवह्निव्यभिचारादभिधेयत्वात् प्रमेयत्वादिकमनुमिन्वतो वह्न्यर्थिनः स्मृतवह्न्यादियत्ननिश्चयस्यापि सम्भवा निष्कम्पप्रवृत्यापत्तिः। वस्तुतस्तु प्रतियोग्यवृत्तिधर्मस्य प्रतियोगितानवच्छेद-कत्वेनोक्ताभावाप्रसिद्धेर्न किञ्चिदेतदत एव शशशृङ्गं नास्तीत्यत्र शशे श्रृङ्गाभावविषयतामनुमेनिरे श्रीतत्त्वचिन्तामणिकृतः।

यत्तु शाब्द बोधे योग्यताया इवानुमितौ पक्षे साध्यासंसृष्टत्वस्य ज्ञानं संशयनिश्चयसाधारणं कारणं साध्याभावनिश्चयाभावापेक्षया लघुशरीरत्वाद**न्यथा** साध्याभावज्ञाने प्रमात्वनिश्चयापेक्षा न स्यात्तद्विरोधितया च बाधसत्प्रतिपक्षयो-र्हेत्वाभासत्वम्। **इत्थञ्च** हेत्वाभाससामान्यलक्षणेऽनुमितितत्कारण-ज्ञानयोरनुगमायानुमितिपदस्यानुमितिनिष्ठकार्यतानिरूपकसम्बन्धिपरत्वस्य कल्पनापरिश्रमोऽपि दीधितिकृतां परिहृतो भवतीति। **तन्न** मानाभावात् ।

तत्संशयकालीनतदभावनिश्चयदशायां तदनुमितेरप्यनुदयेन तत्र तदभावकारणतायाः सामान्यतः क्लृप्ततया बाधसंशयशून्यकालीनयावदनुमितिपूर्वं तावज्ज्ञानोत्पादविनाशकल्पने तवैव **गौरवादन्य**था कार्यानुकूलविघट-कत्वरूपप्रतिबन्धकत्वान्यथानुपपत्या शक्तिं कल्पयन्तः प्राभाकरा एव **विजयेरन्** बाधस्याप्यनुमितिप्रतिबन्धकत्वस्योक्तसंसृष्टत्वज्ञानविघटकत्वेनैवोपपत्तेः। **न चानुमितिप्रमायाः** साध्यसंसृष्टत्वपमारूपगुणजन्यत्वनियमेन यद्विशेषयोरिति व्याप्त्यानुमितिसामान्यस्य तथात्व**मन्यथा** शाब्दबोधे योग्यताज्ञानस्य कारणताया अपि निष्प्रमाणकत्वापत्तेरिति **वाच्यम्**।

प्रतियोगिमत्त्वात्मक बाधबुद्धिप्रतिबध्यायां व्यतिरेकव्याप्तिज्ञान-जन्यायामप्रसिद्धाभावासाध्यिकायां पृथिव्यामितरभेद इत्यनुमितौ व्यभिचारात्। **अपि च** संशयासत्त्वसमये परामर्शोत्पादे सिद्धिसिषाधयिषे विनानुमित्यप्रसङ्गात्। सति विशेपदर्शने संशयायोगात्। **किञ्चा**नुमितिप्रमां प्रत्यवश्यक्लृप्त-कारणभावस्य परामर्शस्यैव विशेषरूपेण कारणतायाः कल्पयितुमुचितत्वात्। **न च** साध्यवत्पक्षावगाहित्वं तस्य प्रामाण्यमिति सिद्धं नः समीहित**मन्यथा**

वस्तुत: साध्यवत्पक्षविषयकस्याव्याप्यापक्षधर्मयोस्तत्त्वावगाहिन: परामर्शस्यासङ्ग्रहप्रसङ्गादिति **वाच्यम्**।

तथापि वस्तुगत्या साध्यवान् य: पक्षस्तदवगाहित्वस्यैव तथात्वादिति। **वस्तुत**: साध्यवत्त्वमेव पक्षे प्रमानुमितिप्रयोजकमिति तु न **युक्तम्** । अतीतादिलिङ्गकपरामर्शादतीतसाध्यकादिप्रमानुमित्यनापत्ते:। **यत्तु** साध्याभावज्ञाने प्रमात्वनिश्चय: प्रतिबन्धकस्तत्राप्रामाण्यग्रहेऽनुमितेरुदयादिति **तन्नान**वस्थानात्**तस्मा**दप्रमाण्यशङ्काविधूननद्वारा प्रामाण्यनिश्चय: क्वचिदुपयुज्यत इत्येवा**नवद्यम्**।

तात्पर्यटीका

बाधकाभाव एव मानमिति वैतण्ड्याद्यदि कश्चिद् ब्रूयात्तं प्रत्या**हान्यथेति**। अनुमितावुपनीतभानाङ्गीकार इत्यर्थ:। **वह्निसन्देहवत इति।** अन्यथेष्टापत्ति: स्यादिति भाव:। निश्चितवह्निव्यभिचारादिति। अन्यथाभिधेयत्वलिङ्गिकैवानुमिति: स्यादिति भाव:। वह्निव्यभिचारसंशयेऽप्यभिधेयतवे वह्निव्याप्तिमनुमायापि वह्न्यनुमिति: स्यात्तेनैव लिङ्गेनेति निश्चयपर्यन्ता**नुधावनम्** । **वह्न्यर्थिन इति**। अन्यथेच्छारूपकारणाभावादेव प्रवृत्यापत्तिरिति भाव: । सकम्पप्रवृत्ते: सन्देहादप्युपपत्ते**र्निष्कम्पेति**। सकम्पत्वं निष्कम्पत्वञ्च निश्चयादिजन्यतावच्छेदकतया सिद्धा जातिविशेष:। अनुमितावुपनीतभानखण्डनेनोक्तबाधं निराकृत्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावखण्डनेनापि तं निराकरोति। **वस्तुतस्त्विति। अन्यथा** लाधवानादरे। **इत्थञ्च** साध्यसंसृष्टत्वज्ञानस्यानुमितिहेतुत्वे च। **कार्यतानिरूपक सम्बन्धीति**। कार्यतानिरूपकत्वं कारणतायामपीति। **सम्बन्धीति**। **तेन** कार्यतारूपसम्बन्धनिरूपकौ यौ सम्बन्धिनौ हेतुहेतुमन्तावित्यर्थ: । अनुमितौ साध्यसंसृष्टत्वज्ञानस्य कारणत्वं तत्र च बाधाभावस्येत्येतदपेक्षया बाधाभावस्यानुमितिहेतुत्वमेवोचितमिति मनसि कृत्याह। **मानाभावादिति**।

बाधसंशयेति। **यद्यपि** साध्यसंशयेति वक्तुमुचितं **लाघवात्तथापि** बाधप्रकरणात्तथोक्तम्। **यावदनुमितीति**। बाधसंशयपदं

साध्यनिश्चयोपलक्षणमनुमितिपदं वाऽगृहीतग्राह्यनुमितिपर**मेतेन** साध्यनिश्चयोपलक्षणत्वस्यावश्यकत्वे साध्यवत्ताज्ञानेत्येवं लघु कुतो नोक्तमित्यपा**स्तमिति** भाव:। **अन्यथा** फलमुखैतद्गौरवस्यादोषत्वे। **विजयेरन्निति**। तथा च नियतपूर्ववृत्तित्वकल्पनामात्रप्रयुक्तं फलमुखगौरवं न दोष:। पदार्थकल्पनाप्रयुक्तं फलमुखमपि गौरवं कार्यकारणभावग्रहात् प्राक् प्रतिसंहितं दोष एवेत्यन्यत्र **प्रपञ्चितमित्यर्थ:। उपपत्तेरिति। अयं** भाव:। कार्यानुकूलविघटकत्वं न प्रतिबन्धकत्वं गौरवात् किन्तु कारणीभूताभावप्रतियोगित्वं तच्च संसृष्टत्वज्ञानकारणत्वं विनाप्यस्माकं **निर्वहतीति। अन्यथा** प्रमाया गुणजन्यत्वानुरोधेनानुमितौ साध्यसंसृष्टत्वज्ञानस्य हेतुत्वानङ्गीकारे। बाधप्रतिबन्धकत्वान्यथानुपपत्या कल्प्यमानं साध्यसंसृष्टत्वज्ञानहेतुत्वं बाधप्रतिबध्यानुमितावेव कल्प्यते न प्रकृते प्रसिद्धसाध्यके इति शङ्कामपाकर्त्तुमुक्तं प्रतियोगिमत्त्वात्मकेति।

साध्याप्रसिद्धावन्वयव्याप्तिज्ञानासम्भवाद्व्यतिरेकव्याप्तीति। भावसाध्यके साध्याप्रसिद्धौ व्यतिरेकस्याप्यप्रसिद्धिरेवेत्य**भावसाध्यिकायामिति**। विशेषणज्ञानस्यापि प्रकृतेनापेक्षेत्यभिप्रेत्य साध्यविशेष्यकानुमिति**पर्यन्तम्** । अस्त्वन्वयव्याप्तिज्ञानजन्यानुमितौ तस्य हेतुत्वमित्युक्ते **त्वाहापि चेति** संशयोत्तरपरामर्शे संशयात्मकमेव साध्यसंसृष्टत्वज्ञानं सम्भवतीति संशयासत्त्वसमय **इत्युक्तम्**। सिद्धिसिषाधयिषयो: सम्भवे सिद्ध्यात्मकमेव तत् स्यादतो **विनेत्यन्तम्** । **ननु** तत्रापि सशयं कल्पयित्वैनानुमिति: कल्प्यतामत आह **सति विशेषदर्शने इति**। **ननु** सिद्धकारणभावस्य तस्यासत्त्वेऽनुमितिरपलपनीयेत्यत **आह किञ्चेति** । **अवश्यक्लृप्त**-कारणभावस्य साध्यसंसृष्टत्वज्ञानापेक्षयावश्यक्लृप्तकारणभावस्य। एतेना-योग्यताज्ञाने शाब्दबोधानुदयेनायोग्यताज्ञानाभावकारणत्वे गौरवेणावश्यक्लृप्त-सामान्यहेतुभावस्य योग्यताज्ञानस्यैव विशेषतो हेतुता युक्तेति दर्शितम्। **परामर्शस्यैवे**त्येवकारेण साध्यसंसृष्टत्वज्ञानव्यवच्छेद:। **सिद्धं न: समीहितमिति**। तादृशप्रामाण्याश्रयपरामर्शस्यैव साध्यसंसृष्टत्वज्ञानत्वादिति भाव:। **अन्यथा** व्याप्यवत् पक्षावगाहित्वे परामर्शस्य प्रामाण्ये। **अव्याप्येति**। वह्निव्याप्यद्रव्यत्ववदयोगोलकमिति वह्निव्याप्यधूमवदयोगोलकमिति च

परामर्शस्येत्यर्थः। **वह्नि**व्याप्याकाशवदयोगोलकमित्याकारकस्येति तु नार्थो द्विवचनविरोधात्। **तस्य** साधुत्वार्थकत्वेऽप्येकैकभ्रमस्याप्यसङ्ग्रह**प्रसङ्गाच्च**।

अनवस्थानादिति। साध्याभावज्ञानप्रमाण्यनिश्चयस्येव प्रामाण्यनिश्चयस्यापि निश्चितप्रामाण्यकस्यैव कार्यक्षमत्वेऽनवस्था स्यादिति भावः।

तर्कामृतम्

तेन एतद्दोषरहितो हेतुः सद्धेतुः।

इत्यनुमानं व्याख्यातम्

चषकम्

तेन दोषाभासानां सत्त्वात् कथमेतावत्त्वमिति वाच्यम्। बाधतद्व्याप्यभिन्नानां हि हेत्वाभासानां व्याप्यास्तेष्वेवान्तर्भवन्ति। न सत्प्रति पक्षः स्वतन्त्रेच्छस्य नियोक्तुमशक्यत्वात्सप्रतिपक्षव्याप्यस्तु धूमसामग्रययादिर्हेत्वाभास एव न भवति। तदभावव्याप्यव्याप्यवत्ताज्ञानस्य तज्ज्ञानविरोधित्वे मानाभावेन तस्यानुमित्यविरोधित्वादिति। **एतद्दोषरहित** इति। सर्वेषामेव दोषाणां नित्यदोषत्वाच्छब्दोऽनित्यः शब्दत्वादित्यत्रोक्तासाधारण्यस्य साध्यवदवृत्तित्वरूपस्यविराहादित्याशयः। **सद्धेतुः** सद्धेतुतया व्यवहार्यः।

सद्धेतुः प्रमाकरणमेवेति वस्तु। तेनायोगोलकं वह्निमद्धूमादित्यादेः सदोषस्य प्रमाकरणत्वेऽपि न क्षतिः। **एतेनै**तद्दोषरहित एव हेतुः सद्धेतुः प्रमाकरणमिति व्याख्या दुर्व्याख्यैवेति **मन्तव्यम्**।

तात्पर्यटीका

व्यभिचारस्योपाधिसम्बन्धत्वे विवादा**दुपाधि**व्यभिचारादीना**मित्युक्तम्**। हिर्हेतौ। **ननु** तद्व्याप्येत्य**नर्थकमन्यथा** सत्प्रतिपक्षव्याप्यस्य तस्मिन्ननन्तर्भावे हेत्वाभासाधिक्यप्रसङ्ग इत्याशङ्क्य समाधत्ते। **सत्प्रतिपक्षव्याप्यस्त्विति** ।

पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् पाषाणमयत्वादित्यत्र वह्नेः साध्याभावस्य व्याप्यो धूम एव नित्यदोषतावादिनां नव्यानां मते सत्प्रतिपक्षो **न तु** पाषाणमयत्वमिति सत्प्रतिपक्षव्याप्यो धूमसामग्र्यादिरेव न पाषाणमयत्वव्याप्यं मणित्वादिति दर्शयति। **धूमसामग्र्यादिरिति। सद्धेतुतया** व्यवहार्य इतीत्थञ्च तावद्दोषराहित्यं सद्धेतुपदव्यवहार्यतावच्छेदकमित्याशयः।

ननु प्रमाकरणत्वेनैव जिज्ञासाप्तोक्तः शब्दः प्रमाणमित्यत्र तथादृष्टत्वात्तत्तथैव व्याचष्टे। **प्रमाकरणमेवेति**। परन्तु वाक्यस्य सावधारणता कल्पनाप्रयासादस्त्वित्यनास्थायाम्। **तेनैतद्दोषरहित** एव प्रमाकरणमित्यस्याविवक्षितत्वेन। **एतेन** सदोषस्यापि प्रमाकरणत्व**सम्भवेन**।

तर्कामृतम्

उपमितिकरणमुपमानम्। कीदृशो गवयः इति प्रश्ने 'गोसदृशो गवयः' इत्युत्तरिते यदा गोसदृशं प्राणिनं पश्यति तदा पूर्वोक्तं वाक्यार्थं स्मरति।

तरङ्गिणी

उपमितीति। उपमितित्वं जातिः उपमिनोमीत्यनुव्यवसायसिद्धा। **गोसदृशं प्राणिनं पश्यतीति।** तथा च गोसादृश्यविशिष्टपिण्डदर्शनं करणं, तदेवोपमानम्। उद्बोधकविधयैव तज्जन्यवाक्यार्थस्मरणं व्यापारः।

चषकम्

कीदृश इति। जिज्ञास्य इत्यर्थः। **यत्तु** किमिव दृश्यत इत्यर्थापयित्वा गोसदृश इत्युत्तैकवाक्यत्वमुपोद्वलयन्ति। **तन्न**। आलोचनेकजो दुर्लभत्वाद्गवयो हि जिज्ञास्यो **नतु** गौस्तस्मात् सादृश्यपरिचयेन गवयपरिचयाय सादृश्यनिर्देशोऽत **एवोपमानं** प्रमाणान्तरमित्यग्रे व्यक्तीभविष्यति। **नव्यमतेन** करणव्यापरफलान्यनुक्रामति। **यदेति** । **अत्र** यदा तदेत्यनेन सादृश्यविशिष्टपिण्डदर्शनस्योद्बोधकविधया तादृशवाक्यार्थस्मारकत्वं सूचितम्। तेन च

यत्र सादृश्यविशिष्टपिण्डदर्शनोत्तरमतिदेशवाक्यार्थशाब्दबोधस्तत्र स्मरणं जनयित्वैवोपमितिर्जन्यते नान्यथेति **सूचितम्** । तथा च दर्शननिरपेक्षशाब्दबोधस्य निर्व्यापारस्य करणत्वासम्भवात् सम्भवत्स्मृतिव्यापारकमत्यावश्यकमिदमेव करणमित्याशयः।

एतेन सादृश्यज्ञानमात्रं करणं विशेषणज्ञानविधया तज्जन्य-मतिदेशवाक्यार्थज्ञानं सादृश्यविशिष्ट-पिण्डदर्शनं चोभयं व्यापार इति कस्यचि**न्मतमपास्तम्**। उद्बोधकसत्त्वेऽवश्यं स्मृतिरिति तस्या एव तद्व्यापा-रत्वौचित्याद**त** एव तत्तास्मृतिरेव प्रत्यभिज्ञाहेतुरिति **मणिकृताः** । **प्राणिनं** पश्यतीत्यनेन जातेराकृतिव्यङ्ग्यत्वात् सादृश्यधर्मितावच्छेदकतया गवयत्वस्योपस्थितिवशाद्गवयत्वावच्छेदेनोपमितिर्भवतीति **सूचितम्**। **एतेन** द्रव्यत्वविशिष्टे सादृश्यग्रहे तदवच्छेदेन किन्नोपमितिरिति शङ्का **परास्ता**। द्रव्यत्वस्य सादृश्यधर्मितावच्छेदकतयाऽनुपस्थितेस्तस्यातिप्रसक्तत्वात्। **न चैव**माकृत्यवच्छिन्ने सादृश्यग्रहे तदवच्छेदेनाप्युपमितिः स्यादिति **वाच्यम्**। इष्टापत्तेः । तस्याः भ्रमत्वेन तादृशगुरुधर्मावच्छेदेन गवयपदवाच्यत्वा-साधकत्वात्। **ननु** सादृश्यविशिष्टे पदवाच्यत्वबुद्धिरूपगुणवशादाकृत्यादेरपि सादृश्यधर्मितावच्छेदकतयोपस्थितौ तदवच्छेदेनैव न कथं शक्तिप्रमेति चेद् गुरोरनवच्छेदकत्वात्। **इत्थ**ञ्च लघुधर्मावच्छेदेन सादृश्यज्ञानमेव गुण **इत्यवधेयम्**। **इदमुपलक्षणम्** वैधर्म्यविशिष्टपिण्डप्रत्यक्षं करणं जलादिविधर्मगुणवती पृथिवीपदवाच्येत्यतिदेश**वाक्यार्थस्मरणं** व्यापारः पृथिवीत्वावच्छेदेन पृथिवीपदवाच्यत्वोपमितिः फलमित्यपि बोध्यम्।

तात्पर्यटीका

उपोद्वलयन्त्युपोद्वलिनं कुर्वन्ति। **व्यक्तीभविष्यतीति**। सादृश्यावच्छेदेन पदवाच्यत्वस्य पदात् प्रतिपत्तिसम्भवेऽपि गवयपदस्य गवयपदवाच्यलाक्षणिकतया गवयत्वप्रतिपादकशब्दाभावाद्गवयत्वावच्छेदेन शक्तिपरिच्छित्तये प्रमाणान्तरमावश्यकमित्यग्रे व्यक्तमित्यर्थः। **करणत्वा सम्भवादिति**। अतिदेशवाक्यार्थस्मृतेर्व्यापारताया आवश्यकतया तस्याश्च सादृश्यविशिष्टपिण्डदर्शनाधीनत्वादिति भावः।

अत एवोद्बोधकसत्त्वे स्मृतेरावश्यकत्वादेव। **एतेन** वक्ष्यमाणदूषणेन। **एवं** सादृश्यधर्मितावच्छेदकावच्छेदेनोपमितेरावश्यकत्वे। **स्यादिति**। सादृश्यस्यानतिप्रसक्तायामाकृतावच्छेदकत्वग्रहसम्भवादिति भावः। प्रमाया गुणजन्यत्वादुपमितौ सादृश्यविशिष्टे पदवाच्यत्वधियो गुणतया कथं न ततः शक्तिप्रमेति शङ्कते। **नन्विति। गुरोरिति** । **नन्वेवमपि** प्रमायां निरुक्तस्य गुणस्यान्वयव्यभिचारो दुरुद्धर एवेत्यत **आहेत्थञ्चेति**।

तर्कामृतम्

अनन्तरम् 'अयं गवयपदवाच्यः' इति शक्तिग्रहः, सेयमुपमितिः।

इत्युपमानं व्याख्यातम्

चषकम्

सादृश्याद्यवच्छेदेन पदवाच्यत्वं शब्दादेव प्रमितं गवयत्वावच्छेदेन तथात्वं तु प्रमाणान्तरस्यैव गोचर इत्यभिप्रेत्याह। **अयमिति** । गवय इत्यर्थः । **अत** एव गवयत्वप्रकारकशाब्दबोधनिर्वाहः। शक्तिज्ञानशाब्दबोधादेः समानप्रकारकत्वनियमात्। **स उपमितिरिति**। स उपमितिरेवेत्यर्थः। उपमिनोमीत्यनुव्यवसायादिति **हृदयम्**। **वैशेषिकास्तु** गवयपदवाच्यत्वव्याप्यगोसादृश्यादिपरामर्शात् पदवाच्यत्वस्यानुमितिरेव सम्भवतीति नोपमानं प्रमाणान्तरमित्या**हुस्तन्न**। व्याप्तिज्ञानविलम्बेन तज्ज्ञानविलम्बाभावादित्यन्यत्र **विस्तरः**।

तात्पर्यटीका

सादृश्यादीत्यादिना वैधर्म्यपरिग्रहः। इदन्त्वावच्छेदेन शक्तिग्रहे गवयान्तरशाब्दबोधानुपपत्तेराह। **गवय** इत्यर्थ इति अत एव शक्तिग्रहस्य गवयत्वप्रकारकत्वादेव। **यदि** च गवयत्वेन पक्षानुपस्थित्या न

तथानुमितिसम्भव**वस्तदाप्यास्तां** द्वयोरपि प्रथममिदन्त्वावच्छेदेनैव शक्तिग्रह इत्युक्तौ न स उद्भावनार्ह इति मत्त्वा प्रकारान्तरेणैतन्मतं दूषयति **व्याप्ति ज्ञानविलम्बेनेति**। **अत्र** नैयायिकानामपि गवयो गवयपद-प्रवृत्तिनिमित्तवानित्युपमिते: पूर्वं गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमितेरावश्यकतया तत्रैव लाघवज्ञानवशाद्गवयत्वप्रवृत्तिक-मित्यनुमिते: सम्भवान्नोपमितेरावश्यकता। **ननु** किमुच्यतेऽचेतनस्य प्रवृत्तिनिमित्तमिति। **को** ह्ययं **व्यामोहः** । अत्र व्यवहार्यतावच्छेदकं प्रवृत्तिमित्तमित्युच्यते। **कस्य** किं व्यवहार्यतावच्छेदकमिति चेत्। **श्रृणु** । तदेव हि तस्य प्रवृत्तिनिमित्तं यत्स्वभिन्नतच्छक्यानधिकरणं शक्यं शक्यवृत्ति चेति।

तदुक्तम् । गौ: स्वरूपेण न गौ नाप्यगौर्गोत्वाभिसम्बन्धात्तु गौरिति। अस्यार्थ:। गौ: स्वरूपेणेति। अनभिव्यक्तगोत्वकत्वादुपलक्षितं पिण्डमात्रमित्यर्थ:। **नाप्यगौरिति**। गोभिन्नपदव्यवहार्याऽपि नेत्यर्थ:। तु किन्तु गोत्वाभिसम्बन्धादभिव्यक्तगोत्वकत्वाद्विशिष्टा गोपदव्यवहार्येति। नन्वत्र दध्नो द्रव्यत्वस्य च दधिपदप्रवृत्तिनिमित्तत्ववारणाय विशेषणद्वयस्यार्थवत्त्वेऽपि विशेष्यमनर्थकमिति चेत् डित्थादिसंज्ञा शब्दानां तथात्ववारणाय तदुपादानात्। **न च** नैषां शक्यतेति **वाच्यम्** । डित्थनामायमितिशाब्दबोधे तद्भानानापत्ते:। **नापि** च तस्य तथात्वमिष्टमेवेति **वाच्यम्**। तदनाश्रयडित्थादे: शाब्दबोधनापत्ते: **तदुक्तम्**। डित्थादिशब्दानां स्वरूपं डित्थाद्यर्थेषु वक्त्रा **विस्तरार्थस्तु** लाघवसहकारिकोक्तानुमानविलम्बेनाऽप्युपमितिविलम्बो नास्माकमस्तीति दिक्।

तर्कामृतम्

आप्तोक्त: शब्द: प्रमाणम्। प्रकृतवाक्यार्थगोचरयथार्थज्ञानवान् आप्त:।

तरङ्गिणी

आप्तोक्त: शब्द: प्रमाणमिति। आप्तोक्त इति लक्षणम्। शब्द:

प्रमाणमिति लक्ष्यम्। प्रमाणशब्दत्वं लक्ष्यतावच्छेदकम्। आप्तोच्चरितत्वं लक्षणम्। भवति हि घटमानयेत्यादिशब्दो घटानयनानुकूलकृति-गोचरयथार्थज्ञानवदुच्चरितः। वह्निना सिञ्चतीत्यादिस्तु वह्निकरणकसेकानु-कूलकृत्यादिरूपवाक्यार्थगोचरयथार्थज्ञानवदुक्तत्वविरहात्। सेके वह्निकरण-कत्वबाधेन तज्ज्ञानस्य यथार्थत्वविरहेण नातिव्याप्तिः।

चषकम्

आप्तोक्त इति। एतावन्मात्रं लक्षणं शब्दत्वस्यापि निवेशे प्रयोजनाभावात्। **प्रदर्शयिष्यते** हि तादृशज्ञानजन्ये ध्वंसेऽतिप्रसङ्गस्य वारणसरणिः। **शब्दः प्रमाणमिति** लक्ष्यनिर्देशोऽ**न्यथा** प्रमाणसामान्यस्यैव लक्ष्यत्वाव-गमाल्लक्षणाव्याप्तिशङ्का स्यात् **प्रमाणमित्यस्य** प्रमाजनक इत्यर्थः। **नन्वाप्तेनैव** कालान्तरोक्तेऽप्रमाणशब्देऽतिव्याप्तिरत आह। **प्रकृतेति**।

तात्पर्यटीका

शब्दत्वस्यापीत्यपिना ज्ञानवत्त्वांशस्योक्तत्वांशस्य च परिग्रहः। **नन्वाप्तोक्तत्वं** तादृशज्ञानजन्यत्वपर्यवसितार्थकं वक्ष्यते तथा च तज्ज्ञानध्वंसेऽतिव्याप्तिरित्यत आह **प्रदर्शयिष्यते हीति** । **प्रमाणमित्यस्येति**। **एतेन** शाब्दप्रमितिकरणं शब्द इत्येव लक्षणं कुतो न कृतमिति शङ्का **परास्ता**। तस्य लक्ष्यतावच्छेदकत्वेनाभिप्रेतत्वात्। लक्ष्यतावच्छेदकञ्च न लक्षणमित्युक्तमित्यभिप्रायत्।

तर्कामृतम्

पदज्ञानं करणम्, पदार्थोपस्थितिर्व्यापारः। आकाङ्क्षायोग्यतासत्तितात्पर्यज्ञानानि सहकारीणि, फलं शाब्दबोधः। स्वरूपयोग्यत्वे सति अजनितान्वयबोधकत्वमाकाङ्क्षा। तेन 'घटः, कर्मत्वम्, आनयनम्, कृतिः' इत्यत्र नान्वयबोधः, स्वरूपायोग्यत्वात्।

तरङ्गिणी

पदज्ञान इति। एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मृतावुद्बोधकविधया हेतुत्वेन पदपदार्थयोर्बोध्यबोधकभावरूपसम्बन्धवत्तया पदरूपैकसम्बन्धिज्ञानार्थरूपापरसम्बन्धिस्मृतिसम्भवात्तस्यास्तजन्यत्वघटितव्यापारत्वमक्षुण्णम्। अत एव न ज्ञायमानस्य पदस्य करणता। ध्वन्यादौ पदत्वभ्रमेण शाब्दबोधस्यानुभवसिद्धत्वाच्च। **आकाङ्क्षायोग्यतासत्तितात्पर्यज्ञानानीति।** आकाङ्क्षा योग्यता आसत्तिः तात्पर्यज्ञानं चेति द्वन्द्वः। **स्वरूपयोग्यत्वे सतीति।** घटादिपदोत्तराम्पदत्वादिद्वितीयान्तघटपदसमभिव्याहृतानयनपदत्वादिरूपा स्वरूपयोग्यता। घटः कर्मत्वमित्यादौ घटपदोत्तराम्पदत्वविरहान्न स्वरूपयोग्यत्वम्। अजनितान्वयबोधकत्वं स्वजन्यान्वयबोधविरहः। तद्विशेष्यकतत्प्रकारकान्वयबोधं प्रति तद्विशेष्यकतत्प्रकारकान्वयबोधाभावः तत्समानाकारान्वयबोधाभावश्च हेतुः। तेनावान्तरवाक्यार्थबोधोत्तरं महावाक्यार्थबोधोपपत्तिः। अत्र स्वरूपयोग्यता ज्ञातैव शाब्दबोधजनिता (?), तद्भ्रमेणान्वयबोधदर्शनादिति चिन्त्यम्।

चषकम्

प्रकृतमुक्तिविषयीभूतं यद्वाक्यं तदर्थगोचरमित्यनेन प्रयोगसामग्रीघटकत्वस्य लाभेन **यत्प्रयोगसामग्री** सहकृतं यद्यथार्थज्ञानं तज्जन्यत्वं तस्य शब्दस्य तस्मिन्नर्थे प्रामाण्यमिति पर्यवसानान्न कुत्राप्यव्याप्त्यतिव्याप्ती **नह्ये**तदर्थघटितलक्षणस्यान्यार्थप्रतिपादकः शब्दोपलक्ष्यो **न वा**न्यसामग्र्यन्यजनिकेति भावः। **न च** सामग्रीसहकृतत्वापेक्षया प्रागप्रागभावसहकृतत्वं लध्विति **वाच्यम्**। वाक्यार्थोपनीतभानात्मकशब्दप्रागभावप्रत्यक्षेऽतिव्याप्तेर**त** एव शब्दपदमनुषञ्जयन्त्यन्य इत्यास्तां **तावत्**। भवति हि बुबोधविषयाप्रयुक्तःपयसा सिञ्चतीत्यादिशब्दः पयःकरणकसेकगोचरयथार्थज्ञानवदुच्चरितो **न तु** वह्निना सिञ्चतीत्यादिर्वह्निकरणकसेकगोचरज्ञानस्य यथार्थत्वविरहात्।

ननु स्वार्थगोचरयथार्थज्ञानप्रयुक्तत्वेनेतरभेदसाधने स्वत्वस्यैव गमकत्वसम्भवे शेषवैयर्थ्यम्। **न च** स्वत्वं स्वमात्रवृत्तीति भागासिद्धिः।

स्वार्थगोचरयथार्थज्ञानप्रयुक्तत्वं तु स्वार्थाभिप्रायप्रयुक्तवाक्यान्तरेऽपीति न सेति **वाच्यम्**। असिद्धिवारकत्वेऽपि व्याप्तिग्रहानौपयिकत्वेनवैयर्थ्यस्य दुर्वारत्वादिति **चेन्न**। ज्ञानप्रयुक्तत्वनिष्ठव्याप्तेः स्वत्वत्वाद्यनवच्छेद्यत्वेन तन्निष्ठव्याप्ति-ग्रहौपयिक**त्वादपि** च व्यतिरेकव्याप्तेर्गमकतया वैयर्थ्यशङ्कानवकाशा**दिति।** द्वयोः सम्बन्धे गृहीते सति तदेकतरज्ञानात् सम्बन्धोद्‌बुद्धसंस्कारसहिता-दन्यतरस्मरणोत्पत्तेरर्थोपस्थितावुद्‌बोधकविधया पदज्ञानस्य हेतुतायाः क्लृप्तत्वात्तदेव करणं युज्यते **नतु** ज्ञायमानं पदं घरट्टवीणादिध्वनिषु मौनिकल्पितलिप्यादौ च पदत्वज्ञानेनाऽपि शाब्दबोधोदयेन व्यभिचारादित्याशयेनाह। **पदज्ञानमिति। अन्वयबोधो** द्विविधः पदकरणकोऽर्थकरणकश्च **कथम**न्यथा **पश्यतः श्वेतमारूपं ह्रेषाशब्दञ्च श्रृण्वतः। खुरविक्षेपशब्दाच्च श्वेतोऽश्वो धावतीति धी**रिति तु **भट्टपादाः**। **अत्र** श्वेतरूपादित्रयाणामर्थानां श्वेताद्यन्वितार्थत्रयस्मृतिद्वाराऽन्वयबोधकरणतेति **हृदयम्** । **नचैवं** कस्यचित् पदादन्यस्यार्थत उपस्थितावन्वयबोधापत्तिरिति **वाच्यम्** । शाब्दीतिन्यायात्। वस्तुतो घटे गृहीतशक्तिकपदज्ञानं करणं वस्तुगत्या तज्जन्या घटोपस्थितिः प्रत्यक्षसाधारणरूपेणैव व्यापारो **नतु** प्रत्यक्षतः पटोपस्थितिस्तथा **न च** तथापि प्रतयक्षेण घटोपस्थितौ समवायेन गगनोपस्थितिद्वारके घटपदज्ञाने घटशाब्दबोधापत्तिरिति **वाच्यम्**। गगनोपस्थितेर्घटशाब्दबोधाजनकत्वेनैव न व्यापारतेत्यनतिप्रसङ्गादित्याशयेनाह। **पदार्थोपस्थितिरिति**।

एतेन वृत्तिसहकृतपदजन्यपदार्थोपस्थितित्वेन व्यापारत्वाभ्युपगमप्रयासो **नोपादेयः** । **आकाङ्क्षेति**। **यद्य**प्याकाङ्क्षाघटकस्वरूपयोग्यत्वांशो ज्ञात एवोपयुज्यते। **कथम**न्यथा **मया** समर्थे प्रयुक्ते त्वया समर्थं बोद्धव्यमिति समर्थपदसङ्केतेन व्यवहरतोः पार्श्ववर्त्तिनः सङ्केतनाभिज्ञातया घटपदोत्तरकर्मत्वपदस्यैव परिशेषात् प्रयोज्यवृद्धज्ञानहेतुत्वमवधारयतो विपरीतव्युत्पन्नस्य घटः कर्मत्वमित्यादितोऽन्वयधीरित्याकाङ्क्षाज्ञान-हेतुत्वप्रापणाय तात्पर्यान्त एव द्वन्द्व इति प्रतिभाति। **तथापि** विशेष्यांशस्य स्वरूपसत एवोपयोगादाकाङ्क्षा च योग्यता चासत्तिश्च तात्पर्यज्ञानञ्चेत्येव द्वन्द्वोऽ**न्यथा** वक्ष्यमाणयोग्यता सत्योरपि ज्ञानस्य हेतुत्वप्राप्त्यासङ्गत्यापत्तेः।

तात्पर्यज्ञानानीति। **अन्यथान्यपरादन्यान्वयबोधो न स्यादिति** शाब्दाभासोच्छेदापत्तेरित्यग्रे व्यक्तम्। फलशब्दप्रयोगोद्देश्यं **शाब्दबोधः** पदोपस्थितयोरर्थयोः समभिव्याहारगम्यतात्पर्यविषयान्वयस्य बोधः। तेन पदोपस्थितार्थासंसर्गाग्रहोत्थितानुमितिफलत्ववादिसौगतमतमयुक्तमित्युक्तं तच्चाग्रे व्यक्तम्। आकाङ्क्षां निर्वक्ति। **स्वरूपयोग्यत्वे सतीति** ज्ञाननिष्ठशाब्दबोधजनकतावच्छेदकतावच्छेकतया गृह्यमाणसमभिव्याहारवत्त्वे सतीत्यर्थः। पदान्तरसमभिव्याहृतत्वेन तत्पदज्ञानस्य तदन्विततच्छाब्दबोधे हेतुत्वात्समभिव्याहारस्य तथात्वमित्याशयः ।

न तु शाब्दबोधजनकतावच्छेदकपदत्ववत्त्वे सतीत्यर्थः। घटः कर्मत्वमित्यादावपि सर्वदैव तत्सत्त्वेन सन्दर्भविरोधापत्तेः। **अजनितान्वयबोधकत्वमिति**। तात्पर्यविषयान्वयबोधफलोपधायकत्वाभाव इत्यर्थः। तेनावान्तरवाक्यार्थबोधोत्तरं महावाक्यार्थबोधोदयेऽपि न क्षतिः। **न चैवं** शाब्दबोधद्वयं जायतामितीच्छायां शाब्दबोधान्तरापत्ति**रिष्टत्वात्**। यावज्जीवं शाब्दबोधो जायतामितीच्छायास्तु फलव्यतिरेकनिर्णयेन नाकाङ्क्षाघटकत्वं कल्प्यते। **इत्थमनुमित्साऽपि** न पक्षताघटिकेत्यवधेयम्।

तात्पर्यटीका

उक्तिः कण्ठताल्वाद्यभिधातरूपा वाक्यसामग्रीत्यभिप्रेत्याह यद्वाक्यमिति। **तदर्थगोचरमित्यनेनेति**। वाक्यप्रयोगे वाक्यार्थज्ञानस्य कारणत्वादिति भावः। **यथार्थेति**। विशेष्यवृत्तिपदार्थप्रकारकं ज्ञानमित्यर्थः। **वाक्यार्थेति**। अत्र पयः करणकसेककर्तृचैत्रबोधकवाक्यप्रागभाव इति श्रावणप्रत्यक्ष इत्यर्थः। तत्र प्रागभावस्य विषयविधया वाक्यार्थज्ञानस्योपनायकज्ञानविधया हेतुत्वादिति भावः। **अत्र** प्रमाणशब्दातिव्याप्तिवारणायावश्यकनिरुक्तविशिष्टार्थपरत्वेनैव निर्वाहे व्यर्थं शब्दपदानुषङ्गकल्पनमित्याशयेनोक्तमन्य **इति**। **शब्द**त्वघटितलघ्वर्थे तात्पर्यमुचितमिति **चेत्तस्य** लक्षणान्तरत्वाददोष इत्या**हास्तां** तावदिति। तथा च प्रकृतपदेनोक्तार्थे तात्पर्यग्रहाच्छब्दपदानुषङ्गं विनैव लक्षणवाक्यार्थो वर्णित इत्याशयः।

ननु धर्मिभेदेन तन्निष्ठव्याप्तिग्रहौपयिकत्वेऽपि प्रकृते वैयर्थ्यं दुर्वारमेवात एव धूमप्रागभावादिति प्रयोक्ता धूमादित्येव प्रयोक्तुमुचितं किं प्रागभावपर्यन्तेनेति निगृह्यते इति मतान्तरमाश्रित्य शङ्कायां प्रकारान्तरेणाऽपि वैयर्थ्यपरिहारं दर्शयति। **अपि चेति**। चैत्राद्युच्चारितपदे पदत्वानुभवाद्घरट्टे स्मर्यमाणपदारोपविषये सति स्मरणद्वारैवं तादृशपदानुसंन्धानप्रभव-वीणाध्वनिद्वारकमपि तदेवकरणं सम्भवतीत्यत आह। **मौनिकल्पितेति**। तथा च मौनित्वादेव तदुच्चारितस्य कल्पितत्वादेव चान्योच्चारितस्यापि तस्यासम्भवान्न लिप्यादेर्द्वारता। पदत्वज्ञानं तु लिप्यानुपूर्वीदोषमाहात्म्याद्वर्णेष्वेवेति भाव:। **लिप्यादौ चेति**। आदिना ,चेष्टापरिग्रह: ।

प्रसङ्गादाहान्वयबोध इति पदपदार्थोभयकरणकत्वरूपां तार्किकीं विधामाशङ्क्य निराचष्टे। **न चैवमिति** शाब्दी शाब्दबोधोपयोगिन्याकाङ्क्षा शब्देनैव पूर्यते सम्पाद्यते तत्पदे तत् पदवत्त्वस्यैव शाब्दबोधोपयोगित्वादिति भाव:। **वस्तु**गत्या तज्जन्येत्यनेन व्यापारव्यापारिणोर्जन्यजनकभावस्य वास्तविकत्वं दर्शितम्। घटोपस्थितिरित्यनेन फलव्यापारयो: समानप्रकारकत्वमादर्शितम् **तथापि** प्रत्यक्षत: पटोपस्थितौ तज्जन्यत्वस्य घटोपस्थितित्वस्य चाभावेऽपि **घटशाब्दबोधापत्तिरिति**। करणव्यापारयो: सत्त्वादिति भाव:। क्वचित्समानप्रकारकत्वाभावात् क्वचिदजन्यत्वादव्यापारतेति दर्शयितुमाह। **गगनोपस्थितेरिति**। **इद**मुपलक्षणम्। घटपदस्य घटागृहीतशक्तिकत्वेन करणाभावाच्चेत्यपि **बोध्यम्** ।

अत्र तात्पर्यज्ञानान्तद्वन्द्वकरणे आकाङ्क्षाज्ञानहेतुत्वं न प्राप्नोति **तार्त्पान्तद्वन्द्वकरणे** चाजनितान्वयबोधकत्वज्ञानस्यापि हेतुत्वं लभ्यते तथा चोभयथाप्यसङ्गतिरित्याशङ्कते। **यद्यपीति। कथमन्यथेति**। समभिव्याहरस्य कारणतावच्छेदककोटावप्रवेशे। **अन्यथा** तात्पर्यान्तद्वन्द्वकरणे। **अन्यथा** तात्पर्यस्य स्वरूपसतो हेतुत्वे ।

सर्वदैव विपरीतव्युत्पत्यभावेऽपि। **अस्मदुक्ताकाङ्क्षा तु** विपरीतव्युत्पत्तिकाले वर्त्तमानाऽपि तदा तस्य लक्ष्यतया न दोषायेत्याशय:। **सन्दर्भविरोधापत्तेरिति**। तस्य स्वरूपायोग्यत्वकथनविरोधापत्तेरित्यर्थ: तात्पर्यविषयान्वयबोधेऽपि तात्पर्यविषयतावच्छेदकावच्छिन्नान्वयबोधेत्यर्थ:।

तर्कामृतम्

'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इत्यत्र 'राज्ञः पुरुषः' इति नान्वयबोधः, पुत्रेण जनितान्वयबोधकत्वात्। बाधकप्रमाविरहो योग्यता। तेन 'वह्निना सिञ्चति' इत्यत्र नान्वयबोधः, अयोग्यत्वात्।

तरङ्गिणी

बाधकप्रमाविरह इति। तद्विशेष्यकतत्प्रकारकान्वयबोधं प्रति तद्विशेष्यकतदभावनिर्णयाभावो हेतुरित्यर्थः। वह्निना सिञ्चतीत्यत्र सेकविशेष्यकवह्निकरणकत्वा- भावनिर्णयेन शाब्दबोधविरहः।

चषकम्

पुत्रेणेति। कस्य पुत्र इत्युत्थिताकाङ्क्षया प्रथमं राज्ञः पुत्रेण सह जनितान्वयबोधकत्वाज्जनिततात्पर्यविषयाऽन्वयबोधकत्वात्। शब्दस्य सम्भृतसामग्रीकत्वेन विरम्य व्यापाराभावात्।

तदुक्तम् –

'यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।
तेन तेनाऽन्वितः स्वार्थः पदैरेवावगम्यते'॥

इति। तेन तेनैवेति योजनान्नतु पदान्तरमपेक्षत इत्यर्थः। तेन नह्यवान्तरवाक्यार्थबोधेऽपि महावाक्यार्थबोधसामग्रीहेतुता कल्प्यते येन फलविलम्ब इत्युक्तं भवति। **वस्तुतस्त्वन्वितो** वाक्यार्थबोधविषयीकृतः स्वार्थः पदैरेवावगभ्यते स्मृतिशाब्दबोधरूपव्यापारवैचित्र्यादेवा- वान्तरवाक्यमहावाक्यार्थबोधरूपफलवैचित्र्यभाग्भवति। **न तु** तावतां समूहालम्बनोपस्थितिमपेक्षत इति यथास्थितैवकारार्थः। **एते**नाजनितान्वय- बोधदशायामेव राज्ञः पुरुषान्वयबोधः कुतो न भवत्युभयान्वयतात्पर्ये पुरुषेणाप्यन्वयबोधो वा कथं भवतीति च शङ्का **परास्ता**।योग्यतां निर्वक्ति।

बाधकेति। पदसाधुत्वाय विवक्षितोऽपि कर्तृत्वरूपोऽर्थो योग्यतायां न निविशते गौरवात्।

तथा च स्वपरसाधारणबाधप्रमासामान्याभाव इत्यर्थः। वह्निना सिञ्चतीत्यादौ स्वस्य बाधप्रमाविरहेऽपि शाब्दप्रमानुदयात् **परान्तर्भावः**। सामान्याभावबोधाय **स्वान्तर्भावः**। तेन परस्यापि कस्यचिद्बाधप्रमाविरहे प्रमानुत्पादेऽपि न क्षतिः। **अत एव** प्रमान्तर्भावः। **अन्यथा** पयसा सिञ्चतीत्यादौ कस्यचिद्बाधभ्रमेऽपि प्रमा न स्यादिति।

तात्पर्यटीका

कुत्र वाक्ये राज्ञ इति प्रविष्टमिति संशयेन प्रकृते वाक्यभेदेऽपि समानवाक्यश्रुतेर्नियामकत्वासम्भवेन यथाश्रुते एतेनेत्यादिना वक्ष्माणास्वरसाद्व्याचष्टे **कस्येति**। **ननु** सम्भूयोच्चारणं शाब्दबोधे हेतुस्तथा च पुरुषपदोच्चारणाभावे कथं द्वयोरेवान्वयधीविषयता स्यादत आह। **शब्दस्येति**। सम्भृतसामग्रीकत्वेनेति तथा चान्वयप्रतियोग्यर्थकपदानामेव सम्भूयोच्चारणमपेक्षितं पुरुषपदं तु न तथेति भावः। **विरम्योपस्थित**पुत्रपदार्थान्वयमकृत्वैव **व्यापाराभावा**दनुपस्थितपुरुषपदार्थोपस्थितिप्रतीक्षया पुरुषपदार्थशाब्दबोध-जनकत्वासम्भवात्।

यद्यदर्थस्वरूपम्। **तेन** तेनेति वा तदर्थपरतया **व्याख्येयम्**। प्रकृतार्थोपष्टम्भकत्वं सङ्गमयितुमाह। **तेन तेनैवेति योजनादिति**। योजनां विनैव वाक्यार्थं वर्णयति। **वस्तुतस्त्विति**। ननु पदार्थोपस्थितेः स्मृतिरूपाया नष्टत्वान्निर्व्यापारं पदं कथं महावाक्यार्थबोधं जनयेदतः शाब्दबोधरूपेति। तथा चावान्तरवाक्यार्थबोधस्यैव स्मृतिद्वारकस्य तत्र व्यापरतेत्याशयः। पदैरेवेत्येवकारव्यवच्छेद्यं दर्शयति **न त्विति**। एतेन पुत्रपदस्योत्थिताकाङ्क्षयाऽन्वयबोधे तात्पर्यविषयत्वोक्त्या च। **न निविशत इति**। बृहद्रथं तरसामासोमः स्यादित्यत्र द्वन्द्वोत्तरद्विवचनार्थद्वित्ववद**धिकमग्रे** व्यक्तीभविष्यति। स्वार्थे कप्रत्ययेऽप्यस्यानर्थक्यं दुर्वार**मित्थमेव**

साधकबाधकमानाभाव इति मणौ समुक्ताद्यानर्थक्यमित्याह **गौरवादित्यर्थतः** शब्दतश्च गौरवादित्यर्थः।

परकीयबाधप्रमासामान्याभावनिवेशे परकीयत्वस्य वैयर्थ्यमाशङ्क्याह। **सामान्याभाव इति। तेन** सामान्याभावविवक्षणेन। **अत एव** वक्ष्यमाणदूषणादेव। **अन्यथा** बाधज्ञानसामान्याभावविवक्षायाम्।

तर्कामृतम्

अव्यवधानेनान्वयप्रतियोग्युपस्थितिरासत्तिः। तेन 'गिरिर्भुक्तं वह्निमान्[1] देवदत्तेन' इत्यत्र नान्वयबोधः[2]। तत्तदर्थप्रतीतीच्छयोच्चरितत्वं तात्पर्यम्। तेन भोजनप्रकरणादौ[3] 'सैन्धवमानय' इत्युक्ते अश्वान्वयबोधो न भवति।[4]

तरङ्गिणी

अव्यवधानेनेति। प्रकृतवाक्यार्थघटकैकपदार्थो- पस्थित्यव्यवधानेना- परपदार्थोपस्थितिः। अव्यवधानं च प्रकृतवाक्यार्थघटको- पस्थितित्वावच्छेदेन प्रकृतान्वयबोधानुकूलोपस्थित्यधिकरणः क्षणः। तद्ध्वंसाधिकरण- क्षणोत्पत्तिकत्वस्य वह्निमत्पदार्थोपस्थितौ सत्त्वान्न शाब्दबोधः। **अश्वान्वयबोधो न भवतीति।** अश्वप्रतीतीच्छयोच्चरितत्वग्रहाभावादिति भावः।

चषकम्

आसत्तिं लक्षयति। **अव्यवधानेने**त्युपलक्षणं तृतीयोद्दिष्टबोधान- नुकूलानन्तरितेत्यर्थः। तेन घटस्यानयनमित्यादावपेक्षाबुद्धिसहितया वैकया

---

१. 'अग्निमान्' इति पाठान्तरम्।

२. 'नान्वयबोधोऽनासन्नत्वात्' इति पाठान्तरम्।

३. 'भोजनप्रकरणे' इति पाठान्तरम्।

४. 'भवति तात्पर्याभावात्' इति पाठान्तरम्।

वानेकपदार्थोपस्थित्या शाब्दबोधनिर्वाहः। **नान्वयबोध इति।** गिर्यग्निमत्पदयोरव्यवधानाभावेनोक्तरूपासत्यभावादिति भावः।

नन्वेवं छत्री कुण्डली वासस्वी देवदत्त इत्यनेक-पदघटितवाक्यार्थबोधानुपपत्तिर्बह्वीनामुपस्थितीनां मेलकाभावाद्गुणानां च परस्परमनाकाङ्क्षतया च पूर्ववच्छब्दस्य सम्भृतसामग्रीकत्वाभावेनावान्तर-बोधस्याप्यभावादिति **चेन्ना**नायत्यात्र पूर्वपूर्वोपस्थितिजन्यसंस्कारवशात् समूहालम्बनी सर्वपदस्मृतिरथ तथैवार्थोपस्थितिस्ततः शाब्दबोध इत्युपगमात्। **तदुक्तम्** –

वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत् पतन्ति।
तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति इति॥

सर्वे प्रकृता अन्वयप्रतियोगिन इति यावत्। **वस्तुतस्तु** विनष्टायामप्यनेकार्थोपस्थितौ यत्राकाङ्क्षाधीनावान्तरवाक्यार्थबोधरूप-व्यापारवशादेव महावाक्यार्थबोधनिर्वाहः किं तत्र समूहा-लम्बनोपस्थितिकल्पनयेत्येकैकपदज्ञानकरणत्वतात्पर्येण पदैरेवेत्युक्तं **प्राक्।** तात्पर्यं निर्वक्ति। **तदर्थेति। अश्वेति।** अश्वप्रतीतीच्छ-योच्चरितत्वरूपतात्पर्यज्ञानाभावात्।

तात्पर्यटीका

ननु यत्रादौ घटपदजन्या घटोपस्थितिस्ततः कर्मत्वोपस्थापकषष्ठ्युपस्थित्या कर्मत्वोपस्थितिस्तत आनयनोपस्थापकपदोपस्थित्यानयनोपस्थितिस्तत्र घटकर्मत्वानयनोपस्थितीनामव्यवधानाभावाच्छाब्दबोधो न स्यादत आ**होद्दिष्टेति।** तथा च तत्र पदोपस्थितीनामुद्दिष्ट- बोधानुकूलत्वेन तद्व्यतिरिक्तैर्व्यवधानाभावोऽर्थोपस्थितिष्वक्षत इत्यभिमानः। **नन्वत्र** त्रित्वप्रत्यक्षाभावात् कर्मत्वोपस्थापकषष्ठ्युपस्थितेर्द्वितीयक्षणे जायमानत्वाच्च तया घटोपस्थितिनाशावश्यम्भावेन कथं घटशाब्दबोधः यद्यपि द्वित्वद्विपृथक्त्वादिगुणस्य तृतीयक्षणोत्पन्ननिर्विकल्पकात्मकप्रत्यक्षेष्वपेक्षा-

बुद्धेर्नाशकतावच्छेदकजातिविशेषकल्पने प्रकृते तस्या द्वितीयक्षणे जायमानपदोपस्थितिसाधारण्यं रेत्यपि[१] सुवचं तथापि व्यभिचारसन्देहो दुर्वार इत्यन्यत्र विस्तर इत्याशङ्क्याहै**कया वेति**। तथा च समूहालम्बनोपस्थितावपि घटोपस्थितिक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वरूपभेदगर्भाव्यवधानमानयनोपस्थितौ यथाश्रुतमसम्भवीत्युभयपक्षसाधारणो नञ्गर्भः परिष्कार इति भावः।

तदुक्तमिति। **अत्र** वृद्धयुवशिशुशब्दैश्चिरचिरतरचिरतम कालविनष्टोपस्थितिकत्वं पदार्थेष्ववगम्यते तेन युगपदुपस्थितिविषयाः पदार्था युगपत् परस्परेणान्वयिनोऽन्वयप्रतियोग्यनुयोगिभावं भजन्त इत्यर्थः। **यद्यपि राजपुरप्रवेशन्यायेना**त्रान्वयबोधो न सम्भवतीत्यनायत्येत्यनेनोक्तम्। **तथाप्यसौ खलेकपोतन्यायेना**न्वयबोधः प्रागुक्तस्थलेऽपि सम्भवतीति किमर्थं तत्र **राजपुरप्रवेशन्यायेना**न्वयबोधोऽङ्गीकृत इति तदाशयं वर्णयति **वस्तुतस्त्विति**। **आकाङ्क्षाधीनेति**। अपेक्षाबुद्धिनाशकतावच्छेदकजातिविशेषाभ्युपगमे सम्भवदबाधितार्थोपस्थितिद्वययौगपद्याधीनेत्यपि बोध्यम्।

चषकम्

वस्तुतोऽश्वे तात्पर्येऽपि भोजनप्रकरणे न लवणस्य तात्पर्यभ्रमाज्जातेऽपि शाब्दे बाधे स शब्दाभास एव **यत्परः शब्दः स शब्दार्थ इति न्यायाच्छब्दार्थ** इत्यस्य वक्तृविवक्षितप्रमाविषय इत्यर्थः। तदर्थविषयकयथोक्तप्रमाजनकस्यैव शब्दस्य प्रामाण्यव्यवहारात् **कथमन्यथा**श्वमानयेत्युक्तम्। न तु लवणमानयेति तत्र प्रयोज्यो निगृह्यते। **सौगतास्तु** शब्दो न प्रमाणम्। **तथा हि**। करणविशेष-प्रमाणं करणञ्च तद्यस्मिन् सति क्रिया भवत्येव न च शब्दे सति प्रमा भवत्येवेति नायं प्रमाणम्। **न च** शब्दो न प्रमाणमिति वाक्यस्य प्रामाण्ये समागतमस्यैव शब्दस्य प्रामाण्यमप्रामाण्ये तदप्रामाण्यस्य भ्रमजनकत्वलक्षणस्य विषयबाधनान्तरीयकतयोद्देश्यशब्दस्य प्रामाण्यमागतमेवेत्युभयथापि दोष इति **वाच्यम्**। तस्य प्रमाजनकत्वाद्यभावेऽपि पदोपस्थाप्यार्थासंसर्गाग्रहेण शब्दो न प्रमाणतया व्यवहर्त्तव्य इत्युक्तानुमानस्य समुत्थितेरेवार्थसिद्धेरित्या**हुः** ।

---

१. वेत्यपि अथवा साधारण्यन्तरंत्यपि पाठः स्यात्।

तन्न आकाङ्क्षादिमतः पदार्थस्मरणादिव्यापारादिमतश्च प्रमाजनकत्वेनासिद्धः सामग्रीवैकल्ये तु प्रमानुत्पादकता करणान्तरसाधारणी। **वैशेषिकास्तु** शब्दोऽनुमानविधयैवार्थबोधक**स्तथा** हि। दण्डेन गामभ्याजेति पदानि वैदिकानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाण्या-काङ्क्षादिमत्पदकदम्बत्वाद् घटमानयेति पदकदम्बवदित्यनुमानेन ज्ञानावच्छेदकतया संसर्गविशेषसिद्धिर्ज्ञानज्ञानस्य तद्विषयसंसर्गविषयकत्वात् संसर्गे च सम्बन्धिन एव विशेषकत्वादिति। **अत्र** ब्रह्मणे विद्येत्यादौ यदाधिकरणत्वसंसर्गे तात्पर्यं तदा विषयत्वसंसर्गेणार्थान्तरवारणाय तात्पर्यविषयत्वं साध्यघटकसंसर्गविशेषणम्। **तात्पर्ये** चेतरपदार्थत्वेनैवेतरपदार्थस्य प्रवेशाद्घटत्वादिना स्मृतस्य संसर्गो न सिद्ध्येदतः **स्मारितेति**। स्मारितत्वं च वृत्तिरूपसम्बन्धांशे उद्बुद्धसंस्कारजन्यस्मृतिविषयत्वम्। तेन वस्तुपदात् समवायोद्बुद्धसंस्कारवशादाकाशत्वादिनोपस्थितेन रूपेणार्थान्तरवारणम्।

तात्पर्यटीका

नन्वस्तु स्वरूपसदेव तात्पर्यं शाब्दप्रमाहेतुः किं ज्ञानपरतयोपवर्णनेनेत्याशङ्क्याह **वस्तुत इति**। **तात्पर्य**भ्रमाज्जातेऽपीति। तेन चोक्तभ्रमजन्यो लवणशाब्दबोधो न स्यादित्येवं रूपः शाब्दाभासोच्छेदः स्वरूपसतस्तात्पर्यस्य हेतुत्वे प्रसज्येते इत्यादर्शितं भवति। **शाब्दे बोधेऽत्रापि** लवणस्येत्यनुषज्यते। **करणविशेषः** प्रमायाः करणम्। **शब्दो** न प्रमाणमित्यस्यापि प्रमोत्पादकत्वं वा भ्रमोत्पादकत्वं वा न **ब्रूमोऽपितु** प्रमानुत्पादकत्वमात्रमित्यभिप्रेत्याह **तस्येति**। किमर्थं तर्हि शब्दः प्रयुज्यते इत्याशङ्क्य प्रमाणोत्थापनायेत्याह **पदोपस्थाप्यार्थेति**। प्रमायोगव्यवच्छिन्न-त्वाभावस्यैव हेतू करणात् साध्यं ततो व्यवच्छिनत्ति। **शब्दो** न प्रमाणतया व्यवहर्त्तव्य इति। **अर्थ** सिद्धेः श्रोतुः शब्दाप्रामाण्यबोधनसम्भवात्।

असिद्धेः प्रमायोगव्यवच्छिन्नत्वाभावरूपहेत्वसिद्धेः। **करणान्तरसाधारणी** प्रत्यक्षानुमानसाधारणी तथा चेन्द्रियव्याप्तिज्ञानयोरपि सन्निकर्षपरामर्शरूप-व्यापारासत्त्वदशायां साक्षात्कारानुमित्योरनुदयेन फलायोगव्यवच्छिन्नत्वा-

भावादप्रामाण्यं स्यादिति भावः। मीमांसकमताद्वैशेषिकमतस्य भेदं दर्शयितुं वैदिकान्यपि पक्षीकृत्यानुमानं दर्शयति **वैदिकानि वेति**। **अधिकरणत्व**संसर्गेऽब्राह्मणाननुयोगिकाधिकरणत्वसंसर्गे। **विषयत्वसंसर्गेण** शुद्धाधिकरणत्वसंसर्गेण। **घटाधेयता**वत्कर्मताबोधपरत्वरूपतात्पर्यग्रहाङ्गी-कारेऽनुमानवैयर्थ्यं स्यादम्पदं घटपदार्थाधेयतावत् कर्मत्वबोधपरमिति तात्पर्यविषयसंसर्गत्वेन संसर्गसिद्धावपि घटवृत्तिकर्मतेत्यनवगतमेवेत्याह **तात्पर्ये चेति**।

चषकम्

अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यत्र राज्ञः पुरुष इति भागे राजपुरुषयोर्योग्यार्थयोः संसर्गे तात्पर्याभावेन साध्याभावाद्व्यभिचार **इत्याकाङ्क्षायाः** हेतुकुक्षौ प्रवेशः। **सा** चेदं पदमेतत् पदेन सहानेन संसर्गेणैतदर्थान्वितस्वार्थबोधं जनयत्विति पदतात्पर्यम्। तेन नाकाङ्क्षाया इतरांशवैयर्थ्यम्। **वह्निना** सिञ्चतीति वाक्ये यथोक्तसंसर्गप्रमापूर्व-कत्वगर्भसाध्याभावेन व्यभिचार इति **योग्यतायाः**। **नीलपदं** घटपदार्थान्वित-स्वार्थबोधं जनयतु पटपदं द्रव्यपदार्थान्वितस्वार्थबोधं जनयत्वितीच्छया घटपदार्थीयत्वेन पटसंसर्गमप्यवगाहमानया प्रयुक्तेऽप्यनासन्नतया नीलपटयोरन्वयाननुभावके नीलो घटो द्रव्यं पट इत्यत्र नीलः पट इति भागे नीलपटयोराकाङ्क्षायोग्यतासत्त्वेन विशिष्य पटपदस्मारितपदार्थीयत्वादिना संसर्गतात्पर्याभावात्तथैव व्यभिचार इति **चासत्तेः**। **कदम्बपदं** चाकाङ्क्षादीनां परस्परप्रतियोगिकत्वलाभा**यान्यथा** साध्यस्य परस्परगर्भत्वेन पुत्रापसारणसाकाङ्क्षयोः परस्परमनाकाङ्क्षयोराजपुरुषपदयोर्व्यभिचारप्रसङ्गात्। **नत्विष्ट**प्रकारकप्रवृत्तिविषयविशेष्यकप्रत्यक्षस्य प्रवर्त्तकतया संसर्गज्ञानपूर्वक-त्वानुमितेश्चातादृशत्वात्कथं प्रवृत्तिस्वरूपयोग्यता। **न चानुमिते**र्व्यापकता-वच्छेदकप्रकारकत्वनियमेन प्रमापूर्वकत्वत्वेन प्रमापूर्वकत्वसिद्धौ जायमानायां संसर्गप्रमात्वघटकतया पुरोवर्तिन्यपीष्टतावच्छेदकावलीढमभेदेन प्रकार एवेति **वाच्यम्**।

तथापीष्टतावच्छेदकांशे सधर्मितावच्छेदकप्रत्यक्षस्यैव प्रवर्त्तकतया प्रकृते तदसिद्धेः। **यदि** च तात्पर्यविषयैकपदार्थसंसर्गवदपरपदार्थे तत्संसर्गज्ञानरूपप्रमापूर्वकत्वं साध्यते **तर्ह्य**पीष्टतावच्छेदक-रूपेणेष्टानुपस्थितेर्नोक्तानुमितेस्तथात्वमिति यथोक्तज्ञानसम्पत्तये शब्दप्रमाण्याङ्गी-कार आवश्यक एवेति **चेत् सत्यम्** । विशिष्यपदोपस्थापिताः पदार्था मिथस्तात्पर्यविषयसंसर्गवन्तस्तादृशपदस्मारितत्वादित्यनुमानेन प्रवृत्तिस्वरूप-योग्यज्ञानसम्पत्तेर्न शब्दो मानान्तरम्। **नन्व**न्योन्याश्रयापत्या पक्षस्य दृष्टान्तत्वासम्भवेन दृष्टान्ते साध्यसिद्ध्यभावात् कथं व्याप्तिग्रह इति **चेन्न**। दृष्टान्तान्तरेण तत्रापि साध्यसिद्धेरिति **वदन्ति** । **तदपि न** । यथोक्तव्याप्त्यादि-ग्रहं विनापि शब्दादन्वयबोधस्यानुभाविकत्वात्। **यदि** च सर्वत्र शाब्दस्थले व्याप्तेर्हेतोश्च ज्ञानं कल्पयित्वानुमितिर्निर्वाह्यते **तदा** सर्वत्रानुमितिस्थले पदपदार्थयोः परस्परं स्मारकत्वस्याविशिष्टत्वादर्थोपस्थापिते पदेऽप्युक्ता-काङ्क्षाज्ञानादिकं कल्पयित्वा शाब्दोऽन्वयबोधोऽपि निर्वाहयितुं शक्य इति संशयितमनु**मानप्रामाण्यमपि**।

तात्पर्यटीका

इतरांशवैयर्थ्यमजनितान्वयबोधकत्वांशवैयर्थ्यम्। **प्रमेति परस्परेति** च साध्ये इष्टसिद्ध्यर्थम्। **पुरोवर्तिन्यपीति**। रजतसंसर्गवत्त्वेनोपस्थितस्य पुरोवर्तिन एव भानादिति भावः। तत्रापि स्मारितपदार्थत्वेनैव रजतभानादव**लीढेति** । **अभेदेन** प्रकार एवेति अभेदस्य प्रकारत्वेऽपि। तत्संसर्गकज्ञानसाध्यप्रवृत्ति-स्वरूपयोग्यताक्षतैवेति तदभेदो यत्र प्रकारस्तत्राभेदेन सोऽपि विशिष्टबुद्धौ प्रकारीभवतीति वा **निगर्वः**।

तथात्वमिति। स्मारितपदार्थीयत्वेन वस्तुतो रजताभेदग्रहेऽपि रजतत्वेन रजताभेदानवगमादिति भावः। **विशिष्य** रजतत्वादिना तेनेष्टतावच्छेदकप्रकार-कत्वमादर्शितम्। **संसर्गवन्त इति**। यद्यप्येवं पुरोवर्तिनीष्टतावच्छेदकरूपेणेष्ट-प्रकारकज्ञानस्य प्रवर्त्तकत्वादुक्तानुमितेर्न तथात्वमिति दूषणं दुर्वारमेव तथाप्युक्तनिगर्वादनुमितितथात्वसम्भवात्तदुपेक्ष्य दोषान्तरेणैतन्मतं दूषयति। **तदपि**

नेति। **व्याप्यादी**त्यादिना स्मारितत्वरूपहेतुपरिग्रहः। **क्वापि** गौरवस्य निर्णयाविषयत्वे एकतरप्रामाण्यनिर्णयासम्भव इत्याशयेनोक्तं **संशयितमिति**।

चषकम्

मणिकृतस्तु योग्यतासंशयेऽपि शाब्दान्वयानुभवाल्लिङ्ग-विशेषणयोग्यतानिश्चयस्य तदानीमसम्भवान्नानुमानेन गतार्थः शब्दः। **न च** पक्षताघटकसंशयातिरिक्तसंशयान्यत्वमेव निश्चयत्वमनुमितिजनकतावच्छेदक-कोटौ घटकमिति **वाच्यम्**। तथा सति वह्निव्याप्यवह्निमान्नवेति संशयादप्यनुमितिप्रसङ्गादिति **प्रत्यवतिष्ठन्ते**। **मिश्रास्तु** शब्दस्यानुमानविधयाप्रामाण्ये घटमानयेति स्वरूपयोग्यं घटः कर्मत्वमानयनं कृतिरिति च स्वरूपयोग्यमिति व्यवस्थानस्यादनुमानस्योभयत्राप्यविशेषान्न हि वस्तुतः साध्यवत्पक्षावगाहिन्यामनुमितौ सदसत्परामर्शजन्यत्वाद्विशेषः प्रवृत्तिगोचरः समस्ति कश्चित्। **स्वातन्त्र्येण** शब्दप्रामाण्ये तु शब्दस्वभावाधीन एवाऽसौ विशेष **इत्याहुः** । **तच्चिन्त्यम्**। व्याप्तिग्रहौपयिकविशेषत-च्छून्यत्वाभ्यामेव व्यवस्थोपपत्तेः **यद्धि** वक्त्रा यत्साकाङ्क्षादिकं बुबोधयिषया प्रयुज्यते तत्तात्पर्यविषयपरस्परसंसर्गप्रमापूर्वकमिति व्याप्तेः। **नचा**काङ्क्षादिकं विनापि भ्रमाद्व्याप्तिग्रहसम्भवेन नाकाङ्क्षादिकं व्याप्तिग्रहौपयिकमिति **वाच्यं ज्ञान**निष्ठव्याप्तिग्रहकारणतायां विषयितयावच्छेदकमाकाङ्क्षादी-नामपीत्याशयात्।

परे तु घटात् पृथगित्यादौ घटावधिकपृथक्त्वप्रकारेण निरवच्छिन्नविशेष्यताकः पृथक्त्वाश्रयस्य शाब्दबोधोऽपि सर्वानुभवसिद्धः **सचा**स्माकं तादृशानुपूर्वीकपदज्ञानत्वेन तादृशशाब्दबोधं प्रति हेतुत्वादुपपद्यते। **वैशेषिकाणां** तु पृथक्त्वं घटावधिकं पञ्चम्यन्तघटपदसाकाङ्क्षपृथक्पद-स्मारितत्वादित्याद्यनुमानेन न तन्निर्वाहः। अस्मिन् पृथक्त्वे पक्षे त्वाश्रयस्यैवाभानात्तस्मिंश्च पटादौ तथाभूते पृथक्त्वे साध्ये निरवच्छिन्नविशेष्यत्वस्यासम्भवादिति **प्राहुः**।

तात्पर्यटीका

पक्षाताघटकहेतुविशेषणसंशयातिरिक्तसंशयान्यत्वरूपस्य निश्चयत्वस्याप्यन्यूनानतिप्रसक्तस्य सुवचत्वं मनसि कृत्योक्तं **प्रत्यवतिष्ठन्त इति**। तेन प्रत्यवस्थानमात्र**मेतन्नतु** तेषां तत्रैव निर्भर इत्याशयः। **विशेषः** समर्थासमर्थत्वकृतः। **कश्चित्** सकम्पनिष्कम्पत्वकृतो वा। **समस्त्यध्वसीयते**। **शब्दस्वभावाधीन इति**। **तदुक्तम्**। क्रियाकर्मभावनान्वयबोधे तान्येव समर्थानि न तत् समानार्थकाण्यन्यानीति। **व्याप्तिग्रहौपयिकेति**। आर्द्रेन्धनप्रभवतदन्यवह्न्योर्धूमानुमितिस्वरूपयोग्यायोग्यर्थेऽप्यवस्थायीत्थमेव सङ्गमनीयेत्याशयः। आकाङ्क्षादीनां व्याप्तिग्रहोपयिकत्वं दर्शयति **यदधीति**।

पृथक्त्वधर्मितावच्छेदकानवगाही शब्दाद्बोधः सम्भवति नानुमानादिति शब्दः प्रमाणान्तरमिति वदतां केषाञ्चिन्मतमुपन्यस्यति **परेत्विति। अथ** पृथक्त्वं न पक्षः किन्तु पटस्तत्र च घटावधिकं पृथक्त्वं साध्यते **तर्हि** पटत्वमेव पृथक्त्वधर्मितावच्छेदकतयावगतमिति न शाब्दबोधसमानाकारतेत्याह **तस्मिंश्च** पटादाविति पक्षीकृते पटादावित्यर्थः। **तथाभूते** पृथक्त्वे घटावधिकत्वरूपपञ्चम्यन्तार्थाऽन्विते पृथक्त्वे। **शब्दप्रामाण्यं** विनात्र स्थले गत्यभावः प्रशब्देनोत्कर्षः **सूचितः** । परन्तु पृथक्पदस्य गुणमात्रशक्तौ नोक्तानुभवप्रमाणकः पृथक्त्वाश्रयस्य बोधः **तथा** च निरुक्तपृथक्त्वपक्षिकानुमितिरुक्तशाब्दबोधसमानाकारैवेति गतं शब्दाप्रामाण्येन। **न चैवं** नीलादिपदानामपि विशिष्टार्थकता विलुप्येतेति **वाच्यम्**। नामार्थयोर्भेदसम्बन्धेनान्वयस्याऽव्युत्पन्नतया तेषां विशिष्टार्थकत्वाभ्युपगमादिह त्वव्ययत्वेन तथान्वयः सम्भवति कतिपयाव्ययभिन्नत्वेनोक्तव्युत्पत्तौ नाम्नो विशेषणा**दन्यथो**च्चैश्चैत्र इत्यादावुच्चाधिकरणचैत्रयोराधाराधेयभावेनान्वयबोधस्य सर्वानुभवसाक्षिकस्यानुपपत्तेरित्यस्वरसश्च परे त्वित्यनेन सूचितः ।

चषकम्

जरन्मीमांसकास्तु लौकिकवाक्यस्य भ्रममूलकस्यापि सम्भवेन तत्राप्तोक्तत्वनिश्चयः शाब्दबोधेऽधिकं कारणं तद्व्यतिरेकज्ञाने

तदनुदयाद्यद्व्यतिरेकसंशयनिश्चयौ यत्र प्रतिबन्धकौ तन्निश्चयस्तत्र **हेतुर्यथा**ऽव्यभिचारनिश्चयोऽनुमिताविति व्याप्ते**स्तथा** चोक्तरीत्या ज्ञानावच्छेदकतया वाक्यार्थस्य प्रागेव गृहीतत्वाल्लौकिकः शब्दोऽनुवादकः। **न चैवं** तस्य बोधकतैव निष्प्रामाणिकीति कुतोऽनुवादकतापीति **वाच्यम्**। वेदतुल्यसामग्र्या बोधजनने बाधकाभावात्। **वेदस्य** त्वपौरुषेयत्वेन बाधात्तदनुमानापूर्वकत्वात्तज्जन्यबोधस्य प्रामाण्य**मित्यूचुः** । **तदसत्**। शाब्दबोधसामान्ये तद्धेतुत्वे वेदजन्यशाब्दबोधे **व्यभिचाराद्वस्तुतो** लौकिकवाक्यजन्यशाब्दबोधे तद्धेतुत्वे वेदानुकारेण पठ्यमाने मन्वादिवाक्येऽपौरुषेयत्वाभिमानिनो गौडमीमांसकस्य तेन विनापि शाब्दबोधोदयेन व्यभिचारात्।

न च लौकिकत्वेन गृह्यमाणवाक्यजन्यशाब्दबोधे तस्य हेतुत्वमिति **वाच्यम्**। मानाभावात्। **वेद** तुल्यसामग्रीत एव शाब्दबोधनिर्वाहात्। **यस्य** संशयेत्यादिव्याप्तेरप्रयोजकत्वात्। **व्यभि**चारसंशयनिश्चययोः प्रतिबध्येऽव्यभिचारनिश्चयाजन्येऽव्यभिचारनिश्चये व्यभिचारात्।

तात्पर्यटीका

तत्र लौकिकवाक्ये। निश्चयान्वयिविशेष्यकत्वं सप्तम्यर्थः। **उक्तरीत्या** वैशेषिकप्रदर्शितरीत्या। **अनुवादकतापीति** प्रमाणाजान्तरगृहीतार्थग्राहकताया एवानुवादकतापदार्थत्वादिति भावः। **वेदानुकारेण** स्वरविशेषेण् छन्दसा **च यथामी वेदिं तत्क्लृप्तधिष्ण्याः समिद्वंतः प्रांतसंस्तीर्णदर्भाः। उपघ्नन्तो दुरितंहव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्त्विति। मन्वादिवाक्य इति** वस्तुतो लौकिकत्वमाविष्कर्त्तुम्। **मनु**पर्यन्तानुधावनं तु कर्त्रनुपलम्भेन विशेषादर्शनाभिप्रायम्। **गौडेति** वेदत्वरूपविशेषादर्शनयोग्यत्वाभिप्रायम्। **मीमांस**केत्यपौरुषेयत्वाभिमानयोग्यत्वाभिप्रायम्।

मानाभावादिति। लौकिकवाक्यान्तरदृष्टसामग्र्यैव निर्वाहेऽतिरिक्तकारणकल्पने मानाभावादिति भावः **ननु** लौकिकत्वरूपसाधारणधर्मज्ञानाधीनानाप्तोक्तत्वसंशयनिवर्त्तकतयाप्तोक्तत्वनिश्चयहेतुत्वं तादृशशाब्दबोधं

आवश्यकमेवात आह। **वेदतुल्यसामग्रीत इति**। ग्राह्याभावानवगाहिनो नाप्तोक्तत्वसंशयस्याविरोधित्वेन तन्निवृत्तेरनपेक्षणादिति भावः। **अप्रयोजकत्वादिति**। **न च** तन्निश्चयत्वेन हेतुत्वे संशयानां स्वरूपयोग्यता न कल्प्यत इति लाघवमनुकूलतर्क इति **वाच्यम्**। कारणतावच्छेदकलाघवेन संशयसाधारणस्वरूपयोग्यताकल्पनागौरवस्य प्रतिकूलतर्कत्वाभावादिति भावः। तद्व्यतिरेकज्ञानत्वेन प्रतिबन्धकत्वेनैव सामञ्जस्ये तज्ज्ञानहेतुत्वाकल्पनेऽपि क्षतिविरहादुक्तयुक्त्याप्तोक्तत्वनिश्चयत्वेन हेतुतासिद्धेरसम्भवदुक्तिकत्वमभिप्रेत्याह। **व्यभिचारसंशय**निश्चययोरिति। **व्याभिचारादिति**। **नन्वे**तन्मतेऽप्युक्तव्यभिचारवारणाय प्रतिबन्धकयत्संशयादौ यदभावत्वप्रकारकतानैयत्यं विवक्षणीयम्। न च व्यभिचारी न वेति संशयोऽव्यभिचाराभावत्वावगाहीति तद्वारणम्। तावन्मात्रे च तथा विवक्षिते प्रमेयत्वादिना व्याप्त्याद्यभावागाहिनि[१] पक्षधर्मत्वा भावत्वावच्छिन्नविषयके ज्ञानेऽनुमितिप्रतिबन्धके व्याप्त्यभावत्व- प्रकारकत्वाभावाद्दृष्टान्तासिद्धिर्माभूदिति यदभावावगाहिताप्रयुक्तप्रतिबन्धकताशालिसंशयादौ यदभावत्वप्रकारकतानैयत्यं विवक्षणीयम्।

चषकम्

यदि चाव्यभिचारनिश्चये ग्राह्यसंशयत्वाद्व्यभिचारसंशयो न प्रतिबन्धक इति मतं **तदा** प्रकृतेऽप्यनाप्तोक्तत्वसंशयस्य योग्यतासंशयवत् प्रतिबन्धकत्वासिद्धेः कुतस्तन्निश्चयहेतुता। वेदतुल्यसामग्र्या शाब्दबोधसम्भवेन व्याप्त्यादिबोधविलम्बासहिष्णुत्वादाप्तोक्तत्वानुमानस्याप्यसिद्धेः **एतेन** वेदेनाप्तोक्तत्वशङ्कानिरासद्वाराऽपौरुषेयत्वानुमानमधिकं शाब्दसामग्र्यामन्तर्भवतीति प्रजल्पन् समाहितः। **वेदस्याप्यनुवादकतापत्तेस्तदुक्तम्**-

'यस्तु पुंदूषणाशङ्कैः स्मारितत्वात्पदैरमी।
अन्विता इति निर्णीते वेदस्यापि न तत्कुत इति॥

---

१. प्रमेयवान् धूमः पक्षावृत्तिरिति ज्ञानम्।

तात्पर्यटीका

तथा च मिश्राणां व्यभिचारसंशयप्रतिबध्येऽव्यभिचारनिश्चये व्यतिरेकनिश्चयपदोपादानव्यावृत्युक्तेरसङ्गतिरव्यभिचारनिश्चयं प्रति प्रतिबन्धकतायां व्यभिचाराभावावगाहित्वाप्रयुक्ततया यत्पदेन व्यभिचारोपादानासम्भवादिति **चेन्न** । यद्व्यतिरेकनिश्चये यदभावत्वप्रकारक-तानैयत्यप्रवेशपक्ष एव प्रतिबन्धकतायां यदभावावागाहिताप्रयुक्तत्वं प्रवेशनीयं **नतु** संशये तद्विशेषण प्रवेशपक्षे। **इत्थञ्च** यत्संशयस्तथा यदभावावगाहिता-प्रयुक्तप्रतिबन्धकताशाली यदभावत्वप्रकारक एव यद्व्यतिरेकनिश्चयश्च यत्र प्रतिबन्धकस्तन्निश्चयस्तद्धेतुरिति वा यद्भावत्वप्रकारक एव यत्संशयो यद्व्यतिरेकनिश्चयश्च यत्र प्रतिबन्धकस्तन्निश्चयस्तद्धेतुरिति वा व्याप्तिः पर्यवसितेति क्व दृष्टान्तसिद्धिर्येन मिश्रोक्ताया व्यतिरेकनिश्चयपदोपादान-व्यावृत्तेरसङ्गतिः स्यात्। **ननु** तद्व्यतिरेकज्ञाननिष्ठो हेतुः साध्यं तु तन्निश्चयनिष्ठमिति वैयधिकरण्यमिति **चेन्न** । यदभावत्वाप्रकारक-ज्ञाननिष्ठयदभावावगाहिताप्रयुक्तप्रतिबन्धकताकान्यत्वे सति यत्संशयव्यतिरेक-निश्चयसामान्यप्रतिबन्ध्यत्वस्य हेतोस्तन्निश्चयजन्यत्वरूपसाध्यवद्**वृत्तेः**। **स**त्यन्तोपादानाच्चाव्यभिचाराभावत्वानवच्छिन्नव्यभिचारविषयताप्रयुक्त-प्रतिबन्धकताके व्याप्तिनिश्चयेऽव्यभिचारनिश्चयाजन्येऽपि न व्यभिचारः। व्यभिचारसंशयमात्रप्रतिबध्यस्य व्याप्तिनिश्चयस्य प्रतिबन्धकतायां व्यभिचारा-भावावगाहित्वाप्रयुक्तत्वादेव सत्यन्तवत्त्वेऽपि व्यभिचारव्यतिरेक-निश्चयप्रतिबध्यत्वरूपनिश्चयाभावेन हेत्वसत्त्वादेव व्यभिचारनिश्चया-जन्यत्वेऽपि न व्यभिचार इति व्यतिरेकनिश्चयपदोपादानमप्यर्थवत्। **ननु** व्यभिचाराभावत्वानवच्छिन्ना व्यभिचाराभावावगाहिताप्रयुक्ता प्रतिबन्धकता न प्रसिद्धाऽभावस्य तद्व्यक्तित्वेन हेतुताया इव विषयितया प्रतिबन्धकतावच्छेदकताया अप्यनङ्गीकारादिति **चेन्न** ।

यदभावत्वाऽनवच्छिन्नं यदभावविषयतासामान्यं यज्ज्ञानीय प्रतिबन्धकतानवच्छेदकं तत्त्वस्य विवक्षितत्वादित्यास्तां **तावत्**। **दीधि**तिकृतस्त्वन्यांन्याभावादिगर्भव्याप्तिबुद्धावत्यन्ताभावादिगर्भव्याभिचारादिधियो

विरोधित्वमस्वीकुर्वन्तो मणिमन्त्रादिन्यायेन व्यभिचारज्ञानस्य प्रतिबन्धकत्वं **नानुमन्यन्तेऽपितु** ग्राह्याभावावगाहित्वेनैवेति न तेषां व्यभिचारसंशयस्य व्याप्तिनिश्चयप्रतिबन्धकतेति यथाश्रुतमेव साधु। नन्वेवमेकविधव्यभिचार-ग्रहेऽप्यन्यविधव्याप्तिज्ञानेनानुमित्यापत्तिरिति चेदनुमित्यनुत्पादनिश्चये तद्धेतुव्याप्त्यन्तरग्रह विरोधि व्यभिंचारान्तरधीवशात् कारणान्तराभावाद्वा नान्यविधव्याप्तिधीरिति गृहाण। **योग्यतासंशयवदिति** षष्ठीसमर्थाद्वतिः। योग्यतासंशयस्य ग्राह्यसंशयतया प्रतिबन्धकत्वाभावेऽप्याप्तोक्तत्वसंशयः प्रतिबन्धक एवेत्युक्ते त्वाह **वेद तुल्यसामग्र्येति** व्याख्यातार्थम्। **व्याप्त्यादीत्यादिना** दोषाजन्यत्व- रूपाप्तोक्तत्वानुमापकलिङ्गपरिग्रहः। वेदतुल्य सामग्र्याः प्रकृतेऽसम्भवं दर्शयितुं वेदेऽपि कारणान्तरं शङ्कते। **एतेनेति**। वेदजन्यशाब्दबोधात्पूर्वमपि तत्समानाकार ज्ञानसम्भवेन तस्यानुवादकत्वं दुर्वारमित्याह। **वेदस्यापीति**। शाब्दबोधसमानाकरमनुमानप्रकारं दर्शयति। **तदुक्तमिति**।

चषकम्

प्राभाकरास्तु क्वचिदेव शाब्दप्रमेति नियमनिर्वाहाय व्यभिचारिव्यावृत्तमव्यभिचार्यनुगतं किञ्चित् प्रमाप्रयोजकमुपेयं **तच्च** न योग्यतान्वयप्रयोजकरूपवत्त्वरूपायास्तस्याः करकाभिप्रायप्रयुक्ते पयसा सिञ्चतीत्ययोग्यवाक्येऽपि सत्त्वात्। **नापि** भ्रमप्रमादविप्रलिप्साकरणा-पाटवरूपदोषाभावः। भ्रान्तप्रतारकवाक्ये सम्वादेन प्रमाणे प्रतारणारूपदोषसत्त्वेन व्यभिचारापत्तेः। **नन्व**विद्यमानार्थप्रतिपिपादयिषैवात्र प्रतारणा सा च नास्त्येव **भ्रमोऽपि** भिन्नविषयत्वान्न दोषो वक्तुर्हि जलह्रदे वह्निभ्रमः श्रोतुस्तथाभ्रमं हेतुः क्लृप्तो नान्य इति चेवद्दोषत्वस्याननुगमात्तदभावानां प्रत्येकं कारणत्वे भ्रमसत्त्वेऽपि दोषान्तराभाववशात् प्रमापत्तिः। **अभावकूटस्य** कारणत्वे गौरवात्। **प्रत्येकं** ये दोषास्तदभावानां भ्रमजनकतावच्छेदकावच्छिन्नाभावत्वे नानुगमान्नोक्त दोष इति **चेन्न**। विसम्वादिशुकवाक्यादपि प्रमापत्तेः।

तस्माद्यथार्थवाक्यार्थतात्पर्यकत्वमेव लोकवेदसाधारणं शाब्दप्रमाप्रयोजकम्। **तच्चै**कपदार्थवदपरपदार्थे तत्पदार्थप्रतीतीच्छयानुसन्धीयमानत्वं वेदेऽपि

पूर्वपूर्वाध्यापकेच्छामादाय सम्भवति। **मूर्खपठ्यमान**वेदस्तु पण्डितपठ्यमानवेदादभिन्न एव वेदस्य नित्यत्वात्। **न चैवमि**च्छाधीनत्वेन न्यायानपेक्षतया लोकाविशेष इति **वाच्यम्**। वेदे तस्याः परतन्त्रपुरुषपरम्परा-पारतन्त्र्येण न्यायनियन्त्रितत्वात्। **नित्यानुमेयवेद स्थले** तु वाक्यार्थस्य सन्दिग्धत्वाद्वेदस्याध्यकाभावादुक्तानुसन्धीयमानापवस्य दुर्ग्रहत्वेऽपि तदर्थज्ञापकत्वेन ज्ञानमन्यैव सामग्रीति न व्यभिचारः। **एतेन** स्मृतिजन्यशाब्दबोधात् प्राग् विशिष्यार्थग्रहेऽस्यानुवादकतापत्तिः परास्ता।

तात्पर्यटीका

क्वचिदेवाव्यभिचारिशब्दप्रयोग एव। **भ्रान्तं** प्रतारकवाक्ये घटशून्ये स्वयं घटमवगत्य परस्यात्र घटावगमो मा भवत्विवतीच्छया नात्र घट इति प्रयुक्ते वाक्ये। **प्रतारणेति**। स्वप्रतीतविपरीतार्थप्रतिपिपादयिषेत्तयर्थः। इत्थ मिच्छावतोऽपि प्रतारकत्वव्यवहाराद्व्यवहारानौपयिक्यप्यविद्यमानार्थ-प्रतिपिपादयिषैव दोषमध्ये गण्यत इत्याहात्र **प्रतारणेति। गौरवादिति। यद्यपि** कूटस्य दुर्ज्ञेयत्वमपि दोषः सम्भवति **तथा**पि नासावुद्भावनार्ह इदानीं तज्ज्ञानोपयोगिताया अव्यवस्थापितत्वादिति **ध्येयम्**। **प्रमापत्तेरिति** तस्य दोषशून्यत्वादिति भावः।

कस्यचिदध्यापकस्य कपिञ्जलानिति बहुवचनं चतुः कपिञ्जलान् बोधयत्वित्यभिप्रायसम्भवेन विशिष्यैवाभिप्रायो ग्राह्य इति वेदस्यानुवादकतैवेत्याह। **लोकाविशेष इति। परतन्त्र** पुरुषपरम्परापारतन्त्र्येणेति। न्यायनियन्त्रितेच्छावती या परम्परा तदभिप्रायसमानाभिप्रायतयेत्यर्थः। **ननु** नित्यानुमेयवेदमूलकस्मृतिप्रभवशाब्दप्रमायां तत्पदार्थवदपरपदार्थप्रमापकाभा-वाद्यथार्थतात्पर्यकत्वस्य सामान्यतो विशेषतो वा दुर्ग्रहतया व्यभिचार इत्यत आह **नित्येति**। तथा च स्मृतिकर्त्तुरेव योगजन्यतदर्थप्रतीतीच्छारूपतात्पर्येऽपि याथार्थ्यग्राहिका तदर्थज्ञापकः कश्चिद्वेदोऽस्तीति ज्ञानरूपा सामग्रीत्यर्थः। इत्थञ्च तादृशपदार्थज्ञापकत्वग्रहेऽपि सामान्यतः पदार्थावगाहित्वात्तादृश-स्मृत्यर्थोऽप्यननूद्य एवेति मन्तव्यम्। **एतेन** तद्वेदस्य मूलकत्वेन **पदार्थस्य** सामान्यत एव ज्ञानेच्छयोर्विषयत्वेन च।

चषकम्

सम्वादिशुकवाक्येऽपि शिक्षकवाक्यमादायोपपत्तिस्तस्य तत्पूर्वकत्वात्। **न च** दैववशसम्पन्ने शुकबालादिवाक्ये का गतिरिति **वाच्यम्**। तस्याप्रमाणत्वाद्व्यवहारस्तु प्रत्यक्षादसंसर्गाग्रहाद्वेति। **तच्च** ज्ञातमुपयुज्यते। ज्ञायमानकरणे ज्ञानोपयोगित्वे सति व्यभिचारिवैलक्षण्यत्वाद्व्याप्तिवच्छाब्दशक्तिवच्चेति। **अत्र** यद्यज्ज्ञानीयज्ञायमानकरणनिष्ठं सद्यज्ज्ञानोपयोगि सद्व्यभिचारि वैलक्षण्यं भवति तत्तज्ज्ञाननिरूपितज्ञानावच्छिन्नकारणताश्रयो भवतीति व्याप्तिः। **तत्र** सल्लिङ्गपरामर्शे व्यभिचारवारणाय ज्ञानयमानकरण **इति**। विषयतासम्बन्धस्तु न वृत्तिनियामक इति भावः। **न च** स्वात्मलिङ्गकानुमितेर्ज्ञायमानकरणे स्वात्मनि समवेते तत्र व्यभिचारतादवस्थ्यमिति **वाच्यम्**। ज्ञायमानकरणे तज्ज्ञानानधिकरणत्वस्य विवक्षणात्। **अत** एवात्मलिङ्गकप्रमानुमितिप्रागभावेऽपि न व्यभिचारः। धूमनिष्ठानौपाधिकत्ववारणाय ज्ञानोपयोगित्वे **सतीति**। बाधाभावादिवारणाय व्यभिचारि**वैलक्षण्यत्वादिति**। तच्चाभासव्यावृत्तत्वम्। स्मृतिजनकतावच्छेदकावच्छिन्नान्यत्वमिति यावत्। तेन मन्मते नाभासाप्रसिद्धावपि क्षतिः। बाधाभावत्वस्य स्मृतिजनकतावच्छेदकत्वात्तद्व्युदासः। **जनकता** चोद्बोधकव्यावृत्ता ग्राह्या तेन व्याप्तिशक्त्योर्यथार्थतात्पर्यकत्वस्य चोद्बोधकविधया स्मृतिहेतुत्वसम्भवेऽपि नासिद्धिः।

तस्य च वेदे प्रथमपठितत्वात् प्रथमोपास्थितत्वरूपलाघवतर्केण बहुवचनार्थतया निर्णीत त्रित्वविशिष्ट कपिञ्जलपदार्थपरं बहुवचनान्तं कपिञ्जलपदमित्येवं रूपं पदार्थत्वेन सामान्यत एव पदार्थविषयकं समभिव्याहाररूपन्यायगम्यस्य वाक्यार्थतात्पर्यस्य ज्ञानं वेदजन्यशाब्दबोधे **हेतुः**। कपिञ्जलभिन्नस्य वेदस्थकपिञ्जलपदप्रतिपाद्यत्वाभावेन कपिञ्जलत्वसमव्यापक कपिञ्जलपदार्थविशिष्टे तात्पर्यनिर्णये कपिञ्जलत्व विशिष्टेऽपि तत्संशयायोगेन विशिष्यपदार्थप्रवेशे प्रयोजनाभावादिति सर्वोऽपि वेदोऽननुवादकत्वात् प्रमाणम् **लोके** तु गुरुभूतेऽप्यर्थे तात्पर्यसम्भवेन लाघवतर्कानवताराद्विशिष्य सन्देहसम्भवेन घटविशिष्टकर्मत्वविशेष्यक-

घटप्रकारकप्रतीतीच्छयोच्चरितं द्वितीयान्तं घटपदमिति विशिष्यैव तात्पर्यनिर्णयस्यावश्यं शाब्दबोधात्पूर्वमपेक्षिततया लौकिक वाक्यमनुवादकत्वान्न किमपि प्रमाणं पठ्यमानवेदमूलकस्मृत्यादेरपीदृश्येव गतिरिति न वेदस्यानुवादकत्वप्रसक्तिरित्यवधेयम**इत्याहुः**। **तदप्यसत्**। लघुशरीराया योग्यताप्रमाया एव स्वरूपसत्याः शाब्दप्रमाप्रयोजकत्वे सम्भवति गुरुशरीरयथोक्तयथार्थतात्पर्यकत्वस्य ज्ञातस्य तन्नियामकत्वासिद्धेरुक्तानुमानस्य बाधितत्वात्।

तात्पर्यटीका

प्रत्यक्षादितिसम्भवस्थलाभिप्रायम्। अत एवाहा**संसर्गाग्रहाद्वेति**। **ज्ञात**मुपयुज्यते ज्ञानावच्छिन्नशाब्दबोधकारणतावद्भवति। **ज्ञायमानव रण इति** वर्त्तमानं सदिति शेषः। हेतोः पक्षदृष्टान्तसाधारण्याभावात् सामान्यमुखीं व्याप्तिं दर्शयति **अत्रेति**। ज्ञायमानकरण इत्यस्य प्रयोजनं दर्शयति। **तत्रेति**। **स्वात्मेत्यादि**। तददिच्छाव्याप्यैतदात्माहमिति परामर्शजन्याया एतदिच्छावानहमित्यनुमितेरित्यर्थः। **ना सिद्धिर्न** दृष्टान्तासिद्धिः **स्वरूपासिद्धिश्च**।

गुरुमूतेऽप्यर्थे दशब्राह्मणादौ। **इदृश्येव** गतिः। विशेषत एव तात्पर्यावधारणम् **इति नेति**। स्मृतेरनुवादकत्वेनाप्रमाणत्वादिति भावः। **लघुशरीराया इति** ज्ञायमानस्य तद्वति तत्प्रकारकज्ञानगोचरेच्छापूर्वकत्वस्यापेक्षया तद्वति तत्प्रकारकज्ञानस्य लघुशरीरत्वादिति भावः। **उक्तानुमानस्य** तच्च ज्ञातमुपयुज्यते इत्यनुमानस्य।

चषकम्

अतीतेऽनुमितिदर्शनादपभ्रंशादौ शक्तिभ्रमेणान्वयबोधाच्च न व्याप्तिः शक्तिश्च कारणमिति यथाश्रुते साध्ये दृष्टान्तासिद्धेश्च। **व्याप्ति**तात्पर्यान्यतरत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकस्य व्याप्तिज्ञानजन्य-

तत्प्रमित्युपयोगित्वस्योपाधेः **सम्भवाच्च। न च शब्दो** व्याप्यत्वेन ज्ञायमानो गमक इति पक्ष एव साधनाव्यापकत्वात्। **अपि** चेदं वाक्यं भ्रमादिविशिष्टज्ञानयोरन्यतरजन्यं वाक्यार्थज्ञानजन्यवाक्यत्वादित्यनुमाय। **नायमत्र** भ्रान्तः प्रमादी वा स्वभ्यस्तवाक्यार्थत्वा**न्न प्रतारकः साधुत्वान्ना** पटुकरणकोऽवहितत्वादित्यादिना भ्रमाद्येकतरविशेषे बाधितोऽयं वक्ता स्वप्रयुक्तवाक्यार्थगोचरयथार्थज्ञानवान् भ्रमाद्यजन्यवाक्यार्थज्ञानजन्यवाक्यप्रयोजकत्वादहमिवेति वक्तृयथार्थज्ञानानुमानपूर्वक एव यथार्थवाक्यार्थप्रतीतिपरत्वनिश्चयो हेतुर्वाच्यः स च न सम्भवति। भ्रान्तेः पुरुषधर्मतया पुनः पुना रज्जुसर्पभ्रमदर्शनाच्च स्वभ्यस्तेऽपि भ्रमसम्भवेन भ्रमाद्यजन्यत्वनिश्चयासम्भवात्।

संवादिप्रवृत्तिजनकत्वादेश्च तन्निश्चायकलिङ्गस्य धियोऽपि शाब्दबोधोत्तरकालीनत्वाच्च। **तस्माद्यच्छाब्द**प्रमाप्रयोजकं व्यभिचारिव्यावृत्तं तत्स्वरूपसदेव तथा न ज्ञातम्। तथा सति तादृशस्य वाक्यार्थाव्यभिचारितया तादृशपदस्मारितत्वाल्लिङ्गादेव लोके वेदे च संसर्गसिद्धिः स्यादिति जितं वैशेषिकैरेव।

तात्पर्यटीका

यथाश्रुते साध्ये ज्ञातं कारणमिति यथाश्रुते साध्ये। ज्ञाननिष्ठकारणतायां विषयितयावच्छेदकं भवतीति साध्ये न दृष्टान्तासिद्धिरत आह **व्याप्ति**तात्पर्यान्यतरत्वरूपेति। **नून**पाधित्वौपयिकसाध्यव्यापकताग्राहकानुकूलतर्काभावान्नासावुपाधित्वौपयिकसाध्यव्यापकताग्रहकानुकूलतर्का भावान्नासावुपाधिरितित्याशङ्क्य सर्वमिदं यथार्थतात्पर्यकत्वनिश्चये सम्भवति सुघटं स एव तु न सम्भवत्युपायाभावादित्याह**ाऽपि चेति**। वाक्ये वक्त्रवच्छिन्नसामानाधिकरण्यप्रत्यासत्या विशिष्टज्ञानजन्यत्वेऽनुमीयमाने वक्तुर्वाक्यार्थज्ञानानुमानमावश्यकमिति तावतैव कृतार्थतां मन्यमानस्तदेव प्रयोगारूढमाह**ायं वक्तेति**। स्वभ्यस्तेऽपि सामान्यतो भ्रमहेतुदोषसत्तामुपपाद्य दृढतरसंस्कारविरोधित्वमप्यनुभवबाधितमित्याह **पुनः पुनरिति**।

ननु सम्वादिप्रवृत्तिजनकत्वेनैव लिङ्गेन यथार्थवाक्यार्थतात्पर्यकत्वं निश्चीयतामत आह **सम्वादीति**। **तथा सति** ज्ञायमानकरणनिष्ठतया ज्ञातोपयोगित्वे सति। तादृशस्य ज्ञातोपयोगिनः। **तादृशपदेति**। यथार्थतात्पर्यकपदेत्यर्थः। **वैशेषिकैरेवेति** साकूतोक्तिः। ये नैयायिकैर्जितास्तैरेव भवन्तो जिता **इत्याकूतम्**।

तर्कामृतम्

वृत्त्या विना शब्देन नान्वयबोधो जन्यते।

तरङ्गिणी

वृत्त्या विनेति। वृत्त्यभाव इत्यर्थः। वृत्तिभिन्नसम्बन्धेन पदानुपस्थितस्याप्यर्थस्य शाब्दबोधानुदयादिति भावः।

चषकम्

वृत्याविना वृत्यसहायेन वृत्तिग्रहाविषयेणेति यावत्। **शब्देन** घटादिपदेन। स्वसमवाय्याकाशोपस्थितौ सत्यामपि **एतेन** पदात्कथमप्यर्थोपस्थित्यभावे कथमन्वयबोधापत्तिर्व्यापाराभावादिति **परास्तम्**। **नान्वयबोधो** जन्यते इति **तद्ग्रहो**ऽप्यर्थोपस्थितिद्वारा सहकारी वाच्य इति शेषपूरणेन व्याख्येयम्। **एतेन** शब्दस्य स्वतन्त्रप्रामाण्ये शक्तिग्रहविलम्बेन विलम्बवदनुमानविधया प्रामाण्येऽपि व्याप्तिग्रहविलम्बाधीनोऽसौ विलम्ब उपपद्यते इति **परास्तम्**। शक्तिग्रहविलम्बाधीनविलम्बस्य तवापि सम्मतत्वात्। पदजन्य पदार्थोपस्थितौ सत्यामेव पदपदार्थपक्षकानुमानप्रवृत्तेः।

स च ग्रहस्तद्धर्मावच्छिन्नविशेष्यकइच्छाप्रकारकस्तद्धर्मावच्छेदेन या तत्पदजन्यबोधविषयता स्वीयतत्प्रकारतानिरूपितविशेष्यतासंसर्गको घटो घटपदशक्य इत्याकारकस्तथेति घटत्वोपलक्षिते द्रव्यपदवाच्यत्वं गृह्णतः पुंसां द्रव्यपदान्न घटत्वेन घटस्य शाब्दबोध इति **दिक्**।

तात्पर्यटीका

एतेनेत्यादिवक्ष्यमाणदोषादाह **स्वसमवायीति**। **एतेन** घटपादादाकाशोपस्थिते: सम्भवेन। **एतेन** वक्ष्यमाणदूषणेन **न चा**शुतरविनाशिनां क्रमिकाणां मेलकाभावान्नानावर्णघटितपद-प्रत्यक्षासम्भवात् कथं देवदत्तादिपदशक्तिग्रहो**ऽत एवाखण्ड**स्फोटस्यैव वाचकत्वमभ्युपगच्छन्ति **शाब्दिका** इत्याशङ्क्य पूर्व-पूर्ववर्णाध्यक्षजन्यसंस्कारसचिवान्त्यवर्णाध्यक्षेणैव पदप्रत्यक्षोपपत्ते: किं स्फोटेनेत्याशयेनाह। **स चेति**।

नन्वेवं घटपदोपस्थिते घटत्वेऽपि पदजन्यस्मृतिविषयत्वाविशेषादितर-पदार्थान्वयबोधप्रसङ्ग इत्यत आह **दिगिति**। **दिगर्थस्तु** तदंशे आश्रयतासम्बन्धावच्छिन्नबोधविषयत्वप्रकारतानिरूपितसङ्केतविषयताव-गाहिज्ञानस्यैव तदंशे पदार्थान्तरान्वयबोधोपयोगित्वान्नोक्तप्रसङ्ग इति।

तर्कामृतम्

वृत्तिर्द्विविधा[१], शक्तिर्लक्षणा च। शक्ति: घटादिपदस्य घटादौ। लक्षणा यथा, 'गङ्गायां घोष: प्रतिवसति[२]' इत्यत्र गङ्गापदार्थे प्रवाहे घोषान्वयानुपपत्त्या[३] गङ्गापदस्य तीरे लक्षणा कल्प्यते' तया वृत्त्या तीरे[४] उपस्थिते तीरे घोष: प्रतिवसतीत्यन्वयबोधो[५] भवति।

तरङ्गिणी

शक्तिरिति। शक्तिश्चेदं पदमेतदर्थप्रतीतिं जनयत्वीतीच्छाविशेष्यत्वम्। तदाश्रयत्वं शक्तत्वम्। वक्तीत्यादि कर्तृ...प्रत्याय्यते।

---

१. 'वृत्तिश्च द्विविधा' इति पाठान्तरम्।
२. 'प्रवसति' इति पाठान्तरम्।
३. 'घोपवासा' इति पाठान्तरम्।
४. 'उपस्थिते तीरे' इति पाठान्तरम्।
५. 'प्रवसतीति' पाठान्तरम्।

तद्धटकीभूतप्रतीतेर्विषयत्वरूपं कर्मत्वं उच्यत इत्यादिकर्मप्रत्ययेनेति बोध्यम्। लक्षणा च शक्यसम्बन्ध:। स चानेकविध:, गङ्गायामित्यादौ प्रवाहतीरयो: संयोग: सम्बन्ध:। अयं च सम्बन्धो न तीरत्वे इति लक्ष्यतावच्छेदके न लक्षणा। शक्तिघटकीभूतप्रतीतिनिरूपितविषयत्वं तु घटत्वादेरपीति तत्र शक्ति:।

चषकम्

शक्तिरिति। अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छेत्यर्थ:। तादृशेच्छाविषयीभूतबोधविषय- तायां येन सम्बन्धेन यद्धर्मावच्छिन्नत्वं भासते तयोरपि तत्पद शक्यत्वव्यवहार इति घटघटत्व समवायानां घटपदार्थत्वसिद्धिराश्रयतया घट इवावच्छेदकतया सम्बन्धविधया तदवच्छेदकतया च घटत्वे समवाये च बोध- विषयत्वस्येश्वरेच्छया ग्रहणादाश्रयत्वाद्युक्तनानासम्बन्धावच्छिन्नाया अपि तादृशबोधविषयत्वप्रकारताया ऐक्याच्छक्त्यैक्यप्रवाद:। **इतोऽधिक**मस्मत्कृत- शक्तिवादव्याख्यायां द्रष्टव्यमिति सर्वं समञ्जसम्।

शक्तिग्रहस्तु व्याकरणादितो धातुप्रत्ययादीनां भवति। **तदुक्तम्**–

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यत: सिद्धपदस्य वृद्धा:।'

व्यवहारात् कार्यत्वान्वितविषयकशाब्दबोधे सर्वपदानां कारणत्वेऽवगते कार्यताविषयकबोधरूपतद्व्यापकधर्मावच्छिन्नजनककार्यतोपस्थापकस्मारक-शक्तिमल्लिङादिपदज्ञानरूपकारणाभावात् कथं कोशाच्छक्तिग्रह इति तु न **युक्तम्**। प्रथमं गृहीताया अप्यानुभाविकशक्तेर्लाधवेन पश्चात् परित्यागौचित्यात्। **अन्वयानुपपत्येति। नन्वेवं** घोषपदस्य मत्स्ये लक्षणयाऽप्यन्वयोपपत्तौ क्वचिद्घोषपदस्यैव क्वचिच्च गङ्गादिपदस्यैव लक्षणेति नियमो न **स्यादिति चेन्न** विवक्षितान्वयानुपपत्येति। **लक्षणा** शक्यसम्बन्ध रूपा। **कल्प्यते** तीरं प्रवाहसम्बन्धीति गृह्यते। **यद्यपि** लक्षणग्रहहेतुभूता तीरोपस्थिति: प्रागप्यस्ति **तथापि** सा न शाब्दबोधोपयोगिनी पदाजन्यत्वादित्यभिप्रेत्याह। **तयावृत्येति। उपस्थिते** तीरं गङ्गयां घोष इत्यत्र तीरं गङ्गापदार्थ इत्युपस्थिते तीरे। **न च**

तच्छाब्दबोधे तच्छक्तपदज्ञानं कारणमिति नियमः। **किन्तु** शक्त्या लक्षणया वेतरपदोपस्थाप्येनार्थेनान्वितस्वशक्यार्थबोधे तदर्थशक्तपदज्ञानमित्यस्तु लाघवात्।

तच्छाब्दधीजनकतावच्छेदकीभूतानुभाविकी या पूर्वोक्त-स्मारकशक्त्यतिरिक्ता शक्तिस्तद्वत्त्वं वाचकत्वं वदतां मीमांसकानां लाक्षणिकेऽतिप्रसङ्गभिया तस्यानुभावकत्वमभिमतम्। **अस्माकं** तु कुमतिः पशुरित्यादि सर्वलाक्षणिकस्थलेऽप्यन्वयबोधात्तादृशार्थबोधे तद्वृत्तपदज्ञानमेव कारणमिति तु **नव्याः**। **अन्वय बोध इति**। **न च** गङ्गापदात्तीरे बुद्धे सदेतद्विषयाया गङ्गापदात्तीरं बोद्धव्यमितीश्वरेच्छायास्**तीरेऽपि सत्त्वात्तत्रापि** शक्तिरेवेति **वाच्यम्**। ज्ञाने विषयितारूपघटसम्बन्धसत्त्वेऽपि घटासत्त्ववद्गङ्गापदसम्बन्धस्येश्वरेच्छारूपस्य तीरे सत्त्वेऽपि गङ्गापदस्यासत्त्वात्। **यद्वा** नीरभिन्नतीरादिनिष्ठेच्छीयविशेष्यतायां गङ्गापदजन्य-बोधविषयत्वप्रकारतानिरूपितत्वे गङ्गापदजन्यबोधविषयतात्वावच्छिन्न-प्रकारतानिरूपितत्वानङ्गीकारन्नीरभिन्ने गङ्गापदवाच्यत्वव्यवहाराभावादिति तत्र लक्षणाभ्युपगमस्यावश्यकत्वात्।

तात्पर्यटीका

नन्वाश्रयतासम्बन्धावच्छिन्नबोधविषयत्वाभावे घटत्वेऽवगतेऽवच्छेदकता-सम्बन्धेनापि तत्र बोधविषयत्वग्रहासम्भवस्तादृशशक्तिग्रहस्याप्याश्रयतासंसर्ग-कत्वादत आहे**तोधिकमिति**। **तद्यथा** घटत्वविशेष्यतानिरूपिताश्रयत्व-सांसर्गिकविषयतानिरूपितबोधविषयत्वप्रकारताशालिग्रहं प्रत्येव तस्य विरोधित्वं निरुक्तशक्तिग्रहस्यैवम्विधविषयत्वाभावान्नोक्तावगभमप्रतिबध्यत्वमिति।

नन्वन्वयानुपपत्तिर्यदि लक्षणाबीजं तदा तीरे घोष इत्यन्वयपरेऽपि वाक्ये घोषपदलक्षणयाप्यन्वयोपपत्तेर्गङ्गापदस्यैव लक्षणेति नियमो न स्यादित्याशङ्कते। **नन्विति**। **क्वचिन्मत्स्या**न्वयपरे। **क्वचिच्च** तीराऽन्वयपरे च। **तीरमिति**। यदि तु गङ्गातीरत्वेन प्रवाहसम्बन्धोऽवगतस्तदा तथैव तीरभानमत एव लक्ष्यतावच्छेदकेन लक्षणावच्छेदकत्वेनैव तद्भानोपपत्तेः परन्त्वेवं रीत्या शक्यतावच्छेदके शक्तिरपि न स्यादिति चेन्मास्त्वत एव

कम्बुग्रीवादिमत्त्वावच्छिन्नशक्तिभ्रमाच्छक्यस्यैवानवगाही शाब्दबोधो वानुभूयत इति नव्यतराः।

नव्यमतमाह **तच्छाब्दधीति**। **शक्तिरिति**। सा च वह्नौ दाहानुकूलेव शाब्दबोधजनकतावच्छेदिका पदेऽपि तेषांमते पदार्थान्तरमित्यवधेयम्। **मीमांसकानामिति** वैयाकरणानामप्युपलक्षणम्। आनुभाविक्याः शक्तेरेव तेषां वाक्यस्फोट पदार्थतयाभिमतत्वात्त**दुक्तं** सिद्धो वाक्यस्फोटः। पदसमुदायरूपवाक्यज्ञान कार्यकारणभावरूपवाक्यशक्तिज्ञानस्यापि शाब्दे हेतुतायास्त्वयाप्यभ्युपगमा**दिति**। **कुमतिरिति**। **यदि** च मतिपदलाक्षणिकार्थस्य कुत्सितमति-सम्बन्धिनिष्ठसादृश्यप्रतियोगिनः पशुपदशक्यार्थेऽभेदेनान्वयः स्वीक्रियते **तदा** धूमादिति हेत्ववयवस्य सर्वलाक्षणिकत्वं **द्रष्टव्यम्** । **तत्राप्युक्तरीत्यादरे** तु पञ्चम्यन्तलाक्षिणिकानुमितिपरशब्दत्वमति हेत्ववयवलक्षणासङ्गतिः। **तादृशार्थबोधे** वृत्तिविषयार्थशाब्दबोधे। **नन्वेवं** तदर्थनिष्ठशक्तिनिरूपकत्वं तदर्थवाचकत्वं भवदमिमतमपि गङ्गाभिदे लाक्षणिकेऽप्यस्तीति शङ्कते। **न चेति** सम्बन्धस्य सत्त्वे कथं सम्बन्ध्यसत्त्व- मित्याशङ्क्याह **यद्वेति**।

तर्कामृतम्

गौणी वृत्तिरपि लक्षणैव, यथा 'अग्निर्माणवकः', 'गौर्वाहीकः'। अत्र लक्षणया अग्न्यादिसादृश्यं प्रतीयते।

तरङ्गिणी

मीमांसकास्तु अग्निर्माणवके भेदेनान्वेतीत्याहुः। तन्मतं निराकर्तुमाह–गौणीवृत्तिरपीति। ईदृशपरम्पराया अपि शक्यसम्बन्धतया लक्षणयैव निर्वाहेऽतिरिक्तवृत्तिकल्पनं व्यर्थमिति भावः। एवमेव द्विरेफादिसमासेऽपि लक्षित लक्षणा नातिरिक्ता। तद्घटकपदशक्यरेफद्वयस्य स्वघटितपद-बोध्यत्वरूपपरम्परासम्बन्धस्य भ्रमरे सत्वाल्लक्षणयैव तद्बोधात्। नच गङ्गायां घोष इत्यादौ शैत्यपावनत्वादिप्रतीत्यर्थं व्यञ्जनाख्यवृत्त्यन्तर- मङ्गीकरणीयमिति

वाच्यम्। तस्यापि आनुमानिकादिबोधेनैवोपपत्तेरित्यन्यत्र विस्तरः। **अग्न्यादिसादृश्यमिति।** अग्निवृत्तिगुणसजातीयगुणवत्त्वमित्यर्थः। प्रकारतयेत्यादिः। तथा चाग्निसदृशेऽग्निपदस्य लक्षणेत्यर्थः। अन्यथा नामार्थयोर्भेदान्वयस्याव्युत्पन्नतयासङ्गतेः। वस्तुतस्तेजस्वित्वविशिष्टे लक्षणा। अत एवाग्निरिव माणवक इत्यतो नाविशेषो लक्षणायाम्। अत एव च वृत्तेर्वृत्तिजन्यबोधविषयत्वमदृष्टचरमिति प्रत्युक्तम्। योगार्थेन अवयववृत्त्या पच्धातोः पाके कृतः कर्तरि शक्तिरिति भावः।

चषकम्

केचित्तु गौर्वाहीक इत्यत्र गोपदेन तद्वृत्तिगुणो लक्ष्यते स च भेदेनैव वाहीकेऽन्वेति तथा च गुण पुरस्कृता गौणीवृत्तिरतिरिक्तैव स्वबोध्यसम्बन्धरूपा। **तदुक्तम्**–

अभिधेयाविनाभूत प्रतीतिर्लक्षणोच्यते।
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता।। इति।

प्रतीतिरिति। तद्धेतुः सम्बन्धो लक्षणेति **तु युक्तम्**। लक्ष्यमाणेत्यादेरपि प्रतीयमानैर्गुणैर्योगश्चाश्रयाश्रयिभाव इत्यर्थः। स चाश्रयाश्रयिभावोऽविनाभावतावच्छेदकरूपेणेति नायोग्यता अविनाभावोऽपि सम्बन्धमात्रं तत एव। **न च** स्वबोध्यसम्बन्धो यत्र तत्रापि स्वशक्यवृत्तिगुणसम्बन्धरूपसादृश्यरूपा निरुक्तलक्षणैवेति **वाच्यम्**। अनेकपदार्थघटितपरम्परायाः सम्बन्धत्वासिद्ध्या लक्षणाघटकत्वासिद्धेरिति **वदन्ति** तन्मतं दूषयति। **गौणीति**। **लक्षणैवेति**। सामानविभक्तिकनामार्थयोरभेदान्वयस्य व्युत्पन्नतया गुणिनि लक्षणाया वक्तव्यत्वान्मुख्यार्थस्य गुणघटित एव तत्र सम्बन्ध इत्यसौ गौणीत्युच्यते **तथा** च द्रव्यपरिच्छेदद्वारा गुणानां साधनवत्त्वं वदतां परम्पराया अपि सम्बन्धतया क्लृप्तेनैव निर्वाहान्नातिरिक्तेतिं भावः।

एतेन द्विरेफपदेन भ्रमरपदं लक्ष्यते तेन च भ्रमर उच्यते इति लक्षितलक्षणाप्यतिरिक्ता। **नौकायां** प्रदर्शितनानाभेदाप्यसौ स्वबोध्यवाच्य-

त्वरूपैवेत्यपि मतम**पास्तम्**। उक्त युक्त्या वाच्यवाचकघटित-परम्परासम्बन्धरूपत्वात्। **यद्यपि** मर्मरभ्राष्ट्रादावपि द्विरेफपदस्यैवं लक्षणा सम्भवति **तथाप्यसौ** न प्रसिद्धिमूलेति **ध्येयम्**।

तात्पर्यटीका

गोगतमान्द्यादेर्वाहीके बाधादाहा**विनाभावतावच्छेदकरूपेणेति**। तच्च रूपं मान्द्यत्वादिकमेव। **सम्बन्ध मात्रमिति**। **मात्रपदेन** व्याप्तिव्यवच्छेदोऽ-**न्यथा**ऽयोग्यताया दुर्वारत्वादित्याह **तत एवेति**। अयोग्यत्वपरिहारायैवेत्यर्थः। गौण्या वृत्तेर्लक्षणात्वमेवास्त्विति शङ्कते **न चेति**। **गुणानामिति**। पिङ्गाक्ष्या गवा सोमं क्रीणातीत्यादौ क्रयसाधनत्वस्यामूर्त्ते बाधादित्याशयः। पिङ्गत्वादिना स्वाश्रयाक्षिगोलकारब्धत्वरूपपरम्परयैव गोः परिच्छेदादिति भावः।

तेन च भ्रमर उच्यत इति। शक्त्या प्रतिपाद्यत इत्यर्थः। अत एवात्रिपुत्रपदं न द्विरेफपदलक्षितलक्षणाविषयोऽ**न्यथा** मर्मर्धरित्रीधरपदस्यापि त्रिरेफादिपदलक्षितलक्षणाविषयत्वापत्तेः। **एवं** नयनपदस्य स्ववाच्यचक्षुर्वा-चकनेत्रपदवाच्यत्वरूपपरम्परासम्बन्धरूपापि वस्त्रे लक्षितलक्षणैव। **एवमेव** पङ्क्तिरथपदस्य स्वघटकपूर्वपदवाच्यवाचकपदपूर्वपदकस्वघटकोत्तरपदघटित-समुदायरूपदशरथपदवाच्यत्वमपि दशरथ इत्यभिप्रेत्याह **नौकायामिति**। सर्वसाधारणं लक्षितलक्षणास्वरूपं दर्शयति। **उक्तयुक्त्येति**। **मर्मर**भ्राष्ट्रादावित्यादिना कर्बुरशर्करादिपरिग्रहः। **न प्रसिद्धिमूलेति**। तथा च निषिद्धत्वान्न शास्त्रे समुदाहर्त्तुं साम्प्रतमिति भावः। पदं चतुर्विधमित्येतावतैव निर्वाहे शक्तमिति विशेषणानर्थक्यमाशङ्क्याह **पदार्थोपस्थितिरूपेति**। तथा च पदसंस्कारविशेषोपयोगितया यथा सुप्तिङन्तमिति परिभाषारम्भस्तथा गुणादिपदवत् पदपदस्यापि परिभाषान्तरारम्भस्तेन शक्तं पदमुच्यते पदं चतुर्विधं भवतीत्युक्तं भवतीति भावः।

तर्कामृतम्

शक्तं पदं चतुर्विधम्–यौगिकम्, रूढम्, योगरूढम्, यौगिकरूढं च[1]। आद्यं यथा, पाचकादिपदं योगार्थे[2] पाककर्त्तरि शक्तम्।

तरङ्गिणी

शक्तमिति। न चावयवशक्त्यैव तादृशबोधाद्विशिष्टशक्तिकल्पनमनर्थकम्, अन्यथा समासेऽपि शक्तिकल्पनापत्तेरिति वाच्यम्। योगं प्रति निमित्तीकृत्य पाककृतिप्रयोज्यवृत्तिभागिपुरुषविशेषे पाकानुकूलकृतिमत्त्वेन शक्तेः स्वीकारात्।

चषकम्

पदार्थोपस्थितिरूपव्यापारघटनोपयोगिपदं निरूपयति। **शक्तमिति** शक्तिसहकारेणार्थोपस्थापकमित्यर्थः। शक्तिग्रहं विना शक्यसम्बन्ध ग्रहायोगाल्लाक्षणिकस्यापि सङ्ग्रहः **न च** केवलयौगिकस्य शक्त्यभावात् कथमेतदिति **वाच्यम्।** स्वस्य स्वघटकस्य वा शक्तेर्विवक्षितत्वादत एव नाम चतुर्विधमित्येवोक्तमन्[3]यत्रानर्थकानामप्यन्त[4]:स्वरूपार्थकत्वान्नामत्वम्।

कथं तर्ह्यपचत्यपि राज्ञः पाचको गच्छतीति **प्रयोगः कथं** वा नायमिदानीं राज्ञः पाचक इत्यपहृतायामेव वृत्तौ प्रयुज्यते इति **चेत्** क्वचित्पाकप्रयुक्त-वृत्तिभागित्वेन लक्षणया समुदाये रूढिकल्पनामपेक्ष्यावयवस्य लक्षणाया एवौचित्यात्त**दुक्त**मुक्तादन्येन रूपेण ज्ञाते भवति लक्षणेति। **यौगिकमिति।** योगोऽवयवशक्तिस्तन्मात्रेणार्थप्रतिपादकमित्यर्थः। **रूढमिति।** रूढिःसमुदाय-शक्तिस्तन्मात्रेणार्थप्रतिपादकमित्यर्थः। **योगरूढमिति।** योगश्च रूढिश्च

---

१. 'चेति' पाठान्तरम्।

२. 'योगार्थो न पाचकर्तरि' इति पाठान्तरम्।

३. शब्दशक्तिप्रकाशे।

४. हुम्फटादीनाम्।

ताभ्यामुभाभ्यामर्थप्रतिपादकं परस्परसामानाधिकरण्यापन्नाभ्यामेकार्थप्रतिपादकमिति यावत्। **यौगिकरूढमिति**। योगमात्रेणार्थप्रतिपादकं यौगिकं रूढिमात्रेणार्थप्रतिपादकं रूढं यौगिकञ्च तद्रूढञ्चेति व्युत्पत्या परस्परवैयधिकरण्यापन्नाभ्यामुभाभ्यामर्थद्वयप्रतिपादनयोग्यमित्यर्थः। **शक्तमिति**। **यथा** चैतत्तथोपपादितमधस्तात्।

तात्पर्यटीका

तर्हि पाचकपदस्य केवलयौगिकत्वे हि। **अपचत्यपीति**। धेन्वादिपदे धानकर्मत्ववद्वर्त्तमानत्वं प्रकृतप्रयोगोपाधिरित्याशयः। केवलगोत्वावच्छिन्नपरधेनुपदात्तु लक्षणया बोध आकृत्यवच्छिन्नमात्रपरगोपदादिव तन्मात्रस्य। **यथा** वेदे पिष्ठकमय्यो गाव इति। **यथा** वा लोकेऽस्य मृत्तिकामयूरस्येत्यादि। उपलक्षणपाककर्तृत्वाबाधात् पाचको गच्छतीति प्रयोगोपपत्तेराह। **कथं वेति**। अस्तु तर्हि वृत्तिभागित्वं रूढ्यर्थतावच्छेदकमेवेत्यत आह **समुदाय इति**। **ननु** पाचकपदस्य पदद्वयरूपस्य कथं शक्तत्वमत आह **यथा चैत दिति**। तथा च स्वघटकपदवृत्या शक्तत्वं सम्भवत्येवेति भावः। **यदुक्तवान्** योगार्थेनेति।

तर्कामृतम्

द्वितीयं यथा, विप्रादिपदं रूढ्या[१] ब्राह्मणवाचकम्। तृतीयं यथा, पङ्कजादिपदं योगरूढ्या पङ्कजनिकर्तृत्वेन पद्मत्वेन च पद्मवाचकम्। चतुर्थं यथा, उद्भिदादिपदं[२] यौगिकं तरुगुल्मादेः रूढम्, यागविशेषस्य वाचकम्।

लक्षणा द्विविधा, जहत्स्वार्थाऽजहत्स्वार्था च। आद्या यथा, 'गङ्गायां घोषः' इत्यादौ। द्वितीया यथा, 'सर्वे छत्रिणो यान्ति' इत्यादौ। अत्र छत्रिणः तदितरस्यापि गमनान्वयः।

---

१. 'रुढं' इति पाठान्तरम्।

२. 'उद्भितपदम्' इति पाठान्तरम्।

तरङ्गिणी

विप्रादिपदमिति। योगार्थप्रतीतेरितिभाव:। **पङ्कजादिपदमिति।** केवलयोगात्पङ्के जातं पङ्कजमितिव्युत्पत्त्या पङ्काधिकरणकोत्पत्त्याश्रयत्वरूपपङ्कजनिकर्तृत्वस्य कीटादावतिप्रसङ्गेन रूढिमात्रादरे च स्थलपद्मेऽतिप्रसङ्गेनोभयादर:। कर्दमजादिपदेभ्यस्तदर्थाप्रतीतेस्तादृशसमुदायात्तदर्थप्रतीतेरन्वयव्यतिरेकाभ्यां समुदायशक्तेरावश्यकतेति भाव:। आदिना गिरिशगिरिजादिपदानां सङ्ग्रह:। योगरूढिस्थले योगार्थाविनाभूतो रूढ्यर्थ:। यौगिकरूढस्थले तद्विनाभूत इति विशेष:। **उद्भित्पदं यौगिकमिति।** उद्भेदनकर्तृत्वयोगेन खनित्रादिबोधकम्। **रूढ्याङ्कुरेति।** अङ्कुरेऽपीदृशसत्त्वे तु रूढ्या यागविशेषवाचकमिति बोध्यम्। एवं मण्डपपदमपि योगेन मण्डपानकर्तारं रूढ्या वितानं बोधयति। **जहत्स्वार्थेत्यादि।** जहत् प्रकृतवाक्यार्थप्रवेशं त्यजन् स्वार्थ: शक्यार्थो यस्यां सा। एवमन्यत्रापि। **गङ्गायां घोष इति।** अत्र तीरे घोष इत्यन्वयबोधो गङ्गापदार्थस्याघटकत्वादिति भाव:।

चषकम्

ब्राह्मणवाचकमिति। ब्राह्मणत्वं जातिविशेषस्तावद्गुणविशेषजनकतावच्छेदकतया सिद्ध्यंस्तदपत्येऽपि तथा व्यवहारादभ्युपगम्यते**ऽत एव** ब्राह्मणीजन्यत्वे सति ब्राह्मणजन्यत्वं ब्राह्मणलक्षणं ध्रुवम्। **न च** क्षत्रियब्राह्मणे साङ्र्यमिति **वाच्यम्**। विश्वामित्रस्य तप:साध्यावयवोपचयापचयाभ्यां भिन्ने शरीरद्वये ब्राह्मणक्षत्रियत्वयोर्व्यवस्थयाप्युपपत्ते:। **गुणविशेषवानेव** मुख्यो ब्राह्मणस्तदपत्ये तत्सन्ततिनिबन्धनो भाक्त एव तथा व्यवहार इत्यपि **केचित्तेषां** मतेऽष्टवर्षं ब्राह्मणमुपनयीतेत्यादिविधिविषयत्वमाधुनिकब्राह्मणानां दुरुपपादमिति न **किञ्चिदेतत्। पद्मत्वेन चेति। न च** लक्षणानियमेन प्रतीते:। **न च** केवलयोगशक्त्या कुमुदेऽपि कुतो न प्रयोग इति **वाच्यम्**। एतत्

सामग्रीप्राबल्यात्। **तथा हि। एक** पदोपस्थितयोर्द्वयोर्झटित्यन्वयबोधे वृत्त एवापरपदार्थान्वयोपगमात् **समानपद**श्रुत्यपेक्षया समानाभिधानश्रुतेर्बलीयस्त्वात्। **तदुक्तम्। 'व्यक्तिवचनानां सन्निहितविशेषपरत्वनियमादि'ति।** व्यक्त्या विवेचनेनावयवशक्त्येति यावदुच्यतेऽर्थोऽनेनेतिवचनं तेषां सन्निहितो बलवत्या समानाभिधानादिश्रुत्या प्रतिपादितो विशेषो व्यावर्त्तकमर्थान्तरं परस्तात्पर्यविषयो येषां तेषां भावस्तत्वमिति तस्यार्थः। **यौगिकमिति।** प्रकृतेऽर्थान्तरेऽभेदस्य बाधेनाऽनन्वयादिति भावः।। **जहत्स्वार्थेति।** मुख्या वृत्तिधर्मेण या लक्षणा सेत्यर्थः। **इयमेव** लक्षणलक्षणेत्यन्यैरुच्यते। **अजहत्स्वार्थेति।** मुख्यलक्ष्यसाधारणधर्मेण या लक्षणा सेत्यर्थः। इयमेवोपादानलक्षणेत्यन्यैरुच्यते। **छत्रिण इत्यादि। अत्र** चैकसार्थवाहिनि छत्रीति वाक्यलक्षणावादि-मीमांसकमतेनाजहत्स्वार्थलक्षणोक्ता।

तात्पर्यटीका

अत एव जातिविशेषस्वीकारादेव। **ध्रुवमिति।** जातिघटितलक्षणस्य विश्वामित्रेऽपि सम्भवादिति भावः। **व्यवस्थयापीति। नन्वेवं** गाधिपुत्रत्वं तस्य न स्यादिति **चेन्न।** अवयवानुवृत्तेस्तत्राप्यविशेषात्। **अपिना** गुणजातिवद्द्रव्यजात्योरपि साङ्कर्यं न दोष इति वास्त्विति **सूचितम्। गुणविशेषवानिति।**

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम्।। इति।

चोक्ता गुण इत्यर्थः। **दुरुपपादमिति गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति न्याया**दिति भावः। केवलयौगिकार्थबोधे न स्यादिति प्राचां मते परितुष्यन्नव्यानां मतमनुसरन्नन्यथा प्राबल्यमुपपादयति। **तथाहीति।**

समानपदश्रुत्यपेक्षयेति। शक्तं पदमभिधानमित्युच्यते। सुप्तिङन्तं पदमित्युच्यते एकतिङ्वाक्यमित्युच्यते इति विवेकः। **अन्यैरालङ्कारिकैः।** स्वमते प्रकृतिप्रत्ययसमुदायरूपवाक्यलक्षणानङ्गीकारादुदाहरणासङ्गति-माशङ्क्याहा**त्र चेति। एक**सार्थवाहिन्येकसमुदाय प्रविष्टे।

चषकम्

स्वमते तु काकेभ्यो दधि रक्षतामित्यत्र दध्युपघातकसामान्यपरकाकपद एवैषा। **प्रकृते** तु सर्वपदोपसन्दानेन छत्रपदस्य जहत्स्वार्थयापेक्षाबुद्धिविशेषविषयत्वरूपैकसार्थे लक्षणयेत्रन्तेन च तेनैकसार्थवत्त्वेन योगार्थेनछत्र्यछत्र्युभयसाधारणेन रूपेण द्वयोरप्युपस्थितत्वादित्य**वधेयम्**। **अत्रालङ्कारिकाः**। स्वायत्ते शब्दप्रयोगे किमित्यनन्विताभिधानमनयैव प्रयोजनजिज्ञासया पावनत्वप्रतिपत्तये **इति चेत्तत्र** वृत्तिं विना प्रतिपत्तेरसम्भवाद्व्यञ्जनावृत्तिरावश्यकी।

अत एव–

बलानां श्रियं हृत्वा वारिवाहैः सहानिशम्।
तिष्ठन्ति चपला यत्र स कालः समुपागतः॥

इत्यत्राशक्तानां द्रव्यमपहृत्य पुंश्चल्यो जलवाहकैः समं रमन्ते इत्यस्यातात्पर्यविषयस्य रूढ्यनालिङ्गितस्यार्थान्तरस्य प्रतीतिः। **सा चार्थद्वारभूतापि। भ्रम धार्मिक विस्रब्ध सोऽद्य श्वामारितस्तेन। गोदावरीतीरनिकुञ्जप्रतिष्ठितनिसर्गदृप्तसिंहेनेत्यादौ** प्रतिभाजुषां सहृदयानां वक्तृबोद्धव्ययोः सङ्केतकरणसमानशीलयोर्वैशिष्ट्यस्य स्फूर्तौ सिंहप्रतीत्यनन्तरं श्वभीरुभ्रमणायोग्यत्वस्य गोदातीरे प्रत्ययादिति। **तत्र नैयायिकाः**। रूढ्यनालिङ्गितस्यार्थस्य केवलयोगेन प्रतीत्यसम्भवेऽपि लक्षणासाम्राज्यात्।

तात्पर्यटीका

छत्रिण इति बहुवचनेनैव सर्वछत्र्युपस्थितौ सम्भवन्त्यां सर्वपदमछत्रिबोधायैवेति तात्पर्यं गृह्यत इति सर्वपदोपसन्दानेनैकसार्थे लक्षणेत्युक्तमिति भावः। **अनयैव** प्रयोजनजिज्ञासयेति। मुख्यशब्देन गौड़ार्थप्रतिपादनं मुख्यधर्मबोधपरमित्यवगमादिति भावः। **तत्र वृत्तिं विना** शाब्दबोधोपयोगिपदार्थोपस्थापकसम्बन्धं विना **व्यञ्जनावृत्तिरावश्यकीति**। **प्रतिभावासनो**पस्कृततत्तत्पदपदार्थज्ञानोद्बुद्धसंस्कारविषयसम्बन्धाश्रयत्वरूपा–

प्रतिभोपादानाद्ध्रेषाकरश्चन्द्र इत्यत्र दोषाणामाकरस्य चास्फूर्तौ न व्यञ्जना। **तथा**गतोऽस्तमर्क इत्यत्राभिसारिका पणिकानामभिसरणापसरणरूपैकैकार्थ-व्यक्तिस्तत्तद्वासनावासितानामेवेति **वासनोपादानम्**। **स च** सम्बन्धः **क्वचिच्छक्या** व्यभिचरितत्वादिर्**यथा गङ्गायां घोष** इत्यादिलक्षणामूलध्वनौ पावनत्वे **क्वचिच्छक्यान्तर**निरूपितत्वादि **यथा** सार्वभौमोऽयमिति शब्दशक्तिमूलध्वनौ दिग्राजोपमायां **क्वचित्**प्रस्तुतेऽप्यबाधिताश्रयाश्रयिभावादि **यथा** चकोराक्षीत्याद्यर्थशक्तिमूलध्वनौ लौहित्ये इति **दिक्**।

यद्यपि वारिवाहादिशब्दानां योगेन जलवाहकपुरुषबोधसम्भव**स्तथापि** पुंश्चल्यां चपलताशब्दस्य तदभावाद्व्यञ्जनावृत्तित एव तद्धीरित्यभिप्रेत्या**हात एवेति**। **वस्तुतो रूढिर्योगमपहतीति न्याया**त्तत्रापि व्यञ्जनैवेत्या-लङ्कारिकाणामाशयः। **अतात्पर्यविषयस्येत्यनेन** लक्षणानवसरो दर्शितः। योगमात्रानवसरं दर्शयति रूढ्यनालिङ्गितस्ययेति। शुनः स्पर्शभीत्या ग्रामे पुष्पावचयं परित्यज्य सङ्केतस्थाने व्रजन्तमसमानशीलं पुरुषं निवर्त्तयन्तीप्राह **भ्रमेति**। स यतो भीत्या दूरे व्रजति। **प्रतिभाजुषां नवनवोन्मेषशालिबुद्धिमताम्। सहृदयानां काव्यभावनापरिपक्वबुद्धीनाम्। वक्तृ**बोद्धव्ययोरित्यादिवक्तरि सङ्केतकरणवैशिष्ट्यं बोद्धव्येऽसमानशील-वैशिष्ट्यमिति बोध्यम्। **प्रतीत्यसम्भवेऽपीति**। **अत** एवेशानो भूतभव्यस्येत्यत्रेशानशब्देनेश्वर एव प्रतिपाद्यो न जीव इत्यभिप्रेत्यैव शब्दादेव प्रमित इति सिद्धान्तितं **बादरायणचरणैः**। **साम्राज्या**द्रूढिज्ञाना-प्रतिबद्धबुद्धिकत्वात्।

चषकम्

तदुक्तम्। भाक्तमार्गस्ततोऽन्य **इति**। **मार्गो** मार्गणं प्रतीतिरिति **यावत्तेन** शाक्तप्रतीत्यन्या भाक्तप्रतीतिर्न तु वैयञ्जनिकीति **तस्यार्थः। पावनत्व**प्रतीतिस्तु विशिष्टलक्षणयाप्युपपन्ना। **शुद्धलक्षणयैवा**नुपपत्तिपरिहारे न विशिष्टे साऽस्तीति **चेद्यष्टीः** प्रवेशयेत्यत्र का गतिः। **अतात्पर्यविशेषस्य** त्वर्थस्य शाब्दोऽन्वयबोधः **किन्त्वसंसर्गाग्रहमात्रं** मानसं वेत्यन्यदेतत्। **लिङ्गज**लैङ्गिकबुद्ध्यापि

वाच्यार्थवैयञ्जनिकी बुद्धिर्गतार्थेति। **गालि**प्रदानादेरिवेतोऽपि तथा तात्पर्यमुन्नीयते। **न त्वन्वयबोधो**ऽनुमितिर्वा बाधे व्यभिचारपक्षधर्मतयोः सन्देहे वाऽसम्भवात्। तत्रैव तैर्व्यञ्जनोल्लासाभ्युपगमात्। **यदुक्तो** योगः फलेन नो इति तु **वयं ब्रूमः**।

एतेन विद्वन्मानसहंसेत्यादौ श्लिष्टपरम्परितरूपके मुख्यहंसस्यैवाहार्याभेदान्वयबोधः शाब्दो वक्तुमुचितः स च वैयञ्जनिक एव। **सदृशलक्षणायां** तु सादृश्यबुद्धौ साधारणधर्मज्ञानं हेतुस्तस्मिंश्च मानसवासित्वग्रहेऽनेकार्थोपस्थितिरूपश्लेषस्तत्रानेकार्थतात्पर्यज्ञानं तत्र राजहंससादृश्यधीरित्यन्योन्याश्रय इति **मतमपास्तम्**। **यदि** पुनरानुभविको लोकानां स्वरसवाही शब्दादमुमर्थं प्रत्येमीत्यनुभव**स्तदा** बाधबुद्ध्यप्रतिबध्या वैयञ्जनिकीबुद्धिर्गीर्वाणगुरूणामप्यशक्यवारणेति व्यञ्जनासिद्धिरप्रत्यूहैवेति **मन्तव्यम्**।

तात्पर्यटीका

उपपन्नेति। तथा च पावनत्वप्रतीत्यन्यथानुपपत्यापि न व्यञ्जना सिद्ध्यतीत्याशयः। स्मृत्यधिकरणपूर्वपक्षरीत्याशङ्कते। **शुद्धेति**। **का गतिरिति** प्रतिवाद्युत्तरं तात्पर्यविषयान्वयानुपपत्तिश्चेन्ममापि तुल्यमित्यभिप्राय**गर्भम्**। **अतात्पर्यविषयस्येति** तत एव न तत्र लक्षणेत्याशयः। **किन्त्विति** पदोपस्थितयोरर्थयोरिति शेषः। शब्दप्रभवान्वयविषयकबुद्धिविशेषस्यानुभविकत्वे त्वाह। **मानसं वेति**। **अन्यदेतदिति**। उभयथाऽपि न व्यञ्जनेत्याशयः। शब्दव्यञ्जनां निरस्यार्थव्यञ्जनां निरस्यति। **लिङ्गजलैङ्गिकबुद्ध्यापीति**। गोदातीरं श्वभीरुभ्रमणायोग्यं सिंहवत्त्वादिति बुद्ध्यापीत्यर्थः। **अपिना**ऽभ्युपगमवादोऽयमिति सूचितं **तद्बीजं** त्वनुपदमेव मतान्तरे प्रकटीकरिष्यति। **गालिप्रदानादेरिवेति**। **आदिना** स्तुतिपठनपरिग्रहः। तत्रापि बाधेन शाब्दबोधासम्भवा**द्यत्रापि** न बाधस्तत्रापि प्रतिपाद्यस्य क्रोधादेरुदयेन तथाविधं वक्तृतात्पर्योन्नयनमवश्याभ्युपेयमर्थस्य निर्ज्ञातत्वेन तात्पर्योन्नयनद्वारैव शब्दस्य क्रोधाद्यारम्भकत्वादिति भावः। **इति**शब्दो मध्यमणिन्यायेनोभयान्वयीति न न्यूनपदत्व**मुद्भावनार्हं**।

एतेन बाधितार्थगोचरतात्पर्योन्यनसम्भवेन। **श्लिष्टपरम्परितरूपक इति।** श्लिष्टं श्लेषोत्थापितं परम्परितं रूपकान्तराङ्गकं रूपकं यत्र तत्रेत्यर्थः। **वैयञ्जनिक एवेति।** अन्यथा शब्दादाहार्यबोधानुपपत्तेरिति भावः। अस्तु तर्हि हंससदृशान्वयबोध एव तत्रेत्यत आह **सदृशलक्षणायां त्विति।** सादृश्यस्यातिरिक्तपदार्थत्वमभिप्रेत्याह **सादृश्यबुद्धावित्यादि। अन्योऽन्याश्रय इति।** सादृश्यसाधारणधर्मयोर्ज्ञप्तावन्योन्याश्रय इत्यर्थः। आहार्यप्रत्ययस्य वस्त्वसाधकत्वात् **स्वरसवाहीति।** अनाहार्य इत्यर्थः। **लोकानां** शब्दादमुमर्थं प्रत्येमीत्यनुभवो यदि पुनरानुभविक इत्यन्वयोऽशाब्दप्रतीतौ शब्दादिति पञ्चम्याः प्रयोज्यत्वार्थकत्वस्यापि सम्भवादानुभविक **इति** शब्दजन्यत्वप्रकारकप्रत्यक्षसिद्ध इत्यर्थः। शब्दजन्यत्वावगाहिप्रत्यक्षं विवादसम्भवा**द्यदि** पुनरिति।

तर्कामृतम्

अथ शाब्दबोधप्रक्रिया—'देवदत्तो ग्रामं गच्छति' इत्यत्र ग्रामकर्मक-गमनजनक-वर्तमानकृतिमानित्यन्वयबोधः।[1] द्वितीयाया अर्थः कर्मत्वम्, धातोर्गमनम्, जनकत्वं संसर्गमर्यादालभ्यम्, लटो वर्त्तमानत्वम्, आख्यातस्य कृतिः, तत्सम्बन्धः[2] संसर्गमर्यादालभ्यः। यत्र कर्त्तरि कृतेर्बाधः तत्र आख्यातस्य[3] व्यापारादौ लक्षणा,

तरङ्गिणी

धातोर्गमनम् अर्थ इत्यनेनान्वयि। संसर्गमर्यादा समभिव्याहारविशेषः। **लट इति।** लट्त्वावच्छिन्नस्येत्यर्थः। लट्त्वेन वर्तमानत्वे शक्तेः। आख्यातस्य तत्तदवच्छिन्नस्य आख्यातत्वेन कृतौ शक्तेरिति भावः। अन्यथा लट एवाख्यातत्वेन भेदेनोपादानस्यानुपपत्तिः। तत्सम्बन्धः समवायोऽवच्छेदकत्वं

---

१. 'कृतिमान् देवदत्त' इति पाठान्तरम्।
२. 'तत्संसर्गः' इति पाठान्तरम्।
३. 'आख्यातस्य' इति नास्ति।

वा। चैत्रादिपदानां शरीरवाचकत्वेऽवच्छेदकत्वम्। तदवच्छिन्नात्मवाचित्वे तु समवाय इति विवेकः। इदमुपलक्षणम्। द्वितीयार्थकर्मत्वे प्रकृत्यर्थस्याधेयत्वम्, गमने कर्मत्वस्य निरूपकत्वमित्यपि बोध्यम्। व्यापारादावित्यादि-पदेनाश्रयत्वप्रतियोगित्वपरिग्रहः। यथा घट उत्पद्यते, चैत्रो जानाति, घटो नश्यतीत्यादौ।

चषकम्

अथ वृत्तिनिरूपणानन्तरम्। **शाब्दबोधस्योक्त**रूपस्य। **प्रक्रिया** तत्तत्समभिव्याहारगम्यतात्पर्यविषयसंसर्गनिरूपणम्।

ग्रामकर्मकेति। ग्रामवृत्तिसंयोगानुकूलेत्यर्थः। **गमनजनकेति**। क्रियानुकूलेत्यर्थः। **वर्त्तमानकृतीति**। ग्रामसंयोगानुकूलाश्व-संयोगादिरूपव्यापारस्य वर्त्तमानत्वेऽपि ग्रामं गते गच्छतीत्यप्रयोगात् कृतौ वर्त्तमानत्वान्वयो न व्यापारे **इत्थञ्च** समानाभिधानश्रुतिरप्यनुगृहीता भवतीति भावः। जानातीत्यादावाख्यातार्थेऽप्याश्रयत्वेन तदन्वयः **किन्तु** क्रियायां समवायादिरूपाश्रयत्वसत्त्वेऽपि ज्ञाननाशे तथा प्रत्ययाभावात्। नष्टे नश्यतीत्यप्रयोगाद्धात्वर्थतावच्छेदकोत्पत्तौ वर्तमानत्वान्वय इत्येव साधीयः एषैव रीतिरन्यत्रापि लकारार्थकालान्वये बोध्या।

अर्थ इति गमन इव वर्तमानत्वकृत्योरप्यन्वेति। **संसर्गस्य** मर्यादाधात्वाख्यातविशेषसमभिव्याहारस्य कार्यतावच्छेदककोटिघटना **यथा** गमधातुप्रकृतिकाख्यातस्य कृतिविशेष्यकगमनप्रकारकजनकतासंसर्गक-शाब्दबोधत्वे कार्यतावच्छेदके जनकतासंसर्गघटना **एवमन्यत्रापि**। **सा च** जनकता फलोपहिता ग्राह्या। **अत एव** गमनाद्यनिष्पत्तौ गच्छतीत्यस्याप्रामाण्योपपत्ति**स्तत्संसर्ग** आख्यातार्थकृतिप्रथमान्तार्थदेवदत्तयोराश्रय-त्वसंसर्गः। **यत्र** वाक्ये **कर्त्तरि** विवक्षितस्वातन्त्र्ये। **व्यापारादाविति**। आख्यातस्येत्यनुषज्यते। **अत्रान्यदीय**गमनानुकूलनोदनादिमति गच्छतीत्य-प्रयोगा**दादि**नाश्रयत्वपरिग्रहः।

तात्पर्यटीका

क्रियानुकूलेति इदमापाततः। अन्यदीयगमनानुकूलनोदनादिमत्यपि गच्छतीत्यप्रयोगाद्गमनाश्रयत्वमात्रप्रतीतेश्च गच्छतीत्यत्राश्रयत्वमात्रमाख्यातार्थ इत्यग्रे वक्ष्यामः। **गच्छतीत्यप्रयोगादिति। न च** स्थालान्वेषणानुकूलकृतेरपि ग्रामसंयोगावच्छिन्नक्रियानुकूलतया कृतौ वर्त्तमानत्वान्वयेऽपि तत्र गच्छतीति प्रयोगापत्तितादवस्थ्यमिति **वाच्यम्**। अधिश्रयणमारभ्याधःश्रयणपर्यन्तैव क्रिया यथा पचधातोरर्थ**स्तथा** प्राथमिकग्रामसंयोगरूपफलानुकूलक्रियापर्यन्तैव गमधातोरित्युक्तप्रयोगापत्त्यभावादधिकमग्रे प्रपञ्चितमेवेति नात्र प्रस्तूयते। **इत्येव साधीय इति। ध्वंसस्या**खण्डोपाधित्वे मानाभावादिति भावः। **एतेन** स्वार्थवर्तमानत्वान्वययोग्योत्पत्तिरप्याख्यातार्थ इति मतमनादेयम्। **एषैवरीतिरिति। यथा** गमिष्यतीत्यादावाख्यातस्यैव वर्तमानप्रागभावप्रतियोगित्वमुत्पत्तिश्चा-न्योन्यान्वय्यर्थ इति भावः।

एवमन्यत्रापीति। यथा प्रथमान्तपदाख्यातमसभिव्यहारस्य प्रथमान्तार्थविशेष्यककृतिप्रकारकाश्रयतासंसर्गकबोधत्वे कार्यतावच्छेदके आश्रयतासंसर्गघटना। **एवं** द्वितीयासमभिव्याहृतधातोर्धात्वर्थविशेष्यकफल-प्रकारकानुकूलतासंसर्गकबोधत्वे कार्यतावच्छेदकेऽनुकूलतासंसर्गघटनेति। **सा च** जनकता कृतिनिष्ठा क्रियाजनकता। **गमनाद्यनिष्पन्ना** वामवातजऽडीकृतकलेवरे पुंसि गमनानुकूलयत्नवत्यपि गमनानुत्पत्तिदशायाम्। **अप्रामाण्योपपत्तिरिति। इदमुपलक्षणम्**। उत्थातुं यतते परन्तु नोत्तिष्ठतीत्यस्य प्रामाण्योपपत्तिरित्यपि **बोध्यम्। मुख्ये** कर्त्तरि वाधासम्भवाद्व्याचष्टे **विवक्षितस्वातन्त्र्ये इति**।

चषकम्

अत्रापि देवदत्ते पाकानुकूलकृतिसत्त्वेऽपि पाकवान् देवदत्त इत्यप्रत्ययाद्वृत्त्यनियामकतयाभावप्रतियोगितानवच्छेदकस्य कृतिसंसर्गस्य देवदत्तो गच्छतीत्यत्र संसर्गविधया भानाभ्युपगमे **प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमाविति नियमा**गतस्य न गच्छतीत्यत्र कृतिसम्बन्धावच्छिन्न-

प्रतियोगिताकाभावभानस्यासम्भवेन तदभ्युपगमासम्भवेऽप्याश्रयत्वस्य संसर्गमर्यादयापि भानं **यद्यपि** सम्भवति वृत्तिनियमाकत्वा**त्तथापि धात्वर्थगमनस्य नामार्थे भेदेनान्वयबोधस्याव्युत्पन्नत्वे**नाश्रयत्व-लक्षणावश्यकीति भावः। **अन्यथा** गमनं देवदत्त इत्यत्र तथा बोधापत्तिः। **न चापभ्रंशादिव** गम् ति देवदत्त इत्यतोऽपि तथा बोधवारणायानुपूर्वीविशेषज्ञानहेतुत्वस्यावश्यकत्वान्न दोष इति **वाच्यम्**। गमधातोर्गमनाश्रयत्वलक्षणाग्रहदशायां गमनस्याश्रयत्वसंसर्गेण बोधासम्भवात्तत्र सिद्धस्याश्रयत्वप्रकारकबोधस्यैव गमधातूत्तराख्यातस्याश्रयत्वलक्षणाग्रहदशायामपि स्वीकर्त्तुमौचित्य**मन्यथा**श्रयत्वसंसर्गकयोग्यताज्ञानघटितसाम**ग्र्य**न्तरकल्पना-गौरवप्रसङ्गात्।

तस्मान्न कुत्राप्याश्रयत्वं संसर्ग इत्याशयात्। **गम्धात्वर्थप्रकारकशाब्दबोधे समानविशेष्यतया तदुत्तराख्यातजन्यो-पस्थितेर्हेतुताया** आवश्यकत्वा**दन्यथा** पचिगम्योः पर्यायताभ्रमवतां शक्त्याख्यातजन्यकृत्युपस्थितावपि पाकप्रकारकप्रथमान्तार्थविशेष्यक-बोधस्यापत्ते**रित्थञ्च** गमनप्रकारकप्रथमान्तार्थविशेष्यकबोधस्याप्याश्रयताया-माख्यातलक्षणाग्रहेऽपि न प्रसक्तिः। क्लृप्तकारण**बाधात्त**तद्धात्वर्थविशेष्य-मन्तर्भाव्य तद्धेतुतामुपगम्या**त्रेष्टापत्तौ** तु षष्ठ्यादिसर्वविभक्तीनामपि स्वत्वाद्यर्थकत्वं विलुप्येत तुल्यन्यायात्। **अथ** प्रमाणाभावे तदपि विलुप्यतां **तदुक्तम्। मानाधीना मेयसिद्धिरिति चेदास्तां तदापाततः।**

तात्पर्यटीका

आश्रयत्वादीनामुक्तसंसर्गविधयैव भानसम्भवे किमाख्यातार्थत्वाङ्गी-कारेणेत्याशङ्कते। **अत्रापीति**। आख्यातार्थाश्रयत्वविशेष्ये गौणे कर्त्तर्यपीत्यर्थः। **यद्यपि** सम्भवतीत्यन्वयः। **अन्यथा** धात्वर्थनामार्थयोर्भेदसम्बन्धेनान्वय-बोधाङ्गीकारे। **ननु** गम् ति देवदत्त इत्यस्यासाधुत्वादेव नान्वयबोधकत्वमिति शङ्कां वारयितु**मपभ्रंशादिवेति**। तथा च शाब्दबोधेऽसाधुत्वज्ञानस्य प्रतिबन्धकत्वं साधुत्वज्ञानस्य कारणत्वं वा नास्तीति दर्शितं भवति। **अन्यथा**श्रयत्वसंसर्गत्वे।

सामग्र्यन्तरेति। तादृशयोग्यताज्ञानघटितसामग्र्यन्तरस्य भिन्नविषयकप्रत्यक्षप्रतिवन्धकतादृशसामग्रीद्वयस्याभावद्वयघटिताया: प्रत्यक्षसामग्र्याश्चेत्यर्थ:।

कुत्रापि धातोरिवाख्यातस्य लक्षणाग्रहेऽपि। **नन्वाश्रयत्व**संसर्गकबोधसामग्रीसत्त्वे कथं न कार्यमित्याशङ्क्य सामग्र्येव न सम्भवतीत्याह **गमधात्वर्थेति**। पचधातुस्थले तथा कार्यकारणभावावश्यकत्वेऽपि गमधातुस्थले नासावभ्युपेयते इत्युक्ते तयो: **पर्यायताभ्रम उक्त**:। **ननु** गमधात्वर्थपाकप्रकारतानिरूपितविशेष्यतया शाब्दबोधे गमधातूत्तराख्यातजन्यकृत्युपस्थितेर्विशेष्यतया हेतुत्वं स्वीक्रियते। **न तु** गमधात्वर्थगमनशाब्दबोधेऽपितथा हेतुमत आह। **तत्तद्धात्वर्थविशेषमिति**। **अत्र** गमधातूत्तराख्यातस्याश्रयत्वलक्षणायामप्याश्रमतासंसर्गकगमनप्रकारकप्रथमान्तार्थविशेष्यकशाब्दबोधे। **गमधातो**र्गमनाश्रयत्वलक्षणायामाश्रयत्वप्रकारकबोधस्यावश्यकतया द्विविधशाब्दबोधस्वीकारे गौरवस्य प्रागेवाभिहितत्वा**दापातत** इति। **पात**: प्रत्यवस्थानं तत्तदर्थान्तर्भावे गौरवदृष्टिपर्यन्तमिति यावत्तां मर्यादी**कृत्येत्यर्थ**:।

चषकम्

इदं तु बोध्यम्। आश्रयत्वप्रकारकशाब्दबोधवादिनां गमनाभाववदाश्रयत्वं प्रमेयमाश्रयत्वाभाववान् देवदत्त: सुन्दर इति द्विविधप्रत्यक्षे तादृशशाब्दबोधसामग्रीप्रतिबन्धकता न कल्प्यते शाब्दबोधहेतुभूतद्विविधयोग्यताज्ञानस्य यथोक्तद्विविधप्रत्यक्षकारणीभूतं विशेष्यतावच्छेदकप्रकारकद्विविधनिर्णयं प्रति ग्राह्याभावज्ञानत्वेन प्रतिबन्धकतया गतार्थत्वा**दाश्रयत्व**संसर्गतावादिनां तु गमनाभाववान् देवदत्त: सुन्दर इत्येकविधप्रत्यक्षे एव तादृशशाब्दबोधसामग्रीप्रतिबन्धकत्वं न कल्पयत इति शाब्दबोधस्याधिकविषयत्वं लाघवसम्पादकमेवेति **तथोक्तम्**। **वस्तुतस्तु** चैत्रेण ज्ञायते घट इत्येतद्वाक्यस्य यादृशविशेषणविशेष्यभावापन्नबोधजनकता तद्विपरीतविशेषणविशेष्यभावापन्नबोधजनकत्वं घटं जानाति चैत्र इत्यस्य **तथा** तस्य यद्विशेष्यतयाधेयत्वादिरूपससम्बन्धिकपदार्थावगाहित्वं तस्मिन्नाश्रयत्वादिरूपतन्निरूपकत्वप्रकारकबोधजनकत्वमस्त्येत्यनुभवबलादाधाराधेयभावप्रकारकत्वस्य संरक्षणायाख्यातस्याश्रयत्वे लक्षणावश्यकी।

अत एव पचन्पचतीत्यादाविव जानन् जानातीत्यादावपि निराकाङ्क्षत्वमुद्देश्यतावच्छेदकविधेययोर्भेदाभावादिति। **इत्थमेव** देवदत्तं धनमित्यत्र देवदत्तस्य स्वस्वामिभावसम्बन्धेन धने देवदत्तो गम्यते इत्यत्र देवदत्तस्य स्ववृत्तिकृतिजन्यत्वसम्बन्धेन धात्वर्थे ग्रामो गच्छतीत्यत्र च ग्रामस्य स्वनिष्ठसंयोगानुकूलत्वसम्बन्धेनान्वयबोधवारणाय **भेदसम्बन्धेननामार्थ-प्रकारकशाब्दबोधे तदुत्तरविभक्तिजन्योपस्थितेरपि** तथा हेतुत्वमावश्यकमिति **ध्येयम्**। **नन्वेवं** व्यापारोत्कीर्त्तनमसम्बद्धप्रलापः स्यादित्याशङ्क्य यत्र धात्वर्थव्यापारकलापप्रविष्टे यस्मिन् करणादिव्यापारविशेषे वस्तुतः स्वतन्त्रकर्त्तृव्यापारसापेक्षत्वेऽपि तदनपेक्षत्वं सौकर्यातिशयेन विवक्षितं तत्र रथो गच्छतीत्यादौ रथनिष्ठकरणताघटकगमनानुकूलतादृशव्यापाराश्रयत्वमेव गौणं कर्त्तृत्वम्।

तात्पर्यटीका

गतार्थत्वादिति। तथा च तादृशप्रत्यक्षशाब्दबोधसामग्र्योर्यौगपद्याभावादेव न प्रतिबन्धकत्वकल्पनाप्रसक्तिरिति भावः। **तथोक्तं** व्यापारादौ लक्षणेत्**युक्तम्**। **नन्वेवं** पचतीत्यत्रानुकूलकृतिराख्यातार्थो वक्तुं युक्तस्तत्रानुकूलत्वे धात्वर्थस्य निरूपकतयान्वयस्तथा सत्युपदर्शितरीत्या लाघवसम्भवादित्याशङ्क्य **न हि**युक्तलाघवमात्रेणाश्रयत्वमात्रे लक्षणोरीक्रिय**तेऽपि**त्वाश्रयत्वप्रकार-कशाब्दबोधस्यानुभवाभिप्रायेणेत्याह **वस्तुतस्त्विति**। **आश्रयत्वादिरूपेति**। आश्रयताया आधेयतानिरूपकत्वादाश्रयस्य निरूपकत्वमित्याश्रयत्वमेव निरूपकत्वमित्युक्तम्।

अत एवाख्यातस्याश्रयत्वलक्षणात एव। **भेदाभावादिति**। अन्यथा जानन्नित्यत्राश्रयत्वादुद्देश्यतावच्छेदकाज्जानातीत्यादौ ज्ञानं भिन्नमेव विधेयमिति निराकाङ्क्षत्वं न स्यादिति भावः। स्वनिष्ठसंयोगानुकूलत्वसम्बन्धेनेत्यात्रापि धात्वर्थे इत्यन्वेति। **तथा** हेतुत्वं समानविशेष्यताप्रत्यासत्या हेतुत्वम् **स्वतन्त्रेति**। **अत** एव कर्त्तृव्यापाराधीनव्यापाराश्रयत्वरूपं करणत्वं रथस्य सम्भवतीति चैत्रो रथेन गच्छतीति प्रयोगः **सङ्गच्छते**। **न चैवं** चैत्रश्चैत्रेण गच्छतीति

प्रयोगापत्तिरिति **वाच्यम्**। स्वभिन्नत्वेन कर्त्तुर्विशेषणात्। **न च** हेतुतृतीययैवोपपत्तौ करणतृतीयानुशासनस्यैव वैयर्थ्यमिति **वाच्यम्**।

तर्कामृतम्

यथा 'रथो गच्छति' इत्यत्र गमनजनकवर्त्तमानव्यापारवान् रथः। 'दधि पश्यति' इत्यादौ[१] द्वितीयालोपस्थले दधिशब्द एवाजहत्स्वार्थलक्षणया दधिकर्मत्वं बोधयति। एकवचनाद्युपस्थितमेकत्वादि सर्वत्र प्रथमादिपदमुपस्थापयति।

तरङ्गिणी

दधिशब्द एवेति। विभक्त्यनुसन्धानं विनापि शाब्दबुद्धेरानुभविकत्वात्, अन्यथा राजपुरुष इत्यादितत्पुरुषेऽपि पूर्वपदे लक्षणा न स्यादिति भावः। **दधिकर्मत्वं चेति।** दधिकर्मके लक्षणयेति भावः। न च प्रातिपदिकार्थधात्वर्थयोरन्वयस्याव्युत्पत्तिः। क्रियाविशेषण- स्थलेऽभेदान्वयस्य क्लृप्तत्वात्। **एकवचनाद्युपस्थितमिति।** तथा चैकत्वादौ एकवचनस्य शक्तिः। तत्राप्याख्यातैकवचनस्य न तत्र शक्तिः किन्तु सुबेकवचनानामेव सुद्धादिनेत्याह-**सर्वत्र प्रथमादीति।**

संसर्गबलेति। समभिव्याहारेत्यर्थः। फलं संयोगरूपम्। **कर्मात्मनेपदेति।** कर्मणि विहितात्मने पदेत्यर्थः। शालित्वं आश्रयत्वम्। अयं भावः-धातूनां व्यापारमात्रमर्थः। कर्त्राख्याते फलं द्वितीयार्थः। कर्माख्याते आख्यातार्थः। सकर्मकत्वं च कर्मसाकाङ्क्षव्यापारबोधकत्वं जानात्यादिसाधारणम्।

चषकम्

अन्यथा रथक्रियानुकूलरथाश्वसंयोगजिज्ञासानिवृत्त्यनापत्तेरिति लक्षणाया आवश्यकत्वात्। स्वतन्त्रकर्तृव्यापारव्यधिकरणफलवतामेव फलसमानाधिकरण-

---

१. 'इत्यत्र' इति पाठान्तरम्।

व्यापारविवक्षया प्रयुक्तस्य **कृसृ**पच्या इति कर्मकर्तृकृतोऽप्ययमेव परिशीलितः पन्था 'इत्यभिप्रेत्याह। **यथेत्यादि**। अत्रेत्यन्तमुदाहरणदर्शनमत्रेत्याद्यन्वय-बोधप्रदर्शनमिति **बोध्यम्**। **गमनजनकेति**। **अत्र** रथक्रियामात्रधात्वर्थतया विवक्षितं तदनुकूलो रथाश्वसंयोगश्चाख्यातार्थतयेति विवेक्तव्यं **सुधीभिः**। **रथ** इत्यनन्तरमित्वन्वयबोध इत्यनु**षज्यते**। **अर्थ** इति पाठे वाक्यार्थ इत्यर्थः। **दधि शब्द एव** कर्मत्वानर्थकविभक्तिप्रकृतित्वेनागृह्यमाणदधिशब्द एव।

तेन दधिपदस्य प्रथमान्तत्वग्रहे दधिकर्मकः पश्यतीत्यत्रेव न दधिकर्मकदर्शनान्वयबोधप्रसङ्गः। अत एव किञ्चिद्विभक्तिप्रकृतित्वेनाप्य-गृहयमाणाद्दधिपदाद्दधिकर्मदर्शनबोध उपपद्यते। अनुसंहितद्वितीयाविभक्तिकात्तु दधिपदाल्लक्षणयाऽपि तद्बोधसम्भवात्तस्य तद्बोधकत्वमक्षुण्णमेवेत्युक्तं **कर्मत्वानर्थकेति**। **दधिकर्मत्वं** लुप्तद्वितीयाप्रतिपाद्यम्। **बोधयति** पदार्थतावच्छेदकविधयेत्यादिः। दध्नः कर्मत्वसंसर्गेणेव दधिकर्मत्वस्य निरूपकतासंसर्गेणापि धात्वर्थे भानासम्भवेन यथाश्रुतासङ्गतेः। **ननु** कर्त्तृरिकत्वादिः प्रतीयते स कस्यार्थ इत्याशङ्क्याह। **एकवचनादीति**। **आदिना** द्विवचनादिपरिग्रहः। **एकत्वादीति**। **आदिना** द्वित्वादिपरिग्रहः। **सर्वत्र** वाक्यार्थे। **प्रथ**मादिपदं प्रथमाद्वितीयादयः सप्तसु विभक्तयस्तथा प्रथमाद्वितीयादयो दशतिङ्विभक्तयश्चेत्यर्थस्तथा च सम्भेदेनान्यतरवैयर्थ्यमिति **भावः**।

तात्पर्यटीका

यत्रैकैव पाकादिक्रिया चैत्रेण काष्ठैर्मैत्रेण तुषैर्निष्पाद्यते तत्र चैत्रः काष्ठैरेव पचति न तुषैरिति प्रयोगोपपत्तये तथानुशासनस्यावश्यकत्वा-**दन्यथोक्तपाके** तुषहेतुकत्वाभावबाधेन नञा तद्बोधनासम्भवा**त्तथानुशासन** सत्त्वे तु तुषव्यापारे चैत्रव्यापाराधीनत्वाभाबोधस्य ततोऽभ्युपगमेन सामञ्जस्याद**त** एवास्याः कारकविभक्तितया तत् साकाङ्क्षत्वेऽपि शरैः शातितपत्र इति समास उपपद्यते। **घटस्या**नधिकरणमितिवत्।

प्रतियोगिपदादन्यद्यदन्यत्कारकादपि।
बहिर्विशेषणे वृत्तिर्नवृत्तस्य विशेषणम्॥ इत्युक्तत्वादिति।

अन्यथाऽख्यातेनाश्वसंयोगरूपव्यापारानभिधाने। **फलसमानाधिकरण-व्यापारविवक्षयेति।** वस्तुतः फलसमानाधिकरणव्यापारस्यैव फलव्यधिकरण-व्यापारत्वावच्छिन्नव्यापाररूपकर्तृत्वेन **किम्वा** फलानुकूलव्यापारसामान्यस्यैव यथोक्तकर्तृत्वेन विवक्षयेत्यर्थः। **अयमेवेति। अत्रापि** दार्ढ्यरूपः पृथिव्यवयवसंयोगः प्रत्ययार्थस्तदनुकूलो जलसंयोगश्च धात्वर्थ इति विवेक्तव्यमित्यर्थः।

यद्यपि किञ्चिद्विभक्तिप्रकृतित्वेनाप्यगृह्यमाणत्वमात्रोक्तावप्यनु-संहितद्वितीयाविभक्तेर्दधिशब्दस्यापि विभक्त्यर्थद्वारा लक्षणां विनापि तद्बोधकत्वसम्भवात् कर्मत्वानर्थकेति व्यर्थं **तथापि** द्वितीयाद्यधीनतदर्थोपस्थितिघटितसामग्र्यन्तरकल्पने गौरवाद्द्वितीयाद्य-धीनार्थोपस्थितावपि सम्भवल्लाक्षणिकपदजन्योपस्थितिकलक्ष्यार्थाभेदान्वय बोध एव तत्रेत्यभ्युपगमवादेनैतदुक्त**मित्याहा**नुसंहितद्वितीयाविभक्तिकात्त्विति दशतिङ्विभक्तयश्चेति पञ्चम्यनुमतौ विध्यादिषु सप्तमी चेति कालापे दशलकाराणां प्रथमाद्वितीयेत्यादिपदसङ्केतितत्वादित्याशय।

चषकम्

वस्तुतस्तु ननु तिङेकवचनोपस्थितैकत्वादेः कुत्रान्वयो न तावत्प्रकृत्यर्थे एककर्तृकपाकादेरनेकत्वे तत्प्रयोगानापत्तेः। **न** कर्त्तरि तस्य तिङ्प्रकृत्यनुपस्थाप्यत्वादित्यत **आहैकवचनादीति। अत्रैकत्वादीति** सविशेषणं प्रथमान्तं कर्तृपदं प्रथमादिपदमिति द्वितीयान्तं कर्मपदमिति सम्प्रदायागतमेव **बोध्यम्**। एकवचनत्वाद्यवच्छिन्नया शक्त्या तिङेकवचनादिनाप्युपस्थितमेकत्वं सर्वत्र प्रथमाद्यसमभिव्याहारेऽपि प्रथमादिपदमुपस्थापयत्याक्षिपति। आख्यातैकवचनाद्युपस्थितमेकत्वादिनामप्रकृतिकसुवेकवचनादीनामप्यर्थ इति धियं जनयतीति यावत्। पदपदार्थयोः परस्परं स्मारकत्व-स्याविशिष्टत्वादित्युक्तत्वात्ततोऽन्वयधीः। **अयं भावः**। एकवचनत्वेनैकत्व-शक्तावपि घटे एकत्वान्वयबोधे घटपदोत्तरप्रथमादिज्ञानजन्यत्वयोग्यैकत्वो-

पस्थितित्वेन हेतुत्वात्तिङेकवचनज्ञानजन्यतदुपस्थितित्वेन स्वतन्त्रहेतुत्वे गौरवाच्च प्रथमाद्यसमभिव्याहारेऽपि तथोपस्थितिरावश्यकी **तथा च** स्वसमानार्थकविभक्तिप्रकृतिप्रथमान्तपदोपस्थाप्य एव तस्यान्वयः। **परन्तु** तिङर्थस्य प्रथमान्तार्थेऽन्वयबोधे तिङ्जन्यैकत्वोपस्थितेः सहकारिणी निरुक्तोपस्थितिः **सुप**शक्तिग्रहात्मिकै**वात** एव प्रथमान्तपदोपस्थाप्यः सङ्ख्याभिधानयोग्य इति **प्राञ्चः**।

तेषां चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रस्य तथात्ववारणाय **धात्वर्थान्याविशेषणत्वमपि**। तावन्मात्रञ्च स्तोकं पचतीत्यत्र स्तोकेऽपीति प्रथमान्तेत्यादिकमाव**श्यकम्**। **कथं** तर्हि चैत्र एव पचतीत्यादौ सङ्**ख्यान्वयः**। **धात्व**र्थान्यविशेषणतामात्रप्रयोजकतत्तत्पदानुपस्थाप्यत्वस्य तदर्थत्वात्। **प्रकृते** च चैत्रपदस्य मुख्यविशेष्यताप्रयोजकत्वमपीति **किमनुपपन्नम्**। **अत एव** तिङेकवचनसमभिव्याहृते सुवकेवचननियम इति। **यद्वा** **सुप**तिङ्भ्यामुपस्थितयोरेकत्वयोः कुत्रान्वय इत्यत आह। **प्रथमादिपदमिति**। प्रथमादिपदमेव सर्वत्रान्वयबोधे एकत्वादिकमर्थमुपस्थापयति। ननु कुत्रापि तिङेकवचनादि। **किं तर्हि** तिङेकवचनस्यासावर्थ एव नेत्याशङ्कां परिहरति। **एकवचनादीति**। तिङेकवचननिरूपितैकवचनत्वाद्यवच्छिन्नप्रत्येकशक्ति-साध्योपस्थितियोग्यमपीत्यर्थः।

अयं भावः। सुत्यादिसाधारणैकवचनत्वस्य दुर्वचतया सुत्वादिना शक्तत्वावश्यम्भावे तित्वादिना तथात्वे मानाभावेन ऋते सङ्ख्यान्वयबोधे घटपदोत्तरविभक्तिजन्यसङ्ख्योपस्थितेरेव हेतुत्वमावश्यक**मन्यथा** चैत्रेण दृष्टो घट इत्यत्रानावश्यकाध्याहारस्य तिङोऽसत्त्वेन कर्मैकत्वबोधानापत्तेः।

एवं विधस्थलानुरोधेनैव कृतेस्तृतीयार्थत्व**मामनन्ति**। अन्यत्राख्यातेनैव तत्प्रतीत्युपपत्तिरिति तिङेकवचनजन्यसङ्ख्योपस्थितौ तस्या वान्वयबोधहेतुत्वे मानाभाव **एवेति**। चैत्रो मैत्रश्च गच्छत इत्यादौ द्विवचनादित्वन्वितार्थो-पस्थापकमेवेत्यन्यत्र **विस्तरः**।

तात्पर्यटीका

तिङेकवचनजन्यैकत्वोपस्थितेरत्रानावश्यकत्वं विचिन्त्याह। **वस्तुतस्त्विति**। **अत्रै**तद्व्याख्यायाम्। **सम्प्रदायागतमादौ** कर्त्ता ततः कर्मेतिसम्प्रदायागतम्। जन्यत्वयोग्येत्यत्र योग्यत्वं प्रथमान्तघटपद-समभिव्याहृताख्यातोपस्थाप्यैकत्वावगाहित्वमेव **न तु** शाब्दबोधात् **प्राक्** सापेक्षिता **यदाह सुपशक्तिग्रहात्मिकेति**। **अत एव** यत एव निरुक्तोपस्थितिस्तिङ्जन्योपस्थितेः सहकारिण्यत एव। **अन्यथा** प्रथमान्तपदोपस्थित्यभावे प्रथमान्तपदोपस्थाप्यार्थाभावादसङ्गतेर्भवत्यु-पष्टम्भकतेति **बोध्यम्**।

धात्वर्थान्यविशेषणतामात्रेति। यथा चैत्र इवेत्यादौ चैत्रादिपदम्। चैत्र एवेत्यत्र चैत्रपदं तु न तथेत्याह। **प्रकृते चेति**। **अत एव** नामधात्वोरेकजातीयसङ्ख्यार्थकविभक्तिप्रकृतित्वग्रहादेव। **तादृशशक्तिधी-**सहकारित्वस्य तिङ्जन्यैकत्वोपस्थितेः शाब्दबोधे तद्धेतु**त्ववत्वस्य** च कल्पने गौरवादाह। **यद्वेति**। **ननु** तित्वादिनैव शक्तत्वमुच्यतां सुत्वादिनैव शक्तत्वे मानाभाव इत्येव किं न स्याद्विनिगमनाविरहादत आ**हान्यथेति**। **न च** तत्राप्यस्ति भवतीत्यध्याहृततिङेकवचनेनैव कर्मैकत्वं बोधयिष्यत इत्याशङ्कामपाकर्त्तु**मनावश्यकाध्याहारस्येत्युक्तम्**।

एवं विधेति। अनावश्यकं तिङध्याहारं चैत्रेण न पक्वमित्यादीत्यर्थः। **अन्यत्र** चैत्रेण न पच्यत इत्यादौ। मास्तु सुत्यादिसाधारणमेकवचनत्वमस्तु चैकवचनपदं नानार्थकमेव **तथा** पारिभाषिकैकवचनत्वोपलक्षितानां स्वादीनामिव त्यादीनामपि शक्तिग्राहकानुशासनाविशेषेण द्वयोरपि शक्तिसिद्धेः सामग्रीसत्त्वे उपस्थितेरावश्यकत्वेन सामग्र्येव तत्र मानमत आह **तस्या** वेति। **आख्यातद्विवचनादेस्तु** द्वित्वादौ शक्तिरावश्यकीत्याह **चैत्रो** मैत्रश्च गच्छत इत्यादाविति। **आदिना मैथिलीलक्ष्मणे रामः सुग्रीवः पवनात्मजः**। **लङ्कापुरं परित्यज्य पारं वारिनिधेर्ययु**रित्यत्राख्यातबहुवचनमप्यन्वि-तार्थोपस्थापकमित्यादर्शितम्। **न चैव**मत्र चैत्रद्वयं मैत्रद्वयं बुद्ध्येतेति। **युक्तम्**। अन्वयितावच्छेदकस्यैकत्वे एवोद्देश्यतावच्छेदकव्याप्यपर्याप्तेः संसर्गत्वोपगमात्।

तन्नानात्वे तु शुद्धपर्याप्तेः समवायस्यैव वेत्यभिप्रेत्याहान्यत्र **विस्तर इति अधिकं** प्रागग्रे च व्यक्तम्। **अतिप्रसङ्ग इति**। देवदत्तो गच्छतीत्यत्र तृतीयाया गम्यते ग्राम इत्यत्र द्वितीयायाश्च प्रसङ्ग इत्यर्थः।

तर्कामृतम्

'देवदत्तेन गम्यते ग्रामः' इत्यस्य देवदत्तवृत्तिकृतिजन्यगमनजन्यफलशाली ग्राम इत्यर्थः।

चषकम्

देवदत्तेनेति। कर्माख्यातेन कर्त्तुरनभिधानात् कर्त्तरि तृतीया भवति। कर्मणोभिधानाच्च न कर्मणि द्वितीया। **न चाख्यातस्य** कर्त्तृकर्मानभिधाय कत्वादतिप्रसङ्ग इति **वाच्यम्**। अनभिहित इत्यस्यानभिहितसङ्ख्याक इत्यर्थकतया • कर्त्तृकर्मविशेष्य- कसङ्ख्याप्रकारकशाब्दबोधाननु-कूलत्वस्यानभिधानपदार्थत्वात्।

तथा च कर्त्तृविशेष्यकसङ्ख्याप्रकारकशाब्दबोधाननुकूलाख्यात-समभिव्याहृतकर्त्तृपदात्तृतीयैवं कर्मविशेष्यकसङ्ख्याप्रकारकशाब्दबोधाननुकूला-ख्यातसमभिव्याहृतकर्मपदाद्द्वितीयेति पर्यवसितोऽनुशासनार्थः। **वस्तुत**स्त्वाख्यातेन कर्त्तृत्वकर्मत्वानभिधाने इत्येवानभिहित इत्यस्यार्थः। **न च** पक्ता चैत्रः पक्वस्तण्डुल इत्यत्राख्यातेन तयोरनभिधानात्तृतीयाद्वितीययोरापत्तिः। **कृतैव** समभिव्याहृतेनाभिधानात्। **ननु** येन केनचित् समभिव्याहृतेन लादिनाभिहितत्वसामान्याभावमात्रविवक्षायां पक्वानि भुङ्क्ते चैत्र इत्यत्र कृता कर्त्तृत्वस्यानभिहितत्वाच्चैत्रपदोत्तरं तृतीयापत्तिः। **एवमोदनः** पक्त्वा भुज्यत इत्यत्र कर्मत्वस्यापि तेनानभिधानादोदनपदोत्तरं द्वितीयापत्तिः। **समभिव्याहृतैः** सकलैर्लादिभिः प्रत्येकमभिहितत्वसामान्याभावकूटविवक्षायां भुञ्जानेन चैत्रेण पच्यते भोक्तव्यमोदनं पचतीत्यत्र तृतीयाद्वितीययोरनुपपत्तिः कृता तयोरभिधानात्। **न च** प्रधानक्रियाकर्त्तृत्वाद्यनभिधानमेव तृतीयादेः

साधुत्वे तन्त्रमिति **वाच्यम्**। चैत्रेण दृश्यमानं घटं मैत्र पश्यतीत्यादौ ज्ञानभेदेन विषयताभेदाभावच्चैत्रमैत्रोभयदर्शनविषयत्व रूपकर्मत्वस्य कृताभिधानाद्घट-पदोत्तरं द्वितीयानुपपत्तिरिति **चेत्**।

तात्पर्यटीका

एतेनेत्यादिनापास्तमित्यन्तेन वक्ष्यमाणस्वरसादाह **वस्तुततस्त्विति**। **कृतैव समभिव्यहृतेनेति**। **तथा** चाख्यातत्वं न विवक्षितमिति भाव:। तथा सत्येव शङ्कते। **नन्विति**। **समभिव्याहृतैरिति** तथा च पक्वानि पक्त्वेति च कृता कर्त्तृत्वकर्मत्वयोरनभिधानेऽपि भुङ्क्ते, भुज्यते इति चाख्यातेन तयोरभिधानान्नोक्तदोष इति भाव:। **कृता तयोरभिधानादिति**। तथा चाख्याभिहितत्वसामान्याभावसत्त्वेऽपि कृदभिहितत्वसामान्याभावस्य कूटान्तर्गतस्यासत्त्वादिति भाव:। **न च प्रधानेति**। आख्यातसाकाङ्क्षेत्यर्थ:। तथा च भोजनकर्त्तृत्वकर्मत्वयोरभिधानेऽपि पाकस्य कर्त्तृत्वकर्मत्वयोरभिधनात् तृतीयाद्वितीययोरुपपत्तिरिति भाव:। **विषयताभेदाभावादिति**। गौरवान्मानाभावाच्चेति भाव:।

चषकम्

अस्तु तत्तत्प्रातिपदिकार्थविशेषणत्वमात्रेण कर्त्तृकर्म 'त्वयोरविवक्षायां फलतस्तत्तत्प्रातिपदिकार्थविशेष्यतया तयोर्विवक्षायां तृतीयाद्वितीये स्त इत्यत्र त्वनुशासनतात्पर्यमिति ऋजु: **पन्था**:। **एतेनो**क्तयुक्त्या विवदन्त एवाख्यातैकवचनस्य सङ्ख्यावाचकत्वेऽपि निष्कर्षानुसारिण इति देवदत्तो गच्छति ग्रामो गम्यते इत्यत्र तृतीयाद्वितीययो: प्रसङ्गो दुर्वार:। **किञ्चैवं** प्रथमान्तकर्त्तृकर्मसमभिव्याहृतयो: कर्त्तृकर्माख्यातयोरेव निरुक्तशाब्दबोधा-नुकूलत्वेन तृतीयाद्वितीयान्तकर्त्तृकर्मसमभिव्याहृतयोस्तयोरतथात्वेन चैत्रेण पचति तण्डुलं पच्यते इति प्रयोगसाधुत्वे सम्भवति तत्प्रयोगासाधुत्वं न तदनुशासनफलमि**त्यपास्तम्**।

अस्माकं तु पचति पच्यते इत्याख्याताभ्यां तत्तत्प्रातिपदिकार्थविशेषणत्वेनैव कर्त्तृत्वकर्मत्वयोर्विवक्षितत्वादेव तृतीयाद्वितीययोरसाधुताबोधनसम्भवात्। **अथ** चैत्रकर्त्तृकपाकविवक्षया चैत्रेण पचति मैत्र इति प्रयोगापत्तिरुभयकर्त्तृकपाकस्थले चैत्रकर्त्तृकपाककर्त्ता मैत्र इति बोधसम्भवात्। **न च** कर्त्तृत्वविशेषणतानापन्नक्रियायां तृतीयार्थकर्त्तृत्वान्वयो व्युत्पन्न इति नोक्तप्रयोगापत्तिरिति **वाच्यम्**। चैत्रेण पाचयति मैत्र इति प्रयोगस्याप्यनापत्तेः। चैत्रकर्त्तृकपाककर्त्तृत्वनिर्वाहकव्यापारस्यैव मैत्रे सत्त्वेन ण्यर्थकृतावेव प्रकृत्यर्थपाकान्वयसम्भवात्। **न च** लकारार्थकर्त्तृत्वविशेषणतानापन्नक्रियाविशेषणतया कर्त्तृत्वबोधकत्वं सुपां व्युत्पन्नत्वमिति न कश्चिद्दोष इति **वाच्यम्**। **उक्तस्थले** चैत्रेण पक्ववान् मैत्र इति **प्रयोगापत्तेः** सम्भवादिति **चेन्ना**श्रयान्यस्मिन्नविशेषणतापन्ने कर्त्तृत्वे विशेषणतानापन्नायां क्रियायां तृतीयार्थकर्त्तृत्वान्वयव्युत्पत्तौ बाधकाभावात्। **उक्तस्थले** चाश्रय एव **क्तवत्त्वा**द्यर्थकर्त्तृत्वं विशेषणमित्यतादृशे निरुक्तकर्त्तृत्वे विशेषणतापन्नैव पचिक्रियेति तस्यां तृतीयार्थान्वयासम्भवादेवोक्तापत्यसम्भवात्।

तात्पर्यटीका

फलत इति। **अयं** भाव। **अनभिहित** इत्यस्य विशेषणत्वेन कर्त्तृत्वकर्मत्वयोरविवक्षायामित्येतावत्यर्थे चैत्रेण दृश्यमानं घटं मैत्रः पश्यतीत्यत्राश्रयत्वरूपकर्त्तृत्वस्य मैत्रविशेषणत्वेन विवक्षाया चैत्रेणेति तृतीया दृश्यमानमिति घटविशेषणबलाद्विषयतारूपकर्मत्वस्य घटविशेषणत्वेन विवक्षया घटमिति द्वितीयायाश्चानुपपत्तितादवस्थ्यमिति मात्रार्थान्तर्भाव आवश्यकस्तत्र च मात्रपदार्थे विशेषणत्वविवक्षायाः प्रयोजनाभावात्तद्विशेषणीभूतविशेष्यत्वविवक्षाभावाभावस्य विशेष्यत्वविक्षारूपस्यैव फलवशादनभिहितपदार्थतोचितेति। **उक्त**युक्त्या सुपः सङ्ख्यावाचकत्वावश्यकत्वं तिङस्तथात्वे मानाभावरूपयुक्त्या। **दुर्वार** इति गच्छति गम्यत इत्याख्यातैकवचनाभ्यां कर्त्तृकर्मसङ्ख्यानभिधानादवाचकत्वं नानभिधानपदार्थ इति भावः। अथ तस्य सङ्ख्यावाचकत्वमभ्युपगम्यते तर्हि ग्रामं गच्छतीत्यत्र द्वितीया न स्यात् कर्मसङ्ख्यावाचकत्वस्यापि तस्मिन् सत्त्वादेकत्वसामान्यार्थकत्वात्तस्यातः

कर्त्तृकर्मविशेष्यकसङ्ख्याप्रकारकशाब्दबोधप्रयोजकाकाङ्क्षाशून्यत्वस्यानभिधानपदार्थत्वे त्वाह। **किञ्चैवमिति**। अनभिहितसङ्ख्याकत्वमेवं विकल्पैकैकपक्षे एकैकं दूषणमिति वक्तुमेव**मित्युक्तम्**।

उक्तस्थले उभयकर्त्तृकपाकस्थले**सम्भवादिति**। पचिक्रियायाः कृदर्थकर्त्तृत्वविशेषणत्वेऽपि लकारार्थकर्त्तृत्वविशेषणतानापन्नत्वादिति भावः। **उक्त**स्थले च चैत्रेण पक्ववानित्यत्र च। **क्त**वत्त्वादीत्यादिनाख्यातपरिग्रहः। **तेन** चैत्रेण पचति मैत्र इत्यपि प्रयोगस्य वारणं **सूचितम्।** णिजर्थ**कर्त्तृत्व**व्यावर्त्तनार्थं **क्तवत्त्**वादीनां विशिष्योपादानं तेनैककर्त्तृकपाकस्थले चैत्रेण पाचयतीत्यादौ तु णिजर्थकर्त्तृत्वामश्रयास्मिन् व्यापारे विशेषणतापन्नमेवेत्यतादृशे कर्त्तृत्वान्तरे विशेषणतानापन्नैव णिप्रकृत्यर्थक्रियेति तत्र तृतीयार्थान्वयसम्भवात्तथा प्रयोगोपपत्तिः **सूचिता**।

चषकम्

आश्रयविशेषणतापन्नेत्युक्तौकृतिमुख्यविशेष्यकबोधपरस्य चैत्रेण पचतीति प्रयोगस्य दुर्वारत्वं मनसि कृत्येत्थ**मभिहितम्**। **रामेण** बाणेन हतो बालीत्यादिप्रयोगदर्शनात्**तथाभिधानं** लकृत्तद्धितसमासैरेवेति **तैरेवानभिधानमिति** गायन्ति **वैयाकरणाः**। अनभिहिते कर्त्तरि तृतीयेत्यनुशासनस्यापि **निरुक्त**क्रियाविशेषणतया यत्प्रातिपदिकार्थान्वयि कर्त्तृत्वविवक्षास्ति तदुत्तरं तृतीयेत्येव **परिष्कृतोऽर्थः**। **अथैवं** चैत्रेण न पच्यते इत्यत्र चैत्रकृतेर्जन्यतासम्बन्धावच्छिन्नाभावोऽप्रसिद्धतया बोधयितुमशक्यः पाककर्मत्वाभावश्च कर्मपदासमभिव्याहारे दुर्बोध इति **चेन्न**।

कृतिजन्यत्वस्य तृतीयार्थस्य तत्राभावबोधनात्।

चैत्रेण न पक्व इत्यादौ कृतौ चैत्रवृत्तित्वाभावबोधेन तद्बोधनासम्भवात् **कर्म**त्वस्य प्रकृते पदार्थैकदेशतया पक्त्रर्थेनानन्वयाद्विशिष्टभेदस्यापि **विशेषणा**भावबोधोक्तबाधकबाध्यत्वात् पाके कृतिजन्यत्वाभावबोधानुरोधेन तस्य **तदर्थत्वावश्यकत्वा**च्चेत्यन्यत्र **विस्तरः**।

परन्तु नञ्समभिव्याहारस्थले तृतीयाद्युपपादनस्य प्रयत्नसाध्यत्वमेवेति **दिक्**।

तात्पर्यटीका

कृतानभिधानाभिधानाभ्यां तृतीयाद्वितीययोः साधुत्वासाधुत्वे उदाहरति। **रामेणेति। तथाभिधानं** क्रियाविशेषतयाश्रयान्याविशेषणतया च कर्तृत्वाभिधानं पचति पक्तेत्यादौ। **तैरेवानभिधानमिति**। अन्यथा बालीत्यत्र द्वितीयासाधुता दुर्वारैवेति भावः। **निरुक्तक्रियेति**। आश्रयान्याविशेषणतापन्न-कर्तृत्वविशेषणतानापन्नक्रियेत्यर्थः। वृत्यनियामकसम्बन्धस्याभावप्रतियोगिता-वच्छेदकत्वपक्षे यथाश्रुतमूलसङ्गतावपि तस्यातथात्वे तदसङ्गतिं हृदि निधाय शङ्कते। **अथैवमिति एवं** कर्त्राख्यातसमभिव्याहाराधीनबोधे यादृशविशेषणविशेष्यभावापन्नानां पदार्थानां भानं तद्विपरीतविशेषण-विशेष्यभावापन्नानां तेषां भानस्य कर्माख्यातसमभिव्याहाराधीनबोधेऽवश्यम्भावेन **पच्यत इत्यत्रेति**। देवदत्तेन गम्यत इत्यत्र त्वाद्ये त्वस्य तृतीयार्थस्याश्रयतासम्बन्धावच्छिन्नप्रतियोगिताकाभावो धात्वर्थे सुबोध इति तत्परित्यागः।

कृतिजन्यत्वस्येति। न च भविष्यति पाके चैत्रवृत्तिकृतिजन्यत्वस्य सत्त्वात्तदभावबोधनासम्भवो वर्त्तमानतत्कृतिजन्यत्वाभावश्च चैत्रस्वापकाले चैत्रेण न पच्यते इति वाक्याद्बोधयितुमशक्यस्तदानीं वर्तमान-चैत्रप्रवृत्तिसाध्यत्वाप्रसिद्धेस्तत्र कृतिजन्यत्वाभावे वर्त्तमानत्वान्वयाभ्युपगमेऽपि यत्र चैत्रेणोदनः पच्यते न ते मनं तत्र चैत्रेण न पच्यते ते मनमिति प्रयोगानिर्वाहः। पाकत्वावच्छिन्नोदनपाके चैत्रवृत्तिकृतिजन्यत्वस्यैव सत्त्वेन तदभावबाधादिति **वाच्यम्**। तत्र ते मनपाकत्वावच्छेदेनैव यथोक्तस्य कृतिजन्यत्वाभावस्य बोधाङ्गीकारात्ते मनपाकत्वस्यान्वयितानवच्छेदकत्वेऽपि तदवच्छिन्नविशेषणताया अभावसंसर्गत्वे बाधकाभावात्। **न चा**न्वयितावच्छेदकावच्छिन्नत्वमेव विधेयसंसर्गे भासत इति **नियमः**। तथा सति **शरदि पुष्प्यन्ति सप्तच्छदा** इत्यत्र सप्तच्छदपुष्पोत्पत्तित्वावच्छेदेन

शरत्सम्बन्धान्वयानुपपत्ते**र्मानाभावाच्च**। **एतेन** तत्र शरत्सम्बन्धः सप्तच्छदविशेषणमेव। **अत एव** कारकत्वाभावात् कालरूपविशेषणपदोत्तरं स्वातन्त्र्येण सप्तमी सर्ववर्मणा **सूत्रिता**। एवञ्च क्रियानिमित्तत्वरूपकारकत्वगर्भकर्तृत्वस्याख्यातार्थस्य विशिष्टेऽन्वयेन शरत्सम्बन्धरूपविशेषणेऽप्यन्वयेनैव **शरदि पुष्यन्ति चम्पका** इति प्रयोगवारणात्। **निमित्तत्व**स्याख्यातार्थत्वानुपगमेऽप्युद्देश्यविधेयभावमहिम्ना प्रयोज्यप्रयोजकभावस्योद्देश्यतावच्छेदके विधेयसंसर्गतया भानेनैवानतिप्रसङ्गा-च्चोक्तस्थलेऽवच्छेदकावच्छेदेनान्वय एव नोपगम्यत इति क्वोक्तनियमभङ्ग इति **परास्तम्**।

विशेषणेत्यादि। आख्यातार्थकर्मत्वाभावबोधे प्रागुक्तं यद्बाधकं कर्मपदासमभिव्याहारेऽ**तिव्याप्तिरूपं** तेन बाध्यत्वाद्दुर्बोधत्वादित्यर्थः। **तदर्थत्वावश्यकत्वाच्चेति**। **अयं** भावः चैत्रेण न पच्यत इत्यतो वर्त्तमानपाकानुकूलकृतित्वावच्छिन्नाविशेषणतया चैत्रवृत्तित्वस्य तृतीयान्तचैत्र-पदलाक्षणिकार्थस्याभावबोधोऽपि सम्भवति। **न चैवमिह** मैत्रेणैव पक्ष्यते ते मनमित्यत्रैतदधिकरणक ते मन-पाकत्वेन शब्दात् पाकानुपस्थित्या तदवच्छिन्ने मैत्रान्यसमवेतभविष्यत्कृतिविषयत्वव्यवच्छेदबोधासम्भवकथनं दीधितिकृतां विरुद्ध्यत इति **वाच्यम्**। अन्वयितावच्छेदकावच्छिन्नत्वं विधेये भासते इत्यभिप्रायेण तैस्तथाभिधानात्।

कृते च धर्मस्य संसर्गघटकत्वे पदोपस्थाप्यत्वस्यैव नियामकतया पदोपस्थापितयावदर्थानां तु कथञ्चिदपि विशेषणविशेष्यभावापन्ने-नान्वयितानवच्छेदकेनाप्युक्तकृतित्वेनावच्छिन्नविशेषणतायाः संसर्गतया भाने बाधकाभावात्। **चैत्रेण** न पक्व इत्यादौ **ल**शब्दार्थवर्त्तमानपाकानुकूलकृतित्वे संसर्गघटात्वस्य प्रतिवन्दिसहस्रवलितत्वा**दत्र** वर्त्तमानत्वोपस्थापकाख्याता-भावादतस्तत्र तृतीयायाः कृतिजन्यत्वार्थकत्वमावश्यक**मित्यलं पल्लवितेन**।

गुणाधेयत्वसामान्यस्य द्वितीयान्तार्थस्य तत्राभावबोधस्तु न सम्भवति कालिकसम्बन्धावच्छिन्नाधेयतायाः संयोगेऽपि भावात् **समवाय**सम्बन्धावच्छिन्ना- धेयताया द्वितीयार्थत्वे तु नाभावं गच्छतीत्यादौ

तादृशाधेयत्वाप्रसिद्ध्या गत्यन्ताराभावादित्यलं जन्यत्वान्तर्भावेण तृतीयादिशक्तिकल्पनया। **इत्थमेव** जन्यत्वं संसर्ग इति **वक्ष्यति। अन्यथा प्रतियोग्यभावान्वयादिति नियमो** भज्येतेत्याद्यभिप्रेत्याह। **अन्यत्र विस्तर इति। प्रयत्नसाध्यत्वमेवेति।** क्रियानिष्ठस्य क्रियानिष्ठाभावप्रतियोगिनो वा कृतिजन्यत्वस्यान्वयिनि प्रकृतितात्पर्ये इति सूत्रार्थकल्पनादय: प्रयत्ना इत्यर्थ:। कृत्यर्थकतावादिनां प्रयत्नेनैव कृतिजन्यत्वार्थकतावादोऽप्यस्माकं निर्वहतीत्याह **दिगिति।**

तर्कामृतम्

वृत्तित्वं संसर्गबललभ्यम्। तृतीयार्थश्च[1] कृति:। जन्यत्वं संसर्ग:। गमनं धात्वर्थ:[2]। जन्यत्वं संसर्ग:। फलं कर्मात्मनेपदार्थ:। शालित्वं संसर्ग:।

चषकम्

जन्यत्वं संसर्ग इति। नञ्समभिव्याहारस्थले तु जन्यत्वाभावात्मा कृतेर्जन्यतासम्बन्धावच्छिन्नाभाव एव बोधयिष्यत इत्याशय:। **फलमिति। अत्रेदं बोध्यम्। व्यापारमात्रं** धात्वर्थ: तत्र कर्त्राख्यातसमभिव्यहारे द्वितीयाया: फलमर्थ: कर्माख्यातसमभिव्याहारे कर्तृत्वमिव तृतीयाया:। **स्वभावाधीनं** च फलान्वितव्यापारबोधकत्वं हि सकर्मवत्वमिति न स्यंद्यादे: सकर्मकता।

तात्पर्यटीका

अतिरिक्ताभावकल्पनागौरवमपि नास्तीत्याह। **जन्यत्वाभावात्मेति** कृतीत्यादि:। **व्यारमात्रमिति।** फलव्यवच्छेदाय। कर्मात्मनेपदार्थ इत्यत्र कर्मपदव्यवच्छेद्यमाह **कर्त्राख्यातेति। ननु** फलस्य धात्वर्थतानवच्छेदकत्वे

---

१. 'तृतीयाया अर्थ: कृति:' इति पाठान्तरम्।
२. 'धातोरर्थ:' इति पाठान्तरम्।

धातुनां सकर्मकाकर्मत्वव्यस्था न स्यादत आह **स्वभावाधीनञ्चेति**। **एतेन** फले **गमधातोरुपस्थित**स्यैव व्यापारस्यान्वयो न कुतः स्पंद्यादेरित्य**पास्तम्**।

चषकम्

भवति तु नारायणं नमस्कृत्य विखण्डिनं पुरस्कृत्येत्यत्र नारायणादेः कृतिकर्मता। अनुकूलतासम्बन्धेन करोत्यर्थव्यापारे स्वावधिकोत्कर्षज्ञानविषय-त्वाग्रदेशावस्थानरूपफलयोर्नमः पुरःप्रभृतिनिपातार्थयोः साक्षादेवान्वयात्। **नमस्क्रियते** पुरस्क्रियते इत्यादौ तु प्रयोज्यतया करोत्यर्थान्वितोक्तफलयोर्निपातार्थत्वेन **कर्मण्येवान्वयस्तथा** व्याख्यातस्य तादृशसंसर्गपरता **व्याहतैव। उपसर्गार्थफलस्य** च कर्मान्वयो न भवतीत्युपास्यते गुरुरित्यादौ सकर्मकत्वोपपत्तये व्यापारविशिष्टफलस्याख्यातार्थद्वारा-कर्मसाकाङ्क्षस्य धात्वर्थत्वावश्यम्भावे निरर्थकाणां तेषां द्योतकत्वप्रवाद **इत्यस्तु**। **तत्त**द्धातुसाकाङ्क्षतत्तत्फलाश्रयत्वं हि तत्तद्धातुकर्मत्वमिति न गमनजन्यविभागाश्रयस्यापि पूर्वदेशादेर्गमिकर्मता। **न वा** दाधातुसाकाङ्क्षगोनिष्ठस्वत्वस्य निरूपकसम्बन्धिनः सम्प्रदानस्य विप्रादेर्ददातिकर्मता।

वृक्षायोदकमासिञ्चतीत्यत्र द्रवद्रव्यक्रियाया एव सिञ्चत्याकाङ्क्षा न संयोगस्यापीति द्रवद्रव्यस्यैव सिञ्चतिकर्मता न वृक्षस्य **किन्तु** कर्मसम्बन्धितयोद्देश्यत्वात् सम्प्रदानतै**वात** एव वृक्षसंयोगानुपधानेऽपि तथा प्रयोग**स्तथा** चाधेयतयाभिप्रेतः संयोगस्तत्र चतुर्थ्यर्थ**स्तदुक्तम्**। **'कर्मणा यमभिप्रैति स सम्प्रदानमि'**ति। **स च** द्वितीयार्थ**क्रियायामन्वेति**। तस्माच्चैत्रस्येत्यत्र हेतुविभक्त्यर्थ इव षष्ठ्यर्थे **इय**मेव मैत्रोद्देश्यके दाने एव मैत्राय ददातीतिवन्मैत्रपत्न्यै ददातीति प्रयोगवारण**सरणिः**।

तात्पर्यटीका

कर्मण्येवेति। नामार्थान्वययोग्यस्य निपातार्थस्याख्यातार्थान्वये गौरवादिति भावः। कुतस्तर्ह्याख्यातेनानभिधानात् कर्मणि द्वितीया न भवतीत्यतस्**तथापीति**।

आश्रयत्वरूपसंसर्गार्थकत्वाभावेऽपीत्यर्थः। **तादृशसंसर्गपरता** तेन सम्बन्धेन फलान्वितकर्मबोधपरता। **अव्याहतैवेति**। तेन न कर्मपदाद्द्वितीयापत्तिरिति भावः। **कर्मान्वयो नेति**। **निपातातिरिक्तनामार्थयोर्भेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वादिति** भावः। **व्यापार**विशिष्टफलस्य स्थितिसाध्यपरिचर्योद्देश्यत्वस्य। नामधात्वर्थान्वयस्याप्यव्युत्पन्नत्वादाह**ख्यातार्थद्वारेति**। साकाङ्क्षत्वविवक्षाप्रयोजनं प्रदर्श्य फलसम्बन्धित्वं परित्यज्याश्रयत्वपर्यन्तविवक्षाप्रयोजनं दर्शयति। **न वेति**।

ननु वृक्षायोदकमासिञ्चतीत्यादौ चतुर्थी द्वितीययोर्द्वयोरेव कारकविभक्तित्वात् क्रियान्वये संयोगाश्रयतया कर्मतापत्तिरत आह। **वृक्षायेति**। **अत एव** चतुर्थ्यर्थस्याभिप्रायगर्भत्वादेव। **द्वितीयार्थेति**। **न च** कारकाणां क्रियायामेवान्वय इति नियमभङ्गप्रसङ्ग इति **वाच्यम्**। कारकाणामेव क्रियान्वय इति तदर्थ इति स्वयमेव वक्ष्यमाणप्रायत्वात्। **नाऽग्निस्तृप्यति** [1]**काष्ठाना**मित्यादौ तु सङ्गैरिति षष्ठीसाकाङ्क्षं करणपदमध्याहार्यमिति **किमनुपपन्नम्**। **षष्ठ्यर्थ** इति। **अत्रेदमाकूतम्**। षष्ठ्यर्थे पञ्चम्यर्थस्याऽन्वये सर्वथा क्रियान्वयो न घटते प्रकृते चतुर्थ्यर्थस्य द्वितीयार्थेऽन्वये तु द्वितीयार्थस्य क्रियान्वयेन विशेष्यान्वयिनान्वयित्वविवक्षया स घटते इति। **एतेनो**क्तरीत्या यथाश्रुतनियमभङ्गप्रसक्त्यभावे किमर्थं नियमान्तरपरतोपवर्णनमिति शङ्का **परास्ता**। तथा सति वृक्षस्य कर्मतापत्तेरुक्ताया दुर्वारत्वात्। साक्षात् क्रियान्वयस्य कर्मताघटकत्वे कुतो यथाश्रुतनियमाशाऽपि। **इयमेव** चतुर्थ्यर्थस्याभिप्रायगर्भतैव। तथा च मैत्रनिरूपिततयाऽभिप्रेतस्वत्वानुकूलगवादिनिष्ठस्वत्वध्वंसजनकव्यापारकर्त्तेति शाब्दबोधः।

चषकम्

अन्यथा दम्पत्योर्मध्यगं धनमिति स्मृतेर्द्वयोरपि स्वत्त्वाविशेषात्तथा प्रयोगो दुर्वार एव स्यात्। **न चैवं सर्वभूतेभ्य उत्सृष्टं मयैतज्जलमूर्जितमित्यत्र** सर्वभूतप्रीतिजनकमत्कर्तृकोत्सर्गजन्यस्वत्वध्वंसाश्रयो जलमित्यन्वयबोधे धातुसाकाङ्क्षप्रीतिभाजां भूतानां रुद्धं यजेततिवदुत्सृजतिकर्मत्वमनपवार्यम्।

स्वत्वध्वंसरूपापरक्तप्रत्यार्थफलसाकाङ्क्षायाः प्रीतेरुत्सृजत्यसाकाङ्क्षत्वेऽपि यजतिसाकाङ्क्षप्रीतिभागितयोद्देश्यत्वानिराकरणादुद्रेऽनिराकर्तृसम्प्रदानतानपायैव। **तदुक्तम्। अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम् प्रेरणानुमतिभ्यां च लभते सम्प्रदानतामिति वाच्यम्।** तदविवक्षायां **द्वितीयोपपत्तेः।**

संयोगविभागादिफलविशेषस्तु गमित्यजिप्रभृतिधातुविशेष-समभिव्याहारगम्यत इति न कोऽपि दोष इति। **न चैवं** कर्मप्रत्ययासमभिव्याहारे त्यागादितात्पर्येण गमनादिपदं व्युत्पन्ना अपि प्रयुञ्जीरन्निति **वाच्यम्।** तत्र तत्तत्फलावच्छिन्ने व्यापारे त्यागगमनादिपदस्यानादितात्पर्यमूलनिरूढ-लक्षणाभ्युपगमात्। **तत्त्वञ्च** पूर्वतात्पर्यसमानाकारकतात्पर्यमूलकत्वं **स्वज्ञान**जन्यशाब्दबोधध्वंस- कालीनस्वज्ञानजन्यशाब्दबोधसामान्यकत्वमिति यावदिति **दिक्। यत्तु** परसमवेतत्वमपि द्वितीयार्थोऽ**न्यथा** ग्रामं गच्छतीतिवत् स्वं गच्छतीति प्रयोगापत्तेरिति **तन्न।**

तात्पर्यटीका

अन्यथा चतुर्थ्यर्थेऽभिप्रायाप्रवेशे। मैत्रप्रतिगृहीते पत्न्याः स्वत्वमेव नास्तीति शङ्कां वारयितुं दम्पत्योर्मध्यगं **धनमित्यादि। मध्यग**मुभयस्वामिकम्। सर्वभूतेभ्य इत्यतः सर्वभूतप्रीतिजनको यो मत्कर्तृकोत्सर्गस्तज्जन्यस्वस्वत्वध्वंसाश्रयो जलमिति वा सर्वभूतप्रीतिजनको यो मत्कर्तृकोत्सर्गजन्यस्वत्वध्संसस्तदाश्रयो जलमिति वान्वयबोध इति विकल्प्य क्रमेण दूषयितुं शङ्कते **न चेति। एवं** चतुर्थ्यर्थस्याभिप्रायगर्भत्वे। **ननु** प्रेरणानुमत्योरभावात् कथं रुद्रस्योद्देश्यत्वमत आह **तदुक्तमिति। अनिराकरणादित्यादि। कर्तुः** कर्मसम्बन्धितया विवक्षितं त्यागहेतुभूतं यत्तदनिराकरणात् प्रेरणानुमतिभ्यां च सम्प्रदानतां लभते इत्यर्थः। यथा सूर्यायार्घ्यं विप्राय गां गुरवे दक्षिणां ददातीत्यत्र सूर्यादेः। **तद**विवक्षायामिति। रुद्रवृत्तित्वेनाभिप्रायविवक्षायां रुद्रवृत्तित्वमात्र विवक्षायामित्यर्थः।

एवं तत्तद्धातुसमभिव्याहृतस्यैव कर्मप्रत्ययस्य फलविशेषबोधकत्वे। **ननु** तात्पर्यं नाम वक्तृच्छा तत्रानादित्वमसिद्धमनादीश्वरेच्छामूलकत्वं चातिप्रसङ्गसम्पादकमत आह **तत्त्वञ्चेति। ननु** तात्पर्येऽनादित्वस्य

पूर्वतात्पर्यसमानाकारत्वरूपत्वे येन तात्पर्येण द्वित्रिबोधा जनितास्तदप्यनादितात्पर्यं स्यादतस्तदाह। **स्वज्ञानेति**। **स्वं** तात्पर्यम्। **अत्र** लाघवात् फलावच्छिन्नव्यापारो धातोरर्थो धातुजन्यविशिष्टार्थोपस्थितेरेकस्या एव शाब्दबोधसामग्र्यां निवेशात्। **द्वितीयाया**स्त्वाधेयत्वमात्रं तदुपस्थितेः शाब्दसामग्र्यां निवेशस्तु भवतां फलोपस्थितिनिवेशस्थानीय एव। **द्वितीयाया** आधेयत्वार्थकत्वं च भूमिमध्यास्त इत्यत्रावश्यकमेवेति सर्वमभिप्रेत्याह **दिगिति**। तथा चानया दिशाऽऽख्यातस्य कर्तृत्वकर्मत्वार्थकत्वप्रपञ्चद्वारानभिहिताधिकारपठितसूत्रार्थस्य स्पष्टप्रतिपत्या शिष्यबुद्धिवैशद्याय मूले सैवा**दूतेति** भावः। द्वित्वावच्छिन्नस्वभेदस्य स्वस्मिन्नपि सत्त्वात्प्रकृत्यर्थतावच्छेदकावच्छिन्नेति।

चषकम्

यथोक्तद्वितीयार्थैकदेशे भेदे प्रकृत्यर्थतावच्छेदकावच्छिन्न-प्रतियोगिताकत्वसम्बन्धेन प्रकृत्यर्थान्वयोपगमेन स्वं गच्छतीति प्रयोगस्य प्रामाण्यवारणेऽपि **मल्लो मल्लं गच्छतीति**वाक्यस्याऽप्रामाण्यापत्तेर्मल्ले मल्लत्वावच्छिन्नभेदाभावा**न्मल्लत्वेन** भासमानस्यैतद्व्यक्तित्वावच्छिन्ना प्रतियोगिता तु न सम्बन्धो मानाभावा**दभावप्रत्ययो हि यद्विशिष्टं प्रतियोगिनमवगाहते तस्यैवप्रतियोगितावच्छेदकत्वमपीति नियमात् कथं** तर्हि साध्यव्यापकतावच्छेदकत्वोपलक्षितरूपावच्छिन्नप्रतियोगिताकाभावानां **तत्र-तत्र** लक्षणे घटकतेति **चेत्**। घटोनास्तीति व्यवहर्त्तव्ये नीलो घटो नास्तीत्यव्यव्यवहारादुपलक्षणीभूतधर्मप्रकारेण प्रतियोगिप्रकारकप्रतियोगिता-संसर्गकाभावबोधस्यैवानभ्युपगमात्। **उपलक्षित**धर्मावच्छिन्नप्रतियोगिता-प्रकारेणाभावबोधे बाधकाभावात्।

कथमन्यथा गौर्नास्तीत्यभिलप्यमानोऽभावो जात्यवच्छिन्नप्रतियोगिताक इति **व्यपदिशन्ति**। **अत** एवेष्टतावच्छेदकत्वोपलक्षितपाकस्वर्गत्वादि-धर्मावच्छिन्नसमानाधिकरणाभाव**प्रति**योगित्वाभावघटितेष्टसाधनत्वस्य विध्यर्थत्व**मामनन्ति**। प्रकृत्यर्थान्वितफलस्य जनकत्व स्वाश्रयनिष्ठभेदप्रति-योगितावच्छेदकत्वोभयसम्बन्धेन क्रियायामन्वयोपगमेनैव चैत्रः स्वं गच्छतीति

प्रयोगवारणात्। स्ववृत्तित्वविशिष्टतत्संयोगाश्रयस्वपदार्थतद्व्यक्तिनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य स्वनिष्ठक्रियायामसम्भवात् **एतेन** चैत्रः स्वं गच्छतीति प्रयोगवारणाय क्रियान्वयिनो भेदप्रतियोगितावच्छेदकत्वस्यापरस्य द्वितीयार्थस्यैकदेशे भेदे प्रकृत्यर्थतावच्छेदकविशिष्टस्यान्वयमुपगम्यापि न **निस्तारः**। भूम्यादिसंयोगस्य विहगेऽपि सत्त्वेन तज्जनकक्रियाया विहगनिष्ठसंयोगजनकत्वाद्विहगान्तरनिष्ठभेदप्रतियोगितावच्छेदकत्वाच्च विहगो विहगं गच्छतीति प्रयोगापत्तेरित्यपि निरस्तं **वेदितव्यम्**। कर्मप्रत्ययोपदर्शितव्युत्पत्तिवैचित्र्येण च विहगेन गम्यते भूमिरित्यत्र विहगेन गम्यते विहग इति प्रयोगवारणम्।

तात्पर्यटीका

प्रतियोगितावच्छेदकत्वमपीति। अन्यथा विशिष्टवैशिष्ट्यबोधत्वानुपपत्तेरिति भावः। **अवगाहत** इत्यनुषज्यते। **तत्र-तत्र लक्षण इति**। **यथा** पञ्चलक्षणदूषणस्य केवलान्वयिन्यव्याप्तेरुद्धारव्याजेन **प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक इति** मूलमवतारयद्भिः पक्षधरमिश्रैः स्वसजातीयसाध्याभाववद्वृत्तित्वाभावघटनया परिष्कृते साध्याभाववदवृत्तित्वलक्षणे साध्याभावश्च पूर्वोक्तद्वितीयरीत्या प्रत्येतव्यो व्याप्यवृत्तिश्चेति **तार्किकशिरोमणिभट्टाचार्यैरभि**हितं स्वयं च द्वितीयलक्षणे तादृशाभावघटना कृता। **न च** वह्न्यधिकरणे धूमव्यापकतावच्छेदकवह्नित्वावच्छिन्नवति तदभावसम्भवो व्यभिचारिणि। **गुण**वृत्तिर्द्रव्यसामान्याभावोऽपि हेतुतावच्छेदकसम्बन्धेन वृत्तित्वाप्रसिद्धिकर एव। **सद्धेतावपीति**। व्यापकतावच्छेदकत्वावच्छिन्नतद्रूपनिष्ठावच्छेदकताकाभावो न लक्षणघटकः **किन्तु** व्यापकतावच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्नभाव **एवेत्थञ्च** सत्तावान् जातेरित्यत्र **हेतुतावच्छेदकसम्बन्धेन** कस्यचिदधिकरणे वर्त्तमान इति साध्याभावविशेषणाक्रान्तं व्यधिकरणधर्मावच्छिन्नाभावमादायैव लक्षणं ग्राह्यं तच्च व्यधिकरणधर्मावच्छिन्नाभावखण्डनेन खण्डितमित्यवतारणिकासङ्गतिरित्यस्त्व**प्रासङ्गिकम्**।

प्रतियोगित्वाभावघटितेति। प्रतियोगितात्वावच्छिन्नप्रतियोगिताका-भावघटितेत्यर्थः। वस्तुतः स्ववृत्तिसंयोगाश्रयत्वस्य स्वभिन्नग्रामसत्त्वादुक्तं **स्ववृत्तित्वविशिष्टेति। ये तु** शुद्धप्रतियोगितयाऽन्वये स्वं गच्छतीति प्रयोगस्य दुर्वारत्वेऽपि शुद्धाधेयतयाऽन्वयेनाऽसौ दोष इत्यभिप्रेत्य भेदप्रतियोगितावच्छेद-कत्वस्य द्वितीयार्थत्वमुपगम्य **मल्लो मल्लं गच्छतीति** वाक्यप्रामाण्यमुपपादयन्ति तन्मतं दूषयति। **एतेनेति।** प्रकृत्यर्थान्वितफलस्य क्रियायामुक्तोभयसम्बन्धेनान्वयोपगमेनेत्यर्थः। **इत्यपि** निरस्तमित्यग्रिमेणान्वयः। विहगवृत्तित्वविशिष्टभूमिसंयोगाश्रयत्वस्य विहगान्तरेऽभावादित्य**भिप्रायः**।

चषकम्

क्रियावति क्रियावच्छिन्नभेदसामानाधिकरण्यघटितोभयसम्बन्धेन क्रियाविशिष्टसंयोगासम्भवात्। **नन्वेवमपि** कथं तत्प्रयोगवारणं स्वावच्छिन्नभेदाश्रयवृत्तित्वस्वजन्यत्वोभयसम्बन्धेन विहगगमनविशिष्टत-त्संयोगाश्रयत्वस्य भूमाविव विहगेऽपि भावात्। **स्वावच्छिन्नभेदसमानाधि-करणसंयोगस्य** सत्वे भेदः प्रयोजक इव प्रकृतेऽप्युक्ताबाधितक्रियावद्भेद-सामानाधिकरण्यघटितोभयसम्बन्धेन **क्रिया**विशिष्टसंयोगस्य सत्त्वे क्रियावत्त्वं बाधकमपि न भवतीत्यस्यापि वक्तुं शक्यत्वा**दन्यथा** वस्तुतः साध्यवद्भिन्नवृत्तिसाध्याभावसत्त्वे साध्यवत्त्वमपि बाधकीभवेदिति कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादिति ग्रन्था**नुत्थानापत्तेः**।

यदि च तत्र क्रियाजन्यसंयोगस्य कर्मात्मनेपदार्थस्याश्रयत्वस्वानुकूल-क्रियावच्छिन्नभेदवत्त्वोभयसम्बन्धेन प्रथमान्तार्थेऽन्वय इत्युच्यते **तदापि** यत्र चैत्रमैत्रोभयकर्मजः संयोगस्तत्र चैत्रे यथोक्तमैत्रक्रियावच्छिन्नभेदस्यापि सत्त्वाच्चैत्रेण गम्यते चैत्र इति प्रयोगो **दुर्वारो दुरुपपादश्च** चैत्रेण चैत्रो न गम्यत इति तदुभयसम्बन्धावच्छिन्नप्रतियोगिताकस्य तदभावस्य तत्र **बाधात्। स्वोपधायक**क्रियात्वेनानुगतीकृतक्रियावच्छिन्नभेदनिवेशे च चैत्रेण मैत्रो गम्यत इत्यपि न स्यादिति **चेद्दत्त**दृष्टिर्भव। भेदः फलं च कर्मात्मनेपदार्थः स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन चैत्रनिष्ठक्रियाविशेषितभेदस्य

सामानाधिकरण्यस्वप्रतियोगितावच्छेदकजन्यत्वोभयसम्बन्धेन **फलेऽन्वयः** विशिष्टफलस्य नञसमभिव्याहारे **कर्मणीति** चैत्रवृत्तिगमनविशिष्टभेदविशिष्ट-संयोगाश्रयो ग्राम इति शाब्दबोध**स्तत्समभिव्याहारे** तु **तादृशविशिष्टाभावस्येति** चैत्रवृत्तिगमनविशिष्टो भेदो न मैत्रस्या**पितु** चैत्रस्यैव तद्भेदविशिष्टः संयोगो मैत्र एव न चैत्र इति सूपपदश्चैत्रेण न गम्यते चैत्र इति चैत्रेण गम्यते मैत्र इति च प्रयोगः।

तात्पर्यटीका

व्युत्पत्तिभेदं सूचयन्वारणप्रकारं दर्शयति **क्रियावतीति**। **एवमपि** फले क्रियाया उभयसम्बन्धेनान्वयोपगमेऽ**पि**। **विहगेऽपि** भावादिति संयोगरूपफले विहगावच्छेदेन क्रियावच्छिन्नभेदसामानाधिकरण्यासम्भवेऽपि भूम्यवच्छेदेन तत्र तत्सामानाधिकरण्यस्य सम्भवादिति भावः। **क्रिया**विशिष्टसंयोगस्य क्रियोपलक्षित**संयोगस्य**। **वक्तुं शक्यत्वादिति**। **अयं** भावः यद्यपि साध्याभावपदवैयर्थ्यापत्या तत्र साध्वद्भिन्नवृत्तित्वमुपलक्षणं प्रकृते चोक्तप्रयोगवारणाय विशिष्टान्वयाभ्युपगमे क्षतिविरह**स्तथापि** यत्र स्वावच्छिन्नभेदगर्भसामानाधिकरण्यं यदधिकरणावच्छेदेन स्वविशिष्टतद्वत्त्वं तदधिकरण एवेति नियमानभ्युपगमवादे**नेदमिति**। **अत एव** प्रागबाधितेत्याद्यग्रे च भेदमात्रस्य सम्बन्धत्वपर्यन्तानु**धावनम्**। **अन्यथा** तत्र क्रियावत्त्वस्य बाधकत्वे। **साध्यवद्भिन्नवृत्तीति**। **न चात्र** क्रियाध्याहारे समासानुपपत्ति**रन्यथा** सप्तम्यनुपपत्तिरिति **वाच्यम्**। क्रियान्वयाभावेऽपि क्वचित्सप्तम्याः साधुत्वायैव सप्तम्यधिकरणे चेत्यत्र चकारग्रहणात्।

तत्र विहगेन गम्यते भूमिरित्यत्र। धावन्तं मैत्रं गच्छतीत्यादौ धावति मैत्रे क्रियावच्छिन्नभेदवत्त्वरूपसम्बन्धबाधेनाप्रमाण्यापत्तेर्वारणाय स्वानुकूलेति **क्रियाविशेषणम्**। **मैत्रक्रियेति** क्रियायाः प्रातिस्विकरूपेण निवेशमभिप्रेत्य। **न स्यादिति**। चैत्रक्रियाया इव मैत्रक्रियाया अपि स्वोपधायकत्वेन तदवच्छिन्नभेदस्य मैत्रे बाधादिति भावः। **विशिष्टाभावस्य** कर्मण्यन्वय इति योजना। तस्य च प्रतियोगिविशिष्टमित्युक्त्या बोधोऽप्युक्तः।

चषकम्

वारितस्तु चैत्रेण गम्यते चैत्र इति सर्वं **सुस्थम्**। कर्तृप्रत्ययस्थले चाधेयतया प्रकृत्यर्थान्वितफलस्य द्वितीयाया अर्थस्य भेदरूपे परार्थे सामानाधिकरण्यस्वजनकक्रियावच्छिन्नप्रतियोगिताकत्वोभयसम्बन्धेनान्वयस्तादृशभेदस्य च स्वप्रतियोगितावच्छेदकत्वसम्बन्धेन क्रियायामि**तरत्प्रागवदिति** ग्रामवृत्तिसंयोगविशिष्टभेदविशिष्टगमनवांश्चैत्र इति शाब्दबोध इति स्वजनकचैत्रक्रियावद्भेदो न चैत्र वृत्तित्वावच्छिन्नसंयोगविशिष्टो**ऽपि तु** मैत्रवृत्तित्वावच्छिन्नसंयोगविशिष्ट **एवेति** तद्भेदविशिष्टक्रियावत्त्वं चैत्रेऽस्तीति मैत्रङ्गच्छति चैत्र इति प्रयोग उपपद्यते **न स्वं गच्छती**त्यादिरिति **विध्वन्तु** ते शाखाचङ्**क्रमणम्**। गां पयो दोग्धि गोप इत्यत्र गवादिपदोत्तरं द्वितीया तूक्तादन्यदेव कर्मत्वं **बोधयति**।

कारकाधिकारीयेणाकथितञ्चेति सूत्रेण तत्र तद्विधानात्। उक्तापादानत्वादिभिन्नं धातुप्रतिपाद्यान्वयि यद्धर्मान्तरं तदवच्छिन्नं कर्मेति तदर्थः। गवां पयो दोग्धीत्यादौ पयसो गोसम्बन्धविवक्षायां द्वितीयावारणाय **धातुप्रतिपाद्यान्वयीति**। **कथं** तर्हि गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत **भिषक्**स्वभेषजैरिति तत्र रोगध्वंसानुकूलव्यापारस्य धात्वर्थत्वे रोगान्वितसम्बन्धप्रतियोगिनामेषां गौणकर्मत्वसम्भवादिति **चेत्सत्यं** ध्वंसानुकूलव्यापारमात्रं धात्वर्थः। रोगमिति षष्ठीसाकाङ्क्षं कर्मपदमध्याहार्यमित्यवेहि। **तत्र** क्षरणानुकूलव्या[पा]रो दुहेरर्थः क्षरणान्वयी विभागो द्वितीयायाः जनकत्वं संसर्गः। **न च** विभागो[ऽपा]दानत्वमिति **शङ्क्यम्**। धातुवृत्तिग्रहविशेष्यान्वयिनो विभागस्यैवापादानत्वा**द्**वृक्षात् पततीत्यादौ तथा दृष्टत्वात्। **वस्तुतस्त्वत्र** विभागो धात्वर्थतावच्छेदकतावच्छेदक एव तदाश्रयत्वमेव गौणं कर्मत्व**मपादानत्वं** तु स्वरूपसम्बन्धरूपं तदवधित्वमेव वृक्षाद्विभजत **इत्यादाविव**। **अत** एव गोभ्यः पयो दोग्धीत्यपि प्रयोगो विवक्षावशा**देतेन** गृहात् त्यजतीति प्रयोगापत्तिर्व्यापारमात्रस्य धात्वर्थत्वे। **एवं** गृहादंगौणकर्मत्वापत्तिर्विभागावच्छिन्नव्यापारस्य तदर्थत्वे धातुप्रतिपाद्य-विभागान्वय्यवधित्वावच्छिन्नत्वादित्यपि **प्रत्युक्तम्**। साक्षाद्धात्वर्थतावच्छेदक-विभागाश्रयत्वस्यैवास्माकं मुख्यकर्मत्वात्।

तात्पर्यटीका

विहगेन गम्यते विहग इति प्रयोगोऽप्युक्तदिशा वारणीय **इत्याहेति सर्वमिति**। विशिष्टशक्तौ यश्चैत्रवृत्तिगमनत्वरूपान्वयितावच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगितानिरूपकचैत्रीयगमनवद्भेदलाभेऽपि तस्य विशिष्टार्थैकदेशभेदस्योक्तोभयसम्बन्धेन फलेऽनन्वये तादृशविशिष्टफलस्य कर्मान्वयालाभो यश्च स्वाश्रयजन्यत्वसम्बन्धेन तादृशभेदप्रतियोगितावच्छेदकत्वस्य विशिष्टार्थस्यैव फलेऽन्वये चैत्रेण गम्यते चैत्र इति प्रयोगप्रामाण्यप्रसङ्गः सोऽप्यत्र न भवतीत्याह**सुस्थमिति। इतरक्रियाया** आख्यातार्थान्वयादिकम्। **प्राग्व**दाख्यातास्याश्रयत्वाद्यर्थकत्वे तत्रान्यथाकर्त्तरीत्यर्थः। **न चैत्रेति**। न स्वपदार्थचैत्रवृत्तिसंयोगविशिष्ट इत्यर्थः। **इति** न स्वमित्यन्वयः। **तद्भेदेति**। मैत्रवृत्तित्वावच्छिन्नसंयोगविशिष्टचैत्रक्रियावद्भेदेत्यर्थः। कर्त्तृप्रत्यये शङ्कोत्तरभावे संस्थिते कर्मप्रत्यये तस्य प्रसारणम्। तत्र च तस्मिन्नवसिते पुनः कर्तृप्रत्यये तदिति दर्शयति **शाखाचङ्क्रमणमिति**। पय इत्यस्य कर्त्तृवाचकत्वभ्रममपाकर्त्तुं पृथक्कर्त्तृपदं निर्दिशति **गोप इति। अत** एवाग्रे व्यापारकर्त्तेति शाब्दबोधाकारप्रदर्शनम्। **अन्यथा** कृतिप्रकारकबोधप्रदर्शनविरोधापत्तेः।

धातुप्रतिपाद्यत्वं धातुजन्यप्रतिपत्तिविषयत्वमात्रं न तु विशेष्यत्वपर्यन्तं धात्वर्थतावच्छेदकक्षरणान्वयिविभागाश्रयगवादेगौंणकर्मत्वानुपपत्तेस्तथा सत्याशङ्कते। **कथं तर्हीति। इत्यवेहीति। एतेन** कारकाणामेव क्रियान्वय इति नियमः **सूचितः। एते**नेत्यादिना वक्ष्यमाणास्वरसादाह **वस्तु**तस्त्विति। **अत** एव द्वितीयार्थाधेयत्वात् पञ्चम्यर्थावधिमत्त्वस्य भिन्नत्वादेव ।

चषकम्

दुह्यते क्षीरमित्यादौ गौणकर्मासमभिव्याहारे विभागावच्छिन्नक्षरणाश्रयत्वरूपप्रधानकर्मत्वस्यात्मनेपदेन बोधनेऽप्येकदोभयकर्मत्वबोधनस्यानुपदवक्तव्यानुशासनाव्युत्पन्नत्वान्न दुह्यन्ते क्षीराणि गौरित्यादयः प्रयोगाः। **एवञ्च** धात्वर्थतावच्छेदकक्षरणरूपफले प्रधानकर्मक्षीरान्वितद्वितीयार्थवृत्ति-

त्वान्वया**द्गो**निष्ठविभागानुकूलपयो निष्ठक्षरणानुकूलव्यापारकर्त्तेति शाब्दबोधः। **दुह्य**ते गौः क्षीरमित्यत्र क्षरणजन्यविभागाश्रयत्वं गवादिनिष्ठमाख्यातार्थोऽप्रधाने दुहादीनामित्यनुशासनात् क्षीरवृत्तित्वस्य धात्वर्थक्षरण एवान्वयः। आख्यातार्थे च क्षरणे धात्वर्थव्यापारान्वयस्**तथा** च क्षीरनिष्ठविभागावच्छिन्न-क्षरणानुकूलव्यापारजन्यक्षरणजन्यविभागाश्रयो गौरिति शाब्दबोधः। **क्षरण**विभागयोर्द्वेधा भानासहिष्णुतायां तु विभागक्षरणव्यापारेषु विशकलितेषु धातोः शक्तित्रयमावश्यकं विशिष्टलाभोऽन्वयबलात् कर्माख्यातस्थले त्वाकाङ्क्षावैचित्र्येण तेषां कर्त्राख्यातस्थलीयविशेषणविशेष्यभाववैपरी-त्याद्व्यापारजन्यक्षरणजन्यविभागपर्यन्तस्य धातोरेव लाभ इत्याश्रत्वमात्र-माख्यातार्थः। **इत्थञ्च** पयः पयो दोग्धीत्यादिप्रयोगवारणं प्रकृत्यर्थान्वितविभागस्य पयो निष्ठक्षरणस्य च पूर्वोक्तोभयसम्बन्धेनान्वयमुपगम्यैवेति **विवेचनीयम्।** अजां ग्रामं नयतीत्यत्र संयोगानुकूलक्रियानुकूलव्यापारो नयत्यर्थः संयोगरूपफलाश्रयत्वं ग्रामादेर्गौणं कर्मत्वम्। **संयोगा**नुकूलक्रियारूपफलाश्रयत्वं चाजादेर्मुख्यं **तदेव** चाजा ग्रामं नीयते इति कर्माख्यातेन बोध्यते **प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामित्यनुशासना**दिति नाजां ग्रामो नीयत इति प्रयोग इति।

तात्पर्यटीका

ननु दुह्यते क्षीरमित्यत्र विभागावच्छिन्नक्षरणानुकूलव्यापारस्य धात्वर्थस्य विभागावच्छिन्नक्षरणरूपाख्यातार्थेऽन्वयवद्विभागरूपाख्यातार्थे व्यापारजन्यविभागावच्छिन्नक्षरणस्यान्वयसम्भवाद्दुह्यन्ते क्षीराणि गौरित्यादयः प्रयोगा आपद्येरन्नित्याशङ्कमानं प्रत्याह। **दुह्य**ते **क्षीरमित्यादाविति**। दुह्यन्ते क्षीराणीति समानवचनता क्षीरस्याप्याख्यातार्थविशेष्यत्**वमाविष्कर्त्तुम्**। **न प्रयोगा** इति योजना। **गवादिनाष्ठमिति** गवाद्यप्रधानोपस्थितिसहकारेण कर्मात्मनेपदजन्यार्थोपस्थितेः कारणत्वं स्फुटीकर्त्तुम्। एवमग्रेऽपि। **व्यक्तीभविष्यति** चैतदुपरिष्टात्। **अन्वयबलात्** कर्माख्यातसमभिव्याहरे विभागस्य क्षरणे तस्य च व्यापारेऽन्वयबलात्।

इत्थञ्च प्रधानाप्रधानोभयकर्मनिष्ठविभागाश्रयत्वस्य गौणकर्मत्वे सति च। **आदिना** पयो दुह्यते पय इति प्रयोग परिग्रहः विभागाश्रयगोनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य क्षीरनिष्ठक्षरणे सत्त्वेनानुकूल-त्वघटितोक्तोभयसम्बन्धेनान्वयेऽप्युक्तप्रयोगवारणं न भवतीत्यय उक्तं प्रकृत्यर्थाऽ**न्वितेति**। **पूर्वो**क्तोभयसम्बन्धेनेति सम्मुग्धाकारोक्तिः। तथा च पयोवृत्तित्वविशिष्टविभागश्रयो न गौरपितु पयस्तन्निष्ठो न क्षरणवद्भेद इति **तथा** विभागे पयो निष्ठक्षरणजन्यत्वसत्त्वेऽपि पयसि प्रथमान्तपदोपस्थाप्ये द्वितीयान्तपदोपस्थाप्यपयो निष्ठक्षरणावच्छिन्नभेदासत्त्वेन स्वावच्छिन्न-भेदसामानाधिकरण्यघटितनिरुक्तोभयसम्बन्धेन पयो निष्ठक्षरणविशिष्टो विभागो न पयस्यपितु गव्यंवेति **वा** तयोर्वारणमित्याह **विवेचनीयमिति**। **स्वं** गच्छतीति प्रयोगवारणक्षमः पदद्वयार्थस्य तथान्वयः पयः पयो दोग्धीत्यादेश्च वारणक्षमस्तु धात्वर्थयोरेव द्वयोः स इति विवेकः स्फुट एवेत्यर्थः। **मुख्यमिति**। कर्मत्वमित्यनुषज्यते।

चषकम्

तथा च ग्रामवृत्तिर्यः संयोगस्तदनुकूलायाजावृत्तिक्रियातदनुकूलव्यापारकर्त्ता देवदत्त इति शाब्दबोधः **कर्म**प्रत्यये तु **संयोगानु**कूलक्रियाया अजानिष्ठाया आत्मनेपदार्थतया देवदत्तवृत्तिकृतिजन्यो यो ग्रामवृत्तिसंयोगानुकूल-क्रियानुकूलव्यापारस्तज्जन्यसंयोगानुकूलक्रियावत्यजेति **शाब्दबोधरीतिः। अथैवं** भूमिं पर्णं पतत्यग्निं घृतं जुहोतीत्यादिप्रयोगापत्तिरधःसंयोगानुकूलक्रियायाः पतत्यर्थतयाग्निसंयोगानुकूलक्रियानुकूलव्यापारस्य जुहोत्यर्थतया भूम्यग्न्यादेः कर्मतासम्भवात्। **न च** साक्षाद्धात्वर्थतानवच्छेदकाग्निसंयोगवत्तया **नाग्ने**र्जुहोतिकर्मतेति **वाच्यम्**। तथापि तस्य **गौण**कर्मतानपायादिति **चेदा**श्रयानविच्छन्नधात्वर्थतावच्छेदकतावच्छेदकताश्रयफलाश्रयत्वस्यैव गौणकर्मत्वा**देवमन्यत्रापि**। आश्रयाविशेषितसंयोगादेरेव गम्याद्यर्थतावच्छेद-कत्वापगमान्न ग्रामदेस्तत्कर्मत्वानुपपत्तिः।

नरकपतित इत्यत्र त्वधिकरणत्वार्थिका ज्ञापकसिद्धान्यैव द्वितीया। **इत्थञ्च** सप्तम्यर्थाधेयत्वान्वयबुद्धिं प्रत्यन्यत्र धातुवृत्तिग्रहविशेष्यताविशिष्टविशेष्यत-येवात्राश्रयावच्छिन्न**तद**वच्छेदकतादिविशिष्टविशेष्यता**वच्छे**दकत्वादिनापि धातुजन्योपस्थितेर्हेतुतया भूमौ पर्णं पतति संस्कृतेऽग्नौ घृतं जुहोतीत्यादिप्रयोगोपपत्तिरित्य**वधेयम्**। **अजां** ग्रामं यापयतीत्यादौ णिजर्थव्यापारे तत्प्रकृतिधात्वर्थक्रियाया: स्वकर्तृत्वनिर्वाहकत्वसंसर्गेणाऽन्वयाद-जावृत्तिग्रामकर्मकगमनस्य कर्तृत्वनिर्वाहको य: प्रेरणादिरूपो व्यापारस्तत्कर्तेत्यन्वयबोध:। **अथै**वमजावृत्तित्वं तत्कर्तृकत्वमेवेति कथं द्वितीया साधीयसी। **व्यापारे क्रियाया** अनुकूलत्वसंसर्गेणाऽनन्वये तदाश्रयस्य कर्तु: कर्मताया दुरुपपादत्वादिति **चेन्मैवम्**। गतिबुद्धीत्यादिसूत्रेणात्र कर्तुरेव कर्मसङ्ज्ञा**विधानात्**।

तात्पर्यटीका

संयोगानुकूलक्रियाया:। न तु क्रियाजन्यसंयोगस्य। तथा सति ग्रामोऽजां नीयत इति प्रयोगापत्ते:। **अजा**निष्ठाया इति प्राग्वत्। क्रियासंयोगयोर्द्वेधाभानासहिष्णुतायां तु पूर्ववत् खण्डशक्तिमभ्युपेत्य देवदत्तवृत्तिकृतिजन्यव्यापारजन्या या ग्रामवृत्तिसंयोगनुकूलक्रिया तद्वत्यजेति रीत्याऽन्वयबोधो वाच्य इत्यभिप्रेत्याह **रीतिरिति नाग्ने**र्जुहोतिकर्मतेति साक्षाद्धात्वर्थतावच्छेदकफलाश्रयत्वस्यैव मुख्यकर्मत्वादिति भाव:। **गौणकर्मतानपायादिति**। धात्वर्थतावच्छेदकतावच्छेदकफलाश्रयत्वस्यैव गौणकर्मतयोक्तत्वादिति भाव:। **एवमन्यत्रापीति**। पतधात्वर्थता-वच्छेदकफलनिष्ठावच्छेदकताया अप्याश्रयावच्छिन्नतयाश्रयानवच्छिन्न-धात्वर्थतावच्छेदकताश्रयत्वस्यैव च मुख्यकर्मत्वस्य भूम्यादावभावात्तथा प्रयोगवारणमिति भाव:। **नन्वेव**मुत्तरदेशसंयोगानुकूलक्रियाया गमधात्वर्थत्वेन संयोगनिष्ठगमधात्वर्थतावच्छेदकताया उत्तरदेशरूपाश्रयावच्छिन्नतया तत्कर्मत्वं ग्रामादेरपि दुर्घटमिति शङ्कां वारयति। **आश्रयाविशेषितसंयोगादेरेवेति**।

ज्ञापकसिद्धेति। नरकपतित इत्यत्र **द्वितीयाश्रितेति सूत्रेण** द्वितीयान्तस्य पतितशब्देन समासविध्यन्यथाऽनुपपत्या द्वितीयाविधानेऽप्यस्यैव तात्पर्यकल्पनादिति भावः। **अन्यत्र** स्थाल्यां पचतीत्यत्र। **अत्र** भूमौ पततीत्यत्र। **अवच्छेदकतावच्छेदकत्वं** तदवच्छेदकतादीत्युभयत्रादिपदार्थः। अग्निवृत्तित्वमात्रस्य विधेयस्योद्देश्यतावच्छेदकाभेदेन शाब्दबोधानुपपत्तेः संस्कृत **इत्युक्तम्**। **एवं** कर्त्तृत्वनिर्वाहकत्वस्य संसर्गत्वे। णिजन्तकर्मतामपाकर्त्तुमाह **व्यापार इति**। **प्रेरणारूपेत्यर्थः**। क्रियाया अजांनिष्ठायाः। **अनुकूलत्वसंसर्गेणेति**। तथा च गमनस्य णिजर्थव्यापारफलत्वाभावेन तदाश्रयस्य फलाश्रयत्वरूपं कर्मत्वं कथं स्यादिति भावः।

चषकम्

चैत्रेण ग्रामं याप्यतेऽजेत्यत्र तु **तादृश**व्यापारनिर्वाह्यकर्त्तृतानिरूपक**स्तादृश**धात्वर्थः कर्मात्मनेपदोपस्थिताख्यातसामान्यार्थे कर्त्तृत्वेऽन्वेति संयोगरूपे धात्वर्थैकदेशे फले च ग्राममिति द्वितीयान्तार्थ ग्रामवृत्तित्वमिति च चैत्रकर्त्तृकव्यापारस्य निर्वाह्यकर्त्तृत्वनिरूपकं यद्ग्रामवृत्तिसंयोगानुकूलं गमनं तत्कर्त्र्यजेति शाब्दबोधः। **न च** यक्समभिव्याहृताख्यातार्थगमनकर्त्तृत्वस्यान्वयबोधोपगमे चैत्रो गम्यत इत्यस्यापि साधुतापत्तिरिति **वाच्यम्**। **परस्मैपद**समभिव्याहृततत्तद्धात्वप्रतिपाद्यविशिष्टार्थान्वितान्यकर्त्तृत्वाभिधानस्य शव्विषयत्वात् **प्रकृते** च कर्त्तृत्वघटितसंसर्गेण प्रकृत्यर्थान्वितणिजर्थात्परस्मैपदसमभिव्याहृतधातुप्रतिपाद्याद्भिन्नस्य निर्वाह्यत्वघटितसंसर्गेण णिजर्थान्वितप्रकृत्यर्थस्य कर्त्तृत्वबोधाङ्गीकारे **क्षतिविरहात्**। **पचते** इत्यादावपि पचतीति परस्मैपदसमभिव्याहृत**धातुप्रतिपाद्य**विशिष्टार्थान्वितकर्त्तृत्वाभिधानमक्षुण्ण मेवेति शव्विषयता निराबाधैव।

केवलात्मनेपद्येधधातुकर्त्तृत्वसङ्ग्रहाय नञ्द्वयगर्भता। **तथा च** यत्कर्त्तृत्वेनान्वितस्य विशिष्टार्थस्य विशेषणविशेष्यभाव- विपरीतविशेषणविशेष्यभावापन्नोऽर्थः परस्मैपदसमभिव्याहृतात्तद्धातोः प्रतिपद्यते तद्भिन्ने कर्त्तृत्वे आख्यातेन विवक्षिते शविति **सूत्रार्थः**। कर्त्तृकर्मासमभिव्याहारे ग्रामो

याप्यत इत्यत्र संयोगरूपभावनाविशेष्यतया ग्रामादेर्भानेऽपि कर्त्तुः कर्मत्वविवक्षया तत्समभिव्याहारेणाजावृत्ति**यथोक्त**गमनजन्यसंयोगशालि- ग्रामतात्पर्यका **नाजां** ग्रामो याप्यत इत्यादयः प्रयोगाः **ण्यन्ते** कर्त्तुश्च कर्मण **इत्यनुशासनात्** कर्तृकर्मसमभिव्याहृतकर्माख्यातार्थान्वयबुद्धिं प्रति समानविशेष्यताप्रत्यासत्या कर्त्तृकर्मोपस्थितेः कारणत्वान्न द्वितीया साधीयसी **न वास्यान्वयबोधकत्वं** कर्मान्तरगुणीभावानापन्नक्रियायामेव तया स्वार्थबोधनात्।

तात्पर्यटीका

तादृशव्यापारेति। णिजर्थप्रेरणारूपव्यापारेत्यर्थः। **तादृशधात्वर्थः** संयोगानुकूलव्यापाररूपधात्वर्थः। **परस्मैपदसमभिव्याहृतेति**। तथा च गच्छतीति परस्मैपदसमभिव्याहृतेन गमधातुना यो विशिष्टोऽर्थः प्रतिपाद्यते स एव यदि चैत्रो गम्यत इत्यत्रापि तर्हि तद्धात्वप्रतिपाद्यविशिष्टार्थान्वितान्यदेव कर्त्तृत्वं गम्यते इत्यात्मनेपदार्थकर्त्तृत्वमिति तदभिधाने चैत्र पचते इतिवच्छविषयतयायकोसाधुत्वमिति दूरापास्तमात्मनेपदमिति भावः। प्रकृते तु नैवमित्याह **प्रकृते चेति**। ण्यन्तधातुस्थले चेत्यर्थः। **क्षतिविरहा**च्छविषयताविरहात्। **धातुप्रतिपाद्येति**। एतेनात्मनेपदार्थकर्त्तृत्वस्य तादृशधात्वप्रतिपाद्यविशिष्टार्थान्वितकर्त्तृत्वान्यत्वमक्षतमिति सूचितम्।

नन्वद्वयगर्भतायां कथमेधधातुकर्त्तृत्वसङ्ग्रह इति तद्दर्शयति। **तथा चेति**। **अयं** भावः। एधत्ते इत्यत्रैधधात्वर्थकर्त्तृत्वं न यच्छब्दार्थः एधधातौ परस्मैपदसमभिव्याहाराभावात् **किन्तु** स्वनिर्वाह्यकर्त्तृत्वनिरूपकत्वसंसर्गेण प्रेरणाविशिष्टया धात्वर्थकर्त्तृत्वं तथा तदन्वितनिरुक्तार्थाद्भिन्न एव स्वकर्त्तृत्वनिर्वाहकत्वसम्बन्धेन याधात्वर्थगमनविशिष्टप्रेरणारूपः परस्मैपदसमभिव्याहृतोक्तण्यन्तधातोः प्रतिपाद्यत इति तद्भिन्नमेधधातोः कर्त्तृव्यं **न तु** ण्यन्तधातोरित्येधते इत्यत्र शविषयतास्ति **न तु** याप्यत इत्यत्रापीति। **यथोक्तगमनेति**। स्वनिर्वाह्यकर्त्तृतानिरूपकत्वसम्बन्धेन णिजर्थव्यापारान्वित-गमनेत्यर्थः। **नाजामिति**। वेदमध्याप्यते विधिर्विधिमध्याप्यते वेद

इत्यादिप्रयोगद्वयस्य प्रामाण्ये तु पदभेदभिन्नतयाऽत्रान्यथैव व्युत्पत्तेः कल्पनमावश्यकमेव **तदुक्तम्**। बुद्धिभक्षार्थयोः शब्दकर्मणाञ्च **निजेच्छयेति**। **निजेच्छयेत्य**नेनाप्यन्यान्यत्र तत्तदेकैकोपस्थितेः सहकारित्वेऽप्यत्रान्यपरत्वेनागृह्यमाणाख्यातजन्योपस्थितेः कारणीभूतायाः सहकारिणी तथाविधान्यतरकर्मोपस्थितिर्वाच्येति **सूचितम्**। द्वितीयाया असाधकत्वं प्रदर्श्य तज्जन्यशाब्दबोधानुपपत्तिमप्याह। **न वेति**।

चषकम्

तदिदमनुपदमेव विवेचयिष्यते। ग्राममिति द्वितीयार्थस्य णिप्रकृतिधात्वर्थतावच्छेदकेऽन्वये तु न कोऽपि दोष इति तथोक्तं प्राक्। **न चाख्याता**र्थविशेष्यतया कर्त्तृकर्म**विवक्षायां भावे** तथा प्रयोगापत्तिरकर्मकेभ्य इत्यस्याविवक्षितकर्मकेभ्य इत्यर्थादिति **वाच्यम्**। कथञ्चित्कर्त्तृकर्मणो धात्वर्थान्वयविवक्षायामविवक्षितकर्मकत्वासम्भवात्। **तथाहि**। णिप्रकृतिकर्त्तृप्रयोगेणैव तथासत्यप्याख्यातार्थविशेषणक्रियाविशेषणतया कर्त्तृकर्मविवक्षाया अवश्यम्भावे ण्यन्तधातोः सकर्मकतया न भावाख्यातस्य साधुतेति कथं तथाविधाः **प्रयोगाः**।

ण्यन्तकर्मासमभिव्याहरे पुनर्ग्रामं याप्यते इति भावप्रत्ययस्त्विष्ट एव। **तत्र च** ग्रामकर्मकगमनस्य कर्त्तृत्वनिर्वाहको व्यापार इति **शाब्दबोधसरणिः**। **चैत्रेणाजा** ग्रामो याप्यत इत्यादितोऽपि ण्यन्तोत्तराख्यातार्थकर्त्तृत्वकर्मत्वयोरुभयो**र्ण्यर्न्त**तत्प्रकृतिधात्वर्थकर्मणोयुगपद्व्यापारनिर्वाह्यकर्त्तृतानिरूपकगमनस्य कर्त्र्यजा फलवांश्च ग्राम इत्यन्वयबोधापत्तिस्तु **ण्यन्तेकर्त्तुश्च कर्मण इत्युक्तानुशासना**त्तद्धर्मिकस्वार्थकर्त्तृत्वान्वयपरत्वेनागृह्यमाणाख्यातजन्यकर्मत्वोपस्थितेस्तदन्यधर्मिकस्वार्थकर्मत्वबोधे हेतुतायाः कल्पनया **वारणीया**। **तण्डुलः** साहाय्येन पाच्यते चैत्रेणेत्यत्र चैत्रकर्त्तृकप्रेरणाया निर्वाह्यो यः सहायवृत्तिकर्त्तृत्वनिरूपकः पाकस्तज्जन्यविक्लृत्तिशाली तण्डुल इत्यन्वयबोधः।

तात्पर्यटीका

तदिदं तादृशविवक्षाकालीनं द्वितीयया कर्मत्वावबोधनम्। **अनुपदमेव** प्रकृतिविकृतिकर्मप्रसङ्गे। **विवेचयिष्यत इति। काष्ठं** भस्मराशिं क्रियत इति प्रयोगवारणाय **कर्मत्वान्तरविशेषणतानापन्नक्रियायामेव द्वितीयया कर्मत्वं बोध्यत इति नियमस्या**वश्यमङ्गीकरणीयत्वादिति भावः। **न कोऽपीति**। ण्यन्तोत्तराख्यातेन गमनकर्त्तृत्वरूपफलस्यैवाभिहितत्वादतथाभूतणिप्रकृतिधात्वर्थतावच्छेदक- संयोगवतः कर्मत्वानपायादित्यर्थः। तथोक्तं ग्रामवृत्तिसंयोगानुकूलं गमनमित्युक्तम्। **नन्वविवक्षित**कर्मकत्वमाख्यातार्थविशेष्यतया यद्धातोः कर्म न विवक्षितं **तत्वमित्थ**ञ्चाख्यातार्थविशेषणक्रियाविशेषणतया कर्त्तृकर्मविवक्षायामप्याख्यातार्थ- विशेष्यतया तद्धातोः कर्त्तृकर्म न विवक्षितमेवेत्यविवक्षितकर्मकात्तद्धातोर्भा- वाख्याताविरोधेन तथा प्रयोगो दुर्वार इत्याशङ्कते। **न चेति**। स्वकपोलकल्पनया सूत्रं व्याख्याय सकलानिष्टप्रयोगापादनं सम्प्रदायविरुद्धमित्याशयेन समाधत्ते। **कथञ्चिदिति।** आख्यातार्थविशेषणक्रियाविशेषणतयापीत्यर्थः। **अविवक्षित**कर्मकत्वासम्भवादिति तथा चाख्यातार्थविशेष्यत्वेन विवक्षाशून्यत्वपर्यन्तं नार्थ इति भावः। **तथा सत्यपीति**। आख्यातार्थविशेष्यत्वेन कर्त्तृकर्मणोर्विवक्षाविरहे सत्यपीत्यर्थः। तथा विधा अजां ग्रामो याप्यते इति भावे प्रयोगाः।

इष्ट एवेति। याधातोः सकर्मकत्वेऽपि ण्यन्तधातोरुक्तरीत्याऽकर्मकाद्भावे प्रत्ययस्याविरुद्धत्वादिति भावः। चैत्रेण ग्रामं याप्यते इत्यत्र ग्रामकर्मकगमनस्य कर्त्तृत्वनिर्वाहकश्चैत्रवृत्तिर्व्यापार इति शाब्दबोध ऊहनीय इत्याह **सरणिरिति**। **ण्यन्ततत्प्रकृतिधात्वर्थकर्मणोरिति**। ण्यन्ततत्प्रकृतिभूतौ यौ धातू तदर्थौ व्यापारगमने तत्कर्मणोरजाग्रामयोरित्यर्थः। **यक्**समभिव्याहृताख्यातस्य कर्त्तृत्वबोधकत्वमपि व्युत्पादितमेव। ग्रामो याप्यत इत्यत्र संयोगरूपभावनाविशेष्यतया ग्रामोदेर्भानमप्यङ्गीकृतमेव। **तथा** चैकैकमात्रसमभिव्याहारे एकैकविशेष्यकबोधे इष्टापत्तिरेवेत्यतो **युगपदित्युक्तम्**। फलवांश्चेत्यत्रापि षष्ठ्यन्तमनुकृष्यते। गति सूत्रे धातुविशेषोपादानप्रयोजनं

दर्शयति। **तण्डुल इति**। **सहायेनेति**। तेन पचिधातोः कर्त्ता सहायो न कर्मेति दर्शितम्। निर्वाह्य इत्यत्र निर्वाह्यत्वं यदीदमेतन्निर्वाह्यमिति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषस्तदा कर्तृत्वस्य संसर्गतया प्रकारतया वेति द्वेधा भानमपि न भवतीति **निगर्वः**।

चषकम्

तत्र च सहायकर्तृत्वविशिष्टे पाके प्रेरणाया उक्तसम्बन्धेनान्वये सहायकर्तृत्वेऽपि तृतीयान्तार्थेऽस्या अन्वये न कर्त्रोरन्यतरमात्रं प्रयोजयति न वक्ष्यमाणोऽतिप्रसङ्गो**ऽर्थविवेकः** पदव्युत्पत्तिमसृणान्तःकरणैः करणीय इत्यास्तां **तावत्**। **वस्तुतस्तु** कर्तृत्वनिर्वाहको व्यापारो णिजर्थः। णिजन्तस्यापि धातुत्वेन यथोक्तफलाश्रयत्वादजायाः कर्मत्वम्। **तथा** चाजावृत्तियद्ग्रामकर्मकगमनकर्तृत्वं तन्निर्वाहकव्यापारवान् देवदत्त इति **शाब्दबोधः**।

पाचयत्योदनं सहाय इत्यादयोऽपि प्रयोगाः साधव एव। **कथमन्यथा**ऽजिग्रहत्तं जनको धनुस्तदित्यादि। ग्रहधातु**र्ज्ञानार्थक** इति तु कुशकाशावलम्बनम्। **परन्तु** पाके विशेषणतयापि सहायकर्तृत्वविवक्षायां पाचयत्योदनं सहायेनेत्यपि प्रयोगः। **तदुक्तं** विवक्षातः कारकविभक्तयो नाना भवन्तीति। **एतेना**नुकूलव्यापार एव णिजर्थस्तदन्वयिनी गमनादिक्रियैव धात्वर्थान्वयितावच्छेदकं फलं तच्छालितया तत्कर्तृण्यर्न्तकर्मतेति **मतमपास्तम्**।

तात्पर्यटीका

ननूभयकर्तृकपाके मैत्रमात्रं प्रयोजयति देवदत्ते चैत्रेण पाच्यते देवदत्तेनेत्यादिप्रयोगापत्तिश्चैत्रवृत्तिकर्तृतानिरूपकापाकस्य मैत्रकृतिद्वारा देवदत्तप्रेरणानिर्वाह्यत्वादत आह **तत्र चेति**। **उक्तसम्बन्धेन** स्वनिर्वाह्यकर्तृतानिरूपकत्वसम्बन्धेन स्वरूपसम्बन्धरूपनिर्वाह्यत्वेनैव वा। **अर्थविवेक इति**। आधेयत्वरूपं कर्तृत्वं चैत्रेणेति तृतीयार्थः कृतिरूपं कर्तृत्वं सहायेनेति तृतीयार्थो विक्लृतिराख्यातार्थ इत्यर्थविवेक इत्यर्थः। अनेकपदार्थघटितस्वकर्तृत्वनिर्वाहकत्वादेः सम्बन्धत्वे एव मानाभावः का

कथा वृत्तिनियामकत्वस्येति चैत्रो न पाचयतीत्यादौ शाब्दबोधानुपपत्तिरित्यस्वरसमभि**प्रेत्याहास्तां तावदिति**। एतावता गतिसूत्रस्य गत्यादीनामेवाण्यन्तावस्थायां यः कर्त्ता स ण्यन्तावस्थायां कर्म स्यादित्यपूर्वविधित्वमाश्रित्य बोधप्रकारो दर्शितः। इदानीं गत्यादीनामण्यन्तावस्थायां यः कर्त्ता स ण्यन्तावस्थायां कर्मैव स्यादिति नियमविधित्वमाश्रित्य बोधप्रकारं दर्शयति **वस्तुतस्त्विति**।

नन्वेवं सहायादेरपि कर्तृत्वरूपफलाश्रयत्वा**त्पाचि** कर्मत्वापत्तिरित्याशङ्क्येष्टापत्या परिहरति **पाचयतीति**। **आदिदिनौदनं** पाच्यते सहाय इति प्रयोगपरिग्रहः। **कुशकाशावलम्बनमिति**। **अयं** भावः। लक्षणया पचधातोरभ्यवहारार्थकत्वेऽपि सहायपदस्य द्वितीयायां तत्त्वमुपपादयितुं शक्यमेव भवताम्। **परन्तु** विक्लृत्युनकूलव्यापारार्थकत्वे तस्य तथात्वानुपपत्तिः। **किञ्च** ग्रहधातोरुपादानार्थत्वे यातमिति द्वितीयानुपपत्तिः सेत्थमस्माभिः परिहृतेति। **पाके** विशेषणतयापीत्यपिना पाकविशेष्यत्वसमुच्चयः। ओदनकर्मकसहायककर्तृकपाककर्तृत्वनिर्वाहकव्यापारवान् देवदत्त इति बोधे कर्तृत्वस्य द्वेधा भानं भासकभेदादभ्युपगम्यत इत्याशयः। व्यापारे क्रियायाः केवलानुकूलत्वसम्बन्धेनाऽप्यन्वयसम्भवात्तादृशक्रियासम्बन्धितया कर्त्तुः कर्मत्वं किमिति नोपपादितमिति शङ्कां वारयति **एतेनेति**। **एतेन** वक्ष्यमाणदोषेण। **अनुकूलव्यापार** एवेत्यनुकूलत्वोत्कीर्त्तनमनुकूलतासम्बन्धेनान्वयस्फोरणाय। **धात्वर्थान्वयिता- वच्छेदकमिति**। ण्यन्तधात्वर्थनिष्ठाया कर्त्तर्यन्वयिता तदवच्छेदकमित्यर्थः। **तच्छालितया** तत्तत्क्रियायाः कर्तृत्वाश्रयत्वाद्यन्यतमसम्बन्धवत्तया। **ण्यन्तकर्मतेति**। तथा च सहायसम्बन्धिभोजनगमनादिक्रियानुकूलव्यापाराश्रयः स इति शाब्दबोधस्तन्मते **बोध्यः**।

चषकम्

तथा सति कर्तृभूतकर्मपदात्तृतीयाद्वितीययोरनियम्यतापत्तेः। **न चैवं** चैत्रमैत्रोभयकर्तृकपाककर्तृमैत्रमात्रं प्रयोजयति यज्ञदत्ते चैत्रेण पाचयतीति

प्रयोगापत्तिरिति **वाच्यम्**। पाकविशेषणतृतीयार्थकृतेरनायत्या पाकपारतन्त्र्येण व्यापारविशेषणणिजर्थकृतावभेदेनान्वयोपगमात्। **तथा च** यज्ञदत्तो मैत्रेण पाचयतीत्यत्र मैत्रवृत्तिकृतिजन्यपाकस्य **तादृश**मैत्रवृत्तिकृतिरूपं यत्कर्तृत्वं तन्निर्वाहकव्यापारकर्त्ता यज्ञदत्त इति शाब्दबोधः। **तद्व**दजयादग्रामं गमयतीत्यादयस्तु **न प्रयोगाः**। गत्याद्यर्थकधातुयोगे कर्तृप्रत्ययासाधुताया **गतिबुद्धीत्यादिसूत्रेण** बोधनात्। **न चैवं ह्रक्रोरन्यतरस्यामिति सूत्र**प्रणयनानर्थक्यमिति **वाच्यम्**।

अभ्यवहारयति सैन्धवैर्विकारयतीत्यत्र चाभ्यवहारार्थक-व्युपसर्गकाकर्मकयोरपि ह्रक्रोर्गतिसूत्रनियन्त्रितकर्तृप्रत्ययप्रसारार्थत्वा**ध्यवस्थित**विकल्पस्योक्तरीत्या सम्भवेऽप्यैच्छिकविकल्पार्थमेवैतस्य प्रणयनाच्च। **तथा हि** क्रियाविशेषणाजादेर्द्वितीयेव कर्तृत्वविशेषणसहायादेस्तृतीयापि साधीयसी। **परन्त्वजा**कर्तृकगमनकर्तृत्वनिर्वाहकव्यापारतात्पर्यं यथाजावृत्तिगमनकर्तृत्व-निर्वाहकव्यापार**बोधेनैव** निर्वाह्यं **तथा** सहायवृत्तिहरणकर्तृत्व-निर्वाहकव्यापारतात्पर्यन्तु सहायकर्तृकहरणकर्तृत्वनिर्वाहकव्यापारबोधेनापि निर्वाह्य**मेवं** सहायकर्तृकहरणकर्तृत्वनिर्वाहकव्यापारतात्पर्यमपि सहायवृत्तिहरणकर्तृत्वनिर्वाहकव्यापारबोधेनैव निर्वाह्यमित्येतावन्मात्रपरत्वात्। **इत्थमेव** प्राप्ताप्राप्तविभाषेयमिति गीयत इति **दिक्**।

तात्पर्यटीका

तथा सति कथञ्चित् क्रियासम्बन्धितया कर्मत्वोपपादने सति। **अनियम्यतापत्तेः** कर्तृत्वाघटितण्यर्थव्यापारमात्रान्वितक्रियायाः सहायादि-सम्बन्धितया तदुत्तरतृतीयायाद्वितीययोस्तन्मात्रान्वितार्थकतयोक्तनियामक-दौर्लभ्येनानियम्यतापत्तेर्नियमव्यवच्छेद्यस्य याधातुयोगे कर्तृप्रत्ययस्य व्यवच्छेदप्रतीत्यविषयत्वापत्तेरिति भावः। **एवं** णिजर्थकर्तृत्वे सहायवृत्तित्वान्वयेनाऽपि पाचयत्योदनं सहायेनेत्यादौ शाब्दबोधाङ्गीकारे। अन्यथा तु चैत्रवृत्तिकर्तृत्वानिर्वाहकत्वादेवोक्तप्रयोगापत्यसम्भवादिति भावः। **तादृशेति** पाकानुकूलेत्यर्थः। **तद्वत्पाक**विशेषणतया सहकर्तृत्वविवक्षायां सहायेन

पाचयतीति प्रयोगवत्। **न प्रयोगा इति**। गमनविशेषतयाजाकर्त्तृत्वविवक्षायामप्यजया ग्रामं गमयतीत्यादयो न प्रयोगा इत्यर्थ:। **एवमुक्तरीत्या** तृतीयाद्वितीययोर्द्वयोरपि व्यवस्थया साधुत्वे।

प्रसरार्थत्वादिति। अन्यथा सैन्धवा अभ्यवहरन्ति विकुर्वते इत्यत्र णिच्समभिव्याहारे सैन्धवानभ्यवहारयति विकारयतीत्यत्र नित्यं द्वितीयैव स्यादिति भाव:। **केवलयोरपि** हृक्रोरुपादानमर्थवदित्याह। **व्यवस्थितेति**। तदेवाह **तथाहीति**। **क्रियेति** अजाकर्त्तृकगमनविवक्षायामपि प्राप्ततृतीयां बाधित्वा गतिसूत्रेण द्वितीयानियमनादजां ग्रामं यापयतीत्यस्यैव साधुत्वादिति भाव:। **कर्त्तृत्वविशेषणेति**। सहायवृत्तिकर्तृतानिर्वाहकव्यापारमात्रविवक्षायामप्य-प्राप्ततृतीयाविधानादिति भाव:। **साधीयसी**त्यंतावन्मात्रपरत्वादिति योजना। नन्वेकजातीयबोधतात्पर्यं कथमन्यजातीयबोधेन सिद्धविषयं स्यादित्याशङ्कां वारयति। **परन्त्विति**। **बोधेनैवेति**। अजावृत्तेर्गमनकर्त्तृत्वस्याजाकर्त्तृकगमन-कर्त्तृत्वस्य चोक्तरीत्याऽभेदप्रत्ययवशादिति भाव:। एवमग्रेऽपि। उक्तन्याया प्रकृतेऽतिदिशति। **एवमिति**। इत्थमेव विवक्षाभेदेनैव। केवलयो हृक्रोर्द्वितीयाया अप्राप्तत्वादभ्यवव्युपसर्गकयो: प्राप्तत्वात्प्राप्ताप्राप्तविभाषेयमिति यथाश्रुतग्रन्थानुरोधिन इत्याह **दिगिति**।

चषकम्

दृष्टञ्चैतत् कथारसं श्रृणोतीत्यादौ। **न ह्यत्र** रसस्य श्रवणान्वययोग्यता **न वा रस्यमानां** कथां बोधयितुं स शब्द: समर्थ:। **नाप्यनभिधानं** तादृशार्थे तस्य शब्दस्य प्रत्युत **कृदभिहितो भावो द्रव्यवत् प्रकाशते** इत्यत्र द्रव्यवदित्यनेनाप्राधान्यविवक्षायामपि शब्दस्वभावात् प्राधान्येनेत्युक्तत्वा-त्परम्परितबोधतात्पर्यकत्वमाहत्यैवाभिहितं पक्षधरमिश्रैर्धूमोस्तीति वाक्यस्य वह्निपरस्यापीत्यादिना। **इत्थमेव** वाध्युपसृष्टशीङादीनां शयनाद्यनुकूलकृतौ निरूढलक्षणामभ्युपेत्य स्थल्यादीनां कर्मत्वमुपपादयन्ति सर्ववर्म**प्रभृतय:**। तेषां मुख्यार्थपरतायामपि स्थल्यामधिशेते इति प्रयोगवारणाय **पुनरधिशीङ् स्थासां कर्मेति सूत्रं** भगवान् पाणिनि: प्रणिनायेत्यन्यत्र विस्तर:।

तच्च कर्म त्रिविधं प्राप्यं प्रकृतिविकृति च। तत्र प्राप्यं कर्म क्रियाजन्यफलशालि यथा गम्यादेर्ग्रामादि **यथा** वा ज्ञानादेर्विषयः। क्रियानिष्पाद्यं यत्तद्विकृतिरूपं कर्म यथा पाकादेरोदनादि **यथा** वा कृतेर्माल्यादि कटादि च। **तत्र प्रथमे** तण्डुलादिरूपं पूर्वं द्रव्यं विनाश्यैवोदनादेर्निर्वर्त्तनम्। **द्वितीये** पुष्पादिरूपं पूर्वं द्रव्यमविनाश्यापि तत्र सन्दर्भादिविशेषणनिष्पादनेन विशिष्टस्य माल्यादेर्निर्वचनम्। **तृतीये** च काशादिरूपं पूर्वं धर्मिणमविनाश्य तत्रैवकटादिरूपधर्म्यन्तरनिष्पादनं क्रियाया। **ईदृशञ्च** विकृतिकर्म प्रकृतेरसमभिव्याहारस्थले निर्वर्त्यमुच्यते। **यद्यपि** निर्वर्त्यते निष्पाद्यते यत्तन्निर्वर्त्यमिति व्युत्पत्या तण्डुलानोदनं पचतीति प्रकृतिसमभिव्याहारेऽपि निर्वर्त्यताऽस्त्येव **तथापि** तद्व्यावृत्तमेव पारिभाषिकं निर्वर्त्यत्वम्। **तदुक्तमभियुक्तैः–**

सती वा विद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते॥ इति।

यस्य विकृतिकर्मणो नाश्रीयते न प्रयुज्यते इति तस्यार्थः। **एवञ्च** तत्र-तत्र प्रकृतिसमभिव्याहारे ओदनादेर्विकार्यकर्मण्येवान्तर्भावः।

तदुक्तम्–

पदसञ्जायतेऽसद्वा जन्मना यत्प्रकाशते।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्।
प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठादिभस्मवत्।
किञ्चिद्गुणान्तरोत्पत्या सुवर्णादिविकारवद्॥ इति।

तत्र च काष्ठसुवर्णाद्यपि **बोध्यम्**। अन्यथा काष्ठसुवर्णादेर्निर्वर्त्यादिव विकार्याभ्याञ्च भेदे तुरीयतापत्तेः।

तात्पर्यटीका

परम्परितब्रोधपरत्वं लोकेऽपि बहुशो दृश्यते इत्याह। **दृष्टञ्चैतदिति**। न कैरपीत्थं प्रतिपादितमित्यपि नेत्याह। **परम्परितेति। इत्थमेव चेति**। यथा

कर्त्तृत्वनिर्वाहकव्यापारस्य णिजर्थताङ्गीकारेण सहायादेः पाचिकर्मत्वोपपादनं तथेत्यर्थः। **शयनं** स्थलीपृष्ठसंयोगः। **मुख्या**र्थपरतायामपीति तेन प्रकृते सूत्रातिरिक्तस्य निरूढलक्षणामूलतात्पर्यानादित्वग्राहकस्याभावात्तस्यां निरूढायां मानाभाव इति **सूचितम्**। **नन्व**धिशीङित्यादिसूत्रावश्यकत्वेन शयने धात्वर्थतावच्छेदकत्वस्यानावश्यकत्वेऽपि मासमास्त इत्यादौ खण्डशक्त्या धातुप्रतिपाद्यस्यैव व्यापनस्य स्थित्यादिक्रियाविशेषणतयाऽन्वयमङ्गीकृत्य मासादेः कर्मत्वोपपादनमावश्यक**मन्यथास्ते** मास इत्यत्राभिव्याप्तिप्रतीत्यनुपपत्तेः। तत्र द्वितीयाया अप्यभावात्। **न चैवमत्यन्तसंयोगे** द्वितीयानुशासनमनर्थकमिति **वाच्यम्**। क्रियासमभिव्याहारं विनापि मासं रमणीयाक्रोशं कुटिला नदीत्यादावभिव्याप्तिप्रतिपत्तये तस्यावश्यकत्वा**दास्तां** वात्र क्रियाध्याहार**स्तथापि** मासमासितेत्यादौ कृद्योगषष्ठ्यपवादायोक्तद्वितीयानुशासनमावश्यकमेवेत्यनुसन्धायाहा**न्यत्र विस्तर इति**।

तच्चेति क्रियाकृतविशेषोपलम्भः प्रकृतिविकृतिकर्मणोरस्ति न प्राप्ये कर्मणीति विशेषसूचनाय प्रकृतिविकृतिकर्मणोः समासेन प्राप्यस्य व्यासेन विभागवाक्ये प्रतिपादनमिति **बोध्यम्**। वक्ष्यमाणप्रकृतिकर्मघटकतया विशेषणज्ञानसम्पत्तये विकृतिकर्मैवादौ प्रस्तौति। **क्रियेति**।

चषकम्

प्रकृतिविकृत्योर्विकार्यपदेनैकया व्युत्पत्या बोधनासम्भवा**दुभय**-साधारणरूपावच्छिन्ने विकार्यपदमपि पारिभाषिक मेव। **तत्तु** प्रकृतिरूपकर्म। पूर्वभावविशिष्टस्य यस्यासत्त्वरूपो विकारो **निरुक्त**विकृतिकर्मीभूतवस्त्वन्तर-निष्पत्तये **निर्वा**ह्यते। यथा पाकादेस्तण्डुलादि यथा वा कृतेः पुष्पकाशादि। तत्र प्रथमे तण्डुलादेर्नाशादेवासत्त्वमुत्तरत्र काशकुसुमादेः सत्त्वेऽपि कटसन्दर्भादिविरहरूपपूर्वभावासत्त्वेन तदविशिष्टस्यासत्त्वं कटस्य सन्दर्भविशेषादेश्च क्रियया निर्वहति। **इत्थञ्च** तण्डुलानोदनं पचतीत्यादौ विकृतिकर्मोत्तरद्वितीयाया **नाश**कत्वमर्थस्तण्डुलाद्यन्वितं नाशकत्वञ्च पाकेऽन्वेति विकृतिकर्मोत्तरद्वितीयायाश्**चोत्पादकत्वमर्थ** ओदनाद्यन्वितस्य

तस्य नाशकत्वविशिष्टेऽन्वयः। नाशे चोत्पत्तेः प्रयोजकत्वमुद्देश्यतावच्छेदक-विधेयभावमहिम्ना नियमतो भासते। तेन पाकस्य तण्डुलारम्भकसंयोगनाशजनकत्वेऽपि संयोगमोदनं पचतीति न प्रयोगः। तण्डुलारम्भकसंयोगनाशस्योदनोत्पत्तौ तण्डुलनाशेनान्यथासिद्धत्वात्। **तथा चो**दनोत्पत्तिप्रयोजकस्य तण्डुलनाशस्य जनको य ओदनोत्पादकः पाकस्तदनुकूलकृतिमानिति शाब्दबोधः।

वस्तुतस्तु निर्वर्त्यकर्मासमभिव्याहरे तण्डुलं पचतीतिवत् संयोगं पचतीतिप्रयोगवारणाय संयोगनाशद्वारानाशकत्वमेव द्वितीयार्थो वक्तव्य इत्यलं प्रयोज्यप्रयोजकभावबोधनेन। **तथा च** संयोगनाशद्वारा तण्डुलनाशको य ओदनोत्पादकः पाकस्तदनुकूलकृतिमानिति शाब्दबोधः। **प्रकृतिविकृति**भावस्थले कर्माऽख्यातेन प्रकृतेः कर्मत्वमेव प्रत्याय्यते। तेन काष्ठानि भस्मराशिः क्रियन्ते इत्यादावाख्यातार्थविशेष्यकाष्ठादि-वाचकपदसमानवचनत्वमाख्यातस्य **न तु निर्वर्त्य** भस्मादिरूप-विकारवाचकपदसमानवचनता भावनान्वयिनि सङ्ख्यान्वयनियमात्। **अथैवं** निर्वर्त्यकर्मवाचकपदात् प्रथमा न स्यात्तत्कर्मत्वस्यानभिधानेन द्वितीयाप्रसङ्गात्। **न चोभय**कर्मत्वमेव लकारेणाभिधीयते। **तदुक्तम्। प्रकृतेर्विकृतेश्चापि यत्रोक्तत्वं द्वयोरपीति।** प्रधानाप्रधानकर्मसमभिव्याहृतनीवहादिदुहादि-रूपद्विकर्मकोत्तरकर्मप्रत्ययस्यैव कर्मद्वयानभिधायकत्वनियमात्। प्रकृते च कर्मद्वयस्यैव तुल्यत्वात्।

तात्पर्यटीका

उभयसाधारणरूपेति। नाशादिद्वारकोपजीव्योपजीवकभावसम्बन्धेन सम्बन्धित्वरूपेत्यर्थः। **निरुक्तेति**। अत एवाभ्यर्हितत्वेन पूर्वोपदिष्टस्यापि प्रकृतिकर्मणो विकृतिसापेक्षतया विकृत्यनन्तरं निरूपणम्। **निर्वाह्यते** ओदनानुगुणतया सम्पाद्यते। **नाशकत्वमिति**। **इदमुपलक्षणम्**। सन्दर्भविशेषणविरहविशिष्टासत्त्वं पुष्पपदोत्तरद्वितीयाया अर्थः। कर्टविरहविशिष्टासत्त्वं काशपदोत्तरद्वितीयाया इत्यपि **बोध्यम्**।

उत्पादकत्वमिति। माल्यं करोतीत्यत्र तु विशेषणोत्पत्त्या विशिष्टे तदारोप इति **बोध्यम्**।

पूर्वत्राऽस्वरसं प्रकाशयन् पक्षान्तरमाह **वस्तुतस्त्विति**। **ननु** प्रकृतिविकृतिसमभिव्याहारे कर्माख्यातेन किं कर्मत्वमभिधेयं यत्समानवचनता तस्य स्यादित्याशङ्कायामाह। **प्रकृतिभावस्थल इति**। भस्मराशिरित्यत्र राशिपदं प्रथमान्तत्व**माविष्कर्त्तुम्**। तथा सत्येव शङ्कते। **अथैवमिति**। **एवमाख्यातेन** प्रकृतिकर्मत्वमात्राभिधाने। **उभयकर्मत्वमेवेति**। नीवहादिदुहादिद्विकर्मकाणां तु क्वचित्कस्यचिदेवाभिधानं ह्यानुशासनिकं तदनुशासनस्य विशेषविषयत्वेन प्रकृतिविकृतिभावापन्नकर्माविषयत्वादित्यभिप्रेत्याह। **प्रधाना**प्रधानेत्यादि। **तुल्यत्वादिति**। साक्षाद्धातुसाकाङ्क्षत्वादित्यर्थः।

चषकम्

इत्थञ्चाख्यातस्य विकृतिसमानवचनत्वप्रसङ्गस्तु **गृह्णाति वाचकः सङ्ख्यां प्रकृतेर्विकृतेर्न हीत्यनुशासनसिद्धस्य** विकृतिसङ्ख्यान्वयबुद्धिं प्रति प्रकृतिसङ्ख्यान्वयपरत्वेनागृह्यमाणाख्यातजन्योपस्थितेः कारणत्वस्य कल्पनया **निरसनीयः**। **एतेन** विकृतिकर्मत्वमेवाख्यातेनाभिधीयताम्। तद्वत्येव च भावनान्वयिनि सङ्ख्याचयोऽपीष्यतां प्रकृतिपदोत्तरं **प्रथमा** तु विकृतिपदोत्तरमिव **साधयिष्यत** इति प्रजल्पन् **समाहितः**। तस्यानुशासनसिद्धार्थानुवादत्वस्यानपोद्यत्वात्। **वस्तुतो**ऽर्थस्यान्यप्रमाणत्वादित्युक्तत्वादस्त्वानुभविकार्थकथनमेवैतदिति **युक्तम्**। **युक्तं चैतत्**। **कथमन्यथा** भस्मीभवन्ति काष्ठानीत्यादीति **वाच्यम्**। **घटपटौ** दृश्येते इत्यत्र द्वित्वस्यैवोभयसाधारणविशेष्यतावच्छेदकस्यापरिचयेन प्रत्येकं विकारविकारिणोर्द्वयोराख्यातार्थविशेष्यत्वे वाक्यभेदापत्तेः। **न चेष्टापत्तिः**। तथा **सत्येक**वाक्यतापरस्यास्यैव काष्ठं क्रियते भस्म क्रियते इत्येतावद्वाक्यद्वयप्रयोगस्यापत्तेः। **समूहालम्बनं** बोधजनकत्वाविशेषात्।

काष्ठं नाशयते भस्म क्रियते इति वाक्ययोरेकवाक्यतां विना तद्वाक्यद्वयजबोधस्यैव काष्ठं भस्मक्रियते इतिवाक्यजबोधस्यापि काष्ठस्य विकृतिर्भस्मान्यस्य वेति संशयनिवर्त्तकत्वानुपपत्तेश्च। **काष्ठभस्मनोः** प्रकृतिविकृतिभावा**भानात्**। **तस्मात्कर्त्तृप्रत्यये** प्रयोज्यप्रयोजकभावस्य **विशिष्टे वैशिष्ट्यमिति न्यायेना**ऽन्वयलभ्यस्य विवक्षाया इव **कर्मप्रत्ययेऽपि तस्य** विशिष्टस्य वैशिष्ट्यमिति न्यायेनान्वयलभ्यस्य **तस्या**नियमवशादेव वाक्यभेदे इष्टापत्तिर्न सम्भवतीति निर्विवादम्। **परन्तु** प्रकृते तथान्वयबोधसम्भवाय नाशप्रतियोगित्वरूपस्यैकस्यैवाख्यातार्थस्य प्रकृतिकर्मान्वये सिद्धे तदन्वयि धात्वर्थकृताव**नुकूलत्वो**द्देश्यित्वोभयद्वारा विकृतिकर्मणो विशिष्टान्वयादेव तदुद्देश्यककृत्युच्छेद्यत्वस्य काष्ठे लाभात् काष्ठोच्छेदककृतिजन्यत्वरूपकाष्ठ-प्रकृतिकत्वस्यापि भस्मनि कर्मात्मनेपदस्थले मनसा सुग्रहत्वान्नोक्तः सशयः।

तात्पर्यटीका

एतेनेति। अनुशासनेन चैतदुन्नीतानुभवसंवादबलेन वा निरुक्ताख्यातजन्योपस्थितिहेतुता**वश्यकत्वेनेत्यर्थः**। **साधयिष्यत** इति लृटा वक्ष्यमाणसमाधानस्योभयोस्तुल्यत्वादित्याशयो दर्शितः। **नन्वनुशासनस्यैव** दुष्कल्प्यत्वे तस्यानुवादकत्वमपि दुर्घटम्। **प्रत्युत** तद्विपर्ययग्राहकानुशासनेन वृद्धपरम्परायातत्वादेरनुशासनकल्पकत्वानुपपत्तेरत आह। **वस्तुत इति। इत्युक्तत्वादिति**। तेन तादृशमनुशासनं नास्तीत्येवावगम्यत इति **सूचितम्**। अनुभवमेव दृढयति **युक्तं चैतदिति। एतत्प्रकृति**कर्मगत-सङ्ख्याविधायकत्वम्। **एकवाक्यतापरस्य** सम्भूयैकविशिष्टार्थविषयकबोध-तात्पर्यकस्येति विशेषाद्- **घाटनायोक्तम्। समूहालबनबोधजनकत्वा-विशेषादिति**। अस्यैकवाक्यतया बोधजनकतैव वाक्यद्वयाद्विशेषः स न स्यादिति भावः।

मास्त्वसौ ततः किमनिष्टमित्याकाङ्क्षायामाह। **काष्ठं नाशयत इति**। काष्ठं क्रियत इत्यत्र नाशस्याप्रतीतेरेव विशेष इति **तत्रापरितुष्यता नाशयत** इत्युक्तम्। **तद्वाक्यद्वयजबोधस्येवेति**। नाशयते क्रियत इत्यस्य कुठारेण

करीषेणेत्यनेनाप्यन्वययोग्यत्वात् संशयानिवर्तकतेति भावः। **अभानादिति**। तद्भानस्यैकवाक्यताधीनविशिष्टबुद्धिविषयत्वादिति भावः। **कर्त्तृप्रत्यये** तण्डुलानोदनं पचतीत्यत्र। **कर्मप्रययेऽपीति** काष्ठं भस्म क्रियत इत्यत्रापीत्यर्थः। **तस्य** प्रयोज्यप्रयोजकभाव**स्य**। **तस्या**विवक्षायाः। **अनुकूलत्वोद्देशित्वोभयेति**। एकैकाभावे कृतत्वप्रयोगाभावा**दुभयानुसरणम्**। तच्चोभयं प्रकारः संसर्गो वेत्यन्यदेतदिति सूचयति **द्वारेति**।

चषकम्

इत्थञ्चाख्यातेन विकृतिकर्मत्वस्यानभिधाने तदभिधायकद्वितीयाप्रसङ्गो दुर्वार एवेति **चेन्मैवं** काष्ठानि भस्मराशिः क्रियन्ते चैत्रेणेत्यादौ लकारेणानभिधानेऽपि निरुक्तविकृतिकर्मत्वस्य धात्वर्थे प्रकृत्यर्थसंसर्गत्वाभ्युपगमेनैव विशिष्टवैशिष्ट्यबोधनिर्वाहेण प्रथमायाः साधुत्वात् प्रातिपदिकार्थविशेष्यतया **कर्मत्वादि**विवक्षायामेव **द्वितीयाद्यवसरोक्तेः**। **न चैवं** पूर्वार्धे विकृतिकर्मण उक्तत्वाभिधानमसङ्गतमिति **वाच्यम्** उक्तत्वस्य सहप्रयोगविषयत्वार्थकत्वात्। **आख्यातस्य** तात्पर्यविषयत्वार्थकत्वाद्वा। कर्मत्वस्य संसर्गत्वेऽपि तात्पर्यविषयत्वानपायात्। **एतेन** चकारेणोक्तार्थत्वा-द्वयोरित्यस्यानर्थक्येन प्रकृतिविकृतिसम्बन्धिनोर्द्वयोः कर्मत्वयोरुक्तत्वमाख्यात-वाच्यत्वमित्येवार्थो **युक्तोऽत एवोत्तरार्धे** वाचक इति प्रतिनिर्देश इत्यपि **निरस्तम्**।

वाचक इति निर्देशस्य सङ्ख्यापेक्षत्वाच्च। **न चैवं** घटः करोतीति प्रयोगप्रसङ्गः। क्रियान्तरकर्त्तृत्वविशेष्यतापन्नस्यैव कर्मत्वान्तरविशेषणतानापन्नायां पुनः क्रियायां कर्मत्वादेः संसर्गत्वाभ्युपगमात्। **अत एव** काष्ठं **भस्मराशिः** करोतीत्यपि न प्रयोगः। तत्राधेयत्वरूप**कर्मत्वान्तरा**न्वित्वेऽपि तस्मिन् विशेषणतानापन्नायां प्रकृतक्रियायां क्रियान्तरकर्त्तृत्वविशेष्यतानापन्नस्य भस्मराशेः कर्मत्वसंसर्गेणान्वयासम्भवात्। **काष्ठानि** भस्मराशिः क्रियन्ते चैत्रेणेतिवज्जायते घटः करोति चैत्र इति प्रयोगसाधुत्वमिष्यत एव।

तात्पर्यटीका

इत्थञ्चोक्तयुक्त्या प्रकृतिकर्मत्वमात्रस्याख्यातार्थत्वावश्यकत्वं च। **दुर्वार एवे**ति। तथा च तदुभयमाख्यातार्थो वाच्य इत्यभिमानः। उभयस्याख्यातार्थत्वानुपगमेऽपि द्वितीयाप्रसङ्गवारणं सुकरमित्याह **मैवमिति**। **कर्मत्वादीत्यादिना** कर्तृत्वपरिग्रहः। **द्वितीयादीत्यादिना** तृतीयाकृद्योगषष्ठ्योः परिग्रहः। स्वयमेवास्यार्थस्याधस्तादुक्ततत्वादुक्तेरित्युक्तम्। प्रकृतेर्विकृतेश्चेत्यभेदे षष्ठी राहोः शिर इतिवदित्यभिप्रेत्याहो**क्तत्वस्येति**। एतेनेत्यादिना वक्ष्यमाणास्वरसादाह**ाख्यातस्येति**।

अस्तूक्तत्वं तात्पर्यविषयत्वसन्दर्भशुद्धये समर्थं तथाप्युत्तरार्धे वाचक इति निर्देशादेव पूर्वार्धे वाच्यत्वरूपमुक्तत्वं सन्दर्भ सिद्धये वेत्यत आह **वाचक इति** निर्देशस्येति। **एवं** कर्मत्वस्य संसर्गतया तात्पर्यविषयत्वेन द्वितीयानवसरं। **अत एव** क्रियाविशेषेऽर्थविशेषस्यैव कर्मत्वं संसर्ग इत्युक्तनियमादेव **भस्मराशिः** करोतीत्यपीति। न चात्र भस्मराशिः क्रियान्तरकर्तृत्वविशेष्यतापन्नोऽर्थः न वा करोतिः कर्मत्वान्तरविशेषणतापन्नार्थेति कथं कर्मत्वं संसर्गः स्यादिति भावः। **तत्रैव** कर्मत्वान्तरानन्वितायामित्युक्तौ तूत्पादककृतिजन्यनाशप्रतियोगित्वे काष्ठवृत्तित्वरूपकर्मत्वस्यान्वयेनान्यादृयामुक्तक्रियायां घटकोत्पत्तौ क्रियान्तरकर्तृत्वविशेष्यतानापन्नस्यापि भस्मनो वृत्तित्वरूपकर्मत्वस्यास्य संसर्गत्वसम्भवत्तथा प्रयोगो दुर्वार एव स्यादित्याह। **कर्मत्वान्तरान्वितत्वेऽपीति**। काष्ठमितिद्वितीयार्थाधेयत्वरूपकर्मत्वान्तरविशेष्यत्वेऽपीत्यर्थः। **काष्ठानि** भस्मराशिः क्रियन्ते चैत्रेणेतिवदिति। अत्र क्रियायाः कर्मत्वान्तरविशेषणतापन्नत्वेन यस्य कस्याप्यर्थस्य कर्मत्वं संसर्गे विरोधाभावादिति भावः। **एवमग्रेऽपि** तच्चानुपदं स्फुटीकरिष्यते।

चषकम्

इत्थमेव पश्य मृगो धावतीत्यत्रै**कवाक्यत्वमपि सूपपदम्**। **तथा** च धात्वर्थे नामार्थप्रकारकभेदान्वयबोधे कर्मत्वे आख्यातार्थे तद्धात्वर्थप्रकारकबोधस्य

तन्नामार्थे आख्यातार्थकर्त्तृत्वप्रकारकबोधस्य वा सामग्री नियामिकेति न कोऽपि दोष:। **इत्थञ्चो**त्पादकत्वेन भस्मराशिसम्बन्धि चैत्रवृत्तिकृतिप्रयोज्यनाश-प्रतियोगीनि काष्ठानीति शाब्दबोध:। **अत** एवार्घ्यं नमो घटो नास्तीत्यादौ निपातार्थयोस्त्यागाभावयो: कर्मत्वप्रतियोगित्वसम्बन्धाभ्यामेवान्वयाद्-द्वितीयाषष्ठ्योरपि विषये प्रथमैव। **इत्थमेव** यावन्त: साध्याभावा: प्रत्येकमित्यादिमिश्रलक्षणपरिष्कारे प्रथमान्तपदस्य तत्तत्पदार्थ**परिचायक-त्वे**ऽप्यनतिप्रयोजनकत्वात् सिद्धान्तवागीशभट्टाचार्याणां मते साध्याभावानां तत्तत्पदार्थत्वाभावेन परिचायकत्वासम्भवाच्च न्याय्यस्त**दर्थस्य** प्रत्येकपदार्थे भेदसम्बन्धेनान्वयोऽभिमतस्तेषामिति **प्रतिभाति**। **ननु** तथापि कृधात्वर्थे नामार्थस्य भस्मराशे: साक्षाद्भेदेनान्वयो न व्युत्पन्न इति कथं प्रकृते कर्मत्वस्य संसर्गतेति **चेन्न**।

यथा घटो नीलो भवति काष्ठं भस्म भवतीत्यादा**वसाधारणधर्मादि**रूपभवनक्रियायामाश्रयत्वरूपकर्तृत्वान्तरविशेषणतापन्नायां नीलादेराधेयत्वरूपकर्त्तृतासम्बन्धेन साक्षादन्वयो **व्युत्पत्तिवैचित्र्यात्तथात्रापि** कर्मत्वान्तरविशेषणतापन्नक्रियायामपरकर्मण: कर्मतासम्बन्धेन साक्षादन्वया-पगमात्। **अत एव** काष्ठं भस्मराशिं क्रियते इति न प्रयोग:। कर्मत्वान्तरविशेषणतानापन्नक्रियायामेव द्वितीयया कर्मत्वबोधनात्। **कथं** तर्ह्यजा ग्रामं नीयते गौ: क्षीरं दुह्यते इत्यादि। तत्र ग्रामवृत्तिसंयोगानुकूलक्रियानुकूलव्यापारजन्यसंयोगानुकूलक्रियावत्यजेति शाब्दबोधस्य क्षीरवृत्तिक्षरणानुकूलव्यापारजन्यक्षरणजन्यविभागाश्रयो गौरिति शाब्दबोधस्य चोक्तत्वेनोक्तव्युत्पत्तिविरोधात्। क्रियाया विभागादि रूपकर्मत्वान्तरविशेषणतापन्नायामेवनयनदोहनादिक्रियायां ग्रामक्षीरादिकर्मत्वस्य द्वितीयया बोधनादिति **चेदोम्**। **मुख्य**प्रकृतिविकृत्याद्युभयकर्मकस्थले एव तथा नियमात्।

तात्पर्यटीका

एकवाक्यत्वमपीति। **अपिना** धावनस्य विशेष्यान्वयिनान्वयित्वेन दृशिकर्मत्वस्य परिग्रह:। **सृपपदमिति** धावनक्रियाकर्तृमृगस्य

कर्मत्वान्तरविशेषणतानापन्नायामपि दृशिक्रियायां कर्मतासम्बन्धेनान्वयसम्भ-वादिति भावः। **तन्नामार्थे** यन्नामार्थस्य कर्मतासम्बन्धेन क्रियायामन्वयः। **न कोऽपि** दोष इति **कोऽपीत्यनेन** घटं न पश्यतीत्यत्र घटान्विताभावस्य नञर्थस्य कर्मतासम्बन्धेन दर्शनेऽन्वयबोधोऽपि वारित इति **सूचितम्**। **अत एव** संसर्गत्वेनोपपत्तेरेव। **अनतिप्रयोजनकत्वादिति**। यावतां साध्याभावानामिति षष्ठ्यन्तानिर्देशस्यैवौचित्वात्तत्पुरुषे लक्षणापत्तेश्चेति भावः। **न्याय्य इति**। अव्ययनामार्थयोर्भेदेनाप्यन्वयस्यौत्सर्गिकत्वादित्याशयः। **तदर्थस्य** यावत्त्वविशिष्टसाध्याभावस्य। **भेदसम्बन्धेन** स्वीययावत्त्वव्याप्यैकत्वसम्बन्धेन। **तथापि** द्वितीयायाः प्रसङ्गाभावेऽपि।

असाधारणधर्मादीति। **आदिना**त्पत्तिप्रयोजकनाशप्रतियोगित्वपरिग्रहः। **व्युत्पत्तिवैचित्र्यादिति**। अन्यथा घटो नीलेन भवतीति प्रयोगापत्तेरिति भावः। **अत एव** क्रियायाः कर्मत्वान्तरविशेषणतापन्नत्वादेव। **ओमि**त्यर्धाङ्गीकारे। **तेन** मुख्योभयकर्मकस्थले एवोक्तो नियमो **न तु** गौणमुख्योभयकर्मकस्थलेऽपीति **दर्शितम्**। नियमनिर्वाहककार्यकारणभावाख्यानाय दर्शितमेव नियमं स्पष्टमाचष्टे। **मुख्येति** मुख्यपदसमभिव्याहारमात्रप्रसक्तां पुष्पाणि स्रजं करोतीत्यत्र व्यावर्त्यतामपाकर्तुं तत्सङ्ग्रहक**मादिपदम्**।

चषकम्

तथा च क्रियाविशेष्यकद्वितीयाधीनमुख्यकर्मत्वप्रकारकान्वयबुद्धिं प्रति मुख्यकर्मत्वविशेष्यकक्रियाप्रकारकशाब्दबोधसामग्री **प्रतिबन्धिका**। **एवं** तृतीयाधीनकर्त्तृत्वप्रकारकान्वयबुद्धिं प्रत्यप्यूह्यं **तथा** हि। कर्त्तृत्वविशेषणत्वेनाभासमानायामेव क्रियायां तृतीयार्थकर्त्तृत्वान्वय इति व्युत्पत्तिः कल्प्या**ऽन्यथा** प्रकृत्यर्थविशेष्यतयाधेयत्वरूप**कर्त्तृ**त्वविवक्षया काष्ठं भस्मना भवतीति प्रयोगस्य दुर्वारत्वात्। **तथा** च क्रियाविशेष्य-कतृतीयाधीनकर्त्तृत्वप्रकारकान्वयबुद्धिं प्रति **कर्त्तृत्व**विशेष्यकक्रियाप्रकारक-शाब्दबोधसामग्री **प्रतिबन्धिके**त्युक्तम्। **एवं** काष्ठं भस्म भवतीत्यत्राश्रयत्वरूपे काष्ठविशेषणकर्त्तृत्वे विशेषणतया भासमानस्यैवोत्पत्तिप्रयोजकनाशप्रतियोगित्व-

रूपधात्वर्थभवनस्यान्तर्गतायामेवोत्पत्तौ भस्मादेराधेयत्वरूपं कर्तृत्वं सम्बन्धतया भासत **इत्यपि**। तेन न काष्ठेन भस्म भूयत इत्यादयः प्रयोगाः। काष्ठवृत्तित्वरूपकर्तृत्वे विशेष्यीभूताया**मुक्तक्रियायां** भस्माधेयत्वस्य सम्बन्धत्वा**सम्भवात्**। **तथा** च कर्तृतासम्बन्धावच्छिन्नकर्तृप्रकारकक्रियाविशेष्यकशाब्दबुद्धिं प्रति कर्तृत्वप्रकारकक्रियाविशेष्यकबोधसामग्री प्रतिबन्धिकेत्युक्तं **भवति**।

एतेनाधेयत्वरूपकर्तृतासम्बन्धेन भस्माऽन्विते निरुक्तधात्वर्थे काष्ठवृत्तित्वस्य तृतीयान्तार्थस्य **किं वा** तृतीयान्तार्थकाष्ठवृत्तित्वरूपकर्तृत्वान्वितैकदेशेन प्रकृते प्रतियोगितानिरूपकनाशप्रयोज्योत्पत्तिरूपधात्वर्थेनान्वितस्याख्यातार्थाश्रयत्वरूपकर्तृत्वस्य भस्मन्येवान्वयसम्भवात्तथा प्रयोगो दुर्वार इति शङ्का **निरस्ता**। उक्तप्रतिबन्धकसत्त्वात्। भावाख्यातस्य कर्तृत्वाबोधकत्वाच्च। काष्ठेन भस्मना भूयते इत्यादौ तूत्पत्तौ भस्माधेयत्वं नाश**प्रतियोगित्वे** च काष्ठाधेयत्वं तृतीयोपस्थाप्यं प्रकारतयैव भासत इति न कापि व्युत्पत्तिर्विरुध्यते। **नाश**प्रतियोगित्वस्य कर्तृत्वाविशेषणत्वे भस्माधेयत्वस्य संसर्गत्वासम्भवेन तृतीयोपपत्तेः। **इत्थञ्च** भस्मवृत्तेरुत्पत्तेः प्रयोजकस्य नाशस्य प्रतियोगित्वं काष्ठवृत्तीति शाब्दबोध इति **किम्बहुना**।

तात्पर्यटीका

प्रतिबन्धिकेति। तथा चैवम्विध नियमविशेषपरतया **कर्मणि द्वितीयेति सूत्र**मत्यन्तावहितमनोभिर्व्युदस्तालीकव्याक्षेपं व्याख्येयमिति भावः। **एवं** कर्तृत्वविशेष्यकक्रियाप्रकारकशाब्दबोधसामग्रीप्रतिबन्धकत्वमूह्यमिति योजना। **अन्यथा** कर्तृत्वविशेषणत्वेनाभासमानायामिति विशेषणानुपादाने। **कर्तृत्वविवक्षयेति**। तेन भस्मनेति तृतीयावसरो दर्शितः **कर्तृत्वविशेष्यकेति**। आश्रयविशेषणतापन्नकर्तृत्वविशेष्यकेत्यर्थः। **तेन** मैत्रेण पाचयतीति तृतीयोपपत्तिः। तृतीयाधीनकर्तृत्वान्वयबोधं व्युत्पाद्य कर्तृत्वसंसर्गकमपि बोधं व्युत्पादयति। **एवमिति**। **उक्तक्रियायामिति**। उत्पत्तिप्रयोजकनाशप्रतियोगित्वरूपे धात्वर्थ इत्यर्थः। **सम्बन्धत्वासम्भवादिति**। कर्तृत्वान्तरान्वितत्वेऽपि तत्र विशेषणत्वेनाभातत्वादिति भावः।

एतेन वक्ष्यमाणदूषणेन। प्रथमाशङ्कां निरस्यति। **उक्तेति**। कर्त्तृत्वप्रकारकक्रियाविशेष्यकबोधसामग्रीरूपेत्यर्थः। द्वितीयाशङ्कां निरस्यति। **भावाख्यातस्येति**। **न चोत्पत्ति**पर्यन्तधात्वर्थस्याश्रयत्वरूपकर्त्तृत्वसम्बन्धेनैव भस्मन्यन्वयोऽस्त्विति **वाच्यम्**। कर्त्तृतासम्बन्धावच्छिन्नक्रियाप्रकारक-कर्त्तृविशेष्यकशाब्दबुद्धिं प्रत्यपि तस्याः प्रतिबन्धकत्वात्। **नाशप्रतियोगित्वे** चेत्यनेन काष्ठाधेयत्वस्याश्रयान्यस्मिन् विशेषणोक्तिद्वारा क्रियायास्तृतीयार्थान्वय-योग्यत्वोक्त्या भस्मनेति तृतीयायाः साधुताविष्कृता। **प्रकार**तयैवेति। तेन च कर्त्तृत्वान्तरविशेष्यकक्रियाप्रकारकशाब्दबोधसामग्रीरूपस्य तृतीयाधीन-कर्त्तृत्वबोधप्रतिबन्धकस्याभावो दर्शितः। काष्ठेन भस्मना भूयत इत्यत्र यद्यसाधारणधर्मो धात्वर्थस्तदा भस्मासाधारणधर्मस्य काष्ठे बाधात् काष्ठपदं काष्ठारम्भकावयवपरं वाच्यम्। इत्थञ्च भस्मवृत्तिरसधारणो धर्मः काष्ठारम्भकावयववृत्तिरिति तत्र बाध इत्यधिकमित्याह **किम्बहुनेति**।

चषकम्

किञ्चित्क्रियाकर्त्तृताया विशेष्यार्थस्य केवलम्।
कर्मान्तरगुणीभावानापन्नासु क्रियासु चेत्॥१॥

अतादृशोपीतरासु संसर्गः कर्मता मता।
कर्मान्तरगुणीभावानापन्नासु त्वतादृशः॥२॥

द्वितीययैव बोध्या सा भवतीति विनिर्णयः।
कर्त्रन्तरगुणीभावनापन्नास्वेव कर्त्तृता॥३॥

तृतीययावबुद्ध्येताऽन्यथा संसर्ग इत्यसौ
कर्त्तृत्वेऽपि च कर्मत्वे संसर्गत्वव्यवस्थितिः॥४॥

एवमैको द्वौ ज्ञायते इत्येकत्वावच्छिन्ने उभयत्वावच्छिन्न-स्याभेदनारोपस्थलीये वाक्येऽप्यारोप- विशेष्यस्यैकादिपदार्थस्याख्यातार्थ-विशेष्यत्वान्वयविशेष्यतया तत्पदसमान- वचनत्वमाख्यातस्य। **उभयत्वावच्छिन्ने** चैकारोपस्थलीयं वाक्यं तु द्वावेको ज्ञायेते इत्येव साधु।

तात्पर्यटीका

उक्तार्थं श्लोकैः सङ्गृह्णाति **किञ्चित्**क्रियाकर्तृताया इति। **केव**लमित्यवधारणे। **क्रि**यागुणकमाश्रयत्वमाख्यातार्थकर्मत्वं कर्मण्येव गुण इति कर्मत्वान्तरं कर्मान्तरस्य संसर्ग इति विवेचनायैव कर्मान्तरत्यवोक्तम**शोकवनिकान्यायादिति भावः**। **चेदुक्तासु** क्रियासु कर्मत्वं संसर्गस्तहर्युक्तार्थस्यैवेत्यन्वयः। अत्र चोक्ता**स्वित्यने**नाख्यातार्थकर्मत्व-विशेष्यकतादृशधात्वर्थप्रकारकबोधसामग्रीविरहो **दर्शितः**। **अत एव** तत्राख्यातार्थकिञ्चित्क्रियाकर्त्तृत्वप्रकारकतन्नामार्थविशेष्यकबोधसामग्र्यावश्य-कत्वसूचनाय **केवलमित्युक्तम्**। यथा जायते घटः करोति चैत्र इत्यादावुत्पत्याश्रयघटसाध्यककृत्याश्रयश्चैत्र इति शाब्दबोधात्। **अतादृशोऽपीति**। किञ्चित् क्रियाकर्त्तृत्वविशेष्यतानापन्नस्यापीत्यर्थः। **इतरास्विति**। कर्मान्तरगुणीभावापन्नास्वित्यर्थः। यथा काष्ठानि भस्मराशिः क्रियन्त इत्यादौ भस्मराश्युत्पादककृतिजन्यनाशप्रतियोगित्ववन्ति काष्ठानीति शाब्दबोधात्। **त्वतादृश इति**। किञ्चित्क्रियाकर्त्तृत्वविशेष्यतानापन्नस्य त्वित्यर्थः। यथा काष्ठानि भस्मराशिं करोतीत्यादौ काष्ठनाशिकाया भस्मराश्युत्पादिका कृतिस्तदाश्रयतेति शाब्दबोधात् प्रथमान्तपदसमभिव्याहाराभावात्। अत्रैव काष्ठानीत्यस्याप्रयोगे कर्मान्तरगुणीभावानापन्नत्वं कर्मान्तरभावादेव तत् प्रयोगे तु गुणीभावाभावाद्वेति। वाप्यपूर्वार्धेन तत्तत्सामग्र्यभावं प्रतिपाद्योक्तसामग्र्योरन्यतरस्याप्यभावे तु प्रकार एव सेत्याह **द्वितीययैवेति**। तथा च स्वसजातीयतद्धातु-कर्मत्वान्तरगुणीभावानापन्नक्रियाविशेषणतया किञ्चित्क्रियाकर्त्तृत्वविशेष्य-तानापन्नार्थविशेष्यतया च कर्मत्वविवक्षायां द्वितीयेति कर्मणीति सूत्रार्थः परिष्कर्त्तव्य इति भावः।

यद्यपि क्रियाकर्त्तृत्वे गुण तच्च कर्त्तरीति किं कर्त्तृपर्यन्तेनेति कर्त्तृत्वस्य गुणीभावानापन्नास्वित्येव वक्तुं युक्तम्। तावतैव वक्ष्यमाणस्य काष्ठं भस्मना भवतीति प्रयोगवारणस्य सम्भवा**त्तथापि** मैत्रेण पाचयतीत्यत्र णिजर्थकर्त्तृत्वविशेषणतापन्नायां क्रियायां तृतीयार्थान्वयोपपत्तये कर्त्तृत्वे

आश्रयविशेषणतापन्नत्वं विशेषणं प्रागुक्तमावश्यकमधिकमपि नञ्द्वयघटनाद्युक्तमधस्तात्तेनैव तृतीयार्थाधेयताप्रकारकाख्यातार्थाश्रयतामुख्य-विशेष्यकभस्मवृत्युत्पत्तिप्रयोजकनाश- प्रतियोगिताश्रयतेत्याकारकबोधपरस्यापि भस्मना भवतीति प्रयोगस्य वारणं तत्सर्वं स्मारयन्नाह। **कर्त्रन्तरेति। एतेन** कर्तृत्वविशेष्यकक्रियाप्रकारकबोधसामग्रीरूपप्रतिबन्धकाभावस्यावश्यकता **दर्शिता तेन** काष्ठं भस्मना भवतीति न प्रयोग इति **सूचितम्**। यथा काष्ठेन भस्मना भूयत इत्यादौ भस्मवृत्युत्पत्तिप्रयोजकनाशप्रतियोगित्वं काष्ठवृत्तीति शाब्दबोधात्। एवं विधनियमविशेषपरतया कर्तृतृतीयाविधायकसूत्रव्याख्यानं पूर्ववत् स्वयमूह्यमूहनरसिकैः। **संसर्ग इति** कर्त्तेत्यनुषज्यते। यथा काष्ठं भस्म भवतीत्यादौ। भस्मोत्पत्तिप्रयोजकनाशप्रतियोगिकाष्ठमितिशाब्दबोधात्। **अन्यथेति।** अन्यथैवेत्यर्थः। कर्त्रन्तरगुणीभावापन्नास्वेवेति यावत्। **एतेन** कर्त्तृत्वप्रकारकक्रियाविशेष्यकबोधसामग्रीरूपप्रतिबन्धकाभावस्यावश्यकता **दर्शिता तेन** काष्ठेन भस्म भूयत इति न प्रयोग इति **सूचितम्।** **इत्यसावित्यादि** स्पष्टम्। उक्तन्यायमन्यत्रातिदिशति। **एवमेवेति।** तुन्त्यन्यायादाहोभयत्वावच्छिन्ने चेति।

चषकम्

कथं तर्ह्यमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरः स्थितमिति **चेत्। तत्र विभज्य** मेरुर्न यदर्थिसात्कृतो न सिंधुरुत्सर्गजलव्ययैर्मरुरिति पूर्वार्धसमर्थिता यशोद्वयस्य वास्तवत्वेन चिकुरफालद्वयस्य राज्ञारोप्यत्वेन च कवेरुत्प्रेक्षितत्वादाख्यातार्थ- विशेष्यत्वान्वयविशेष्यत्वेनायशोयुगस्यैव विवक्षितत्वात्। **अन्यथा** विमृष्टविधेयांशतादोषप्रसरात्। **तदुक्तम्। अनुवाद्यमनुक्त्वैव नामिधेयमुदीरयेदिति। अत एव** चिकुरेपु प्रसिद्धस्यापि शिरस्थितत्वस्य लोकोक्त्यनुकारेणात्रापि प्रसिद्धिं दर्शयितुं शिरस्थितमिति क्लीवतया यशोयुगविशेषणत्वमाविष्कृतम्। **तथा च** प्रकारित्वेन चिकुरसम्बन्धिन- स्तन्निष्ठाभेदारोपस्य विशेष्यीभूतं निजा यशोयुगमित्येव शाब्दबोधस्य रीतिं **विदाङ्कुर्वतु। यत्तु** पुनरावृतः सुवर्णपिण्डः पुनरपरया

कृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवत इति महाभाष्यविरोधमुद्भाव्य गृह्णातीत्यनुशासनस्य च्विप्रत्ययमात्रविषयतामनुमन्यन्ते।

तत्र वदन्ति। खदिराङ्गारसवर्णे इति हि विशेषणं कुण्डलयोः प्रकृतित्वं गमयति। सिद्धाया विकृतेः पाकानपेक्षणात्। पुनरपरया कृत्या युक्त इति च विशेषणं सुवर्णपिण्डस्य विकृतित्वं गमयति। आकृत्यन्तरयोगस्य प्रकृतित्वाप्रयोजकत्वात्। **युज्यते** चैतत्। मृत्तिकेत्येव सत्यमितिवत्यहृतिमुखेनावृत्यन्तरं प्राप्तः पुनरारब्ध इति यावदित्यर्थकेन पुनरावृत्त इति विशेषणेनापि सुवर्णपिण्डस्य विकृतित्वं गम्यते **तथा हि** सति पिण्डीभूतसुवर्णोपक्रान्ताकृतिपरम्परायास्तत्पर्यवसायित्वेन सिषाधयिषितस्य सुवर्णनित्यत्वस्य सिद्धेः। **तस्मा**त्पूर्वनिर्दिष्टकिञ्चिदाकृतिविशिष्टसुवर्णस्य कुण्डलादिप्रकृतेरप्यपरनिर्दिष्टापराकृतिविशिष्टस्य तत्पिण्डस्य विकृतित्वमेवात्रभवतो महाभाष्यकृतोऽभिप्रेतमित्यस्यापि वक्तुं शक्यत्वादित्या**स्तां** तद्यथास्थित**मेव**। **इत्थञ्**चावस्थान्तरतापत्तिरेकस्य परिणामिता। स्यात् क्षीरं दधिमृत्कुम्भः सुवर्णकुण्डले यथेत्यत्रापि स्यादित्यस्य यथास्थितस्यैवावृत्तिर्न तु वचनविपरिणतस्य तृतीये इत्यल**मधिकेनेति**। **कथं** तर्हि किञ्चिद्गुणान्तरोत्पत्या सुवर्णादिविकारवदित्यादि। सुवर्णस्य प्रकृतित्वानिर्णयेन प्रकृतिकर्मासङ्ग्रहप्रसङ्गादिति **चेत्**।

अवयवावयविसाधारणसुवर्णत्वजातेस्तु प्रकृतित्वप्रयोजकत्वादित्यस्मत् **पैतृकी पद्धतिः**। **यदुक्तवन्तः**। सुवर्णं पिण्डीभवतीति प्रयुञ्जाना एव पिण्डः सुवर्णीभवतीति न प्रयुञ्जते इत्यभूततद्भावपर्यन्त**मिति**। अभूततद्भावश्च पूर्वकालिकभेदसमानाधिकरणतादात्म्यसम्पन्नत्वम्। **न च शक्त्यानन्त्यम्**। प्रकृत्यर्थतावच्छेदकधर्मे धर्मत्वेन प्रत्ययवाच्ये प्रकृत्यर्थस्य स्वपूर्वकालावच्छिन्नतन्निष्ठभेदप्रतियोगितावच्छेदकत्वतन्निरूपितप्रकृत्यर्थतावच्छेदक-निष्ठाधेयताविशेषोभयसम्बन्धेनान्वयोपगमेनैव **सर्वसामञ्जस्यात्**।

प्रथमसम्बन्धेन पिण्डः सुवर्णीभवतीति प्रयोगस्य द्वितीयसम्बन्धेन द्रवीभवति तस्मिन् पिण्डीभवति सुवर्णमिति प्रयोगस्य च वारणसम्भवादित्य**लंप्रसक्तानुप्रसक्तचिन्तया**। **प्रकृत**मनुसरामः।

तात्पर्यटीका

तत्कर्तृकस्वकीया यशो युगाभेदारोपविशेष्यीभूताश्चिकुरा इति बोधाभिप्रायेण शङ्कते **कथं तर्हीति**। **तर्ह्या**ख्याते प्रकृतिसमानवचनत्वेऽभिप्रेते सति। **कथं** विकृतिभूता यशो युगसमानवचनममानीत्याख्यातं नामानिषतेति कथम्। **अत** एवायशोयुगस्योद्देश्यत्वादेव। तदारोपे तद्धर्मारोपस्य न्याय्यत्वादुपष्टम्भसङ्गतिः। **लोको**क्त्यनुकारेणेति शिरोभिरुह्यते यस्य शासनं सर्वपार्थिवैः। सहस्व कतिचिन्मासान्मीलयित्वा विलोचने इत्यादिवत्। **अत्राप्ययशो** युगेऽपि। **आविष्कृतं** तेनाभेदारोपो निष्प्रत्यूह इत्यसूचि। **रीति**मित्यनेनान्यत्राप्युद्देश्य-विधेयभावसन्देहप्रसक्तावित्थमुपक्रमोपसंहाराभ्यां निर्णयः कार्य इति सामान्येनोक्तमर्थं विशदयितुमाह **यत्विति**। **अनुशासनस्या**नुशासनस्यैव सङ्ग्रहवाक्यस्य।

युज्यते **चैतदिति**। अन्यथा सुवर्णनित्यतासाधनोपक्रमभङ्गापत्तेः। **नन्वित्यस्यापि** वक्तुं शक्यत्वादित्यधिकमिति **चेन्न**। वाक्यान्तरस्थितं सुवर्णपदं कटकाः क्रियन्ते इति वाक्यसाकाङ्क्षं मत्त्वाख्यातस्य विकृतिसमानवचनत्वमापाततो विजानतामभिमानस्य दुरुच्छेद्यतामवगमयितुमित्य-स्यापीत्युक्तेः। समानवाक्यश्रुत्या पुनःपुनरावृत्त इत्यादिविशेषणैः सुवर्णपिण्डस्य विकृतित्वमेवाध्यवसीयत इत्यभिप्रेत्या**हास्तांतदिति**। गृह्णातीत्यादीत्यर्थः। **यथा**स्थितमेवासंकुचितमेव। **तत्सामान्यादितरस्य तथात्वमिति न्यायादित्याशयः**। **इत्थञ्च** पूर्वनिर्दिष्टसुवर्णस्य प्रकृतित्वसम्भवे च। उक्तरीत्यैव सकलग्रन्थसामञ्जस्येन गृह्णातीत्यनुशासनस्यासङ्कोचेनैवोपपत्तौ सङ्कोचे मानाभावादुक्त**मलमधिकेनेति**। अशाब्दसङ्कोचेनेत्यर्थः। **तर्हि** सुवर्णस्य विकारत्वावश्यम्भा**वेप्रकृ**तिकर्मासङ्ग्रहेति। लाघवात् कर्मधारयस्य न्याय्यत्वादित्याशयः।

अस्मत्पैतृकी पद्धतिरिति। प्रभाकरतनूजेन यथापाणिनि भाषितम्। **नारायणेन जडिनाकृतेयं** पदपद्धतिरिति कृतपदसङ्केतोऽस्मत्पितृविरचितो ग्रन्थ इत्यर्थः। **अभूततद्भावं** निर्वक्ति। **अभूततद्भावश्चेति**। **पूर्वकालिकभेदेति**। भेदस्याव्याप्यवृत्तित्वमभिप्रेत्याऽ**न्यथा**पूर्वकाला-

वच्छिन्नावृत्तिधर्म एवाभूततद्भावो बोध्यः। तेन घटो रक्तीभवतीति प्रयोगोपपत्तिः। **तादात्म्यसम्पन्नत्वमिति**। **यद्यपि** सङ्घीभवन्ति ब्राह्मणा इत्यादौ ब्राह्मणेषु तथा सम्पत्तिर्वास्तविकी **तथापि** भस्मीभवन्ति काष्ठानीत्यादिसाधारण्याय तादात्म्यसम्बन्धावच्छिन्नविशेष्यतारूपा सात्र विवक्षिता **कथमन्यथा** मशकीकृतराक्षसमित्यादि। अत एव भस्मीभवन्ति काष्ठानीत्यादौ काष्ठपदस्य काष्ठारम्भकावयवलक्षणाभ्युपगमेऽपि न निस्तारः पक्वापक्वयोर्भस्मकाष्ठारम्भकावयवयोरपि तादात्म्यासम्भवात् परमाणूनां च क्रियान्वयायोगादित्य**वधेयम्**। **अत्र** सुवर्णं पिण्डीभवतीत्यतः सुवर्णत्वसमानाधिकरणाभेदप्रतियोगितावच्छेदकपिण्डत्वावच्छिन्नतादात्म्यापन्नं सुवर्णमिति शाब्दबोधसरणिरन्यत्रा**प्यूह्या**। **समासे** तु राक्षसत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकमशकत्वावच्छिन्नतादात्म्यप्रकारक-राक्षसविशेष्यकारोपकर्त्तार**मित्यादिः**।

प्रसक्तानुप्रसक्तेति। कर्माख्यातप्रसङ्गेन द्विकर्मकप्रसङ्गस्तदनुप्रसक्तः प्रकृतिभावस्तस्य चिन्तयेत्यर्थः।

तर्कामृतम्

भावप्रत्यये तु 'देवदत्तेन सुप्यते' इत्यस्य देवदत्तवृत्तिकृतिजन्यः स्वाप इत्यर्थः[१]। भावप्रत्ययस्थले फलाभावात् आत्मनेपदार्थो न भासते।

तरङ्गिणी

फलाभावादिति। अकर्मकेभ्यो भावे प्रत्ययविधानात्तेषां च फलं साकाङ्क्षव्यापारबोधकत्वाभावादिति भावः।

---

१. 'इत्यन्वयबोधः' इति पाठान्तरम्।

चषकम्

भावप्रत्यये त्विति। **फलाभावाद्**धात्वर्थव्यापारस्य भूपृष्ठसंयोगादेर्नाडीविशेषमनो योगात्मकफलाकाङ्क्षाविरहात्। **आत्मनेपदार्थः** प्रागुक्तं फलम्। **न भासते**ऽकर्मकेभ्यो भावे प्रत्ययस्य विधानादिति भावः। **अत्र** यद्यपि सङ्ख्यान्वयबुद्धित्वव्यापकभावनान्वयबुद्धित्वावच्छिन्नजनकप्रथमान्तपद- जन्योपस्थित्यभावादनन्वितैव सङ्ख्या। **अत** एवौत्सर्गिकमेकवचनमेव भावाख्यातस्य क्रियाविशेषणवदिति तत्र-तत्रोक्तं **सङ्गच्छते**। **न च** क्रियाविशेषणपदोत्तरसुब्विभक्त्यर्थसङ्ख्यानन्वये नियामकाभाव इति **वाच्यम्**। प्रकृत्यर्थे सङ्ख्यान्वयनियामिकाया अभेदसम्बन्धावच्छिन्नप्रकारतान्य- प्रकृत्यर्थविषयताप्रयोजकसामग्र्या अभावस्य **तथाभूतस्य** सत्त्वात्। **कथं** तर्हि वेदाः प्रमाणमित्यत्र विभक्त्यर्थैकत्वान्वय इति **चेन्न** भवत्येव तत्र प्रकृत्यर्थे तदन्वयो बाधादव्यावर्तकत्वाच्च **किन्तु** प्रकृत्यर्थतावच्छेदके प्रमाकरणत्व एवेत्युक्तमन्यत्र।

तथापि–

काले युक्ताभिसरणे मुह्यते मृगमोहिका।
उष्ट्रासिके समास्येते शय्यं ते हत शायिका॥

इत्यत्राभिसारिकां प्रवर्त्तयन्त्या अभिसरणपरे वाक्ये **आख्यातैकवचनस्थले** कर्त्रेकवचनवदुपमानपदवचनपरिवृत्या वचनपरिवृत्तिसाधुतोपदेशमात्रोपाधिवशादन्वितैव क्वचिदभिधीयते। **यथा च** बहुत्वाद्यविवक्षायामपि बहुवचनादीनां साधुता **तथोक्त**मधस्तादित्य**क्षपादानां पन्थाः**। धात्वर्थादन्यत्राख्यातार्थ सङ्ख्याया अन्वयबोधे भावनान्वयबोधसामग्रीव**द्धार्थे** तस्या अन्वयबोधे क्रियोपमानपरभावकृदन्तसमभिव्याहारो नियामको विवक्षितश्चात्र तथान्वयबोधो हत शयनानीवैषां शयनानीति विवरणादिति तु **युक्तमुत्पश्यामः**। अत्र श्लोके त्वयावाभ्यां लोकैरिति कर्तृपदान्यध्याहृत्य वाक्यानि पूरणीयानि।

तात्पर्यटीका

औत्सर्गिकमिति। **अयं** भाव:। द्विबहवोर्द्विवचनबहुवचने शेषे एकवचनमिति विन्यासे द्वित्वबहुत्वयोरविवक्षायां सामान्यत एवैकवचनविधानादिति। **तथाभूतस्य** प्रकृत्यर्थे तदनन्वयं नियामकस्य। **तर्हि** निरुक्तसामग्र्यभावस्य नियामकत्वं हि। **कथमिति**। उक्तप्रकारताप्रयोजकसामग्र्या एव सत्त्वेन यथोक्तसामग्र्यभावस्यानपायादिति भाव:। **न भवत्येवेती**त्थञ्चैकत्वाविवक्षायां प्रसक्तां विशेष्यपदसमानवचन-त्वापत्तिं वारयति। **किन्त्विति**। तथा च विरुद्धा सङ्ख्यात्र विवक्षितैवेत्याशय:।

तथापि सुप्यत इत्याख्यातस्य सङ्ख्याबोधकत्वाभावेऽपि। **आख्यातै**कवचनस्थल इति। आख्यातद्विवचनबहुवचनयो: कर्तृद्विवचनबहुवचनानियमस्य प्रागेवदर्शितत्वादेकवचनपर्यन्ता**नुधावनम्**। **तथोक्तमधस्तादिति**। बहुषु बहुष्वेव द्वित्वैकत्वयोरविवक्षायामिति यावदित्यर्थाभिप्रायवर्णनेन। **युक्तमुत्पश्याम इति**। तथा सति परिवृत्तेरर्थवत्वसम्भवादित्याशय:।

तर्कामृतम्

भविष्यत्त्वं लृटोऽर्थ:, तच्च विद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वम्। तेन 'गमिष्यति' इत्यत्र विद्यमानप्रागभावप्रतियोग्युत्पत्तिक-गमनानुकूलकृतिमानित्यर्थ:।

तरङ्गिणी

विद्यमानेति। अकर्मकेभ्यो भावे प्रत्ययविधानात्तेषां च फलं विद्यमानो य: प्रागभाव: तत्प्रतियोगिनी उत्पत्तिर्यस्येत्यर्थ:। उत्पत्त्यनन्तर्भावे चक्रे उत्पत्स्यमानघटस्य गृहे आनेष्यमाणघटस्यापि गृहवृत्तित्वेन गृहे घटो भविष्यतीति प्रतीत्यापत्तेस्तदन्तर्भाव:।

चषकम्

लृटोऽ**धिकमर्थमाह**। **भविष्यत्वमिति**। **काल**विशेषान्वय्युत्पत्यन्तर्भावाच्च श्वो गन्तर्यद्य गमिष्यतीति न धीरित्याह। **तच्चेति**। **यत्र** चोत्पत्स्यते नङ्क्ष्यतीत्यादावुत्पत्तिर्धातुना कथञ्चित्प्रत्याय्यते तत्समभिव्याहृतप्रत्ययार्थे तु न तस्या **अन्तर्भावः**।

इदं तु बोध्यम् इहाद्य घटो भविष्यतीत्यादाविहेति **देशविशेषोऽपि** तादृशोत्पत्तेरधिकरणत्वेन **प्रतीयते न तु** प्रागभावस्य। तथा सति कपालनाशजन्य घटनाशस्य **घटाद्या**त्मकप्रागभाववत्यपि तत्र कपाले इह घटध्वंसो भविष्यतीति बुद्धिप्रसङ्गात्। देशविशेषस्य कालविशेषस्य चोत्पत्तिमत्यन्वये तु प्राङ्गणे श्वः समुत्पद्य भवने परश्व आगन्तरि गवि भवने परश्वो भविष्यतीति बुद्धिप्रसङ्ग **इति**। **तेनेति**। **यथा** शब्दप्रयोगाधिकरणक्षणवृत्तिप्रागभावस्य लृडर्थस्य प्रतियोगित्वस्वाधिकरणकृतिप्रयोज्यफलानुकूलव्यापाराननुकूलत्वोभयसम्बन्धेन स्वार्थकृतावन्वयोपगमाच्च पचमानेनोदीच्यकृतिमादाय पक्ष्यतीति प्रयोगापत्तिः।

प्रागभावानङ्गीकारे वर्तमानकालध्वंसस्यैव **तदर्थस्य** स्वसम्बन्ध्युत्पत्याश्रयत्वस्वानधिकरणकृतिप्रयोज्यफलानुकूलव्यापाराननु-कूलत्वोभयसम्बन्धेन **तत्रान्वयादेवो**क्तदोषानवकाशः। **एवमत्रापि**। **लृडर्थ**स्योक्तप्रागभावस्य धात्वर्थे स्वप्रतियोग्युत्पत्तिकत्व**स्व**-सम्बन्धिगमनप्रयोज्यफलाननुकूलत्वोभयसम्बन्धेनान्वयमभ्युपगम्या**तिप्रसङ्गो** वारणीय इति तु **ज्यायः**। **अनुकूलकृतिमानिति**। **व्याख्यात**तत्त्वमेतत्।

तात्पर्यटीका

अधिकमाख्यातसामान्यापेक्षयाधिकम्। **कालविशेषान्वय्**युत्पत्यन्त-र्भावाच्चेति। ननु कालविशेषस्य धात्वर्थान्वयेनैव श्वो गन्तर्यद्य गमिष्यतीति धीवारणे किमर्थमुत्पत्तेः प्रत्ययार्थेऽन्तर्भाव इति चेन्न। ध्वंसत्वस्याखण्डोपाधित्वे श्वो भावि नाशके परश्वो नङ्क्ष्यतीति प्रयोगवारणायोत्पत्यन्त-र्भावस्यावश्यकत्वादत्र क्लृप्तधात्वर्थान्वयाकाङ्क्षस्य तस्य विशिष्टस्यान्वयेनापि सामञ्जस्यमित्याशयात्।

नन्वेवमुत्पत्स्यते घट इत्यत्र वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकोत्पत्तिको घट इत्यर्थः स्यात्तथा चाननुभव इत्यत आह **यत्र चेति**। **कथञ्चिद्**धात्वर्थमुद्रया धात्वर्थतावच्छेदकमुद्रया वा।

देशविशेषोऽपीति। **अपिनाद्येति** कालविशेषपरिग्रहः। तत् प्रयोजनं तूक्तमेवेति भावः। **घटाद्यात्मक**प्रागभाववतीति। **अथ** घटनाशप्रागभावस्य घटाद्यात्मकत्वे घटोत्पत्तेः प्राग्घटध्वंसप्रगभावासत्त्वेन घटध्वंससत्त्वावश्यकत्वे घटध्वंसोन्मज्जनप्रसङ्ग इति **चेच्छृणु**। यद्यतिरिक्तकल्पनागौरवाद्‌विभेषि मन्यस्व तर्हि घटप्रागभावस्यापि घटध्वंसप्रागभावरूपतां घटप्रागभावध्वंसस्य घटतद्‌ध्वंसरूपतामिवेत्यभिप्रेत्या**हादीति**। **बुद्धिप्रसङ्गादिति**। ध्वंसस्य तत्कपालवृत्तिप्रागभावप्रतियोग्यद्यतनोत्पत्तिकत्वेऽपि तत्कपालाधिकरण-कोत्पत्तिकत्वाभावादिति भावः। **भवने परश्व इति**। गोरुक्तोत्पत्तिमतो भवनाधिकरणकत्वात् परश्वस्तनकालिकत्वाच्चेति भावः। **ननु** तथापि गच्छति गमिष्यतीति प्रयोगापत्तिरान्तरालिकगमनोत्पत्तेरपि प्रागभावस्य वर्त्तमानत्वादत आह **यथेति**। **स्वाधिकरणेति**। आन्तरालिककृतेस्तु स्वप्रागभावाधिकरण-वर्त्तमानकृतिप्रयोज्यफलानुकूलान्तरालिकव्यापाराननुकूलत्वाभावान्नोभयसम्बन्धेन प्रागभावविशिष्टत्वं भविष्यत्वमिति नोक्तप्रयोगापत्तिः।

तदर्थस्य लृडर्थस्य। **तत्र** पकानुकूलकृतौ। **उक्तदोषः** पचमाने पक्ष्यतीति प्रयोगापत्तिः। **स्वसम्बन्धिगमनेति**। स्वं गमनोत्पत्तिप्रागभावस्तत्सम्बन्धि गमनं वर्त्तमानं किञ्चिदेव तत्प्रयोज्यफलाननुकूलत्वं भविष्यति गमनेस्तिनान्तरालिके इति भावः। **अतिप्रसङ्गो** गच्छति गमिष्यतीति प्रयोगप्रसङ्गः। **व्याख्याततत्त्वमिति**। गमधातुसमभिव्याहृताख्यातेन न कृतिः प्रतिपाद्यतेऽ**पित्वाश्रयत्व**मित्युक्तमित्यर्थः।

तर्कामृतम्

लुटोऽर्थः अनद्यतनत्वमपि। लुङोऽर्थः उत्पत्तिर्भूतत्वं च। भूतत्वमतीतत्वम्, तच्चोत्पत्तौ अन्वेति। तथा च विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वम् लब्धम्।

तरङ्गिणी

अनद्यतनत्वमपीति। अद्यतनत्वं च पूर्वरात्रेरन्त्ययामद्वये-नोत्तररात्रेराद्ययामद्वयेन च युक्तं मध्यवर्त्यहः। तद्भिन्नत्वमनद्यतनत्वम्। अपिना भविष्यत्त्वम्। **उत्पत्तिरिति।** संयोगादेर्वर्तमानतादशायामपि घटः समयुजदित्यादि-प्रयोगादुत्पत्त्यन्तर्भावः। भूतत्वस्य तदघटितत्वात्पृथगुपन्यासः। चरमव्यापारो-त्पत्तावेव भूतत्वस्यान्वयात्। पाकस्य वर्तमानतादशायामपि कस्यचिदुत्पत्ते-र्ध्वंसेऽपि नापाक्षीदिति प्रयोगः।

चषकम्

अनद्यतनत्वमपीत्यपि नानुपदोक्तभविष्यत्वपरिग्रहः। **अद्य** शब्दप्रयोगाधिकरणे दिवसे भवमद्यतनमद्यपदार्थश्चातीतानागतरात्र्योरन्त्याद्य-द्यामद्वयोपेतं मध्यममहस्तदन्यच्चानद्यतनं तत्त्वमद्यतनकालासम्बन्धो **बोध्यः अतोऽपि** द्व्यकालस्य साङ्गयागस्याद्यतनकालसम्बन्धितया तदन्यत्वाभावेन श्वो यक्ष्ये इत्यादयः प्रयोगाः सङ्गच्छन्त इति **केचित्तन्न।** तथा सति नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोरिति निषेधानर्थक्यापत्तेः। **किन्तु** नाद्यानद्य तत्रभवमनद्यतनं तस्य भावोऽनद्यतनकालसम्बन्ध इत्यर्थः। **इत्थञ्चाद्य**प्रभृति मेदाशब्रह्मचर्यं भविष्यतीतिवच्छ्वो यक्ष्यमाणे देवता वसन्तीत्येवमर्थं नानद्यतनवदिति निषेधारम्भः।

तच्च द्विविधं भूतं भविष्यच्च तयोर्भविष्यदनद्यतनत्वं शब्दप्रयोगाधिकरणदिवसध्वंसोत्पत्तिकत्वरूपं लुटोऽर्थो भूतनाद्यतनत्वं शब्दप्रयोगाधिकरणदिवसाद्यक्षणवृत्तिध्वंसप्रतियोग्युत्पत्तिकत्वरूपं लङ्लिटोरिति **बोध्यम्।** तथा च गन्तेत्यादौ शब्दप्रयोगाधिकरणदिवसध्वंसाधिकरणकालोत्पत्तिकं यद्गमनं तदाश्रय इत्यर्थः। परश्वो गन्तरि श्वो गन्तेति प्रयोगवारणायास्यापि दर्शितः **परिष्कारः।** उदपादीत्यत्रोत्पत्तेरुत्पत्य**बोधाद्**भूतत्वस्योत्पत्य**घटितत्वेऽपि** ध्वंसत्वस्याखण्डोपाधित्वे स्वातन्त्र्येणाप्युत्पत्तिर्लुङर्थो वाच्योऽ**न्यथा**

ध्वंसादेर्वर्त्तमानत्वेऽप्यनशदिति प्रयोगानापत्तेरिति मतमनुसृत्याह। **उत्पत्तिर्भूतत्वञ्चेति। लब्धमिति।** विद्यमानध्वंसप्रतियोगित्वस्यैकस्य लुङर्थस्योत्पत्तिरूपलुङर्थान्तरे**ऽन्वयेन** लब्धमित्यर्थः। **अनुपदं** निरूपिततत्त्वमंतत्।

वस्तुतो वर्त्तमानध्वंसो लुङर्थस्तस्य स्वाधिकरणकृतिजन्यफलाननुकूलत्व-विशिष्टप्रतियोगितासम्बन्धेन कृतावन्वयोपगमेनैवान्तरालिककृतिमादाय पचत्यापाक्षीदिति प्रयोगवारणमिति **दिक्।**

तात्पर्यटीका

अद्यशब्दप्रयोगाधिकरणे दिवसे इत्यारभ्य केचिदित्यन्तमेकं **मतम्। अतोऽपीत्यपिना** वक्ष्यमाणनिषेधारम्भादपीति **सूचितम्।**

ध्वंसोत्पत्तिकत्वरूपमिति। पूर्वेद्युर्नष्टे परश्वो नष्टेति प्रयोगवारणायोत्पत्यन्त**र्भावः। दर्शितः** परिष्कार इति। तथा च प्रत्ययार्थोत्पत्तौ श्वस्तनकालाद्यन्वयोऽभ्युपेय इति भावः। **अबोधाद्**बोधाननुभवात्। **उत्पत्यघटितत्वेऽपीति। अत एव** भूतत्वमतीतत्वमिति स्वयमेव विवृतं **न तूक्त**भविष्यत्वमिवोत्पत्तिघटितमित्याशयः। **अखण्डोपाधित्वे इति।** उत्पत्तिमदभावरूपत्वं तत्रोत्पत्तावुत्पत्यघटितभूतत्वान्वयेनैव कृतार्थता स्यादिति **तथोक्तम्। वस्तुतो** ध्वंसत्वस्याऽखण्डोपाधित्वं मानाभावान्मतमनुसृत्**येत्युक्तम्। अन्वयेना**धाराधेयभावेनान्वयेन। **इत्यर्थ इति।** तर्हि विशिष्टमेवार्थः कुतो नोक्तस्तत्राहा**नुपदमिति।** तथा चोदपादीत्यत्रोत्पत्तेरुत्पत्तिबोधो मा प्रसाङ्क्षीदिति न विशिष्टमर्थ उक्त इत्याशयः।

आन्तरालिककृतिमति। तदीयध्वंसस्य वर्त्तमानत्वेस्वाधिकरण-वर्त्तमानकृतिजन्यफलाननुकूलत्वविशिष्टप्रतियोगितासम्बन्धेनान्तरालिक-कृतावसत्त्वादिति भावः। गच्छत्यगमदिति प्रयोगस्याप्यंषैवोपदर्शिता वारणरीतिरित्याह। **दिगिति।**

तर्कामृतम्

लिटोऽनद्यतनत्वम्, परोक्षत्वम्, अतीतत्वं चार्थः। तदन्वयः पूर्ववदुत्पत्तौ।

तरङ्गिणी

तदन्वय इति। अतीतत्वान्वय इत्यर्थः। न तु परोक्षत्वस्याव्यावर्तकत्वात् किन्तु व्यापारे। चकारेणोत्पत्तिसङ्ग्रहः। तत्प्रयोजनं च संयोगदशायामपि संयुयुजे इत्यादिप्रयोगोपपत्तिः। परोक्षत्वं च प्रयोगकाले प्रत्यक्षाविषयत्वम्।

चषकम्

परोक्षत्वं वक्तृसाक्षात्काराविषयत्वम्। **अतीतत्वं** चार्थ इति। **अत्रापि** चशब्देनोत्पत्तिः समुच्चीयते एकमग्रेऽपीत्याह। **तदन्वय** इति। अतीतत्वस्यानद्यतनत्वस्य चान्वय इत्यर्थः। न तु परोक्षत्वस्याप्यव्यावर्त्तकत्वा**त्परन्तु** व्यापारेऽपरोक्षव्यापारव्यावर्त्तनसद्भावात्। **अत एव** विदूरं निर्देशार्हमपि परोक्षत्वमन्वययोग्यत्वमात्रसाधारण्यगुणेन मध्ये निर्दिष्टम्। तथा च जगामेत्यादौ परोक्षं यद्वर्त्तमानध्वंसप्रतियोग्यनद्यतनोत्पत्तिकं गमनं तत्कर्त्तेति शाब्दबोधः। **वस्तुतस्तु** लिडर्थस्य शब्दप्रयोगाधिकरणदिवसाद्यक्षणवृत्तिध्वंसप्रतियोगिकालोत्पत्तिकत्वस्य घटकोत्पत्तौ पूर्वेद्युस्तनकालाद्यन्वयान्न प्रपूर्वेद्युर्गतवति पूर्वेद्युर्जगामेति **प्रयोगः**।

कथं तर्हि 'व्यातेने किरणावलीमुदयन' इत्यादि। अनायासनिष्पन्नत्वद्योतनाया**परोक्ष्यविवक्षया**। भाविकालङ्कारन्यायेन भूतार्थसाक्षात्कारगर्भवर्णनप्रधानेऽध्यास्त सर्वर्तुसुखामयोध्यामित्यादौ **पारोक्ष्याविवक्षयेव**। **एतेन** परोक्षत्वादिकं स्वरूपसदेव लिडादेः प्रयोगसाधुतानिर्वाहकमिति **मतमपास्तम्**। मतोऽहं किलविललापेत्यत्र परोक्ष्यविवक्षया साधुतोपपादनाच्चेत्यन्यत्र **विस्तरः**। **यदपि** वक्तृभिन्नकर्त्तृकत्वं मत्वा **णलुत्तमो वेति** ज्ञापकादपरोक्षेऽपि क्वचिल्लिडिति। **तदपि** न। सूत्रान्तरानुशिष्टा**परोक्षगोचर** वास्तविकपरोक्तार्थोपपादकाभावप्रतिपिपाद

यिषारूपात्यन्तापहनवविषयलिड्विषयत्वेनापि तस्य चरितार्थत्वेन ज्ञापकत्वासङ्गतेरिति **केचित्**। मम त्वस्त्वत्यन्ता**पह्नव**विषयमपूर्वं वचनमस्तु च यथाकथञ्चित् पारोक्ष्यं **परन्तु** ज्ञापकसिद्धार्थकथारूपभिन्नक-र्तृकतत्सूत्रानालोचनदशायां स्वविषयमलभमानं णलुत्तमो वेत्त्विवापरोक्षेऽपि क्वचिल्लिडिति ज्ञापनाय प्रभवत्येवेति **प्रतिभाति**।

पूर्ववल्लुङर्थभूतत्वस्येव। **उत्पत्ताविति**। **अन्यथा** नाशस्य वर्त्तमानत्वान्न नाशेति प्रयोगानापत्तेः। **यद्यपि** लङर्थनिर्देशानन्तरं लिटः परोक्षत्वञ्चार्थ इत्येव **प्रक्रमानुरोधाद्** वक्तुमुचितं **तथापि तदानुपदोक्त**परोक्षत्वस्यैव परामर्शो भवेन्न तत्पूर्ववाक्यनिर्दिष्टयोरतीतानद्यतनत्वयोरिति तदन्वय इत्यस्याप्यपकर्षे प्रकृते लङर्थातीतानद्यतनत्वयोरिव परोक्षत्वस्या-प्युत्पत्यन्वय**भ्रान्ति**प्रसक्तेस्तयोः पुनर्निर्देशध्रौव्ये प्रक्रमजीवातुलाघवभङ्गा-वश्यम्भावा**दशोकवनिकान्याया- दित्थमुक्तम्**

तात्पर्यटीका

परन्तु स्वाधिकरणगमनजन्य- फलाननुकूलत्वविशिष्टप्रतियोगित्वसम्बन्धः कृतिर्निविशते न वेत्यन्यदेतदिति **बोध्यम्**। **अत** एवाव्यावर्त्तकत्वेनानन्वितत्वादेव। **प्रपूर्वेद्युर्**गतवतीत्यनेन तादृशध्वंसप्रतियोगिकालोत्पत्तिकत्वं गमने पूर्वेद्युरित्यनेन तद्घटकोत्पत्तौ त्वेतदन्वयायोग्यत्वं तेन दर्शितदिशोक्तप्रयोगवारणमप्युपदर्शितम्। **इदमुपलक्षणम्**। पूर्वेद्युर्गतवति प्रपूर्वेद्युर्जगामेत्यपि न प्रयोगः। भूतानद्यतनगमनकर्त्तुः प्रपूर्वेद्युस्तनत्वेऽपि गम्यन्ते **त्यक्ते**स्तत्कालिक-त्वाभावादित्यपि **द्रष्टव्यम्**।

कथं तर्हीति। परोक्षत्वस्य लिडर्थत्वे इत्यर्थः। **पारोक्ष्यविवक्षयेति**। अत एवाहमित्युपेक्ष्योदयनइत्युक्तम्। **भाविकालङ्कारन्यायेनेति**। भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनमिति। **अस्यार्थः**। किञ्चित्फलप्रतिपिपादयिषया भूताद्यर्थसाक्षात्कारवर्णनं भाविकालङ्कारो भवतीति। पारोक्ष्याऽ**विवक्षयेति**। अन्यथाध्यासाञ्चक्रे इत्यवक्ष्यत्। **पारोक्ष्य**विवक्षाङ्गमयितुमत्र **इत्युक्तम्**। **अत** एव वक्तृभिन्नकर्तृकत्वस्य विवक्षानर्हतयात्र परोक्षपदार्थतया परित्यागः।

मत्त्वस्य वस्तुतस्तदननुगुणतया तदुपादानानर्थक्याच्चेत्यत **आहान्यत्र** विस्तर **इति। मत्त्वेति**स्वरूपसत्प्रयोगसाधुतानियामकं मत्त्वेत्यर्थो**ऽन्यथा** ज्ञापकत्वासङ्गते। अपरोक्षगोचरेति लिड्विशेषणम्। **प्रतिभातीति**। तस्मादेतत्वार्तिकानालोचनदशायामत्यन्तापह्नवविषयोऽपि लिट्ज्ञापकबलादेवेत्युपायकृतामाशयो ध्वनितः। न च स्मृत्यधिकरणन्यायात्तस्यात्यन्तापह्नवविषयता न स्यादिति वाच्यम्। प्रयोगशरणानां तत्रैव प्रयोगदर्शनात्।

नाशस्य वर्त्तमानत्वादिति। **एतेन** वर्त्तमानध्वंसप्रतियोगित्वमनद्यतनत्वञ्च नास्तीति सूचितम् **प्रक्रमानुरोधाच्च**कारेणानद्यतनत्वातीतत्वयोः परिग्रहेण लाघवानुरोधात्। **तदा तदन्वय** इति तच्छब्देन **अपकर्षे** लङर्थनिर्देशानन्तरं लिङर्थानामप्युत्पत्यन्वयभ्रान्तिप्रसक्तरित्यर्थः। **तयोर्लिडर्थयोर्द्वयोरेव। पुनर्निर्देशध्रौव्य इति**। लिडर्थनिर्देशानन्तरमप्यत्राप्यतीतानद्यतनत्वयोरन्वयः पूर्ववदुत्पत्ताविति पाठे इत्यर्थः।

तर्कामृतम्

लङोऽनद्यतनत्वमतीतत्वं चार्थः।

चषकम्

लङोऽनद्यतनत्वमिति। कथं तर्हि **'नलः स भूजानिरभूदगुणाद्भुत'** इति। **स राशिरासीन्महासां महोज्वल** इतिवल्लङानद्यतनत्वानर्थकलुङो बाधप्रसङ्गादिति **चेदनद्यतने**ऽप्येतदर्थाविवक्षया लङोऽनवसरे लुङ्प्रसरस्योक्तप्रायत्वादे**तेनानद्यतनत्वं** स्वरूपसदेव लङः प्रयोगसाधुतानियामकमिति **मतमपास्तम्**। पूर्ववन्निष्कर्षान्नातिप्रसङ्गः।

नञ्समभिव्याहारे च तत्तल्लकारार्थः स स कालोऽभावान्वयीति चैत्रेण न पक्ष्यते तण्डुल इत्यत्र भविष्यतश्चैत्रकर्त्तृपाकस्याप्रसिद्धावपि न क्षतिः। **स** विनष्टं घटं न पश्यतीत्यादौ विनष्टघटकर्मकदर्शनस्य

वर्त्तमानाभाववानितिवदुत्पत्तेः। **क्वचिच्च घट** आकाशं न पक्ष्यतीत्यादौ तु **घटे** आकाशकर्मकत्वाभाववद्यत्पाकत्वावच्छिन्नं तत्कर्तृत्वाभावो नञा बोध्यतं सकृदिति व्युत्पत्तेरत्रानङ्गीकाराद**दंध** आकाशं न पश्यतीत्यादावपीयमेव सरणिः। **घटादावन्य**पक्तृत्वादिभ्रमे तु न द्वेधा नञर्थमानं **किन्त्वाकाशाकर्मकपाककर्त्तेति**। **नव्यास्तु** चैत्रो घटं न पश्यतीत्यतो मैत्र आकाशं न पश्यतीत्यस्याविलक्षणबोधजनकत्वानुपपत्तेर्द्वेधा नञर्थभानमसङ्गतमेव **न हि** तत्रापि तस्य द्वेधा भानमुपगन्तुं शक्यं पटमात्रं पश्यत्यपि घटं न पश्यतीति प्रयोगानुपपत्ते**स्तस्मादपार्थका** एव तादृशाः प्रयोगा इति **वदन्ति**।

तात्पर्यटीका

एतेनानद्यतनत्वाविवक्षया लङोऽनवसराभिप्रायेणाप्रयोगेण। **अत्रापि** शब्दप्रयोगाधिकरणदिवसाद्यक्षणवृत्तिध्वंसप्रतियोग्युत्पत्तिकत्वलङर्थस्तत्र चोत्पत्तौ पूर्वेद्युस्तनकालाद्यन्वयादेव पूर्वेद्युर्गतवति न प्रपूर्वेद्युरगच्छदिति प्रयोगप्रसङ्ग इत्याह। **पूर्ववदिति**।

ननु भविष्यत्वस्य लृडर्थत्वे चैत्रेण न पक्ष्यते तण्डुल इत्यत्र भविष्यतश्चैत्रकर्तृकपाकस्याप्रसिद्ध्या तत्कर्मत्वाभावबोधो न स्यादत आह **नञ्समभिव्याहरे चेति**। **इतिवदुपपत्तेरिति**। चैत्रकर्तृकपाककर्मत्वस्य भविष्यत्कालावच्छिन्नाभाववांस्तण्डुल इत्यन्वयोपपत्तेरित्यर्थः। **क्वचिदिति**। यादृशक्रियायाः कर्त्तृत्वं कर्मत्वञ्च ययोः कर्त्तृकर्मणोर्बाधितं तादृशक्रियासमभिव्याहततादृशकर्त्तृकर्मणोः प्रयोग इत्यर्थः। तदेवोदाहरति **घट इति**। तत्र नञर्थस्य द्वेधा भानमङ्गीकृत्य शाब्दबोधं समर्थयति। **घटे इति**। **पाककर्त्तेतीति**। नञा बोध्यत इत्यन्वयः। **अपार्थका एवेति**। परस्परानन्वितार्थका एवेत्यर्थः। **उक्तरीत्या** तेपां प्रामाण्योपपादने लोहितवह्निं जानतीत्यस्यापि विशेष्ये विशेषणानन्वयनिश्चयदशायां विशेष्यविषयितायां विशेषणावच्छिन्न- त्वभानाङ्गीकारेण प्रामाण्योपपादनसम्भवात्तेषामपि साधुताप्रसङ्ग इति भ्रमस्थले च तादृशसामानाधिकरण्याप्रसिद्ध्या तज्ज्ञानस्याप्यसम्भवादिति दीधितिविविरोधापत्तिरित्ये**वकारार्थः**।

तर्कामृतम्

विधिलिङोऽर्थः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाधनत्वम्।

तरङ्गिणी

विधिलिङ इति। यजेतेत्यादिविधेः प्रवर्तकत्वं सर्वानुभवसिद्धम्। तच्च प्रवृत्तिजनकीभूतज्ञानमनुत्पाद्य न सम्भवतीति प्रवृत्तिजनकीभूतज्ञानविषयेषु लिङादेः शक्तिरभ्युपेया। गुरुतरसुवर्णपिण्डग्रहणादौ इष्टसाधनत्वेन बलवदनिष्टाजनकत्वेन चावगतेपि प्रवृत्त्यदर्शनात्कृतिसाध्यताज्ञानम्, बलवदनिष्टाजनकत्वेन कृतिसाध्यत्वेन चावगतेऽपि विवाहार्थानृतवदनादौ आस्तिकस्य प्रवृत्त्यदर्शनादिष्टसाधनत्वज्ञानम्, कृतिसाध्यत्वेनेष्टसाधनत्वेन चावगतेऽपि विषयुक्तमोदकभक्षणे प्रवृत्त्यदर्शनाद्बलवदनिष्टाजनकत्वज्ञानं च प्रवृत्तिहेतुः। बहुवित्तव्ययायासरूपानिष्टजनकत्वग्रहेऽपि यागादौ प्रवृत्तिदर्शनाद्बलवदिति अनिष्टविशेषणम्। तत्त्वं च क्रियाजन्येष्टापेक्षयाधिकत्वेन गृहीतत्वम्। अत एव रागान्धस्यास्तिकस्यागम्यागमनादौ प्रवृत्तिः। तेन तज्जन्यसुखापेक्षया नरकस्याधिकत्वेनाग्रहात्। इष्टं च वैदिकविधौ अधिकारवाक्योपस्थितमर्थवादोपस्थितं वा। तदभावे **"स स्वर्गःस्यात्सर्वान्प्रत्यविशिष्टत्वात्"** इतिन्यायेन स्वर्गः। अङ्गविधौ तु प्रधानफलमेव। लोके तु यथाक्लृप्तमिति विवेकः। कृतिसाध्यताज्ञानस्य चिकीर्षाद्वारा प्रवृत्तिहेतुत्वे बहूनामविवाद इति बोधयितुं तस्य पृथङ्निर्देशः। तद्धर्मप्रकारकेच्छायाः तद्धर्मप्रकारकज्ञानसाध्यत्वात्। उपादानप्रत्यक्षं तु साक्षादेव प्रवृत्तिहेतुः। बलवदनिष्टाजनकत्वज्ञानहेतुत्वे तु बहूनां विवादादुपसर्जनत्वेन तदुपादानम्। तथा च विधितस्त्रयाणां मदीयत्वेदानीन्तनत्वयोः कथञ्चिदुपस्थितौ उपादानसन्निकर्षे सति मत्कृतिसाध्यत्वांशे उपनीतभानात्मकं यागो मत्कृतिसाध्यो मदिष्टसाधनमदीयबलवदनिष्टासाधनमित्युपादानं प्रत्यक्षम्। ततश्चिकीर्षा, ततो यागादौ प्रवृत्तिरिति विधेरुपनायकत्वेनोपयोगः। बहुवित्तव्ययायास-साध्यवैदिककर्मणि प्रवृत्तौ प्रामाण्यनिश्चयापेक्षणेन विधितस्तदवगमे विधिप्रयोज्यत्वेन तत्र प्रामाण्यनिर्णयस्य सुकरत्वान्नान्यतस्तदवगमे प्रवृत्तिरिति ध्येयम्।

चषकम्

विधि लिङ इति। विधि: प्रवर्त्तकज्ञानविषयो धर्म**स्तद्बोधकतया** लिङ्यपि तदुपचार:। **हन्तैवं चिकीर्षाकालोऽपि** विध्यर्थो भवे**च्चिकीर्षा**कालीनकृतिसाध्यताज्ञानस्य प्रवर्त्तकतया चिकीर्षाकालस्यापि तथात्वादिति **चेन्मैवम्**। प्रवृत्तिविषयविशेष्यकयत्प्रकारकज्ञानत्वं निरुक्तकारणतावच्छेदकतापर्याप्त्यधिकरणं तत्त्वस्योक्तत्वा**देतल्लाभायैव धर्मपदम्**। **चिकीर्षा**कालस्य विशेषणत्वे तु साध्यत्वसाधनत्वयोर्विरोधश्च स्यादिति न **किञ्चिदेतत्**। इदमुपलक्षणम्। लोट इत्यपि **बोध्यम्**। **परन्तु** तस्य विधिलिङर्थातिरेकिणोऽर्थान्तरस्यापि प्राप्तकालस्य सम्भवं वक्तुमत्र **योगविभाग** इति ध्वनयितुं **न द्वन्द्वसमादर:** विधे: प्रवर्त्तकत्वानुरोधेन प्रवर्त्तकज्ञानविषयार्थकत्वमावश्यकम्। **स च** त्रिविध: **प्राणपञ्चक**सञ्चार सविपान्नभोजनचैत्यवन्दनादिषु प्रवृत्यदर्शनादि**त्याह**। **कृतिसाध्यत्व इति**।

इच्छारूपयागस्य कृत्यसाध्यत्वेऽपि तदनुकूलहवि:सम्पादनरूपव्यापारस्य कृतिसाध्यत्वा**त्तत्र** कृतिसाध्यत्वं **बोध्यम्**। कृतिश्च प्रवृत्तिरूपा। **मणि**कृद्भिरप्येतल्लाभायैव स्वेच्छाधीनत्वं कृतावुपात्तम्। तेन प्राणपञ्चकसञ्चारे जीवनयोनियत्नसाध्यत्वग्रहेऽपि न प्रवृत्यापत्ति:। **न चोपादान**प्रत्यक्षाभावादेव यथाश्रुतेऽपि नापत्तिरिति **वाच्यम्**। प्राणवहनाड्याद्युपादानकप्राण-सञ्चारसाध्यकप्रवृत्यापत्तिसम्भवा**दिति दिक्**। **अत्रास्मन्**मातामहचरणा: तद्धर्मान्यवृत्तिविषयतासम्बन्धेन गुणत्वावच्छिन्नं प्रति तद्धर्मभेद: कारणं कृतिसाध्यताज्ञानमपि साध्यताख्यविषयतावच्छेदकतया प्रवृत्तित्वावच्छिन्नं प्रतीति तदव्यापकस्य प्राणसञ्चारत्वाद्यन्यवृत्तिविषयतासम्बन्धेन गुणत्वावच्छिन्नकार्यस्य हेतो: प्राणसञ्चारत्वभेदस्यासत्त्वान्न तत्रोक्तविषयतया प्रवृत्यापत्ति:। **प्राणसञ्चारस्य** प्रवृत्ययोग्यत्वाभिधानमपि मिश्राणामेतदभिप्रायक**मेवेत्याहु:**। प्रवृत्तिं प्रति कृतिसाध्यत्वस्य ज्ञाने हेतुत्वं निर्विवादं चिकीर्षां विना प्रवृत्तेरनुदयादिच्छाया: स्वसमानप्रकारकज्ञानसाध्यत्वनियमेन कृतिसाध्यत्वप्रकार-केच्छारूपायास्तस्या एतेन विनासम्भवादिति सूचयितुं **पृथगुक्ति:**।

तात्पर्यटीका

चिकीर्षाकालीनेति। चिकीर्षाकालीना या कृतिस्तत्साधनताज्ञानमित्यर्थः। इदानीं ममेदं कृतिसाध्यमिति ज्ञानादेव प्रवृत्त्यभ्युपगमादन्यथा बालस्य यौवराज्ये प्रवृत्त्यापत्तेः। कृतिसाध्यतादिघटसाध्यतादिमात्रस्य तथात्ववारणाय **पर्याप्त्यधिकरणमिति**। कुतस्तल्लाभस्तदाह **तल्लाभायैवेति**। **धर्मपदमिति**। **व्यर्थं सत् किञ्ज्ञापयतीति न्यायेन** धर्मपदस्यैतादृशधर्मविशेषपरत्वादिति भावः। **ननु** चिकीर्षाकालीनत्वविशिष्टं कृतिसाध्यत्वं यत्र प्रकारस्तत्र तद्विशेषणं कालीनत्वमपि प्रकार एवेति तद्दोषतादवस्थ्यमत आह **चिकीर्षाकालस्येति**। **योगविभागो** लोड्वेति पृथक्करणम्। **न द्वन्द्वसमादरः** विधिलिङ्लोटोरर्थ इति नोक्तम्। **स च** प्रवर्त्तकज्ञानविषयो धर्मश्च। **त्रिविध** इत्याहेति योजना त्रितयविषयकज्ञानस्य प्रवर्त्तकत्वे युक्तिमाह **प्राणपञ्चकसञ्चारेति**।

तत्र कृतिसाध्यत्वमिति। इत्थं प्रयोज्यत्वमेव विध्यर्थ इति भावः। **प्राणवहनाड्याद्युपादानकेति**। **तदुक्त**मस्मन्मातामहचरणैः। **नवीनमते** त्वधिष्ठानमात्रमुपादानम्। तेन यागादेर्हविःशब्दस्य मृदङ्गादिः प्राणसञ्चारादेश्च प्राणवहनाड्यादिरुपादानमिति **बोध्यमिति**। प्राणसञ्चारावृत्तिविशेषयतयैव कृतिसाध्यताज्ञानस्य हेतुत्वाङ्गीकारेऽपि घटे जीवनयोनियत्नसाध्यत्वभ्रमात् प्रवृत्तिवारणाय प्रवृत्तिसाध्यताज्ञानहेतुत्वमावश्यकमेवेत्यत आह। **दिगिति** स्वरूपसम्बन्धरूपविषयतायाः प्रातिस्विकरूपेणैव सम्बन्धत्वात्तेनैवानतिप्रसङ्गे तद्धर्मान्यवृत्तित्वोपलक्षितं प्रवृत्तित्वव्यापकं गुणत्वं कार्यतावच्छेदकीकृत्य तद्धर्मभेदकारणतापि सुवचेत्याशयेनाहा**त्रास्म**न्मातामहचरणा इति। **पृथगुक्तिः** समासबहिर्भावेन निर्देशः।

चषकम्

आख्यातसामान्यार्थकृतेर्व्युत्पत्तिवैचित्र्येण कर्मप्रत्ययस्थल इव सर्वत्रापि **लौकिक**प्रमाणसिद्धेन धात्वर्थे विशेषणतया भानेनैव निर्वाहे न कृतिसाध्यत्वं विध्यर्थ इति तथोक्तमित्यपि **केचित्**। **बलवदिति**। इष्टोत्पत्तिनान्तरीय-कदुःखातिरिक्तदुःखाजनकेत्यर्थः। तेन नायाससाध्ये कर्मणि प्रवृत्तेरनुपपत्तिः।

न च सुखमात्रजनके कर्मणि तादृशं दुःखमप्रसिद्धमिति **वाच्यम्**। **कष्टं कर्मेति न्यायेन** तादृशकर्मासिद्धेः। **इष्टो**त्पत्यनान्तरीयकदुःखाजनकत्वं वा विध्यर्थो वाच्य इति न काप्यनुपपत्तिः। **न चैवमप्यतादृश**नरक-दुःखसाधनत्वमगम्यागमने प्रतिसन्दधानस्यापि रागान्धस्य प्रवृत्तिदुर्घटेति **वाच्यम्**। बलवद्द्वेषविषयाजनकत्वधियस्तथात्वाभ्युपगमाद्बलवत्त्वं च **निरुक्त**दुःख-विषयकद्वेषावृत्तिर्जातिविशेषः। न च रागान्धस्योक्तदुःखे द्वेषो वा तत्र द्वेषे जातिविशेषो **वेत्यस्तु**।

वस्तुतः प्रवृत्तिं प्रत्यनिष्टजनकताज्ञानं प्रतिबन्धकं तत्काले तदनुदया**द्यद्वक्ष्य**ति। न कलञ्जं भक्षयेदित्यादौ नञो बलवदनिष्टजनकत्वे **लक्षणेति**। तच्च निश्चयरूपमेव। **अत एव** मरणसन्देहेऽपि युद्धादौ पुंसां प्रवृत्तिस्तत्र च संशयसाधारणमप्रामाण्यज्ञानमेवोत्तेजकमिति लाघवमपि। **न तु** बलवदनिष्टाजनकत्वस्य ज्ञानं हेतुत्वमावश्यकमिति तद्धेतुत्वं **सविवादमि**त्याविष्कर्त्तुमितरोपसर्जनतयास्य **निर्देशः**। **अत एव** क्रियाविशेष्यकसाक्षादिष्टसाधनताप्रकारकप्रवर्त्तकज्ञाननिर्वाहायेष्टसाधनत्वं विशेष्यीकृत**मन्यथा** तु विधिवाक्यजन्यबोधानन्तरं **यथोक्तेष्ट**साधनताज्ञानं कल्पनीयं स्यादिति **ध्येयम्**। **नञ्**समभिव्याहरे प्रत्येकाभावबोधनेऽननुगमा-द्विशिष्टस्य शक्यत्वोपदर्शनाय तथोक्तमित्यपि **केचित्**। तन्न विशिष्टस्य शक्यत्वे विशेष्यविशेषणभावे विनिगमकाभावात्।

तात्पर्यटीका

कर्मप्रत्ययस्थले तृतीयार्थः कृतिर्नत्वाख्यातार्थ इत्याशङ्कामपनेतुमाख्यात-सामान्यार्थकृते**रित्युक्तम्**। तथा च प्राचीनमतेनासौ दृष्टान्त इति भावः। **लौकिक**प्रमाणसिद्धेन लोकानुभवसिद्धेन। **अन्यथा** चैत्रेण पच्यत इत्यत्रापि पाकविशेषणतयाख्यातार्थकृतिभानानुपपत्तेः। **वस्तुत** इच्छायाः समानप्रकारकज्ञान- जन्यत्वनियमेन कृतिप्रकारकं साध्यतासंसर्गकं ज्ञानमकिञ्चित्करमेवेत्यस्वर- सादाहे**त्यपि केचिदिति**। तथापि व्यभिचारसंशयो दुर्वार इत्यत आहे**ष्टोत्पत्यनान्तरीयकेति**। अन्यथैव बलवत्त्वं निर्वक्तुं

शङ्कते **न चैवमपीति**। इत्थं बलवत्त्वोक्तावपीत्यर्थः। **अतादृशेति**। इष्टोत्पत्त्यनान्तरीयकेत्यर्थः। **निरुक्तदुःखेति**। यादृशदुःखसाधनताज्ञानकालेऽपि रागान्धस्य प्रवृत्तिस्तादृशदुःखेत्यर्थः। **ननु** दुःखे दुःखत्वज्ञानाधीनद्वेषोत्पत्तौ बाधकाभावेन न च दुःखे द्वेष इत्यसङ्गतमतः प्रकारान्तरेण रागान्धस्य प्रवृत्तिमुपपादयति। **तत्र** द्वेषे जातिविशेषो वेति।

सविवादमिति। निरुक्तं विवादबीजं परिहरन्नेव तममुं विवादमप्यनुपदमेव परिहरिष्यति। **अस्य** निर्देश इति। **नन्वेवं** तस्य किमर्थं विध्यर्थताङ्गीक्रियत इति **चेद्दैव**वशसम्पन्नबलवदनिष्टजनकत्व-ज्ञानेऽप्रामाण्यज्ञानासञ्जनायेति ब्रूमः। **अत एव** निरुक्ततत्प्रतिबन्धकज्ञानेऽप्रामाण्यज्ञानजनकबलवदनिष्टाननुबन्धित्वज्ञानस्य सक्षात्प्रवृत्तावनुपयुक्तत्वादेव। **अन्यथा** तु बलवदनिष्टाजनकत्वस्य प्रवृत्यनुपयोगिनो विशेष्यीकरणं तु। **यथोक्तेति**। क्रियाविशेष्यकेत्यर्थः। विशेषणविशेष्यभावानुसरणस्य प्रयोजनान्तरं प्रदर्शयतां केषाञ्चिन्मतं दूषयितुमुपन्यस्यति। **नञ्समभिव्याहार इति**। **अननुगमादिति**। न कुर्यान्निष्फलं कर्मेत्यादाविष्टसाधनत्वाभावो न परदाराङ्गच्छेदित्यादौ बलवदनिष्टाजनकत्वाभावो न चन्द्रमा हरेदित्यादौ कृतिसाध्यत्वाभाव इत्यननुगमादिति भावः।

चषकम्

तत्पुरुषीयबलवद्द्वेषविषयदुःखजनकत्ववरूपान्वयितावच्छेदकावच्छिन्ना-भावबोधनिर्वाहाय **तादृशदुःख**जनकत्वेऽभावे च **खण्ड**शक्तेरावश्यकत्वाच्च का वार्त्ता तद्विशिष्टेष्टसाधनत्वे एक**शक्तेर्यस्य न स्वजने प्रीतिः का वा तस्य परे जने इति न्यायात्**। **अनिष्टजनकत्व**व्याप्यावच्छेदकधर्मदर्शनादीनां बहूनां तादूप्येण प्रतिबन्धकत्वकल्पनापेक्षयानिष्टाजनकत्वज्ञानस्यैकस्य हेतुताकल्पनमेव लघीय इत्याशयेन तदेवादृतं ग्रन्थकृता। **योग्यत्वा**व्यभिचरितत्वधियो हेतुताया**मपीदमेव** बीजमित्य**वधेयम्**। **न च** नरकद्वेषकालीननरकहेतुताज्ञानवतः प्रवृत्यापत्तिः नरकजनकत्वत्वेन

वस्तुतोऽनिष्टजनकत्वग्रहेऽप्यनिष्टजनकत्ववावच्छिन्नाभावस्य **सुग्रहत्वादिति वाच्यम्**। तदद्वेषाभावकालीनप्रवृत्तौ तदद्वेषाभावस्य तदद्वेषकालीन प्रवृत्तौ तत्साधनताज्ञानाभावस्य हेतुत्वादन्यादृशप्रवृत्तेश्चालीकत्वात्।

अधिकमग्रे वक्ष्याम:। **ननु** द्वेषेच्छेष्टसाधनताज्ञानानामयौगपद्यान्न बलवदनिष्टाजनकत्वज्ञानहेतुत्वं प्रामाणिकमिति **चेन्न**। द्वित्रिक्षणान्तरितेऽपि द्वेषे प्रवृत्यनुदयस्यानुभविकत्वेन **तथाभिधानात्**। **ज्ञानानामेव** यौगपद्यं नेष्यत इत्य**भ्युपगमाद्वा**। **श्येनस्त्व**दृष्टद्वारानिष्टजनको न साक्षात् **किम्वा** खड्गाभिघातेनान्यथासिद्ध एवेति वक्ष्यत इति न तत्र विध्यर्थबाध:। **प्रायश्चित्तं** तु वाचनिकमहीनवदभिचारेऽपि। **अत एव** प्रत्यभिचारेण खड्गाभिघातानुत्पादेऽपि प्रायश्चित्ताचरणं शिष्टानाम्। **यद्वाभिचार**प्रायश्चित्तबोधकागमेन सहकारिणाभिचरन्नित्यादिवैदिकविधीनां बलवदनिष्टाननुबन्धित्वातिरिक्त-योर्द्वयोरेवोक्तयोरर्थयोस्तात्पर्यग्रह: प्रत्येकशक्तिपक्षे **सम्भवति**।

तात्पर्यटीका

प्रकारान्तरेणापि विशिष्टस्य विध्यर्थत्वं नास्तीति व्यवस्थापयितुमाह। **तादृशदु:ख**जनकत्वेऽभावे चेति बलवद्द्वेषविषयदु:खजनकत्वत्वावच्छिन्नाभावे एकशक्त्युपगमेऽशक्यस्य तत्पुरुषीयबलवद्द्वेषविषयदु:खजनकत्वस्य तत्त्वावच्छिन्नाभावबोधो न स्यात्तत्तत्पुरुषान्तर्भावेण शक्त्युपगमे च शक्त्यानन्त्यम्। **तादृशदु:ख**जनकत्वेऽभावे च शक्तिद्वयाभ्युपगमे तु तत्पुरुषीय-तादृशदु:खजनकत्वत्वमन्वयितावच्छेदकमिति तदवच्छिन्नप्रतियोगिताकत्व-सम्बन्धेनान्वयितावच्छेदकावच्छिन्नस्यैकस्य विध्यर्थस्यापरस्मिन् विध्यर्थेऽभावेऽन्वये भवति विवक्षितार्थलाभ इति भाव:। तस्य प्रतिबन्धकत्वे गौरवं प्रदर्श्यास्य हेतुत्वे विवादं परिहरति। **अनिष्टजनकत्वव्याप्येति**। **इदमेवेति। तत् सादृश्यात्तद्व्यपदेशा भवन्तीति न्यायादीदृशमेवेत्यर्थ:** अयोग्यत्वादिव्याप्यादिदर्शनादीनां बहूनां तादृूप्येण प्रतिबन्धकत्वापेक्षया योग्यतादिज्ञानत्वेन हेतुत्वे लाघवमेवेति यावत्सु **ग्रहत्वा**न्नरकजनकत्व-त्वावच्छिन्नाभावग्रहे एव तस्य विरोधित्वेनानिष्टजनकत्वत्वावच्छिन्नाभावत्वेन ग्रहे बाधकाभावात्।

नन्वेवं शाकं न भुञ्जीतेति वाक्याप्रामाण्यं नरकाननुबन्धित्वघटितविध्यर्थत्रयाबाधेन नञर्थबाधादत आह**अधिकमिति**। तथा च बलवद्द्वेषविषयतावच्छेदकत्वेनानुगतीकृतनरकत्वाद्यवच्छिन्नाभावकूटस्य शक्यताया अनुपदं वक्ष्यमाणत्वान्न दोष इति भावः। वारसङ्ख्यानियमस्य दुष्करत्वमभिप्रेत्याह **ज्ञानानामेवेति**। **नन्वेव**मदृष्टद्वारानिष्टजनकत्वं प्रतिसन्दधानस्य प्रवृत्यापत्तिरतः **किम्वेति**। शालिग्रामशिलाध्वंसस्य नरकहेतुता तु श्रुतिसिद्धेति न तत्रान्यथासिद्धिरिति भावः। वक्ष्यत इति हिंसालक्षण इत्यादिः। **नन्वेवं** श्येनस्य निषेधविध्यविषयत्वे प्रायश्चित्तमपि न स्यादत आह। **प्रायश्चित्तं त्विति**। तथा चाभिचारमहीनं च त्रिभिः। **अत एवेति**। प्रायश्चित्तं न निषेधविषयताप्रयुक्तमपितु निमित्तविशेषे वाचनिकमत एवेत्यर्थः। **एतेनेत्यादिना** वक्ष्यमाणास्वरसादाह **यद्वेति**।

चषकम्

एतेन बलवदनिष्टप्रयोजकेऽपि प्रवृत्यदर्शनात् तदप्रयोजकत्वमेव विध्यर्थस्तस्य च तत्र **बाध** एवेति प्रजल्पन् **समाहितः**। **इत्थञ्च** सामान्यविधेरुपात्तविशेषेतरपरत्वं व्युत्पत्तिसिद्धमिति मा हिंस्यादित्यत्र **सङ्कोचः**। **किम्वा** क्लृप्तसङ्कोचेनैवोपपत्तौ श्वेतच्छागमालभेतेत्यादौ प्रायश्चित्तानुपदेशान्न क्लृप्तार्थपरित्यागो न्याय्य **इति**। **अत** एवागम्यां गच्छेदित्यादिलौकिकवाक्यप्रामाण्यापत्तिवारण**मित्यधिकमग्रे वक्ष्यामः**। **अत्रेदं बोध्यम्**। तत्पुरुषीयबलवद्द्वेषविषयतावच्छेदकत्वेनोपलक्षितनरकत्वरोगत्वभयत्वाद्यवच्छिन्नप्रतियोगिताकाभावकूटे जनकतासम्बन्धावच्छिन्नप्रतियोगिताके एकशक्त्युपगमान्न कलञ्जं भक्षयेदितिवच्छाकं न भुञ्जीत नैकः पर्वतमारोहेदित्यादीनामपि प्रामाण्यनिर्वाहः।

उक्तानुपदं वक्ष्यमाणा च रीतिरिहाप्यनुसन्धेया। अतिप्रसक्तप्रमेयत्वादेरुपलक्षणत्वे तु तदुपलक्षितसुखाद्यननुबन्धित्वस्यापि विध्यर्थत्वेन तदभावतात्पर्येणाधुनिकानामन्नं न भुञ्जीतेत्यादि प्रयोगापत्तिः। **एतेन** बलवदनिष्टाजनकत्वं न लौकिकविध्यर्थः कदाचित् कस्यचित्

पाकादिजन्यश्रमादावपि बलवद्द्वेषोदयेन विध्यर्थबाधापत्तेरिति **निरस्तम्**। विशिष्य नरकाननुबन्धित्वमात्रस्य विध्यर्थत्वाभ्युपगमेन न कलञ्जं भक्षयेदित्यस्य प्रामाण्योपपादनेऽपि **शाकं न** भुञ्जीतेत्यादेरप्यदृष्टानर्थकलौकिकवाक्यस्याप्रामाण्यापत्तेस्तुल्यतया **रोगाननुबन्धित्वादेरपि तत्र तथात्वे** एवम्विधद्वेषविषयतावच्छेदकानां सर्वेषां प्रत्येकमनुपस्थितानां शक्तिग्रहासम्भवेनोक्तानुगमस्यावश्यकत्वादेव विध्यर्थबाधाप्रसङ्गात्। **श्रमत्वस्य स्वीय**बलवद्द्वेषविषयतानवच्छेदक**त्वात्**।

तात्पर्यटीका

एतेनाभिचरन्नित्यादिविधिभ्यां बलवदनिष्टाननुबन्धित्वाप्रयत्ययेन। **बाध एव** श्येनस्यान्यथासिद्धत्वेऽपि बाध एव नन्वेवमभिचरन् श्येनेन यजेतेत्यादिवाक्याच्छ्येने बलवदनिष्टाननुबन्धित्वाप्रत्ययादेव मा हिंस्यादिति सामान्यतोऽपि निषेधेन बलवदनिष्टसाधनत्वस्यावगमेऽप्युक्तविधितस्तद्व्यतिरिक्तार्थद्वयप्रतिपत्ताववविरोधान्मा हिंस्यादित्यत्र सङ्कोचो न स्यादत आहे**त्थञ्चेति** तात्पर्यसङ्कोचेनैव विधिनिषेधयोर्विरोधपरिहारे चेत्यर्थः। **व्युत्पत्तिसिद्धं** लौकिकवाक्ये व्युत्पत्तिसिद्धम् **सङ्कोचो** न्याय्य इत्यन्वयः। **नन्वेवं** विधिनिषेधश्रुत्योरविरोधसम्पत्तावपि दैववशसम्पन्नबलवदनिष्टजनकताग्रहवशात्तत्र वैदिके कर्मणि प्रवृत्तिविपत्तिर्दुर्वारैवेष्टसाधनताज्ञानसम्पत्तये तस्यावश्यकत्वादित्यतआह। **किम्वेति। न्याय्य** इतीत्यत्रापि मा हिंस्यादित्यत्र सङ्कोच इत्यनुषज्यते। तस्य चावश्यक इति शेषो बोध्यः। **अत एव** वैदिकविधेरेवेत्यर्थद्वयमात्रपरत्वादेव। **नन्व**न्योद्देशेन **नाराकस्य** चिचक्षेपकर्त्तुर्यथार्धं पापं तथा श्येनेऽपि पापार्धस्यावश्यकत्वेनानन्यथासिद्धेऽत्र प्रवृत्तिर्दुर्घटैवेत्यत आहा**धिकमिति**। साक्षान्मरणोपधायकव्यापारस्यैवोक्तस्यार्धपापे स्वतन्त्रहेतुत्वं **न तु** परम्परया मरणोपधायकस्यापि श्येनस्येत्यग्रे वक्ष्याम इत्यर्थः। **जनकतासम्बन्धेति** वृत्यनियामकसम्बन्धस्याप्यभावप्रतियोगितावच्छेदकत्वमभ्युपेत्योक्त**मन्यथा** जनकत्वाभावकूट इति **बोध्यम्**।

नन्वेवं बलवद्द्वेषविषयतावच्छेदकत्वेनैव नरकत्वं भासेत न स्वरूपत इत्यत **आहोक्तेति। नन्वेव**मुपलक्षितधर्मावच्छिन्ने शक्तिग्रहेऽपि स्वरूपेण

रोगत्वभानेतिप्रसङ्ग इत्यत **आहानुपदमिति**। उपलक्षितशक्तिग्रहस्येति ग्रन्थेनेति यावत्। तत्र कामनाविषयतावच्छेदकत्वमुपलक्षणमत्र द्वेषविषयतावच्छेदकत्वमिति भेदाद्रीतिरिति। **एतेन** वक्ष्यमाणदूषणेन। **शाकं न भुञ्जीतेत्यादे**रित्यादिना **नैकः पर्वतमारोहेदित्यादेः** परिग्रहः। **अप्रामाण्यापत्तेरिति**। नरकाननुबन्धित्वस्य शाकभक्षणे सत्त्वेन तदभावबाधादिति भावः। **रोगाननुबन्धित्वादे**रित्यादिना भयाननुबन्धित्वादेः परिग्रहः। **तत्र** लौकिकवाक्ये। **तथात्वे** बोधावश्यकत्वे। उक्तानुगमे कथं नोक्तबाधप्रसङ्ग इत्यत आह। **श्रमत्वस्येति। स्वीयेति**। स्वं प्रवर्त्तमानः पुरुषः। तथा च यस्य यदा पाकजन्यश्रमे बलवान् द्वेषस्तदा तम्प्रत्योदनकामः पचेतेति वाक्यमप्रमाणमेव यस्य च नासौ तं प्रति च न विध्यर्थबाध इति भावः।

चषकम्

तात्पर्यनियमात्तु विशेषप्रत्ययनियमो **वक्ष्यति** चाधिकमुपरिष्टादिति। **इष्टेति**। चैत्यवन्दने प्रवृत्तिवारणाय गुरुमतसिद्धनरकरूपद्विष्टसाधनताज्ञानाधीननित्याकरणगोचरद्वेषघटितप्रवृत्तिसामग्र्यन्तरकल्पनापेक्षया तत्रापि किञ्चिदिष्टं कल्पयित्वेष्टसाधनताज्ञानस्यैव प्रवृत्तिसामान्यहेतुत्वमुचितमिति विशेषमपि दर्शयितुं विशेष्यतयास्य **निर्देशः**। समभिव्याहृतपदोपस्थाप्यकामनाविषयसाधनत्वे विध्यर्थत्वोपगमात् स्वर्गकामः पचेतेति नोदनसाधनताबोधतात्पर्येण प्रयुञ्जते। **ननु** कामनाविषयत्वस्योपलक्षणत्वेन विधिजन्यबोधे वक्ष्यमाणरीत्याऽविषयत्वेप्यशक्यस्वर्गत्वादेर्भाने**तिप्रसङ्गो दुर्वार इति चेदुपलक्षित**शक्तिग्रहस्य स्वर्गत्वावच्छिन्नधर्मिक **समभिव्याहृतपदो**पस्थाप्यकामनाविषयत्वज्ञानसहकृतस्यैव स्वर्गत्वप्रकारकशाब्दधीहेतुत्वो**पगमात्**।

घटं द्रव्यत्वेनैव जानातीति वाक्याद्घटत्वोपलक्षितघटविशेष्यकत्वभानवत् स्वर्गत्वोपलक्षितस्वर्गजनकताया विजातीयस्वर्गत्वावच्छिन्ननिरूपिताया यागादौ विधितो भानसम्भवान्न वक्ष्यमाणरीत्या वाक्यार्थबाधप्रसङ्गः।

तद्धर्मप्रकारकेच्छाधीनप्रवृत्तौ तद्धर्मावच्छिन्ननिरूपितसाधनताज्ञानहेतुत्वे भूयः सुखार्थिनां भ्रमं विना **क्रियाविशेष**प्रवृत्तिर्दुर्घटा। **सामान्यतो** वह्न्यर्थिनश्च वह्निविशेषकारणे तृणादौ च। **न हि** वह्नित्वं भूयस्त्वं वा तृणादेः क्रियाविशेषादेर्वा जन्यतावच्छेदकं व्यभिचारादार्थसमाजग्रस्तत्वाच्च। **तस्मात्तद्**धर्मावच्छिन्नफलार्थिप्रवृत्तौ तद्धर्मप्रकारेण भासमानफलं प्रति कथञ्चित् साधनताज्ञानस्यैव हेतुत्वात्। **नन्वित्थं** भूतस्वरूपयोग्यत्वज्ञानस्य प्रवर्त्तकत्वे घटकामस्तन्तुमुपाददीतेति वाक्याधीनाद्घटत्वोपलक्षितस्य जन्यसत्त्वावच्छिन्नाया कार्यतातन्निरूपितद्रव्यत्वावच्छिन्नसाधनताया **ज्ञानाद्**घटार्थि**नस्तन्तौ** प्रवृत्यापत्तिरिति **चेन्न**। **अत्र** सम्भवतोपलक्षणधर्मावच्छिन्नघटानुपधायकज्ञानेन प्रतिबन्धात्। **फलोपहित**साधनत्वस्य विध्यर्थत्वाच्च न तथाविधः प्रयोगः। **न च** साध्यत्वसाधनत्वे फलोपधानात्मके मिथो विरुद्धे कथमेकत्रैकदा ग्राह्ये इति **वाच्यम्**। एतत्कालीनकृतिसाध्यत्वैवमविधेष्टसाधनत्वयोर्ज्ञानस्य हेतुत्वानङ्गीकारात्।

किन्तु निर्विशेषितयोरेव कृतीच्छयोः साध्यत्वसाधनत्वघटकत्वाङ्गीकारादिति **स्मर्त्तव्यम्**। **यत्तु** विधेरिष्टत्वेनोपस्थिते फले स्वर्गकामपदैकदेशोपस्थितस्वर्गाभेदान्वयम**भ्युपगच्छन्ति**। **तन्न वृत्तपदार्थस्य वृत्तिबहिर्भूतपदार्थानन्वयनियमात्**। **स्वर्गा**र्थिप्रवृत्तौ स्वर्गाभिन्नेष्टसाधनताज्ञानस्यानुपायोगात्। **स्वर्गकामपदेन** स्वर्गकामनाया ऽवाधिकारत्वसमर्पणाच्च। **इदन्तु** तत्त्वम्। इष्टतावच्छेदकत्वोपलक्षिततृप्तिस्व र्गत्वाद्यवच्छिन्नेष्वेवैका शक्तिरुपगम्यते। **न चैव**मिष्टतावच्छेदकत्वेन स्वर्गत्वादीनां भानापत्तिः **सम्भवति**। तत्पदजन्यबोधविषयत्वेन शक्त्यविषयत्वस्यैवोपलक्षणत्वपदार्थत्वात्तथा शक्तिविषयत्वं तु विशेषणत्वम्। न च तत् प्रकृते। वस्तुगत्येष्टतावच्छेदकेनावच्छिन्नमवबुध्यतामितीच्छाङ्गीकारात्।

न च क्वचित्तृप्तिसाधनत्वं क्वचिच्च स्वर्गसाधनत्वमवगम्यत इत्यत्र नियामकाभाव इति **वाच्यम्**। कामपदसमभिव्याहृततत्तत्फलसमर्पकपदस्य तात्पर्यग्राहकस्य सत्त्वा**दित्यु**क्तत्वादिति।

तात्पर्यटीका

कदाचिच्चैत्रीयबलवद्द्वेषविषयतावच्छेदकत्वं कदाचिन्मैत्रीयबलवद्द्वेष-विषयतावच्छेदकत्वमनुगमकतया प्रत्येतव्यमित्यत्र नियामकाकाङ्क्षायामाह। **तात्पर्यनियमात्त्विति**। नञ्समभिव्याहारे बलवदनिष्टाजनकत्वाभावबोधे गौरवमभिप्रेत्याह **वक्ष्यति चेति**। तथा च नञ्समभिव्याहारे नञ एव बलवदनिष्टजनकत्वे लक्षणया न काप्यनुपपत्तिरिति भावः। **इति** विशेषमपीत्यपिना क्रियाविशेष्यकसाक्षादिष्टसाधनताप्रकारकप्रवर्त्तकज्ञान-सम्पत्तिरूपविशेष्यीकरणबीजपरिग्रहः। **वक्ष्यमाणरीत्या** तत्पदजन्यबोधविषयत्वेन शक्त्यविषयताया उपलक्षणतापदार्थत्वोक्त्या। **अतिप्रसङ्ग इति**। पाकत्वादेरपि भानप्रसङ्ग इत्यर्थः। **समभिव्याहृतपदेति**। तादृशशक्तिनिरूपकलिङ्वद-समभिव्याहृतकामपदेत्यर्थः।

घटत्वोपलक्षितेति। अन्यथैवकारार्थबाधापत्तेरिति भावः। **वक्ष्यमाणरीत्या** गङ्गास्नानजन्यस्वर्गे **व्यभिचारेण क्रिया**विशेषे नित्यस्वर्णदानादौ। **ज्ञानादित्यत्र** तन्तावित्यनुष्यज्यते। **अत्र** सम्भवतेत्यनेन यागे स्वर्गानुपधायकत्वज्ञानमसम्भवीति सूचितम्। प्रतिबन्धकवशात् प्रवृत्त्यनुपधानेऽपि तादृशप्रयोगसाधुत्वमनपवार्यमित्यत आह **फलोपहितेति**।

तदानीन्तनकृत्यनुपधायकताज्ञानप्रतिबन्धकत्वादेव बालस्य यौवराज्ये न प्रवृत्तिरित्यभिप्रेत्याह **किन्त्विति**। चिकीर्षाकालत्वेन तत्कालविशेषणत्वस्य प्राङ्निरस्तत्वात् **स्मर्त्तव्यमिति**। वाक्यार्थानुपपत्तिमुद्भाव्य वाक्यार्थबोधस्य प्रकृतानुपयोगं दर्शयति **स्वर्गार्थिप्रवृत्ताविति अधिकन्त्विति न्यायेन** स्वर्गाभिन्नेष्टसाधनताज्ञानस्योपयोगसम्भवेऽपि यथा मीमांसकानां स्वविशेषणवता प्रतिसन्धानजन्यकार्यताज्ञानस्य प्रवर्त्तकत्वबादिनां स्वविशेषणं कामनातद्वत्ता तत्सम्बन्धः स्वविषयसाधनत्वमेव न तु स्वर्गाभिन्नेष्टं तत्र घटकं वैयर्थ्यात्। **तथै**वास्माकमपि स्वर्गपदसमभिव्याहारादिष्टं स्वर्गत्वेनावगम्यते इत्यस्त्वित्याह **स्वर्गकामपदेनेति। यत्तु** गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वात् स्वर्गाभिन्नेष्टसाधनत्वं दुर्वचमिति। **तन्न**। गङ्गास्नानजन्यस्वर्गे व्यभिचारेण तादृशसाधनत्वम्य सिद्धान्तेऽपि प्रथमं दुर्ग्राह्यताया वक्ष्यमाणत्वात्।

इत्युक्तत्वादिति। स्वर्गादिपदसमभिव्याहारावधृततात्पर्यनियमात्तु विशेषप्रत्ययनियम इत्युक्तप्रायादित्यर्थः।

तर्कामृतम्

'स्वर्गकामो यजेत' इत्यादौ[1] कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनयागकर्त्ता[2] स्वर्गकाम इत्यर्थः।

तरङ्गिणी

यागक इति। यागो यस्येति बहुव्रीहिः। यागानुकूलकृतिमानित्यर्थः। आख्यातत्वेन कृतौ शक्तेः। यत्र च प्रथमान्तपदं नास्ति तत्र कृतिविशेष्यक एव बोधः। यद्यपि यागस्य देवतोद्देशेन द्रव्यत्यागस्येदमग्नये न ममेत्याकारकस्येच्छारूपतया तस्य कृत्यसाध्यत्वेऽपि हविः सम्पादनादिरूपव्यापारस्य कृतिसाध्यत्वेन तदधीनेच्छायां कृत्यन्वयव्यतिरेकानुविधायित्वरूपकृतिसाध्यत्वमक्षतमेवेति समासः।

चषकम्

इष्टसाधनयागक इति। यथोक्तयागानुकूलकृतिमानित्यर्थः। **यथा** चैतत्तथोपपादित**मधस्तात्**। विधिस्त्रयाणां मदीयत्वेदानीन्तनत्वयोश्च कथञ्चिदुपस्थितौ पुरोडाशाद्युपादानसन्निकर्षे च जायमानमुपादानप्रत्यक्षं तत्त्रितयोपनीतभानात्मकं प्रवृत्त्यै प्रभवति। **अत एव** विधिजन्यज्ञानजन्यं ज्ञानं प्रवर्त्तकमिति **मणिकृतः**। **लौकिक**वाक्यान्तरादप्येवं ग्रहे सम्भवत्यप्यप्रामाण्यशङ्काकलङ्कितत्वान्न **बहुवित्त**व्ययायाससाध्ये कर्मणि **निष्कम्प**प्रवृत्तिरिति विध्यादरः। **सोऽयं** विधिस्त्रिविधोऽपूर्वविधिर्नियमविधिः परिसङ्ख्याविधिश्च। **तदुक्तम्**–

---

१. 'द्वयस्य' इति पाठान्तरम्।

२. 'यागकः स्वर्गकाम' इति पाठान्तरम्।

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्ते परिसङ्ख्याभिधीयते॥

तात्पर्यटीका

ननु ज्ञानादीनां कृत्यसाध्यतया कथं यागानुकूलकृतिमानितिशाब्दबोध इत्यत आह। **यथा चैतदिति। अधस्तादिति।** यागे कृतिसाध्यत्वव्युत्पादनावसर इत्यर्थः। **अत एव** विधितः साक्षात्प्रवर्त्तकज्ञानासम्भवादेव। **नन्वेवं** चैत्यं वन्देतेति वाक्यप्रयोज्यतादृशप्रवर्त्तकज्ञानसम्भवात्तत्र प्रत्यापत्तिरत आह **लौकिकवाक्यान्तरादपीति। अप्रामाण्य**शङ्काकलङ्कितत्वादगृहीतप्रामाण्यक-प्रमाणावतारं विनोक्तशङ्कासामग्रीसम्भवात्। यथोक्तशङ्कायामपि सामान्यतः प्रवृत्तेर्दर्शनाद**बहिवति निष्कम्पेति** च।

चषकम्

अस्यार्थः प्रमाणान्तराप्रमितप्रमापक आद्यः। सामानाधिकरण्येन प्रमितस्यावच्छेदकावच्छेदेन प्रमापको द्वितीयोऽ**त एवापूर्व**साधनद्रव्यलक्षणा व्रीह्यादिपदानामिति **कुड्मले**वघातस्तु द्वारलोपान्न प्रवर्त्तत इति च मीमांसका**भिमतम्**। अवच्छेदकावच्छेदेनापि प्रमितस्यैव प्रमापकः स्वतःप्रामाण्यमलभमानः शेषशेषिनिषेधपर्यवसायी तृतीय इत्याद्यन्यत्र **विस्तरः**। **ननु** गङ्गास्नानजन्यस्वर्गे व्यभिचारेण तद्व्यावृत्तवैजात्यस्य प्रागनुपस्थित्या च कथं स्वर्गसाधनत्वं यागे ग्राह्यमिति **चेद्वस्तुतः** स्वर्गत्वाश्रयय-त्किञ्चिद्व्यक्तिसमानाधिकरणाभावाप्रतियोगित्वमेव प्रथममवगम्यते। **किम्वा** यागकालानुत्तरकालावृत्तित्वमेव स्वर्गत्वसामानाधिकरण्येनेति। **अत एव** साध्येष्टकत्वं निध्यर्थ इति **वदन्ति**। अनन्यथासिद्धत्वं तु प्रवृत्तितात्पर्यकत्वग्रहादुत्तरकालगम्यम्। **इत्थञ्च** ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव नित्यश्राद्धादौ नित्यत्वकाम्यत्वयोरप्य-विरोधाल्लाघ**वाद्रात्रिसत्रन्यामेन** पितृप्रीतिब्रह्मलोकावाप्त्यादिकमेव **फलमस्त्वत** एव शास्त्रादर्शितं फलमनुष्ठातरीत्युत्सर्ग इति **वदन्ति**।

पितृणां मुक्तत्वे तु गौरवं सोढ्वापि **विश्वजिन्न्यायात्** कर्त्तुरेव स्वर्ग: फलं **कल्प्यतां नित्ये** कृते प्रत्यवायानुत्पादनियमात्तदनुत्पादे दु:खप्रागभावावश्यम्भावाच्च। **अत्र** भट्टपादा:। भावनानामको व्यापारो द्वेधा शब्दसमवेतोऽभिधानामक एको यद्वशाल्लिङ् मां प्रवर्त्तयतीति व्यवहारो लोकानाम्। प्रवृत्तिरूपोऽन्यस्तत्राद्यस्य द्वितीयो भाव्यो द्वितीयस्य स्वर्ग इति यागविषयकप्रवृत्तिजनिकाभिधा स्वर्गजनिकेति स्वर्गकामो यजेतेति वाक्याधीनो **बोधस्तदुक्तम्–**

अभिधाभावनामाहुरन्यामेव लिङादय:।
अर्थात्मभावनात्वन्या सर्वाख्यातस्य गोचरेति॥

अभिधाभावनामभिधाशब्दस्तन्निष्ठां भावनामर्थो यागादिरात्मा च तदात्मकत्वं त द्गोचरत्वात्तदाश्रितत्वाच्च। तथा च यागादिगोचरात्माश्रिता-प्रवृत्तिरार्थीभावनेत्यर्थ:।

लिङोभिधा सैव च शब्दभावना।
भाव्या च तस्या: पुरुषप्रवृत्ति:॥
सम्बन्धबोध: करणं तदीयम्।
प्ररोचना चाङ्गतयोपयुज्यत॥

इति च। तन्न।

तात्पर्यटीका

पाक्षिके इत्यनेनैकफलार्थं पाक्षिकी प्राप्तिर्विवक्षितास्ति च सा परस्परमनपेक्षकारणानामवघातनखविदलनादीनामेकस्य कस्यचिदवतारेऽन्य-स्यौदासीन्यान्न **चेत्थं** परिसङ्ख्यायां सम्भवति एकतृप्त्यर्थमपि व्यामिश्रतयो: सूपोदनयोरिव पञ्चनखा पञ्चनखमांसयोरवतारसम्भवेन पाक्षिकत्वासम्भवात्तत्र चान्यत्र चेत्यनेनापि समुच्चायकचकारेण समुच्चितैकक्रियान्वयो दर्शित इत्यनयोर्भेद इत्याह**स्यार्थ इति**। शब्दस्यावच्छेदकावच्छेदेनैवान्वयबोधकत्वात् कथं सामानाधिकरण्येनेतीत्याशङ्कमानं प्रति यथाश्रुताभिप्रायेणेति दर्शयति। **अत एवेति**। **लक्षणा**ऽपूर्णसाधनद्रव्यत्वावच्छेदेनाऽन्वयोपपत्तये।

प्रयोगविध्यधिकारविध्यादयोऽप्यन्यत्र प्रपञ्चिता इत्याहान्यत्र विस्तर इति। यत्किञ्चित्वस्याननुगतत्वादभावभानस्य प्रतियोगितावच्छेदकभाननियमाच्चात एवंत्यादिना प्रदर्शनीयमताभिप्रायेणाह। **किम्वा यागेति।**

श्रुतिमात्रबोधितस्वर्गफलस्यापि तत्त्वज्ञानिनामनाकाङ्क्षितत्वेन तत्साधारण्यायाह। **किम्वा स्वत इति। प्रकृतेऽपीति। अयं** भावः। दुःखप्रागभावसाधनत्वं यथा भवन्मते पापध्वंसे इच्छासम्पादकं तथा प्रत्यवायानुत्पादेऽस्मन्मतेऽपीति समानमेव प्रत्यवायानुत्पादरूपेष्टसाधनत्वमपि योगक्षेमसाधारणं पुनर्नित्यं प्रवृत्युपयोगीत्यधिकमिति। तदेव दर्शयति। **नित्ये करणं कृत इति।** सम्बन्धबोधो लिङ्शाब्दभावनयोर्वाच्यवाचकभावबोधः। **करणं** शाब्दभावनाभाव्यार्थभावनानिवर्त्तकं **प्ररोचना** प्राशस्त्यज्ञानं लक्षणयार्थवादिकम्।

चषकम्

स्वेच्छाधीनप्रवृत्तौ क्लृप्तस्येष्टसाधनताज्ञानहेतुत्वस्यै**वान्यत्रापि** कल्पयितु**मुचितत्वेन** लोकवद्वेदेपीष्टसाधनताधीरेव प्रवर्तिकेति प्रवर्त्तनायाः पृथग्घेतुत्वं मानाभावा**देवं** शब्दशक्त्यतिरिक्ताभिधायामपि। **ननु** कुठारादेश्छिदाकरणस्य छिदानुकूलदृढतरनिपतनरूपो व्यापारो यथोद्यमनं विना न **सम्भवति** तथा प्रवृत्तिरूपोऽपि व्यापारः **शब्दभावनां** विनेति **चेन्न।** करणस्य स्वनिष्ठव्यापारद्वारैव फलानुकूलव्यापारजनकत्वमिति नियमासिद्धेः। अनुमितिकरणव्याप्तिज्ञाने व्यभिचारात्। **तत्र** ज्ञायमानं लिङ्गमेव करणं तस्य च व्यापारो व्याप्तिर**वास्तीति चेद**त्रापि ज्ञायमानः शब्दः करणं शक्तिर्व्यापार इत्यस्तु किमभिधया। **तदेतदेवा**भिप्रेत्याभिहितवन्तो **मण्डनमिश्राः**—

पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्त्तकः।
प्रवृत्तिहेतुधर्मञ्च प्रवदन्ति प्रवर्त्तनाम्॥ इति।

तत्र गुरवः। नित्यनिष्फलसन्ध्यावन्दनादिप्रवृत्ताविष्टाभ्युपायत्वधियोऽ**नुपयोगान्**नेष्टसाधनत्वं विध्यर्थेऽन्तर्भवति। **न च चैत्यवन्दने** प्रवृत्तिवारणायेष्टसाधानतायाः प्रवृत्युपयोगिताध्रौव्ये नित्येऽपि विधितः प्रवृत्तये तस्या विध्यर्थत्वमावश्यकमिति तत्राप्यार्थवादिकं फलं कल्प्यतामिति **वाच्यम्।**

'**सन्ध्यामुपासते ये तु सततं संशितव्रता:। विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनमि**त्यत्र सततपदार्थपर्यालोचनया कदाचिदन्तरिता प्रतिसंहितसन्ध्यावन्दनस्य पुंस: स्वीयसन्ध्यावन्दने **फलानुपधान**निश्चयेन तावतापि तस्य तत्र प्रवृत्यनिर्वाहात्। **यत्र** च विशिष्यफलसमर्पको नार्थवादस्तत्र नित्ये कर्मणि सामान्यतो विधिबोधितेष्टसाधनतामात्रादपि प्रवृत्यनिर्वाहाद्विश्वजिन्न्यायेन फलकल्पनाया **दृष्टतत्तत्फलकल्पना**सहस्र-कवलितत्वा**न्नरक**साधनताज्ञानाधीनतादृशकर्माकरणगोचरद्वेषघटितसामान्यसामग्र्या एव **तत्र**प्रवर्त्तकत्वावश्यम्भावेन तत एव सर्वत्र नित्ये प्रवृत्युपपत्ते:। **कथमन्यथा** मुमुक्षूणां तत्र प्रवृत्तिरार्थवादिकफले तेषामिच्छाविर**हात्प्रत्युत** द्वेषस्यैव श्रवणात्तदिच्छाकल्पनाया अप्यसम्भवात्। **कथम्वा**ऽन्येषामपि प्रायश्चित्ते प्रवृत्ति:। **न च** निष्फले पापध्वंसे स्वतोऽपुरुषार्थे कस्यापीच्छा येन स एवंष्टं कल्प्येत।

तात्पर्यटीका

प्रवर्त्तनाधीनप्रवृत्ताविष्टसाधनताज्ञानहेतुत्वस्य विवादग्रस्तत्वा**त्स्वेच्छाधीनेति**। **अन्यत्रापि** भवदभिमतप्रवर्त्तनासाध्यप्रवृत्तावपि। **उचितत्वेनेति**। लाघवादिति भाव:। पृथग्घेतुहेतुमद्भावं खण्डयित्वा तदभिमतामभिधामपि खण्डयति। **एवमिति। शब्दभावनां** विनेति। **न संभवतीत्य**नुषज्यते। **अनुपयोगादिति**। **यद्यप्य**सम्भवादिति वक्तुमुचितं **तथापि** यत्र नित्यकाम्यजयन्तीव्रतादौ तस्या: सम्भवस्तत्र प्रवृत्तये विध्यर्थत्वमावश्यकमिति शङ्काव्युदासाय तत्रापि निरुक्तसामग्र्यन्तरेण निर्वाहेऽस्याऽनुपयोगाद्विध्यर्थत्वानर्थक्यमेवेति वक्तु**मित्थमुक्तम्**।

संशितव्रतास्तीव्रव्रता:। **फलानुपधाननिश्चयेनेति**। सततपदे संशितपदोपसन्दानेनानुष्ठाननैरन्तर्यस्यैव ब्रह्मलोकावाप्तिफलकत्वबोधना-दित्याशय:। जीवत: प्रतिसन्धानेच्छयैव न फलानुपधाननिश्चय: सम्भवति **तदुक्त**मप्रतिसंहितेतीत्याशयेन दूषणान्तरमाह। **यत्र चेति। तत्तत्फलकल्पनेति**। दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वादित्युक्तत्वादित्यर्थ:। दृष्टफलस्य

सकलकामनाविषयत्वाभावेन सर्वसाधारणप्रवृत्त्युपपत्तिरेव विश्वजिन्न्यायेन फलकल्पनाबीजं स्यादित्याशङ्क्याह **नरकसाधनतेति**। **तत्र** तादृशकर्मविशेषे। द्वेषघटिता सामग्री तवाप्यावश्यकीत्याह। **कथमन्यथेति**। कर्तृविशेषप्रवृत्ताविव कर्मविशेषे प्रवृत्तावप्युक्तसामग्र्या अवश्यकल्प्यत्वमाह **कथम्वेति**।

चषकम्

यदि च नरकसाधनगोचरद्वेषस्य **तद्ध्वंश**गोचरेच्छाजनकत्वमुपगत्यते। **तर्हि** कृतिसाध्यताज्ञानसहितोक्तेच्छामात्रघटितसामग्रीतश्चिकीर्षोत्पत्तेर्निष्फलेऽपि नित्यं निर्वाहेण प्रवृत्त्युपपत्तेरलमिष्टसाधनताधियः प्रवर्तकत्वेन। **सर्वा**भिलषितस्यापि नरकप्रागभावस्य प्रतियोगिविकल्पग्रासेन फलत्वासम्भवात्। अत्यन्ताभावस्यापि प्रतियोग्यादिविरोधितया पातकान्तरेण **नरक**दुःखसंसर्गिण्यसत्त्वेन फलत्वा**योगात्** **क्षेम**साधारणसाधनतायाश्च तदन्वयव्यतिरेकनियतान्वयव्यतिरेकशालित्वरूपाया गुरुशरीरतया प्रवृत्तावनुपयोगात्। **न चैवं** स्वर्गकामो यजेतेत्यतः प्रवृत्तिर्दुघटा यागाभावस्य नरकाननुबन्धितया द्विष्टसाधनत्वाभावेन द्वेषघटितसामग्र्यसम्भवात्। इष्टसाधनत्वस्य **विध्यर्थ**त्वाभावेन चेष्टसाधनताबोधकप्रमाणाभावेन तज्ज्ञानघटितसामग्र्या अपि भवन्मते दुर्घटत्वादिति **वाच्यम्**।

स्वर्गासाधनं न स्वर्गकामकृतिसाध्यमितीतरबाधबलात् **स्वर्ग**कामकृतिसाध्यतान्वयितावच्छेदकतया स्वर्गसाधनत्वस्य विधिजन्यबोधे भानादिष्टसाधनताज्ञानादेव तत्र मन्मते प्रवृत्तिनिर्वाहात् **तस्मान्नित्ये फलकामना** नाधिकार इति **शुची**नामायुष्मतां मुमुक्षूणामपि तदकरणं प्रत्यवायो ये वेति सिद्धं **तत्रापि** द्वेषघटितया सामग्र्या। **तदुक्त**म्। स्वविशेषणवत्ताप्रतिसन्धानजन्यं कार्यताज्ञानं प्रवर्तकमिति। स्वं प्रवर्तमानः पुरुषस्तस्य विशेषणं कामनादि तद्वत्तायाः स्वविषयसाधनत्वादिरूपस्य तत्सम्बन्धस्य प्रतिसन्धानं बलवदनिष्टाननुबन्धित्वगोचरं ज्ञानं तज्जन्यकार्याताज्ञानं प्रवर्तकमिति तदर्थः। **न च** स्वर्गे फले द्वेषेऽपि तेषां नरकाभावरूपे फले कामना नित्यमेवास्तीति कामनाधिकारपक्षेऽपि तेषां तदकरणं प्रत्यवायाय स्यादेवेति **वाच्यम्**।

नरकानुपस्थित्यैव तदभावाज्ञानेन तदिच्छाविरहोपपत्तेः। **मम** तु तदानीमपि नित्याकरणद्वेषघटितसामग्रीसम्पत्तेरिति प्रत्यवति**ष्ठन्ते**। **तदपि न**।

बलवदनिष्टाननुबन्धिकाम्यसाधनताज्ञानजन्यकार्यताज्ञानत्वापेक्षया बलवदनिष्टाननुबन्धिकाम्यसाधनताविषयककार्यताज्ञानत्वेन लघुरूपेणैव कारणत्वौचित्यात्। **किञ्च** ध्वंसादेरत्यन्ताभावविरोधे मानाभावेन **ध्वंसा**दिकालावच्छेदेन **वर्त्तमानस्य** नरकात्यन्ताभावस्यैव प्रायश्चित्तसन्ध्यावन्दनादिफलत्वसम्भवेनेष्टसाधनताज्ञानाघटितद्वेषघटित-भवदुक्तसामग्र्या असिद्धेः। **कारणान्तर**कल्पनापेक्षया गुरुशरीरक्षेम-साधाराणसाधनताज्ञानस्यैव सर्वत्र प्रवर्त्तकत्वौचित्यात्। **वस्तुतस्तु** क्षेमसाधारणसाधनताया न शरीरगौरवमपि। **दण्डाद्घट** इति प्रतीत्या साधनतायाः स्वरूपसम्बन्धरूपत्वा**त्तत्त**त्पूर्ववृत्तित्वानां कूटस्याप्यतिप्रसक्तेन दण्डत्वेनानवच्छेदादुक्तप्रयोगविषयत्वासम्भवादित्यन्यत्र **विस्तरः**।

शौचकामनयोः प्रत्येकमेवा**धिकारतया** निष्कामस्य शुचेरकरणमपि प्रत्यवायजनकम्। **न** चैवं केवलकामनावतो **शुचेर्दैवा**न्नित्याकरणमपि प्रत्यवायं जनयेदिति **वाच्यम्**। नित्याकरणेन प्रत्यवायजनेन **शौचादेरेव** सहकारित्वाभ्युपगमात् **निष्कामे** शुचौ नित्याकरणस्य प्रत्यवायजनकतायाः सर्वसिद्धत्वात्। **अत एव** नित्यकाम्यजयन्तीव्रतादौ फलकामनाया अधिकारत्वस्य सर्वसिद्धत्वेऽपि शौचादिमतः फलकामनारहितस्य तदकरणं प्रत्यवायं जनयतीति **सिद्धान्तः**।

तात्पर्यटीका

वस्तुतस्तद्भ्रंशगोचरेच्छाया उपायेच्छात्वेन तत्र चेष्टसाधनताज्ञान-हेतुत्वावश्यम्भावे कथं तद्भ्रंशे तद्द्वेषमात्रादिच्छा स्यादतो **यदि चेति**। **तद्भ्रंशेति**। नरकसाधनध्वंसेत्यर्थः। फलस्येच्छाविषयत्वासम्भवादि-वेच्छाविषयस्य फलत्वासम्भवादपीष्टसाधनताधियो न प्रवर्त्तकतेत्याह। **सर्वाभिलषितस्यापीति**। ध्वंसप्रागभावयोः फलत्वासम्भवं प्रदर्श्यात्यन्ताभावस्यापि तं प्रदर्शयति। **अत्यन्ताभावस्यापीति**।

प्रतियोग्यादीत्यादिना ध्वंसप्रागभावपरिग्रहः। प्रतियोगिविकल्पग्रासोऽप्यत्र न सम्भवतीत्याह। **नरकदुःखसंसर्गिणीति**। पातकविशेषप्रयोज्यनरकसामान्याभाव एव फलमस्त्वत आह। **क्षेमसाधारणेति**। **एव**मिष्टसाधनत्वस्य विध्यर्थत्वाभावे। **विध्यर्थत्वाभावेनेति**। भवन्मत इत्यनुषज्यते।

काम्ये द्वेषघटितसामग्र्यसम्भेवपीष्टसाधनताज्ञानघटितसामग्रीसुलभैवेत्याह। **स्वर्गासाधनमिति**। **स्वर्ग**कामकृतिसाध्यं स्वर्गकामनाप्रयुक्तकृतिनिरूपित-साध्यताख्यविषयतावत्। **तस्मात्** प्रवृत्युद्देश्यफलाभावात्। **फलकामनाधिकार इति**। कस्तर्ह्यधिकार इत्याकाङ्क्षायामाह **शुचीनामायुष्मतामिति**। तथा च शुचितत्कालजीवित्वमेव नित्येऽधिकार इति भावः। **तत्रापि** मुमुक्षुप्रवृत्तावपि। **नरका**नुपस्थित्यैव सर्वदा नरकोपस्थितौ मानाभावेनैव **तदानीमपि** नरकाभावरूपफलकामनाविरहकालेऽपि ।

यदुक्तमत्यन्ताभावादेः फलत्वासम्भवेनेष्टसाधनताज्ञानं सर्वत्र प्रवृत्तिपूर्वमसम्भवीति द्वेषघटिता सामग्र्यवश्यकल्प्येति तद्दूषयति। **किञ्चेति**। **ध्वंसादि**कालावच्छेदेनेति। प्राग्भवीया करणप्रयोज्यनरकध्वंसादि-कालावच्छेदेनेत्यर्थः। **वर्त्तमानस्य** तत्र पुरुषे वर्त्तमानस्य। यदप्युक्तं योगक्षेमसाधारणं साधनत्वं गौरवात् प्रवृत्यनुपयोगीति तदपि **दूषयति कारणान्तरेति**। **वस्तुतस्तु** वस्तुगत्या तु। **दण्डाद्घट इतीति**। दण्डत्वावच्छिन्नकारणतानिरूपको घट इति प्रतीत्येत्यर्थः। अन्यथा दण्डात्पट इति प्रतीत्यापत्तेः। कारणतायाः पूर्ववृत्तित्वरूपत्वे उक्तप्रतीतिविषयत्वं न सम्भवतीत्याह। **तत्तदिति**। **वस्तु**तस्त्वित्याद्यभ्युपगमवादमात्रम्। नियतपूर्ववृत्तिजातीयत्वस्यैव कारणतापदार्थत्वात् स्वरूपसम्बन्धरूपकारण-ताव्यञ्जकत्वकल्पनापेक्षयास्यैव तद्रूपताया युक्तत्वात्। **न चैवं** तस्या दण्डत्वरूपाया दण्डत्वेनानवच्छेद्यतया दण्डाद्घट इति प्रतीतिविषयत्वासम्भवस्तदवस्थ एवेति **वाच्यम्**। उपहितानुपहितभेदेना-वच्छेद्यावच्छेदकभावस्य स्वरूपाभेदेऽपि सुवचत्वादत **आहान्यत्र** विस्तर इति।

नन्वेवमिष्टसाधनताज्ञानस्य नित्येऽपि प्रवर्तकत्वे शौचकामनयोर्द्वयोरेवाधि

कारत्वापत्त्या निष्कामस्य शुचेरधिकारव्याघातात्तेनापि नित्याकरणे प्रत्यवायो न स्यादत आह **शौचकामनयोरिति। अधिकारतया** प्रवृत्तिप्रयोजककर्त्तृधर्मतया। **एवं**प्रत्येकाधिकारपक्षे। स्नानापोद्याशौचस्य नाकरणनिमित्तत्वं सम्भवतीति **दैवादिति**। दैवादशौचादिनिमित्तवशात्। **शौचादेरेवेत्यादिना** जीवनपरिग्रह एवकारेण च कामनाव्यवच्छेदः। न चापसिद्धान्त इत्याह। **निष्कामे** शुचाविति। अत्रोपष्टम्भकमाह**त एवेति**। नित्याकरणेन प्रत्यवायजनने शौचादिमात्रस्य सहकारित्वादेवेत्यर्थः।

तर्कामृतम्

आशीर्लिङ्लोटोरर्थः वक्त्रिच्छाविषयत्वम्। तेन 'घटमानय' इत्यत्र घटकर्मकमदिच्छाविषयानयनानुकूलकृतिमान् त्वमित्यन्वयबोधः।

चषकम्

आशिषिलिङ्लोटावित्येकयोगनिर्दिष्टत्वादेकोक्त्यैव तयोरर्थं दर्शयति। **आशीर्लिङ्लोटोरिति। वक्त्रिच्छेति**। वक्तुर्बुबोधविषयाश्रयत्वेन वक्तृविवक्षितस्य चेच्छेत्यर्थः। **अत एव** क्वचित् कव्युम्भितवक्तुरपीच्छाप्रतीतिर्यदि न बाधो **यथा–**

तव भवतु विडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञः स्वर्गिणः प्रीणयालम्।
युगशतपरिवर्त्तानेवमन्योऽन्यकृत्यै-
र्नयतमुभयलोकानुग्रहश्लाघनीयैः॥

इत्यादौ। कव्युम्भितस्य भगवतो मारीचस्यैवेच्छा प्रतीयते। **अथासौ**। यथा–

त्यजत मानमलम्वत विग्रहैर्नपुनरेति गतं चतुरं वयः।
परभृताभिरितीवनिवेदिते स्मरमतेरमते स्म वधूजन॥

इत्यादौ। तत्र तर्हि कव्युम्भितानां परभृतानां वक्त्रीणामिच्छाप्रतीत्यसम्भवात्त**तथे**च्छाविषयताप्रकारणं तात्पर्यमात्रमुन्नीयते कवेरिति **स्मर्त्तव्यम्**। **मदिच्छेति**। **न च** वक्त्रननुगमाद्व्युत्पत्तेरसम्भव इति **वाच्यम्**। यतः स्वतन्त्रस्वोच्चारणकर्त्तृतावच्छेदकधर्मत्वेनोप- लक्षितचैत्रत्वाद्यवच्छिन्नीयेच्छाविषयता- विषयकत्वस्वजन्यत्वोभय- सम्बन्धेनानुपूर्वीविशेषावच्छिन्नपदप्रकारको लोडादिपदजन्यबोधविशेष्यकः सङ्केत आदेशानां वाचकतावादिनामानुपूर्वीभेदेन भिद्यत एव। **इत्थं** व्युत्पत्तिश्चानेकवक्तृकानेकपदास्पदानुपूर्व्य**भेदान्ना**सुग्रहा। **स्वातन्त्र्य**निवेशाच्च नानुवादकेच्छाप्रतीतिरिति सर्वं **सुस्थम्** ।

अनुवादकवाक्यस्थले तु तादृशानुपूर्वीलक्षणसामान्यप्रत्यासत्या पुरोवक्तृवाक्यस्यापि **ग्रहात्तदुच्चारणादि**घटितः सङ्केतोऽपि सुग्रह इति तव भवत्वित्यौदा ऋष्यादिप्रतीतिरपि सूपपदेत्यन्यत्र **विस्तरः**। **विषयानयनेति वस्तुतो** लोडाद्यर्थोक्तेच्छामात्रस्य स्वीयं यत्सम्बोध्यकृतिजन्यत्वावच्छिन्नं विषयत्वं तेन सम्बन्धेनानयनेऽन्वयादेककर्त्तृकघटानयनगोचरेच्छायामन्यकर्त्तृकपटानयनविषयिण्यामपि नान्यत्र तथा प्रयोगः। **एतादृश**सम्बन्धविशेषलाभायापि वक्त्रुल्लेख इत्येव **तत्त्वम्**। **त्वमिति**। लोट्पदजन्यबोधाश्रयत्वेन वक्त्रभिप्रायविषयतावच्छेदकधर्मत्वेनोपलक्षितमैत्रत्वाद्यवच्छिन्न इत्यर्थः।

तात्पर्यटीका

अथासाविति यदि बाध इत्यर्थः। **तथेच्छा**विषयताप्रकारेणेति। परभृतासम्बन्धीच्छाविषयत्वावच्छिन्नमानत्यागविषयताशालिबोधतात्पर्यमात्रमित्यर्थः। गालिप्रदानादेरिवेतोऽपि तथा तात्पर्यमुन्नीयत इति प्रागुक्तत्वात् **स्मर्त्तव्यमिति**। **नासुग्रहेति**। स्वतन्त्रोच्चारणकर्त्तृतावच्छेदकचैत्रत्वाद्यवच्छिन्नीयेच्छाविषयता लोट्पदजन्यबोधविषयताप्रकारकेच्छाविषय इत्येवं सुग्रहत्वादित्याशयः। **न च** स्वतन्त्र वक्तुरुच्चारणं विनैवाभिप्रायं बुद्ध्वानूदिताद्वाक्यादनुवादकेच्छाप्रतीतिर्दुर्वारेति **वाच्यम्**। वाक्यान्तरस्थक्रियाकर्मतापन्नवाक्यार्थघटकतया स्वार्थप्रत्यायनेच्छानधीनत्वस्य स्वातन्त्र्यस्य

विवक्षितत्वात्**किम्वा** स्वघटितवाक्यार्थकर्मकवाक्यान्तरस्थक्रियाकर्त्तैव तत्रास्मच्छब्दार्थ इत्यभिप्रायेणाहे**ति सर्वं सुस्थमिति**।

तदुच्चारणादीति। वाक्यानुवादेऽनुवादपुरोवादयोः समानापूर्वीकतयोक्तरीत्या पुरोवादस्य सङ्केतग्रहसौलभ्येऽप्यर्थानुवादे पदानुपूर्वीभेदात्तदवच्छिन्नपदानुपस्थितेः कथं सङ्केतो ग्राह्य इत्याशङ्कामपाकर्त्तु**मादिपदम्**। तेन चार्थानुवादे पुरोवादत्वभ्रमकाले एव पुरोवक्त्रिच्छाप्रतीतिर्नान्यथेत्युक्तं भवति। **अत एव** सति विशेषदर्शने मिथ्यावादिनोऽनुवादकस्य दण्डाद्युपलभ्यते इति सर्वमभिप्रेत्या**हान्यत्र** विस्तर इति **ननु** यत्र मैत्रेण घट आनेय इति वक्त्रिच्छया चैत्रेण पट आनेय इतीच्छासमूहालम्बनरूपया चैत्र घटमानयेत्युक्तं तत्र तद्वाक्यप्रमाण्यापत्तिश्चैत्रकर्त्तृकानयनगोचरवक्त्रिच्छाया घटानयनगोचरत्वादत आह। **वस्तुत** इति। **उक्तेच्छा**मात्रस्य वक्त्रिच्छामात्रस्य। वक्त्रनुगमः पूर्ववत्तेन न ततोऽन्येच्छाप्रतीतिः। **मात्र**पदेन विषयत्वव्यवच्छेदः। **एतादृशेति**। सम्बोध्यत्वस्य। वक्त्रिविशेषविषयत्वरूपस्येच्छासम्बन्धेऽपि घटकत्वादित्यर्थः। **मैत्रत्वादिति**। **उपलक्षण**भेदेनोपलक्ष्यभेदप्रतिपत्तिद्वारा युष्मदस्मत्प्रत्ययवैचित्र्यप्रतिपत्तयेऽत्र मैत्रत्वं प्राक्च चैत्रत्वं भेदेनो**पन्यस्तम्**। नन्वेवं यत्रोत्तरवाक्ये युष्मच्छब्दो न प्रयुक्तस्तत्र सम्बोधनप्रयोगानर्थक्यं यथा चैत्र भुक्ष्वेत्यादाविति चेन्न। चैत्रे सम्बोध्यत्वानवगमे भोजनकर्तृत्वस्याप्यनवगमप्रसङ्गात्त्वंपदार्थघटकतया तदुपस्थित्यनावश्यकत्वेऽपि लोडर्थेच्छा सम्बन्धविशेषणस्य तस्योपस्थितेरावश्यकत्वादेतदभिप्रेत्यैव स्थानिन्यपीति सूत्रितं तस्य युष्मत्प्रयोगयोग्यत्वेऽपीत्यर्थोऽधिकं **नौकायां** प्रपञ्चितमित्यन्यैपरपरिशीलितः पन्थाः।

तर्कामृतम्

व्याप्यक्रियया व्यापकक्रियाया आपादनं लृङोऽर्थः। तात्पर्यवशात् क्वचित् भूतत्वम्, क्वचिद्भविष्यत्वं च[1] लृङा बोध्यते।

सनः कर्तुरिच्छा अर्थः।

---

१. 'च' इति नास्ति।

तरङ्गिणी

व्याप्यक्रिययेति। व्यापकक्रियानिष्ठमापादकत्वं व्याप्यक्रिया-निष्ठमापाद्यत्वम्। तथा च सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यदित्यादौ सुवृष्टिभवननिष्ठापाद- कतानिरूपितापाद्यतावदुत्पत्त्याश्रयः सुभिक्षमिति बोधः। व्याप्तिश्चात्र कालिकी। आपाद्यापादकयोश्च पक्षरूपकाले सत्त्वम्। एवं च "**लिङ्निमित्ते लृङ्क्रियातिपत्तौ**" इति सूत्रार्थोऽप्यनुगृहीतो भवति। लिङ्निमित्तस्य हेतुहेतुमद्भावस्य क्रियाया अनिष्पत्तेश्च सत्त्वादिति भावः। **सनः कर्तुरिच्छेति।** तथा च पिपठिषतीत्यत्र पठनं कर्तृवृत्तीच्छाश्रय इति बोधः।

चषकम्

व्याप्यक्रिययेति। आपाद्यत्वमापादकत्वञ्च लृङर्थो योग्यतावशात्क्रिययोरत्रान्वयः। तच्चायतियोग्यता सा च पक्षावृत्तित्वसहितो व्याप्यव्यापकभावः स च हेतुहेतुमद्भावाधीनस्तथा च हेतुहेतुमद्भावः क्रियाया अनिष्पत्तिश्चावगम्यते। **इत्थञ्च** सुवृष्टिश्चेदभविष्य**त्तर्हि** सुभिक्षमभविष्यदित्यत्रापादकताश्रयोत्पत्तिमत्सु वृष्टिप्रयोज्यमापाद्य-ताश्रयोत्पत्तिमत्सुभिक्षमित्यन्वयबोधः पर्यवस्यति। क्रिययोर्हेतुहेतुमद्भावस्य कर्त्रोरेव तस्मिन् पर्यवसानादुत्पत्तिप्रयोज्योत्पत्तिरिति परित्यज्य सुवृष्टिप्रयोज्यं **सुभिक्षमित्युक्तम्। ननु** प्रकृतं भविष्यत्वमिव सिद्ध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः '**सम्भावनागुणमवेहि तमीश्वराणां किम्वाभविष्यदरुणस्तमसां विभेत्ता तं चेत् सहस्रकिरणो धुरिनाकरिष्यदि**'त्यत्र भूतत्वमपि लृङा प्रत्याय्यते इति तदुभयं लृङर्थो वाच्यस्तथा चैकदोभयबोधाङ्गीकारे विरोधोऽन्यतरबोधे च नियामकाभाव इत्यत आह। **तात्पर्यवशादिति।** तच्च तात्पर्यं सिद्ध्यन्तीत्यादौ भूतार्थे समर्थे समर्थकभावात् सुवृष्टिरित्यादौ 'कलौ प्रवृत्ते दुर्वृत्ते' इति भविष्यप्रस्तावनादितोऽवगम्य इति **बोध्यम्। कर्त्तुरिच्छेति। इच्छामात्रं** सनोऽर्थस्तत्र स्वविशेष्यकत्वस्वसमानकर्त्तृकत्वोभयसम्बन्धेनैव

प्रकृत्यर्थान्वयात् परकीयपठनगोचरेच्छावति बुभुक्षाभाजि च परस्मिन् पिपठिषतीति न प्रयोग इति सूचनाय कर्त्रुल्लेखः।

यथा सुप आत्मनः क्यजित्यत्रात्मसम्बन्धितयेच्छाविषयार्थकेति सुबन्तविशेषण**स्योल्लेखः** पुत्रीयतीत्यत्र प्रत्ययार्थेच्छायां प्रकृत्यर्थपुत्रादेर्विशेष्यित्वमात्रं न सम्बन्धः **किन्तु** प्रकृत्यर्थे भासमानसम्बन्धप्रतियोगितयेच्छाविषयवृत्तित्वसहित**मन्यथा** स्वपरसम्बन्धितया पुत्रेच्छावत्यप्रसिद्धपुत्रके तथा प्रयोगस्याप्रसक्त्यतिप्रसक्ती स्यातामित्यर्थस्फोरणाय। **न चैवं** सन्क्यचोरिच्छार्थकत्वाविशेषात् पाकं चिकीर्षतीतिवत्तण्डुलं पाकीयतीति प्रयोगप्रसङ्ग इति **वाच्यम्**। कृञ्समानार्थकयतेरिवास्य कर्मसाकाङ्क्षत्वानुपगमात् **कृदन्तकर्मत्वविवक्षायां** षष्ठ्या द्वितीयाबाधात्। **न च** धात्ववयवकृद्योगेऽपि षष्ठ्यवसरे कंसं घातयतीत्यत्र द्वितीयायाः कंसस्याख्यानकर्मत्वासम्भवेऽपि वधकर्मतया समर्थनं ग्रन्थकृतामसङ्गतमिति **वाच्यम्**। प्रकृतिवच्च कारकमित्यनेनाख्यातार्थणिचप्रकृतिकृदन्तकारकस्य हेतुमणिजन्तायाः कृत्प्रकृतेः कारकतुल्यत्वादिदेशाज्जरासन्धं घातयतीत्यादौ हेतुमणिजन्तधातुयोगे यथा णिच्प्रकृतेः कर्मणो द्वितीयान्तता तथाख्यानार्थणिच्प्रत्ययान्तकृदन्तकर्मणोऽपीति कंसादेर्द्वितीयोपपत्तेः।

तात्पर्यटीका

'धातोः कर्मणः समानकर्त्तृकादिच्छायां वेति' सूत्रस्य वस्तुत इच्छाविषयार्थकादिच्छासमानकर्त्तृकार्थकाच्च धातोरिच्छारूपेऽर्थे सन्नित्येवार्थो न तु कर्त्तृकत्वादिकं तत्र घटकं संसर्गमर्यादैव तल्लाभादित्याहे**च्छामात्रमिति**।

दृष्टान्तव्याजेन क्यजन्तस्याप्यर्थं विवेचयति। **यथेति**। **सुबन्त**विशेषणस्योल्लेख इतीत्यर्थस्फोरणायेत्यनेनान्वेति। **अन्यथे**च्छाविषयार्थकेत्यात्मसम्बन्ध्यर्थकेति वा सुबन्तविशेषणे कृते सति। भासमानपर्यन्तानुधावनप्रयोजनं स्पष्टयितुमप्रसिद्धपुत्रक **इत्युक्तम्**। स्वपुत्रपाठगोचरेच्छायां पुत्रीयतीतिप्रयोगवारणाय विशेष्यित्वान्तर्भाव इत्यपि **बोध्यम्**। एवं सन्क्यचोरिच्छामात्रार्थकत्वे। **ननु** तण्डुलगोचराया पाकेच्छेत्यर्थे

आकाङ्.क्षानभ्युपगमेऽपि तण्डुलकर्मकपाकगोचरेच्छाविवक्षायां तथा प्रयोगापत्तिरत आह। **कृदन्तेति**। कंसं घातयतीति न हेतुमणिच उदाहरणं स्वतन्त्रकर्तृप्रयोजकास्मरणादित्यभिप्रेत्य **जरासंधं** घातयतीत्युदाहरणान्तरानुसरणम्। **द्वितीयोपपत्तेरिति। तण्डुलस्य** पाकीयतीत्यत्र तु तादृशातिदेशाविषयत्वात् षष्ठ्येवेत्याशयः।

चषकम्

एवमेव राजानं गमयति सूर्यमुद्गमतीत्यादावपि हेतुमण्णिजन्तधातुयोगे **यथा** प्रकृत्यर्थक्रियाकर्त्तुः कर्मत्वं **तथा** कृदन्तोत्तराख्यानार्थणिच्प्रत्यय-योगेऽप्याख्येय गत्युद्गत्यादेः **कर्त्तुः** कर्मतेत्यपि **बोधम्। न च** तण्डुलस्य पाकीयतीतिवत् पण्डितं पुत्रीयतीत्यपि प्रयोगः स्यात्तत्र तण्डुलस्य पाके षष्ठ्यर्थभेदसम्बन्धेनेवात्र पण्डितस्य पुत्रे द्वितीयरूपविशेषणविभक्त्यर्थाभेद-सम्बन्धेनान्वयसम्भवादिति **वाच्यम्**। अभेदान्वये**ऽसाम**र्थ्यातिदेशादिति **दिक्**। **वस्तुतस्तु** विधेयतावत् क्वाचित्क्वविशेषणविशेष्योभयसाधारण उद्देश्यत्वाख्यो विषयताविशेषण एव सम्बन्धघटक इति भोजनं भवतु भोज्योयमस्त्विति द्विविधेच्छायामपि बुभुक्षत इति **प्रयोगोपपत्तिः**।

एवं सति सन्प्रत्ययसमभिव्याहृत**कर्मप्रत्ययस्या**प्युद्देश्यत्वमेवार्थो वाच्यस्तस्य विषयतासामान्यार्थकत्वे तु गृहस्थितीच्छाया गृहविषयतानियमाद्गृहन्तिष्ठासतीति प्रयोगापत्तिरिति **ध्येयम्**। **यत्तु** पाकं चिकीर्षतीत्यादौ कृतिकर्मत्वमेव पाकादेर्द्वितीयया प्रत्याय्यते। यथा सविषयकरूपविषयोपहितार्थकधातोः कर्मत्व**स्ववि**षयविषयत्वरूपं घटो जिज्ञास्यत इत्यत्राख्या**तेन**। तेन गृहस्थितीच्छादशायां गृहं तिष्ठासतीति **न** प्रयोग इति तत्र दैववशसम्पन्नविषभक्षणेऽपि विषं बुभुक्षत इति प्रयोगापत्तेस्तावताप्यवारणात्। **वस्तुतो** विषकर्मकभोंजनोद्देश्यकेच्छायास्तत्र सत्त्वात्।

किन्तु पाकनिष्ठं यत्कृतिकर्मतयेच्छाविषयत्वं तदेव द्वितीयया कर्माख्यातेन च प्रतिपाद्यमिच्छाविशेषणतया विशेष्यतया च भासते।

स्वसमानकर्त्तृकत्वमात्रं तु सन्प्रकृत्यर्थयोः संसर्गः। **तथा** च पाकं चिकीर्षतीत्यत्र पाकनिष्ठा या कृतिकर्मत्वावच्छिन्नविषयता तन्निरूपककृतिसमान-कर्त्तृकेच्छावानिति **पाक**श्चिकीर्ष्यत इत्यत्र तु कृतिसमानकर्त्तृकेच्छानिरूपिता या कृतिकर्मत्वावच्छिन्नविषयता तदाश्रयः पाक इत्यन्वयबोध इत्येव **तत्त्वम्**। गृहादेराधारस्य च न स्थितिकर्मतयेच्छेति नातिप्रसङ्गः। **तैनैव** गगनं दिदृक्षत इति प्रयोगोऽपि सूपपदो**ऽन्यथा** तत्तत्पदार्थकर्मकत्वविशिष्टतत्तत्-क्रियान्वयमभ्युपगम्य विषं बुभुक्षत इत्यस्याप्रामाण्यसमर्थनेऽपि गगनं दिदृक्षते इत्यस्य प्रामाण्यं दुरुपपादमेव स्यात्। **इत्थ**ञ्च गगननिष्ठदर्शनविषयत्वा-वच्छिन्नोद्देश्यताका समानकर्त्तृकत्वसम्बन्धेन दर्शनविशिष्टा येच्छा तदाश्रय इति तत्रैवमन्यत्रापि शाब्दबोध इत्यन्त्र **विस्तरः**। **अर्थो** वाच्योऽर्थः।

तात्पर्यटीका

उक्तन्यायमन्यत्रातिदिशति। **एवमेवेति**। **कर्त्तुः कर्मतेति**। **न च** प्रथमायाः कारकाधिकारपठितसंज्ञाप्रयोज्यत्वाभावेन कारकविभक्तित्वाभावात्कथ-मत्राण्यन्तावस्थायां यत् प्रथमान्तन्तण्यन्तावस्थायां द्वितीयान्तमेवेत्यर्थकस्य प्रकृतिवच्चकारकमित्यस्य विषयत्वमिति **वाच्यम्**। हेतुमणिजन्ताया इति विशेषणेन कृतः प्रकृतेः केवलायाः कारकमित्यर्थस्यैवाप्रतीतेः किन्तु हेतुमणिजन्तायाः कृत्प्रकृतेराख्यातार्थणिजन्तायाः कृदन्तरूपायाश्च यत्कारकं तत्तुल्यं द्वितीयैवेत्यर्थस्यैव प्रतीतेः। **वस्तुतस्तु प्रथ**मया न कारकत्वमित्यपि भ्रम एव तथात्वेप्युपपदविभक्तितः कारकविभक्तेर्बलीयस्तवात् प्रधाने प्रथमा भविष्यतीत्यप्रधाने इत्यकर्त्तुं शक्यमिति **सह युक्तेऽप्रधान इति** सूत्रे भगवता महाभाष्यकृतोक्तत्वात्तस्या अपि कारकविभक्तित्वस्य सर्वसम्मतत्वात्। **एतेन** नह्यत्र द्वितीयातिदेशमात्रं विवक्षितं तथा सति प्रकृतिपर्यन्तानुधावनानर्थक्यापत्तेः तस्माद्धन्तीतिवद्यथा घातयतीत्यत्र कारकं तथैवोद्गमयतीत्यत्रेवाख्यानार्थे णिच्यपीत्यर्थो वाच्यः स च प्रथमायाः कारकत्वं विना न घटत इति **मतमपास्तम्। असामर्थ्यातिदेशादिति**। अन्यथा ऋद्धस्य राजमातङ्गा इति समासस्य दुर्वारत्वात्। **कथं** तर्हि सुन्दरं मुण्डयतीत्यादीति

चेत् **प्रकृत्यर्थता**वच्छेदकविभागरूपमुण्डनपदार्थैकदेशे सुन्दराभेदस्य विवक्षितत्वादणिज्वृत्तावेवासामर्थ्यातिदेशा**द्वात एव** माणवकं मुण्डयतीत्यादौ माणवकमुण्डपदार्थयोरभेदान्वयबोधाभ्युपगमेऽपि न दोष इत्याह **दिगिति**। यथोक्तस्य स्वविशेष्यकत्वस्य प्रकृतिप्रत्ययार्थयो: सम्बन्धघटकत्वे भोज्योऽयमस्त्वितीच्छायां बुभुक्षत इति प्रयोगानापत्तेराह **वस्तुतस्त्विति**। समानकर्तृकत्वस्यापि प्रकृतिप्रत्ययार्थयो: सम्बन्धमध्ये प्रवेशादु**क्तं सम्बन्धघटक** इति।

एवं सतीति। उद्देश्यत्वाख्यविषयताया आवश्यकत्वे सतीत्यर्थ:। **कर्मप्रत्ययस्य** द्वितीयाया आख्यातस्य च। **स्वविषय**विषयत्वरूपमिति। स्वविषयत्वमात्रस्य तथात्वे ज्ञानं जिज्ञास्यत इत्यपि प्रयोगापत्तेरिति भाव:। **आख्यतेने**त्यत्र प्रत्याय्यत इत्यनुपज्यते। **न प्रयोग** इति ष्ठाधातोरकर्मकत्वादिति भाव:। भोजने विषकर्मकत्वस्य कर्त्रिच्छाविषयत्वस्य चानपायादित्याह। **वस्तुत** इति। वस्तुगत्या विषकर्मकं यद्भोजनं वस्तुगत्या तदुद्देश्यिका येच्छा सेत्यर्थ:। वास्तविकार्थप्रतिपादकवस्तुत: पदासमभिव्याहारे तु यथाश्रुतेन विषकर्मत्व-विशिष्टभोजनोद्देश्यकेच्छाप्रतीत्यासङ्गत्यापत्ते:। दैववशसम्पन्नविषभक्षणे तथेच्छाया बाधितत्वात्। **अन्यथे**त्युत्तरग्रन्थेन तत्तत्पदार्थकर्मकत्व-विशिष्टतत्तत्क्रियान्वयमभ्युपगम्योक्तप्रयोगस्य वारणीयत्वप्रदर्शनात्त्ववारणादिति प्रकृतपदविवरणताया एतद्ग्रन्थस्यासङ्गतिश्चेति बहुव्याको**पापत्तेरिति**।

गृहादे: सन्नन्तकर्मतां वारयन्नेव पाकघटादेस्तां व्यवस्थापयति। **किन्त्विति**। **इत्येव तत्त्वमिति**। अत एवेच्छामात्रस्य सन्नर्थता द्योतयितुं तावन्मात्रं सप्तम्यन्तेन निर्दिष्टवान् सूत्रकार:। **तेनैव** धात्वर्थकर्मतयेच्छाविषयत्वस्य द्वितीयाद्यर्थत्वेनैव। अन्यथा प्रकृत्यर्थान्वितकर्मत्वस्य धात्वर्थेऽन्वयाभ्युपगमे। **गगनं** दिदृक्ष्यते इत्यादौ तु समानकर्तृकत्वसम्बन्धेन दर्शनविशिष्टेच्छीय-दर्शनविषयत्वावच्छिन्नोद्देश्यताश्रयो गगनमिति शाब्दबोध इत्या**हैवमन्यत्रापीति**। इत्थञ्चेच्छाविषयत्वेनेच्छासमानकर्तृकत्वेन च विवक्षितार्थाद्धातोरिच्छायां सन्नित्येव सूत्रार्थ इत्या**हान्यत्र** विस्तर इति।

तर्कामृतम्

सन्नुतराख्यातस्याश्रयत्वं लक्षणा, सविषयकार्थकप्रकृतिकाख्यातस्य आश्रयत्वे लक्षणाया 'घटं जानाति' इत्यादौ क्लृप्तत्वात्। यङोऽर्थः पौनःपुन्यम्,

चषकम्

पिपठिषतीत्यादावाख्यातस्य मुख्यार्थकृताविच्छानुकूलत्वस्य बाधाद्गौणार्थपरतां दर्शयति। **सन्नुत्तरेति**। निहितार्थत्वं परिहरति। **सविषयकेति**। सविषयकं ज्ञानाद्यर्थो यस्याः साङ्गेषु कृञादिः प्रकृतिर्यस्य तस्याख्यातस्येत्यर्थः। **इदमुपलक्षणम्।** विषयानुपहितसविषय- कमात्रार्थकधातुयुक्तकर्मप्रत्ययस्य विषयतासामान्यार्थ**कत्वमत** एव घटं जानातीत्यादौ विषयत्वरूपं कर्मत्वं **चक्षुषा** घटो भातीत्यादौ ज्ञानविषयत्वार्थकभातेरकर्मकत्वञ्चोपपद्यते **केषाञ्चित्** पुष्पं जिघ्रतीत्यादावाधेयत्वार्थकत्वस्यैव कर्मप्रत्ययस्यानुमतत्वाद्विषया**नुपहितेति**। **तथा** कृत्यर्थकधातुसमभिव्याहृतकर्मप्रत्ययस्य चिकीर्षाप्रयोज्यं साध्यताख्यं विलक्षणं विषयत्वमर्थस्तेन घटः क्रियते इतिवज्जलाहरणं कपालं वा क्रियत इति न प्रयोगः। **तादृश**कर्मान्तरसमभिव्याहृतस्य च तस्य व्यापार्यत्वरूपं विषयत्वमपि क्वचिदर्थः।

तत्र च स्थले **ह्ये**कप्रथमान्तकर्मपदार्थस्य। किञ्चित्क्रिया- कर्तृत्वविशेष्यतानापन्नस्यापि साध्यत्वाख्यं विषयत्वं व्यापार्यत्वरूपाख्यातार्थद्वाराऽपरप्रथमान्तकर्मपदार्थे गुणी भावापन्नायामेव क्रियायां संसर्गतया भासत इति पुनरुक्तं नेह **प्रस्तूयते**। तेन कटः क्रियत इतिवत् कटः क्रियन्ते काशा इतिवद्वा केवलं काशाः क्रियन्ते इत्यादिर्न प्रयोग इत्यपि **बोध्यम्। क्लृप्तत्वादीति**। तथा चाश्रयत्वलक्षणाया निरूढत्वस्य **वक्ष्यमाणत्वान्न निह**तार्थत्वमिति भावः। **यथा** चैतत्तथोपपादितमधस्तात्। **पौनः पुन्यमिति**। क्वचित् सातिशयं फलानुकूलत्वमपि क्रियायां यङा प्रत्याय्यते। अतिशयश्चान्यैव लक्षण्यं **यथा**न्यैरयोधिदिवसं त्र्यद्यायो युध्यतात्र भवानित्यादौ। **इदञ्च** दीपजनयुधेति सूत्रपाठाभिप्रायेण तेनान्यैर्दिवसमयोध्यत्र

भवांस्त्वद्याधीति पूर्ववाक्यद्वयप्रपञ्चित एवार्थोऽत्र भवानयोयुध्यतेति तृतीयवाक्येन सङ्क्षिप्योक्त इत्यनेकवाक्यार्थस्यैक वाक्येनाभिधानात्मकस्य समासरूपस्यांशो गुणभेदस्योदाहरणसङ्गतिरिति **बोध्यम्** ।

तात्पर्यटीका

चक्षुषेति। सौरभं भातीत्यप्रयोगाच्चाक्षुषलौकिकविषयता धात्वर्थ इत्याशयः। पुष्पनिरूपिताधेयतासम्बन्धावच्छिन्नप्रकारित्वरूपविषयित्वस्यैव द्वितीयार्थत्वस्य स्वयं व्यवस्थापनादुक्तं **केषाञ्चिदिति**। प्रसङ्गादाह **तथेति**। **तादृशेति**। साध्यताख्यनिरुक्तविलक्षणविषयताशालीत्यर्थः। **क्वचिदिति**। कटः क्रियन्ते काशा इत्यादिकर्माख्यातस्थले इत्यर्थः।

नन्वेवं साध्यत्वाख्यं विषयत्वं क्रियायां संसर्गतया भासत इत्युपेय**मन्यथा** साध्यपदाद्वितीयाप्रसङ्गस्य वारणमशक्यमिति घटः करोतीति प्रयोगापत्तिरित्याशङ्क्य पूर्वोक्तं स्मारयति। **तत्र च** स्थलेहीति। तथा चातादृशोऽपीतरासु संसर्गः कर्मतामतेत्युक्तत्वान्नोक्त दोष इति भावः। **इत्थञ्च** कटः क्रियन्ते काशा इत्यत्र कटसाध्यककृतिव्यापार्याः काशा इति शाब्दबोधः। **पुनरुक्त**मिति पुनस्त्वर्थे तेनेति तूक्तमित्यर्थः। यद्वा पुनरुक्तमिति क्रियाविशेषणं तेनेह प्रस्तावे पौनरुक्त्यं स्यादित्याशयः। **वक्ष्य**माणत्वादिति स्वतन्त्रः कर्त्तेति प्रसङ्ग इत्यादिः। **नन्वाश्रयत्वस्य** संसर्गत्वेनैवोपपत्तौ तत्र लक्षणाभ्युपगमोऽनर्थक इत्याशङ्क्याह। **यथा** चैतदिति। आश्रयत्वप्रकारकबोधस्यानुभविकत्वाल्लक्षणावश्यकीत्युक्तमिति भावः।

तर्कामृतम्

तत्त्वं च तदानीन्तन- प्रकृत्यर्थसजातीयक्रियान्तरध्वंसकालीनत्वे सति वर्त्तमानादिकृतिविषयत्वम्। 'पापच्यते' इत्यादौ तादृशकालीनत्वमेव यङा प्रत्याय्यते।

तरङ्गिणी

इदानीन्तनप्रकृत्यर्थसजातीयेति। इदानीन्तनप्रकृत्यर्थसजातीयं क्रियान्तरमित्यर्थः। पूर्वदिनवृत्तिपाकमादाय पापच्यत इति प्रयोगवारणा**येदानीन्तनेति।** स्नानादिक्रियामादाय तद्वारणाय प्रकृत्यर्थसजातीयेति। साजात्यं च प्रकृत्यर्थतावच्छेदकत्वम्। तथा च तदानीन्तनध्वंसकालीनपाक-विषयकृतिमानित्यन्वयबोधः।

चषकम्

तत्त्वं चेति। क्रियानिष्ठं पौनः पुन्यञ्चेत्यर्थः। **पौनः** पुन्यत्वं चेति व्याख्यानं तु भावे ष्यञ्प्रत्ययविरोधाद्विषयत्वपदसामानाधि-करण्यविरोधा**च्चोपेक्ष्यम्।** **अत्र** क्रियाया न वारसङ्ख्यानियमो विवक्षितोऽननुगमात् **किन्तु** क्रियामात्रमित्यभिप्रेत्याह। **क्रियान्तरध्वंसेति।** पुनः पाके तादृशप्रयोगवारणाय ध्वंसपर्यन्तानुधावनं तु दिवसव्यापि संततपाके तथा प्रयोगवारण्णायैव। अत एव क्रियान्तरेत्यन्तरपदम्। **उद्देश्य**फलाननुकूलेति तदर्थः। उद्देश्यतायाः पुरुषभेदभिन्नतया नाप्रसक्त्यतिप्रसक्ती। क्रियान्तरस्य ध्वंसे षष्ठ्यर्थः सम्बन्धः स्वविशिष्टेन स्वपूर्वतादृशक्रियान्तरध्वंसेन विशिष्टमनुयोगित्वं विवक्षणीयमिति **हृदयम्** । ह्यस्तनं पाकं तदानीन्तनञ्च यागमादाय पापच्यत इति प्रयोगवारणाय तदानीन्तनत्वं साजात्यञ्च क्रियान्तरविशेषणम्। **वर्त्तमानादी**त्यादिना भाविष्यन्त्यादेर्ग्रहणम्। तदानीन्तनं प्रकृत्यर्थसजातीयं यत् क्रियान्तरं पूर्वपाकस्तद्ध्वंसकालीनपाकविषयक-वर्त्तमानकृतिमांश्चैत्र इति वाक्याधीनोऽन्वयबोधस्तत्र यङर्थं विवेचयति। **पापच्यत इति। प्रत्याय्यते** उपस्थाप्यते।

तात्पर्यटीका

अत्र पुनः पुनर्भवनं पौनः पुन्यपदार्थ इत्याह। **क्रिया**निष्ठमित्यादि। तच्छब्देन क्रियानिष्ठधर्मपरामर्शे तदनुगत्वप्रत्ययेन च तद्वृत्तिधर्मपरामर्शे

पौनः पुन्यत्वस्य क्रियान्वयायोग्यत्वापत्तिरित्याह **भावे** इति क्रियानिष्ठोक्त-धर्मस्यैवेयं निरुक्तिरित्युक्ते त्वाह। **विषयत्वपदेति। वाररु**सङ्ख्यावृत्तिगणना। **उद्देश्यताया इति**। अयं भावः। यत्र दिवसचतुष्टकृतपाकस्यैकं फलमुद्देश्यं न तत्र पापच्यत इति प्रयोगो यत्र चैकस्मिन् दिवसे कृतस्य पाकचतुष्टयस्य फलचतुष्टयं तथा तत्र भवत्येव स इति। **पुनः** पाक इति। **न** च तत्रापि तादृशः प्रयांग इष्यत एवेति किन्न स्यादिति **वाच्यम्**। पौनः पुन्यमिति पुनः शब्दावृत्यन्यथानुपपत्या तृतीयप्रभृतिष्वेव तत्पदतात्पर्यावधारणात्। **स्वविशिष्टेनेति**। स्वं मध्यमक्रियापरं तस्या ध्वंसे सम्बन्धो न केवलमनुयोगित्वम्। **किन्तु** स्वविशिष्टो यः स्वपूर्वतादृशक्रियान्तर-ध्वंसस्तद्विशिष्टमिति नोक्त दोष इत्याशयः। **वर्त्तमानादीति**। **अत एव** पापच्यत इत्यादाविति वक्ष्यमाणेनादिना पापक्ष्यत इत्यादेः परिग्रहः।

तर्कामृतम्

आख्यातस्य चरमदलवाचकत्वात्[1] न[2] विशिष्टवाचकत्वं यङः, तदानीन्तनत्वं च स्थूलकालमादाय।

पूर्वकालीनत्वं कर्त्ता च क्त्वार्थः। पूर्वत्वं च संनिहितक्रियापेक्षया बोध्यम्। तत्पूर्वकालीनत्वं तत्प्रागभावकालवृत्तित्वम्, तदुत्पत्तिकालीन-ध्वंसप्रतियोगिकालवृत्तित्वं वा।

तरङ्गिणी

आख्यातस्येति। लट्त्वेन वर्तमानत्वं आख्यातत्वेन कृतौ विषयत्वं संसर्गः। द्वितीयादिपाककाले ईदृशप्रयोगात्तत्काले च प्रथमपाकस्याभावात्प्रथमपाके प्रयोगकालीनत्वस्येदानीन्तनत्वस्याभावादसङ्गतिरत आह-तदानीन्तनत्वं चेति। प्रयोगाधिकरणः स्थूलः प्रत्यक्षादिरूपग्राह्यः। **सन्निहितेति**।

---

१. 'वाचित्वात्' इति पाठान्तरम्।

२. 'न तु' इति पाठान्तरम्।

क्त्रान्तसमभिव्याहृतधातुप्रतिपाद्येत्यर्थः। तेन गमनोत्तरं भोजने निद्रादिपूर्वकालीनत्वेन तत्रापि भुक्त्वा व्रजतीत्यस्य नापत्तिः।

चषकम्

तत्र हेतुमाह। **आख्यातस्येति**। यङ इत्यादावप्ययमेव हेतुरेतदूह्यान्यलभ्यत्वं वेत्यन्यदेतत्। **यत एव** यङो विशिष्टवाचकत्वाभावेऽन्यलभ्यत्वं **हेतुरत एव** नत्विति तु शब्देन **पूर्वनिरपेक्षत्वं** सूच्यते। एवकारव्यवच्छेद्यं दर्शयति। **नत्विति** । **ननु** तत्समानकालीनध्वंसप्रतियोगिनि कथं तत् समानकालीनत्वमत आह। **तदानीन्तनत्वञ्चेति**। **स्थूल**कालं वक्तुर्विवक्षाविषयं दिनादिरूपम्। **क्त्वाबोध्यः**। **सन्निहितेति**। समभिव्याहृतधातु- प्रतिपाद्य**फल**विशेषानुकूल- क्रियासामान्याव**धिकमित्यर्थः**। तेन भुक्त्वा भुनक्तीति प्रयोगवारणम्। मुखं व्यादाय स्वपितीत्यादाववान्तरक्रियामादायोपपादनं तु विशेषरूपेण धातोः स्वारसिकीं लक्षणामभ्युपेत्य।

तच्च प्रौढिवादमात्रम्। **अनु**भवसिद्धप्रत्यये समानकालीनत्वे प्रत्ययस्यैवानुशासनिकी सेति तु वयं **ब्रूमः** । **तत् पूर्वकालीनत्वञ्चेति**। **ननु** जातो घट इतिवदुत्पन्नो घटध्वंस इति प्रत्यक्षबलेन नाशोऽतिरिच्यतां न तु प्रागभावः। इहेदानीं घटप्रागभाव इति प्रत्यक्षासिद्धेः। **न चैवं** घटोत्पत्तिकालेऽपि घटोत्पादक सामग्रीसत्त्वात् पुनर्घटोत्पत्त्यापत्तिरिति **वाच्यम्**। सामग्रीसत्त्वस्य कार्यसत्त्वैव व्यापिका **न तूत्पत्ते**रप्यत्रान्तर्भाव इत्यभ्युपगमात्। **समवायादिना** कार्यादेः प्रतिबन्धकत्वाभ्युपगमाद्वा। **अत एव** निर्विकल्पकस्यापि न चतुर्थक्षणे पुनरुत्पादः। तन्निर्विकल्पकध्वंसस्यैव तत्र तथात्वात् **यत्तु** स्वानधिकरणेषु तन्तुषु पटोत्पत्तिवारणाय बहूनां तन्तूनां प्रातिस्विकरूपेण हेतुत्वापेक्षया प्रागभावस्य तथात्वे लाघवम् । **न च** द्वित्रितन्तुषु संयुक्तेषु सहस्रतन्तुक पटोत्पत्तिवारणाय चरमतन्तुसंयोगव्यक्तेस्तद्व्यक्तित्वेन हेतुत्वेऽवश्यं वाच्ये तदभावादेव स्वानधिकरणेष्वपि तदापत्तिवारणमिति **वाच्यम्** ।

तथापि चरमसंयोगस्य समवायेन पटं प्रति कारणत्वे तन्त्वन्तरे तदभावेऽपि पटोत्पत्त्या व्यभिचारापत्त्या कालिकसम्बन्धेन तथात्वं वाच्यं तथा च

स्वानधिकरणेऽपि कालिकेन तत् सत्तया पटोत्पत्तिवारणासम्भवादिति। **तन्न। एवम**प्यस्तु नाम कश्चनातिरिक्तः पदार्थस्तुष्यतु भवां**स्तथापि** तस्य सप्रतियोगिकत्वासिद्ध्या तत्प्रागभावेत्यत्र तस्येति षष्ठ्यर्थासिद्धेः। **कथ**मनादेर्भावस्य नाश इति **वेदात्मानं** पृच्छ। **एक**तन्तुकपटे निरुक्तयुक्तेरसम्भवेन हेतुहेतुमद्भावस्य क्वाचित्कत्वाच्च सर्वसाधारण्यायाह। **तदुत्पत्तीति**। गमनान्तरालिकक्रियामादायातिप्रसङ्गवारणायोत्पत्तिपर्यन्तम्। **तेन** ध्वंसस्य क्त्वार्थस्य स्वाधिकरणगमनप्रयोज्यफलानुकूलव्यापाराननुकूलत्व-विशिष्टप्रतियोगितासम्बन्धेन क्त्वार्थान्तरे कालेऽन्वयान्नोक्तातिप्रसङ्गः।।

तात्पर्यटीका

पूर्वनिरपेक्षत्वमिति। **यद्यपि** तादृशक्रियान्तरध्वंसकालीनत्वरूपं विशेषणमात्रं यङोर्थो विशेष्यमात्रार्थकाख्यातप्रतिपाद्यत्वा**न्न तु** विशिष्टं यङोर्थो विशेष्यस्याख्यातवाच्यत्वेनान्यलभ्यत्वादित्यर्थप्रापकस्याख्यातस्य चरमदलवाचित्वादित्यस्योभयसाकाङ्क्षतैव **तथा**प्यर्थभेदात्तदर्थकवाक्यनि-राकाङ्क्षत्वमव्याहतमेवेत्याशयः। **फलविशेषा**नुकूलेति। **एतेन** क्त्वार्थप्रागभावस्य स्वानधिकरणकृतिप्रयोज्यफलानुकूलव्यापाराननुकूलत्वाश्रयत्वोभयसम्बन्धेन क्त्वार्थान्तरे कालेऽन्वयरूपोऽनुपदं वक्ष्यमाणया रीत्या परिष्कारः सूचितः। तेन च गमनसामान्यावधिकपूर्वत्वस्य तद्भोजनकालेऽप्यसत्त्वेन भुक्त्वा व्रजतीति प्रयोगानापत्तिः **परास्ता**।

प्रौढिवादमात्रमिति। तथा च स्वारसिकप्रयोगो न निर्वहतीति भावः। अत एव स्वाभिमतं मतमाहा**नुभवसिद्धप्रत्यय** इति। थूत्कृत्य निष्ठीव-तीत्यादौ तथा दृष्टत्वादिति भावः। **ननु** प्रागभावाभावे ध्वंसोऽपि नातिरिच्यतां मानाभावस्य तुल्यत्वादित्याशङ्कां परिहरति। **जातो** घट इतिवदित्यादि। तत्राप्युत्पत्तिप्रतीतेरलौकिकत्वेन विषयासाधकतया कथं ध्वंसः सिद्ध्ये**दन्यथा** जितं प्रतिभासिकसत्तावादिभिर्वेदान्तिभिरित्याशङ्कामपाकर्त्तुं दृष्टान्तो**पन्यासः**। तथा चोत्पत्तेः क्वचिदपि लौकिकानध्यक्षतयान्यथाख्यातेरसम्भवादसत्ख्यातेर-नभ्युपगमाच्चान्यथानुपपन्ना प्रतीतिरुपनीतभानात्मिकापि यथा घटोत्पत्तिं साधयति

तथा घटध्वंसोत्पत्तिं साधयन्ती घटध्वंसमपि साधयेदित्याशयः। उत्पत्यन्तर्भावमभ्युपेत्याप्याह। **समवायादिनेति। अत एव** वक्ष्यमाणहेतोरेव।

एवमपि स्वाधिकरणेषु तन्तुषु पटोत्पत्तिवारणाय कस्यचित् पदार्थस्यावश्यकल्प्यत्वेऽपि। **अस्तु** नामेत्यभ्युच्चयमात्रं यावदवयवसमवेत-यावत्त्वस्यैव नियामकत्वसम्भवेन वस्तुतः प्रागभावासिद्धेः। अत एवाहात्मानं **पृथेति**। प्रागभावस्य तत्साधककार्यकारणभावस्य च तवैवाभिप्रेतत्वादिति भावः। अस्तु कार्यकारणभाव एव षष्ठ्यर्थ इत्याशये**नाह एक**तन्तुकपटेपि। अन्तरालिकक्रियाया अप्युत्पत्तिमत्त्वात्तद्दोषतादवस्थ्यमत आह **तेनेति**। स्वमान्तरालिकगमनकालध्वंसस्तदधिकरणं गमनमुत्तरं गमनं तत्प्रयोज्यं फलानुकूलव्यापाराननुकूलत्वं न ध्वस्तकालस्य तस्याप्यनुकूलत्वादित्यर्थः। **उक्ता**तिप्रसङ्गो गत्वा गच्छतीति प्रयोग**प्रसङ्गः** ।

तर्कामृतम्

तेन 'भुक्त्वा व्रजति' इत्यत्र गमनप्रागभावावच्छिन्नकालवृत्तिभोजनकर्त्रभिन्नो व्रजतीत्यर्थः। समान- विभक्तिकृतामभेदेन[१] धर्मिवाचकत्वात्।

तरङ्गिणी

तेनेति। भुक्त्वा व्रजतीत्यत्र चैत्र इत्यत्र सन्निहितव्रजधात्वर्थगमनप्रागभावावच्छिन्नकालवृत्ति गमनोत्पत्तिकालीनध्वंस-प्रतियोगिकालवृत्ति वा यद्भोजनं तत्कर्त्रभिन्नश्चैत्रो गमनानुकूलकृतिमा-नित्यन्वयबोधः। समानविभक्तिकृत इति। समानविभक्ति- कृदन्तस्येत्यर्थः।

चषकम्

गमनप्रागभावावच्छिन्नेति। इदमुपलक्षणम्। गमनोत्पत्तिकालीन-

१. 'कृताऽभेदेन' इति पाठान्तरम्।

ध्वंसप्रतियोगीत्यपि **बोध्यम्** । **भोजनकर्त्रभिन्न** इति। **कथं तर्ह्यवजानासि मां यस्मात्तस्मात्तेन भविष्यति। मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सेत्यादि** । तत्समानकर्तृकान्तरालिकक्रियान्तराध्याहारेण। अनाराध्येत्यत्र प्रयोजकव्यापारान्तर्भावेण वा। **नन्वा**ख्यातन्यायेन कृतोऽपि कृतिरेवार्थोऽस्तु किं कर्त्रर्थकत्वेनेत्यत आह। **समानविभक्तीति**। समानविभक्तिकत्वञ्च स्वाव्यवहितोत्तरविशेष्यपदकत्वं **स्वाव्यवहितो- त्तरत्व**सम्बन्धेन **स्वविविशिष्ट**विशेष्यपदकत्वं वा। तत्र चाव्यवधानं **स्वोत्तरं** यद्विशेष्यपदोत्तरवृत्तितावच्छेदकत्वेनानुसन्धीयमानानुपूर्व्यवच्छिन्नभिन्नं पदं तदुत्तरं यद्यत्तद्भिन्नत्वरूपं यदि निरुच्यते। **तदेद**मेव व्याससमाससाधारणं विरुद्धविभक्तिराहित्यमिति गीयत इति **समासः** ।

कृतः क्त्वाप्रत्ययस्**याभेदेना**भेदान्वयसाकाङ्क्षत्वेन। **धर्मि**वाचकत्वाद्- धर्मिणि शक्तत्वावश्यम्भावात्। **अयं** भावः। भुक्त्वा चैत्रं व्रजतीत्यत्र प्रथमान्त- **चैत्रपदार्थे प्रथमान्त**क्त्वान्तार्थस्याभेदान्वय एवं भोजनकर्त्तर्य्येव व्रजनकृतेरप्यन्वयोप्यनुभवसिद्धोऽ**त एव** भोजनकर्त्रभिन्न इति प्रागवादीत्। अन्यथान्यकर्त्तृकभोजनोत्तरं गच्छत्यपि भुक्त्वा गच्छतीति प्रयोगापत्तेः स च कर्त्तर्थकत्वं विना नोपपद्यत **इति**।

तात्पर्यटीका

अन्तरालिक्रिया भार्यासम्वेशनरूपा। सम्विष्टस्येति पदान्तराध्याहारापेक्षया क्लृप्तपदार्थे णिजर्थान्तर्भावो युक्त इत्याशयेनाहा**नाराध्येत्यत्रेति**। अनयोः पक्षयोः प्रथमः पक्षः सम्यक्। **इमां देवीं ऋतुस्नातां स्मृत्वा सपदि सत्वरः। प्रदक्षिणक्रियातीतस्तस्याः कोपमजीजन** इति पूर्वश्लोकेन तत्रैव कवितात्पर्यावधारणात्। प्रजापदमपि तत्रैव सहायकमाचरति। यदादरेण ममानादरस्तन्निष्फलमिति। अव्यवहितोत्तरं विशेष्यपदं यस्य तत्तथा स्वञ्च तदव्यवहितोत्तरविशेष्यपदकं च तत्तथेति वहुव्रीहिगर्भः कर्मधारयः। प्रागभावानङ्गीकारे तद्घटितपूर्वत्वस्य दुर्वचत्वाद्ध्वंसघटितोत्तरत्वप्रापणाय वहुव्रीह्यनु**सरणम्**। स्वत्वप्रवेशेऽननुगमादाह **स्वाव्य**वहितोत्तरत्वसम्वन्धेनेति।

तथा च स्वत्वस्य सम्बन्धिपरिचायकतया नाननुगम इत्याशयः। **स्वविशिष्टेत्यादि**। विशेषणपदनिष्ठत्वायात्रापि बहुब्रीहिरावश्यक एवेति भावः। **स्वोत्तरमिति**। स्वपदं नीलस्य घट इत्यत्र नीलपदपरम्। राज्ञः पुरुष इत्यत्र राजपदे प्रथमान्तत्वग्रहेऽभेदान्वयग्रहात् सुज्ञः पुरुष इत्यत्र सुज्ञपदस्य **षष्ठ्**यन्तत्वग्रहे तदभावात् स्वरूपसद् विरुद्धविभक्तिराहित्यमतन्त्र-मित्याशयेनोक्तं **समास इति**।

प्रथममान्त क्त्वान्तार्थस्य विरुद्धविभक्तिरहितं यत् क्त्वान्तं तदर्थस्य **अभेदान्वयो**ऽनुभवसिद्ध इति योजना। **भोजन**कार्येवेति। भुक्त्वा व्रजतीत्युक्तस्थले धर्म्युपस्थापकान्तराभावादेकवाक्यत्वानुपपत्तेरिति भावः।

तर्कामृतम्

अव्ययत्वेन क्त्वापरविभक्तिलोपात्। कालः तात्पर्यवशात् व्यवहिताव्यवहितसाधारणो बोद्धव्यः। तेन 'पूर्वस्मिन्नब्दे गत्वाऽस्मिन्नब्दे समागतः' इत्येतादृशप्रयोगसङ्गतिः[१]।

तरङ्गिणी

ननु प्रकृतेर्विभक्त्यभावादसंगतिरत आह-अव्ययत्वेनेति। अन्यथा पक्त्वा चैत्रो व्रजतीत्यादावप्यगतेः। वस्तुतो विभक्त्यनवरुद्धत्वस्य वक्ष्यमाणत्वान्न काप्यनुपपत्तिः। **अभेदेन धर्मिवाचकत्वादिति**। अभेदसंसर्गेण नामार्थान्वितधर्मिबोधजननयोग्यत्वादित्यर्थः।

चषकम्

नात्र समानविभक्तिकत्व- मित्यनुशयानोऽभेदान्वयबोधे विरुद्धविभक्तिराहित्यस्यैव तन्त्रताया वक्ष्यमाणतया प्रकृते

---

१. 'इति प्रयोगसङ्गतिः' इति पाठान्तरम्।

तस्याक्षतत्वमित्याशयेनाह। **अव्ययत्वेनेति**। **लोपाददर्शनात्तथा** च विभक्त्यनुसन्धानं विनैवाव्ययस्यान्वयबोधकत्वमित्याशयः। **ननु** पूर्वकालस्य व्यवहितस्य क्त्वार्थत्वं भुक्त्वा तृप्यतीति प्रयोगानुपपत्तिरव्यवहितस्य तथात्वं पूर्वस्मिन्नब्दे गत्वास्मिन्नब्दे समागत इति प्रयोगानुपपत्तिरत आह। **काल इति**। **तात्पर्य**वशाद्वक्त्रिच्छानुरोधात्।

व्यवहिताव्यवहितसाधारण इति। भोजनानन्तरं मुहूर्त्तादिनाव्यवधान इव वर्षादिना व्यवधानेऽप्यनुभूय स्मरन्तीतिवत् **प्रस्थाय** चानुराधर्क्षे पुनर्मूले प्रयात्वसावितिवच्च तात्पर्यविषयकिञ्चित्कालान्तरव्यवधानेऽपि भुक्त्वा व्रजतीति प्रयोगस्येष्टत्वादित्याशयः । **पूर्वस्मिन्नब्द इति**। न चैवं तत्रैव पूर्वस्मिन् मासे गत्वास्मिन् मासे समागत इति प्रयोगापत्तिरिति **वाच्यम्**। तत्र पूर्वपदेन समभिव्याहृतपदार्थतावच्छेदकावच्छिन्ने समभिव्याहृतपदान्तरप्रतिपाद्यता-वच्छेदकावच्छिन्नाव्यवहितपूर्वत्वस्य पृथगेव प्रतिपादनात्तच्चव्यवहितपूर्वत्वं स्वप्रागभावाधिकरण यथोक्तकालप्रागभावानधिकरणत्वे सति तत्प्रागभावाधिकरणत्वं निर्वाच्यं **यथो**क्तेति करणाच्च पूर्वतृतीयमासस्यापि तादृशाब्दरूपस्थूलकालप्रागभावानधिकरणत्वेन तृतीयमासे पुनरागतेन तथा प्रयोगस्य दुर्निवारणत्वमिति **निगर्वः** ।

समानकर्त्तृकत्वमात्रस्य क्त्वार्थत्वे क्रियान्तरमादायातिप्रसङ्ग इति क्त्वान्तार्थपूर्वक्रियायाः **उत्तरक्रिया**समानकर्त्तृकत्वस्य तथात्वेऽननुगम इति क्त्वान्तार्थपूर्वक्रियायाः स्वसमानकर्त्तृकत्वसम्बन्धेनोत्तरक्रियायामन्वयाभ्युपगमेनैव **सामञ्जस्ये** न कर्त्ता क्त्वार्थ **एवमग्रेऽपि**। **इत्थञ्चा**व्ययकृतोऽभावे इत्यनुशासनाद्धात्वर्थविशेष्यस्य-प्रत्ययेनाविवक्षायामित्यर्थकादास्तामुत्तरः कालोऽपि संसर्गघटकः। **पूर्व**काल इत्यस्य सूत्रस्य पूर्वकालोपरक्तार्थे प्रकृतितात्पर्य इत्यर्थः। **एतेन** समानकर्त्तृकत्वं पूर्वकालीनत्वञ्च स्वरूपसदेव प्रयोगसाधुतानियामकमिति **परास्तम्**। संसर्गत्वस्याप्यभावे तथा तात्पर्यानिर्वाहात् **पूर्व**कालीनत्वप्रत्ययानुपपत्तेः। वेदं कृत्वा वेदिङ्करोतीत्यस्य **प्रयोगविधि**त्श्चेतिवानुपपत्ते **तु नव्याः**।

तात्पर्यटीका

अव्ययोत्तरं विभक्तिरेव न भवतीति मतसाधारण्याय व्याचष्टे। **लोपाददर्शनादिति**। तथा च परत्वमदर्शनान्वयि न त्वनुसन्धीयमानविभक्त्यन्वयीति फलितमित्याह **तथा चेति**। **नन्वेवं** पृथिव्यामेव गन्ध इत्यत्रैवकारोत्तर सप्तम्यर्थवर्णनं दीधितिकृतां विरुद्धं तदिदमग्रे व्यक्तीभविष्यतीत्यत आ**हाशय** इति प्रकृतग्रन्थकर्त्तुरित्यादिः। तथा च जलवृत्तित्वाभावबोधाय सम्भवन्त्याधेयत्वार्थिका सप्तमी तैरुपवर्णितेति को **विरोधः** ।

उपेक्षानुभवेऽप्यस्मरणाद्वाक्यार्थाबाधायानुभूयस्मरन्तीत्यत्रानुभूयेत्यस्यानुभवजन्य- संस्काराश्रयीभूयेत्यर्थ परत्वस्यावश्यकत्वेनाप्युपपत्तिमाशङ्क्याह **प्रस्थाय** चेति। पूर्वस्मिन्निति हि पूर्वपूर्वाब्दव्यावृत्यार्थवद्भवति न चासौ तावन्मात्रोपादाने सम्भवति पूर्वपूर्वस्यापि पूर्वपदप्रतिपाद्यत्वात्तस्माद्व्यवहितपूर्वपरतास्यावश्यकी तथा च गमनागमनयोः क्षणादिना व्यवधानस्य निषेद्धुमशक्यत्वात्सजातीयाब्दमासादिव्यवधानमेव निषेध्यतया पर्यवस्येत्तावतैव प्रभवे गत्वा शुक्लेब्दे समागते न तथा प्रयोगो भवति तु विभवे समागते इत्यन्यथानुपपत्तिगम्यतया यमर्थो न प्रकाशित इत्याह **निगर्व इति**।

अत्रास्वरसं दर्शयन्नेव नव्यमतमाह। **समान**कर्त्तृकत्वमात्रस्येति। **अति**प्रसङ्ग इति। मैत्रभोजनोत्तरं गच्छत्यपि चैत्रे भुक्त्वा व्रजतीति प्रयोगप्रसङ्गो मैत्रस्थितिसमानकर्त्तृकभोजनोत्तरत्वस्य चैत्रगमने सत्त्वादित्यर्थः। **उत्तरेति**। समभिव्याहृतेत्यर्थः। **सामञ्जस्ये**ऽतिप्रसङ्गवारणे। **अग्रेऽपि** भोक्तुं व्रजतीत्यादावपि। **एवं** भोजनस्य स्वसमानकर्त्तृकत्वस्वेच्छाधीनेच्छाविषयत्वोभयसम्बन्धेनान्वयेन सामञ्जस्यम्। **इत्थ**ञ्चोक्तदोषेण सम्ब- -धत्वावश्यकत्वे च। **ननु पूर्व**कालस्य क्त्वार्थत्वं सूत्रे सप्तमीनिर्देशेन प्रतीयते इत्यत आह। **पूर्व**काल इत्यस्येति। **एतेन** वक्ष्यमाणदूषणेन। **वस्तुतः** पूर्वकालसम्बन्धिनि प्रकृतितात्पर्ये इत्येव सूत्रार्थोऽस्त्वित्याशङ्क्य दोषान्तरमाह **पूर्व**कालीनत्वेति। मास्तु तत् प्रत्ययः का क्षतिरत आह **वेद**मिति **प्रयोगविधित्वेति**। क्रमबोधकविधिरेव प्रयोगविधित्वादिति भावः।

तर्कामृतम्

इच्छावान् तुमुनोऽर्थः; 'भोक्तुं व्रजति' इत्यस्य भोजनेच्छावान् व्रजतीत्यर्थः। 'भोक्तुमिच्छति' इत्यत्र तु कर्त्तरि लक्षणा। भोजनकर्त्तारमात्मानमिच्छतीत्यर्थः।

तरङ्गिणी

कर्तरीति। कर्तृविशेषे इत्यर्थः। समभिव्याहृतक्रियाकर्तरीति यावत्।

चषकम्

प्रत्ययार्थैकदेशभूतायामिच्छायां प्रकृत्यर्थान्वयमभिप्रेत्याह। **इच्छावानिति। तुमुनो**ऽर्थस्तुमुनो बोध्यः। अत्र चोद्देश्यतावच्छेदकविधेयभावमहिम्नेच्छाव्रजनयोर्हेतुमद्भावावगमान्न दिक्षया गन्तरि वस्तुतो बुभुक्षाभाजि तथा प्रयोगइत्यभिप्रेत्याह। **भोक्तुं व्रजतीत्यत्रेति। अत्रापि** प्रकृत्यर्थक्रियाया समभिव्याहृतक्रियायां स्वसमानकर्त्तृकत्वसहितस्वेच्छाधीनेच्छाविषयत्वसम्बन्धेनान्वयो बोध्यः। **नन्वेवं** भोक्तुमिच्छतीत्यत्रोद्देश्यतावच्छेदकावगमे सुतरां विधेयावागमे न शाब्दबोधानुपपत्तिरत आह। **कर्त्तरि लक्षणेति। कर्त्तरि** तन्मात्रे। **न** **त्वन्यकर्त्तृकभोजनेच्छावति** तथा प्रयोगवारणाय समानकर्त्तृकेच्छान्तर्भावेणेति यावत्। **लक्षणा** तात्पर्यान्यथानुपपत्त्येति शेषः। **एतेन** भोजनस्यैव विषयितयेच्छायामन्वयोऽस्तु किं कर्त्तरि लक्षणयेत्य**पास्तम्।** लक्षणां विना कर्त्तृतात्पर्यानिर्वाहादित्याशयः। **नन्वे**वमपि विषयविषयिभावसम्बन्धेनेच्छाऽन्वययोग्यस्य कर्त्तुः सिद्धतयोक्तप्रयोगानुपपत्तिः सिद्धे इच्छाविरहादत आह। **भोजनकर्त्तारमिति।**

तुमुनर्थस्य कर्त्तुर्धात्वर्थेच्छायां विषयितयान्वयादाख्यातार्थाश्रयत्वान्वयिनस्तस्यैवेच्छाविषयत्वं द्विविधं च कर्त्तृत्वमावेदितमित्येतावतैव नोक्तदोष इत्याहा**त्मानमिति।**

तात्पर्यटीका

अत्रापीति। अव्ययकृत्वाविशेषादिति भावः। भोजनस्येच्छान्वयानुपपत्य-भावादाह **तात्पर्येति**। **एवमपि** कर्तृलक्षणाङ्गीकारेऽपि। **भोजनकर्त्तारमितीति**। तथा च भोजनकर्तृत्वरूपप्रकारोपहितात्मगोचरेच्छाश्रयोऽयमिति शाब्दबोध इत्याशयः।

ननु कर्त्तरि लक्षणया कर्तृगोचरेच्छा प्रतीयेत तथा चान्यकर्तृकभोजनेच्छायामपि तथा प्रयोगापत्तिरत आह **तुमुनर्थस्येति** तथा च कर्तृत्वाश्रयस्य विशिष्टान्वयमहिम्नोपस्थिते तस्मिन्नेव स्वरसत इच्छाश्रयत्वान्वयादात्मानमिति लब्धमिति दर्शयति। **इत्याहात्मानमितीति**।

तर्कामृतम्

'सविशेषणे हि' इतिन्यायात् विशेषणे कृताविच्छान्वयः।

तरङ्गिणी

सविशेषणे हीति। "सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाधे" इति न्यायाद्विशेष्यस्य आत्मनः सिद्धत्वात्तत्रेच्छाया बाधे विशेषणीभूतभोजनीकृतावेव तदन्वयः।

चषकम्

नन्विदमन्यद्भुक्तमन्यद्वान्तमिति न्यायमनुसरति यत इच्छान्वययोग्यस्य कर्तुः सिद्धतानपवारितैवेत्याशङ्क्याशयं प्रकटयति। **सविशेषणे हीत्यादि। सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाध इति न्यायादि**त्यर्थः। यथा शिखी ध्वस्तः शिखी न नित्य इत्यादौ ध्वंसप्रतियोगित्वनित्यत्वाभावौ विशेषणे शिखायामन्वितौ न विशेष्ये धर्मिण **बाधा**त्तथा प्रकृतेऽपि **तथा हि**। इच्छान्वय

इत्यस्येच्छान्वययोग्यतेत्यर्थः सा चासिद्धतैव। तथा च सिद्धस्याप्यसिद्धोपरागेणेच्छाविषयतोपगमाद्विशिष्टान्वययोग्यत्वमक्षतं कर्त्तुः सिद्धत्वेऽपि कृतेरसिद्धत्वादित्याशयः। **अत एव** भोजनकर्त्तारमात्मानमित्युक्तम्।

एतेन प्रकृते सन्दंशपतितायाः कृतेः कथमिच्छायां शाब्दोऽन्वयबोध इति शङ्का **परास्ता। अत्रापि** स्वोद्देश्यकत्वस्वसमानकर्तृकत्वोभयात्मक एवेच्छाद्यर्थकधातुयोगे क्रिययोराकाङ्क्षाघटकः सम्बन्ध इति दिगन्यत्राप्यनुसर्त्तव्या। **क्त्वार्थ** कर्त्तेति वागर्थविवक्षा च शतः कृता। **अबुधानामुपायोऽसौ विहितः प्रतिपत्तये। असत्ये वर्त्मनीति न्यायात्। ननु** यत्र पचन्पचमानो वा चैत्रो गच्छतीत्युक्तं तत्र प्रथमान्तसामानाधिकरण्याङ्गीकारे खादन्न गच्छेदित्यतो वर्त्तमानखादनकर्त्तुर्गमनेऽनिष्टसाधनत्वं प्रतीयात्तच्च बाधितम्। न हि खादनात् प्राक् पश्चाद्वा गन्तारमपि विगायन्ति धर्मागममर्मपारगाः।

तात्पर्यटीका

बाधादिति। यद्यपि शिखाधर्मिणि शरीरे नानयोर्बाध**स्तथा**पीदानीमध्वस्तत्वारभरत्ववदापेक्षिको बाधो द्रष्टव्यः **नन्विच्छान्वय** इत्यसङ्गतं धात्वर्थेच्छाया आख्यातार्थाश्रयत्वद्वारा कर्त्तृसाकाङ्क्षत्वादत आह **तथा हीति। अत एव** विशिष्टान्वयस्याभिप्रेतत्वादेव।

सन्दंशपतितायाः प्रकृत्यर्थभोजनान्वितायाः कृतेः प्रत्ययार्थैकदेशभूतायाः। **यद्यपि** भावतुमुन् प्रकृत्यर्थस्य प्रधानक्रियायामन्वयः प्रागुक्त एव **तथापि** सम्बन्धवैचित्र्यं प्रतिपाद्यमेवेत्यतस्तदाहा**त्रापीति। इति** दिगन्यत्रापीति। भोक्तुं द्वेष्टि भोक्तुं पतत इत्यत्रापीत्यर्थः। **एवं** तर्ह्यसम्बद्धप्रलापो ग्रन्थकर्त्तुः किमज्ञानादनवधानाद्वोभयथाप्यनवधेयवचनताप्रसक्तेत्याशङ्क्य नेत्याह **क्त्वार्थ इति।** चैत्रभोजनसमानकर्त्तृकगमनकर्त्तृत्वेऽवगते भोजनकर्त्तृत्वस्यापि लाभेन सुखबोधाय प्रत्ययस्यैवार्थविवक्षावशतः क्त्वार्थः कर्त्तेत्येवमादिस्तेनेच्छावाँस्तुमुनोऽर्थ इत्यस्यापरिग्रहः। वाक्कृता ग्रथिताऽबुधानां ग्रहणासमर्थानां प्रतिपत्तये ग्रहणायासावुपायो ग्रहणोपायो विहित इत्यर्थः। न

चेदमसाम्प्रदायिकमित्याहासत्ये इति। '**उपाया: शिक्षमाणानां बालानामुपलालना। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते**'। इत्युक्तत्वादित्यर्थ:। **उपाया:** प्रकृतिप्रत्ययविभागरूपा:। अखण्डशक्तिवादिनां प्रकृतिप्रत्ययविभागस्यालीकत्वमभिप्रेत्ये**दमुक्तम्**। **पचन्पचमानो वेति**। पचन् चैत्रो गच्छतीति पचमानश्चैत्रो गच्छतीति वेति योजना।

तर्कामृतम्

प्रकृतधात्वर्थकर्ता शतृशानचो:, धात्वर्थजन्यफलवान् कर्मशानचोऽर्थ:। शत्रादीनां कर्त्ता वाच्य:। सविषयार्थकप्रकृतिकानाम्[१] आश्रयत्वे[२] लक्षणा।

तरङ्गिणी

कर्तृशतृशानचोरिति। अर्थ इति अग्रिमेणान्वयि। तथाच पचन् पचमान इत्यादौ वर्तमानपाककृतिमानित्यन्वयबोध:। शतृशानचोर्लडादेशत्वेन वर्तमानत्वस्यापि बोधात्। आदेशिस्मरणानियमे तयोरेव वर्तमानत्वमप्यर्थ:। **धात्वर्थजन्यफलवानिति**। जन्यान्तं फलपरिचायकम्। शक्तिस्तु फलवति। पच्यमानास्तण्डुला इत्यत्र पाकजन्यविक्लित्तिमन्त इत्यर्थ:। ननु धात्वर्थकर्तेत्याद्यसङ्गतम्। धात्वर्थस्य धातुलभ्यत्वात्। तयोर्लडादेशत्वेन स्थानिन एव कृतेर्बोधोपपत्तौ कृत्यन्तभावेन शक्तिकल्पनस्यानुपयुक्तत्वाच्चेत्यत आह-**शत्रादीनामिति**। तथाच धात्वर्थस्यान्यलभ्यत्वेन तदंशे शक्तेरभावेऽपि स्थानिनोऽस्मरणेऽपि बोधस्यानुभवसिद्धत्वात्कृतिमति शक्तिरावश्यकीतिभाव:। यद्वा तयो: कृतिमदर्थकत्वे जानन्नित्यादौ ज्ञानानुकूलकृतेरप्रसिद्धत्वादसङ्गतिरत आह-**शत्रादीनामिति**। कर्तरि कृदित्याद्यनुशासनानुग्रहादिति भाव:।

---

१. 'इत्यत्र' इति पाठान्तरम्।
२. 'सविषयकार्थक' इति पाठान्तरम्।
३. 'त्वाश्रयं लक्षणा' इति पाठान्तरम्।

चषकम्

तस्मादत्रापि गौणक्रियायाः स्वसमानकालकर्तृकत्वोभयसम्बन्धेन प्रधानक्रियायामेवान्वयो वाच्यः। **अत एव** पचन् पचमान इत्यादौ शतृशानचोः समानविभक्तिकृतोरभेदान्वय साकाङ्क्षत्वस्याप्रथमासमानधिकरणे इत्यनुशासनेन निषिद्धत्वाद्धर्मिवाचकत्वे मानाभाव इत्यत आह। **प्रकृतेति। शतृशानचोरित्यस्य** क्वचित् संसर्गघटकतया क्वचिच्च वृत्यावबोध्य इत्यर्थकेणार्थ इत्यग्रिमेणान्वयः। तेन तस्येत्यनेनैव गतार्थस्य लटः पुनर्ग्रहणेन तादृशनिषेधस्यौत्सर्गिकत्व-प्रदर्शनाद्विधिसममिव्याहारस्थलेनैव प्रथमासामानाधिकरण्यं विध्यसमभिव्याहारे तु तत्सामानाधिकरण्यं सर्वथा न निषिध्यते इत्यर्थे पर्यवसानात् सन् ब्राह्मण इत्यत्र गच्छतश्चैत्रस्य सचलितं वास इत्यत्र चोक्तयुक्त्या कर्तृशक्तेरावश्यकत्वमित्याशयः। **शानच्**प्रसङ्गात् पच्यमानस्तण्डुल इत्यादावप्युक्तयुक्त्या धर्मिणि शक्तिरावश्यकीत्याह। **फलवानिति**। इदञ्च क्रियामात्रस्य धात्वर्थत्वाभिप्रायेण। **अर्थो** बोध्यः। **यत्तु** धात्वर्थेति तु धातुलभ्यक्रियान्वयसाकाङ्क्षत्वव्युत्पादनायोक्तं न तु कृदर्थे तस्यान्तर्भावोऽन्यलभ्यत्वादित्याह। **शत्रादीनामिति व्याख्यानं** तत्त्रुटितसन्दर्भम्। **वयं** तु लडादेशस्य शतृ प्रत्ययस्य **वत्व**कत्वं व्युत्पादितमेव **तथापि** वेदमधीय**त** मुरं **द्विषत** सोमं सुन्वन्नित्याद्यर्थभेदभिन्नस्वतन्त्रशतृपरतवान्न पौनरुक्त्य**मेतद**भिप्रायकमेवादिपदमिति **वदामः** ।

वाच्यो मुख्योऽर्थः। **नन्वचेतने** स्वरसतः कर्तृपदाप्रयोगात् कर्तृपदस्य कृतिमानेव मुख्योऽर्थ इति कर्त्तरि कृदित्यत्रापि स एवार्थो वाच्योऽन्यथा गौणमुख्ययोरिति परिभाषाविरोधापत्तेरिति जानञ्जानान इत्यादौ कृदर्थैकदेशे कृतौ ज्ञानान्वयबाधादेवं ज्ञायमान इत्यादौ ज्ञानजन्यफलानभ्युपगमाच्चान्वय-बोधानुपपत्तिरत आह। **सविषयकार्थकेति। सप्रतियोगिकार्थकेत्यपि बोध्यम्। आश्रये लक्षणेति** विषय इत्याद्यपि **बोध्यम्**। तथा च स्वतन्त्रकर्त्तेति परिभाषितार्थकमेव तत्र कर्तृपद**मन्यथा** तत्सूत्रप्रणयनवैयर्थ्यापत्तेः। **इत्थञ्च** प्रकृतेऽप्याश्रयविषयत्वरूपे कृदर्थैकदेशे ज्ञानान्वययोग्यतया सामञ्जस्यं भवतीति भावः। **पारिभाषितश्चार्थः** समभिव्याहृततत्क्रियाकारकान्तर-

व्यापाराधीनतत्क्रियानुकूलव्यापाराश्रयस्तत्क्रियाया आश्रयादिश्च। व्यापारेऽनधीनान्तविशेषणश्च चैत्रः स्थाल्यां पचतीति प्रयोक्तव्येन चैत्रः स्थाली च पचत इति प्रयोगः।

तात्पर्यटीका

अत एव गौणक्रियायाः प्राधानक्रियायामन्वयस्यावश्यकत्वादेव। **निषिद्ध**त्वादित्यनेनान्वयः। **एतेन** कृतिमात्रशक्तिग्राहकलाघवतर्कोपगृहीतानुमानबाधकः सर्वसम्वाद्यनुभवो नास्तीति **सूचितम्**। **शानच्**प्रसङ्गादिति। एकसूत्रविहितयोरपि कर्त्तृकर्मशानचोर्मध्ये शतृसमभिव्याहारात् प्रथमं कर्त्तृशानचोभिधानेऽपि तदनन्तरं कर्मशानचोनुपेक्षणीयत्वादिति भावः। **क्रि**यामात्रस्येति। फलव्यापारयोर्धात्वर्थतामते त्वाश्रयमात्रं कर्मशानचोऽर्थ इति **बोध्यम्**। धात्वर्थघटितस्य वाच्यार्थत्वायोगाद्व्याचष्**टेऽर्थो** बोध्य इति। **अर्थभेदा** यज्ञसंयोगाद्याः। **स्वतन्त्रेति**। **न चैवं षष्ठी** निषेधानुपपत्तिर्लादेशत्वानङ्गीकारादिति **वाच्यम्**। तृनामिति प्रत्याहाराश्रयणेन तदुपपादनात्। **ज्ञानान्वय**-बाधादित्यन्वयबोधानुपपत्तिरित्यनेनान्वितम्।

इत्याद्यपीत्यपिना नश्यन्नित्यत्र प्रतियोगिनीत्यस्य परिग्रहः। प्रकृते जानानो ज्ञायमान इत्यादौ करणव्यावृत्तये व्यापारे स्वातन्त्र्यविशेषणेऽपि व्यापारशून्यप्रतियोग्याश्रयादेः कर्त्तुः सङ्ग्रहो दुष्कर एवेत्यतः परिभाषितार्थं विशदीकृत्य दर्शयति। **परिभाषितश्चार्थ इति**।

चषकम्

तत्र च कारकान्तरे समभिव्याहृतेति करणाच्च काष्ठेन स्थाल्यां पच्यत इत्यचेतन कर्त्तृपदात् तृतीयासाधुत्वनिर्वाहः। **चैत्रो** मैत्रेण स्थाल्यां पाचयतीत्यत्र हेतुकर्त्तुर्न पचिक्रियायां कारकत्व**मपि तु** ण्यन्तप्रतिपाद्यपाचनक्रियायामेवेति न स्वातन्त्र्याभावात् कर्त्तृवाचकपदात् तृतीयानुपपत्तिः। **यत्र च** चैत्रः पचतीत्येतावन्मात्रं प्रयुज्यते तत्र तन्नोपादेयम्। किन्तु विशिष्टविषयकशक्त्या विशेषणाविषयकबोधाजननाद्विशेषणाघटितेर्थे

स्वतन्त्रं शक्त्यन्तरमावश्यकम्। **सत्कार्यविद्वेषिणाञ्च** घटो जायते नश्यतीत्यादौ घटादेः कर्त्तृत्वं निर्वाहयितुं क्रियाया आश्रयादेरत्र प्रवेशः। **परत्वेवमप्यनुशासनेन** शक्तिग्रहे लाघवस्य सहकारितयोपधायकत्वविषयिताविशेषाभ्यां क्रियान्वयिनी कृतिरेव मुख्यं कर्त्तृत्वं गौणमाश्रयत्वादि। **तथा** च कृतिरूपे कर्त्तृत्वेऽनधीनान्तं विशेषणं न प्रतीयत एवेति न तदन्तर्भावेण शक्तिर्व्यापाररूपे च तस्मिंस्तदन्तर्भावेणार्थं लक्षणैवाक्रामतीति विचिन्वंल्लक्षणामेव तत्रोक्तवानत एव मत्तो भूतं न मयाकृतमिति हेतुकर्त्तरि न पचत्यपितु पाचयतीति च प्रयोगः सङ्गच्छते।

कर्षतीति कृषिस्तु भृतिभुक् प्रेरणार्थकः। **उक्तञ्च** याजका यजन्तीति यजिर्हविः प्रक्षेपार्थो हलैः कर्षतीति कृषिः प्रतिधानार्थ **इति**। होतेत्यत्र हविः प्रक्षेपो धात्वर्थः। **अत** एवर्त्विजि होतृव्यवहारो न यष्टरीत्यपि **बोध्यम्**। **अत्र** धात्वर्थतावच्छेदकफलीभूतव्यापारकर्त्तृत्वमेव होतेति कर्त्तृप्रत्ययेन बोध्यते इति नोक्तानुपपत्तिः। **न चैवं** विप्रस्वीकारफलकस्यागो दाधात्वर्थ इति स्वीकर्त्तुर्दातृव्यवहारापत्तिरिति **वाच्यं** स्वीकारो न स्वत्वफलकः किन्तु यथेच्छविनियोगफलक एव दातृव्यापार एव हि स्वत्वफलक इत्युपगमाद्दाधात्वर्थतावच्छेदकव्यापारप्रसिद्धेरेव नोक्तापत्तिः फलक्रिययोरेक-कर्त्तृकत्वादेव विनियोजके स्वकर्त्तृव्यवहारस्येष्टत्वादिति तु **जीमूतवाहनः**।

तात्पर्यटीका

स्वतन्त्रमनधीनान्तविशेषणाघटित धर्मावच्छिन्नम्। **उपधायकत्व**विषयित-विशेषाभ्यामिति। उपधायकत्वतत्क्रियाकामनाधीनकृतिविषयताभ्यामित्यर्थः। **तदन्तर्भावेणाधी**नान्तविशेषणघटिता। **तस्मिन्** कर्त्तृत्वे। **तदन्तर्भावेणा**-धीनान्तविशेषणघटितम्। **अत** एवोपधायकत्वविषयता- विशेषोभय-सम्बन्धनिवेशादेव। **न मया कृतमितीति**। **कृतेस्तदुयधायकत्वे**ऽपि तदुद्देश्यकत्वाभावदिति भावः।

कथन्तर्हि पञ्चभिर्हलैः कर्षति गृहीति प्रयोगः कर्षणोपधायिकायाश्च कृतेर्भृतिभुङ्निष्ठाया गृहिण्यसत्त्वादत आह**कर्षतीति** कृषिस्त्विति। **इति**

बोध्यमित्यन्वय:। **अत्र** व्यापारानुकूलव्यापारार्थकधातुसमभिव्याहारे **एवं** धात्वर्थतावच्छेदकव्यापारान्वितकर्त्तृत्वस्य कर्त्तृप्रत्ययार्थत्वे। होतेत्यादिव्यवहार-बलाद्धुधातुसमभिव्याहृतकर्त्तृप्रत्ययस्यैव हुधात्वर्थतावच्छेदकफलाकाङ्क्षाभ्युप गमादिति समाधानसम्भवेऽप्युक्ताशङ्कैव न भवतीति प्रतिपादायितुं प्रकारान्तरेण समाधत्ते **स्वीकार इति**। **न** स्वत्वफलक इति। तथा च स्वीकारो न दाधात्वर्थतावच्छेदक इति भाव:। **कथन्तर्हि** सकर्मकता स्वीकृतेरित्यत आह **किन्त्विति**। अस्माकं धातूनामनेकार्थत्वस्य क्लृप्तत्वाद्भवतां तु पदार्थ: पदार्थेनान्वेतीति व्युत्पत्तिभङ्ग: स्यादिति सूचयति। **जीमूत**वाहन इति।

चषकम्

यतो मुख्यकर्त्तृत्वं विषयताविशेषघटितमत एव च यो व्यापार: पूर्वं यद्रूपवत्तयेष्टसाधनत्वादिनावगतस्तेन रूपेणैव तस्य कृतिविषय-त्वमित्यतोऽन्योद्देशेन प्रक्षिप्तेन नाराचेन यत्र ब्राह्मणमरणं तत्र नाराचप्रक्षेपस्य ब्राह्मणमरणानुकूलत्वेन प्रागनवगमान्न **तद्विशिष्ट**कर्त्तृत्वमिति न सम्पूर्णप्रायश्चितं तत्कर्त्तु**स्तथा** सत्येव च सम्पूर्णप्रायश्चित्तप्रयोजकस्य कर्त्तृव्यापारस्य लक्ष्यत्वाभिप्रायेण हिंसालक्षणे मणिकृतां मरणोद्देशेनानुष्ठीय-मानत्वाद्दृष्टाद्वारकत्वयोरुपादनमिति मिश्राभिधानसङ्ग**ति:**। मरणोद्देशेनानुष्ठीयमानस्य व्यापारस्यावश्यं मरणानुकूलत्वेनानुसन्धानमिति तद्विशेषणस्य विशिष्टकर्त्तृतानिर्वाहकत्वात्। **अथ** कृतेर्विशिष्टविषयकत्वं फलोद्देश्यकत्वे सति व्यापारसाध्यकत्वमे**वान्यथा** खड्गाभिघातत्वादिनैवेष्ट-साधनत्वादिकमवधारयता **मरणो**द्देशेनानुष्ठितस्यापि व्यापारस्य **मरणा**नुकूलत्वेन कृतिविषयत्वाभावादलक्ष्यत्वापत्त्या तत्कर्त्तुरपि सम्पूर्णप्रायश्चिताम्नानानुपपत्तिरिति कथं मरणानुकूलत्वेन कृतिविषयत्वं लक्ष्यतानियामकम्। **यदि** च तादृशव्यापारसाधारण्याय व्यापारे मरणकामनाधीनकृतिविषयत्वमेव कृतौ **तदुद्दे**श्यकत्वघटितविशिष्टविषयकत्वनिर्वाहकं मरणेत्यादेरर्थोऽभ्युपगम्यतेऽभ्युप-गम्यतां **नाम**।

परन्तु तादृशविशिष्टकर्त्तृत्वस्य ब्राह्मणं न हन्यादिति निषेधविधिविषयत्वं **न सम्भवत्येव** मरणानुकूलव्यापारस्य हनधात्वर्थस्य साध्यताख्यविषयताख्या-

तार्थकृतावन्वयसम्भवेऽपि **धात्वर्थ**तावच्छेदकमरणस्य स्वोद्देश्यकत्वसम्बन्धेन कृतावन्वयस्य **व्युत्पत्ति**विरुद्धत्वात्। **न च** ब्राह्मणमरणोपधायकस्याऽन्योद्देशेन नाराचक्षेपस्याप्यनिष्टसाधनत्वान्मरणोपलक्षितव्यापारकर्तृत्वस्यैव तादृशनिषेध-विधिविषयत्वमुपगम्यते प्रायश्चित्तविधेश्च तदविषयत्वं मरणोद्देशेन तदनुकूलव्यापारकर्तृत्वप्रतिपादकशब्दस्य तद्विधावन्तर्भावेणाप्युपपद्यत इति नान्योद्देशप्रक्षिप्तनाराचहतब्राह्मणस्य सम्पूर्णप्रायश्चित्तप्रसक्तिरिति **वाच्यम्**।

तात्पर्यटीका

यद्रूपवत्तया मरणानुकूलत्वादिना। मिश्राभिधानसङ्गतिरिति योजना। **एव**कारेण मरणानुकूलत्वं व्यापारानवगाहित्वव्यवच्छेदः। **तथा** सत्येव फलविशिष्टव्यापारकर्तृत्वस्यैव सम्पूर्णप्रायश्चित्तप्रयोजकत्वे सत्येव इष्टसाधनत्वादीत्यादिना कृतिसाध्यत्वपरिग्रहः तद्विशिष्टकर्तृत्वं मरणविशिष्टव्यापारकर्तृत्वम्। **अन्यथा** मरणानुकूलत्वेन प्रागनवगतस्य मरणानुकूलत्वेन कृतिविषयत्वाभावे **खड्गा**भिधातत्वादिनैवेत्येवकारेण मरणानुकूलत्वव्यवच्छेदः। **मरणो**द्देशेनानुष्ठितस्यापि मरणकामनाधीनकृति-विषयस्यापि। **मरणानुकूलत्वेन** कृतिविषयत्वाभावादिति। मरणरूपेष्ट-साधनत्वादिना व्यापारस्य प्रागनवगमादित्याशयः। कृतेर्मरणानुकूलत्वेन व्यापारावगाहित्वे फलकामनाधीनतवमेकमेव तन्त्रमित्यभिप्रेत्याह **यदि** चेति तदुद्देश्यकत्वेत्यादि। **तदु**द्देश्यकत्वघटितस्याथेत्यादिनिरुक्तस्य विशिष्ट-विषयकत्वस्य निर्वाहक**मित्यर्थः**।

न सम्भवत्येवेति। हन्यादित्यतो मरणोद्देश्यिकाया मरणानुकूलव्यापारसध्यिका कृतिरित्यर्थ बोधसम्भवे एव तस्य तथात्वं नान्यथेति भावः। हन्यादित्यतस्तथा बोधे किं बाधकमत आह। **धात्वर्थतावच्छेदकमरणस्येति**। **व्यु**त्पत्तिविरुद्धत्वादिति। पदार्थः पदार्थेनैवान्वेति **न** त्वेकदेशेनेति खण्डशक्तावप्येकत्र विशेषणतयान्वितस्य नान्यत्र विशेषणतयान्वय इति च व्युत्पत्तिविरुद्धत्वादित्यर्थः। मास्तु विशिष्टव्यापारस्य निषेधविधिविषयत्वम्। **न चैव**मन्योद्देशप्रक्षिप्तनाराचहतब्राह्मणे मरणोपलक्षित-

व्यापारकर्तृत्वसम्भवात् सम्पूर्णं प्रायश्चित्तं प्रसज्येतेति **वाच्यम्**। प्रायश्चित्तविधावेव विशिष्टकर्तृत्वप्रतिपादकशब्दस्यान्तर्भावनीयत्वादित्याशङ्क्ते। **न चेति। तद्विधाविति।** लघुगुरुप्रायश्चित्तयोरेकनिमित्तकत्वे गुरोरननुष्ठानलक्षणस्य तद्विध्यप्रामाण्यस्यापत्तेः।

चषकम्

एवमपि यत्र ब्राह्मणमरणकामनयापि न ब्राह्मणमरणानुकूलो व्यापारोऽनुष्ठितः **किन्तु** दुर्गविलुण्ठनकामनाधीनब्राह्मणमरणानुकूल-व्यापारत्वप्रकारकचिकीर्षया तस्मिन्न**व्याप्ति**स्तत्रापि सम्पूर्णप्रायश्चित्तानानाद-लक्ष्यत्वासम्भवादिति चे**न्मैवम्**। मरणोद्देशेनानुष्ठीयमानत्वस्य मरणानुकूलत्वो-परागेण कृतिविषयत्वरूपत्वाद्यत्र हि मरणानुकूलव्यापारत्वेन कृतिविषयत्वरूपत्वाद्यत्र हि मरणानुकूलव्यापारत्वेन कृतिसाध्यतादिधीस्तत्रेव यत्र मरणकामनयानुष्ठितव्यापारस्य व्यापारविशेषत्वेनैव तद्धीस्तत्रापि मरणरूपफलकामनाधीनव्यापारविषयिणी कृतिर्मरणानुकूलत्वेन व्यापारमवगाहते कृतेः **कामना**विषयफलोपरागेणो**पाय**विषयत्वोपगमात्। उपायांशे मरणस्यानुकूलत्वं सम्बन्धः प्रकारो **वेत्यन्य**देतत्। **फल**व्यापारयोर्विश्रृङ्खल-भानोपगमे तु यत्र तृप्तिकामनया भोजनं फलान्तरकामनया च गमनमवगाहमाना समूहालम्बनाकृतिस्तत्र तृप्तये गमनं करोतीति व्यवहारापत्तेः। **इत्थ**ञ्च विशिष्ट-कर्तृत्वमुभयस्थलेऽपि **निष्प्रत्यूह**मिति **न काचि**दप्यनुपपत्तिः।

यद्यप्यदृष्टद्वारा पाकानुकूलकृतिमतोऽपि न पाकादिकर्तृत्वमिति तत्क्रियाकर्तृत्वघटके कृतिनिष्ठक्रियानुकूलत्वे एवादृष्टाद्वारकत्व**मपेक्षितम्**। **न तु** क्रियानिष्ठफलानुकूलत्वे तत्र **तद**पेक्षितम्। अदृष्टद्वारा काशी-संयोगवद्विक्लृत्त्यनुंकूलयजिक्रियाकर्तुः **पक्तृ**व्यवहाराभावेऽपि **यष्टृ**व्यवहारस्य सर्वसम्मतत्वादिति **हिंसा**पदार्थनिर्वचनप्रविष्टे व्यापारनिष्ठमरणानुकूलत्वे दृष्टाद्वारकत्वरूपमणिकारोक्तविशेषणस्य न कर्तृताघटकत्वं **तथापि** तत्रैव याजके हिंसकत्ववारणाय हिंसाकर्तृताघटकानुष्ठीयमानत्वे प्रविष्टकृतेरेवादृष्टाद्वारकमरणानुकूलत्वं विवक्षितम्।

तात्पर्यटीका

एवमपि मरणोद्देशेनेत्यादेर्मरणकामनाधीनकृतिविषयत्वार्थकत्वेनोक्त-स्थलेऽलक्ष्यत्वापत्तिवारणेऽपि। **अव्याप्तिरिति**। तस्य मरणकामनाधीनकृत्य-विषयत्वादिति भावः। कामनाविषयफलोपरागेणेति विशेषणे तृतीयेत्य-भिप्रेत्या**होपायांश इति**। **इत्ये**तद्विप्रत्तिपत्तिस्वरूपमन्यत् प्रस्तुतादन्यदुभयथापि फलोपरागगोचरत्वेन तदेकतरनिर्णयानपेक्षणादित्याशयः। **उभयस्थलेऽपि** यत्र मरणानुकूलत्वेन वा मरणकामनया दशाव्यापारविशेषत्वेनैव वा कृतिसाध्यताद्यवगाहनं तत्स्थलेऽपि। **निष्प्रत्यूहमिति** कामनया उभयत्राप्यविशेषात् कामनाविषयफलोपरागेण व्यापारावगाहनस्य कृतौ सम्भवेन विशिष्टकर्त्तृत्वस्यानपायादिति भावः। **काचि**ल्लक्ष्यत्वस्य वा सम्पूर्णप्रायश्चित्ताम्नानस्य **वा**।

नन्वस्तु कथञ्चिदपि मरणोद्देशेनानुष्ठीयमानत्वरूपमामणि कारोक्त-विशेषणस्य विशिष्टकर्त्तृताघटकत्वमदृष्टाद्वारकत्वविशेषणं तु मणिकारोक्तं न कर्त्तृताघटकमदृष्टद्वाराफलानुकूलयागकर्त्तुर्यष्ट्टत्वानापत्तेस्तत् कथमुच्यतेऽ-नुष्ठीयमानत्वादृष्टाद्वारकत्वयो रूपादानमितीत्याशङ्कते **यद्यपीति**। **अदृष्ट**द्वारेत्यादि। मैत्रकर्त्तृकया कस्यादृष्टद्वारानुकूला कृतिर्जन्मान्तरीया यागानुकूला चैत्रकृतिस्तद्दशायां पचतीत्यव्यवहारादिति **भावः** । **अपेक्षित**मावश्यकमन्यथा वक्ष्यमाणस्थले पक्तृव्यवहारापत्तेः। न च यष्ट्ट-व्यवहारो वारणीय इत्याह **न त्विति**। **तत्र** तत्क्रिकर्त्तृत्वघटके। **तददृष्टाद्वारकत्वम्**। **पक्तृ**व्यवहाराभावेऽपीति। एतेन पक्तृत्वघटकविक्लृत्तिरूपफलानुकूलत्वे तद्घटकं **भवतु न तु** यष्ट्टत्वघटककाशीप्राप्तिरूपफलानुकूलत्वेऽपीति सूचितम्। **यष्ट्ट**व्यवहार-स्येति। काशीप्राप्त्यनुकूलव्यापारस्य यज्यर्थत्वादिति भावः। **हिंसा**पदार्थनिर्वचन-प्रविष्ट इति। तत्र कर्त्तृत्वस्यैवाप्रवेशादिति भावः। **तत्रैव** याजकेऽदृष्टद्वारा मरणानुकूलश्येनकर्त्तर्येव। **हिंसा**कर्त्तृताघटकेत्यादि। यो मरणानुकूलो व्यापारो मरणोद्देशेनानुष्ठीयमानो यादृशकृतिगोचरस्तादृशकृतिनिष्ठानुकूलतानिरूपकोऽसौ हिंसेति हिंसाकर्त्तृताघटकं यदनुष्ठीयमानत्वं तत्रेत्यर्थः।

चषकम्

तथा विशिष्टकर्तृत्वमदृष्टद्वारकत्वविशेषितेनै**केनैव** मरणानुकूलत्वेन कृतिविशेषणेन घटितमिति मिश्राशय:। **इत्थञ्च** मरणावच्छिन्नव्यापारस्य हन्त्यर्थस्य विशिष्टस्य स्वनिरूपितकर्तृत्वसम्बन्धेन कर्तृनिष्ठस्यानिष्ट-विशेषसाधनत्वं निषेधविधितोऽवगम्यत इति तेषामभिमतम्। श्येनस्य **हिनस्त्यर्थ**त्वेऽपि तस्य **तादृश**कारणतावच्छेदकसम्बन्धेन न क्वचिदपि सत्त्वं तत्कर्तुरदृष्टाद्वारकानुकूलताघटितफलकर्तृत्वविरहेण विशिष्टाकर्तृत्वादिति नानिष्टविशेषं प्रति हिंसात्वेन साधनत्वमिति न क्रियायां विध्यर्थान्वयमते श्येनविध्यर्थबाध:। **वस्तुतस्तु** श्येनानुकूलकृतेर्मरणे प्रयोजकत्वमेव **न तु** कारणत्व**मन्यथासिद्धत्वात्**। **न च** श्येनस्य मरणं प्रति हेतुत्वे विधिवाक्यादवगते तदनुकूलकृतेरपि मरणं प्रति हेतुत्वे विधिवाक्यादवगतमेव क्रियाजन्यकार्ये क्रियानुकूलकृतेर्हेतुत्वनियमादिति **वाच्यम्**।

श्येनस्य मरणोपलक्षितान्यकर्तृकखड्गाभिघातरूपं वैरिवधं प्रत्येव हेतुताया वेदेन बोधितत्वात् क्रियाजन्यकार्ये क्रियानुकूलकृतिहेतुतानियमबलेनापि वैरिवधं प्रत्येव श्येनकृतेर्हेतुत्वमायातु न तु मरणं प्रति। **नन्वेवमपि** वेदे विशिष्टान्वयस्यौत्सर्गिकत्वेन वधसाधनताबोधकश्रुत्यैव मरणसाधनत्वं श्येनस्य प्रत्याय्यत **इति चेदस्तु** नाम **तस्य** तथात्वं श्येनकृतेर्मरणसाधनत्वं परमप्रामाणिकमेव। **क्रिया**जनककृतेस्तज्जन्यजनकतानियमस्याप्रामाणिकत्वात्। **तथा चानिष्ट**विशेषजनकतावच्छेदकप्रत्यासत्तिप्रविष्टमरणानुकूलत्वं मरणजनकत्वमेव **नतु** मरणप्रयोजकत्वमित्येतावत्पर्यन्तलाभायैवाऽदृष्टद्वारक-त्वोपपादनमिति **ध्येयम्**। **अथा**ऽन्योद्देशेन नाराचक्षेपकर्त्तुर्विशिष्ट-विषयककृतिमत्त्वघटित विशिष्टकर्तृताविरहेऽपि यथार्थवधजन्यव पापनिरसनसमर्थं प्रायश्चितं **तथा** श्येनकर्त्तुर्विशिष्टाकर्तृत्वेऽपि पापार्धस्यावश्यकत्वाद्बलवदनिष्टाननुबन्धित्वस्य बाधो दुर्वार एवेति **चेन्न**।

तात्पर्यटीका

विशिष्टिक्रियानुकूलत्वं तादृशकृतिनिष्ठमेकमेवादृष्टाद्वारकं विवक्षितमिति

दर्शयति **तथा चेति। एकेनैवेति**। अन्येषां तु फलानुकूलत्वे क्रियानुकूलत्वे च तदावश्यकम**न्यथा**दृष्टद्वारा विक्लृत्यनुकूलस्य यागस्य साक्षादनुकूल-कृतिमतः पक्तृव्यवहारस्य दुर्वारतापत्तेः। विशिष्टस्य निषेधविधिविषयत्वं समर्थयति। **इत्थञ्चेति। हन्त्यर्थस्य** ब्राह्मणं न हन्यादिति निषेधविधिघटकहन्त्यर्थस्य। **हिनस्त्यर्थत्वे**ऽपि मा हिंस्यादिति निषेधविधिविषयत्वेऽपि। **तादृश**कारणतावच्छेदकसम्बन्धेन विशिष्टनिरूपित-कर्त्तृत्वसम्बन्धेन। **मरणानुकूलत्वं** परम्परासाधारणं निवेश्य पुनः श्येनस्य वारणायादृष्टाद्वारकेति विशेषणं प्रक्षालनाद्धीति न्यायमनुसरतीत्यत आह **वस्तुतस्त्विति**। अभिचरन्नित्यस्य वैरिमरणं कामयन्नित्यर्थमभिप्रेत्याशङ्कते। **न चेति**।

वैरिवधं कामयन्नित्येवाभिचरन्नित्यस्यार्थ इत्यमिप्रेत्य समाधत्ते। **श्येनस्येति**। **एवमपि** श्येनस्य वधं प्रति हेतुत्वेऽपि। **तस्य** श्येनस्य। **तथात्वं** मरणहेतुत्वम्। उक्तनियमबलादेव तस्यास्तत्र हेतुता स्यादत **आह क्रियाजनककृतेरिति**। कुतस्तर्हि मणिकृतामदृष्टद्वारकत्वोपादानमत आह **तथा चेति** । **ननु** विध्यर्थमध्ये साक्षात्परम्परासाधारणं जनकत्वं प्रविष्टमत एवोक्तं बलवदनिष्टाननुबन्धीति तथा च श्येनस्य तद् बाधितमेवेत्याशङ्क**तेऽथेति**। **ननु** मरणावच्छिन्नव्यापारस्य स्वनिरूपितकर्त्तृतासम्बन्धेनानिष्टजनकत्वं प्रागुक्तं तत्कथमुच्यते पापार्धस्यावश्यकत्वादिति सिद्धान्तिन इमां शङ्कामापाततो दृष्टान्तेनापाकृत्य पूर्वपक्षं समर्थयत्य**न्योद्देशेनेति** ।

चषकम्

अकामकृतेप्यस्मिन्नर्धप्रायश्चित्तश्रवणेन **तत्र** मरणानुकूलत्वोपरक्त-व्यापारविषयतामनन्तर्भाव्य वस्तुतः साक्षान्मरणोपधायकव्यापारस्य स्वजनककृतिमत्त्व सम्बन्धेन न्यूनपापे स्वतन्त्रहेतुताकल्पनात् **श्येनस्य** तु **न साक्षान्मर**णोपधायकतेति तद्बलेनापि च विशिष्टाकर्त्तुः श्येनकर्त्तुर्हिंजन्यपापार्धस्याप्यनुत्पत्तेः। **न चान्योद्देशेन** नाराचप्रक्षेपसङ्ग्रहाय

साक्षान्मरणोपधायकत्वापेक्षया **लाघव**ान्मरणोपलक्षितव्यापारजनकत्वमेव प्रत्यासत्तिमध्ये निवेश्यता**मिति वाच्यम्**। **तथा सति** श्येनस्यापि मरणोपलक्षितव्यापारजनकत्वे श्रुत्यर्थबाधापत्या तादृशलाधवस्या-प्रयोजकत्वाद्वेदस्थले विशिष्टान्वयस्यौत्सर्गिकत्वमपीदमेव यच्छ्येनस्य मरणविशिष्टव्यापारजनकत्वे तदनुकूलकृतिसम्बन्धेन तस्य न्यूनपापे हेतुताया दुर्वारतया विध्यर्थबाधप्रसङ्गेनानभ्युपगन्तव्यतेति तस्य साक्षाज्जनकतागर्भ-हिनस्त्यर्थतावच्छेदकरूप**शून्यताया** अपि सूपपदत्वात्।

न च श्येनस्य मरणे व्यवधानेनाऽन्यथासिद्धौ खङ्गाभिघातजनिका कृतिरप्यन्यथासिद्धा स्यादिति मरणकारणीभूताया व्यापारकारणकृतिस्तद्वत्त्वं **न कस्**यापि हन्तुः स्यादिति **वाच्यम्**। तण्डुलविक्लृत्यादिरूप-फलव्यवहितस्यापि तुषादिप्रक्षेपस्य तत्करणदशायां पचतीत्यादिव्यवहारेण **यथा**ऽनन्यथासिद्ध**त्वं तथा** खड्गप्रक्षेपादिकरणदशायां हन्तीतिव्यवहारानुरोधेन तस्य व्यवहितस्यापि मरणेऽनन्यथासिद्धत्वमुपेयत इति सर्वसामञ्जस्यात्। **खड्गकरण**दशायां **तथा** व्यवहाराभावेन स व्यापारोऽन्यथासिद्धो न हिंसा। **व्याघ्रमरणो**द्देशेन कृतो यन्त्रार्पणादिर्**यथा तत्र दैवाद्**गवादिमरणेऽपि न हिंसा **तथा** न व्याघ्रादि हिंसारूपोऽपि तत्करणदशायां हन्तीत्यप्रयोगा**दतथा**त्वेऽपि **तत्मरणोद्देश्यकादृ**ष्टाद्वारकमरणप्रयोजककृतिजन्यव्यापारस्यापि हिंसावत् पापजनकत्वेनोक्तस्थले गोवधाभिसन्धाने गोवधप्रायश्चित्ताचरणमित्यवधेयम्।

एवं च चैत्रः पचतीत्यादौ विषयताघटितकर्तृत्वबोधनिर्वाहाय यथा कृतौ पाकादेरुपधायकत्वविषयिताविशेषोभयसम्बन्धेनान्वयः विषयताविशेषस्य सम्बन्धत्वेऽप्युपधायकत्वनिवेश आवश्यकः पाकाद्यनिष्पत्तिस्थले पचति पक्ष्यतीत्यादिप्रयोगस्य प्रामाण्यवारकत्वादिति तूक्तप्रायमेव। **तथा** चैत्रेण पच्यते इत्यादावपि तृतीयार्थकृतेर्जन्यत्वविषयताविशेषोभयसम्बन्धेनान्वयो बोध्यः। **कृति**जन्यत्वस्य तृतीयार्थत्वे तु जन्यत्वस्य सम्बन्धमध्ये एव स्वनिरूपकविषयत्वं प्रवेशनीयम्। **किम्वा** कृतिविषयत्वमेव तृतीयार्थो लाघवात् स्वनिरूपकजन्यत्वं विषयतायाः सम्बन्धमध्येऽन्तर्भावनीयमित्यास्तां **तावत्**।

तात्पर्यटीका

दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं प्रतिपादयति। **अकामेति**। अस्मिन् ब्राह्मणमरणकामनाविनाकृतनाराचक्षेपे। **तत्र** श्रुतार्धप्रायश्चित्ते व्यापारे। **न** साक्षादिति। येन तेनैव श्रुत्यन्नयनवशात् पापधर्मावश्यकं स्यादित्याशयः। **लाघवाद्**विशिष्टकर्तृत्वसाक्षान्मरणोपधायकव्यापारयोः कारणत्वद्वयकल्पनापेक्षया लाघवात्। **तथा** सति विशिष्टकर्तृत्वस्य प्रत्यासत्तित्वानङ्गीकारेण श्येनस्यापि मरणोपलक्षितव्यापारजनकत्वाङ्गीकारे सति। **श्रुत्यर्थबाधापत्या**। **शून्यताया** अपीत्यपिना हन्त्यर्थतावच्छेदकविशिष्टव्यापारत्वशून्यत्वपरिग्रहः।

न कस्यापीति। तथा च खड्गप्रक्षेप्तुरपि सम्पूर्णं प्रायश्चित्तं न स्यादिति भावः। **तथा व्यवहाराभावेन** हन्तीति व्यवहाराभावेन। **नन्वेवं** व्याघ्रमरणोद्देशेन कृतो यन्त्रार्पणादिरपि न हिंसा स्यादित्याशङ्क्येष्टापत्या परिहरति। **व्याघ्रेति**। **तत्र** यन्त्रे। **न हिंसेति**। अन्यथा वापी कूपादौ गवादिमरणेऽपि हिंसाप्रसङ्गात्। **अत**थात्वेऽपि वस्तुतो हिंसात्वाभावेऽपि। **तन्मरणोद्देश्य**केति। अकृतालबाले कूपादौ गवादिमरणानुसन्धानस्यावश्यम्भावेन तन्मरणोद्देश्यकत्वमुक्तरीत्या कूपकृतेरिति भावः। **अदृष्टाद्वारकेति**। **अत एव** श्येने प्रायश्चित्तं वाचनिकमित्युक्तं प्राक्।

एवं च कृतेः फलोपरक्तव्यापारविषयत्वे एव कर्तृत्वव्यवहारोपगमे च। **विषयताविशेषः** साध्यत्वाख्यः। एवमग्रेऽपि। गच्छतीति प्रयोगाप्रामाण्योपपादकत्वस्योक्तत्वात् प्रायः **पदम्** । कृतिजन्यत्वाद्यर्थकत्वस्य तृतीयायां तृतीयाया अर्थः कृतिर्जन्यत्वं संसर्ग इति मूलविरोधेनानभिप्रेतत्वं दर्शयति। **कृति**जन्यत्वस्य तृतीयार्थत्वे त्विति। **अत** एव कृति विषयत्वार्थकत्वमप्यनभिप्रेतमेवेति **बोध्यम्** । जन्यत्वविषयत्वयोर्द्वयोरेव वृत्यनियामकत्वान्नञा तत्सम्बन्धावच्छिन्नाभावबोधासम्भवाद्द्वयस्यापि तृतीयार्थत्वमभ्युपेत्योभपस्याभावद्वय बोधएवात्रमतेऽङ्गीकार्यो नञ्समभिव्याहार इत्यभिप्रेत्याहास्तां **तावदिति** । **अत्र** मते नञा वर्त्तते तदर्थो **वोभय**माकाङ्क्षत इत्यन्य**देतत्** ।

तर्कामृतम्

एवं कर्तृकर्मकृतां तेन तेन रूपेण कर्त्ता कर्म च वाच्यम्। भावकृतां तु नङ्घञादीनां[1] प्रयोगसाधुत्वमात्रम्, धात्वर्थातिरिक्तस्य भावकृता अनुपस्थापनादिति[1]।

तरङ्गिणी

लडाद्यादेशभूतकृतामेव न तत्र शक्तिः किन्तु सर्वेषामेवेत्याह–**एवमिति।** तेन रूपेण कृतिमत्त्वेन फलत्वेन चेत्यर्थः। प्रयोगसाधुत्वमात्रं प्रयोजनमिति शेषः। प्रत्ययं विना धातोः प्रयोगस्यासाधुत्वादिति भावः।

चषकम्

उक्तन्यायं पक्ता चैत्रः पक्वस्तुण्डुल इति तृजादिप्रत्ययेष्वप्यतिदिशति। **एवमिति । तेनतेनेति।** कर्त्तृत्वेन कर्मत्वेनेत्यर्थः।

वाच्यमिति इदमुपलक्षणम्। ज्ञाता ज्ञेय इत्यादौ चाश्रयादिरूपः कर्त्ता विषयादिरूपं कर्म चाश्रयत्वेन विषयत्वेन च **लक्ष्यमित्यपि बोध्यम्। भावकृतां** किं क्रियत इति प्रश्ने पचनं पाक इत्यादिक्रियामात्रपरोत्तरप्रविष्टानाम्। करणाधिकरणयोर्ल्युड्घञादीनामर्थसाधुतापि सम्भवतीति भावकृतामित्युक्तम्। अव्ययीभूतानां भावकृतां संसर्गविशेषे तात्पर्यग्राहकत्वमन्यदपि प्रयोजनं सम्भवतीति ल्युड्घञादीनां विशिष्योपा**दानम्। प्रयोगसाधुतामात्रं** धातुप्रयोगप्रयोज्यादृष्टविशेषप्रयोजकधातुसंस्कार एव साधूनेव प्रयुञ्जीतेत्युक्तत्वात्। **न त्वर्थ**विशेषोपस्थापनमपि प्रत्ययप्रयोगस्य प्रयोजनमिति शेषः। **प्रत्ययं** विना प्रकृतेरसाधुत्वादिति भावः। सम्भवत्यर्थसाधुत्वे पदसाधुत्वस्यान्याय्यत्वादर्थसाधुत्वासम्भवं दर्शयति। **धात्वर्थातिरिक्तस्येति।**

---

१. 'ल्युड्घञादीनाम्' इति पाठान्तरम्।

यद्यपि भावकृता कस्यचिदर्थस्यानुपस्थापनादित्येव वक्तुं युक्तं **तथापि** घञन्तशक्तिमभ्युपेत्य तथोक्त**मन्यथा** डुपचष्पाके इत्यनुशासनमपार्थकं स्यात् पचधातुः पचधात्वर्थ इतिवदिति **बोध्यम्** । **न चात्रैव** भावकृतेत्यत्रापि षष्ठीप्रसङ्गः कर्तृकर्मणो**रुभयोरेव** षष्ठीविधाना**दिति वाच्यम्** ।

उभयत्र प्रसङ्गेऽपि कर्मणि षष्ठ्यानियमेन **कर्त्त**र्यसाधुत्वादिति। **अत्र** केचित् । पाक इत्यादिभावकृतापि पाकेतीतोत्पत्तिकत्वरूपं सिद्धत्वमवगम्यते। पचतीत्यादौ तु वर्त्तमानत्वरूपं साध्यत्वम्। **यदुक्तम्–**

यावत् सिद्धमसिद्धम्वा साध्यते न प्रतीयते।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते॥

इति **वदन्ति** । **तदसत्**। तथा सति पाको भविष्यतीति प्रयोगानापत्तेः। **क्रिया**पदस्य योगरूढत्वं व्युत्पादयतां वैयाकरणानां साध्यत्वेन निर्देशस्तु क्रियान्तरनैराकाङ्क्ष्यपरः। **यतो** यत्प्रतिपाद्यं सिद्धमसिद्धं वा सर्वं साध्यत्वेने**तीत्थंभूत**लक्षण तृतीयया क्रियान्तरनैराकाङ्क्ष्येण प्रयोगोपाधिनोपलक्षितं सत् प्रतीयते प्रतीतिविषयो भवतीति रूढ्यर्थं व्युत्पाद्याश्रितक्रमंरूपत्वा-त्क्रमाश्रयत्वादित्यनेन क्रियापदप्रवृत्तिनिमित्तता योगार्थे पञ्चम्योल्लिखिता। **यथाश्रुते** भूताद्यर्थकलकारानुपपत्तेः। **न च** विवक्षितोऽप्येष **दोषः** । दृश्यते हि पाक इत्युक्तेऽस्ति वा नास्ति वेति क्रियान्तरं विना सन्देहः। पचतीत्यत्र तु नैवमिति। **एतेन** क्रियते साध्यत इति व्युत्पत्या साध्यत्वमेव योगार्थः क्रमिकत्वं तु रूढ्यर्थ इति विप्रतिपत्तिः **परास्ता**। विवक्षितनिरुक्तसाध्यत्वस्य योगेन प्रतिपादनासम्भवात्।

रूढ्यर्थस्याव्यावर्त्तकत्वापत्तेश्च। **तस्माद्युक्त**मुक्तं भावकृतानुपस्थापना-दिति।

तात्पर्यटीका

लक्ष्यमिति। क्रियानुकूलकृतिक्रियाजन्यफलयोर्मुख्यकर्तृकर्मत्वयो-र्बाधान्मुख्यार्थकपदतात्पर्यविषयत्वरूपसम्बन्धादनुशासनसिद्धरूढेश्च लक्षणार्हताः ःत्त्वादिति भावः। **प्रत्ययं** विनेति। **न चैवं** दधिपदस्यासाधुत्वापत्तिस्तदुत्तरयाः

स्वमोर्लोपादिति **वाच्यम्**। प्रतियोगिव्यधिकरणप्रत्ययाभावविशिष्टायाः प्रकृतेरित्यस्य तदर्थत्वात्। **उभयोरेवेति**। कर्त्तृकर्मणोः कृतीति सूत्रस्य कर्त्तृकर्मणोर्द्वयोरेव षष्ठीविधायकत्वादिति भावः

उभयत्र कर्त्तृकर्मणोर्द्वयोः। **प्रसङ्गे** षष्ठ्याः सामान्यविधिना प्राप्तौ सत्यां **कर्मणि** षष्ठ्यानियमेनोभयप्राप्तौ कर्मणीति परिसङ्ख्याविधिना। **कर्त्तर्य**साधुत्वादसाधुताबोधनात्। **सेत्यस्य** तत्प्रतिपाद्येत्यर्थोऽन्यथा वस्तुपद-प्रतिपन्नोऽपि पचधात्वर्थः क्रियापदव्यवहार्यः स्यादित्यभिप्रेत्य पूरयति **यत्प्रतिपाद्यमिति**। **इत्थम्**भूतलक्षण इति। अत्र लक्षणत्वं प्रतियोगिमत्तन्निष्ठाभावप्रतियोगित्वं तेन जटासङ्ग्रहो घटत्वादिवारणञ्च सुकरं भवति। **न चेति** न हीत्यर्थः ।

तर्कामृतम्

ननु 'नीलं घटमानय' इत्यादौ द्वितीयाद्वयश्रवणात्कर्मद्वयबोधापत्तिः, न तु विशिष्टस्य[२] कर्मत्वमिति चेत्[१]। न। अत्र[४] विशेषणविभक्तिः साधुत्वाय।

तरङ्गिणी

विशिष्टस्येति। नीलाभिन्नघटस्येत्यर्थः। **साधुत्वायेति।** तथाच नीलपदोत्तरविभक्तेर्निरर्थकत्वान्न कर्मद्वयबोधः संभवति।

चषकम्

प्रकृतमनुसरामः। **नन्विति** । **कर्मत्वद्वय**बोधापत्तिरिति। **न चेष्टापत्तिरिति वाच्यम्**। नीलपट सहितरक्तघटानयनेन **कृतार्थ**तापत्तेरित्याह। **न त्विति**।

---

१. 'इति' नास्ति।

२. 'कर्मत्वद्वय' इति पाठान्तरम्।

३. 'विशिष्टकर्मत्वमिति' पाठान्तरम्।

४. 'तत्र' इति पाठान्तरम्।

विशिष्टेति। नीलाभिन्नघटेत्यर्थः। **कर्मत्वमिति**। साक्षादवबुद्ध्येतेति शेषः। **एतेन** चकाराश्रवणात् पार्ष्ठिको मानसो भेदप्रत्यय इति **परास्तम्** । कल्पनागौरवात्। **यत** इत्यादिः। **तदुक्तं–**

विशेष्येण सहैकार्थं भवेद्यत्र विशेषणम्।
तत्र लिङ्गादयः प्रायो विशेष्यस्था विशेषणे॥ इति।

तात्पर्यटीका

एतेनेत्यादिना निरुक्तमेव साध्यत्वं विवक्ष्यतामित्याशङ्क्याह। **रूढ्यर्थस्येति**। क्रमिकत्वस्येत्यर्थः। **अव्यावर्त्तक**त्वापत्तेरिति अस्माकं तु पदप्रतिपन्नस्य क्रमाश्रयत्वस्य योगस्यातिप्रसक्तत्वाद्रूढ्यादरः। **न च** क्रियापदस्य क्रमधातोरनिष्पन्नतया कथं क्रमाश्रयत्वं योगार्थः स्यादिति **वाच्यम्**। धातूनामनेकार्थत्वाद्राजा प्रकृतिरञ्जनादितिवदित्याशयात्। कारिकाव्याख्यानेन प्रकरण वेच्छेदाह प्रकृतमनुसराम इति तेनैतावता प्रबन्धेन भेदान्वयो दर्शित इदानीमभेदान्वयं दर्शयितुं नन्वित्याद्युपक्रम **इत्युक्तम्**। **कर्म**त्वद्वयबोधापत्तिरितीति। एकत्र द्वयमिति रीत्या नीलकर्मत्वघटकर्मत्वयोर्बोधापत्तिरित्यर्थः। कृतार्थतापत्तेरिति। अनुष्ठितवाक्यार्थतापत्तेरित्यर्थः । शेषपूरणस्य फलं दर्शयति। **एतेनेति**। **कल्पना**गौरवादिति। साक्षादेव बोधनिर्वाहे पार्ष्ठिकमानसबोधकल्पनाया अन्याय्यत्वादिति भावः। मूले निषेधे हेतुत्वप्रतिपादकविभक्तेरदर्शनात् पूरयति। **यत** इत्यादिरिति। **वेदाः प्रमाणमिति त्रयः समुदिता हेतुर्न तु हेतव** इति च प्रयोगदर्शनाद्विशेषणपदस्याऽजहल्लिङ्गत्वे विरुद्धसङ्ख्यापरत्वे वा भिन्नलिङ्गादि न दूषणमित्याह **प्राय** इति।

तर्कामृतम्

अथवा विशेषणविभक्तेरभेदोऽर्थः। [1]अत्रायं विशेषः–द्वितीयपक्षे वाक्यसमासयोः पर्यायता न घटते। वाक्ये 'नीलं घटम्' इत्यादौ अभेदस्य

पदार्थत्वेन प्रकारत्वात् न[१] संसर्गत्वम्। 'नीलघटम्' इत्यादौ[२] कर्मधारये लक्षणाया अस्वीकारेणाभेदस्यापदार्थत्वेन संसर्गत्वात्।

तरङ्गिणी

सार्थकत्वं निरर्थकत्वमन्याय्यमित्यभिप्रेत्याह-**अथवेति।** द्वितीयपक्षे विशेषणविभक्तेरभेदार्थत्वे।

चषकम्

प्रकृतेऽर्थसाधुत्वस्यापि सम्भवात् पक्षान्तरमाह। **अथवेति।** **अभेद**स्तादात्म्यम्।

अत्रानयो: पक्षयो: । **न घटत** इत्यत्र प्राकारत्वात् संसर्गत्वादिति पञ्चम्यन्तद्वयं हेतुमाह। **वाक्य इति।** नीलघटमित्यादौ त्विति च। **तु शब्द:** कर्मधारयपदसाकाङ्क्षत्व**व्युत्पादनाय** तेन कर्मधारय इत्यस्य मध्यमणिन्यायेन पूर्वत्राप्यन्वय: सूचित:। **लक्षणाया** अस्वीकारेणेति। **अन्यथा** निषादस्थपत्यधिकरणविरोधापत्ते:। कर्मधारयेऽपि लक्षणाङ्गीकारे तत्पुरुषस्यैवोचितत्वा**त्तथा** सति विद्या कल्पनागौरवाभावात्। **सिद्धान्ते** तु विद्याकल्पनागौरवस्य फलमुखतया न दोषत्वमित्याशय:।

तात्पर्यटीका

नन्वत्राभेदो यदि भेदत्वावच्छिन्नाभाव**स्तदा** प्रसिद्धिर्भेदस्य केवलान्वयित्वाद**थ**भेदप्रतियोगिकोऽभाव**स्तीर्हि** नीलं जलमिति वाक्यस्यापि प्रामाण्यापत्तिर्जले नीलभेदसत्त्वेऽपि तस्य द्वित्वावच्छिन्नाभावस्यापि तत्र सत्त्वात्। **न च** भेदप्रतियोगिकाभावस्य विभक्त्यर्थत्वेऽपि नील-

---

१. 'न संसर्गत्वम्' इति नास्ति।

२. 'इत्यादौ तु' इति पाठान्तरम्।

पदसमभिव्याहारान्नीलत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नाभावः प्रतीयत इति **वाच्यम्** । पदार्थद्वयस्य संसर्गविशेषस्य लाभो ह्याकाङ्क्षाया नियम्यो यथा चैत्रः पचतीत्यत्र पाककृत्योर्धात्वाख्यातार्थयोरनुकूलत्वादेः संसर्गस्य धात्वाख्यातसमभिव्याहाररूपाकाङ्क्षायश्चैत्रकृत्योराधाराधेयभावश्च प्रथमान्तचैत्रपदाख्यातपदयोः समभिव्याहाररूपाकाङ्क्षाया यथा वा भूतले न घट इत्यत्र घटाभावयोः प्रतियोग्यनुयोगिभावस्य घटपदनञ्पदयोः समभिव्याहाररूपाकाङ्क्षाया एवमन्यत्रापि **प्रकृते** तु भेदप्रतियोगिकाभावार्थिकया विशेषणविभक्त्या प्रकृतिभूतनीलपदसमभिव्याहारवशाद्भेदरूपस्वार्थैकदेशे नीलत्वावच्छिन्न प्रतियोगितासम्बन्धेन प्रकृत्यर्थस्य नीलस्यान्वयबोधनसम्भवेऽप्यग्रे भेदप्रतियोगिकाभावरूपं स्वार्थं परित्यज्य नीलभेदत्वावच्छिन्नाभावः स्वार्थभिन्न एव कथं प्रतिपादयितुं शक्यः। **अथ** कथं फलावच्छिन्न व्यापारार्थक धातोर्व्यापारावच्छिन्नफलाश्रयत्वावगम इति **चेन्निर्धारणोऽसि। 'फलव्यापारयोर्धातुराश्रये तु तिङः स्मृता'** इत्युक्तत्वात्। **किं** विशेषणविभक्तेः खण्डशक्तिमुपगम्योक्तार्थो न लभ्येतेति **चेत्सत्यं** भेदेऽभावे च खण्डशक्त्या नीलो घट इत्यत्र नीलत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नाभावबोधनसम्भवेऽपि नीलपदस्य नीलपटपरतायामपि नीलो घट इत्येतद्वाक्यप्रामाण्यपत्तिः दुर्वारैवेत्यतो व्याचष्टे**ऽभेद** इति।

तादात्म्यमिति। तच्च तद्वृत्तिरसाधारणो धर्मोऽसाधारण्यञ्चैकमात्रवृत्तित्वं स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वरूप-मुभयवृत्तिधर्मेच तद्धर्माश्रयप्रत्येकव्यक्तिभेदवैशिष्ट्यमेवास्तीत्येकमात्र-वृत्तिधर्मोऽनेन रूपेण विशेषणविभक्तेरर्थ इत्यपूर्वव्यक्त्यभेदस्यापि शक्तिग्रहविषयता सूपपदेति नीलैकमात्रवृत्तिधर्मवद्घटमिति शाब्दबोधः। **अभेदस्य** संसर्गत्वेऽप्येषैव रीतिः। **अन्यथा** नीलान्तरभेदाभावस्य नीलान्तरवृत्तेरत्र नीले बाधसम्भवेन यत्किञ्चिन्नीलभेदाभावरूपसंसर्गतात्पर्येण नीलेऽपि न नील इति प्रतीत्यापत्तेरित्यन्यत्र **विस्तरः । न घटत इतीति। इदम्**उपलक्षणम्। विशेषणविभक्ति जन्याभेदोपस्थितेः शाब्दसामग्रीप्रवेशे गौरवञ्चेत्यपि **बोध्यम्। व्युत्पाद**नायेति। **अन्यथा** कर्मधारये लक्षणाया इत्यन्वयेनैव कृतार्थता स्यात्तथासति

वाक्ये इत्येतत् प्रतिद्वन्द्वितया समासे इति विशेषाप्रदर्शनेन न्यूनताशङ्का स्यादित्याशयः।

तर्कामृतम्

तथा च वाक्यसमासयोः पर्यायानुरोधेन[1] षष्ठीसमासे 'राजपुरुषः' इत्यादौ षष्ठ्यर्थसम्बन्धे[2] लक्षणा न घटते, सम्बन्धस्य[3] संसर्गमर्यादालभ्यत्वात्। वस्तुतस्तु विरुद्धविभक्त्यनवरुद्धस्य अभेदबोधकत्वव्युत्पत्तेः[4] मुख्यार्थराजाभेदस्य बाधेन राजपदस्य राजसम्बन्धिनि लक्षणा।

तरङ्गिणी

ननु पर्यायत्वाभावे किमनिष्टमत आह-**तथाचेति**। सम्बन्धे लक्षणेति। मणिकृताद्यभिमतेति शेषः। न च राजपदस्य सम्बन्धलक्षकत्वे नामार्थयोर्भेदान्वयापत्तिश्चेष्टापत्तिः, राजपुरुष इत्यत्रापि स्वस्वामिभावसम्बन्धेन राजपदपुरुषपदापदार्थयोरन्वयबोधापत्तिरिति वाच्यम्। राजपदाव्यवहितोत्तरपुरुषपदत्वादिरूपानुपूर्वीज्ञानस्य तद्धेतुतयैवानतिप्रसङ्गात्। नच तर्हि सम्बन्धलक्षणापि व्यर्थेति वाच्यम्। विग्रहसमासयोस्तुल्यार्थत्वरक्षणाय तदावश्यकत्वादिति सिद्धान्तरहस्यम्। **न घटत इति**। तथाच सिद्धान्तविरोध इति भावः। सम्बुद्ध्यन्तराजपदोत्तरपुरुषपदस्थले तादृशापत्तेर्दुर्वारत्वादाह-**वस्तुतस्त्विति**। बहुव्रीहौ चित्रगुरित्यादौ।

---

१. 'पर्यायता' इति पाठान्तरम्।

२. 'सम्बन्धलक्षणा' इति पाठान्तरम्।

३. 'संसर्गस्य' इति पाठान्तरम्।

४. 'अभेदान्वयबोधकत्व' इति पाठान्तरम्।

चषकम्

इत्थञ्च विधिबोधिताध्यनविशेषातिरिक्तमेवाध्ययनं स्त्रीशूद्रौ नाधीयातामिति निषेधविधिर्निषेधतीत्यस्तु। मा घटतां **समानाकार**बोधजनकतारूपा पर्यायता वाक्यसमासयोः किं तेनेत्यत आह। **तथा चेति**। पर्यायतानुरोधेन सम्बन्धप्रकारकशाब्दबोध सम्भवायेति शेषः। षष्ठ्यर्थसम्बन्धलक्षणा राजपदस्येत्यादिः मणिकाराद्यभिप्रेतेति शेषः। **न चैवमपि** नामार्थयोर्भेदान्वयबोधोपगमे राजा पुरुषो राजन् पुरुष इत्यत्रापि **तथा**न्वयबोधापत्तिरिति **वाच्यम्**। राजपुरुष इत्यानुपनूर्व्या एव तथान्वयबोधहेतुत्वाभ्युपगमात्। **षष्ठी**तत्पुरुषसमानानुपूर्वीकात् सम्बुद्ध्यन्तनृपपदोत्तरपुरुषपदादुक्तान्वयबोधाभावस्तात्पर्याभावादेवोपपन्नः **सर्वेषामिति किम**नुपपन्नम्। **न घटत इति**। तथा च पर्यायत्वानभ्युपगमे तादृशसिद्धान्तभङ्गप्रसङ्ग इति भावः।

ननु सम्बन्धभानायैव संसर्गलक्षणावश्यकीत्यत आह। **संसर्गस्येति**। तथा च वाक्यसमासयोः पर्यायतानभ्युपगन्तृभी राज्ञः पुरुष इति वाक्याद्राजकीयस्वत्ववान् पुरुष इति बोधसम्भवेऽपि राजपुरुष इति समासाद्राजवान् पुरुष इत्येव बोधाभ्युपगमादित्याशयः। **ननु** सम्बन्धिलाक्षणिकराजपदघटिताद्राज पुरुष इति कर्मधारयात् सर्वानुभवसाक्षिकस्य राजसम्बन्ध्यभेदबोधस्य **तथा**भूतराजपदघटिताद्राज्ञः पुरुष इति वाक्यादपि प्रसङ्गवारणाय तादृशबोधे राजपुरुषइत्यानुपूर्वीज्ञानहेतुत्वं सर्वसम्मतमेव **मणिकाराणां तु** मुख्यार्थराजपदघटिततत्पुरुषादुक्तकर्मधारयसमानाकारा**द्भे**दान्वयबोधस्याभ्युपगमेन भेदान्वयबोधे **तथा** हेतुत्वं **प्रागुक्तं** पुनरधिक**मन्यथा** राजसम्बन्धलाक्षणिकप्रथमान्तव्यस्तराजपदघटिताद्राजा पुरुष इत्यादिवाक्यादपि तथाभेदान्वयबोधापत्तितादवस्थ्यमित्यभिप्रेत्याह । **वस्तु**तस्त्विति। तथा च विग्रहवाक्यघटकयावत्पदार्थविषयकबोधजनकत्वमेव समासवाक्ये **न तू**क्तपर्यायतापीति भावः।

विरुद्धविभक्त्यनवरुद्धस्येति। व्याख्याततत्त्वमेतत्। अभेदान्वयबोधकत्वव्युत्पत्तेरिति। राज्ञः पुरुष इत्यत्राभेदाप्रत्ययादिति भावः। **व्याख्यास्यते**

चेदमुपरिष्टात्। लक्षणाबीजं दर्शयति। **मुख्यार्थेति। लक्षणा** निरूढलक्षणा। समासप्रयुक्तत्वेनानादितात्पर्यकत्वात्। **उच्छृ**ङ्खलास्तु राज्ञः पुरुष इति व्यासेऽपि राजपदं राजसम्बन्धिलाक्षणिकमेव विभक्त्यर्थबोधानङ्गीकारेण लाघवा**देवं** तण्डुलं पचति चैत्रेण पच्यते इत्यादावपि। समभिव्याहारविशेषहेतुतयैव सकलातिप्रसङ्गभङ्गा**दित्थ**ञ्च व्याससमासयोः पर्यायतापि साधु **सङ्गच्छते** । दर्शितं राजमातङ्गास्तस्यैवामी तुरङ्गमा इत्यादौ तु राजपदार्थैकदेशस्य राज्ञ एव तच्छब्देन परामर्शो न सम्बन्धिनो योग्यतयेत्यस्य **त्वयापि** वाच्यत्वादित्याहु**स्तन्न**।

श्रूयमाणषष्ठ्यन्तराजपदस्य राजसम्बन्धिनि लक्षणाग्रहेऽपि शक्त्या मुख्यार्थसम्बन्धिन इव लक्ष्यार्थसम्बन्धिनो बोधकतायाः सकलानुभवसिद्धत्वा**देषैव** श्रूयमाणपरिमाणार्थकमात्र जाद्यन्तानामपि गतिः **तत्रा**पि द्रोणमात्रो व्रीहिरित्यतो द्रोणपरिमाणपरिच्छिन्नत्वमात्रप्रतीतावपि द्रोणपरिच्छेदव्यवहारयोग्यपात्रान्तरलाक्षणिकद्रोणपदोत्तरमात्रजादिभ्योऽप्यर्थान्तर-प्रतीतेरविवादात् पात्रान्तरे वस्तुतो द्रोणेऽपि द्रोणत्वाग्रहे द्रोणमात्रो व्रीहिरित्यतस्तत्परिच्छिन्न मुख्यार्थबोधासम्भवात्।

तात्पर्यटीका

न चैवं निषेधातिक्रमणदोषप्रसङ्ग इत्याह। **इत्थञ्चेति**। निषादस्यापि यागविध्यन्यथानुपपत्तिसिद्धयागोपयोग्यध्यनावश्यकत्वे चेत्यर्थः। **समाना** कारबोधजनकतारूपेति विग्रहवाक्यस्य यत्र यत्प्रकारकबोधजनकत्वं तत्र तत्प्रकारकबोधजनकत्वं समासस्येत्यर्थः। **तथाऽन्वय**बोधापत्तिरिति। स्वस्वामिभावरूपभेदसम्बन्धस्य संसर्गमर्यादया भानस्य तवानुमतत्वादित्याशयः। किम्वा राजपदस्य सम्बन्धलक्षणाग्रहदशायां तथान्वयबोधापत्तिर्वाक्यादपि समासजन्यबोधसमानाकारबोधापत्तिः। **तत्पुरुष**समानानुपूर्वीकादित्यनेन व्यासवाक्यात्तथा बोधवारणमानुपूर्वीहेतुत्वेनापि न सम्भव**त्यत** एवक्ष्यति सर्वेषामितीति **सूचितम्** । **सर्वेषामिति**। नृपपुरुष इति कर्मधारय-जन्यबोधसमानाकारबोधस्य सम्बुद्धिसमभिव्याहृतपुरुषपदादापत्तेरन्य-थावारयितुमशक्यत्वादिति भावः ।

तथाभूतेति। सम्बन्धिलाक्षणिकेत्यर्थः। **भेदान्वयबोधे** राजसम्बन्धवान् पुरुष इति भेदान्वयबोधे। **तथाहेतुत्वमानुपूर्वीज्ञानहेतुत्वम्**। **प्रागुक्तं** राजपुरुष इत्यानुपूर्व्या एव तथान्वयबोधहेतुत्वाभ्युपगमादितिग्रन्थेनानुपदमेवोक्तम् । **अन्यथा** भेदान्वयबोधे तथा हेतुत्वानङ्गीकारे। **उक्त**पर्यायतेति एकत्र विग्रह प्रकारप्रकारकबोधजनकत्वरूप पर्यायतेत्यर्थः।

व्याख्याततत्त्वमिति। स्वोत्तरविशेष्यवाचकपदोत्तरविभक्तिसजातीय-विभक्तिभिन्नपदानुत्तरत्वेन व्याख्यातमित्यर्थः **नन्वेवं** विरुद्धविभक्त्यनवरुद्ध-स्याभेदबोधकत्वावश्यकत्वे पटो न घट इत्यत्राप्यभेदबोधसम्भवाय घटपदस्य घटप्रतियोगिके लक्षणावश्यकीति निपातातिरिक्तत्वं नामार्थयोरिति व्युत्पत्तिघटकनामपदविशेषणं व्यर्थमत आह। **व्याख्यास्यते चेति**। नञर्थविवेचन इत्यादिः। **राज्ञः** पुरुष इति राजपदलक्षणा निर्हेतुकीत्यर्थध्वननायो**च्छृङ्खला** इत्युक्तम्। कथं तर्हि व्यासमासयोः पर्यायतेति **चेदां मन्येतामिमां** दीर्घकृतया सरलनलकाण्डप्रकाण्डपरम्परया लद्वामाकर्क्ष्यसे प्रागेव समाकृष्टा खल्वसावर्वाचीनोद्भूतगगनकुसुमध्वनिना। **एवं** तण्डुलपदं तण्डुलकर्मके चैत्रपदं चैत्रकर्तृकर्तृके लाक्षणिकम्। **नन्वेवं** राज्ञः पुरुषस्तस्यैवाश्व इत्यत्र राजसम्बन्धिनस्तच्छब्देन परामर्शे तच्छब्दस्य च स्वोत्तरषष्ठ्यर्थसम्बन्धिलक्षणायां राजसम्बन्धिसम्बन्ध्यश्व इति बोधः प्रसक्त इत्यत आह **दशैत** इति। **त्वयापीति**। व्यासे लक्षणामनङ्गीकुर्वतापि समासेऽस्या अङ्गीकारादित्याशयः।

तर्कामृतम्

एवं बहुव्रीहौ चरमपदस्यान्यपदार्थे लक्षणा। तथा च द्वन्द्वकर्मधारयान्यसमासे सर्वत्र तत्तदर्थे लक्षणा।

तरङ्गिणी

चरमपदस्येति। पूर्वपदस्य लक्षणायां तु तदुत्तरं विभक्त्यभावेन विभक्तेस्तदर्थान्वितस्वार्थबोधकत्वानुपपत्तेः पूर्वपदं तात्पर्यग्राहकम्। वस्तुत उत्तरपदे गोस्वामिनि लक्षणा। तदेकदेशेऽपि व्युत्पत्तिवैचित्र्याच्चित्रपदार्थस्यान्वय

इति ज्याय:। तेन यदुत्तरो य: प्रत्ययस्तस्य तदर्थान्वितस्वार्थबोधकत्वे वपटव (?) इत्यादौ बहुश्च (?) तदुत्तरत्वाभावेन प्रकृत्यर्थान्वितस्वार्थबोधकत्वानुपपत्ते: यस्माद्य: प्रत्ययो विहित: स तदर्थान्वितस्वार्थबोधक इत्यभ्युपगन्तव्यम्। तथा च चित्रगुसमुदायोत्तरमेव प्रत्ययस्याविहितत्वात् केवलोत्तरपदार्थ: तत्स्वार्थबोधकानुपपत्तिरिति प्रत्युक्तम्। तथा चेति। धवखदिराविति द्वन्द्वे धवखदिरसमुदायात् प्रत्ययविधानेन तादृशसमुदायप्रतिपाद्यधवखदिरान्वितस्वार्थबोधकत्वमक्षतम्। —

चषकम्

बहुव्रीहौ चित्रगुरित्यादौ। अर्धपिप्पलीत्यादितत्पुरुषेऽपि क्वचिदुत्तरपदलक्षणैव वक्तव्या तुल्यन्यायादिति ध्वनयितुमेव**मित्युक्तम्**। तत्पुरुषवदिति **तस्यार्थ:**। **पूर्व**पदलक्षणायां प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युपत्तिभङ्गापत्ति: प्रकृत्येकदेशार्थेऽपि प्रत्यनार्थान्वयबोधाभ्युपगमे तु पचन्तं पश्येत्यादितोऽपि पाकं पश्येति बोधापत्ति:।

कर्त्तरि विशेषणतया प्रथममन्वितस्य पाकस्य न दर्शनेऽन्वयो निराकाङ्क्षत्वादिति **चेदनेक**पाककर्त्तर्येकस्मिन् सति पचन्तौ स्त इत्यादित: पाकविशेषणतया द्वित्वबोधापत्तिरित्यत आह **चरमेति** गोपदस्येत्यर्थ:। **अन्यपदार्थे** गोस्वामिनि। **लक्षणा** जहत्स्वार्थलक्षणा। **न चैवं** चित्रपदार्थस्य गोपदार्थैकदेशे गव्यन्वयानुपपत्ति: **पदार्थ: पदार्थेनैवान्वेति। न तु पदार्थैकदेशेनेति व्युत्पत्तेरन्यथा** व्रजश्चेतनां गौर्नित्येत्यस्य **योग्य**ताया दुर्वारत्वादिति **वाच्यम्**। पदभेदेन व्युत्पत्तेर्भेदेन प्रकृते तदनभ्युपगमात् **कथमन्यथा** द्वे शते त्रीणि शतानीत्यादय: प्रयोगा:। **यद्वा** गोपदं चित्रगोस्वामिलक्षकं चित्रपदं तात्पर्यग्राहकमिति।

एषैव गभीरायां नद्यां घोष इति वाक्यस्यापि **दिक्**। **तथा चेति**। समस्यमानपदातिरिक्तपदार्थबोधावश्यकत्वे चेत्यर्थ:। **द्वन्द्व**कर्मधारयान्येति। **ननु** कर्मधारये लक्षणाविरहेऽपि परस्परं समस्यमानपदार्थयोरन्वयेन सामर्थ्यसम्भवेऽपि द्वन्द्वे न तत्सम्भवो **लक्षणां** विनेति कथं द्वन्द्वसमासोऽसमर्थयोरेव

समासाङ्गीकारे तु तिष्ठति राजा पुरुषो गच्छतीत्यत्रापि राजपुरुषाविति द्वन्द्वसमासापत्तिरिति चेन्न।

द्वयोः परस्परं साक्षादनन्वयेऽपि द्वित्वान्वयेनैव परम्परयान्वयसम्भव-द्वारा सामर्थ्यापत्तेः। **अत एव** यत्र न द्वित्वाऽन्वययोग्यता तत्र बृहद्रथन्तरसमा साम: स्यादित्यादावकृत्वैव द्वन्द्वं बृहद्रथन्तरं वा साम यत्रेति त्रिपदबहुव्रीहि-रेवेति **मीमांसकाः**। पञ्चगवधन इतिवद्वात्क्व च प्रिय इत्यादौ तु समासान्तानुपपत्या द्वन्द्वाविश्यकत्वेऽपि तत्र समाहारलक्षणाध्रौव्ये सामर्थ्योपपत्तिरिति **वक्ष्यते। एवं** द्वित्राः पञ्चषा इत्यादावपि प्रकृत्यर्थतावच्छेदकसङ्ख्याया विशिष्यानिर्धारणेऽपि द्वित्वत्रित्वान्यतरेणैव प्रकारेण बहूनां निर्धारणान्न सामर्थ्यस्य दुर्भिक्षम्। **तत्र** द्वित्रिशब्दौ भावप्रधानावन्यतरदाश्रयश्च समासान्तार्थः प्रकृत्यर्थे आश्रयरूपेऽन्यतर-रूपाऽन्वयितावच्छेदकव्याप्यपर्याप्त्यान्वयि बहुत्वं बहुवचनार्थ इत्यादि **यथानुभवमूहयम्। नन्वेवं** द्वित्वधर्मितावच्छेदकधर्मद्वय वच्छिन्न-प्रकारताविशेष्यताद्वयशाली द्वित्वावच्छिन्नजलपृथिवीवर्त्तिनौ द्वित्वावच्छिन्नौ स्नेहगन्धावित्याकारकः प्रत्येकमेवान्वयबोधो जलपृथिव्योः स्नेहगन्धाविति वाक्याद्वाच्यो **न तु** जलपृथिव्यो रसगुरुत्वे इत्यादाविव द्वित्वावच्छिन्ने द्वित्वावच्छिन्नस्य समुच्चितैकप्रकारताशाली बाधात्तथा च गन्धः पृथिव्यां न वेति संशयनिवृत्तिप्रसङ्ग इति चेदिष्यत एवात्र तथा ।

तात्पर्यटीका

सकलानुभवसिद्धत्वादिति। तथा च पर्यायतादत्तजलाञ्जलिरेवेति भावः। **पात्रान्तरे** द्रोणपरिच्छेदकत्वस्य स्वयमग्रहाद्व्यवहारयोग्यत्व**पर्यन्तम्। ननु** तत्पुरुषे पूर्वपदलक्षणाया एवोक्तत्वात्कथमेवमिति। **लक्षणावत्त्वेनैव** सादृश्यं तदर्थ **इति चेद**स्तु तावदेवं तथापि विशिष्टधर्मेणाऽपि तत्पुरुषविशेषस्य तत्सम्भवतीत्यभिप्रायवानाहा**र्ध**पिप्पलीत्यादि। **पूर्वपद**लक्षणायामिति। **न च** समासोत्तरविभक्तेश्चित्रपदमपि प्रकृतिरेव तथा सति पचन्तमित्यत्र पचधातोरपि प्रकृतितया पाके कर्मत्वान्वयबोधापत्तिरित्याह **प्रकृत्य**कदेशार्थेऽपीति।

योग्यताया इति। व्रजपदार्थगोस्थानैकदेशे गवि चेतनाभेदस्य गोपदार्थैकदेशे गोत्वे नित्यत्वस्य चाबाधितत्वादिति भावः। एकदेशान्वयमसहमान आह **यद्वेति। एषैवेति। एव**कारेण नदीपदस्य नदीतीरमात्रलक्षणायां नदीपदार्थे तीरे गभीरपदार्थानन्वयस्य नदीपदार्थैकदेशे गभीरपदार्थान्वये एकदेशान्वयस्य च प्रसङ्ग इति सूचितम्। दिङ्मार्गः। लक्षणां विनेति। लक्षणाङ्गीकारे तु धवपदार्थे धवसाहित्यस्य खदिरेऽन्वयेनैव सामर्थ्योपपत्तिरित्याशयः।

कथ तर्हि द्वन्द्वान्येत्युक्तिरत **आहेति वक्ष्यत** इति। द्वन्द्वपदस्येतरेतरद्वन्द्वपरतया व्याख्यास्यमानत्वादित्याशयः। प्रकृत्यर्थतावच्छेदक-सङ्ख्यान्तरमात्रसाधारणरूपेणापि बहुत्वविवक्षायां बहुवचनमित्यर्थः समासविधिबलादित्यभ्युपेत्याह। **द्वित्रा इति। ननु** बहुषु बहुवचनमित्यस्य बहुत्वत्वेन बहुत्वविवक्षायामिति वा द्वित्वैकत्वयोरविवक्षायामिति वार्थस्तत्कथमन्यतरेणैवेतीत्यत आह **यथानुभवमिति** वस्तुतस्त्रयः सन्ति वा न वेति संशयानिवर्त्तकत्वे समानेऽन्यथोक्तसूत्रार्थवर्णनमनुचित-मित्याशये**नोह्यमिति**। दश पञ्च चेत्यादौ दशत्वपञ्चत्वयोः परस्परवैयधिकरण्यमधिकं **यथा** प्रतीयते प्रकृतसमासे तु द्वित्वत्रित्वयोस्**तथा** तन्न प्रतीयते इति **बोध्यम्**।

चषकम्

तन्नवृत्तिस्त्वनादे**र्यथाक्रममिति** वाक्यशेषा**च्छत्रुं मित्रं विपत्तिञ्च जयरञ्जयमञ्जयेत्यादाविव**। सोऽयमाद्यन्तौ टकितौ वित्यादितो निःसन्दिग्धप्रतिपत्तये यथा सङ्ख्यसूत्रेण परिभाषितवता भगवता **पाणिनिना** स्पष्टं प्रदर्शितोऽ**र्थस्तत्सामान्यादितरस्य तथात्वमिति न्यायात्। तत** एव व्युत्क्रमेणेत्याधुनिकवाक्यशेषमपि मत्वा जलपृथिव्योर्गन्धस्नेहाविति वाक्यं व्युत्पन्नान्न प्रयुञ्जते। **परं** तु क्वचिद्बलवता प्रमाणेन लोकसाधारणी सा परिभाषा कर्तृकर्मणोश्च भूकृञोरित्यत्रेव बाध्यते **सम**सम्बन्धित्वं वा परस्पर-सम्बन्धितानवच्छेदकावच्छिन्नोद्देश्यविधेयभावापन्नतया विशिष्य जलपृथिव्यो रसगुरुत्वे इत्यादि व्यावृत्तमुच्यत **इत्यस्तु। ननु** परस्परमनन्वयोऽपि द्वित्वान्वयेन

सामर्थ्याङ्गीकारे **चैत्रो** मैत्रश्च गच्छत इत्यत्रापि सामर्थ्यप्रसङ्ग इति **चेन्न**। इष्टापतेः । **अधिकं** नौकायां प्रपञ्चितमस्माभिः।

इत्थमेव सुबर्थद्वित्वस्य क्रिययोर्विशिष्टान्वयं नान्वयमभ्युपेत्य धवखदिरौ छिन्धि पश्य चेत्यादौ **सामर्थ्यमभ्युपगतं पञ्चाननैः। चैत्रमैत्रौ** स्थितिगतिमन्तावित्यप्युदाहरतां **कैयटोपाध्यायानां** प्रकृत्यर्थतावच्छेदक-**क्रिययोर्द्वित्वान्वयो**ऽभिप्रेत इत्यास्तां **तावत्**। **समास**ग्रहणं विरूपाणामस-मानार्थकानामेकशेषस्याप्युपलक्षणम्। **अन्यथा** समानार्थकसरूपैकशेषादिव तथाभूतविरूपैकशेषादप्येकरूपेण बहूनां बोध निर्वाहेऽप्यसमानार्थकविरूपैकशेषे पितरौ श्वशुरौ भ्रातरौ पुत्रावित्यादौ मातृश्वश्रूस्वसृदुहित्रादीनां **यथा** तात्पर्यं बोधानिर्वाहात्। **इदन्तु** बोध्यं **यदे**कमात्रवृत्त्यन्वयितावच्छेदकताक-व्यासज्यवृत्तिधर्मावच्छिन्नोद्देश्यताकबुद्धौ स्वव्याप्यतादृशधर्मावलीढत्वमपि प्रकृत्यर्थतावच्छेदकव्याप्यपर्याप्तिरूपोद्देश्यतावच्छेदकताघटकसम्बन्धेन विधेयसंसर्गघटकतया भासत इति नैकघटवत् यत्र घटाविति प्रत्ययः।

तात्पर्यटीका

अनादरेऽनादितात्पर्यमूलका**दिद**ञ्चाधुनिकतात्पर्यमूलकाधुनिकवाक्य-शेषाद्बलवत्त्वसूचनायो**क्तम्**। **तत** एवानादिवाक्यशेषविरोधादेव। **नन्वेवं** पृथिवीजलयो रसगुरुत्वे इत्यादावपि यथाक्रममन्वयः प्रसक्त इत्यत आह **परन्त्विति**। शास्त्रस्य बाधापेक्षया तदविषयत्वमुचितमित्यभिप्रेत्याह। **सम**सम्बन्धित्वं वेति **परस्परेति**। प्रत्येकं विधेयसम्बन्धितानवच्छेदकेनावच्छिन्नो य **उद्देश्यभाव एवं** प्रत्येकमुद्देश्यसम्बन्धितानवच्छेदकेनावच्छिन्नो यो विधेयभावस्तदापन्नत्वं तदुच्यतामित्यर्थः। **अस्त्विति**। अन्यथा शास्त्रस्याप्रामाण्यापत्तेरिति भावः। **चैत्रो मैत्रश्च** गच्छत इति। अत्र समूहालम्बनबोधाङ्गीकारेण सामर्थ्यवारणे त्वेकैकचैत्रमैत्रतात्पर्येण तथा प्रयोगानुपपत्तेरिति **भावः**। कुतस्तर्ह्यसमासस्तत्रा**हाधिकमिति**। समासविधेर्विभाषाधिकारीयत्वादिति प्रपञ्चितमिति भावः।

सामर्थ्यमभ्युपगतमिति। तथा च द्वित्वधर्मितावच्छेदकधवत्व-खदिरत्वावच्छिन्नेदं कर्मकं द्वित्वधर्मितावच्छेदकच्छेदनत्वदर्शनत्वावच्छिन्नमिदं मदिच्छाविषय इति शाब्दबोधोऽ**त्र** च चार्थ साहित्यरूपद्वित्वान्वये क्रिययोर्द्वित्वेनोल्लेखस्येष्टत्वा**दन्यथा** योग्यता न स्यादिति भावः। **द्वित्वान्वयो** द्वित्वविशिष्टे स्थितिगत्योर्मत्वर्थ भेदसम्बन्धेनान्वयेन द्वित्वान्वयः। **एतत्**प्रयोगद्वयस्यापि प्रामाण्येन तेषां निर्भर इत्यभिप्रेत्या**हास्तां तावदिति**। **यथा** तात्पर्यमिति पितामात्रेत्याद्यनुशासनगृहीततात्पर्यमनतिक्रम्येत्यर्थः। **इदं** त्वितीदं किं तदाह **यदिति**। अन्वयश्चास्याभ्युपगमादीत्य**नेन**। तथा च यदित्यादि तदिदं तु बोध्यमिति योजना। **अत्र** घटपटाविति बुद्धिव्यावृत्तये **एकेत्यादि**। तथाचैकमात्र वृत्तिरन्वयितावच्छेदकता यस्येति व्यासज्यवृत्तिधर्मविशेषणम्।

चषकम्

घटैतद्देशयोर्द्वित्वघटयोर**बाधितत्वे**प्ये**तद्देश** वृत्तित्वव्याप्यस्यापि घटपटवृत्तिद्वित्वस्य निरुक्तसम्बन्धेन बाधितत्वात्। **अवलीढत्वोक्त्या** च द्वयाधेयत्वं यत्र संसर्गस्तत्रापि द्वित्वावच्छिन्नाधेयत्वस्य संसर्गत्वे कर्मत्व-स्याव्यासज्यवृत्तितया घटावानयति चैत्र इति प्रयोगप्रामाण्यानुपपत्ति**र्द्वित्वो**-पलक्षिताधेयत्वमात्रस्य संसर्गत्वे त्वेकघटमात्रकर्मकानयनेऽपि तथा प्रयोगप्रामाण्यप्रसङ्ग इति **चैत्र**कर्तृकानयनकर्मताव्याप्यद्वित्वीययथोक्त-सम्बन्धोपलक्षितप्रकृत्यर्थप्रतियोगिकमाधेयत्वं संसर्गो **बोध्यः । स च** घटद्वयानयन एवाबाधित इति नोक्त दोष इति सूचितम्।

इत्थमेव मासमधीते चैत्र इत्यत्र द्वितीयार्थाधिकरणतायां तत्तन्मासविशेषणतापन्नस्य तस्य तस्य दिनपर्याप्तत्रिंशत्वस्य कथमपि मासपदार्थतावच्छेदकस्य कस्यचिदेव चैत्रकर्तृकाध्ययनाधिकरणतात्वव्याप्यीभूत-तावदधिकरणतावृत्य**न्यतमत्व**रूपधर्मावच्छिन्नान्यूनानतिप्रसक्ततयावच्छेद-द्यावच्छेदकभावः संसर्गतया भासते इति **यत्किञ्चि**न्मासत्वावच्छिन्न-यथोक्तरूपानुगतीकृतमासवृत्यधिकरणताकाध्ययनकर्ता चैत्र इति शाब्दबोधान्न

न्यूनकालाध्ययने तथा प्रयोगो **भवति** त्वधिककालव्यापिन्यध्ययने **अत एव** व्याप्यधर्मोपादानम्।

तात्पर्यटीका

अबाधितत्वेऽपीति। द्वित्वाश्रयघटस्यैतद्देशवृत्तित्वेन यथाश्रुतं तादृशप्रत्ययवारणासम्भवादित्यर्थः। सम्बन्धविवक्षाप्रयोजनं दर्शयति। **एतद्देश**वृत्तित्व**व्याप्यस्यापी**ति। **अव**लीढत्वोक्त्या चेति सूचितमित्यग्रेतनेनान्वयः। **चैत्रकर्त्तृकेति** चैत्रकर्तृकानयनकर्मताव्याप्यं यद्द्वित्वं तदीयो यथोक्तः सम्बन्धो नाम प्रकृत्यर्थतावच्छेदकव्याप्यपर्याप्तिरूपः सम्बन्धस्तदुपलक्षितो यः प्रकृत्यर्थ-स्तत्प्रतियोगिकमाधेयत्वमित्यर्थः। चैत्रो यदैकघटमात्रमानयति तदा चैत्रकर्तृकानयनकर्मताव्याप्यद्वित्वाप्रसिद्धे**र्यदि** च घटपटावानयति **तदापि** तादृशद्वित्वस्य यथोक्तसम्बन्धाप्रसिद्धेर्यदि पुनर्घटद्वयमानयति तदा घटद्वयवृत्ति यथोक्तद्वित्वस्य यथोक्तसम्बन्धो घटत्वव्याप्यपर्याप्तिस्तदवच्छिन्नवृत्तित्वं यद्यप्यानयनकर्मतायां कस्याञ्चिदपि नास्ति कर्मत्वस्याव्यासज्यवृत्तित्वात्**तथापि** तदुपलक्षितघटद्वयाधेयत्वस्य प्रत्येकं तत्र कर्मत्वेऽप्यबाधितत्वादस्य प्रामाण्यमपि सूपपदमित्याह। **स च** घटद्वयानयन एवेति। **नैकस्य** दुहितृद्वयमित्येतदेकस्यां जीवन्त्यां द्वितीयां न दद्यादित्येवं व्याचक्षाणस्य प्रयोगपारिजातकर्त्तुरप्ययमेवाशय उन्नीयते द्वयोरेककालिकत्वे एव तादृशद्वित्वप्रसिद्धेः।

चैत्रकर्त्तृकानयनकर्मतात्वस्यान्वयितानवच्छेदकत्वेऽपि पदोपस्थित-यावदर्थानां कथञ्चिद्विशेषणविशेष्यभावापन्नानां धर्मस्य संसर्गघटकत्वे बाधकाभावा**द्यथा** चैवमन्वयितानवच्छेदक ते मनपाकत्वावच्छिन्नविशेषणतया मैत्रान्यसमवेतभविष्यत्कृतिविषयत्वव्यवच्छेदबोधसम्भवादिह भवनं मैत्रेणैव पक्ष्यते ते मनमित्यादिदीधितौ तादृशबोधासम्भवकथनस्य नासङ्गति**स्तथा** प्रपञ्चितमधस्तात्। **इत्थ**मेवान्वयितानवच्छेदकावच्छिन्नत्वस्य संसर्गघटकत्व-सम्भवेनैव। **कथ**मप्युपलक्षणीभूतबुद्धिविषयत्वादिना। **अत** एवाधिककालव्या-पिन्यध्ययने मासमधीत इति प्रयोगस्येष्टत्वादेव। **व्याप्यधर्मो**पादानमिति। **अन्यथा** चैत्रकर्त्तृकाध्ययनाधारतात्वावच्छिन्नान्यूनानतिरिक्तवृत्तितयेत्येव ब्रूया**त्तथा**

सत्यधिककालव्याप्यऽध्ययनेऽध्ययनाधिकरणताया अतिरिक्तवृत्तेर्मासत्वानवच्छिन्नतया तथा प्रयोगानुपपत्तेरिति भावः ।

चषकम्

अत एव च मासाधिककालव्यापकहोमस्य शास्त्रार्थत्ववारणायोपसद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोतीत्यादौ होमान्तरविधा**वेकपदो**पादानं **सङ्गच्छते। तेन** तादृशाधिकरणतात्वसमव्याप्तधर्मावच्छिन्नान्यूनानतिप्रसक्तिरेवात्रावच्छेद्यावच्छेदकभावे तन्त्रतया विवक्षितेति गम्यते। **अन्यथा** यावज्जीवप्राप्ताग्निहोत्रानुवादेनोपसद्होमपूर्वकत्वमात्रविधित्वनिराकरणं न स्यात् **सिद्धान्ते** तु तावन्मात्रकालस्याप्यप्राप्ततयोभयविधाने वाक्यभेदो मा भूदिति तदुभयविशिष्टकर्मान्तरविधित्वमावश्यकम्। **तदुक्तम्**–

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः।
अप्राप्ते तु विधीयन्ते बहवो प्येकयत्नतः।।

इति। **यद्वा**ध्ययनाधारत्वे द्वितीयार्थे तत्तन्मासविशेषणतापन्नतन्मासत्वव्यक्तीनां व्यापकतासंसर्गेण विशेषणत्वमुपगम्यते। व्यापकत्वञ्च प्रतियोग्यनधिकरणमासत्वाधिकरणदिनवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्।

स च धर्मः स्ववृत्तित्वस्वनिरूपकाध्ययनकर्तृनिष्ठभेदप्रतियोगिकर्तृकर्तृकाध्ययनाधारतावृत्तित्वोभयसम्बन्धेनाधारताविशिष्टान्यो ग्राह्य इत्येककर्तृकाध्ययनाधारतात्वादिरेव तथैतल्लाभायैवात्राध्ययन**पदम्।**

अतो मासमधीयानो दृष्ट इत्यादौ विशिष्य चैत्रत्वाद्यनुपस्थितावपि **नान्वयबोधानुपपत्तिरेवमन्यत्रापीति न विधेयानन्त्यम्। नापि** त्रिशंद्दिनेषु त्रिशंत्कर्तृकहोमेऽनुष्ठितशास्त्रार्थतत्यस्त्वप्रासङ्गिकम्।

तात्पर्यटीका

यत्र चाधिककालव्याप्तिरनिष्टा तत्राधिककालव्याप्तिनिवृत्तये विशेषणान्तरमावश्यकमित्याह**अत एव** चेति। **एकपदोपादानमिति।**

क्वचिदप्युपलभ्यमानशाखायामेकपदानुपलम्भेऽप्यूर्जोवरुद्ध्या इति वदन्त शाखं वेदं क्वचिच्छाखान्तरं तथा पाठाभिप्रायेणेदम्। **किं वा** विवक्षितैकत्वार्थ-कैकवचनोपादानमित्यर्थकमेवैतत्। **अन्यथा**धिककालव्याप्तेरपि शास्त्रार्थत्वे। **नन्वेवं** चैत्रत्वाद्यनुपस्थितौ यथोक्तानुगतरूपानुपस्थित्यावच्छेद्यावच्छेदकभावो दुर्ग्रह इति शाब्दबोधानुपपत्तिमाशङ्क्य पक्षान्तरमाह। **यद्वेति**। स च धर्म एककर्तृकाध्ययनाधारतात्वादिरेवेति योजना। **अत्र** यद्वा पक्षे।

प्रतियोग्यनधिकरणतत्तन्मासत्वाधिकरणदिनवृत्यभावप्रतियोगितानवच्छेदकैक-कर्तृकाध्ययनाधारतात्वावच्छिन्ननिरूपकाध्ययनकर्त्तेति शाब्दबोधसम्भवम-भिप्रेत्याह। **नान्वयबोधानुपपत्तिरिति। अन्यत्रापि** मासमेकमग्निहोत्रं जुहोतीत्यत्रापि। चैत्रकर्तृकहोमाधारतात्वेनैव व्यापकत्वोक्तौ चैत्रादिभेदभिन्नं विधेयानन्त्यमप्यत्र न भवतीत्**याह न** विधेयानन्त्यमिति। होमाधारतात्वेनैव व्यापकत्वमुच्यतां किमाधारताविशिष्टान्यत्वविवक्षयेत्यत आह **नापीति**। **नन्वेव**-मप्येकदिनमात्राध्ययने मासमधीत इति प्रयोगवारणमशक्यं तदाधारताया अपि तदाधारता मासत्वान्यतरत्वेन मासत्वव्यापकत्वादतदन्यतरत्वस्य निरुक्तोभयसम्बन्धेनाधारताविशिष्टान्यत्वाच्च। **न च** स्वनिरूपकाध्ययन-कर्तृककर्तृकाध्ययनाधारतात्वावच्छिन्नभिन्नावृत्तित्वमेव द्वितीयः सम्बन्धोऽस्तु **तथा** चाधारताविशिष्टमेवोक्तान्यतरत्वमिति तद्व्युदास इति **वाच्यम्**। तत्कर्तृकाध्ययनाधारतात्वापेक्षया स्वनिरूपकाध्ययनकर्तृककर्तृकाध्ययनाधारतात्वस्य गुरुणोऽभावप्रतियोगितानवच्छेदकतया तथा वक्तुमशक्यत्वाद**त** एव तादृशकर्तृभिन्नकर्तृकेत्याद्युपेक्षितमत आहा**स्त्वप्रासङ्गिकमिति**। प्रसक्तानुप्रसक्तमित्यर्थः **तथा** चाध्ययनाधारतान्यावृत्तित्वेनापि धर्मस्य विशेषणीयत्वेनापि मासत्ववृत्त्युक्तान्यतरत्वस्य वारणमिति भावः ।

चषकम्

न चाघटद्वयवत्यत्र घटोऽस्तीति प्रत्ययः। एकत्वावच्छिन्नोद्देश्यताक-बुद्धावुद्देश्यतावच्छेदकैकत्वस्य विधेये स्वाश्रयप्रकृत्यर्थवृत्तित्व-स्वावच्छिन्नभेदाश्रयप्रकृत्यर्थावृत्तित्वोभयसम्बन्धेनान्वयस्याभ्युपगमादित्यादि।

सर्वत्र पञ्चपूलीत्यादौ। **तत्तदर्थे** पञ्चपूलसमाहारे जनकदम्पत्योः। स्त्रीजनकदम्पत्योरेकजन्यस्त्रीपुरुषयोर्जन्यस्त्रीपुरुषयोश्च समाह्रियमाणद्वारा समाहारस्याप्यानयनादिक्रियान्वययोग्यताक्षतैवेत्याशयः। **यदि** च पाणिपादमित्यादिसमाहारे द्वन्द्वेऽपि समाहारो यदर्थोऽनुभूयतेऽ**न्यथै**कप्रियेऽपि वाक्त्वा **च** प्रिय इति प्रयोगापत्तिरिति विभाव्यते **तदा** द्वन्द्वपदमितरेतरद्वन्द्व परमिति **बोध्यम्**।

तात्पर्यटीका

एकघटवत्यत्र घटावितिप्रयोगवारणप्रकारं प्रदर्श्य घटद्वयवत्यत्र घटोऽस्तीति प्रयोगवारणप्रकारमपि दर्शयितुमाह। **न चेति**। उद्देश्यतावच्छेदकै**कत्वस्येति**। इदञ्चोद्देश्यतावच्छेदकस्य स्वातन्त्र्येण विधेये भानमभ्युपगम्योक्तम्। **तदनभ्युपगमे** तूक्तोभयसम्बन्धे न तादृशोद्देश्यतावच्छेदक-विशिष्टमनुयोगिताविशेषरूपमाश्रयत्वं विधेयस्य संसर्गो **बोध्यः**। **केचित्तु** सजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्यैकवचनार्थत्वादुक्तप्रयोगवारणम्। **साजात्यञ्च** स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेण **स्वमेकवचनं** तत्समभिव्याहृतमस्तिपदं तदर्थएतद्देशास्तित्वं तत्संसर्गित्वविशिष्टं प्रकृत्यर्थतावच्छेदकं तादृशं घटत्वं तेनेत्यर्थ इति **वदन्ति**। **तच्चिन्त्यम्**। पशुना यजेतेत्यत्र यागीयपशुत्वेन साजात्ये विवक्षितेऽपि सर्वे नानायागीयाः पशवस्तथेति तन्निष्ठभेदप्रतियोगितानवच्छेदकैकत्वाप्रसिद्धेः। **अन्ये** तु पशुना यजेतेत्यादौ वेदे विशिष्टान्वयबलादेकत्वविशिष्टपशोर्यागेऽन्वये एकत्वस्यापि स्वाश्रयपशुकरणकत्वस्वावच्छिन्नभेदाश्रयपशवकरणकतवोभयसम्बन्धेन तत्रान्वयान्नानेकपशुकरणकयागाददृष्टसिद्धिरि**त्याहुस्तत्**सर्वमभिप्रेत्योक्त-मित्यादी**ति**।

सम्बन्धितया पुरुषे विवक्षिते स्त्री**त्युक्तं** स्त्रियां तथा विवक्षितायां पुमिति **बोध्यम्** । कस्य पितरौ श्वशुरौ पुत्रावितिवत् कस्य भ्रातराविति जिज्ञासानुदयात् ससम्बन्धिकत्वव्युदासायै**केति**। योह्युभयोरिति न्यायादेकदम्पती इत्यर्थः। **इत्थ**ञ्चैकपितृजन्ययोर्वैमातृकयोरेकमातृजन्ययोर्द्विपितृकयोश्च तथा

व्यवहारस्य गौणत्व**मत** एव पितृपत्न्यः सर्वामातर इत्यतिदेशः पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमा इति पर्युदासश्चोपपद्यते इति **बोध्यम्**। **अपदार्थ** इति। **अत्रा** पिरनुषज्यते। तथा च समासघटकपदाप्रतिपाद्योपीत्यर्थः **नव्यास्तु** समाहारद्वन्द्वेऽपि पाणिः पादश्च बुध्यते न समाहारोऽपि **प्रत्येक**मेकत्वान्वयः **साधुत्वार्थं** वैकवचनम्। समाहारसंज्ञा च नित्यैकवचनक्लीबत्वादिपदसंस्कारार्था यत्रैकत्वं नपुंसकत्वञ्च द्वन्द्वश्च **प्राणितूर्यसेनाङ्गानामित्यादिसूत्रेणोक्तं** तत्रैवेत्यतोऽन्यत्रेकवचनमसाध्विति वा **क्षमार्जवदयातोषसत्यं पीयूषवद्भजेदि**त्यादि प्रयोगदर्शनादेतेषां द्विवचनमसाध्विति वा लभ्यत इति **वदन्ती**त्यतो यदि **चेत्युक्तम्**। **अन्यथा** समाहारबोधानभ्युपगमे। **प्रयोगापत्तेरिति** इष्टापत्तिस्तु न सहृदयानामौचितीमावहतीति **दिक्** ।

तर्कामृतम्

एवं नञर्थोऽभावः

चषकम्

यद्यपि राजपुरुष इत्यादौ भेदान्वयबोधोऽपि सम्भवति निपातस्येव समासघटकपदस्यापि भेदेन नाम्नस्तत्र व्युत्पत्तौ विशेषणा**त्तथापि** क्वचित्समासे पूर्वपदलक्षणाप्यावश्यकी **यथो**त्तरपदार्थान्वितपूर्वपदार्थमुख्यविशेष्यकबोधजनके नञ्समासे **परन्त्व**सौ **न** **सामर्थ्यो**पपादिकेत्यन्यदेतत्। **अन्यथो**त्तरपदार्थान्वितपूर्वपदार्थप्रधानस्यास्य समानविभक्तिकपदान्तर-सामानाधिकरण्यानुपपत्ते**रेवं** तत्र समासप्रकृतिकविभक्त्यर्थान्वयोपपत्तये **व्युत्पत्तिवै**चित्र्यकल्पनापीति **दर्श**यिष्यन् पूर्वपदस्य नञो **मुख्यार्थं विवे**चयति। **एवमिति** राजपुरुषइत्यादाविवेत्यर्थः। समासघटकस्य पूर्वस्यापि पदस्य नञो घटभिन्ने लक्षणेत्यग्रि**मेणान्वयः** ।

नन्वेवं भूतले न घट इत्यादावुत्तरस्यापि घटादिपदस्य तदुत्तरविभक्तेरेव वा तत्प्रतियोगिके प्रतियोगित्व एव वा लक्षणामभ्युपेत्याभे**दाद्यन्**वयबोध एव त्वया वाच्यो विरुद्धविभक्त्यनवरुद्धत्वाविशेषादिति तत्र भेदान्वयोपपत्तये नामार्थयोरितिव्युत्पत्तौ निपातातिरिक्तत्वमनर्थकं भूतलघटाभावयोरपि सप्तम्यर्थाधेयत्वद्वारान्वयसम्भवात्। **न चैवं** प्रथमान्तार्थस्य मुख्य विशेष्यत्वं व्याहन्येतेति **वाच्यम्**। तस्य विशेषणतया भासक-निपा**तादि**घटितसामग्र्यसमवधान एव तथात्वं **तत्सम**वधाने तु निपाताद्यर्थस्येत्यभ्युपगमात्। **प्रपञ्चितं** चेदमधिकमधस्तादत आह **नञ** इति। **असमस्तस्य** नञ: प्रतियोग्यनुयोगिभ्यां भेदेनापि सम्भवादाकाङ्क्षस्यार्थो मुखोऽर्थोऽभाव: **संसर्गा**भावोऽन्योन्याभावश्चाभूतले न घटो घटो न पट इत्यादौ तेन-तेन रूपेण तत्तदभावान्वयबोधा**ल्लाघवा**च्चात एव तत्सादृश्यादौ तेन-तेन रूपेण बोधेऽपि लक्षणैव।

तात्पर्यटीका

सामान्येनोक्तमर्थं विशेषे घटयति। **यथेति**। **न सामर्थ्योपपादिकेति**। **पूर्वपदार्थप्रधानबोधजनकस्यास्य** समासस्य पूर्वपदलक्षणाया उत्तरपदार्थान्वयबोधानुपयोगित्वात् **सम**स्यमानपदार्थान्वयस्यैव सामर्थ्यतया तदुपयोगिन्या एव पूर्वपदलक्षणाया एव तथात्वादिति भाव:। **व्युत्पत्तिवैचित्र्य** कल्पनेति अन्यत्र प्रकृत्यर्थे विभक्त्यर्थान्वयेऽप्यत्र प्रकृत्येकदेशरूपपूर्वपदार्थेऽपि तदन्वय इत्येव कार्यकारणभावकल्पनेत्यर्थ:। **दर्शयिष्यन्न** घटो भूतलमित्यादौ घटभिन्नेति ग्रन्थेन दर्शयिष्यन्। **मुख्यार्थ**मिति। मुख्यार्थापरिचये मुख्यार्थसम्बन्धरूपलक्षणाया अवधारणस्यानिष्पत्तेरिति भाव:। **विवेचयतीति**। **एतेना**प्रसक्त नञर्थप्रतिपादनकैमर्थ्यचिन्ता परिहृता।

अभेदादीत्यादिना विभक्त्यर्थद्वाराभेदान्वयबोधपरिग्रह:। **निपातादीत्या-दिना** नीलो घट इत्यत्र विशेष्यपदस्य पश्य मृगो धावतीत्यत्र दृशिक्रियायाश्च परिग्रह:। **नन्वेवं** घटस्याभाव इत्यत्रेव षष्ठीप्रसङ्ग इत्यत आह। **प्रपञ्चितं**

चेदमिति। नामनिपातार्थयोः संसर्गतयाऽपि प्रतियोगित्वस्य भानसम्भवान्न षष्ठीत्युक्तमित्यर्थः। **अधस्तादिति**। प्रकृतिविकृतिंकर्मप्रसङ्ग इत्यर्थः। समस्तस्य नञो लाक्षणिकतया वक्ष्यमाणत्वात् पूरयति। **असमस्तस्येति**। **संसर्गाभावो**ऽन्योन्याभावश्चेति। अत्र च संसर्गाभावत्वमन्योन्याभावत्वञ्च द्वयमप्यखण्डोपाधिरित्याशयोऽत एवाह लाघवाच्चेति। **न च** संसर्गारोपजन्यप्रतीतिविषयाभावत्वमेवं तादात्म्यसम्बन्धावच्छिन्न-प्रतियोगिताकाभावत्वं तत्तदस्त्विति **वाच्यम्**। सर्वसाधारणसम्बन्धत्वे मानाभावा**दन्योन्याभावे**ऽतिव्याप्तेश्च। तादात्म्यत्वस्य दुर्वचत्वेन संयोगग्यत्यन्ताभावेऽतिव्याप्तेश्च।

चषकम्

अयं भाव प्रागुक्तविशिष्टलाक्षणिकपदघटितकर्मधारयाद्राजसम्बन्ध्यभेद-बोधस्य सर्वानुभवसिद्धस्य लाघवेन तत्पुरुषेप्युपपत्तये तत्र लक्षणावश्यकीह **तु** प्रकृतवाक्यादभेदबोधानुभवाभावद्भेदान्वयबोधाभ्युपगमे गौरवाद्यभावाच्च नोक्तयुक्त्या लक्षणावश्यकी। **प्रत्युत** घटपदस्य घटप्रतियोगिके लक्षणाग्रहे घटो नास्तीति वाक्यं तु घटप्रतियोगिको नास्तीति वाक्येन समानार्थकमेव स्या**त्तस्मात्सिद्धमत्र** भेदान्वयबोधेन। **विरुद्ध**विभक्त्यनवरुद्धत्वं त्वभेदान्वयस्य व्यावर्त्तकधर्मदर्शनाभावरूपं बाधकाभावमात्रं न तु साधकमपीति सुष्ठूक्तं दृष्टव्युत्पत्तौ घुष्टप्रयोजनकं निपातातिरिक्तत्वं **विभ**क्तिलक्षणापक्षेऽपि भूतले न घट इत्येतद्वाक्यजन्यबोधस्य ग्राह्याभावानवगाहनाद्भूतले घट इति वाक्यजन्यबोधाविरोधित्वापत्तेः। **किञ्च** नञ्पदं विना यत्र धर्मिणि येन सम्बन्धेन यद्वत्त्वं यादृश-यादृशवाक्यात् सप्तमी समभिव्याहृतात्तद-समभिव्याहृताद्वा प्रतीयते तादृशेतादृशे वाक्ये नञ्समभिव्याहारे तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकस्तदभावोऽपि **तथैव** नञा बोध्यते। **नान्यथा**।

तदुक्तम्। प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमाविति। तस्यार्थः। योगोऽक्लृप्ताभ्यागमः क्षेमः सिद्धाङ्गीकारस्तुल्यौ तौ ययोस्तादृशौ

प्रतियोग्यभावान्वयौ प्रतियोगिना प्रतियोग्यन्वयेन प्रतियोग्यधिकरणान्वयेनेति यावदभावान्वयौ प्रतियोग्यभावयोरभावाधिकरणयोश्चान्वयाविति। **तथा** हि भूतलं घट इत्यत्र विना सप्तमीमक्लृप्तो भेदसम्बन्धेन भावान्वयश्चैत्रः पचतीत्यत्र यथा कल्प्यते **तथा** भूतलं न घट इत्यत्राक्लृप्तः संसर्गाभावान्वयश्चैत्रो न पचतीत्यत्र कल्प्यते। **सर्वाणि** खलु भूतले घट इत्यादीनि वाक्यानि भेदेन सप्तम्यर्थाधेयत्वान्वयं बोधयितुमीशत इति **चेदु**दारः कल्पः स एव भूतले न घट इत्यादीन्यापि **तस्य तथैव** संसर्गाभावञ्च बोधयन्तीत्यस्माभिः परिपाल्यत इत्यस्याप्युक्तार्थ एव पर्यवसानात्। **तदुक्तम्**। नामार्थस्य नञाभावबोधने सप्तम्यपेक्षिता **न तु विभक्त्यर्थस्येति। तस्मात्**प्रकृते सप्तम्यन्तार्थभूतलवृत्तित्वाभावस्य नञर्थस्य घटेऽनुयोगिन्यनुभवसिद्धान्वयोपपत्तये। **एवमिदं** न चैत्रस्य चैत्रो न पचतीत्यादौ चैत्रस्वत्वाभावस्य पाककृत्यभावस्य च नञर्थस्यास्मिंश्चैत्रे चान्वयोपपत्तये। **एवं** घटो न पट इत्यादौ पटभेदस्य नञर्थस्य घटेऽन्वयोपपत्तये च तदावश्यकम्। **नञो**ऽभाववति लक्षणाऽभ्युपगमे तु मुख्यार्थपरताविलयप्रसङ्गात् **विशिष्टशक्तौ** गौरवान्मानाभावाच्च।

तात्पर्यटीका

अयं भाव इति **बहु**व्याकोपापत्तिरित्यादिरित्यत्रा**ऽन्वेति**। विशिष्टलक्षणाग्रहेऽप्यत्र भेदान्वय एवानुभाविक इत्याह। **प्रत्युतेति**। **ननु** घटधर्मिकभूतलवृत्तित्वग्रहे घटाभावधर्मिकभूतलवृत्तित्व ग्रहोऽपि विरोध्येवात एव रूपं तदभावो वा वायाविति बुद्धिसाधारण्यं संशयत्वस्यामनन्तीत्यतः **किञ्चेति**। **तथैव** सप्तमीसमभिव्याहारे तदसमभिव्याहारे वा। **नान्य**था- सप्तमी समभिव्याहारसाकाङ्क्षप्रतियोग्यन्वयबोधकवाक्यादपि तां विना।

तस्य सप्तम्यर्थाधेयत्वस्य। **तथैव** सप्तमीसमभिव्याहारे एव। अस्त्वभाववानेव मुख्यो नञर्थ **इत्यतो विशिष्टेति**। **ननु** प्रामाणिकं गौरवं न दोषायेत्यत आह **माना**भावाच्चेति। नञर्थान्वयस्तु भेदेनापि सम्भवन्न विशिष्टशक्तिसाधनायालमिति **भावः** ।

तर्कामृतम्

'अघटं[1] भूतलम्' इत्यादौ घटभिन्ने लक्षणा[2]। 'न कलञ्जं भक्षयेत्' इत्यादौ बलवदनिष्टजनके[3] लक्षणा।

तरङ्गिणी

अघट इति। उद्देश्यविधेयभावेनान्वयबोधे समानलिङ्गकत्वस्यानियामकत्वादघटो भूतलमित्युक्तिः। संसर्गाभावबोधनेऽव्ययीभावसमासेनाघटमित्यव साध्विति- बोधनायैवमुक्तिः। तत्र च लक्षणा। अव्ययीभावस्याव्ययत्वेन भेदनाप्यन्वयबोधस्य व्युत्पन्नत्वादिति ध्येयम्। **न कलञ्जं भक्षयेदितीति।** नञ इत्यनुषज्यते। **बलवदनिष्टजनकत्वे लक्षणेति।** लक्षणायां विधिसमभिव्याहारो नियामकः। **इत्यादाविति।** आदिपदेन ज्वरितो नान्नमश्नीयादित्यादेः सङ्ग्रहः। एतेन कलञ्जभक्षणे कृतिसाध्यत्वे सबलवदनिष्टाननुबन्धीष्टसाधनत्वाभावबोधने प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभङ्ग इति निरस्तम्।

चषकम्

किञ्च धर्मिणि तदभावस्यैव लाघवेन तद्वत्त्वविरोधितया विशिष्टलाक्षणिकनञर्थबाधस्य तद्विरोधिताप्येवं सति न स्यादिति बहुव्याकोपापत्ति**रित्यादिः** । समासघटकनञस्तु समासस्य समानविभक्तिकपदान्तरसामानाधिकरण्याद्यनुभवबलेन विशिष्टलक्षणावश्यकीत्याह। **अघटो भूतलमिति। घटभिन्न इति।** लक्षणेत्यग्रिममत्रानुषज्यते। **अत्रा**घटमित्युक्ते घटस्याभाव इत्यर्थेऽव्यभीभावस्याव्ययतयापि भेदान्वयसम्भवाल्लक्षणानर्थक्यम्। उच्चैश्चैत्र इत्यत्राधाराधेयभावसम्बन्धेनान्वयबोधात् स्वश्चैत्र इत्यत्र

---

१. 'अघटो' इति पाठान्तरम्।

२. 'लक्षणा' इति पाठः नास्ति।

३. 'नमकत्वं' इति पाठान्तरम्।

तथान्वयबोधाभावात् कतिपयाव्ययातिरिक्तत्वस्य तवाप्यावश्यकत्वाद**घटो** भूतले इत्युक्ते सप्तम्यर्थान्वयेनोपपत्तिः स्यादिति भिन्नलिङ्गयोरुद्देश्यविधेयभावः समाश्रितः। **क्वचिद्व्यासेऽपि निरूढलक्षणया** नञो गौणार्थतां दर्शयति। **न कलञ्जमिति**। चैत्यवन्दने बलवदनिष्टजनकत्वं विवादाच्चैत्यं न वन्देतेत्यस्य परित्यागः।

कष्टं कर्मेति न्यायात् सामान्यतोऽनिष्टजनकत्वग्रहेऽपि प्रवृत्तिसम्भवादुक्तं **बलवदिति**। इष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तदुःखजनकत्वे इत्यर्थः। **परिष्कृतंः** चैतदधस्तात्। लक्षणा नञ इत्यनुवर्त्तते। **एतेना**घट इत्यत्रोत्तरस्य घटपदस्यैव लक्षणा पूर्वपदं तात्पर्यग्राहकमिति शङ्काप्यपा**कृता**। तथा सति घटपदस्येत्यनुक्त्या न्यूनपदत्वापत्तेरध्याहारापेक्षयानुवृत्तेर्लघुत्वात् सम्भवदन्वितार्थ- कस्य तात्पर्यग्राहकत्वायोगाच्च। **न चैवमत्र** न सर्प इत्यतो बलवदनिष्ट- जनकोऽत्र सर्प इति विपरीतान्वयबोधापत्तिरिति **वाच्यम्**। विधिसमभिव्याहृतनञ एव तादृशलक्षणाङ्गीकारात्। **एतेन** यो धात्वर्थे प्रागुक्तविध्यर्थत्रितयस्य प्रत्येकमभावस्य बोधनासम्भवोऽननुगमात् कूटस्य सर्वत्रासम्भवा**द्योपि** विशिष्टे शक्तिमभ्युपेत्य तदभावबोधनेऽपि प्रत्ययानामिति व्युत्पत्तिभङ्गाविशेषः स परिहृत इति विदाङ्**कुर्वन्तु**।

तात्पर्यटीका

ननु न तस्माच्चैत्रस्येत्यादौ षष्ठ्यन्तार्थे चैत्रस्वत्वे पञ्चम्यर्थ- तज्ज्ञानज्ञाप्यत्वस्याभावबोधकस्यैव नञो मुख्यार्थकस्य प्रसिद्धिः सम्भवतीत्यतो दोषान्तरमाह। **किञ्चेति**। धर्मिणि घटे तदभावस्यैव भूतलवृत्तित्वाभावस्यैव। न तु भूतलवृत्तित्वाभाववदभेदस्येत्येवकारार्थः। तद्वत्त्वविरोधितया। भूतलवृत्तित्वप्रकारकग्रहविरोधितया। निम्नविषयकानुमितिप्रतिबन्धक- (शाब्देत्यादि) सामग्र्यां विशिष्टविषयकोपस्थितिनिवेशे गौरवमि**त्यादिरित्यादि** पदार्थः। सामानाधिकरण्यादीत्यादिना प्रागुक्तस्य प्रकृत्येकदेशार्थे विभक्त्यर्थान्वयानुभवस्य परिग्रहः ।

क्वचिदिष्टोत्पत्तिनान्तरीयकदुःखाप्रसिद्धिमभ्युपेत्याह **परिष्कृतञ्चेति**। इष्टोत्पत्यनान्तरीयकदुःखाजनकत्वं तदर्थ इत्युक्तमित्याशयः। **एतेन**नानुवर्त्तनेन।

तथा सति घटपदस्य लक्षणाया अभिप्रेतत्वे सति। **न्यूनपदत्वापत्तेरिति**। नञस्तु प्रकरणादेव लाभ इत्याशयः **ननु** नञोऽनुवृत्तिः प्रकृते न युक्ता न कलञ्जं भक्षयेदित्येतद्वाक्यसाकाङ्क्षस्य तस्य मण्डूकप्लुत्या तस्यां मानाभावेन गङ्गास्रोतोवदसौ वक्तव्या तथा सति पूर्ववाक्येऽघट इत्यत्र नञोऽभाववल्लाक्षणिकत्वेन घटस्यैकदेशान्वयप्रसङ्गादित्यत **आह सम्भवा**दिति तथा च तादृशव्युत्पत्तिङ्कोचस्य बहुशो दृष्टत्वान्न दोष इति भावः। **एतेन** नञो बलवदनिष्टजनकत्वे लक्षणाङ्गीकारेण। विशिष्टशक्तेरधस्तात् खण्डनेनाभ्युपेत्येत्युक्तम्।

चषकम्

कथं तर्हि वृक्षंवृक्षं प्रति सिञ्चतीत्यत्र कर्मप्रवचनीयप्रत्यर्थव्यापकताया वृक्षविशेषितायाः कर्मत्वे **भानमिति चेत्त**त्र व्यापकत्वतात्पर्यक-वीप्साबलाद्वृक्षस्यैव कर्मत्वे तेन सम्बन्धेनान्वयः **प्रति**रनर्थकः। **कर्म**प्रवचनीयसंज्ञा **तूप**सर्गसञ्ज्ञाबाधेन षत्वासाधुत्वाया**न्यथा** द्वितीयार्थकर्मत्वे विशेषणतयान्वितस्य वृक्षस्य प्रत्यर्थव्यापकत्वेऽन्वयो दुर्घटः स्यात्। **प्रति**वृक्षमित्ययीव्यभावोत्तरं द्वितीया तु न भवत्येव येन प्रकृत्यर्थस्य द्वितीयार्थावरुद्धस्य प्रत्यर्थान्वयो वार्येत। **उप**कुम्भेनोपकुम्भादुपकुम्भे इत्यत्र तूपपदं **तात्पर्य**ग्राहकमेवो**क्तम्**।

किञ्च विभक्तिप्रकृतिभूतसामसघटकोत्तरपदार्थान्वितपूर्वपदार्थस्य समासप्रकृतिकविभक्त्यर्थेऽप्याधेयतया त्वन्वये न काचिदपि व्युत्पत्तिर्विरुध्यते। **प्रति**गृहेऽश्वा इत्यत्र तु व्यापकस्य व्यापकत्वस्य वा प्रत्यर्थस्य नञर्थातिरेकिणः समासरूपप्रकृत्यर्थस्याभेदेनाश्रयतया वा सप्तम्यर्थाश्वाधिकरणतायामन्वयो न व्युत्पन्न इति न तथाविधाः प्रयोगाः । **कुतो**ऽन्यथा घटवृत्तौ घटो मेयत्वे घट इति वा न प्रयुञ्जते सप्तम्यर्थाधिकरणतायां घटवृत्यभेदस्य मेयत्वाश्रयतायाश्चाबाधितत्वात्।

न च नानुपमृद्य प्रादुर्भावादिति शून्यवादिमतानुसारि **सूत्रे** पञ्चमीप्रातिपदिकार्थयोरप्यन्तराले नञर्थस्य भानाङ्गीकारादा**ख्याता**र्थसङ्ख्यादेः प्रथमान्तार्थ एव चान्वयोपगमाच्चोक्तव्युत्पत्तिसङ्कोचस्यावश्यकतेति **वाच्यम्**।

क्वचित्सङ्कोचे**ऽप्यत्र तेन** विनाप्युपपत्तिरित्याशयात्। **सुपामेवनञ्-प्र**कृत्यर्थान्यतरेणैव वा स्वार्थान्वयबोधकतेत्यङ्गीकारेऽपि बलवदनिष्टजनकत्वज्ञानप्रतिबन्धकतामते **तदावश्यकत्वाच्चेति दिक्**।

तात्पर्यटीका

तर्हि प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधजनकत्वनियमाङ्गीकारे। **भान**मिति। वृक्षकर्मत्वयोरन्तराले प्रत्यर्थभानाङ्गीकारेणोक्तनिममङ्गस्यावश्यकत्वादिति भावः। **ननु** कारकसंज्ञा यथा क्रियासाकाङ्क्षत्वस्य द्योतनाय तथा कर्मप्रवचनीयसंज्ञा कर्मसाकाङ्क्षत्वस्येति प्रतेरनर्थकत्वे संज्ञानर्थक्यमत आह **कर्म**प्रवचनीयसंज्ञा त्विति। **उपसर्ग**संज्ञाबाधेनेति। तत्सत्वे तु प्रतिसिञ्चतीत्यादावुपसर्गादिति सूत्रेण षत्वप्रसक्तेर्दुर्वारत्वादिति भावः। **अन्यथा** व्यापकत्वस्य प्रत्यर्थत्वाङ्गीकारे। अव्ययीभावसमासे यदि द्वितीया स्यात्तर्हि तदर्थान्वितवृक्षस्य प्रत्यर्थान्वयो न स्यात् सैव तु नास्तीत्याह **प्रतिवृक्षमितीति**। **नन्वेव**मुपकुम्भेनेत्यादौ करणत्वान्वितकुम्भस्य नोपपदार्थान्वयो नापि कुम्भान्वितोपपदार्थस्य करणत्वान्वय इति कथं शाब्दबोध इत्याकाङ्क्षायामा**होप**कुम्भेनेत्यादि। **तात्पर्य**ग्राहकमेवेति। तथा च कुम्भपदस्यैव कुम्भसमीपार्थे लक्षणायां तात्पर्यग्राहकमेव तदित्युक्तमित्यर्थः।

उपपदस्यार्थविवक्षायामपि न दोष इत्याह। **किञ्चेति** । **काचि**दपीति। कुम्भस्य करणत्वादावविशेषणत्वादुपपदस्य प्रकृत्येकदेशत्वानपायात् समीपस्य पदार्थत्वादाधेयतयैव च विभक्त्यर्थेऽन्वययोग्यत्वाच्चेति भावः। प्रतिगृहेऽश्वा इत्यत्र तु चरमव्युत्पत्तिर्विरुद्ध्यत इत्याह **प्रति**गृहेऽश्वा इत्यत्र त्विति। गृहस्य प्रत्यर्थव्यापकैकदेशे व्यापकत्वेऽन्वयमसहमान आह **व्याप**कत्वस्य वेति। **नञ**र्थातिरेकेण इति। तथा च नञर्थस्य विभक्तिप्रातिपदिकार्थयोरन्तरालेऽन्वयस्य वक्ष्यमाणत्वेऽपि प्रत्यर्थस्य तथाऽन्वयो न कस्याप्यभिमत इत्याशयः। **समास**रूपप्रकृत्यर्थस्येति। प्रकृत्येकदेशस्यापि प्रकृतित्वस्य स्वहस्तितत्वान्मास्तु प्रत्ययानामिति व्युत्पत्तिभङ्ग इति भावः। प्रकृत्यर्थस्य विभक्त्यर्थे आधेयतयैवान्वय इत्येतादृशव्युत्पत्तौ प्रमाणमाह **कुतो**ऽन्यथेति। **घट**वृत्यभेदस्येति **मेयत्वा**श्रयतायाश्चेति चोपलक्षणम्

घटवृत्यभिन्ना याधिकरणता तद्वत्त्वस्यैवं **मेयत्वाश्रयीभूता** याधिकरणता तद्वत्त्वस्य च घटे बाधितत्वादित्यपि **बोध्यम्**।

विशिष्टस्य विध्यर्थत्वेऽपि यः प्रत्ययानामिति व्युत्पत्तिभङ्गाविशेषः सोऽन्यत्रापि दृष्यते इत्याशङ्कते। **न चेति**। **नानुपमृद्येति**। बीजं विनाश्यैव यथाङ्कुरो जायते तथा परमाणुमविनाश्य द्व्यणुकं न भवेदिति शून्यवादप्रसङ्ग इत्यर्थः। **सूत्रे** न्यायसूत्रे। **ननु** नामूढस्येतिवन्नानुपमृद्येत्यपि समस्तमेकं पदमुपमृद्यैवेत्यर्थकमत आहा**ख्यातार्थ**सङ्ख्यादेरिति। **अत्र** विधिस्थले पदभेदभिन्ना व्युत्पत्तिः प्रकृते न कल्पनीयेत्यत आह **सुपामेवेति। सुपामेव प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिर्न तिङामपीत्याशयः**। सुपामपि नञर्थसाकाङ्क्षत्वमभ्युपेत्याह **नञ्प्र**कृत्यर्थान्यतरेणैव वेति। **तदावश्यकत्वाच्चेति**। तन्मते बलवदनिष्टाननुबन्धित्वधियो हेतुत्वानङ्गीकारेण प्रतिबन्धकज्ञानसम्पादनं विना निषेधविधेरर्थवत्त्वासम्भवादिति भावः। **दिगिति** दिगर्थस्त्वस्माकं निषेधविधितः साक्षात् प्रतिवृत्तिप्रतिबन्धकज्ञानसम्पत्तिर्भवतां तु कारणीभूतज्ञानविघटनद्वारेति।

तर्कामृतम्

क्रियासङ्गतस्य एवकारस्यात्यन्तायोगव्यवच्छेदोऽर्थः, यथा 'नीलं सरोजं भवत्येव।

तरङ्गिणी

क्रियासङ्ग तस्येति। आख्यातसमभिव्याहृतस्येत्यर्थः। आख्यातसमभिव्याहृतस्यैवेति यावत्। तथाचान्यसमभिव्याहृतस्य तस्य नैत्याद्बोधकत्वमित्यत्र तात्पर्यम्। तेन ग्रहणाध्ययनार्थकधातुसमभिव्याहारे गुणवद्द्रव्यं भवत्येवेत्यादौ च तद्बोधकत्वाभावेऽपि न क्षतिः। साम्प्रदायिकास्तु नीलाद्ययोगे सरोजादिनिष्ठाभावाप्रतियोगित्वव्यवच्छेद एवात्यन्तायोगव्यवच्छेद इत्याहुः। अत्यन्तायोगव्यवच्छेद इति। अत्यन्तं यो विशेष्ये विशेषणायोगव्यच्छेद इत्यर्थः। व्यवच्छेदेऽत्यन्तत्वं च सरोजादिनिष्ठाभावप्रतियोगिकत्वम्। भवति

हि नीलायोगः सरोजनिष्ठस्तत्प्रतियोगिकत्वं व्यवच्छेदे। शङ्खः पाण्डुर एवेत्यत्र पाण्डुरत्वायोगस्य शङ्खवृत्तित्वाभावान्न तद्व्यवच्छेदे आत्यन्तिकत्वम्।

चषकम्

नन्वेवं विरुद्धविभक्त्यनवरुद्धस्य भेदेनाप्यन्वयबोधे हरित्येकपदोपस्थितयोरश्व- सूर्ययोराधाराधेयभावेन **किम्वा** नेत्यतः सादृश्यभिन्नः संसर्गाभाव इत्यन्वयबोधापत्तिः।

निपातस्य नञोऽर्थानां सादृशयभेदसंसर्गाभावानां प्रतियोगित्वाधाराधेयभाव-सम्बन्धाभ्यामन्वयबोधसामग्रीसम्भवात्। **न चेष्टापत्तिः**। एकस्यैव सादृश्यस्य शुद्धसादृश्यत्वेन सादृश्यभिन्नसंसर्गाभावभिन्नसादृश्यत्वेनेत्यपरापरविष-यितानवस्थापातादिति तदर्थप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधे तद्भिन्नपदजन्योपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वे वाच्ये कथङ्कारं पार्थ एव धनुर्धर इत्यादावन्वयबोधो**ऽन्यतादात्म्या**भावस्यैवकारार्थत्वे प्रसिद्धेः सर्वस्यैवान्यत्वात्तादात्म्यापन्नत्वाच्च। **अन्य**स्तादात्म्यमभावश्चेति त्रितयस्य विशकलितस्य तदर्थत्वे पार्थस्यान्यस्मिन्नन्वयसम्भवेऽप्येकस्य तदर्थस्य पार्थान्यस्य तादात्म्ये तस्य वा धनुर्धरान्विताभावे परस्मिंस्तदर्थेऽन्व-यासम्भवादित्याशङ्क्यैवकारार्थं प्रपञ्चयति। **क्रियासङ्गतस्येति**। ग्रहणाध्ययनाद्यनर्थकक्रियाविशेषसङ्गतस्येत्यर्थः। **एव**कारस्येति बोध्य इत्यर्थकमर्थ इति चोत्तरत्राप्यनुवर्त्तते।

तात्पर्यटीका

एवं प्रतियोगिनो भेदसम्बन्धेन नञर्थेऽन्वये। **आधाराधेयभावेनेति**। अन्वयबोधापत्तिरित्यन्वयः। **नामार्थयोरिति व्युत्पत्तिभङ्गभयादाह। किम्वेति**।

निपातस्येति। तथा च तस्या व्युत्पत्तेर्निपातातिरिक्तत्वस्य निवेशेन सङ्कोचितत्वादेव नोक्तव्युत्पत्तिभङ्ग इति भावः। **विषयितानवस्थेति**। तेन सादृश्यभिन्नसंसर्गाभावभिन्नसादृश्यत्वेनेत्याद्यनन्तविषयताशालिबोध आपद्यते

इत्युक्तं **भवति**। **न चेद**मनुभवसाक्षिकमिति भावः। **इतिहैतौ**। **कथङ्का**रं कथं कृत्वा किं विधां सामग्रीसम्पत्तिं प्राप्येति यावत्। **तादात्म्ये** इत्यस्यापरस्मिंस्तदर्थे इत्यत्रान्वयः। **तस्य** पार्थान्यतादात्म्यस्य। **यथाश्रुते** ज्ञानं रजतं गृह्णात्येवेत्यादिप्रयोगापत्तिरूपवक्ष्यमाणदोषप्रसराद्व्याचष्टे **ग्रहणेति**।

चषकम्

तथा च पदभेदेन व्युत्पत्तेर्भेदान्नञर्थान्तर्भावेणावश्यकल्प्याप्युक्ता व्युत्पत्तिस्तादृशपदेष्वेव पर्यवस्यतां नाम न पुनः परस्परान्वितार्थकतयानुभूयमानेषु विसदृशेष्वेवकारादिष्वपि कल्प्येति न काप्यनुपपत्तिरित्याशयः। **अत्रेदं** बोध्यम् अन्योन्यान्वयि नानार्थकैवकारेण शंडशक्या क्वचिदयोगव्यवच्छेदः क्वचिदन्ययोगव्यवच्छेदः प्रत्यायत इत्यत्र **प्रपञ्चितम्**। अयोगव्यवच्छेदोऽपि सामानाधिकरण्येन प्रतीयमानोऽत्यन्तायो**गाव्यवच्छेद** इति परिभाष्यते सामानाधिकरण्येन तद्बोधे च धातुविशेषसमभिव्याहारो नियाभकस्तेन ज्ञानमर्थं गृह्णात्येव ब्राह्मणो वेदमधीत एवेत्यादौ सामानाधिकरण्येन तदप्रत्ययेऽपि न क्षतिरिति। **अत्यन्तायोगव्यवच्छेद** इति **केचित्तु** ज्ञानं रजतं गृह्णात्येवेति प्रयोगवारणायैवकारेणायोगव्यवच्छेदोऽवच्छेदकावच्छेदेनैव प्रत्यायत इत्युपेयमि**त्थञ्च** नीलं सरोजं भवत्येवेत्यपि प्रयोगो न स्यादयोग्यत्वादतोऽत्यन्तायोग इत्यादेरत्यन्तस्यायोगस्य व्यवच्छेद इत्यर्थः।

तन्निष्ठाभावाप्रतियोगी योऽयोगस्तस्य व्यवच्छेद इति यावत्। **न हि** रक्तसरोजे वर्तमानो नीलायोगः सरोजनिष्ठाभावाप्रतियोगी नीलसरोजनिष्ठाभावप्रतियोगित्वादित्यात्यन्तिकत्वरूपविशेषणाभावाद्विशिष्टस्य व्यवच्छेदो योग्य इत्यात्यन्तिकत्वमेवकारार्थान्तर्गतमेवेति **वदन्ति तन्न** समीचीनमाभाति। तथा सत्यपि ज्ञानं रजतं गृह्णात्येव नरो वेदमधीत एवेति प्रयोगापत्तेः **शूद्र**रजताविषयकज्ञाननिष्ठवेदाध्ययनरजतविषकत्वायोगस्य ब्राह्मणरजतविषयकज्ञाननिष्ठाभावप्रतियोगित्वेनोक्तयुक्त्या योग्यत्वानपायात्। **परन्त्व**त्यन्तं योऽयोगव्यवच्छेद इत्यर्थः। **आत्य**न्तिकत्वं तु व्यवच्छेद निष्ठं सरोजनिष्ठाभावप्रतियोगित्वं वस्तुतोऽवच्छेदकावच्छेदेनान्वयायोग्य इति

यावद्**भवति** हि नीलायोगो रक्तसरोजनिष्ठस्तत्प्रतियोगी नीलसरोजनिष्ठस्तद्व्यवच्छेद इति नायोग्यता **नहि** भवति पाण्डुरायोगः क्वचिदपि शङ्खे येन तद्व्यवच्छेदस्तत्प्रतियोगी भवेत्।

तात्पर्यटीका

अनुभूयमानेष्वत एव विसदृशेषु। **एतेन** नेत्यत्र यथोक्तानां भेदसादृश्यादीनां न परस्परान्वयोऽनुभवसिद्ध इति **सूचितम्। तदप्रत्ययेऽपीति।** ग्रहणाद्यर्थकधातुयोगेऽपि सामानाधिकरण्येनायोगव्यवच्छेदप्रत्ययाङ्गीकारे च ज्ञानं रजतं गृह्णात्येव नरो वेदमधीत एवेति प्रयोगप्रामाण्यापत्तेर्वक्ष्यमाणत्वादिति भावः। आत्यन्तिकत्वमवच्छेदकावच्छिन्नत्वमयोगविशेषणमिति दर्शयति। **अत्यन्तस्येति।**

एवकारार्थान्तर्गतमेवेति। अन्यथा तस्यायोगविशेषणत्वानुपपत्तेः **तथा** सत्यप्ययोगविशेषणात्यन्तिकत्वबाधेन विशिष्टाभावयोग्यत्वानपायान्नीलं सरोजं भवत्येवेत्यस्य प्रामाण्यसमर्थने सत्यपि। **उक्तयुक्त्या** विशेषणाभाव-प्रयुक्तविशिष्टाभावाबाधेन। **अतं** स्वधर्मितावच्छेदकनिष्ठस्य स्वप्रतियोगिसामाना-धिकरण्यस्यावच्छेदकं धर्मिणं रक्तसरोजादिमतिक्रम्य वर्त्तत इत्यन्तः स चासावयोगव्यवच्छेदश्चेति व्युत्पत्तिमभिप्रेत्याह **परन्त्विति। नीलायोग** इति। नीलायोगरूपो नीलायोगव्यवच्छेदाभाव इत्यर्थः। **एवमग्रे**ऽपि। **अत** एव तत्प्रतियोगीत्यादि सङ्गच्छते।

तर्कामृतम्

विशेषणसङ्गतस्य अयोगव्यवच्छेदः, यथा 'शङ्खः पाण्डुर एव' इति। विशेष्यसङ्गतस्य अन्ययोगव्यवच्छेदः, यथा, 'पार्थ एव धनुर्धरः' इत्यादौ।

तरङ्गिणी

विशेषणसंगतेति। विशेषणत्वेनाभिमतस्य बोधकं यत्पदं

तत्समभिव्याहृतेत्यर्थः। इदमुपलक्षणम्। ग्रहणाध्ययनार्थकधातुप्रकृतिकाख्यातसमभिव्याहृतेत्यपि बोध्यम्। शङ्खः पाण्डुर एवेतिवत् ज्ञानमर्थं गृण्हात्येव, द्विजो वेदमधीत एवेत्यादावपि ज्ञानेऽर्थविषयकत्वायोगव्यवच्छेदस्य द्विजे वेदाध्ययनायोगव्यवच्छेदस्य प्रत्ययात्, न तु तत्र अत्यन्तायोगव्यवच्छेदः प्रतीयते। अर्थविषयकत्वाभावे ज्ञानवृत्तित्वविरहेणात्यन्तिकत्वविरहात्। साम्प्रदायिकरीत्या तत्र तदुपपादने ज्ञानं जनं गृह्णात्येव, नरो वेदमधीत एवेत्यादेरापत्तेः। एवं गुणवद्द्रव्यं भवत्येवेत्यादावप्येषैव रीतिरनुसन्धेया। अत एवाननुगमाद्दीधितिकृता सर्वत्रैवान्ययोगव्यवच्छेद एवाङ्गीकृतः। विशेष्यसंगतेति पूर्ववत्। **अन्ययोगेति।** अन्यस्मिन्विशेष्यभिन्ने योगस्य विशेषणयोगस्य व्यवच्छेदः। विशेषणाभाव इति यावत्।

चषकम्

अत एव तद्व्यवच्छेदस्य सर्वत्र शङ्खे प्रतीतियोग्यतयावच्छेदकावच्छेदेनप्रतीयमानस्त्वसावयोगव्यवच्छेद इति गीयत इत्याह। **विशेषणसङ्गतस्येति।** अत्र च विशेषणस्य ग्रहणाध्ययनार्थकक्रियाविशेषस्य वा समभिव्याहरो नियामक इति क्रियान्तरस्य विशेष्यस्य वा समभिव्याहारे तदप्रत्ययोपपत्तेर्न कोऽपि दोषः। **इत्थञ्च** पूर्वोक्तं क्रियासङ्गतस्येत्येवंविधविशेषपरं सदत्राप्यनुवर्त्तत इति **बोध्यम्।** **अन्ययोगव्यवच्छेद इति।** अन्यस्मिन् विशेष्यभिन्ने योगस्य विशेषणयोगस्य तादात्म्यादेर्व्यवच्छेदोऽभाव इत्यर्थः। **अत** एव पृथिव्यामेव गन्ध इत्यत्र गन्धे जलवृत्तित्वाभावप्रतिपत्तये एवकारस्यान्यो वृत्तित्वमभावश्चेति त्रितयार्थकत्वकल्पनापेक्षया लाघवादाधेयत्वार्थकतया क्लृप्ता सप्तम्येवाव्ययीभूतस्यैकारस्यानन्तरं कल्पिता भट्टाचार्यशिरोमणिभिः।

अत्रान्योऽभावश्च द्वयमेवैवकारार्थो वस्तुतः स्नेहाद्याश्रितामेवाधेयत्वं तु वस्तुतो वृत्तित्वप्रतियोगिके एवकारार्थेऽभावे वस्तुततस्तदर्थान्तरस्यान्यस्य निरूपितत्वात्तादृशाभावप्रतियोगित्वाच्च संसर्ग**स्तथा** चान्यीयो नामान्यनिरूपितवृत्तित्वप्रतियोगिको योऽभावस्तद्वान् गन्ध इति बोध इति तु

न **सम्भवति**। आधेयताया आधेयतावत्यंवाधारसम्बन्धत्वं **न त्वा**धेयताया अभावे इत्यङ्गीकारात्।

यत्तु योगव्यवच्छेद इत्यस्य तत्सम्बन्धावच्छिन्नविशेषणाभाव इत्येवार्थः। **न चैव**मेवकारार्थे भावे तदर्थान्तरस्यान्यस्याधेयतासम्बन्धावच्छिन्न-प्रतियोगिताकत्वसम्बन्धेनान्वयसम्भवादाधेयत्वार्थकसप्तमीकल्पनमनर्थकमिति **वाच्यम्**। वृत्यनियामकस्याधेयतासम्बन्धस्याभावप्रतियोगितानवच्छेद-कतयाधेयताया अभावस्यैव ततः प्रतीतिरित्याशयेन न तथा कल्पनादित्यपि **केचित्तदपि न पार्थ** एव धुनर्धरो नान्य इत्यत्र पौनरुक्त्यापत्तेः। **नैव** तथा प्रयोक्तव्यमिति **तु न। त्वन्मुखं त्वन्मुखेनैव तुल्यं नान्येन केनचि**दित्याद्यभियुक्तप्रयोगसद्भावात्। **इत्यादाविति** सर्वत्र प्रागप्यनुषज्यते।

तात्पर्यटीका

अत एव पाण्डुरायोगस्य क्वचिदपि शङ्खेऽसत्त्वादेव। **क्रियान्तरस्येति**। **अत** एव नीलेन सरोजेन भूयत एवेत्यादौ क्रियासङ्गतैवकारेणा-त्यन्तायोगव्यवच्छेदस्यैव प्रत्यायनादित्युक्तमन्यत्र। **तदप्र**त्ययोपपत्तेरिति। पार्थ एव धनुर्धर इत्यत्रायोगव्यवच्छेदस्यैवाप्रत्ययस्य नीलं सरोजं भवत्येवेत्यादौ त्ववच्छेदकावच्छेदेन तदप्रत्ययस्य चोपपत्तेरित्यर्थः। **इत्थञ्च** किञ्चित्क्रियाविशेषसङ्गतस्यास्याप्यवच्छेदकावच्छेदेनायोगव्यवच्छेदबोधकत्वे च। **एवंविधविशेषपरं** सद्ग्रहणाध्ययनार्थकक्रियाविशेषपरं सत्। अपिरनुवृत्तक्रियासङ्गतस्येत्यनन्तरं योज्यः **अत** एव विशेषणयोगाभाव-बोधकत्वादेव।

अत्रेति तु न सम्भवतीत्येकं **मतम्**। एतन्मतेनैवकारस्य त्रितयार्थकत्वम्। नवैवकारस्यानन्तरं सप्तमीकल्पनं **किन्त्वन्यस्यै**कस्यैवकारार्थस्य स्नेहादिनिष्ठमाधेयत्वमपरस्मिन्नभावरूपे एवकारार्थे संसर्गविधया भासते। तच्चाधेयत्वमन्यनिरूपितमभावप्रतियोगि च भवतीति तयोः संसर्ग इत्याह। **वस्तुत** इत्यादि। **एतेन** जलस्य स्वनिरूपितवृत्तित्वप्रतियोगिकत्वमभावे संसर्गो दर्शितः। जलस्याधेयतासम्बन्धावच्छिन्नाभावे जलवृत्तित्वाभावसमनैयत्यादे

कत्वाभिप्रायेण जलवृत्तित्वाभाव एव पृथिव्यामेव गन्ध इति वाक्याधीनप्रतीतिविषयो भवतीति स्पष्टमाचष्टे। **तथा चेति**। वक्ष्यमाणमताद्भेदं दर्शयत्य**न्यीय** इति। तदेवाहा**न्यनि**रूपितेत्यादि। जलनिरूपितं हि वृत्तित्वं तादृशवृत्तित्वाश्रये स्नेहादावेव जलस्य सम्बन्धो न त्वाधेयत्वाभावे इत्याशयेनैतन्मतं दूषयति। **आधे**यताया इति। **इत्य**ङ्गीकारादिति। यथा कार्यकारणभावः कार्यकारणयोः परस्परं सम्बन्धो **न तु** कारणस्य कार्यत्वाभावेन सहकार्यत्वं तथा। **एवमे**वाधाराधेयभावोऽप्याधाराधेययोरेव सम्बन्ध इत्युपगमादित्याशयः।

एवं विशेषणयोग्यस्य प्रतियोगितावच्छेदकसम्बन्धविधया शाब्दधीविषयत्वे विवक्षिते। **पौन**रुक्त्यापत्तेरिति। पार्थान्यस्मिन् धनुर्धरभेदावगमे पुनर्नान्य इत्यभिधाने पौनरुक्त्यापत्तेरिति भावः। **अस्माकं** त्वेवकारेण धनुर्धरतादात्म्याभावो बोधितो नञा धनुर्धरभेद इत्यपौनरुक्त्यम्। **अनुषज्यत** इति क्वेत्याकाङ्क्षायाः सप्तम्यन्तेन विना तयोरप्यशान्तेरित्याशयः।

तर्कामृतम्

एवं दिशा सर्वत्र बोध्यम्।

इति श्रीजगदीशभट्टाचार्य्यविरचितं तर्कामृतं सम्पूर्णम्।

तरङ्गिणी

एवमिति। इवार्थः सादृश्यते। तच्च भेदो धर्मश्च। चन्द्र इव मुखमित्यादौ चन्द्रपदार्थस्य भेदे प्रतियोगित्वेन धर्मे आधेयत्वेनान्वयात्। तयोश्च मुखे आश्रयतासंसर्गेणान्वयाच्चांशप्रतियोगिकभेदवत्त्वे सति चन्द्रवृत्तिधर्मवन्मुखमिति बोधः। प्राद्युपसर्गाणां तु द्योतकत्वम्। तच्च तात्पर्यग्राहकत्वम्। धातूनामनेकार्थत्वात्। न च वैपरीत्यम्। उपसर्गाभावेऽपि धातोरर्थप्रतीतेर्द्योतकत्वस्य क्लृप्तत्वात्। केवलादुपसर्गादर्थप्रतीत्यभावादित्यादि।

॥ इति श्रीमुकुन्दभट्टकृता तर्कामृततरङ्गिणी सम्पूर्णा॥

चषकम्

एवं दिशेति। यत्र विशिष्टशक्तिर्न घटते तत्र खण्डशक्त्यैव विशिष्टान्वबोधः शाब्दो भवतीति सर्वत्रैव शाब्दबोधप्रकारो बोध्य इत्यर्थः।

यथा चन्द्र इव मुखमित्यादाविवार्थः सादृश्यं तत्र च भेदोधर्मश्चेव शब्देन प्रतिपाद्यते तत्र चन्द्रादेः प्रतियोगित्वेन भेदे धर्मे त्वाधेयत्वेन तयोश्**चैकविशिष्टेऽपरवैशिष्ट्यमिति न्यायेन** मुखेऽन्वय इति चन्द्रप्रतियोगिकभेदवत्त्वे सति चन्द्रवृत्तिधर्मवन्मुखमित्यन्वयबोध इति नाननुगमः। **यथा वा** घटत्वमित्यादावितरवृत्तित्वमभावः साकल्यं वृत्तिमच्चेति विशकलितं पञ्चकं भावप्रत्ययार्थो **न तु** विशिष्टमितरावृत्तित्वस्याप्रसिद्धेर्घटत्वादौ बाधाच्च। **तत्र** प्रकृत्यर्थस्य भावप्रत्ययार्थैकदेशे भेदे प्रतियोगितया साकल्ये चानुयोगितयाऽन्वये विशिष्टलाभः शाब्दो भवति। तत्रापि घटेतरावृत्तित्वसकलघटवृत्तिलयोर्विशिष्टयोरेकविशिष्टेऽपरवैशिष्ट्यमिति न्यायेनान्वयाद्घटेतरावृत्तित्वे सति सकलघटवृत्तित्वेन घटत्वावगतिः। **पुष्प**वन्तावादिपदं तु नानार्थक**मेव**।

तात्पर्यटीका

सर्वत्रेति पदमूलिकां भ्रान्तिमपाकरोति **यत्रेति**। विशिष्टशक्तिघटनायां तु खण्डशक्तिकल्पनागौरवादुपेक्षणीयेत्याशयः।

अप्रसिद्धेरिति। इतरवृत्तित्वप्रतियोगिकाभावस्य द्रव्यत्वसाधारण्याद्-घटत्वमित्यादौ द्रव्यत्वबोधवारणायेतरवृत्तित्वत्वावच्छिन्नाभावोऽभावप्रत्ययार्थो वाच्य इति वृत्तित्वत्वरूपलघुसमनियतोक्तगुरुधर्मावच्छिन्नाभावानङ्गीकारे तादृशाभावाप्रसिद्धेरित्यर्थः। **तदङ्गीकारे** तु तादृशाभावस्यावृत्तौ प्रसिद्धावपि घटत्वादौ न सम्भव इत्याह **घटत्वादाविति** नानार्थकादपि परस्परमन्वयेऽपि परस्परपरिहारेणाऽपि यादृशानेकार्थोपस्थित्यभावस्तादृशानेकार्थोपस्थाकपदस्य शक्तिं दर्शयति। **पुष्पव**न्तावादिपदं त्विति।

चषकम्

परन्तु वस्तुगत्या दिवाकरविषयकः अन्यो निशाकरविषयको बोधस्तं जनयतु तत्पदमिति विशिष्टेच्छारूपैकैव शक्तिरिति युगपद्वृत्तिविषयद्वयोपस्थितिसहकारेणामुष्यापरपदार्थेनान्वयबोधोपधानं द्वयोरेव न प्रत्येकमिति व्युत्पत्तिभेदसूचनायैव चैकयोक्त्येत्युक्तिः। **अत एव** वृषाकपायीत्यत्र प्रकृतिप्रत्यययोः परस्परं तादूरूप्येण स्वार्थान्वयबोधनिर्वाहः। **एष** एव च फलव्यापारयोः पृथक्शक्तिवादिनामभिप्रायः **परन्तु** फलव्यापारविषयकत्वयोः परस्परवच्छेद्यावच्छेदकभावावगाही यो बोधस्तद्विषयिषी या वक्त्रिच्छा सा तत्र सहकारिणी वाच्या सा च फलावच्छिन्नव्यापारस्य व्यापारावच्छिन्नफलस्य वा बोधं गाहमानेति तद्बलात् फलव्यापारयोरपि परस्परमवच्छेद्यावच्छेदकभावावगाह्येव धातोरपि तत् समानाकारो बोधो भवेदिति न पुष्पवन्तावादिपदादिवात्रापि फलव्यापारयोर्विश्रृङ्खलयोर्बो**धः**।

अन्योन्यादिपदस्य तु स्वसमभिव्याहृतपदार्थतावच्छेदकाच्छिन्नमर्थस्तस्य स्वप्रकृतिकद्वितीयार्थफले तस्य चानुकूलत्वस्वावच्छिन्नभेदसामानाधिकरण्योभयसम्बन्धेन क्रियायामन्वयः। कर्मव्यतिहारे द्विर्भावस्य बलादिति सुन्दोपसुन्दनिष्ठप्राणवियोगानुकूलातद्व्यधिकरणान्वया क्रिया तदनुकूलकृतिमन्तौ ताविति सुन्दोपसुन्दावन्योऽन्यं जघ्नतुरिति वाक्याधीनो बोध इति विशेषो **यद्यपि** बहुवक्तव्य**स्तथापि** विस्तरभिया **विरम्यते**।

तात्पर्यटीका

अत्र च सूर्यत्वचन्द्रत्वयोर्व्यासज्यवृत्तिरेका शक्यतावच्छेदकता परस्परविशेषणविशेष्यभावानापन्नयोरेव स्वीक्रियत इति न परस्परपरिहारेण शक्तिभ्रमं विना बोधो न वा नानार्थकपदवच्छक्तिभेद इत्याह **परन्त्विति**। **एक**योक्त्येत्युक्तिरिति। तदर्थस्तु सूर्याचन्द्रमसावेकशक्तिविशिष्ट-

पुष्पवन्तपदप्रतिपाद्याविति। उद्देश्यविधेयभावमहिम्नावच्छेद्यावच्छेदकभावावगम इत्येकशक्त्यधीनप्रतिपत्तिविषयतावच्छेकत्वं सूर्यत्वचन्द्रत्वयोर्लभ्यत इति **दिक्**। **एष** एव चेति। **अन्यथै**ककमात्रबोधापत्तेरित्यर्थः। **कथं** तर्हि क्वचित् फलावच्छिन्नो व्यापारः क्वचित् व्यापारावच्छिन्नं फलं बुद्ध्येतेत्याशङ्कायां तत्रैवकारस्थले सहकार्यन्तरं क्रियाविशेषादिकमिवात्राख्यातविशेषादिकमाह। **परन्त्विति**। **धातो**: कर्तृकर्माख्यातसमभिव्याहतात्। पुष्पवन्तावादिपदादिवेत्युपलक्षणमेवकारादिभ्य इव नियतविशेषणविशेष्यभावावगाहीत्यपि बोध्यमित्याह **तत्समानाकार इति**। **तेन** ततोऽपि वैलक्षण्यादस्य पृथक्प्रसङ्ग इति **बोध्यम्**।

व्युत्पत्तिवैचित्र्यमभिप्रेत्याहा**ऽन्योन्या**दिपदस्य त्विति। व्युत्पत्तिगमकं दर्शयति। **कर्मव्यतिहार इति**। **बहुवक्तव्य इति**। **यथा** सर्वं सशेषयश्नीयादित्यत्र समभिव्याहृतक्रियाकर्मताशून्यो भागः शेषस्तद्घटकस्याभावरूपविशेषणस्यैव साहित्यं सहशब्दार्थो योग्यतावशात् समभिव्याहृतक्रियाकर्मत्वेऽन्वेति। सर्वपदमहिम्ना **साहित्यमपि** परिवेषणविशिष्टतत्तज्जात्यवच्छिन्न एव जातिरप्यनुगतप्रतीतिविषयधर्ममात्रं तेनैकजातीयान्न प्रकारभेदेऽपि सशेषता लभ्यते इति भुजिक्रियाकर्मत्वाभावसहितपरिविष्टान्नवृत्तिकर्मतानिरूपकं भोजनमिष्टसाधनमिति शाब्दबोधः। **एवमशेषमित्यत्र** सहितेत्यस्य स्थाने शून्येत्यन्यत् स्वयमूह्यं सुधीभिरिति भुजिक्रियाकर्मत्वाभावशून्यपरिविष्टघृतपायसवृत्तिकर्मतानिरूपकं भोजनमिष्टसाधनमिति घृतं पायसं चाशेषमश्नीयादिति वाक्याधीनो बोध **इत्यलम्**।

चषकम्

चषकसुवर्णस्पर्शं दिनकरकरकृतपरामर्शम्।
जगदीशमथनकल्पं पिवन्तु तर्कामृतं तदाकल्पम्॥१॥

सूत्रं स्वयं न वलितं मणिर्नघटितस्तथापि चास्माकम्।
मालाकाराणामिव ममता ग्रन्थे स्वकीयकौशल्यात्॥२॥

इति श्रीजड्युपनामकगङ्गारामविरचितस्तर्कामृतचषक: सम्पूर्ण:।।

वर्षे वर्षाकाले चषकं चन्द्राग्निवसुवसुमतीमिलिते।
व्यलिखद्गङ्गारामो गङ्गारामोभयस्य सन्तोषाय।।

श्रीकृष्णोऽवतु

तात्पर्यटीका

स्वकीर्त्यनुवृत्तये **आशास्ते**। **चषकेति**। चषक: सुवर्णस्य साभिप्रायपदस्य स्पर्शोऽभिप्रेतार्थग्रहणोपायो यस्य तत्। दिनकरेणास्मन्मातामहेन कर्त्रा करेण लेखनसाधनत्वात् करणेन कृत: परामर्श: शोधनं यस्य तत्। जगदीशस्य ग्रन्थकर्त्तुर्मथनं शास्त्रार्णवालोडनं दुरूहशास्त्रमननमिति यावत् तस्य कल्पो नाम ग्रहणे कर्त्तव्ये नामैकदेशग्रहणात् कल्पतरुरूपं फलं कामितार्थप्रकाशकत्वात् तत्। तदित्थं व्याख्यातं तर्कामृतमाकल्पं पिवन्त्वित्याशीर्व्युत्पित्सव इत्यार्थिकमत्र कर्त्तृपदमध्याहार्यम्।।१।। **सूत्रमिति**। सूत्रं न्यायवैशेषिकादीनां गुणो वा स्वयं मया न वलितं कृतं वा मणिग्रन्थो गुटिका वा न घटित उत्पादितस्तथापि **स्वातन्त्र्याभावेऽप्येतेन** तत्कार्ये तेषामेव स्वातन्त्र्यं दर्शितमस्माकं तु मालाकारणामिव ग्रन्थे ग्रथने वचनसन्दर्भे वा स्वकीयकौशल्यात् सन्दर्भाच्युतेर्ममतास्ति। अत एव मया समर्पितमिति प्रागभ्यधायीत्यर्थ:।।२।।

समर्पिता बुद्धिमतां वरेण्ये पुरुषोत्तमे।।
असारहृदयोऽप्येषा पञ्चालीव विलोक्तयताम्।।१।।

विस्तृतन्यायशास्त्रस्य सङ्क्षेपोऽयं कृतो मया ९०००
ग्रन्थसङ्ख्या वियद्व्योमखाङ्ककैर्लोकविश्रुता।।२।।

इति श्रीजड्युपनामकगङ्गारामविरचिता चषकतात्पर्यटीका सम्पूर्णा

चषकसनाभिर्लिखिता लिखता तात्पर्यटीकासौ।
गङ्गारामेण मया विदुषो मनसोऽस्तु तोषाय।। ।।

श्रीसाम्बसदाशिवाय नम:।। ।।ॐ प्रत्यङ्गिरादेव्यै नमो नम:।।

ॐ।। ॐ।। ॐ।।

प्रो. पीयूषकान्तदीक्षितः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे साम्प्रतं न्यायवैशेषिकविभागाध्यक्षः कुलानुशासक (प्रॉक्टर) पदमप्यधितिष्ठति ।

अयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य स्नातकः। तत्रैव वाराणसेयैः न्यायशास्त्रपरम्पराविद्भिः नव्यन्यायशास्त्रमधीत्य, तत्र व्युत्पत्तिमासाद्य साम्प्रतमपि नव्यन्यायशास्त्रं तदुपयोगि शास्त्रान्तरञ्च अध्ययनाध्यापननिबन्धादिभिः विस्तारयितुमहर्निशं यतते ।

अयम् ५.२.६४ ख्रिष्टाब्दे लब्धजनिः १९८२ ख्रिष्टाब्दे सर्वाधिकैः अङ्कैः प्रथमश्रेण्यां नव्यन्यायाचार्यपरीक्षां समुत्तीर्य समासादितस्वर्णपदकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयादेव १९९० ख्रिष्टाब्दे लब्धविद्यावारिधिपदवीकः दिल्लीविश्वविद्यालयतः प्रथमश्रेण्यां संस्कृत एम. ए. परीक्षोत्तीर्णश्च ।

व्याप्तिसप्तकसारस्य लेखकः, चिन्तामणिरहस्य-दीधित्यादिसमुद्भासितस्य व्याप्तिसप्तकस्य शब्दशक्तिप्रकाशिकायाश्च सम्पादकः प्रो. दीक्षितः सम्प्रति विषयताविमर्शनामधेयं ग्रन्थं रचयति ।

प्रायश्चत्वारिंशत्सङ्ख्याका अस्य निबन्धाः प्रतिष्ठितासु शोधप्रवाणासु पत्रिकासु प्रकाशिताः । अयमुत्तरप्रदेशीयमऊमण्डलान्तर्गतस्य 'हरहुआ' ग्रामस्य वास्तव्यः विद्वत्कुलप्रसूतो जन्मप्रभृत्येव शास्त्रीयवासनावासितः ।

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Agni Mahapurana
664 pp 500.00

Bhagavata Mahapurana-
4vols 2304 pp Set 1800.00

Bhavishya Mahapurana
3vols 1400 pp Set 1500.00

Brahma Mahapurana
728 pp 500.00

Devi Bhagavata Mahapurana
1154 pp 800.00

Ganesha Purana
832 pp 1993 500.00

Garuda Mahapurana
668 pp 500.00

Harivansha Purana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
1802 pp 2vols set 1000.00

Kurma Mahapuran
298 pp 400.00

Linga Mahapurana
774 pp 400.00

Markandeya Mahapurana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
828 pp 500.00

Narada Mahapurana
932 pp 600.00

Padma Mahapurana
2381pp 4vols set 2000.00

Shiva Mahapurana
1504 pp 2vols set 1000.00

Shiva Mahapurana (Small Type)
412 pp 500.00

Skanda Mahapurana
5600 pp 8 vols set 4000.00

Skanda Mahapurana (small type)
1452 pp 3vols set 2000.00

Vamana Mahapurana
472 pp 400.00

Vayu Mahapurana
540 pp 500.00

Vishnudharmottara Mahapurana
1246 pp 900.00

Vishnu Mahapurana-with two commentaries
680 pp 500.00

विष्णुमहापुराण
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
—डा० श्रद्धा शुक्ला
pp. 1000 2 vols Rs. 225.00

मत्स्य पुराण
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
—डॉ० श्रद्धा शुक्ला
Demy 1/8 2 vols set Press

Ekamara Purana
490 pp 150.00

Kalki Purana
316pp 120.00

Kuber Purana
(Text With Study) pp 752 Rs.140.00

Narasimha Purana
380 pp 100.00

Saura Purana
290 pp 100.00

Srimadbhargavopapuranam
—Brijesh Kumar Shukla
pp 348 Rs. 124.00

Vasuki Purana
260 pp 100.00

Ashtadasha Purana Darpana
·Contents of 18 Puranas
432 pp 180.00

PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

Vishnu Purana – *H.H. Wilson*
1065 pp 2 vols Set 600.00

Matsya Purana – *N.S. Singh*
1252 pp 2 vols 600.00

Narasimha Purana –*Dr.S.Jena*
750 pp 400.00

Kalika Purana
Prof. Biswanarayan Shastri
1770 pp 3vols set 900.00

Shiva Purana (Uttara Khanda)
(Text with Eng. Trs. & Introduction)
Demy 1/8 pp 818 Rs. 152.00

NAG PUBLISHERS
11/A (UA) Jawahar Nagar, Delhi - 110007 (INDIA)